कार्यः । न च वाक्यजन्यज्ञानस्यापरोक्षत्वे प्रमाणासंभव इति वाच्यम् । तत्त्वमस्यादिवाक्यजन्यं ज्ञानमपरोक्षम् । अपरोक्षविषयकत्वात् । चाक्षुसघटादिप्रत्यक्षवदित्यनुमानस्य प्रमाणत्वात् । न च विषयगतापरोक्षत्वस्य नीरूपत्वाद्धेत्वसिद्धिरिति वाच्यम् । अज्ञानविषयचित्त्वतत्तादात्म्यापन्नत्वान्यतररूपस्य तस्य सुनिरूपत्वात् । यथा हि घटादौ चक्षुःसन्निकर्षेणांतःकरणवृत्तिदशायां तदधिष्ठानचैतन्याज्ञाननिवृत्तौ तच्चैतन्यस्याज्ञानविषयता तद्घटस्याज्ञानविषयचैतन्यतादात्म्यापन्नत्वं चापरोक्षत्वम् । तथा तत्त्वमस्यादिवाक्येन शुद्धचैतन्याकारांतःकरणवृत्त्युत्थापने सति तदज्ञानस्य निवृत्तत्वेनैव तत्त्वस्याज्ञानविषयत्वाच्चैतन्यस्यापरोक्षत्वमिति न हेत्वसिद्धिः । न चाप्रयोजकत्वं ज्ञानगम्यत्वापरोक्षत्वं प्रत्यक्षपरोक्षविषयकत्वेन प्रयोजकत्वात् । नत्विंद्रियजन्यत्वं मनस इंद्रियत्वाभावेन सुखादिपरत्वेऽव्यभिचारात् । अथवाभिव्यक्तचैतन्याभिन्नतया भासमानत्वं विषयस्यापरोक्षत्वम् । अभिव्यक्तत्वं च निवृत्त्यावरणकत्वं परोक्षवृत्तिस्थले वावरणनिवृत्त्यभावन्नातिव्याप्तिः । सर्पादिभ्रमजनकदोषवतस्तु नायं सर्पः किंतु रज्जूरिति वाक्येन जायमाना वृत्तिस्तु नावरणं निवर्तयतीति तत्र परोक्ष एव विषयः । वेदांतवाक्यजन्यं च ज्ञानमावरणनिवर्तकत्वादपरोक्षमेव तन्मननादेः पूर्वमुत्पन्नम् । ज्ञाननिवर्तकप्रमाणासंभावनादिदोषसामान्याभावविशिष्टस्यैव तस्याज्ञाननिवर्तकत्वात् । किंच 'तं त्वौपनिषदं पुरुषं पृच्छामी' ति श्रुतिप्रतिपन्नमुपनिषन्मात्रागम्यत्वं योगगम्यत्वेनोपपन्नं स्यात् । तस्मात्तत्त्वमस्यादिवाक्यादेवापरोक्षमिति चेन्न । अनुमानस्याप्रयोजकत्वात् । न च प्रत्यक्षं प्रति निरुक्ताक्षसामान्यं प्रतींद्रियत्वेन कारणतया तज्जन्यत्वस्यैव प्रयोजकत्वान्नित्यानित्यसाधारणप्रत्यक्षत्वे तु नकिंचित्प्रयोजकत्वमिति, तन्मते तु प्रत्यक्षविशेषे इंद्रियं कारणं तद्विशेषे च शब्दविशेष इत्येवं कार्यकारणभावद्वयं स्यात् । न च मनसोऽनिंद्रियत्वं मनस इंद्रियत्वे बाधकाभावादिंद्रियाणां मनोनाथ इति मनुष्यमिवोद्दिश्य मनुष्याणामयं राजेत्यादिवदिंद्रियेष्वेव किंचिदुत्कर्षं ब्रवीति । न तु तस्याप्यनिंद्रियत्वं तत्त्वं च षट्स्वखंडोपाधिविशेष एव । अत एव 'कर्मेंद्रियं तु पाय्वादि मनोनेत्रादि धींद्रियमि' ति 'प्रत्यक्षं स्यादैंद्रियकमप्रत्यक्षमतींद्रियमि'ति च शक्तिप्रमाणभूतकोशेऽपींद्रियाप्रमाणकज्ञानस्याप्रत्यक्षत्वं वदन् मनस इंद्रियत्वज्ञापकत्वं संगच्छते । 'इंद्रियाणि दशैकं चे' ति गीतावचनं मनस इंद्रियत्वे प्रमाणम् । किंच तत्त्वमस्यादिवाक्यजन्यं ज्ञानं शाब्दम् । शब्दजन्यत्वा 'द्यजेते' त्यादिवाक्यजन्यज्ञानवदित्यनेनापरोक्षविरोधिशाब्दत्वसाधनेन सत्प्रतिपक्षः । न चेदमप्रयोजकम् । शाब्दं प्रत्येव शब्दस्य जनकत्वेन लाघवमु-

॥ टीका ॥

लकानुकूलतर्कात् । त्वन्मते तु शब्दादपि प्रत्यक्षस्वीकारेण कार्यकारणभावद्वयकल्पने गौरवम् । अपि च मनननिदिध्यासनाभ्यां पूर्वमप्युत्पन्नम् । तव मते परोक्षमपि नाज्ञाननिवर्तकमित्यज्ञाननिवृत्तिं प्रति बाधज्ञानत्वेनैव हेतुत्वमिति गौरवम् । मम तु समाध्यभ्यासपरिपाकेनासंभावनादिसकलमलरहितेनांतःकरणेनात्मनि दृष्टे सति दर्शनमात्रादेवाज्ञाने निवृत्ते न कश्चिद्गौरवावकाशः । 'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः । यच्छेद्वाङ्मनसी प्राज्ञ' इत्यारभ्याज्ञाननिवृत्त्यर्थकेन 'मृत्युमुखात्प्रमुच्यते । इत्येतेन कठवल्लीस्थमृत्यूपदेशेन संमतोऽयमर्थ इति न कश्चिदत्र विवादः ' इति यदि तु मननादेः पूर्वमुत्पन्नं ज्ञानं परोक्षमेवेति न प्रतिबद्धत्वकृतगौरवमिति मतमाद्रियते तदपि श्रवणादिभिर्मनःसंस्कारे सिद्धेऽव्यवहितोत्तरमात्मदर्शनसंभवात्तदुत्तरं वाक्यस्मरणादिकल्पनं महद्गौरवापादकमेव । ननु न वयं केवलेन तर्केण शब्दजन्यज्ञानस्यापरोक्षत्वं वदामः किंतु श्रुत्यापि । तथाहि । 'तं त्वौपनिषदं पुरुषं पृच्छामी' ति श्रुत्या चौपनिषदत्वं पुरुषस्य नोपनिषज्जन्यबुद्धिविषयत्वमात्रं प्रत्यक्षादिगम्येप्यौपनिषदत्वे व्यवहारापत्तेः । यथा हि द्वादशकपालेऽष्टानां कपालानां सत्त्वेऽपि द्वादशकपालसंस्कृतेनाष्टाकपालादिव्यवहारः । यथा द्विपुत्रादावेकपुत्रादिव्यवहारः । तथात्रापि । नान्यत्र तथा व्यवहार इति । उपनिषन्मात्रगम्यत्वमेव प्रत्ययार्थः । तच्चमनोगम्यत्वेऽनुपपन्नमिति चेन्न । नहि प्रत्ययेनोपनिषद्भिन्नं सर्वं कारणत्वेन व्यावर्त्यते । शब्दापरोक्षवादिना त्वयाप्यात्मपरोक्षे मनआदीनां करणत्वस्यांगीकारात् । किंतु पुराणादिशब्दांतरमेव 'श्रोतव्यः श्रुतिवाक्येभ्यः' इति स्मरणात्स चार्थो ममापि संमत इति न किंचिदेतत् । प्रमाणांतरव्यावृत्तौ तात्पर्यकल्पनं चात्मपरोक्षे शब्दस्य प्रमाणत्वे सिद्ध एव वक्तुमुचितम् । शब्दांतरव्यावृत्तितात्पर्यं तु श्रुत्यादिसंमतत्वात्कल्पयितुमुचितमेव । एवं स्थिते 'मनसैवानुद्रष्टव्यं मनसैवेदमाप्तव्यमि' त्यादिश्रुतयोऽप्यांजस्येन प्रतिपादिता भवेयुः । यत्तु कैश्चिदुक्तं । दर्शनवृत्तिं प्रति मनोमात्रस्योपादानत्वपरायत्ताः श्रुतयो न विरुध्यंत इति तदतीव विचारासहम् । यतः प्रमाणाकांक्षायां प्रवृत्तास्ताः कथमुपादानपरा भवेयुः । 'कामः संकल्पो विचिकित्से' त्यादिश्रुत्या सावधारणया सर्वासां वृत्तीनां मनोमात्रोपादानकत्वे बोधिते आकांक्षाभावेनोपादानतात्पर्यकत्वेन वर्णयितुं कथं शक्येरन् । पूर्वं द्वितीयवल्यां प्रणवस्य ब्रह्मबोधकत्वेनोक्तेस्तस्याप्यपरोक्षहेतुत्वमिति शंका

॥ टीका ॥

निवारयितुं 'मनसैवानुद्रष्टव्यमि' त्यादि सावधारणवाक्यानीत्येव वर्णयितुं शक्यानि स्युरित्यलमतिवाग्जालेन । वस्तुतस्तु योगिनां समाधौ दूरविप्रकृष्टपदार्थज्ञानं सर्वशास्त्रप्रसिद्धं न परोक्षं । तदानीं परोक्षसामग्र्यभावात् । नापि स्मरणं । तेषां पूर्वविशिष्याननुभवात् । नापि सुखादिज्ञानवत्साक्षिरूपं । अपसिद्धांतात् । नाप्यप्रमाणकं प्रमासामान्ये करणनियमात् । नापि चक्षुरादिजन्यं । तेषामसन्निकर्षात् । तस्मान्मानसिकी प्रमैव सा वाच्येति मनस इंद्रियत्वं प्रमाणत्वं च दूरमपह्नवमेवेति । येऽपि योगश्रुत्योः समुच्चयं कल्पयंति तेषामपि पूर्वोक्तदूषणगणस्तदवस्थ एव । तस्माद्योगजन्यसंस्कारसचिवमनोमात्रगम्य आत्मेति सिद्धं । न च कामिनीं भावयतो व्यवहितकामिनीसाक्षात्कारस्येव भावनाजन्यत्वेनात्मसाक्षात्कारस्याप्रमात्वप्रसंगः । अबाधितविषयत्वात् दोषजन्यत्वाभावाच्च । कामिनीसाक्षात्कारस्य तु बाधितविषयत्वाद्दोषजन्यत्वाच्चाप्रामाण्यं न । भावनाजन्यत्वात् । न च भावनासमाधेर्ज्ञापकत्वे प्रमाणांतरापातः । तस्या मनःसहकारित्वात्प्रमाणनिरूपणानिपुणैर्नैयायिकादिभिरपि योगजप्रत्यक्षस्यालौकिकप्रत्यक्षेऽतर्भावः कृतः । योगजालौकिकसन्निकर्षेण योगिनो व्यवहितविप्रकृष्टसूक्ष्मार्थमात्मानमपि यथार्थं पश्यंति । तथा च पातंजले सूत्रे । "ऋतंभरा तत्र प्रज्ञा श्रुतानुमानप्रज्ञाभ्यामन्यविषयाविशेषार्थत्वात्" तत्र समाधौ या प्रज्ञास्याः श्रुतं श्रवणं शाब्दबोधः । अनुमननमनुमानं यौक्तिकज्ञानं तद्रूपप्रज्ञाभ्यामन्यविषया । कुतः । विशेषार्थत्वात् । विशेषो निर्विकल्पोऽर्थो विषयो यस्याः सा तथा तस्या भावस्तथात्वं तस्माच्छब्दस्यापदार्थतावच्छेदकपुरस्कारेणैवानुमानस्य व्यापकत्वावच्छेदकपुरस्कारेणैव धीजनकत्वनियमेन तद्ग्रहणे योग्यविशेष्यमात्रपरत्वादित्यर्थः । अत्र बादरायणकृतं भाष्यं । श्रुतमागमविज्ञानं तत्सामान्यविषयं नह्यागमेन शक्यो विशेषोऽभिधातुं कस्मान्नहि विशेषेण कृतसंकेतः शब्द इत्यारभ्य समाधिप्रज्ञानिर्ग्राह्य एव सविशेषो भूतसूक्ष्मगतो वा पुरुषगतो वेति । योगबीजे । 'ज्ञाननिष्ठो विरक्तोऽपि धर्मज्ञोऽपि जितेंद्रियः । विना योगेन देवोऽपि न मोक्षं लभते प्रिये ।' किंच । 'तदेव सक्तः सह कर्मणेति लिंगं मनो यत्र निषिक्तमस्ये' ति श्रुतेः । 'कारणं गुणसंगोऽस्य सदसद्योनिजन्मसु' इति स्मृतेश्च देहावसानसमये यत्र रागाद्युद्बुद्धो भवति तामेव योनिं जीवः प्राप्नोतीति योगहीनस्य जन्मांतरं स्यादेव मरणसमये समुद्भुतवैक्लव्यस्यायोगिना वारयितुमशक्यत्वात् । तदुक्तं योगबीजे । 'देहावसानसमये चित्ते यद्यद्विभावयेत् । तत्तदेव भवेज्जीव इत्येवं जन्मकार-

॥ टीका ॥

रणम् । देहांते किं भवेज्जन्म तन्न जानंति मानवाः । तस्माज्ज्ञानं च वैराग्यं जपश्च केवलं श्रमः । पिपीलिका यदा लग्ना देहे ज्ञानाद्विमुच्यते । असौ किं वृश्चिकैर्दष्टो देहांते वा कथं सुखी ॥' इति । योगिनां तु योगबलेनांतकालेऽप्यात्मभावनया मोक्ष एवेति न स्याज्जन्मांतरं । तदुक्तं भगवता । 'प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव ।' इत्यादिना । 'शतं चैका हृदयस्य नाड्यः' इत्यादि श्रुतेश्च । न च तत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानजनकत्वे तद्विचारस्य वैयर्थ्यमेवेति शक्यम् । वाक्यविचारजन्यज्ञानस्य योगद्वाराऽपरोक्षज्ञानसाधनत्वात् । अत्र च योगबीजे गौरीश्वरसंवादो महानस्ति ततः किंचिल्लिख्यते । 'देव्युवाच । ज्ञानिनस्तु मृता ये वै तेषां भवति कीदृशी । गतिः कथय देवेश कारुण्यामृतवारिधे ॥ ईश्वर उवाच ॥ देहांते ज्ञानिना पुण्यात्पापात्फलमवाप्यते । यादृशं तु भवेत्तत्तद्भुक्त्वा ज्ञानी पुनर्भवेत् ॥ पश्चात्पुण्येन लभते सिद्धेन सह संगतिम् । ततः सिद्धस्य कृपया योगी भवति नान्यथा । ततो नश्यति संसारो नान्यथा शिवभाषितम् ॥ देव्युवाच ॥ ज्ञानादेव हि मोक्षं च वदंति ज्ञानिनः सदा ॥ न कथं सिद्धयोगेन योगः किं मोक्षदो भवेत् ॥ ईश्वर उवाच ॥ ज्ञानेनैव हि मोक्षो हि तेषां वाक्यं तु नान्यथा ॥ सर्वे वदंति खड्गेन जयो भवति तर्हि किम् । विना युद्धेन वीर्येण कथं जयमवाप्नुयात् । तथा योगेन रहितं ज्ञानं मोक्षाय नो भवेत् ॥' इत्यादि । ननु जनकादीनां योगमंतरेणाप्यप्रतिबद्धज्ञानमोक्षयोः श्रवणात्कथं योगादेवाप्रतिबद्धज्ञानं मोक्षश्चेति चेत् । उच्यते । तेषां पूर्वजन्मानुष्ठितयोगजसंस्काराज्ज्ञानप्राप्तिरिति पुराणादौ श्रूयते । तथाहि ॥ 'जैगीषव्यो यथा विप्रो यथा चैवासितादयः । क्षत्रिया जनकाद्यास्तु तुलाधारादयो विशः । संप्राप्ताः परमां सिद्धिं पूर्वाभ्यस्तस्वयोगतः । धर्मव्याधादयः सप्त शूद्राः पैलवकादयः । मैत्रेयी सुलभा शार्ङ्गी शांडिली च तपस्विनी । एते चान्ये च बहवो नीचयोनिगता अपि । ज्ञाननिष्ठां परां प्राप्ताः पूर्वाभ्यस्तस्वयोगतः ॥' इति । किंच । पूर्वजन्मानुष्ठितयोगाभ्यासपुण्यतारतम्येन केचिद्ब्रह्मत्वं केचिद्ब्रह्मपुत्रत्वं केचिद्देवर्षित्वं केचिद्ब्रह्मर्षित्वं केचिन्मुनित्वं केचिद्भक्तत्वं च प्राप्ताः संति । तत्रोपदेशमंतरेणैवात्मसाक्षात्कारवंतो भवेयुः । तथाहि । हिरण्यगर्भवसिष्ठनारदसनत्कुमारवामदेवशुकादयो जन्मसिद्धा इत्येव पुराणादिषु श्रूयते । यत्तु ब्राह्मण एव मोक्षाधिकारीति श्रूयते पुराणादौ तद्योगिपरं । तदुक्तं गरुडपुराणे । "योगाभ्यासो नृणां येषां नास्ति जन्मांतराहृतः । योगस्य प्राप्तये तेषां

मू० ज्ञात्वा सुषुम्नासद्भेदं कृत्वा वायुं च मध्यगम् ॥
स्थित्वा सदैव सुस्थाने ब्रह्मरंध्रे निरोधयेत् ॥ १६ ॥
सूर्याचंद्रमसौ धत्तः कालं रात्रिंदिवात्मकम् ॥
भोक्त्री सुषुम्ना कालस्य गुह्यमेतदुदाहृतम् ॥ १७ ॥

॥ टीका ॥

शूद्रवैश्यादिकक्रमः । स्त्रीत्वाच्छूद्रत्वमभ्येति ततो वैश्यत्वमाप्नुयात् । ततश्च क्षत्रियो विप्रः कृपाहीनस्ततो भवेत् । अनूचानः स्मृतो यज्वा कर्मन्यासी ततः परम् । ततो ज्ञानित्वमभ्येति योगी मुक्तिं क्रमाल्लभेदि' ति । शूद्रवैश्यादिक्रमाद्योगी भूत्वा मुक्तिं लभेदित्यर्थः । इत्थं च योगे सर्वाधिकारश्रवणाद्योगोत्पन्नतत्त्वज्ञानेन सर्व एव मुच्यंत इति सिद्धं । योगिनस्तु भ्रष्टस्यापि न शूद्रादिक्रमः । ' शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ अथवा योगिनामेवे ' त्यादि भगवद्वचनादित्यलम् ॥ १५ ॥

प्राणमनसोर्लयं विना मोक्षो न सिध्यतीत्युक्तं । तत्र प्राणलयेन मनसोऽपि लयः सिध्यतीति तल्लयरीतिमाह ॥ ज्ञात्वेति ॥ सदेव सर्वदैव सुस्थाने शोभने स्थाने 'सुराज्ये धार्मिके देशे ' इत्याद्युक्तलक्षणे स्थित्वा स्थितिं कृत्वा वसतिं कृत्वेत्यर्थः । सुषुम्ना मध्यनाडी तस्याः सद्भेदं शोभनं भेदनप्रकारं ज्ञात्वा गुरुमुखाद्विदित्वा वायुं प्राणं मध्यगं मध्यनाडीसंचारिणं कृत्वा ब्रह्मरंध्रे मूर्धावकाशे निरोधयेन्नितरां रुद्धं कुर्यात् । प्राणस्य ब्रह्मरंध्रे निरोधो लयः प्राणलये जाते मनोऽपि लीयते । तदुक्तं वासिष्ठे । 'अभ्यासेन परिस्पंदे प्राणानां क्षयमागते । मनः प्रशममायाति निर्वाणमवशिष्यते ॥' इति । प्राणमनसोर्लये सति भावनाविशेषरूपसमाधिसहकृतेनांतःकरणेनाबाधितात्मसाक्षात्कारो भवति तदा जीवन्नेव मुक्तः पुरुषो भवति ॥ १६ ॥

प्राणलये कालजयो भवतीत्याह ॥ सूर्याचंद्रमसाविति ॥ सूर्यश्च चंद्रमाश्च सूर्या-

॥ भाषा ॥

ज्ञात्वेति ॥ सदा सर्वदा सुंदर राज्यहोय धर्मात्मा देश होय सुंदर स्थान होय तहां निवास करकें फिर सुषुम्ना मध्यनाडीके सुंदर भेदन प्रकार गुरुमुखसें जानकरकें प्राणवायुकूं मध्यनाडी सुषुम्नामें चलन लगे एसो करकें फिर ब्रह्मरंध्रमें लय करदे प्राणको लय होतेंही मनकोबी लय होय हे ॥ १६ ॥

अब प्राणको लय होय तब कालकोबी जय होय हे ये कहें हें ॥ सूर्याचंद्रमसावि-

मू० द्वासप्ततिसहस्राणि नाडीद्वाराणि पंजरे ॥
सुषुम्ना शांभवी शक्तिः शेषास्त्वेव निरर्थकाः ॥ १८ ॥

॥ टीका ॥

चंद्रमसौ ॥ "देवताद्वंद्वे चे" त्यानङ् । रात्रिश्च दिवा च रात्रिंदिवं । 'अचतुर' त्यादिना निपातितः । रात्रिंदिवं आत्मा स्वरूपं यस्य स रात्रिंदिवात्मकस्तं रात्रिंदिवात्मकं कालं समयं धत्तो विधत्तः कुरुतः । सुषुम्ना सरस्वती कालस्य सूर्याचंद्रमोभ्यां कृतस्य रात्रिंदिवात्मकस्य समयस्य भोक्त्री भक्षिका विनाशिका । एतद्गुह्यं रहस्यमुदाहृतं कथितं । अयं भावः । सार्धं घटिकाद्वयं सूर्यो वहति सार्धं घटिकाद्वयं चंद्रो वहति । यदा सूर्यो वहति तदा दिनमुच्यते । यदा चंद्रो वहति तदा रात्रिरुच्यते । पंचघटिकामध्ये रात्रिंदिवात्मकः कालो भवति । लौकिकाहोरात्रमध्ये योगिनां द्वादशाहोरात्रात्मकः कालव्यवहारो भवति । तादृशकालमानेन जीवानामायुर्मानमस्ति । यदा सुषुम्नामार्गेण वायुर्ब्रह्मरंध्रे लीनो भवति तदा रात्रिंदिवात्मकस्य कालस्याभावादुक्तं 'भोक्त्री सुषुम्ना कालस्ये'ति । यावद्ब्रह्मरंध्रे वायुर्लीयते तावद्योगिन आयुर्वर्धते । दीर्घकालाभ्यस्तसमाधिर्योगी पूर्वमेव मरणकालं ज्ञात्वा ब्रह्मरंध्रे वायुं नीत्वा कालं निवारयति स्वेच्छया देहत्यागं च करोतीति॥१७॥

द्वासप्ततीति ॥ पंजरे पंजरवच्छिरास्थिभिर्बद्धे शरीरे द्वाभ्यामधिकासप्ततिः

॥ भाषा ॥

ति ॥ सूर्य चंद्रमा ये दोनो रात्रि दिवस रूप जो समय ताय करें हें और सुषुम्ना जो सरस्वती सो सूर्यचंद्रमाकरके कियो गयो जो रात्रिदिवात्मक काल समय ताकूं नाशके करवेवाली हे. ये गोप्य कह्यो हे याको भाव ये हे. ढाई घडी सूर्य चले हे और ढाई घडी चंद्रस्वर चले जब सूर्य चले हे तबतो दिन कहे हें और जब चंद्र चले हे तब रात्रि कहे हें पांच घडीको रात्रिदिवात्मक काल होय हे लौकिक मनुष्यनको रात्रिंदिन तामें द्वादशदिन रात्रिरूप काल होय हे एसें कालके प्रमाणकरके जीवनको आयु प्रमाण है जब सुषुम्नामार्गकरकें वायु ब्रह्मरंध्रमें लीन होय हे तब रात्रिदिवसात्मक कालको अभाव रहे हे यातेंही सुषुम्ना कालकी नाशकर्त्ता कही जबताईं ब्रह्मरंध्रमें वायु लीन होय तितनें योगीकी आयु बढे. और दीर्घकाल तांई समाधिको अभ्यास करबेवालो योगी पूर्वही मरणकाल जानकरकें ब्रह्मरंध्रमें वायुकूं प्राप्तकरकें कालकूं निवारण करे फिर देहत्याग अपनी इच्छासूं करे हें ॥ १७ ॥

द्वासप्ततीति ॥ पिंजराकीसीनाईं नसेंकरके बंधो जो शरीर तामें बहत्तर हजार नाडीनके

मू० वायुः परिचितो यस्मादग्निना सह कुंडलीम् ॥
बोधयित्वा सुषुम्नायां प्रविशेदनिरोधतः ॥ १९ ॥
सुषुम्नावाहिनि प्राणे सिद्ध्यत्येव मनोन्मनी ॥
अन्यथा त्वितराभ्यासाः प्रयासायैव योगिनाम् ॥ २० ॥

॥ टीका ॥

द्वासप्ततिः द्वासप्ततिसंख्याकानि सहस्राणि द्वासप्ततिसहस्राणि नाडीनां शिराणां द्वाराणि वायुप्रवेशमार्गाः संति सुषुम्ना मध्यनाडी शांभवी शक्तिरस्ति शं सुखं भवत्यस्माद्भक्तानामिति शंभुरीश्वरस्तस्येयं शांभवी । ध्यानेन शंभुप्रापकत्वात् । शंभोराविर्भावजनकत्वाद्वा शांभवी । यद्वा शं सुखरूपो भवति तिष्ठतीति शंभुरात्मा तस्येयं शांभवी चिदभिव्यक्तिस्थानत्वाद्ध्यानेनात्मसाक्षात्कारहेतुत्वाच्च । शेषा इडापिंगलादयस्तु निरर्थका एव निर्गतोऽर्थःप्रयोजनं यासां ता निरर्थकाः । पूर्वोक्तप्रयोजनाभावात् ॥ १८ ॥

वायुरिति ॥ यस्मात्परिचितोऽभ्यस्तो वायुस्तस्मादग्निना जठराग्निना सह कुंडलीं शक्तिं बोधयित्वा अनिरोधतोऽप्रतिबंधात्सुषुम्नायां सरस्वत्यां प्रविशेत् वायोः सुषुम्नाप्रवेशार्थमभ्यासः कर्तव्य इत्यर्थः ॥ १९ ॥

सुषुम्नेति ॥ प्राणे सुषुम्नावाहिनि सति मनोन्मनी उन्मन्यवस्था सिद्ध्यत्येव । अन्यथा प्राणे सुषुम्नावाहिन्यसति तु इतराभ्यासाः सुषुम्नेतराभ्यासा योगिनां योगाभ्यासिनां प्रयासायैव श्रमायैव भवंतीत्यर्थः ॥ २० ॥

॥ भाषा ॥

द्वार वायुके प्रवेशमार्ग हे. और सुषुम्ना शांभवी शक्ती हे भक्तनकूं शं जो सुख सो जातें होय सो शंभू ईश्वर ताकी ये शक्ती तासूं शांभवी नाम हे ध्यानकरकें शंभूकूं प्राप्त करे हे वा शंभूकूं प्रगट करे हे यातें शांभवी नाम हे. अथवा शं कहिये सुखरूप स्थित होय सो शंभू नाम आत्मा ताकी शक्ति यें चैतन्यकूं ध्यानकरकें ही आत्मसाक्षात्कार करे हे याते शांभवी नाम हे. और जे इडा पिंगलादिक नाडीतें गयो हे प्रयोजन जिनको एसी निरर्थक हे ॥ १८ ॥

वायुरिति ॥ अभ्यास कियो जो वायु तातें जाठराग्निकरकें सहित कुंडली ये बोधकरायकरकें और काऊकरकें रुके नही एसे वायुकूं कुंडली सरस्वतीमें प्रवेश करे वायुकूं सुषुम्नामें प्रवेशके अर्थ अभ्यास करनो योग्य हे ॥ १९ ॥

सुषुम्नेति ॥ प्राणवायु सुषुम्नामें चलवे लगजाय तब मनोन्मनी उन्मनी अवस्था सिद्ध

मू० पवनो बध्यते येन मनस्तेनैव बध्यते ॥
मनश्च बध्यते येन पवनस्तेन बध्यते ॥ २१ ॥
हेतुद्वयं तु चित्तस्य वासना च समीरणः ॥
तयोर्विनष्ट एकस्मिंस्तौ द्वावपि विनश्यतः ॥ २२ ॥

॥ टीका ॥

पवन इति ॥ येन योगिना पवनः प्राणवायुर्बध्यते बद्धः क्रियते तेनैव योगिना मनो बध्यते । येन मनो बध्यते तेन पवनो बध्यते । मनः पवनयोरेकतरे बद्धे उभयं बद्धं भवतीत्यर्थः ॥ २१ ॥

हेतुद्वयं तु चित्तस्येति ॥ चित्तस्य प्रवृत्तौ हेतुद्वयं कारणद्वयमस्ति किं तदित्याह वासना भावनाख्यः संस्कारः समीरणः प्राणवायुश्च तयोर्वासनासमीरणयोरेकस्मिन्विनष्टे सति क्षीणे सति तौ द्वावपि विनश्यतः । अयमाशयः । वासनाक्षये समीरणचित्ते क्षीणे भवतः । समीरणे क्षीणे चित्तवासने क्षीणे भवतः । चित्ते क्षीणे समीरणवासने क्षीणे भवतः । तदुक्तं वासिष्ठे । 'द्वे बीजे राम चित्तस्य प्राणस्पंदनवासने । एकस्मिंश्च तयोर्नष्टे क्षिप्रं द्वे अपि नश्यतः ॥' तत्रैव व्यतिरेकेणोक्तं । 'यावद्विलीनं न मनो न तावद्वासनाक्षयः । न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति ॥ न यावद्याति विज्ञानं न तावच्चित्तसंशयः । यावन्न चित्तोपशमो न तावत्तत्त्ववेदनम् । यावन्न वासनानाशस्तावत्तत्त्वागमः कुतः ॥ यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षयः । तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च ॥ मिथः कारणतां गत्वा दुःसाध्यानि स्थितान्यतः । त्रय एते समं यावन्न स्वभ्यस्ता मुहुर्मुहुः ॥ तावन्न तत्त्वसंप्राप्तिर्भवत्यपि समाश्रितैः' ॥ इति ॥ २२ ॥

॥ भाषा ॥

होय हे. नही तो प्राण सुषुम्नामें नही वहे तो सुषुम्ना विना और जे अभ्यास हें ते योगीनके श्रमके अर्थ हें ॥ २० ॥

पवन इति ॥ जा योगीकरकें प्राणवायु बद्ध कियो जाय ता योगीकरकें मन बद्ध होय हे. और जाकरकें मन बद्ध होय हे ताकरकें प्राणवायु बद्ध होय हे ॥ २१ ॥

हेतुद्वयं तु चित्तस्येति ॥ चित्तकी प्रवृत्तिमें दोय कारण हे कोनसे एकतो वासना और एक प्राणवायु इन दोनोंनमेंसें एकबी क्षीण होय तो दोनोही नाशकूं प्राप्त होंय ये. भाव हे वासनाको क्षय होय तो प्राण और चित्त दोनोंही क्षीण होंय. और प्राण क्षीण होय तो चित्त और वासना ये दोनो क्षीण होय हें. और चित्त क्षीण होय तब प्राणवायु और वासना ये दोनों क्षीण होय हें ॥ २२ ॥

मू० मनो यत्र विलीयेत पवनस्तत्र लीयते ॥
पवनो लीयते यत्र मनस्तत्र विलीयते ॥ २३ ॥
दुग्धांबुवत्संमिलितावुभौ तौ तुल्यक्रियौ मानसमारुतौ हि ॥
यतो मरुत्तत्र मनःप्रवृत्तिर्यतो मनस्तत्र मरुत्प्रवृत्तिः ॥ २४ ॥
तत्रैकनाशादपरस्य नाश एकप्रवृत्तेरपरप्रवृत्तिः ॥
अध्वस्तयोश्चेंद्रियवर्गवृत्तिः प्रध्वस्तयोर्मोक्षपदस्य सिद्धिः॥२५

॥ टीका ॥

मन इति ॥ यत्र यस्मिन्नाधारे मनो लीयते तत्र तस्मिन्नाधारे पवनो विलीयत इत्यन्वयः ॥ २३ ॥

दुग्धांबुवदिति ॥ दुग्धांबुवत्क्षीरनीरवत्संमिलितौ सम्यक् मिलितौ ताबुभौ द्वावपि मानसमारुतौ मानसं च मारुतश्च मानसमारुतौ चित्तप्राणौ तुल्यक्रियौ तुल्या समा क्रिया प्रवृत्तिर्ययोस्तादृशौ भवतः । तुल्यक्रियत्वमेवाह । यत इति । यतःयत्र सार्वविभक्तिकस्तसिः । यस्मिन् चक्रे मरुद्वायुः प्रवर्तते तत्र तस्मिन् चक्रे मनःप्रवृत्तिः मनसः प्रवृत्तिर्भवति । यतो यस्मिन् चक्रे मनःप्रवर्तते तत्र तस्मिन् चक्रे मरुत्प्रवृत्तिः वायोः प्रवृत्तिर्भवतीत्यर्थः । तदुक्तं वासिष्ठे । 'अविनाभाविनी नित्यं जंतुनां प्राणचेतसी । कुसुमामोदवन्मिश्रे तिलतैले इवास्थिते । कुरुतश्च विनाशेन कार्यं मोक्षाख्यमुत्तममि'ति ॥ २४ ॥

तत्रेति ॥ तत्र तयोर्मानसमारुतयोर्मध्ये एकस्य मानसस्य मारुतस्य वा नाशाल्ल-

॥ भाषा ॥

मन इति ॥ जा आधारमें मन लीन होय ताही आधारचक्रमें पवन लीन होय और जामे पवन लीन होय तामें मन लीन होय हे ॥ २३ ॥

दुग्धांबुवदिति ॥ और जल दुधकीसी नाई मिले हुये चित्त और प्राण ये दोनो समान हे प्रवृत्ति जिनकी एसे होंय हें अब इनकी समान प्रवृत्ति कहें हें जा चक्रमें वायु वर्त्ते हे तामें मनकी प्रवृत्ति होय हें और जा चक्रमें मन वर्त्ते हे ता चक्रमें वायुकी प्रवृत्ति होय हे ॥२४॥

तत्रेति ॥ मन और प्राणवायु इन दोनोंनमेंसूं एकके लयतें दूसरोबी लय होय जाय एसेंही एक मनकी अथवा पवनकी प्रवृत्ति होय तो दूसरेकी बी प्रवृत्ति होय जाय मन और पवन ये दोनो नही लीन होय तो इंद्रीनके समूहकूं अपने अपने विषयमें प्रवृत्ति होय हे. और मन प्राणवायु ये दोनों प्रकर्षकरके लीन होय जाय तो मोक्षपदकी सिद्धी

मू० रसस्य मनसश्चैव चंचलत्वं स्वभावतः ॥
रसो बद्धो मनो बद्धं किं न सिद्ध्यति भूतले ॥ २६ ॥
मूर्छितो हरते व्याधीन्मृतो जीवयति स्वयम् ॥
बद्धः खेचरतां धत्ते रसो वायुश्च पार्वति ! ॥ २७ ॥

॥ टीका ॥

यादपरस्यान्यस्य मारुतस्य मानसस्य वा नाशो लयो भवति। एकप्रवृत्तेरेकस्य मानसस्य मारुतस्य वा प्रवृत्तेर्व्यापाराद्परप्रवृत्तिरपरस्य मारुतस्य मानसस्य वा प्रवृत्तिर्व्यापारो भवति । अध्वस्तयोरलीनयोर्मानसमारुतयोः सतोरिंद्रियवर्गवृत्तिरिंद्रियसमुदायस्य स्वस्वविषये प्रवृत्तिर्भवति । प्रध्वस्तयोः प्रलीनयोस्तयोः सतोर्मोक्षपदस्य मोक्षाख्यपदस्य सिद्धिर्निष्पत्तिर्भवति । तयोर्लये पुरुषस्य स्वरूपेऽवस्थानादित्यर्थः । 'तत्रापि साध्यः पवनस्य नाशः षडंगयोगादिनिषेवणेन । मनोविनाशस्तु गुरोः प्रसादान्निमेषमात्रेण सुसाध्य एव ॥' योगबीजे मूलश्लोकस्यायमुत्तरः श्लोकः ॥ २५ ॥

रसस्येति ॥ रसस्य पारदस्य मनसो मानसस्य भावतः स्वभावाचंचलत्वं चांचल्यमस्ति । रसः पारदो बद्धश्चेन्मनश्चित्तं बद्धं भवति । ततो भूतले पृथिवीतले किं न सिद्ध्यति सर्वं सिद्ध्यतीत्यर्थः ॥ २६ ॥

तदेवाह ॥ मूर्छित इति ॥ औषधिविशेषयोगेन गतचापलो रसो मूर्छितः कुंभकांते रेचकनिवृत्तो वायुर्मूर्छित इत्युच्यते । हे पार्वतीति पार्वतीसुबोधायेश्वरवाक्यं । मूर्छितो रसः पारदो वायुः प्राणश्च व्याधीन् रोगान् हरते नाशयति । भस्मीभूतो रसो ब्रह्मरंध्रे लीनो वायुश्च मृतः स्वयमात्मना स्वसामर्थ्येनेत्यर्थः । जीवयति दीर्घकालं जीवनं करोति । क्रियाविशेषेण गुटिकाकारकृतो रसः बद्धो भ्रूमध्यादौ धारणाविशेषेण धृतो वायुश्च बद्धः खेचरतामाकाशगतिं धत्ते विधत्ते करोतीत्यर्थः ।

॥ भाषा ॥

होय अर्थात् इन दोनोंनके लय होयवेसूं पुरुषकूं स्वरूपमें स्थिति होय है ॥ २५ ॥

रसस्येति ॥ पारेकूं और मनकूं स्वभावतेंही चंचलपनो हे. और पारो बंध जाय और मन बद्ध हो जाय तो पृथ्वीतलमें वा प्राणीकूं सर्वसिद्धी होय हे ॥ २६ ॥

वही कहतेहै मूर्छित इति ॥ औषधीके योगकरके चपलता जाकी जाती रही एसो पारो सो मूर्छित बाजे हे. और कुंभकके अंतमें रेचक करे ये वायु मूर्छित कहें हें. शिवजी कहें हें हे पार्वती ! मूर्छित पारदकी भस्म रोगनकूं दूर करे हे. और मूर्छित वायु फिर ब्रह्मरंध्रमें

मू० मनःस्थैर्ये स्थिरो वायुस्ततो बिंदुः स्थिरो भवेत् ॥
बिंदुस्थैर्यात्सदा सत्त्वं पिंडस्थैर्यं प्रजायते ॥ २८ ॥
इंद्रियाणां मनो नाथो मनोनाथस्तु मारुतः ॥
मारुतस्य लयो नाथः स लयो नादमाश्रितः ॥ २९ ॥
सोऽयमेवास्तु मोक्षाख्यो मास्तु वापि मतांतरे ॥
मनः प्राणलये कश्चिदानंदः संप्रवर्तते ॥ ३० ॥

॥ टीका ॥

तदुक्तं गोरक्षकशतके । 'यद्भिन्नांजनपुंजसन्निभमिदं वृत्तं भ्रुवोरंतरे तत्त्वं वायुमयं पकारसहितं तत्रेश्वरो देवता । प्राणं तत्र विलाप्य पंचघटिकं चित्तान्वितं धारये- देषा खे गमनं करोति यमिनां स्याद्वायुना धारणे'ति ॥ २७ ॥

मनःस्थैर्ये इति ॥ मनसः स्थैर्ये सति वायुः प्राणः स्थिरो भवेत् । ततो वायुस्थै- र्याद्बिंदुर्वीर्यं स्थिरो भवेत् । बिंदोः स्थैर्यात्सदा सर्वदा सत्त्वं बलं पिंडस्थैर्यं देहस्थैर्यं प्रजायते ॥ २८ ॥

इंद्रियाणामिति ॥ इंद्रियाणां श्रोत्रादीनां मनोऽतःकरणं नाथः प्रवर्तकः । म- नोनाथो मनसो नाथो मारुतः प्राणः । मारुतस्य प्राणस्य लयो मनोविलयो नाथः । स लयो मनोलयः नादमाश्रितो नादे मनो लीयत इत्यर्थः ॥ २९ ॥

सोऽयमिति॥सोऽयमेव चित्तलय एव मोक्षाख्यो मोक्षपदवाच्यः । मतांतरेऽन्य- मते मास्तु वा । चित्तलयस्य सुषुप्तावपि सत्त्वान्मनःप्राणयोर्लये सति कश्चिदनि-

॥ भाषा ॥

लीन हुयो मृतपुरुषकूं अपनी सामर्थ्यकरकें दीर्घकालतांई जिवावे हे. और क्रियासूं गुटिकाके आकारकरकें बंधो हुयो पारो मोढेमें धारण करेसूं आकाश गती करे हे. और धारणकरकें भृकुटीके मध्यमें धारण कियो और बंधो हुयो वायु आकाश गतीकूं करे हे ॥ २७ ॥

मनःस्थैर्य इति ॥ मन स्थिर होय तो प्राण स्थिर होय हे. और वायुके स्थिर हुयेतें वीर्य स्थिर होय हे. वीर्य स्थिर होयवेसूं सर्वदा बल देह स्थिर होय हें ॥ २८ ॥

इंद्रियाणामिति ॥ इंद्रिय जे श्रोत्रादिक तिनको अंतःकरण नाथ हे. अर्थात् प्रवर्त्तको करवेवालो हे. और मनको नाथ प्राण हे. और प्राणको नाथ लय और लय जो हे सो नादकूं आश्रय करे हे. अर्थात नादमें मन लीन होय हे ॥ २९ ॥

सोयमिति ॥ नादमें चित्तको लय सोही मोक्ष हे. और मतांतरमें एसो कहे हें सुषुप्ती

मू० प्रनष्टश्वासनिश्वासः प्रध्वस्तविषयग्रहः ॥
निश्चेष्टो निर्विकारश्च लयो जयति योगिनाम् ॥ ३१ ॥
उच्छिन्नसर्वसंकल्पो निःशेषाशेषचेष्टितः ॥
स्वावगम्यो लयः कोऽपि जायते वागगोचरः ॥ ३२ ॥

॥ टीका ॥

र्वाच्य आनंदः संप्रवर्तते सम्यक् प्रवृत्तो भवति । अनिर्वाच्यानंदाविर्भावे जीवन्मुक्तिसुखं भवत्येवेति भावः ॥ ३० ॥

प्रनष्टेति ॥ श्वासश्च निश्वासश्च श्वासनिश्वासौ प्रनष्टौ लीनौ श्वासनिश्वासौ यस्मिन् स तथा बाह्यवायोरंतःप्रवेशनं श्वासः अंतःस्थितस्य वायोर्बहिर्निःसरणं निश्वासः प्रध्वस्तः प्रकर्षेण ध्वस्तो नष्टो विषयाणां शब्दादीनां ग्रहो ग्रहणं यस्मिन् निर्गता चेष्टा कायक्रिया यस्मिन् निर्गतो विकारोऽतःकरणक्रिया यस्मिन् एतादृशो योगिनां लयोऽतःकरणवृत्तेर्ध्येयाकारा वृत्तिर्जयति सर्वोत्कर्षेण वर्तते ॥ ३१ ॥

उच्छिन्नेति ॥ उच्छिन्ना नष्टाः सर्वे संकल्पा मनःपरिणामा यस्मिन् स तथा निर्गतः शेषो येभ्यस्तानि निःशेषाण्यशेषाणि चेष्टितानि यस्मिन् स तथा स्वेनैवावगंतुं बोद्धुं शक्यः स्वावगम्यः वाचामगोचरो विषयः कोऽपि विलक्षणो लयः जायते योगिनां प्रादुर्भवति ॥ ३२ ॥

॥ भाषा ॥

अवस्थामें चित्तको लय हे सोबीमोक्ष हे. ताये कहे हें ये मोक्ष नहीं हे. क्योंके मन प्राण इनको लय होय हे तब कोईसूंवी नही कहवेमें आवे एसो आनंद प्रवृत्त होय हे. जब अनिर्वाच्य आनंद प्रगट होय हे तब जीवन्मुक्ती सुख होय हे. यामें संदेह नहीं हे ॥ ३० ॥

प्रनष्टेति ॥ दूर हुयो हे श्वास निश्वास जामें बहारकी वायुकूं भीतर खेंचनों सो श्वास और भीतरकी वायुकूं बहार निकासनो सो निश्वास और दूर हुये हे विषयनकूं ग्रहण करनो जामे देहकी क्रिया जामे दूर हुई निर्विकार एसो योगीनको लय अंतःकरणकी वृत्तीकूं ब्रह्मप्राप्तीके अर्थ संपूर्णतें उत्कर्षकरके वर्त्ते हें ॥ ३१ ॥

उच्छिन्नेति ॥ नष्ट हुये हें संपूर्ण संकल्प जामें निवृत्त हुई हे संपूर्ण चेष्टा जामें और आपकरके ही जानवेकूं समर्थ और वाणीसूं कहवेमे नही आवे एसो विलक्षण लय योगीनकूं प्रगट होय हे ॥ ३२ ॥

मू० यत्र दृष्टिर्लयस्तत्र भूतेंद्रियसनातनी ॥
सा शक्तिर्जीवभूतानां द्वे अलक्ष्ये लयं गते ॥ ३३ ॥
लयो लय इति प्राहुः कीदृशं लयलक्षणम् ॥
अपुनर्वासनोत्थानाल्लयो विषयविस्मृतिः ॥ ३४ ॥
वेदशास्त्रपुराणानि सामान्यगणिका इव ॥
एकैव शांभवी मुद्रा गुप्ता कुलवधूरिव ॥ ३५ ॥

॥ टीका ॥

यत्र दृष्टिरिति ॥ यत्र यस्मिन्विषये ब्रह्मणि दृष्टिरंतःकरणवृत्तिस्तत्रैव लयो भवति । भूतानि पृथिव्यादीनि इंद्रियाणि श्रोत्रादीनि सनातनानि शाश्वतानि यस्यां सा सत्कार्यवादेऽविद्यायां कार्यजातस्य सत्त्वात् । जीवभूतानां प्राणिनां शक्तिर्विद्या इमे द्वे अलक्ष्ये ब्रह्मणि लयं गते योगिनामिति शेषः ॥ ३३ ॥

लय इति ॥ लय इति प्राहुर्वदंति बहवः । लयस्य लक्षणं लयस्वरूपं कीदृशमिति प्रश्नपूर्वकं लयस्वरूपमाह ॥ अपुनरिति ॥ अपुनर्वासनोत्थानात्पुनर्वासनास्थानाभावाद्विषयविस्मृतिर्विषयाणां शब्दादीनां ध्येयाकारस्य विषयस्य वा विस्मृतिर्लयो लयशब्दार्थ इत्यर्थः ॥ ३४ ॥

वेदेति ॥ वेदाश्चत्वारः शास्त्राणि षट् पुराणान्यष्टादश सामान्या गणिका इव वेश्या इव । बहुपुरुषगम्यत्वात् । एका शांभवी मुद्रैव कुलवधूरिव कुलस्त्रीव गुप्ता । पुरुषविशेषगम्यत्वात् ॥ ३५ ॥

॥ भाषा ॥

यत्र दृष्टिरिति ॥ जा ब्रह्ममें अंतःकरणकी वृत्ती होय ता ब्रह्ममें लय होय हे. और पंचमहाभूत और दशो इंद्रिय ये निरंतर जामें रहें एसी अविद्या और प्राणीनकी शक्ती विद्या ये दोनो योगीनके ब्रह्ममें लय होय हे ॥ ३३ ॥

लय इति ॥ बहोतसे जन या लयकूं लय कहें हें और लयको स्वरूप कहा हे सो कहें हें. फिर वासनाको उदय नहो तातें शब्दादिक विषयनकी विस्मृति होय ताकूं लय कहें हें ॥ ३४ ॥

वेदेति ॥ च्यारों वेद और छे शास्त्र अठारे पुराण ये वेश्याकीसी नाई हे. क्यों बोहोत पुरुषनकूं प्राप्त हें. यातें और शांभवी मुद्रा एकही हे ये कुलकी स्त्रीकीसीनाई गोप राखवेकूं योग्य हे ॥ ३५ ॥

मू० अंतर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ॥
एषा सा शांभवी मुद्रा वेदशास्त्रेषु गोपिता ॥ ३६ ॥
अंतर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ॥
मुद्रेयं खलु शांभवी भवति सा लब्धा प्रसादाद्गुरोः
शून्याशून्यविलक्षणं स्फुरति तत्तत्वं परं शांभवम् ॥३७॥

॥ टीका ॥

चित्तलयाय प्राणलयसाधनीभूतां मुद्रां विवक्षुस्तत्र शांभवीं मुद्रामाह ॥ अंतर्लक्ष्यमिति ॥ अंतः आधारादिब्रह्मरंध्रांतेषु चक्रेषु मध्ये स्वाभिमते चक्रे लक्ष्यमंतःकरणवृत्तिः । बहिर्देहाद्बहिःप्रदेशे दृष्टिः चक्षुःसंबंधः । कीदृशी दृष्टिः निमेषोन्मेषवर्जिता निमेषः पक्ष्मसंयोगः उन्मेषः पक्ष्मसंयोगविश्लेषः ताभ्यां वर्जिता रहिता चित्तस्य ध्येयाकारावेशे निमेषोन्मेषवर्जिता दृष्टिर्भवति । सोक्तैषा मुद्रा शांभवी शंभोरियं शांभवी शिवप्रिया शिवाविर्भावजनिका वा भवति । कीदृशी वेदशास्त्रेषु गोपिता वेदेषु ऋगादिषु शास्त्रेषु सांख्यपातंजलादिषु गोपिता रक्षिता ॥ ३६ ॥

शांभवीं मुद्रामभिनीय दर्शयति ॥ अंतर्लक्ष्यमिति ॥ यदा यस्यामवस्थायामंतः अनाहतपद्मादौ यल्लक्ष्यं सगुणेश्वरमूर्त्यादिकं तत्त्वमस्यादिवाक्यलक्ष्यं जीवेश्वराभि-

॥ भाषा ॥

अंतर्लक्ष्यमिति ॥ भीतर आधारसूं लेके ब्रह्मरंध्रपर्यंत जे चक्र तिनके मध्यमें अपुनकूं वांछित चक्र तामें जो लक्ष्य कोन ब्रह्म तामें अंतःकरणकी वृत्ति और देहतें बहार जो दृष्टि सो पलकनको खोलनो मूंदनो तिनकरकें वर्जित दृष्टि होय सो ये शांभवी मुद्रा हे केसी हे. ऋग्वेदकूं आदि ले वेदनमें और शास्त्रजो सांख्य पातंजलादिक तिनमें गुप्त हे ॥ ३६ ॥

अंतर्लक्ष्येति ॥ जब भीतर अनाहत चक्रादिनमें जो लक्ष्य जो सगुण ईश्वरकी मूर्ति अथवा ब्रह्म तामें लीन हुयो हे मन और प्राण जाके एसो योगी स्थिर हे भीतरली दृष्टि जाकी एसी दृष्टिकरकें देहके बहार नीचो ऊंचो देखे हे तोहु बहारके विषयनकूं नही ग्रहण करे हे, ये शांमवी मुद्रा हे सो ये गुरुनकी कृपासूं प्राप्त होय हे तब शांभवीमें प्रकाशमान पद और वास्तव वस्तु सो प्रतीतमें आवे हे ॥ ३७ ॥

मू० श्रीशांभव्याश्च खेचर्या अवस्थाधामभेदतः ॥
भवेच्चित्तलयानंदः शून्ये चित्सुखरूपिणि ॥ ३८ ॥
तारे ज्योतिषि संयोज्य किंचिदुन्नमयेद्भ्रुवौ ॥

॥ टीका ॥

अयमहं ब्रह्मास्मीति वाक्यार्थभूतं ब्रह्म वा तस्मिन्विलीनौ विशेषेण लीनौ चित्तपवनौ मनोमारुतौ यस्य स तथा योगी वर्तते निश्चलतारया निश्चला स्थिरा तारा कनीनिका यस्यां तादृश्या दृष्ट्या बहिर्देहाद्बहिःप्रदेशे पश्यन्नपि चक्षुःसंबंधं कुर्वन्नपि अपश्यन् बाह्यविषयग्रहणमकुर्वन् वर्तते आस्ते । खल्विति वाक्यालंकारे । इयमुक्ता शांभवी मुद्रा शांभवीनामिका मुद्रयति क्लेशानिति मुद्रा गुरोर्देशिकस्य प्रसादात्प्रीतिपूर्वकादनुग्रहाल्लब्धा प्राप्ता चेत्तदिदमिति वक्तुमशक्यं शांभवं शांभवीमुद्रायां भासमानं पदं पद्यते गम्यते योगिभिरिति पदमात्मस्वरूपं शून्याशून्यविलक्षणं ध्येयाकारवृत्तेः सद्भावाच्छून्यविलक्षणं तस्या अपि भानाभावादशून्यविलक्षणं तत्त्वं वास्तविकं वस्तु स्फुरति प्रतीयते । तथाचोक्तं । ‘अन्तर्लक्ष्यमनन्यधीरविरतं पश्यन्मुदा संयमी दृष्ट्यन्मेषनिमेषवर्जितमियं मुद्रा भवेच्छाम्भवी ॥ गुप्तेयं गिरिशेन तंत्रविदुषा तंत्रेषु तत्त्वार्थिनामेषा स्याद्यमिनां मनोलयकरी मुक्तिप्रदा दुर्लभा ॥ १ ॥ ऊर्ध्वदृष्टिरधोदृष्टिरूर्ध्ववेधो ह्यधःशिराः । राधायंत्रविधानेन जीवन्मुक्तो भवेत्क्षितौ । २ । ॥ ३७ ॥

श्रीशांभव्या इति ॥ श्रीशांभव्याः श्रीमत्याः शांभवीमुद्रायाः खेचरीमुद्रायाश्चावस्थाधामभेदतः अवस्थाऽवस्थितिर्धाम स्थानं तयोर्भेदाच्छांभव्यां बहिर्दृष्ट्या बहिःस्थितिः खेचर्यां भ्रूमध्यदृष्ट्याऽवस्थितिः । शांभव्यां हृदयभावनादेशः खेचर्यां भ्रूमध्य एव देशः । तयोर्भेदाभ्यां शून्ये देशकालवस्तुपरिच्छेदशून्ये सजातीयविजातीयस्वगतभेदशून्ये या चित्सुखरूपिणि चिदानंदस्वरूपिण्यात्मानि चित्तलयानंदो भवेत्स्यात् । श्रीशांभवीखेचर्योरवस्थाधामरूपसाधनांशेभेदः, नतु चित्तलयानंदरूपफलांश इति भावः ॥ ३८ ॥

उन्मनीमुद्रामाह ॥ तारे इति ॥ तारे नेत्रयोः कनीनिके ज्योतिषी तारयोर्नासाग्रे

॥ भाषा ॥

श्रीशांभव्या इति ॥ श्रीशांभवीमुद्राके और खेचरीमुद्राके अवस्था और धाम इनके भेदकरके रहित चैतन्य आनंदरूप आत्मा तामें चित्तको लय ताको आनंद होय हे ॥ ३८ ॥

उन्मनी मुद्रा कहे हे ॥ तारे इति ॥ दृष्टी नासिकाके अग्रमें युक्त करेमूं प्रकाश-

मू० पूर्वयोगं मनो युंजन्नुन्मनीकारकः क्षणात् ॥ ३९
केचिदागमजालेन केचिन्निगमसंकुलैः ॥
केचित्तर्केण मुह्यंति नैव जानंति तारकम् ॥ ४० ॥
अर्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षण-
श्चंद्रार्कावपि लीनतामुपनयन्निस्पंदभावेन यः ॥

॥ टीका ॥

योजनात्प्रकाशमाने तेजिसि संयोज्य संयुक्ते कृत्वा भ्रुवौ किंचित्स्वल्पमुन्नयेदूर्ध्वं नयेत् । पूर्वः पूर्वोक्तोऽतर्लक्ष्यबहिर्दृष्टिरित्याकारको योगो युक्तिर्यस्मिन् तत्तादृशं मनोऽतःकरणं युंजन् युक्तं कुर्वन् योगी क्षणान्मुहूर्तादुन्मनीकारण उन्मन्यवस्था-कारको भवति ॥ ३९ ॥

उन्मनीमंतराऽन्यस्तरणोपायो नास्तीत्याह ॥ केचिदिति ॥ केच्छिास्त्रतंत्रा-दिविदः आगच्छंति बुद्धिमारोहंत्यर्था एभ्य इत्यागमाः शास्त्रतंत्रादयस्तेषां जालै-र्जालवद्बंधनसाधनैस्तदुक्तैः फलैर्मुह्यंति मोहं प्राप्नुवंति । तत्रासक्ता बध्यंत इति भावः । केचिद्वैदिका निगमसंकुलैर्निगमानां निगमोक्तानां संकुलैः फलबाहुल्यैर्मु-ह्यंति । केचिद्वैशेषिकादयस्तर्केण स्वकल्पितयुक्तिविशेषेण मुह्यंति । तारयतीति तारकस्तं तारकं तरणोपायं नैव जानंति । उक्तोन्मन्येव तरणोपायस्तं न जानंती-त्यर्थः ॥ ४० ॥

अर्धोन्मीलितेति ॥ अर्धं उन्मीलिते अर्धोन्मीलिते अर्धोन्मीलिते लोचने येन

॥ भाषा ॥

मान तेज होय हे तामेंही दृष्टीकूं युक्त करकें कछूक भृकुटीकूं ऊंची चढावे पहलें कह्यो अंतर्लक्ष्य बहिर्दृष्टि योग जामें एसो अंतःकरणकूं युक्त करे तो योगी क्षणमात्रमें उन्मनी अवस्था होय हे ॥ ३९ ॥

उन्मनी विना और तिरवेको उपाय नही हे कहें हें ॥ केचिदिति ॥ जे कोई शास्त्र तंत्रादिकनके वेत्ता हें ते शास्त्र तंत्रादिकनके फल तिनकरकें मोहकूं प्राप्त होय हें और जो कोई वेदके जानवेवारे हें ते वेदमें कहे जे बहोतसे फल तिनकरकें मोहकूं प्राप्त होय रहे न्यायशास्त्री हें ते तर्ककरकें मोहकूं प्राप्त होय रहे हें और पूर्व कही जो उन्मनीही तरणको उपाय ताय नही जाने हे ॥ ४० ॥

अर्धोन्मीलितेति ॥ आधे खोले हें नेत्र जाने और स्थिर हे मन जाको और नासि-

मू॰ ज्योतीरूपमशेषबीजमखिलं देदीप्यमानं परं
तत्त्वं तत्पदमेति वस्तु परमं वाच्यं किमत्राधिकम् ॥४१॥
दिवा न पूजयेल्लिंगं रात्रौ चैव न पूजयेत् ॥
सर्वदा पूजयेल्लिंगं दिवारात्रिनिरोधतः ॥ ४२ ॥

॥ टीका ॥

स अर्धोन्मीलितलोचनः अर्धोद्घाटितलोचन इत्यर्थः । स्थिरं निश्चलं मनो यस्य स स्थिरमना नासाया नासिकाया अग्रेऽग्रभागे नासिकायां द्वादशांगुलपर्यंते वा दत्ते प्रहिते ईक्षणे येन स नासाग्रदत्तेक्षणः । तथाह वसिष्ठः । 'द्वादशांगुलपर्यंते नासाग्रे विमलेंऽबरे । संविद्दशोः प्रशाम्यंत्योः प्राणस्पंदो निरुध्यते' इति । निस्पंदस्य निश्चलस्य भावो निस्पंदभावः कायेंद्रियमनसां निश्चलत्वं तेन चंद्रार्कौ चंद्रसूर्यावपि लीनतां लीनस्य भावो लीनता लयस्तमुपनयन्प्रापयन्कायेंद्रियमनसां निश्चलत्वेन प्राणसंचारमपि स्तंभयन्नित्यर्थः । तदुक्तं प्राक् । 'मनो यत्र विलीयेते' त्यादिपूर्वोक्तविशेषणसंपन्नो योगी ज्योतीरूपं ज्योतिरिवाखिलप्रकाशकं रूपं यस्य स तथा तमशेषबीजमाकाशाद्युत्पत्तिद्वारा सर्वकारणमखिलं पूर्णं देदीप्यमानमतिशयेन दीप्यत इति देदीप्यमानं तत्तथा स्वप्रकाशकं परं कायेंद्रियमनसां साक्षिणं तत्त्वमनारोपितं वास्तविकमित्यर्थः । तदिदमिति वक्तुमशक्यं पद्यते गम्यते योगिभिरिति पदं परमं सर्वोत्कृष्टं वस्तु आत्मस्वरूपं एति प्राप्नोति । उन्मन्यवस्थायां स्वस्वरूपावस्थितो योगी भवतीत्यर्थः । अत्राधिकं किं वाच्यं । अपरं वस्तु प्राप्नोतीत्यत्र किं वक्तव्यमित्यर्थः ॥ ४१ ॥

उन्मनीभावनायाः कालनियमाभावमाह ॥ दिवा नेति ॥ दिवा सूर्यसंचारे लिंगं

॥ भाषा ॥

काके अग्रभागमें लगाये हें नेत्र जाने और कर्मेंद्रिय और मन इनके निश्चल भावकरके चंद्रमा सूर्य ये लय करत योगी ज्योतीकीसीनाई अखिल विश्वकूं प्रकाश करवेवालो संपूर्णको कारण पूर्णरूप अतिशयकर प्रकाशके करवेवालो स्वप्रकाश करवेवालो वास्तव वस्तुरूप योगीनकरकें प्राप्त होयवेके योग्य संपूर्णतें उत्कृष्ट परमपद जो आत्मस्वरूप ताय प्राप्त होय हे. और वस्तु प्राप्त होय ताको कहनो कहा ॥ ४१ ॥

दिवा नेति ॥ सूर्यस्वर चले तामें आत्माकूं ध्यान नही करे. और चंद्रस्वर चले तामेंबी आत्माकूं ध्यान नही करे. क्यों चंद्र सूर्य वायू चले तब स्थिर चित्त नही रहे हे. तासूं सूर्य चंद्र ये दोनोनकूं रोककरकें आत्माकूं सर्वकालमें ध्यान करे इनके रोकेतें सुषु-

अथ खेचरी ॥

मू० सव्यदक्षिणनाडिस्थो मध्ये चरति मारुतः ॥
तिष्ठते खेचरी मुद्रा तस्मिन् स्थाने न संशयः ॥ ४३ ॥
इडापिंगलयोर्मध्ये शून्यं चैवानिलं ग्रसेत् ॥
तिष्ठते खेचरी मुद्रा तत्र सत्यं पुनः पुनः ॥ ४४ ॥

॥ टीका ॥

सर्वकारणमात्मानं । 'एतस्मादात्मन आकाशः संभूतः' इत्यादिश्रुतेः । न पूजयेत् न भावयेत् । ध्यानमेवात्मपूजनं । तदुक्तं वासिष्ठे । 'ध्यानोपहार एवात्मा ध्यानमस्य महार्चनम् । विना तेनेतरेणायमात्मा लभ्यत एव नो' इति । रात्रौ चंद्रसंचारे च नैव पूजयेन्नैव भावयेत् । चंद्रसूर्यसंचारे चित्तस्थैर्याभावात् । 'चले वाते चलं चित्तमि' त्युक्तत्वात् । दिवारात्रिनिरोधतः सूर्यचंद्रौ निरुध्य । ल्यब्लोपे पंचमी तस्यास्तसिल् । सर्वदा सर्वस्मिन् काले लिंगं आत्मानं पूजयेद्भावयेत् । सूर्यचंद्रयोर्निरोधे कृते सुषुम्नांतर्गते प्राणे मनःस्थैर्यात् । तदुक्तं । 'सुषुम्नांतर्गते वायौ मनःस्थैर्यं प्रजायते' इति ॥ ४२ ॥

खेचरीमाह ॥ सव्येति ॥ सव्यदक्षिणनाडिस्थो वामतदितरनाडिस्थो मारुतो वायुर्यत्र मध्ये चरति यस्मिन्मध्यप्रदेशे गच्छति तस्मिन्स्थाने तस्मिन्प्रदेशे खेचरी मुद्रा तिष्ठते स्थिरा भवति । 'प्रकाशनस्थेयाख्ययोश्चे'त्यात्मनेपदम् । न संशयः उक्तेऽर्थे संदेहो नास्तीत्यर्थः ॥ ४३ ॥

इडापिंगलयोरिति ॥ इडापिंगलयोः सव्यदक्षिणनाड्योर्मध्ये यच्छून्यं खं । कर्तृ । अनिलं प्राणवायुं यत्र ग्रसेत् । शून्ये प्राणस्य स्थिरीभाव एव ग्रासः । तत्र तस्मिञ्छून्ये खेचरी मुद्रा तिष्ठते । पुनः पुनः सत्यमिति योजना ॥ ४४ ॥

॥ भाषा ॥

म्नामें अंतर्गत प्राण होंय हे तब मन स्थिर होय हे यातें ॥ ४२ ॥

अब खेचरीमुद्रा कहें हें ॥ सव्येति ॥ वामदक्षिण नाडीनमें स्थित वायु जा भृकुटीके मध्यदेशमें गमन करें हे ताही स्थानमें खेचरी मुद्रा स्थित रहे हे ॥ ४३ ॥

इडापिंगलयोरिति ॥ इडा पिंगलाके मध्यमें जो आकाश सो प्राणवायुकूं ग्रास करे हे. शून्य जो आकाश तामें प्राणवायु स्थिर होय हे. ताकूं ही ग्रास कहे हें. ता शून्यमें खेचरी मुद्रा स्थित रहे हे. ये सत्य हे ॥ ४४ ॥

मू० सूर्याचंद्रमसोर्मध्ये निरालंबांतरं पुनः ॥
संस्थिता व्योमचक्रे या सा मुद्रा नाम खेचरी ॥ ४५ ॥
सोमाद्यत्रोदिता धारा साक्षात्सा शिववल्लभा ॥
पूरयेदतुलां दिव्यां सुषुम्नां पश्चिमे मुखे ॥ ४६ ॥
पुरस्ताच्चैव पूर्येत निश्चिता खेचरी भवेत् ॥
अभ्यस्ता खेचरी मुद्राप्युन्मनी संप्रजायते ॥ ४७ ॥

॥ टीका ॥

सूर्याचंद्रमसोरिति ॥ सूर्याचंद्रमसोरिडापिंगलयोर्मध्ये निरालंबं यदंतरमवकाशस्तत्र । पुनः पादपूरणे । व्योम्नां खानां चक्रे समुदाये । भ्रूमध्ये सर्वखानां समन्वयात् । तदुक्तं 'पंचस्रोतःसमन्विते' इति । या संस्थिता सा मुद्रा खेचरीनाम ॥ ४५ ॥

सोमादिति ॥ सोमाच्चंद्राद्यत्र यस्यां खेचर्यां धाराऽमृतधारा उदितोद्भूता सा खेचरी साक्षाच्छिववल्लभा शिवस्य प्रियेति पूर्वेणान्वयः । अतुलां निर्मलां निरुपमां दिव्यां सर्वनाड्युत्तमां सुषुम्नां पश्चिमे मुखे पूरयेत् । जिह्वयेति शेषः ॥ ४६ ॥

पुरस्ताच्चैवेति ॥ पुरस्ताच्चैव पूर्वतोऽपि पूर्येत । सुषुम्नां प्राणेनेति शेषः । यदि तर्हि निश्चिताऽसंदिग्धा खेचरी खेचर्याख्या मुद्रा भवेदिति । यदि तु पुरस्तात्प्राणेन न पूर्येत जिह्वामात्रेण पश्चिमतः पूर्येत तर्हि मूढावस्थाजनिका । न निश्चिता खेचरी स्यादिति भावः । खेचरीमुद्राप्यभ्यस्ता सती उन्मनी संप्रजायते चित्तस्य ध्येयाकारावेशात्तुर्यावस्था भवतीत्यर्थः ॥ ४७ ॥

॥ भाषा ॥

सूर्याचंद्रमसोरिति ॥ सूर्य चंद्रमा जो इडा पिंगला तिनके मध्यमें जो सबले आकाशनको समूह तामें जो स्थित सो मुद्रा खेचरी नाम कहें हैं ॥ ४५ ॥

सोमादिति ॥ चंद्रमातें जा खेचरीमें अमृतधारा प्रगट हुई वो खेचरी शिवजीकूं बडी प्यारी हे. निर्मल और सर्वनाडीनमें उत्तम एसी सुषुम्ना ताय भीतर मुखमें जिह्वाकरकें रोक देवे ॥ ४६ ॥

पुरस्ताच्चैवेति ॥ बहारतें सुषुम्नाकूं प्राणकरकें जो रोक देवे तो निश्चैंही खेचरी नाम मुद्रा होय हे और जो बहार प्राणकरकें नही रोके भीतरही जिह्वामात्रकरकें रोक देवे तो मूढ अवस्थाकूं प्रगट करे हे. निश्चै खेचरी मुद्रा नही होय. खेचरी मुद्राबी अभ्यास करे तें उन्मनी होय हे. और चित्तकूं ध्यान करवेके योग्य वस्तूके आवेशसूं तुर्यावस्था होय हे ॥ ४७ ॥

मू० भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते ॥
ज्ञातव्यं तत्पदं तुर्यं तत्र कालो न विद्यते ॥ ४८ ॥
अभ्यसेत्खेचरीं तावद्यावत्स्याद्योगनिद्रितः ॥
संप्राप्तयोगनिद्रस्य कालो नास्ति कदाचन ॥ ४९ ॥
निरालंबं मनः कृत्वा न किंचिदपि चिंतयेत् ॥
स बाह्याभ्यंतरे व्योम्नि घटवत्तिष्ठति ध्रुवम् ॥ ५० ॥

॥ टीका ॥

भ्रुवोरिति ॥ भ्रुवोर्मध्ये भ्रुवोरंतराले शिवस्थानं शिवस्येश्वरस्य स्थानं शिवस्य सुखरूपस्यात्मनोऽवस्थानमिति शेषः । तत्र तस्मिन् शिवे मनो लीयते । शिवाकारवृत्तिप्रवाहवद्भवति तच्चित्तलयरूपं तुर्यं पदं जाग्रत्स्वप्नसुषुप्तिभ्यश्चतुर्थाख्यं ज्ञातव्यम् । तत्र तस्मिन् पदे कालो मृत्युर्न विद्यते । यद्वा सूर्यचंद्रयोर्निरोधादायुःक्षयकारकः कालः समयो न विद्यत इत्यर्थः । तदुक्तं । 'भोक्त्रि सुषुम्ना कालस्ये' ति ॥ ४८ ॥

अभ्यसेदिति ॥ तावत्खेचरीं मुद्रामभ्यसेत् । यावद्योगनिद्रितः । योगः सर्ववृत्तिनिरोधः सैव निद्रा योगनिद्राऽस्य संजाता इति योगनिद्रितः तादृशः स्यात् । संप्राप्ता योगनिद्रा येन स संप्राप्तयोगनिद्रस्तस्य कदाचन कस्मिंश्चिदपि समये कालो मृत्युर्नास्ति ॥ ४९ ॥

निरालंबमिति ॥ यो निरालंबमालंबशून्यं मनः कृत्वा किंचिदपि न चिंतयेत् खेचरीमुद्रायां जायमानायां ब्रह्माकारामपि वृत्तिं परवैराग्येण परित्यजेदित्यर्थः । स योगी बाह्याभ्यंतरे बाह्ये बहिर्भवे आभ्यंतरेऽभ्यंतर्भवे च व्योम्न्याकाशे घटवत्ति-

॥ भाषा ॥

भ्रुवोरिति ॥ भ्रुकुटीके मध्यमें शिवजीको स्थान है ता शिवमें मन लीन होय है वो चित्तलयरूप जाग्रत्स्वप्नसुषुप्ति इनतें तुर्य पद जाननो योग्य हैं. ता पदमें काल जो मृत्यु सो नहीं प्राप्त होय है ॥ ४८ ॥

अभ्यसेदिति ॥ संपूर्ण वृत्तीनको निरोध जबतांई होय तबतांई खेचरी मुद्राको अभ्यास करे सर्ववृत्ती जाकी रुक गई ताकूं कदेबी काऊ समयके बीचमेंबी काल जो मृत्यु सो नहीं होय ॥ ४९ ॥

निरालंबमिति ॥ जो योगी आश्रयरहित मनकरकें कछूबी चिंतमन न करे सो योगी बहार भीतर आकाशमें घटकीसी नाई स्थित निश्चयही रहे है. जेसें घटमें भीतर और

मू० बाह्यवायुर्यथा लीनस्तथा मध्ये न संशयः ॥
स्वस्थाने स्थिरतामेति पवनो मनसा सह ॥ ५१ ॥
एवमभ्यसमानस्य वायुमार्गे दिवानिशम् ॥
अभ्यासाज्जीर्यते वायुर्मनस्तत्रैव लीयते ॥ ५२ ॥
अमृतैः प्लावयेद्देहमापादतलमस्तकम् ॥

॥ टीका ॥

ष्ठति ध्रुवं । निश्चितमेतत् । यथाकाशे घटो बहिरंतश्चाकाशपूर्णो भवति तथा खेचर्यामालंबनपरित्यागेन योगी ब्रह्मणा पूर्णस्तिष्ठतीत्यर्थः ॥ ५० ॥

बाह्येति ॥ बाह्यो देहाद्बहिर्भवो वायुर्यथा लीनो भवति खेचर्यां । तस्यांतःप्रवृत्त्यभावात् । तथा मध्यो देहमध्यवर्ती वायुर्लीनो भवति । तस्य बहिःप्रवृत्त्यभावात् । न संशयः । अस्मिन्नर्थे संदेहो नास्तीत्यर्थः । स्थीयते स्थिरीभूयतेऽस्मिन्निति स्थानं स्वस्य प्राणस्य स्थानं स्थैर्याधिष्ठानं ब्रह्मरंध्रं तत्र मनसा चित्तेन सह पवनः प्राणः स्थिरतां निश्चलतामेति प्राप्नोति ॥ ५१ ॥

एवमिति ॥ एवमुक्तप्रकारेण वायुमार्गे प्राणमार्गे सुषुम्नायामित्यर्थः । दिवानिशं रात्रिंदिवमभ्यसमानस्याभ्यासं कुर्वतो योगिनोऽभ्यासाद्यत्र यस्मिन्नाधारे वायुः प्राणो जीर्यते क्षीयते लीयत इत्यर्थः । तत्रैव वायोर्लयाधिष्ठाने मनश्चित्तं लीयते जीर्यत इत्यर्थः ॥ ५२ ॥

अमृतैरिति ॥ अमृतैः सुषिरनिर्गतैः पादतलं च मस्तकं च पादतलमस्तकं । 'द्वंद्वश्च

॥ भाषा ॥

बहार आकाश पूर्ण हे तेसेंही खेचरी में आलंबन परित्यागकरकें योगी ब्रह्मकरकें पूर्ण स्थित रहे हे ॥ ५० ॥

बाह्येति ॥ देहतें बहार जो वायु हे सो जेसें लीन होय हे खेचरीमें ता वायुकूं भीतर प्रवृत्तिको अभाव हे तेसेंही देहमें रहे जो वायु सो लीन होय हे ता वायुकूं बहार प्रवृत्तिको अभाव हे यामें संदेह नही हे प्राणके स्थिर होयवेको स्थान ब्रह्मरंध्र तामें मनकरके सहित प्राण स्थिर होय जाय हे ॥ ५१ ॥

एवमिति ॥ या प्रकारकरकें वायुमार्ग जो सुषुम्ना तामें रात्रिदिन अभ्यास कर रह्यो ता योगीकूं अभ्यासतें जा आधारमें वायु लीन होय हे, और वायु जामें लीन होय हे तामेंही मन लीन होय हे ॥ ५२ ॥

अमृतैरिति ॥ पामतें लेकर मस्तक पर्यंत देहकूं अमृतकरकें सींच देवे उत्कृष्ट हे

मू० सिद्ध्यत्येव महाकायो महाबलपराक्रमः ॥ ५३ ॥
इति खेचरी ॥
शक्तिमध्ये मनः कृत्वा शक्तिं मानसमध्यगाम् ॥
मनसा मन आलोक्य धारयेत्परमं पदम् ॥ ५४ ॥
खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ॥
सर्वं च खमयं कृत्वा न किंचिदपि चिंतयेत् ॥ ५५ ॥

॥ टीका ॥

प्राणितूर्यसेनांगानामि'त्येकवद्भावः । पादतलमस्तकमभिव्याप्येत्यापादतलमस्तकं देहमाप्लावयेदाप्लावितं कुर्यात् । महानुत्कृष्टः कायो यस्य स महाकायः महांतौ बलपराक्रमौ यस्येत्येतादृशो योगी सिद्ध्यत्येव । अमृताप्लावनेन सिद्धो भवत्येव ॥ ५३॥

शक्तिमध्य इति ॥ शक्तिः कुंडलिनी तस्या मध्ये मनः कृत्वा तस्यां मनो धृत्वा तदाकारं मनः कृत्वेत्यर्थः । शक्तिं मानसमध्यगां कृत्वा । शक्तिध्यानावेशाच्छक्तिं मनस्येकीकृत्य तेन कुंडलीं बोधयित्वेति यावत् । 'प्रबुद्धा वह्नियोगेन मनसा मरुता सहे'ति गोरक्षोक्तेः । मनसांतः करणेन मन आलोक्य बुद्धिं मनसाऽवलोकनेन स्थिरीकृत्वेत्यर्थः । परमं पदं सर्वोत्कृष्टं स्वरूपं धारयेद्धारणाविषयं कुर्यादित्यर्थः ॥ ५४ ॥

खमध्य इति ॥ खमिव पूर्णं ब्रह्म खं तन्मध्ये आत्मानं स्वस्वरूपं कुरु । ब्रह्माहमिति भावयेत्यर्थः । आत्ममध्ये स्वस्वरूपे च खं पूर्णं ब्रह्म कुरु । अहं ब्रह्मेति च भावयेत्यर्थः । सर्वं च खमयं कृत्वा ब्रह्ममयं विभाव्य किमपि न चिंतयेत् । अहं ब्रह्मेति ध्यानमपि परित्यजेदित्यर्थः ॥ ५५ ॥

॥ भाषा ॥

देह जाको महान हे बल पराक्रम जाके एसो योगी वा अमृतके सींचवेकरकें सिद्ध होय हे ॥ ५३ ॥

शक्तिमध्य इति ॥ कुंडलिनीमें मन धारणकरकें और मनमें कुंडली धारणकरकें कुंडलिनीके ध्यानावेशतें शक्ति मनकी हे एसें कुंडलिनी और मनकूं एककरकें कुंडलीकूं बोध करायकरकें अंतःकरणकरकें मनकूं देखकरकें सर्वोत्कृष्ट स्वरूप ताय धारण करे ॥ ५४ ॥

खमध्य इति ॥ आकाशकीसी नाई पूर्ण ब्रह्म हे सो ब्रह्ममें अपनो स्वरूप जो आत्मा ताय करे ब्रह्माहं या प्रकार भावना करे और अपनो स्वरूप जो आत्मा तामें पूर्णब्रह्म करे अहंब्रह्म या प्रकार भावना करे फिर संपूर्ण ब्रह्ममय भावनाकरकें फिर कछूबी चिंतमन न करे अर्थात् अहंब्रह्म ये जो ध्यान तायबी त्याग करदे ॥ ५५ ॥

मू० अंतःशून्यो बहिः शून्यः शून्यः कुंभ इवांबरे ॥
अंतः पूर्णो बहिः पूर्णः पूर्णः कुंभ इवार्णवे ॥ ५६ ॥
बाह्यचिंता न कर्तव्या तथैवांतरचिंतनम् ॥
सर्वचिंतां परित्यज्य न किंचिदपि चिंतयेत् ॥ ५७ ॥
संकल्पमात्रकलनैव जगत्समग्रं

॥ टीका ॥

एवं समाहितस्य स्वरूपे स्थितिमाह ॥ अंतःशून्य इति॥अंतःअंतःकरणे शून्यः। ब्रह्मातिरिक्तवृत्तेरभावाद्द्वितीयशून्यः। बहिरंतःकरणाद्बहिरपि शून्यः। द्वितीयादर्शनात्। अंबरे आकाशे कुंभो घटो यथांतर्बहिःशून्यस्तद्वदंतःकरणे हृदाकाशे वायुपूर्णः ब्रह्माकारवृत्तेः सद्भावाद्ब्रह्मवासत्वाद्वा । बहिःपूर्णोऽतःकरणाद्बहिर्हृदवकाशाद्बहिर्वा पूर्णः। सत्तया ब्रह्मातिरिक्तवृत्तेरभावाद्ब्रह्मपूर्णत्वाद्वा । अर्णवे नमुद्रे कुंभो घटो यथा सर्वतो जलपूर्णो भवत्येवं समाधिनिष्ठो योगी ब्रह्मपूर्णो भवतीत्यर्थः ॥ ५६ ॥

बाह्यचिंतेति ॥ समाहितेन योगिनेत्यध्याहारः। बाह्यचिंता बाह्यविषया चिंता न कर्तव्या तथैव बाह्यचिंताकरणवदांतरचिंतनमांतराणां मनसा परिकल्पितानामाशामोदकसौधवाटिकादीनां चिंतनं न कर्तव्यमिति लिंगविपरिणामेनान्वयः। सर्वचिंतां बाह्याभ्यंतरचिंतनं परित्यज्य किंचिदपि न चिंतयेत्परवैराग्येणात्माकारवृत्तिमपि परित्यजेत्। तत्त्यागे स्वरूपावस्थितिरूपा जीवन्मुक्तिर्भवतीति भावः ॥ ५७ ॥

बाह्याभ्यंतरचिंतापरित्यागे शांतिश्च भवतीत्यत्र वसिष्ठवाक्यं प्रमाणयति । सं-

॥ भाषा ॥

अंतःशून्य इति ॥ अंतःकरणमें बी शून्यहे क्यों ब्रह्मतें न्यारो कछू नही हे. और अंतःकरणतें बहारबी शून्य हे क्यों ब्रह्मतें दूसरो दीखेही नही हे यातें यामें दृष्टांत हे जेसें आकाशमें घट घटके भीतरबी आकाश हे और घटके बहारबी आकाश हे और अंतःकरणमेंबी पूर्ण क्यों ब्रह्मको सद्भाव हे. यातें और बहारबी पूर्ण हे क्यों ब्रह्मकरकें पूर्ण हे. यातें यामें दृष्टांत जेसें समुद्रमें कुंभ बहारबी जलभर रह्यो और भीतरबी जलभर रह्यो एसेंही समाधिनिष्ठ योगी ब्रह्मकरकें पूर्ण होय हे ॥ ५६ ॥

बाह्यचिंतेति ॥ योगीकूं बहारकी विषय चिंता नही करनो योग्य हे. एसेंही भीतर मनकरकें कल्पना करे जाय अनेक चिंतमन सो नही करनो योग्य हे. बहार भीतरकी चिंता परित्यागकरकें कछूबी नही चिंतमन करे ॥ ५७ ॥

बहार भीतर चिंताके परित्याग करवेमें शांतिहोय हे यामें वसिष्ठको वाक्य रामजी

संकल्पमात्रकलनैव मनोविलासः ॥
संकल्पमात्रमतिमुत्सृज निर्विकल्प-
माश्रित्य निश्चयमवाप्नुहि राम शांतिम् ॥ ५८ ॥
कर्पूरमनले यद्वत्सैंधवं सलिले यथा ॥
तथा संधीयमानं च मनस्तत्त्वे विलीयते ॥ ५९ ॥
ज्ञेयं सर्वं प्रतीतं च ज्ञानं च मन उच्यते ॥

॥ टीका ॥

कल्पेति । संकल्पो मानसिको व्यापारः स एव संकल्पमात्रं तस्य कलनैव रचनैवेदं दृश्यमानं समग्रं जगत् बाह्यप्रपंचो मनोमात्रकल्पित इत्यर्थः । मनसो मानसस्य विलासो नानाविषयाकारकल्पना आशामोदकसौधवाटिकादिकल्पनारूपो विलासः संकल्पमात्रकलनैव । मानसः प्रपंचोऽपि संकल्पमात्ररचनैवेत्यर्थः । संकल्पमात्रे बाह्याभ्यंतरप्रपंचे या मतिःसत्यत्वबुद्धिस्तामुत्सृज । तर्हि किं कर्तव्यमित्यत आह । निर्विकल्पमिति । विशिष्टकल्पना विकल्पः । आत्मनि कर्तृत्वभोक्तृत्वसुखित्वसजातीयविजातीयस्वगतभेददेशकालवस्तुपरिच्छेदकल्पनारूपः तस्मान्निष्क्रांतो निर्विकल्पस्तमात्मानमाश्रित्य धारणादिविषयं कृत्वा हेराम! निश्चयमसंदिग्धं शांतिं परमोपरतिमवाप्नुहि । ततः सुखमपि प्राप्स्यसीति भावः । तदुक्तं भगवता व्यतिरेकेण । 'न चाभावयतः शांतिरशांतस्य कुतः सुखमि'ति ॥ ५८ ॥

कर्पूरमिति ॥ यद्वद्यथाऽनलेऽग्नौ संधीयमानं संयोज्यमानं कर्पूरं विलीयते विशेषेण लीयते लीनं भवति । अग्न्याकारं भवति । यथा सलिले जले संधीयमानं सैंधवं लवणं विलीयते लवणाकारं परित्यज्य जलाकारं भवति तथा तद्वत्तत्त्वे आत्मनि संधीयमानं कार्यमानं मनो विलीयते आत्माकारं भवति ॥ ५९ ॥

मनसो विलये जाते द्वैतमपि लीयत इत्याह त्रिभिः ॥ ज्ञेयमिति ॥ सर्वं सकलं

॥ भाषा ॥

प्रति कह्यो ताको प्रमाण दे हैं ॥ संकल्पेति ॥ बाह्य प्रपंच मनोमात्र कल्पित हे. और मनको जो प्रपंच अनेक विकार रूप सोवी संकल्पमात्रकरकें हीं रचना हे. और बहार भीतर जो प्रपंच तामें जो सत्यबुद्धि ताय त्याग करो भेदरहित जो आत्मा ताय आश्रय लेकरके हे राम ! निस्संदेह शांति सुख ताय तुम प्राप्त होओगे ॥ ५८ ॥

कर्पूरमिति ॥ जैसें अग्नीमें युक्त कियो कपूर अग्नीके आकार होय जाय हे और जलमें धर्‍यो लवण सो लवणके आकारकूं परित्यागकरकें जलाकार होय जाय हे. तेसेंहि मनकूं आत्मामें लगावें तो मन आत्माकार होय हे ॥ ५९ ॥

ज्ञेयमिति ॥ संपूर्ण ज्ञानके योग्य प्रतीतमें आप रह्यो. ओर ज्ञान सो मनकूंही कहें हे.

मू० ज्ञानं ज्ञेयं समं नष्टं नान्यः पंथा द्वितीयकः ॥ ६० ॥
मनोदृश्यमिदं सर्वं यत्किंचित्सचराचरम् ॥
मनसो ह्युन्मनीभावाद्वैतं नैवोपलभ्यते ॥ ६१ ॥
ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम् ॥
मनसो विलये जाते कैवल्यमवशिष्यते ॥ ६२ ॥

॥ टीका ॥

ज्ञेयं ज्ञानार्हं प्रतीतं च ज्ञातं च ज्ञानं च इदं सर्वं मन उच्यते । सर्वस्य मनःकल्पनामात्रत्वान्मनः शब्देनोच्यते । ज्ञानं ज्ञेयं च समं मनो विलीयते मनसा सार्धं नष्टं यदि तर्हि द्वितीयकः द्वितीय एव द्वितीयकः पंथा मनोविषयो नास्ति । द्वैतं नास्तीति फलितार्थः ॥ ६० ॥

मनोदृश्यमिति ॥ इदमुपलभ्यमानं यत्किंचिद्यत्किमपि चरं जंगममचरं स्थावरं चरं चाचरं च चराचरे ताभ्यां सहवर्तत इति सचराचरं यज्जगत्सर्वं मनोदृश्यं मनसा दृश्यं । मनःसंकल्पमात्रमित्यर्थः । मनःकल्पनासत्त्वे प्रतीतेस्तदभावे चाप्रतीतेर्भ्रम एव सर्वं जगत् । भ्रमस्य प्रतीतकशरीरत्वात् । न च बौद्धमतप्रसंगः । भ्रमाधिष्ठानस्य ब्रह्मणः सत्यत्वाभ्युपगमात् । मनस उन्मनीभावाद्विलयाद्द्वैतं भेदः नैवोपलभ्यते नैव प्रतीयेत । द्वैतभ्रमहेतोर्मनःसंकल्पस्याभावात् । हि तद्धेतावव्ययम्॥६१॥

ज्ञेयमिति ॥ ज्ञेयं ज्ञानविषयं यद्वस्तु सर्वं चराचरं यद्दृश्यं तस्य परित्यागान्नामरूपात्मकस्य तस्य परिवर्जनाद्विलयं सच्चिदानंदरूपात्माकारं भवति । मनसो विलये जाते सति कैवल्यं केवलस्यात्मनो भावः कैवल्यमवशिष्यते । अद्वितीयात्मस्वरूपमवशिष्टं भवतीत्यर्थः ॥ ६२ ॥

॥ भाषा ॥

मनको लय होतें ही द्वैत जो प्रपंच ताकोबी लय होय हे ॥ ६० ॥

मनोदृश्यमिति ॥ स्थावर जंगम सहित जो जगत् सो संपूर्ण मनके संकल्पमात्रकरकें हे सो मनके लयतें प्रपंचभेद नही प्रतीतमें आवे हे ॥ ६१ ॥

ज्ञेयमिति ॥ स्थावर जंगम सहित दृश्यवस्तु जो जगत् ताके परित्याग करेतें मनबी सच्चिदानंदरूप आत्माकार होय हे. और मनके लय होतेंही अद्वितीय आत्मस्वरूप अवशेष रहे हे ॥ ६२ ॥

मू० एवं नानाविधोपायाः सम्यक्स्वानुभवान्विताः ॥
समाधिमार्गाः कथिताः पूर्वाचार्यैर्महात्मभिः ॥ ६३ ॥
सुषुम्नायै कुंडलिन्यै सुधायै चंद्रजन्मने ॥
मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने ॥ ६४ ॥
अशक्यतत्त्वबोधानां मूढानामपि संमतम् ॥

॥ टीका ॥

एवमिति ॥ एवमंतर्लक्ष्यं बहिर्दृष्टिरित्याद्युक्तप्रकारेण महान् समाधिपरिशीलनशुद्ध आत्मांतःकरणं येषां ते महात्मानस्तैर्महात्मभिः पूर्वे च ते आचार्याश्च पूर्वाचार्या मत्स्येंद्रादयस्तैः समाधेश्चित्तवृत्तिनिरोधस्य मार्गाः प्राप्त्युपायाः कथिताः । कीदृशाः समाधिमार्गाः । नानाविधोपायाः नानाविधा उपायाः साधनानि येषां ते तथा सम्यक् समीचीनतया संशयविपर्ययराहित्येन यः स्वानुभव आत्मानुभवस्तेनान्विता युक्ताः ॥ ६३ ॥

सुषुम्नादिभ्यः कृतकृत्यस्ताः प्रणमति ॥ सुषुम्नायै इति ॥ सुषुम्ना मध्यनाडी तस्यै कुंडलिन्यै आधारशक्त्यै चंद्राद्भ्रूमध्यस्थाज्जन्म यस्यातस्यै सुधायै पीयूषायै मनोन्मन्यै तुर्यावस्थायै चिच्चैतन्यमात्मा स्वरूपं यस्याः सा तथा तस्यै । महती जडानां कार्येंद्रियमनसां चैतन्यसंपादकत्वात्सर्वोत्तमा या शक्तिश्चिच्छक्तिः पुरुषरूपा तस्यै । तुभ्यमिति प्रत्येकं संबध्यते । नमः प्रह्वीभावोऽस्तु ॥ ६४ ॥

नानाविधान्समाध्युपायानुक्त्वा नादानसंधानुरूपं मुख्योपायं प्रतिजानीते ॥

॥ भाषा ॥

एवमिति ॥ या प्रकार समाधिकरकें शुद्ध हे अंतःकरण जिनके एसे महात्मा पूर्व आचारी तिनने नानाप्रकारके साधन जिनके संदेह रहित आत्माको अनुभव ताकरकें युक्त समाधिके मार्ग कहे हें ॥ ६३ ॥

सुषुम्नायै इति ॥ सुषुम्ना जो मध्यनाडी ताके अर्थ नमस्कार हे. और कुंडलिनीके अर्थ नमस्कार हे. सुधारूप तुमारे अर्थ नमस्कार हे. भृकुटीके मध्यमें चंद्रमातें जन्म जाको एसी चंद्रजन्मा तुमारे अर्थ नमस्कार हे. और मनोन्मनी तुमारे अर्थ नमस्कार हे. और चैतन्य हे स्वरूप जाको और संपूर्णमें उत्तम शक्ति पुरुषरूप ता तुमारे अर्थ नमस्कार हो ॥ ६४ ॥

अब नानाप्रकारके समाधिके उपाय तिनें कहकरकें अब नादको अनुसंधानरूप मुख्य उपाय

मू० प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते ॥ ६५ ॥
श्रीआदिनाथेन सपादकोटि
लयप्रकाराः कथिता जयंति ॥
नादानुसंधानकमेकमेव
मन्यामहे मुख्यतमं लयानाम् ॥ ६६ ॥
मुक्तासने स्थितो योगी मुद्रां संधाय शांभवीम् ॥
श्रुणुयाद्दक्षिणे कर्णे नादमंतस्थमेकधीः ॥ ६७ ॥

॥ टीका ॥

अशक्येति ॥ अव्युत्पन्नत्वादशक्यस्तत्त्वबोधस्तत्वज्ञानं येषां ते तथा तेषां मूढानामनधीतानां संमतम् । अपिशब्दात्किमुताधीतानामिति गम्यते । गोरक्षनाथेन प्रोक्तमित्यनेन महदुक्तत्वादुपादेयत्वं गम्यते । नादस्यानाहतध्वनेरुपासनेऽनुसंधानरूपं सेवनमुच्यते कथ्यते ॥ ६५ ॥

श्रीआदिनाथेनेति ॥ श्रीआदिनाथेन शिवेन कथिताः प्रोक्ताः पादेन चतुर्थांशेन सह वर्तमानाः कोटिसंख्याका लयप्रकाराश्चित्तलयसाधनभेदा जयंत्युत्कर्षेण वर्तंते । वयं तु नादानुसंधानकं नादानुचिंतनमेव एकं केवलं लयानां लयसाधनानां मध्ये मुख्यतममतिशयेन मुख्यं मन्यामहे जानीमहे उत्कृष्टानां लयसाधनानां मध्ये उत्कृष्टतमत्वाद्गोरक्षाभिमतत्वाच्च नादानुसंधानमेव अवश्यं विधेयमिति भावः ॥ ६६ ॥

शांभवीमुद्राया नादानुसंधानमाह ॥ मुक्तासन इति ॥ मुक्तासने सिद्धासने स्थि-

॥ भाषा ॥

ताय कहें हें ॥ अशक्येति ॥ नही उत्पन्न हें तत्त्वज्ञान जिनकूं और नही अध्ययन किये हें जिनने एसेनकूं संमत हे. और जो अध्ययनके करवेवाले हे तिनकूं प्राप्त होय ताको कहा कहनो. ये गोरक्षनाथनें कह्यो हे. और नादकी उपासनामें अनुसंधानरूप सेवन कहिये हे॥६९

श्रीआदिनाथेनेति ॥ श्रीआदिनाथ शिवजीनें सवाकोटि चित्तके लय होयवेके साधनभेद कहे हे. ते उत्कर्षकरकें वर्त्ते हे ओर हमतो नादको वारंवार चिंतमन सोही केवल लय साधननके मध्यमें अधिक मुख्य जाने हे. और गोरक्षके अभिमत हे यातें नादको अनुसंधानही अवश्य करनो योग्य हे ॥ ६६ ॥

मुक्तासन इति ॥ सिद्धासनमें स्थित योगी शांभवी मुद्राकरकें एकाग्रचित्तहोत दक्षिण कर्णमें सुषुम्ना नाडीमें स्थित जो नाद ताय श्रवण करे ॥ ६७ ॥

---

१ अत्र संध्यभावः स्वाभाविकोऽवैयाकरणविषयकः

मू० श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं कार्यम् ॥
शुद्धसुषुम्नासरणौ स्फुटममलः श्रूयते नादः ॥ ६८ ॥
आरंभश्च घटश्चैव तथा परिचयोऽपि च ॥
निष्पत्तिःसर्वयोगेषु स्यादवस्थाचतुष्टयम् ॥ ६९ ॥

॥ टीका ॥

तो योगी शांभवीं मुद्रा'मंतर्लक्ष्यं बहिर्दृष्टिरि'त्यादिनोक्तां संधाय कृत्वा । एकधी-रेकाग्रचित्तः सन् दक्षिणे कर्णेऽतस्थसुषुम्नानाड्यां संतमेव नादं शृणुयात् । तदुक्तं त्रिपुरासारसमुच्चये । 'आदौ मत्तालिमालाजनितरवसमस्तारसंस्कारकारी नादोऽसौ वांशिकस्यानिलभरितलसद्वंशनिःस्वानतुल्यः । घंटानादानुकारी तदनु च जलधिध्वानधीरो गभीरो गर्जन्पर्जन्यघोषः पर इह कुहरे वर्तते ब्रह्मनाड्या' इति॥६७॥

पराङ्मुखीमुद्रया नादानुसंधानमाह ॥ श्रवणेति ॥ श्रवणपुटे नयनयोर्नेत्रयो-र्युगलं युग्मं घ्राणशब्देन घ्राणपुटे मुखमास्यमेषां । द्वंद्वे प्राण्यंगत्वादेकवद्भावे प्राप्तेऽपि सर्वस्यापि' 'द्वंद्वैकवद्भावस्य वैकल्पिकत्वान्न भवति । तेषां निरोधनं करांगुलिभिः कार्यम् । निरोधनं चेत्थं । 'अंगुष्ठाभ्यामुभौ कर्णौ तर्जनीभ्यां च चक्षुषी । नासापुटौ तथान्याभ्यां प्रच्छाद्य करणानि चे' ति । चकारात्तदन्याभ्यां मुखं प्रच्छाद्येति समुच्चीयते । शुद्धा प्राणायामैर्मलरहिता या सुषुम्नासरणिः सुषुम्नापद्धतिस्तस्याममलो नादः स्फुटं व्यक्तं श्रूयते ॥ ६८ ॥

अथ नादस्य चतस्रोऽवस्थाः प्राह ॥ आरंभश्चेति ॥ आरंभावस्था घटावस्था परिचयावस्था निष्पत्त्यवस्था इति । सर्वयोगेषु सर्वेषु चित्तवृत्तिनिरोधोपायेषु शांभव्यादिषु व्यवस्थाचतुष्टयं स्यात् । चचैवतथापिचाः पादपूरणार्थाः ॥ ६९ ॥

॥ भाषा ॥

श्रवणेति ॥ कर्णयुगल नेत्रयुगल नासिका मुख इनकूं हाथकी अंगुष्ठ अंगुलिनकरकें रोकले फिर प्राणायामकरकें मलरहित जो सुषुम्नाको मार्ग तामें निर्मल नाद प्रगट श्रवण करवेमे आवे हे ॥ ६८ ॥

आरंभश्चेति ॥ आरंभावस्था, घटावस्था, परिचयावस्था, निष्पत्त्यवस्था संपूर्ण योगनमें ये च्यार अवस्था हें ॥ ६९ ॥

---

१ इयं हि टीकाकर्तुरसत्कल्पना–यत्–महाविभाषायाः सामान्यतो द्वन्द्वे प्रवृत्तौ समाहारस्यैकत्वादेकत्वे सिद्धे पुनर्द्वन्द्वश्चेति योगारम्भणवैयर्थ्यान्यथानुपपत्त्या प्राणितूर्यसेनांगेषु नित्यैकत्वभवनज्ञापनेन प्रकृतवैकल्पिकत्वादिति व्याख्यानमसंगतम् । अपि च–छन्दःसंनिवेशनसारल्यार्थमनेकवद्भाव इति वक्तुं शक्यम् ॥

अथारंभावस्था ॥

मू० ब्रह्मग्रंथेर्भवेद्भेदो ह्यानंदः शून्यसंभवः ॥
विचित्रः क्वणको देहेऽनाहतः श्रूयते ध्वनिः ॥ ७० ॥
दिव्यदेहश्च तेजस्वी दिव्यगंधस्त्वरोगवान् ॥
संपूर्णहृदयः शून्य आरंभो योगवान् भवेत् ॥ ७१ ॥

अथ घटावस्था ॥

द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ॥

॥ टीका ॥

तत्रारंभावस्थामाह ॥ ब्रह्मग्रंथेरिति ॥ ब्रह्मग्रंथेरनाहतचक्रे वर्तमानाया भेदः प्राणायामाभ्यासेन भेदनं यदा भवेत्तदेति यत्तदोरध्याहारः । आनंदयतीत्यानंदः आनंदजनकः शून्ये हृदाकाशे संभवतीति शून्यसंभवो हृदाकाशोत्पन्नो विचित्रो नानाविधः क्वणो भूषणनिनदः स एव क्वणकः । भूषणनिनदसदृश इत्यर्थः । 'भूषणानां तु शिंजितम् । निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपी' त्यमरः । अनाहतो ध्वनिरनाहतो निर्ह्रादो देहे देहमध्ये श्रूयते श्रवणविषयो भवतीत्यर्थः ॥७०॥

दिव्यदेह इति ॥ शून्ये हृदाकाशे य आरंभो नादारंभस्तस्मिन् सति हृदाकाशविशुद्धाकाशभ्रूमध्याकाशाः शून्यातिशून्यमहाशून्यशब्दैर्व्यवह्रियंते योगिभिः ॥ संपूर्णहृदयः प्राणवायुना सम्यक् पूर्णं हृदयं यस्य स तथा आनंदेन पूर्णे हृदये योगवान् योगी दिव्यो रूपलावण्यबलसंपन्नो देहो यस्य स दिव्यदेहः तेजस्वी प्रतापवान् दिव्यगंधः दिव्य उत्तमो गंधो यस्य स तथा अरोगवान् रोगरहितो भवेदिति संबंधः ॥ ७१ ॥

घटावस्थामाह ॥ द्वितीयामिति ॥ द्वितीयायां घटावस्थायां वायुः प्राणः घटी-

॥ भाषा ॥

अथारंभावस्था ताय कहे हैं ॥ ब्रह्मग्रंथेरिति ॥ ब्रह्मग्रंथीको भेदन जब होय है तब आनंदको देवेवालो हृदयाकाशमें उत्पन्न हुयो नाना प्रकारके भूषणनके शब्दकी सदृश अनाहत ध्वनी देहमें श्रवण करवेमें आवे हे ॥ ७० ॥

दिव्यदेह इति ॥ शून्यहृदयाकाशमें नादको आरंभ होय हे और प्राणवायुकरकें भर रह्यो हे हृदय जाको अथवा आनंदकरकें पूर्ण हे हृदय जाको एसो योगी दिव्यदेह और तेजस्वी दिव्य हे गंध जाके और रोगरहित होय हे ॥ ७१ ॥

अब घटावस्था कहे हैं ॥ द्वितीयायामिति ॥ घटावस्थामें प्राणवायु और नादकूं एक-

मू० दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥ ७२ ॥
विष्णुग्रंथेस्ततो भेदात्परमानंदसूचकः ॥
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत् ॥ ७३ ॥

अथ परिचयावस्था ।

तृतीयायां तु विज्ञेयो विहायो मर्दलध्वनिः ॥
महाशून्यं तदा याति सर्वसिद्धिसमाश्रयम् ॥ ७४ ॥

॥ टीका ॥

कृत्य आत्मना सहापानं नादबिंदू चैकीकृत्य मध्यगो मध्यचक्रगतः कंठस्थाने मध्यचक्रं । तदुक्तमत्रैव जालंधरबंधे । 'मध्यचक्रमिदं ज्ञेयं षोडशाधारबंधनमि' ति । यदाभवेदित्यध्याहारः । तदास्यामवस्थायां योगी योगाभ्यासी दृढमासनं यस्य स दृढासनः स्थिरासनो ज्ञानी पूर्वापेक्षया कुशलबुद्धिर्देवसमो रूपलावण्याधिक्याद्देवतुल्यो भवेत् । तदुक्तमीश्वरोक्ते राजयोगे । 'प्राणापानौ नादबिंदू जीवात्मपरमात्मनोः । मिलित्वा घटते यस्मात्तस्मात्स घट उच्यते ॥' इति ॥ ७२ ॥

विष्णुग्रंथेरिति ॥ ततो ब्रह्मग्रंथिभेदनानंतरं विष्णुग्रंथेः कंठे वर्तमानाया भेदात्कुंभकैर्भेदनात्परमानंदस्य भाविनो ब्रह्मानंदस्य सूचको ज्ञापकः । अतिशून्ये कंठावकाशे विमर्दोऽनेकनादसंमर्दो भेर्याः शब्द इव शब्दो भेरीशब्दो भेरीनादश्च तदा तस्मिन्काले भवेत् ॥ ७३ ॥

परिचयावस्थामाह सार्धद्वाभ्यां ॥ तृतीयायामिति ॥ तृतीयायां परिचयावस्थायां विहायोमर्दलध्वनिर्विहायसि भ्रूमध्याकाशे मर्दलस्य वाद्यविशेषस्य ध्वनिरिव ध्वनिर्विज्ञेयो विशेषेण ज्ञानार्हो भवति । तदा तस्यामवस्थायां सर्वसिद्धिसमाश्रयं सर्वासां सिद्धीनामणिमादीनां समाश्रयं स्थानम् । तत्र संयमादणिमादिप्राप्तेः महाशून्यं भ्रूमध्याकाशं याति गच्छति प्राण इति शेषः ॥ ७४ ॥

॥ भाषा ॥

करकें कंठस्थानमें मध्यचक्र तामें स्थित होय तब या अवस्थामें योगी दृढ हे आसन जाको और ज्ञानी और रूपलावण्यमें अधिक होय जाय यातें देवतुल्य एसो होय हे ॥ ७२ ॥

विष्णुग्रंथेरिति ॥ ब्रह्मग्रंथी भेदनके अनंतर कंठमें वर्तमान जो विष्णुग्रंथीके कुंभककरकें भेदन तातें ब्रह्मानंदको जाननो होय हे. अनेक नादनको संमर्द होय और भेरीको नाद जो शब्द ताकोसो शब्द सो भेरीनाद शब्द ता कालमें होय हे ॥ ७३ ॥

अब परिचयावस्था कहें हें ॥ तृतीयायामिति ॥ तीसरी जो परिचयावस्था तामें भृकु-

मू० चित्तानंदं तदा जित्वा सहजानंदसंभवः ॥
दोषदुःखजराव्याधिक्षुधानिद्राविवर्जितः ॥ ७५ ॥
रुद्रग्रंथिं यदा भित्त्वा शर्वपीठगतोऽनिलः ॥
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥ ७६ ॥
एकीभूतं तदा चित्तं राजयोगाभिधानकम् ॥

॥ टीका ॥

चित्तानंदमिति ॥ चित्तानंदं नादविषयांतःकरणवृत्तिजन्यं सुखं जित्वाभिभूय सहजानंदसंभवः सहजानंदः स्वाभाविकात्मसुखं तस्य संभव आविर्भावः स दोषा वातपित्तकफा दुःखं तज्जन्या वेदना आध्यात्मिकादि च जरा वृद्धावस्था व्याधि ज्वरादिः क्षुधा बुभुक्षा निद्रा स्वाप एतैर्विवर्जितो रहितस्तदा योगी भवतीति॥७५॥

तदा कदेत्यपेक्षायामाह ॥ रुद्रेति ॥ यदा रुद्रग्रंथिं भित्त्वा आज्ञाचक्रे रुद्रग्रंथिः शर्वस्येश्वरस्य पीठं स्थानं भ्रूमध्यं तत्र गतः प्राप्तोऽनिलःप्राणो भवति तदा । निष्पत्त्यवस्थामाह ॥ निष्पत्ताविति ॥ निष्पत्तौ निष्पत्त्यवस्थायां ; ब्रह्मरंध्रे गते प्राणे निष्पत्त्यवस्था भवति । वैणवः वेणोरयं वैणवो वंशसंबंधी शब्दो निनादः क्वणंती शब्दायमाना या वीणा तस्याः क्वणः शब्दो भवेत् ॥ ७६ ॥

एकीभूतमिति ॥ तदा तस्यामवस्थायां चित्तमंतःकरणमेकीभूतमेकविषयीभूतम् । विषयविषयिणोरभेदोपचारात् । तद्राजयोगाभिधानकं राजयोग इत्यभिधानं

॥ भाषा ॥

टीके मध्यमें जो आकाश तामें बाजेनको सो शब्द जानवेकूं योग्य होय हे ताई अवस्थामें संपूर्ण सिद्धी जे अणिमादिक तिनको आश्रयरूप स्थान भ्रुकुटीके मध्यमें आकाश ताप्रति प्राणवायु प्राप्त होय हे ॥ ७४ ॥

चित्तानंदमिति ॥ अंतःकरणकी बृत्तीतें हुयो सुख ताय तिरस्कारकरकें स्वाभाविक आत्मसुखको उदय होय हे तब दोष दुःख जरा व्याधी क्षुधा निद्राकरकें वार्जित योगी होय हे ॥७५॥

रुद्रेति ॥ आज्ञाचक्रमें रुद्रग्रंथि हे सो जब रुद्रग्रंथिकूं भेदकरकें शिवजीको स्थान भ्रुकुटिमध्य तामें प्राणवायु प्राप्त होय हे तब योगी कहे गुण तेसो होय हे अब निष्पत्ति अवस्था कहें हें ॥ ब्रह्मरंध्रमें प्राणवायु जाय तब निष्पत्ति अवस्था होय हे जब निष्पत्ति अवस्था होय तब वांशकोसो शब्द और शब्दायमान वीणाकोसो शब्द होय हे ॥ ७६ ॥

एकीभूतमिति ॥ ता अवस्थामें अंतःकरण एकविषयीभूत हो जाय हे. चित्तके एकाग्रताकूं ही राजयोग कहें हें. नादके अनुसंधानमें परायण जो योगी सो सृष्टि और संहार

मू० सृष्टिसंहारकर्तासौ योगीश्वरसमो भवेत् ॥ ७७ ॥
अस्तु वा मास्तु वा मुक्तिरत्रैवाखंडितं सुखम॥
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते ॥ ७८ ॥
राजयोगमजानंतः केवलं हठकर्मिणः ॥
एतानभ्यासिनो मन्ये प्रयासफलवर्जितान् ॥ ७९ ॥
उन्मन्यवाप्तये शीघ्रं भ्रूध्यानं मम संमतम् ॥
राजयोगपदं प्राप्तं सुखोपायोऽल्पचेतसाम् ॥
सद्यः प्रत्ययसंधायी जायते नादजो लयः ॥ ८० ॥

॥ टीका ॥

यस्य तद्राजयोगाभिधानकं चित्तस्यैकाग्रतैव राजयोग इत्यर्थः ॥ सृष्टिसंहारेति ॥ असौ नादानुसंधानपरो योगी सृष्टिसंहारकर्ता सृष्टिं संहारं च करोतीति तादृशः । अतएवेश्वरसम ईश्वरतुल्यो भवेत् ॥ ७७ ॥

अस्तु वेति ॥ राजयोगमिति ॥ उभौ प्राग्व्याख्यातौ ॥ ७८ ॥ ७९ ॥

उन्मन्यवाप्तय इति ॥ शीघ्रं त्वरितमुन्मन्या उन्मन्यवस्थाया अवाप्तये प्राप्त्यर्थं भ्रुध्यानं भ्रुवोर्ध्यानं भ्रूमध्ये ध्यानं मम स्वात्मारामस्य संमतम् । राजयोगो योगानां राजा तदेव पदं राजयोगपदं तुर्यावस्थाख्यं प्राप्तुं लब्धुं पूर्वोक्तभ्रूध्यानरूपः सुखोपायः सुखसाध्यः उपायः सुखोपायः अल्पचेतसामल्पबुद्धीनामपि । किमुतान्येषामित्यभिप्रायः । नादजः नादाज्जातो लयश्चित्तविलयः सद्यः शीघ्रं प्रत्ययं प्रतीतं संदधातीति प्रत्ययसंधायी प्रतीतिकरो जायते प्रादुर्भवति ॥ ८० ॥

॥ भाषा ॥

करे हे. एसो योगी यातेंही ईश्वरकी तुल्य होय हे ॥ ७७ ॥

अस्तु वेति ॥ मुक्तिहो वा मत हो यामेंही अखंड सुख हे. लयतें हुयो जो सुख सोवी राजयोगतें प्राप्त होय हे ॥ ७८ ॥

राजयोगमिति ॥ राजयोगकूं नही जाने हे और केवल हठकर्मकूं करे हें जे अभ्यासी हें तिने श्रमके फलकरकें वर्जित मानूं हुं ॥ ७९ ॥

उन्मन्यवाप्तय इति ॥ शीघ्रही उन्मनी अवस्थाकी प्राप्तिके अर्थ भ्रुकुटीनके मध्यमें जो ध्यान सो स्वात्माराम जो मे सो मेरे संमत हे. राजयोगपद जो तुर्यावस्था ताय प्राप्त होयवेकूं भ्रुकुटीमध्य ध्यान अल्पबुद्धीवारेनकूं सुखपूर्वक उपाय हे. और नादतें हुयो जो चित्तको लय सो शीघ्रही प्रतीतिको करवेवारो होय हे ॥ ८० ॥

मू॰ नादानुसंधानसमाधिभाजां योगीश्वराणां हृदि वर्धमानम्॥
आनंदमेकं वचसामगम्यं जानाति तं श्रीगुरुनाथ एकः८१
कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः ॥
तत्र चित्तं स्थिरीकुर्याद्यावत्स्थिरपदं व्रजेत् ॥ ८२ ॥

॥ टीका ॥

नादानुसंधानेति ॥ नादस्यानाहतध्वनेरनुसंधानमनुचिंतनं तेन समाधिश्चित्तैकाग्र्यं तं भजंतीति नादानुसंधानसमाधिभाजस्तेषां योगिषु योगयुक्तेष्वीश्वराः समर्थास्तेषां हृदि हृदये वर्धत इति वर्धमानस्तं वर्धमानं वचसां वाचामगम्यं। इदमिति वक्तुमशक्यं तं योगशास्त्रप्रसिद्धमेकं मुख्यमानंदमाह्लादमेकोऽनन्यः श्रीगुरुनाथः श्रीमान् गुरुरेव नाथो जानाति वेत्ति। एतेन नादानुसंधानानंदो गुरुगम्य एवेति सूचितम् ॥ ८१ ॥

नादानुसंधानात्प्रत्याहारादिक्रमेण समाधिमाह ॥ कर्णावित्यादिभिः ॥ मुनिर्मननशीलो योगी हस्ताभ्यामित्यनेन हस्तांगुष्ठौ लक्ष्येते । ताभ्यां कर्णौ श्रोत्रे पिधाय। हस्तांगुष्ठौ श्रोत्रविवरयोः कृत्वेत्यर्थः। यं ध्वनिमनाहतनिःस्वनं शृणोत्याकर्णयति तत्र तस्मिन् ध्वनौ चित्तं स्थिरीकुर्यादस्थिरं स्थिरं संपद्यमानं कुर्यात्। यावत्स्थिरं पदं स्थिरपदं तुर्याख्यं गच्छेत्। तदुक्तं। तुर्यावस्था चिदभिव्यंजकनादस्य वेदनं प्रोक्तमिति नादानुसंधानेन वायुस्थैर्यमणिमादयोऽपि भवंतीति। उक्तं च त्रिपुरासारसमुच्चये। 'विजितो भवतीह तेन वायुः सहजो यस्य समुत्थितः प्रणादः। अणिमादिगुणा भवंति तस्यामितपुण्यं च महागुणोदयस्य । सुरराजतनूजवैरिरंध्रे विनिरुध्य स्वकरांगुलिद्वयेन । जलधेरिव धीरनादमंतः प्रसरंतं सहसा शृणोति मर्त्यः' इति। सुरराज इंद्रस्तस्य तनूजोऽर्जुनस्तस्य वैरी कर्णस्तद्रंध्रे स्पष्टमन्यत् ॥८२॥

॥ भाषा ॥

नादानुसंधानेति ॥ नादको वारंवार चिंतमनकरकें जो चित्तकी एकाग्रता ताय भजैं एसे जे योगीश्वर तिनकें हृदयमें वढ रह्यो वाणीकरकें कहवेमें नही आवे एसो मुख्य आनंद ताय एक श्री गुरुनाथ ही जाने हे. और नही जाने या कहवेमें ये हे नादके अनुसंधानको आनंद गुरूनतेंही जानो जाय हे ॥ ८१ ॥

कर्णावित्यादि ॥ योगी हाथके अंगुठानकूं कर्णमें धरके अर्थात् कान मुंदकरकें ध्वनी जो अनाहत शब्द श्रवण करे ताध्वनिमें चित्त स्थिर करे जब तांई तुर्यपदकूं प्राप्त होय॥८२॥

मू० अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम् ॥
पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत् ॥ ८३ ॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ॥
ततोऽभ्यासे वर्धमाने श्रूयते सूक्ष्मसूक्ष्मकः ॥ ८४ ॥
आदौ जलधिजीमूतभेरीझर्झरसंभवाः ॥
मध्ये मर्दलशंखोत्था घंटाकाहलजास्तथा ॥ ८५ ॥

॥ टीका ॥

अभ्यस्यमान इति ॥ अभ्यस्यमानोऽनुसंधीयमानोऽयं नादोऽनाहताख्यो बाह्यं ध्वनिं बहिर्भवं शब्दमावृणुते श्रुत्योर्विषयं । योगी नादाभ्यासी पक्षान्मासार्धादखिलं सर्वं विक्षेपं चित्तचांचल्यं जित्वाऽभिभूय सुखी स्वानंदो भवेत् ॥ ८३ ॥

श्रूयत इति ॥ प्रथमाभ्यासे पूर्वाभ्यासे नानाविधोऽनेकविधो महान् जलधिजीमूतभेर्यादिसदृशो नादोऽनाहतस्वनः श्रूयते आकर्ण्यते । ततोऽनंतरमभ्यासे नादानुसंधानाभ्यासे वर्धमाने सति सूक्ष्मसूक्ष्मकः सूक्ष्मः सूक्ष्म एव श्रूयते श्रवणविषयो भवति ॥ ८४ ॥

नानाविधं नादमाह द्वाभ्याम् ॥ **आदाविति** ॥ आदौ वायोर्ब्रह्मरंध्रगमनसमये जलधिः समुद्रो जीमूतो मेघो भेरा वाद्यविशेषः । 'भेरी स्त्री दुंदुभिः पुमानि' त्यमरः। झर्झरो वाद्यविशेषः । 'वाद्यप्रभेदा डमरुमड्डुडिंडिमझर्झराः । मर्दलः पणवोऽन्येऽपी' त्यमरः । जलधिप्रमुखेभ्यः संभव इव संभावो येषां ते तथा मध्ये ब्रह्मरंध्रे वायोः स्थैर्यानंतरं मर्दलो वाद्यविशेषः शंखो जलजस्ताभ्यामुत्था इव मर्दलशंखोत्थाः । घंटाकाहलौ वाद्यविशेषौ ताभ्यां जाता इव घंटाकाहलजाः ॥ ८५ ॥

॥ भाषा ॥

अभ्यस्यमान इति ॥ अभ्यास कियो हुयो नादबारेंके शब्दकूं आवरण करे हे. और नादाभ्यासी योगी पक्षमात्रमें संपूर्ण चित्तको चांचल्यता ताय जीतकरकें सुखी होय ॥ ८३ ॥

श्रूयत इति ॥ प्रथम अभ्यासमें अनेक प्रकारको महान् समुद्र और मेघ और भेरीकूं आदिलेके जे शब्द तिनकीसदृश नाद श्रवण करिये हे ता पीछें नादानुसंधानको अभ्यास वढे जब सूक्ष्म सूक्ष्मही श्रवण करवेमें आवे हे ॥ ८४ ॥

नानाप्रकारको नाद कहे हें ॥ **आदाविति** ॥ जब वायु ब्रह्मरंध्रकूं गमन करे हे ता समयमें आदिमेंतो समुद्र मेघ भेरी डमरु इनके शब्दकोसो शब्द होय हे. और मध्यमें पणव और

मू० अंते तु किंकिणिवंशवीणाभ्रमरनिःस्वनाः ॥
इति नानाविधा नादाः श्रूयंते देहमध्यगाः ॥ ८६ ॥
महति श्रूयमाणेऽपि मेघभेर्यादिके ध्वनौ ॥
तत्र सूक्ष्मात्सूक्ष्मतरं नादमेव परामृशेत् ॥ ८७ ॥
घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने ॥
रममाणमपि क्षिप्तं मनो नान्यत्र चालयेत् ॥ ८८ ॥

॥ टीका ॥

अंते त्विति ॥ अंते तु प्राणस्य ब्रह्मरंध्रे बहुस्थैर्यानंतरं तु किंकिणी क्षुद्रघंटिका वंशो वेणुः वीणा तंत्री भ्रमरो मधुपः तेषां निःस्वना इति पूर्वोक्ताः नानाविधा अनेकप्रकारका देहस्य मध्ये गताः प्राप्ताः श्रूयंते ॥ ८६ ॥

महतीति ॥ मेघश्च भेरी च ते आदी यस्य स मेघभेर्यादिकस्तस्मिन् । मेघभेरी-शब्दौ तज्जन्यनिर्घोषपरौ । महति बहुले ध्वनौ निनादे श्रूयमाणे आकर्ण्यमाने सत्यपि तत्र तेषु नादेषु सूक्ष्मात्सूक्ष्मतरमतिसूक्ष्मं नादमेव परामृशेच्चिंतयेत् । सूक्ष्मस्य नादस्य चिरस्थायित्वात्तत्रासक्तचित्तश्चिरं स्थिरमतिर्भवेदितिभावः ॥ ८७ ॥

घनमिति ॥ घनं महांतं नादं मेघभेर्यादिकमुत्सृज्य घने वा नादे रममाणं घन-सूक्ष्मान्यतरनादग्रहणपरित्यागाभ्यां क्रीडंतमपि क्षिप्तं रजसात्यंतचंचलं मनोऽन्यत्र विषयांतरे न चालयेन्न प्रेरयेत् । क्षिप्तं मनो विषयांतरासक्तं न समाधीयते नादेषु रममाणं तु समाधीयत इति भावः ॥ ८८ ॥

॥ भाषा ॥

शंख घंटा काहलको रव जो है सो इनके शब्दकोसो शब्द होय है ॥ ८५ ॥

अंतेत्विति ॥ और अंतमें तो प्राणकूं ब्रह्मरंध्रमें बहोत स्थिर हुयेके अनंतरतो किंकिणी जो क्षुद्रघंटिका वेणु वीणा भ्रमर इनके शब्दकेसे शब्द नानाप्रकारके देहमध्यमें प्राप्त हुये श्रवण करवेमें आवे है ॥ ८६ ॥

महतीति ॥ मेघ भेरी इनकूं आदिले वाजे इनके शब्द श्रवण करे तब नादनमें सू-क्ष्मसूंबी सूक्ष्म नाद ताय चिंतमन करे ॥ ८७ ॥

घनमिति ॥ मेघ भेरी इनकूं आदि ले तिनको महान् नाद ताय महान्नादमें छोडक-रकें और सूक्ष्ममें सूक्ष्म नाद ताय छोडकरकें रजोगुणकरकें अत्यंत चंचल मन ताय और विषयनमें प्रेरणा न करे ॥ ८८ ॥

मू० यत्रकुत्रापि वा नादे लगति प्रथमं मनः ॥
तत्रैव सुस्थिरीभूय तेन सार्धं विलीयते ॥ ८९ ॥
मकरंदं पिबन्भृंगो गंधं नापेक्षते यथा ॥
नादासक्तं तथा चित्तं विषयान्नहि कांक्षते ॥ ९० ॥
मनोमत्तगजेंद्रस्य विषयोद्यानचारिणः ॥
नियन्त्रणे समर्थोऽयं निनादनिशितांकुशः ॥ ९१ ॥

॥ टीका ॥

यत्रेति ॥ वा अथवा यत्रकुत्रापि नादे यस्मिन्कस्मिंश्चिद्धने सूक्ष्मे वा नादे प्रथमं पूर्वं मनो लगति लग्नं भवति तत्रैव तस्मिन्नेव नादे सुस्थिरीभूय सम्यक् स्थिरं भूत्वा तेन नादेन सार्धं साकं विलीयते लीनं भवतीत्यर्थः । अत्र पूर्ववाक्येन प्रत्याहारा द्वितीयेन धारणा तृतीयेन ध्यानद्वारा समाधिरुक्तः ॥ ८९ ॥

मकरंदमिति ॥ मकरंदं पुष्परसं पिबन् धयन् भृंगो भ्रमरो गंधं यथा नापेक्षते नेच्छति । तथा नादासक्तं नाद आसक्तं चित्तमंतःकरणं विषयान् विषण्वंत्यवबध्नंति प्रमातारं स्वसंगेनेति विषयाः स्रक्चंदनवनितादयस्तान् न कांक्षते नेच्छति । हीति निश्चये ॥ ९० ॥

मन इति ॥ विषयः शब्दादिरेवोद्यानं वनं तत्र चरतीति विषयोद्यानचारी तस्य मन एव मत्तगजेंद्रः । दुर्निवारत्वात् । तस्य निनाद एवानाहतध्वनिरेव निशितांकुशः तीक्ष्णांकुशः नियत्रणे परावर्तने समर्थः शक्तः । एतैः श्लोकैः । 'चरतां चक्षुरादीनां विषयेषु यथाक्रमम् । यत्प्रत्याहरणं तेषां प्रत्याहारःप्रकीर्तितः॥' इंद्रियाणां विषयेभ्यः प्रत्याहरणं प्रत्याहार इत्युक्तलक्षणः प्रत्याहारः प्रोक्तः ॥ ९१ ॥

॥ भाषा ॥

यत्रेति ॥ जा काउ महान्नादमें और सूक्ष्मनादमें पूर्व मन लगो होय ताही नादमें स्थिर होयकरकें ता नादकरकें सहित लीन होय हे ॥ ८९ ॥

मकरंदमिति ॥ जैसे भ्रमर पुष्पको रस ताय पानकरत गंधकूं नही इच्छा करे हे तेसेंही नादमें आसक्त हुयो चित्त सो विषय जे पुष्प चंदन स्त्रियादिक तिने नही कांक्षा करे हे निश्चय होय ॥ ९० ॥

मन इति ॥ विषयरूपी वनमें विचरे ताको मन सोही हुयो मतवालो गजेंद्र ताके पीछें बगदायवेमें समर्थ तीक्ष्ण अंकुशरूप नादही हे ॥ ९१ ॥

मू० बद्धं तु नादबंधेन मनः संत्यक्तचापलम् ॥
प्रयाति सुतरां स्थैर्यं छिन्नपक्षः खगो यथा ॥ ९२ ॥
सर्वचिंतां परित्यज्य सावधानेन चेतसा ॥
नाद एवानुसंधेयो योगसाम्राज्यमिच्छता ॥ ९३ ॥
नादोऽतरंगसारंगबंधने वागुरायते ॥
अंतरंगकुरंगस्य वधे व्याधायतेऽपि च ॥ ९४ ॥

॥ टीका ॥

बद्धं त्विति ॥ नाद एव बंधः बध्यतेऽनेनेति बंधः बंधनसाधनं तेन स्वशक्तया स्वाधीनकरणेन बद्धं बंधनमिव प्राप्तं । नादधारणादावासक्तमित्यर्थः । अत एव सम्यक् त्यक्तं चापलं क्षणेक्षणे विषयग्रहणपरित्यागरूपं येन तत्तथा मनः सुतरां स्थैर्यं प्रयाति नितरां धारणमेति । तत्र दृष्टांतमाह । छिन्नौ पक्षौ यस्य तादृशः खे गच्छतीति खगः पक्षी यथा । एतेन । 'प्राणायामेन पवनं प्रत्याहारेण चेंद्रियम् । वशीकृत्य ततः कुर्याच्चित्तस्थैर्यं शुभाश्रये ॥' शुभाश्रये चित्तस्थापनं धारणेत्युक्तलक्षणा धारणा प्रोक्ता ॥ ९२ ॥

सर्वचिंतामिति ॥ सर्वेषां बाह्याभ्यंतरविषयाणां या चिंता चिंतनं तां परित्यज्य त्यक्त्वा सावधानेनैकाग्रेण चेतसा योगानां साम्राज्यं सम्राजो भावः । योगशब्दोऽर्शाद्यजंतः । राजयोगित्वमिति यावत् । इच्छता वांछता पुंसा नाद एवानाहतध्वनिरेवानुसंधेयोऽनुचिंतनीयः । नादाकारवृत्तिप्रवाहः कर्तव्य इत्यर्थः । एतेन । 'तद्रूपप्रत्ययैकाग्र्यसंततिश्चान्यनिस्पृहा । तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते नृप ॥' तत्र प्रत्ययैकतानता ध्यानमित्युक्तलक्षणं ध्यानमुक्तम् ॥ ९३ ॥

नादोऽतरंगेति ॥ नादः अंतरंगं मन एव सारंगो मृगस्तस्य बंधने चांचल्यहरणे वागुरायते वागुरेवाचरति वागुरा जालं । यथा वागुरा बंधनेन सारंगस्य चांचल्यं

॥ भाषा ॥

बद्धं त्विति ॥ नादरूपी बंधनकरकें बंधो हुयो भली प्रकार त्याग कियो हे चपलता जाने एसो मन अधिककर स्थिरताकूं प्राप्त होय हे. छिन्न हुये हें पक्ष जाके एसो पक्षी स्थिर होय हे तेसें ॥ ९२ ॥

सर्वचिंतामिति ॥ एकाग्रचित्तकरकें संपूर्ण बहारभीतरकी चिंता ताय परित्यागकरकें राजयोगपदकूं इच्छा करे ता पुरुषकरकें नादही अनुसंधान करनो योग्य हे ॥ ९३ ॥

नादोऽतरंगेति ॥ये नाद अंतरंग मनरूपी जो सारंग मृग ताके बांधवेमें वा चंचलता ताई

मू० अंतरंगस्य यमिनो वाजिनः परिघायते ॥
नादोपास्तिरतो नित्यमवधार्या हि योगिना ॥ ९५ ॥
बद्धं विमुक्तचांचल्यं नादगंधकजारणात् ॥
मनः पारदमाप्नोति निरालंबाख्यखेऽटनम् ॥ ९६ ॥

॥ टीका ॥

हरति तथा नादोंऽतरंगस्य स्वशक्त्या चांचल्यं हरतीत्यर्थः । अंतरंगं मन एव सारंगो हरिणस्तस्य बंधने नानावृत्त्युत्पादनापनयनमेव मनसो बंधस्तस्मिन् व्याधायते व्याध इवाचरति । यथा व्याधो वागुराबद्धं मृगं हंति एवं नादोऽपि स्वासक्तं मनो हंतीत्यर्थः ॥ ९४ ॥

अंतरंगस्येति ॥ यमिनो योगिनोंऽतरंगं मनस्तस्य चपलत्वाद्वाजिनोऽश्वस्य परिघायते वाजिशालाद्वारपरिघ इवाचरति नाद इति शेषः । यथा वाजिशालापरिघो वाजिनोऽन्यत्र गतिं रुणद्धि तथा नादोंऽतरंगस्येत्यर्थः । अतःकारणाद्योगिना नादस्योपास्तिरुपासना नित्यं प्रत्यहमवधार्यावधारणीया । हीति निश्चयेऽव्ययम् ॥ ९५ ॥

बद्धमिति ॥ नाद एव गंधक उपधातुविशेषस्तेन जारणं जारणीकरणं नादगंधकसंबंधेन चांचल्यहरणं तस्माद्बद्धं नादैकासक्तं । पक्षे गुटिकाकृति । प्राप्तं अत एव विमुक्तं त्यक्तं चांचल्यमनेकविषयाकारपरिणामरूपं येन । पक्षे विमुक्तलौल्यं मनः पारदं मन एव पारदं चंचलं निरालंबं ब्रह्म तदेवाख्या यस्य तन्निरालंबाख्यं त-

॥ भाषा ॥

दूर करवेमें जालकीसीनाई हे जेसें जालके बंधनकरकें सारंगको चांचलपनो दूर होय हे तेसेंही नाद अंतरंग मनकी चांचलयताकूं अपनी शक्तिकरकें दूर करे हे अंतरंग मन सोही हुयो हरिण ताके बंधनमें व्याधकीसीनाई आचरण करे हे ॥ ९४ ॥

अंतरंगस्येति ॥ योगीको अंतरंग मनरूपी घोडा ताय रोकवेकी लोहेकी आगलकीसीनाई नाद हे जेसें घोडाशालाके द्वारमें लोहेकी आगल लगाय घोडाकी बहारगतीकूं रोके हे तेसेंही अंतरंग मनकूं विषयनतें रोकवेवालो नाद हे यातें योगी करकें नादउपासना नित्यप्रति निश्चयकरकें धारण करनो योग्य हे ॥ ९५ ॥

बद्धमिति ॥ नादके जारणतें बंधो हुयो और दूर होय गयो हे चंचलता जाको एसो मन निरालंब ब्रह्माकार वृत्तिको प्रवाह अखंड करे हे. जेसें गंधकके जारणतें बंधो हुयो पारदको गुटिका मुखमें राखेतें आकाशगती करें हे तेसेंही ॥ ९६ ॥

मू॰ नादश्रवणतः क्षिप्रमंतरंगभुजंगमः ॥
विस्मृत्य सर्वमेकाग्रः कुत्रचिन्नहि धावति ॥ ९७ ॥
काष्ठे प्रवर्तितो वह्निः काष्ठेन सह शाम्यति ॥
नादेप्रवर्तितं चित्तं नादेन सह लीयते ॥ ९८ ॥
घंटादिनादसक्तस्तब्धांतःकरणहरिणस्य ॥
प्रहरणमपि सुकरं शरसंधानप्रवीणश्चेत् ॥ ९९ ॥

॥ टीका ॥

देव खमपरिच्छिन्नत्वात्तस्मिन्नटनं गमनं तदाकारवृत्तिप्रवाहम् । पक्षे आकाशगमनं प्राप्नोति । यथा बद्धं पारदमाकाशगमनं करोति, एवं बद्धं मनो ब्रह्माकारवृत्तिप्रवाहमविच्छिन्नं करोतीत्यर्थः ॥ ९६ ॥

नादेति ॥ नादस्यानाहतस्वनस्य श्रवणतः श्रवणात् क्षिप्रं द्रुतमंतरंगं मन एव भुजंगमः सर्पश्चपलत्वान्नादप्रियत्वाच्च भुजंगमरूपत्वं मनसः । सर्वं विश्वं विस्मृत्य विस्मृतिविषयं कृत्वैकाग्रो नादाकारवृत्तिप्रवाहवान् सन्कुत्रापि विषयांतरे नहि धावति नैव धावनं करोति । ध्यानोत्तरैः श्लोकैः । 'तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् । मनसा ध्याननिष्पाद्यः समाधिः सोऽभिधीयते' इति विष्णुपुराणोक्तलक्षण 'स्तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरि' ति पातंजलसूत्रोक्तलक्षणेन च संप्रज्ञातलक्षणः समाधिरुक्तः ॥ ९७ ॥

काष्ठ इति ॥ काष्ठे दारुणि प्रवर्तितः प्रज्वालितो वह्निः काष्ठेन सह शाम्यति ज्वालारूपं परित्यज्य तन्मात्ररूपेणावतिष्ठते यथा तथा । नादे प्रवर्तितं चित्तं नादेन सह लीयते । राजसतामसवृत्तिनाशात्सत्त्वमात्रावशेषं संस्कारशेषं च भवति । तत्र च मैत्रायणीयमंत्रः । 'यथा निरिंधनो वह्निः स्वयोनावुपशाम्यति । तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यती' ति ॥ ९८ ॥

घंटादीति ॥ घंटा आदिर्येषां शंखमर्दलझर्झरदुंदुभिजीमूतादीनां ते घंटादयः

॥ भाषा ॥

नादेति ॥ अनाहत नादके श्रवणकरकें शीघ्र अंतरंग मनरूपी सर्प संपूर्ण विस्मरण होयकरकें एकाग्रचित्त होय कहूंबी विषयांतरमें नही डोरे ॥ ९७ ॥

काष्ठ इति ॥ काष्ठमें प्रवर्त हुयो अग्नि काष्ठकरकें सहित ज्वालारूप परित्यागकरकें शांति होय हे तेसेंही नादमें प्रवर्त हुयो चित्त नादकरकें सहित लीन होय हे ॥ ९८ ॥

घंटादीति ॥ घंटादिकनके शब्दनमें आसक्त यातेंही निश्चल अंतःकरणरूप हरिणको

मू० अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते ॥
ध्वनेरंतर्गतं ज्ञेयं ज्ञेयस्यांतर्गतं मनः ॥
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ॥ १०० ॥
तावदाकाशसंकल्पो यावच्छब्दः प्रवर्तते ॥
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते ॥ १ ॥

॥ टीका ॥

स्तेषां नादस्तेषु सक्तः । अत एव स्तब्धो निश्चलो योऽतःकरणमेव हरिणो मृगस्तस्य प्रहरणं नानावृत्तिप्रतिबंधनमंतःकरणपक्षे । हरिणपक्षे तु प्रहरणं हननमपि शरवद्द्रुतगामिनो वायोः संधानसुषुम्नामार्गेण ब्रह्मरंध्रे निरोधनपक्षे शरस्य बाणस्य संधानं धनुषि योजनं तस्मिन् प्रवीणः कुशलश्चेसुत्करं सुखेन कर्तुं शक्यम् ॥ ९९ ॥
अनाहतस्येति ॥ अनाहतस्य शब्दस्यानाहतस्वनस्य यो ध्वनिर्निर्ह्राद उपलभ्यते श्रूयते तस्य ध्वनेरंतर्गतं ज्ञेयं ज्योतिः स्वप्रकाशचैतन्यं ज्ञेयस्यांतर्गतं ज्ञेयाकारतामापन्नं मनोऽतःकरणं तत्र ज्ञेये मनो विलयं याति परवैराग्येण सकलवृत्तिशून्यं संस्कारशेषं भवति । तद्विष्णोर्विभोरात्मनः परममंतःकरणवृत्त्युपाधिराहित्यान्निरुपाधिकं पद्यते गम्यते योगिभिरिति पदं स्वरूपम् ॥ १०० ॥

तावदिति ॥ यावच्छब्दोऽनाहतध्वनिः प्रवर्तते श्रूयते तावदाकाशस्य सम्यक्कल्पनं भवति । शब्दस्याकाशगुणत्वाद्गुणगुणिनोरभेदाद्वा मनसा सह शब्दस्य विलयान्निःशब्दं शब्दरहितं यत्परं ब्रह्म परं ब्रह्मशब्दवाच्यं परमात्मेति गीयते परमात्मशब्देन स उच्यते । सर्ववृत्तिविलये यः स्वरूपेणावस्थितः स एव परब्रह्मपरमात्मशब्दाभ्यामुच्यत इति भावः ॥ १ ॥

॥ भाषा ॥

प्रहार नानावृत्तिनको रोकनो सहज हे ॥ ९९ ॥

अनाहतस्येति ॥ अनाहत शब्दकी जो ध्वनी श्रवण करे हे ता ध्वनीके भीतर स्वप्रकाश चैतन्य तामें अंतर्गत प्राप्त मन सो मन चैतन्यमें लय होय हे सो विष्णुको परमपद योगीनकरके प्राप्त होय हे ॥ १०० ॥

तावदिति ॥ जितनें नाद श्रवण करवेमें आवे हे तब तलक आकाश रहे हे. जब मन करकें सहित शब्दको लय होय हे और नादके लय हो तेंहीं चित्त अपने स्वरूपकरकें स्थित होय हे शब्दरहित जो ब्रह्म हे ताय परमात्मा कहे हें ॥ १ ॥

मू० यत्किंचिन्नादरूपेण श्रूयते शक्तिरेव सा ॥
यस्तत्त्वांतो निराकारः स एव परमेश्वरः ॥ २ ॥
सर्वेहठलयोपाया राजयोगस्य सिद्धये ॥
राजयोगसमारूढः पुरुषः कालवंचकः ॥ ३ ॥
तत्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः ॥
उन्मनी कल्पलतिका सद्य एव प्रवर्तते ॥ ४ ॥

॥ टीका ॥

यत्किंचिदिति ॥ नादरूपेणानाहतध्वनिरूपेण यत्किंचिच्छ्रुयते आकर्ण्यते सा शक्तिरेव यस्तत्त्वांतस्तत्त्वानामंतो लयो यस्मिन् सः तथा निराकार आकाररहितः स एव परमेश्वरः सर्ववृत्तिक्षये स्वरूपावस्थितो यः स आत्मेत्यर्थः । काष्ठे प्रवर्तितो वह्निरित्यादिभिः श्लोकैः राजयोगापरपर्यायोऽसंप्रज्ञातः समाधिरुक्तः ॥ २ ॥

सर्वे इति ॥ हठश्च लयश्च हठलयौ तयोरुपाया हठलयोपाया हठोपाया आसन-कुंभकमुद्रारूपा लयोपाया नादानुसंधानशांभवीमुद्रादयः । राजयोगस्य मनसः सर्व-वृत्तिनिरोधलक्षणस्य सिद्धये निष्पत्तये प्रोक्ता इति शेषः । राजयोगसमारूढः सम्य-गारूढः प्राप्तवान् यः पुरुषः स कालवंचकः कालं मृत्युं वंचयति जयतीति तादृशः स्यादिति शेषः ॥ ३ ॥

तत्त्वमिति ॥ तत्त्वं चित्तं बीजं बीजवदुन्मन्यवस्थांकुराकारेण परिणममानत्वात्। हठः प्राणापानयोरैक्यलक्षणः प्राणायामः क्षेत्रे इव प्राणायामे उन्मनी कल्पलतिको-

॥ भाषा ॥

यत्किंचिदिति ॥ नादरूप करके जो कछू श्रवण करवेमें आवे हे सो शक्ती है ओर जो तत्त्वनको लय जामें और आकाररहित होय सोही परमेश्वर हे ॥ २ ॥

सर्वे इति ॥ ये संपूर्ण हठ लयके उपाय आसन कुंभक मुद्रा ये हठके उपाय हैं और नादानुसंधान शांभवीमुद्रादिक ये लयके उपाय हें ये राजयोग जो सर्ववृत्तीनको रोकनो ताकी सिद्धीके अर्थ कहें हें राजयोगकूं प्राप्त हुयो जो पुरुष सो मृत्युकूं जीतवेवारो होय हे ॥ ३ ॥

तत्त्वमिति ॥ तत्त्वतो चित्त और बीज उन्मनी अवस्थाको अंकुर ओर हठ प्राणायाम और क्षेत्र उदासीनता जल इन तीनोमकरकें उन्मनीअवस्था सोहि कल्पलतिका संपूर्ण इष्टकी करवेवाली सो शीघ्रही उत्पन्न होय हे ॥ ४ ॥

मू० सदा नादानुसंधानात्क्षीयंते पापसंचयाः ॥
निरंजने विलीयेते निश्चितं चित्तमारुतौ ॥ ५ ॥
शंखदुंदुभिनादं च न शृणोति कदाचन ॥
काष्ठवज्जायते देह उन्मन्यावस्थया ध्रुवम् ॥ ६ ॥
सर्वावस्थाविनिर्मुक्तः सर्वचिंताविवर्जितः ॥
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः ॥ ७ ॥

॥ टीका ॥

त्पत्तेरौदासीन्यं परवैराग्यं जलं तस्या उत्पत्तिकारणत्वात् । परवैराग्यहेतुकः संस्कारविशेषश्चित्तस्यासंप्रज्ञात इति तल्लक्षणात् । एतैस्त्रिभिरुन्मन्यसंप्रज्ञातावस्था सैव कल्पलतिका सकलेष्टसाधनत्वात्सद्य एव शीघ्रमेव प्रवर्तते प्रवृत्ता भवति उत्पन्ना भवति ॥ ४ ॥

सदेति ॥ सदा सर्वदा नादानुसंधानान्नादानुचिंतनात्पापसंचयाः पापसमूहाः क्षीयंते नश्यंति निरंजने निर्गुणे चैतन्ये निश्चितं ध्रुवं चित्तमारुतौ मनःप्राणौ विलीयेते विलीनौ भवतः ॥ ६ ॥

उन्मन्यवस्थां प्राप्तस्य योगिनः स्थितिमाहाष्टभिः ॥ शंखदुंदुभीति ॥ शंखो जलजो दुंदुभिर्वाद्यविशेषस्तयोर्नादं घोषं कदाचन कस्मिंश्चिदपि समये न शृणोति । शंखदुंदुभीत्युपलक्षणं नादमात्रस्य । उन्मन्यवस्थया देहो ध्रुवं काष्ठवज्जायते । निश्चेष्टत्वादित्यर्थः ॥ ६ ॥

सर्वेति ॥ जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणलक्षणाः पंच व्युत्थानावस्थास्ताभिर्विशेषेण मुक्तो रहितः सर्वा याश्चिताः स्मृतयस्ताभिर्विवर्जितो विरहितो यः योगः सकलवृ-

॥ भाषा ॥

सदेति ॥ सदा सर्वदा नादके अनुसंधानतें पापनको समूह नाशकूं प्राप्त होय हे निर्गुण चैतन्यमें निश्चेंही चित्त और वायु ये दोनो लीन होय हे ॥ ५ ॥

शंखदुंदुभीति ॥ उन्मनी अवस्थाकरकें योगीको देह काष्ठकीसी नाई निश्चेष्टावान् होजाय हे. तब शंखदुंदुभीनको नाद ताय कोई समयमें नही श्रवण करेहें ॥ ६ ॥

सर्वेति ॥ जाग्रत् स्वप्न सुषुप्ति मूर्छा मरण ये पांच अवस्थानकरकें रहित होय. और संपूर्ण चिंताकरकें रहित होय. और मृतकीसी नाई स्थित होय सो तुर्य अवस्थावान् योगी जीवतोही मुक्त हे ॥ ७ ॥

मू० खाद्यते न च कालेन बाध्यते न च कर्मणा ॥
साध्यते न स केनापि योगी युक्तः समाधिना ॥ ८ ॥
न गंधं न रसं रूपं न च स्पर्शं न निःस्वनम् ॥
नात्मानं न परं वेत्ति योगी युक्तः समाधिना ॥ ९ ॥
चित्तं न सुप्तं नो जाग्रत्स्मृतिविस्मृतिवर्जितम् ॥

॥ टीका ॥

त्तिनिरोधोऽस्यास्तीति योगी तुर्यावस्थावान् स मुक्तो जीवन्नेव मुक्तः । सकलवृत्तिनिरोधे आत्मनः स्वरूपावस्थानात् । तदुक्तं पातंजले सूत्रे । 'तदा द्रष्टुः स्वरूपेऽवस्थानमि'ति । स्पष्टमन्यत् ॥ ७ ॥

खाद्यत इति ॥ समाधिना युक्तो योगी कालेन मृत्युना न खाद्यते न भक्ष्यते । न हन्यत इत्यर्थः । कर्मणा कृतेन शुभेनाशुभेन वा न बाध्यते जन्ममरणादिजनने न क्लेश्यते । तथा च समाधिप्रकरणे पातंजलसूत्रं । 'ततः क्लेशकर्मनिवृत्तिरि'ति । केनापि पुरुषांतरेण यंत्रमंत्रादिना वा न साध्यते साधयितुं शक्यते ॥ ८ ॥

न गंधमिति ॥ समाधिना युक्तो योगी गंधं सुरभिमसुरभिं वा न रसं मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधं न रूपं शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं न स्पर्शं शीतमुष्णमनुष्णाशीतं वा न निःस्वनं शंखदुंदुभिजलधिजीमूतादिनिनादं बाह्यमाभ्यंतरं वा न आत्मानं देहं न परं पुरुषांतरं वेत्तीति सर्वत्रान्वेति । 'आत्मा देहे धृतौ जीवे स्वभावे परमात्मनी'त्यमरः ॥ ९ ॥

चित्तमिति ॥ यस्य योगिनश्चित्तमंतःकरणं न सुप्तं । आवरकस्य तमसोऽभावा

॥ भाषा ॥

खाद्यत इति ॥ समाधिकरकें मुक्त योगी मृत्युकरकें नहीं नाशकूं प्राप्त होय हे. कियेहुये जे शुभ अशुभ कर्मकरकें जन्ममरणादिककरकें जे क्लेशते नही ही होय. कोई पुरुषकरकें अथवा यंत्र तंत्र मंत्रादिककरकें नही साधन करवेकूं समर्थ होय हे ॥ ८ ॥

न गंधमिति ॥ समाधिकरकें युक्त योगी गंध दुर्गंध ताय नही जाने हें. और मीठो कडवो कषायलो तीखो लवण अम्ल इनकूं नही जाने हें. और रूप जो श्वेत नील लाल हरित पीलों इनें नही जाने हें. और स्पर्श जो शीत उष्ण इनकूं नही जाने. और शब्द शंख नगाडे समुद्र मेघादिकनके शब्द और आत्मा जो देह ताय और पुरुषांतर इनकूं नही जाने हे ॥ ९ ॥

चित्तमिति ॥ जा योगीको चित्तसूतो न होय जागतोबी न होय और स्मृतीबी न होय

मू० न चास्तमेति नोदेति यस्यासौ मुक्त एव सः ॥ १० ॥
न विजानाति शीतोष्णं न दुःखं न सुखं तथा ॥
न मानं नापमानं च योगी युक्तः समाधिना ॥ ११ ॥
स्वस्थो जाग्रदवस्थायां सुप्तवद्योऽवतिष्ठते ॥
निःश्वासोच्छ्वासहीनश्च निश्चितं मुक्त एव सः ॥ १२ ॥

॥ टीका ॥

त्रिगुणेंऽतःकरणे यदा सत्त्वरजसी अभिभूय समस्तकरणावरकं तम आविर्भवति तदांतःकरणस्य बिषयाकारपरिणामाभावात्तत्सुप्तमित्युच्यते । नो जाग्रत् इंद्रियैरर्थग्रहणाभावात् । स्मृतिश्च विस्मृतिश्च स्मृतिविस्मृनी ताभ्यां वर्जितं । वृत्तिसामान्याभावादुद्बोधकाभावाच्च स्मृतिवर्जितम् । स्मृत्यनुकूलसंस्काराभावाद्विस्मृतिवर्जितं । न चास्तं नाशमेति प्राप्नोति । संस्कारशेषस्य चितस्य सत्त्वात् । नोदेत्युद्भवति । वृत्त्यनुत्पादनात् । सोऽसौ मुक्त एव जीवन्मुक्त एव ॥ १० ॥

न विजानातीति ॥ समाधिना युक्तो योगी शीतं च उष्णं च शीतोष्णं । समाहारद्वंद्वः । शीतमुष्णं वा पदार्थं न दुःखं दुःखजनकं परकृतं ताडनादिकं न सुखं सुखसाधनं सुरभिचंदनाद्यनुलेपनादिकं । तथा चार्थे । मानं परकृतं सत्कारं न अपमानमनादरं च न विजानातीति क्रियापदं प्रतिवाक्यमन्वेति ॥ ११ ॥

स्वस्थ इति ॥ स्वस्थः प्रसन्नेंद्रियांतःकरणः । एतेन तंद्रामूर्छादिव्यावृत्तिः । जाग्रदवस्थायामित्यनेन स्वप्नसुषुप्त्योर्निवृत्तिः । सुप्तवत् सुप्तेन तुल्यं कायेंद्रियव्यापारशून्यो यो योगी अवतिष्ठते स्थितो भवति । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् । निश्वासोच्छ्वासहीनः बाह्यवायोः कोष्ठे ग्रहणं निश्वासः कोष्ठस्थितस्य वायोर्बहिर्निःसारणमुच्छ्वासस्ताभ्यां हीनश्चावतिष्ठत इत्यत्रापि संबध्यते । स निश्चितं निःसं-

॥ भाषा ॥

विस्मृतीबी नहोय नाशकूंबी प्राप्त नहोय और उदयबी नहोय एसो योगी जीवन्मुक्त हे ॥ १० ॥

न विजानातीति ॥ समाधियुक्त योगी शीत उष्ण सुख मान अपमान इनकूं नही जाने हे ॥ ११ ॥

स्वस्थ इति ॥ प्रसन्न हे अंतःकरण जाको एसो योगी जाग्रद् अवस्थामें सुप्तकीतुल्य स्थित होय श्वासनिश्वासकरकें रहित स्थित होय सो जीवन्मुक्त हे ॥ १२ ॥

मू० अवध्यः सर्वशस्त्राणामशक्यः सर्वदेहिनाम् ॥
अग्राह्यो मंत्रयंत्राणां योगी युक्तः समाधिना ॥ १३ ॥

॥ टीका ॥

दिग्धं मुक्त एव । जीवन्मुक्तस्वरूपमुक्तं दत्तात्रेयेण । 'निर्गुणध्यानसंपन्नः समाधिं च ततोऽभ्यसेत् । दिनद्वादशकेनैव समाधिं समवाप्नुयात् । वायुं निरुध्य मेधावी जीवन्मुक्तो भवेद्ध्रुवम्' इति ॥ १२ ॥

अवध्य इति ॥ समाधिना युक्तो योगी । सर्वशस्त्राणामिति संबंधसामान्ये षष्ठी । सर्वशस्त्रैरित्यर्थः । अवध्यो हंतुमशक्य इत्यर्थः । सर्वदेहिनामित्यत्रापि संबंधमात्रविवक्षायां षष्ठी । अशक्यः सर्वदेहिभिः बलेन शक्यो न भवतीत्यर्थः । मंत्रयंत्राणां वशीकरणमारणोच्चाटनादिफलैर्मंत्रयंत्रैरग्राह्यः वशीकर्तुमशक्यः । एवं प्राप्तयोगस्य योगिनो विघ्ना बहवः समायांति । तन्निवारणार्थं तज्ज्ञानस्यापेक्षितत्त्वात्तेऽपि प्रदर्श्यंते । दत्तात्रेयः । 'आलस्यं प्रथमो विघ्नो द्वितीयस्तु प्रकथ्यते । पूर्वोक्तधूर्तगोष्ठी च तृतीयो मंत्रसाधनम् । चतुर्थो धातुवादः स्यादिति योगविदो विदुरि'ति । मार्कंडेयपुराणे । 'उपसर्गाः प्रवर्तंते दृष्टा ह्यात्मनि योगिनः । ये तांस्ते संप्रवक्ष्यामि समासेन निबोध मे । काम्याः क्रियास्तथा कामान्मनुष्यो योऽभिवांछति । स्त्रियो दानफलं विद्यां मायां कुप्यं धनं वसु । देवत्वममरेशत्वं रसायनवयः क्रियाम् । मेरुं प्रयतनं यज्ञं जलाग्न्यावेशनं तथा । श्राद्धानां शक्तिदानानां फलानि नियमास्तथा । तथोपवासात्पूर्ताच्च देवपित्रर्चनादपि । अतिथिभ्यश्च कर्मभ्य उपसृष्टोऽभिवांछति । विघ्नमित्थं प्रवर्तंत यत्नाद्योगी निवर्तयेत् । ब्रह्मासंगि मनः कुर्वन्नुपसर्गैः प्रमुच्यते ॥' इति । पद्मपुराणे । 'यदैभिरंतरायैर्न क्षिप्यतेऽस्य हि मानसं । तदाग्रे तमवाप्नोति परं ब्रह्मातिदुर्लभम् ।' योगभास्करे । 'सात्त्विकीं धृतिमालंब्य योगी सत्त्वेन सुस्थिरः । निर्गुणं मनसा ध्यायन्नुपसर्गैः प्रमुच्यते॥ एवं योगमुपासीनः शक्रादिपदनिस्पृहः । सिद्ध्यादिवासनात्यागी जीवन्मुक्तो भवेन्मुनिः । विस्तरस्य भिया नोक्ताः संति विघ्ना ह्यनेकशः । ध्यानेन विष्णुहरयोर्वारणीया हि योगिने'ति ॥ १३ ॥

॥ भाषा ॥

अवध्य इति ॥ समाधिकरकें युक्त योगी सबले शस्त्रनकरकें नाश होयवेकूं अशक्य हे और सर्व देहधारीनकर पराक्रमकरकें समर्थ नही हे और मंत्र यंत्र तंत्रादिकनकर वशीकरण मरणादिक करवेकूं समर्थ नही ॥ १३ ॥

मू० यावन्नैव प्रविशति चरन्मारुतो मध्यमार्गे यावद्बिंदुर्न भवति दृढप्राणवातप्रबंधात् ॥

॥ टीका ॥

अयोगिनां ज्ञानं निराकुर्वन्योगिनामेव ज्ञानं भवतीत्याह ॥ यावदिति ॥ मध्यमार्गे सुषुम्नायां चरन् गच्छन् मारुतः प्राणवायुः यावत् यावत्कालपर्यंतं न प्रविशति प्रकर्षेण ब्रह्मरंध्रपर्यंतं न विशति । ब्रह्मरंध्रं गतस्य स्थैर्याद्ब्रह्मरंध्रं गत्वा न स्थिरो भवतीत्यर्थः । सुषुम्नायामसंचरन् वायुरसिद्ध इत्युच्यते । तदुक्तममृतसिद्धौ । 'यावद्धि मार्गतो वायुर्निश्चलो नैव मध्यगः । असिद्धं तं विजानीयाद्वायुं कर्मवशानुगमि' ति । प्राणयति जीवयतीति प्राणः स चासौ वातश्च प्राणवातः तस्य प्रबंधात्कुंभकेन स्थिरीकरणाद्बिंदुर्वीर्यं दृढः स्थिरो न भवति प्राणवातस्थैर्ये बिंदुस्थैर्यमुक्तमत्रैव प्राक्। 'मनःस्थैर्ये स्थिरो वायुस्ततो बिंदुः स्थिरो भवेदि' ति। तदभावे त्वसिद्धत्वं योगिनः। उक्तममृतसिद्धौ । 'तावद्बद्धोऽप्यसिद्धोऽसौ नरः सांसारिको मतः । यावद्भवति देहस्थो रसेंद्रो ब्रह्मरूपकः । असिद्धं तं विजानीयान्नरमब्रह्मचारिणम् । जरामरणसंकीर्णं सर्वक्लेशसमाश्रयमि'ति । यावत्तत्वं चित्तं ध्याने ध्येयचित्तं न सहजसदृशं स्वाभाविकध्येयाकारवृत्तिप्रवाहानैव जायते नैव भवति प्राणवातप्रबंधादिति देहलीदीपन्यायेनात्रापि संबध्यते। वायुस्थैर्ये चित्तस्थैर्यमुक्तममृतसिद्धौ । 'यदासौ भ्रियते वायुर्मध्यमां मध्ययोगतः । तदा बिंदुश्च चित्तं च भ्रियते वायुना सह । तदभावेऽह्यसिद्धत्वमुक्तममृतसिद्धौ । 'यावत्प्रस्यंदते चित्तं बाह्याभ्यंतरवस्तुषु । असिद्धं तद्विजानीयाचित्तं कर्मगुणान्वितमि' ति । तावद्यज्ज्ञानं शाब्दं वदति कश्चित् तदिदं ज्ञानं कथं दंभमिथ्याप्रलापः दंभेन ज्ञानकथनेनाहं लोके पूज्यो भविष्यामीति धिया मिथ्याप्रलापो मिथ्याभाषणं दंभपूर्वकं मिथ्याभाषणमित्यर्थः । प्राणबिंदुचित्तानां जयाभावे ज्ञानस्याभावात्संसृतिर्दुर्वारा । तदुक्तममृतसिद्धौ । 'चलत्येष यदा वायुस्तदा बिंदुश्चलः स्मृतः । बिंदुश्चलति यस्यांगे चित्तं तस्यैव चंचलम् । चले बिंदौ चले चित्ते चले वायौ च सर्वदा । जायते भ्रियते लोकः सत्यं सत्यमिदं वचः ॥' इति। योगबीजेऽप्युक्तम् । 'चित्तं प्रनष्टं यदि भासते वै तत्र प्रतीतो मरुतोऽपि नाशः । न वा यदि स्यान्न तु तस्य शास्त्रं नात्मप्रतीतिर्न गुरुर्न मोक्षः ॥ इति । एतेन प्राणबिंदुमनसां जये तु ज्ञा-

॥ भाषा ॥

यावदिति ॥ सुषुम्नामार्गमें गमन करत प्राणवायु जबतांई ब्रह्मरंध्रपर्यंत नही प्रवेश करे हे. और प्राणवायुकूं कुंभककरकें स्थिर करवेतें वीर्य जबतांई स्थिर नही होय. और

मू॰ यावद्ध्याने सहजसदृशं जायते नैव तत्त्वं तावज्ज्ञानं वदति तदिदं दंभमिथ्याप्रलापः ॥ १४ ॥ इति श्रीसहजानंदसंतानचिंतामणिस्वात्मारामयोगींद्रविरचितायां हठप्रदीपिकायां समाधिलक्षणं नाम चतुर्थोपदेशः ॥ ४ ॥ मूलश्लोकसंख्या ॥ ३९३ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

॥ टीका ॥

नद्वारा योगिनो मुक्तिः स्यादेवेति सूचितम् । तदुक्तममृतसिद्धौ । 'यामवस्थां व्रजेद्वायुर्बिंदुस्तामधिगच्छति । यथाहि साध्यते वायुस्तथा बिंदुप्रसाधनम् । मूर्छितो हरति व्याधिं वृद्धः खेचरतां नयेत् । सर्वसिद्धिकरो लीनो निश्चलो मुक्तिदायकः । यथावस्था भवेद्बिंदोश्चित्तावस्था तथा तथा ॥' ननु । 'योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया । ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचिदि'ति भगवदुक्तास्त्रयो मोक्षोपायास्तेषु सत्सु कथं योग एव मोक्षोपायत्वेनोक्त इतिचेन्न । तेषां योगांगेष्वंतर्भावात् । तथाहि । 'आत्मा वा अरे द्रष्टव्यःश्रोतव्यो मंतव्यो निदिध्यासितव्यः' इति श्रुत्या परमपुरुषार्थसाधनात्मसाक्षात्कारहेतुतया श्रवणमनननिदिध्यासनान्युक्तानि तत्र श्रवणमनने नियमांतर्गते स्वाध्यायेंऽतर्भवतः । स्वाध्यायश्च मोक्षशास्त्राणामध्ययनम् । स च तात्पर्यार्थनिश्चयपर्यवसायो ग्राह्यः । तात्पर्यार्थनिर्णयश्च श्रवणमननाभ्यां भवतीति श्रवणमननयोः स्वाध्यायेंऽतर्भावः । नियमविवरणे याज्ञवल्क्येन । 'सिद्धांतश्रवणं प्रोक्तं वेदांतश्रवणं बुधैरि'ति स्पष्टमेव श्रवणस्य नियमांतर्गतिरुक्ता । 'अधीतवेदं सूत्रं वा पुराणं सेतिहासकम् । पदेष्वध्ययनं यश्च सदाभ्यासो जपः स्मृतः ॥' इति युक्तिभिरनवरतमनुचिंतनलक्षणस्य सदाभ्यासरूपस्य मननस्यापि नियमांतर्गतिरुक्ता । विजातीयप्रत्ययनिरोधपूर्वकसजातीयप्रत्ययप्रवाहरूपस्य निदिध्यासनस्य उक्तलक्षणे ध्यानेंऽतर्भावः । तस्यापि तत्परिपाकरूपसमाधिनात्मसाक्षात्कारद्वारा मोक्षहेतुत्वमीश्वरार्पणबुद्ध्या निष्कामकर्मानुष्ठानलक्षणस्य कर्मयोगस्य 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' इति पतंजलिप्रोक्ते नियमांतर्गते क्रियायोगेंऽतर्भावः । तत्र तप उक्तमीश्वरगीतायाम् ।

॥ भाषा ॥

जबतांई तत्त्वके चिंतमनमें चित्त ब्रह्मके आकार वृत्तिप्रवाह नहीं होय तबतांई जो ज्ञान कहे ज्ञानके कहवेकरकें में पूजवेके योग्य होय जाउंगो या बुद्धीकरकें कहे तो वी क-

॥ टीका ॥

'उपवासपराकादिकृच्छ्रचांद्रायणादिभिः । शरीरशोषणं प्राहुस्तापसास्तप उत्तममि'-ति । स्वाध्यायोऽपि तत्रोक्तः । 'वेदांतशतरुद्रीयप्रणवादिजपं बुधाः । सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते' इति । ईश्वरप्रणिधानं च तत्रोक्तं । 'स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः । सुनिश्चला भवेद्भक्तिरेतदीश्वरपूजनमि'ति । क्रियायोगश्च परंपरया समाधिनात्मसाक्षात्कारद्वारैव मोक्षहेतुरिति समाधिभावनार्थः । क्लेशतनूकरणार्थश्चेत्युत्तरसूत्रेण स्पष्टीकृतं पतंजलिना । भजते सेव्यते भगवदाकारमंतःकरणं क्रियतेऽनयेति भक्तिरिति करणव्युत्पत्त्या 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं । अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनमि'ति । नवधोक्ता साधनभक्तिरभिधीयते । तस्या ईश्वरप्रणिधानरूपे नियमेंऽतर्भावः । तस्याश्च समाधिहेतुत्वं चोक्तं पतंजलिना । ईश्वरप्रणिधानाद्वे'ति । ईश्वरविषयकात्प्रणिधानाद्भक्तिविशेषात्समाधिलाभः समाधिफलं भवतीति सूत्रार्थः । भजनमंतःकरणस्य भगवदाकारतारूपं भक्तिरिति भावव्युत्पत्त्या फलभूता भक्तिरभिधीयते । सैव प्रेमभक्तिरित्युच्यते । तल्लक्षणमुक्तं नारायणतीर्थैः । 'प्रेमभक्तियोगस्तु ईश्वरचरणारविंदविषयकैकांतिकात्यंतिकप्रेमप्रवाहोऽविच्छिन्नः' इति । मधुसूदनसरस्वतीभिस्तु । 'द्रवीभावपूर्विका मनसो भगवदाकारतारूपा सविकल्पकवृत्तिर्भक्तिरि'ति । 'तस्यास्तु श्रद्धाभक्तिध्यानयोगादवेही'ति श्रुतेः । 'भक्त्या मामभिजानाती'ति स्मृतेश्च । आत्मसाक्षात्कारद्वारा मोक्षहेतुत्वम् । भक्तास्तु सुखस्यैव पुरुषार्थत्वाद्दुःखासंभिन्ननिरतिशयसुखदारारूपा प्रेमभक्तिरेव पुरुषार्थ इत्याहुः । तस्यास्तु संप्रज्ञातसमाधावंतर्भावः । एवं च अष्टांगयोगातिरिक्तं किमपि परमपुरुषार्थसाधनं नास्तीति सिद्धम् ॥ ११४ ॥

ग्राह्यमेव विदुषां हितं यतो भाषणं समयदर्श्यसंस्कृतम् । रक्ष गच्छति पयो न लेहितं ह्यंब इत्यभिहितं शिशोर्यथा ॥ १ ॥ सदर्थद्योतनकरी तमःस्तोमविनाशिनी ॥ ब्रह्मानंदेन ज्योत्स्नेयं शिवांघ्रियुगलेऽर्पिता ॥ २ ॥

इति श्रीहठप्रदीपिकाव्याख्यायां ब्रह्मानंदकृतायां ज्योत्स्नाभिधायां समाधिनिरूपणं नाम चतुर्थोपदेशः ॥ ४ ॥ टीकाग्रंथसंख्या ॥ २४५० ॥

॥ भाषा ॥

हनो कपटपूर्वक मिथ्याभाषण जाननो या अष्टांग योगतें न्यारो कछूबी परम पुरुषार्थ साधन नहीं हें ॥ १४ ॥

इति श्रीहठप्रदीपिकाव्याख्यायां दध्यङ्कुलोत्पन्नजटाशंकरात्मजश्रीधरकृतायां **मनोभिलाषिण्यभिधायां** समाधिनिरूपणं नाम चतुर्थोपदेशः ॥४॥ भाषाग्रंथसंख्या ॥ १६९७ ॥

इदं पुस्तकं १८१७ परिमिते शालिवाहन शके तथा १९५१ परिमिते विक्रमादित्यसंवत्सरे वैशाख मासे कृष्णपक्षे प्रतिपत्तिथौ गुरु वासरे मुम्बापुर्यां 'प्रबोधरत्नाकरा'ख्ये मुद्रणालये मुद्राप्य शास्त्रितः संशोध्य प्राकाश्यमनायि ।

अनेन श्रीराधारमणः प्रीयताम् ॥ ॥ ॥ ॥ ॥ ॥ ॥

No. ४३८३

Title हठ प्रदीपिका

Author श्री स्वात्मा रामः

Extent २३ Age ×

Subject योगशास्त्रं

हठप्रदीपिका

५२५२

पुराण

पुस्तकमिदं पाठको
पादृयै घनश्यामण:

योग २

हठ॰ १ श्रीगणेशाय नमः श्रीआदिनाथाय नमोस्तु तस्मै येनोपदिष्टा हठयोगविद्या विराजते
प्रोन्नतराजयोगमारोढुमिच्छोरधिरोहिणीव १ प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण
योगिना केवलं राजयोगाय हठविद्योपदिश्यते २ भ्रांत्या बहुमतध्वांते राजयोगम
जानतां हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ३ हठविद्यां महाविद्यां गोरक्षाद्या
विजानते स्वात्मारामोथवा योगी जानीते तत्प्रसादतः ४ श्रीआदिनाथमत्स्येंद्रशाबा
रानंदभैरवाः चौरंगीमीनगोरक्षविरूपाक्षबिलेशयाः ५ मंथानभैरवो योगी सिद्ध
बुद्धश्च कंथडिः कोरंटकः सुरानंदः सिद्धपादश्च चर्पटिः ६ कानेरी पूज्यपादश्च नि
नाथ ३ त्यनाथो निरंजनः कपाली बिंदुनाथश्च काकचंडीश्वराह्वयः ७ अल्लामः प्रभुदेवश्च
घोडाचोलीच टिंटिणिः भालुकी नागबोधश्च खंडकापालिकस्तथा ८ इत्यादयो म
हासिद्धा हठयोगप्रभावतः खंडयित्वा कालदंडं ब्रह्मांडे विचरंति ते ९ अशेषताप १।१

पादयः ३

तप्तानांसमाश्रयमठोहठः अशेषयोगयुक्तानामाधारकमठोहठः १० हठविद्यापरंगोप्या
योगिनासिद्धिमिच्छता भवेद्वीर्यवतीगुप्तानिर्वीर्यातुप्रकाशिता ११ सुराज्येधार्मि
केदेशेसुभिक्षेनिरुपद्रवे धनुःप्रमाणपर्यंतंशिलाग्निजलवर्जिते एकांतमठिका
मध्येस्थातव्यंहठयोगिना १२ अल्पद्वारमरंध्रगर्तविवरंनात्युच्चनीचायतंसम्यग्गो
मयसांद्रलिप्तममलंनिःशेषबाधोज्झितं बाह्येमंडपवेदिकूपरुचिरंप्राकारसंवेष्टितं
प्रोक्तंयोगमठस्यलक्षणमिदंसिद्धैर्हठाभ्यासिभिः १३ एवंविधेमठेस्थित्वासर्वचिं
ताविवर्जितः गुरूपदिष्टमार्गेणयोगमेवसदाभ्यसेत १४ अत्याहारःप्रयासश्च
प्रजल्पोनियमग्रहः जनसंगश्चलौल्यंचषड्भिर्योगोविनश्यति १५ उत्साहात्क्ष
मयाधैर्यात्तत्वज्ञानाच्चनिश्चयात् जनसंगपरित्यागात्षड्भिर्योगःप्रसिध्यति १६
हठस्यप्रथमांगत्वादासनंपूर्वमुच्यते कुर्यात्तदासनंस्थैर्यमारोग्यंचांगलाघवं १७

ह.प्र. २ वसिष्ठाद्यैश्च मुनिभिर्मत्स्येंद्राद्यैश्च योगिभिः अंगीकृतान्यासनानि कथ्यंते कानिचिन्मया
१८ जानूर्वोरंतरे सम्यक् कृत्वा पादतले उभे ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते
१९ सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् दक्षिणेपि तथा सव्यं गोमुखं गोमुखं तथा
२० एकपादमथैकस्मिन्विन्यस्योरुणि संस्थितं इतरस्मिंस्तथा चोरुं वीरासनमुदीरि
तं २१ गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः कूर्मासनं भवेदेतदिति योगविदो विदुः
२२ पद्मासनं तु संस्थाप्य जानूर्वोरंतरे करौ निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटास
नं २३ कुक्कुटासनबंधस्थो दोर्भ्यां संबध्य कंधरं भवेत्कूर्मवदुत्तान एतदुत्तानकूर्मकं २४
तु पादांगुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि धनुराकर्षणं कृत्वा धनुरासनमुच्यते
२५ वामोरुमूलार्पितदक्षपादं जानोर्बहिर्वेष्टितदक्षहस्ता प्रगृह्य तिष्ठेत्परिवर्तितांगं
श्रीमत्स्यनाथोदितमासनं स्यात् २६ मत्स्येंद्रपीठं जठरप्रचंडरुग्मंडलखंडनास्त्रं २

ग्यम्यासतः कुंडलिनीप्रबोधं दंडस्थितश्चैव हस्तलिंगं सा २७ भ्रामार्धपादेऽपि गदिंदश्रूपो दे
र्धं वदत्यन्ह्नितपं गहीत्वा जानूपरिन्यस्तललाटदेशो प्रसिद्धिदं वक्रिमतानमाकुः
२८ इति पश्चिमतानमासनं स्यात्एवं पश्चिमपाहि न्वेतोऽस्ति उदयं जठरानल
स्य कुर्याद्दुदरोऽर्थं मरोगतां च कुर्यात् २९ धरामवष्टभ्य कराभ्यां ततः कूर्परस्थापि
वितनाभिपार्श्वः उच्चासनो दंडवदुत्थितः स्यान्मायूरमेतत्प्रवदंति पीठं ३० हरति स
कलरोगानाशु गुल्मोदरादीनपि भवति च दोषानासनं श्रीमयूरं बहुकदशनभुक्तं भ
स्म कुर्याद्दशेषं जनयति जठराग्निं जारयेत्कालकूटं ३१ उत्तानश्शववद्भूमौ शयनं तच्छवासनं व
शवा पाद्यो: शवासनं श्रांतिहरं चित्तविश्रांतिकारकं ३२ चतुराशीत्यासनानि शिवेन क
थितानि च तेभ्यश्चतुष्कमादाय सारभूतं ब्रवीम्यहं ३३ सिद्धं पद्मं तथा सिंहं भद्रं चेव
चतुष्टयं श्रेष्ठं तत्रापि च सुखे तिष्ठेत्सिद्धासने सदा ३४ योनिस्थानकमंघ्रिमूलघटि

न१

तंकृत्वादृढंविन्यसेतमेढ्रेपादमथैकमेवहृदयेकृत्वासमंविग्रहं स्थाणुःसंयमितेंद्रियो
चलदृशोपश्यनभ्रुवोरंतरं चेतन्मोक्षकपाटभेदजनकं सिद्धासनंप्रोच्यते ३५ मतांतरे
मेढ्रादुपरिविन्यस्य सव्यंगुल्फंतथोपरि गुल्फांतरंचनिक्षिप्य सिद्धाःसिद्धासनंविदुः
३६ एतेसिद्धासनंप्राहुरन्येवज्रासनंविदुः मुक्तासनंवदंत्येके प्राहुर्गुप्तासनंपरे ३७
यमेष्विवमिताहारःमहिंसानियमेःस्थिता तथासर्वासनेषुस्यैसिद्धःसिद्धासनेविदुः
३८ चतुराशीतिपीठेषुसिद्धमेवसदाभ्यसेत द्वासप्ततिसहस्रेषुसुषुम्णाइवनाडिषु
३९ आत्मध्यायीमिताहारीयावद्द्वादशवत्सरं सदासिद्धासनाभ्यासात्योगनिष्पत्ति
माप्नुयात ४० किमन्यैर्बहुभिःपीठैःकिंसदासेवनेनतु प्राणानिलेसावधानेबद्धेकेवल
कुंभके ४१ उत्पद्यतेनिरायासात्स्वयमेवमनोन्मनी तथैकस्मिन्नेवदृढेबद्धेसिद्धास
नेतथा ४२ बंधत्रयमनायासात्स्वयमेवोपजायते नचासनंसिद्धसमंनकुंभसदृशो २

५ द्वासप्ततिसहस्राणांनाडीनांमलशोधनं

।निलः शरीरे वृद्धिं समाप्नुयान्नवनाडीसंशोधनार्थं ५३ अथ पद्मासनं वामोरूपरि दक्षिणं
च चरणं संस्थाप्य वामं तथा याम्योरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढं अंगुष्ठौ
हृदये निधाय चिबुकं नासाग्रमालोकयेदेतद्व्याधिविकारनाशकरं पद्मासनं प्रोच्यते
५४ मतांतरे उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ऊरुमध्ये तथोत्तानौ पाणि
कृत्वा ततो दृशौ ५५ नासाग्रे विन्यसेद्राजदंतमूलं च जिह्वया उत्तम्य चिबुकं वक्षः स्थाप
येत्पवनं शनैः ५६ इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनं दुर्लभं येन केनापि धीमता
भुवि लभ्यते ५७ कृत्वा संपुटितौ करौ दृढतरं बध्वा तु पद्मासनं गाढं वक्षसि संनिधाय
चिबुकं ध्यानं च तच्चेतसि वारंवारमपानमूर्ध्वमनिलं प्रोच्चालयन्न्यंचन्प्राणमुपैति बो
धमतुलं शक्तिप्रभावान्नरः ५७ पद्मासने स्थितो योगी नाडीद्वारेषु पूरयेत् मारुतं धा
धृते पवने स मुक्तो नात्र संशयः ५८ अथ सिंहासनं गुल्फौ च वृषणस्याधः सीवन्याः पा

र्श्वयोः क्षिपेत् दक्षिणे सव्यगुल्फं तु दक्षगुल्फं तु सव्यके ४९ हस्तौ तु जान्वोः संस्थाप्य स्वांगु-
लीः संप्रसार्य च व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः सिंहासनं भवेदेतत् पूजितं
योगिपुंगवैः ५० अथ भद्रासनं गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् स-
व्यगुल्फं तथा चैव सीवन्याः पार्श्वयोः क्षिपेत् पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्च-
लं ५१ भद्रासनं भवेदेतत् सर्वव्याधिविनाशनं गोरक्षासनमित्याहुरिदं वै सिद्धयोगिनः
५२ एवमासनबंधेषु योगींद्रो विगतश्रमः ऽभ्यसेन्नाडिकाशुद्धिं मुद्रादिपवनक्रि-
याः ५३ क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत् न शास्त्रपाठमात्रेण योगसि-
द्धिः प्रजायते ५४ न वेषधारणं सिद्धेः कारणं न च तत्कथा क्रियैव कारणं सिद्धेः सत्य-
मेतन्न संशयः ५५ पीठान्यादरपराय हठ्याद्वैव धानितो आसनं कुंभकं चित्रं मुद्रा-
ख्यं करणं तथा अथ नादानुसंधानमभ्यासानुक्रमो हठे ५६ ब्रह्मचारी मिताहारी यो ५

गीः योगपरायणः । अश्वहस्त्यं दिमवेत्स्वस्थं स्त्रीकार्यो विचारतः ५५ सुस्निग्धमधुराहार
स्तनुर्थी पापिवर्जितः । भुज्यते पिरसंप्रीतेमितांहारः स उच्यते ५६ कटूष्णतीक्ष्णल
वणं स्मृहरितं शाकं मोचीरं तैलतिलसर्षपं मत्स्यमद्यं आजाविमांसदधितक्रकुल
त्थकोल पिण्याकं हिंगुलशुनादिम पथ्यमाहुः ५७ भोजनमहितं पित्ताद्युष्णं रसपूर्णं
स्ततं तथा रूक्षं अतिलवणांम्रमितं च स्वप्नपाकोत्तरं च वर्ज्यं ५८ वर्जयेद्दुर्जनं प्रीतिं
वह्निस्त्रीपथसेवनं प्रातःस्नानोपवासादिकायक्लेशविधिंस्त्यजेत् ५९ गोधूमशालि
यवषष्टिकपयोमनोज्ञैः क्षीराज्यमंड्वनीतमितान्नधनि । शुण्ठीपयोलवणकेलादिरूपं
वेशाकं मुद्गादि दिव्यमुद्गं च शुद्धोदकं पथ्यं ६० इष्टं सुमधुरं स्निग्धं गव्यं धातुप्रपोषणां
मनोभिलषितं पेयं पेयाभोजनमाचरेत् ६१ एवं यः कुरुते रूक्षो वायव्याधितो ऽपि वी
लोऽपि वा अभ्यासात्सिद्धिमाप्नोति सर्वयोगफलं हितं ६२ पीतानि सर्वमशाल्मलिकन्याः इ

ह.प्र.
५

व्यानि करणानि च सर्वाण्यपि हठाभ्यासे राजयोगफलावधि ६६ इति सहजानंदसंता-
नचिंतामणिस्वात्मारामविरचितायां हठप्रदीपिकायां प्रथमोपदेशः अथासने दृढे
योगी वशी हितमिताशनः गुरूपदिष्टमार्गेण प्राणायामं समभ्यसेत् १ चले वा-
ते चलं चित्तं निश्चले निश्चलं भवेत् योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् २ याव-
द्वायुः स्थितो देहे तावज्जीवनमुच्यते मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् ३
मलाकुलासु नाडीषु मारुतो नैव मध्यगः कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत्
शुद्धमेति यथा सर्वं नाडीचक्रं मलाकुलं तदैव जायते योगी प्राणसंग्रहणे क्षमः ५
प्राणायामं ततः कुर्यान्नित्यं सात्विकया धिया यथा सुषुम्णानाडीस्था मलाः शुद्धिं प्रयां-
ति च ६ बद्धपद्मासनो योगी प्राणं चंद्रेण पूरयेत् धारयित्वा यथाशक्ति भूयः सूर्येण रेचये-
त् ७ प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः विधिवत्कुंभकं कृत्वा पुनश्चंद्रेण रेचयेत् ० ५

तेनत्यजेत्तेनापूर्यधारयेदविरोधतः रेचयेच्च ततोन्येन शनैरेव न वेगतः ८ प्राणंचेदि
डयापिबेन्नियमितंभूयोन्यया रेचयेत्पीत्वा पिंगलया समीरणमथो बध्वा त्यजेद्वामतः
सूर्याचंद्रमसोरनेन विधिनाभ्यासं सदा तन्वतां शुद्धा नाडिगणा भवंति यमिनां मा
सत्रयादूर्ध्वतः ९ प्रातर्मध्यंदिने सायमर्धरात्रे च कुंभकान् शनैरशीतिपर्यंतं चतुर्वा
रं समभ्यसेत् १० कनीयसि भवेत्स्वेदः कंपो भवति मध्यमे उत्तिष्ठत्युत्तमे प्राणो वद्धप
द्मासने दृढे ११ जलेन श्रमजातेन गात्रमर्दनमाचरेत् दृढता लघुता चापि तेन गात्रस्य
जायते १२ अभ्यासकाले प्रथमं शस्तं क्षीराज्यभोजनं ततोभ्यासे दृढीभूते न तादृङ्नि
यमग्रहः १३ यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः तथैव सेवितो वायुरन्यथा
हंति साधकं १४ प्राणायामेन युक्तेन सर्वरोगपरिक्षयः अयुक्ताभ्यासयोगेन सर्वरोग
समुद्भवः १५ युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च पूरयेत् युक्तं युक्तं च बध्नीयादेवं सिद्धिम

ह.ठ. वायुयात १६ हिक्काश्वासश्च कासश्च शिरःकर्णाक्षिवेदनाः भवंति विविधा रोगाः पवनस्य
६ अतिक्रमात १७ यदा तु नाडीशुद्धिः स्यात तदा चिह्नानि बाह्यतः कायस्य कृशता कांतिस्त
था जायेत निश्चितं १८ यथेष्टं धारणं वायोरनलस्य प्रदीपनं नादाभिव्यक्तिरारोग्यं जाय
ते नाडिशोधनात १९ मेदश्लेष्माधिकः पूर्वं षट्कर्माणि समाचरेत अन्यथा नाचरेत्तानि
६५ दोषाणां समभावतः २० धौतीबस्तिस्तथा नेतिस्त्राटकं नौलिकं तथा कपालभातीचैता
नि षट्कर्माणि प्रचक्षते २१ कर्मषट्कमिदं गोप्यं घटशोधनकारकं विचित्रगुणसंधायि पू
ज्यते योगिपुंगवैः २२ अथ धौती चतुरंगुलविस्तारं हस्तपंचदशायतं गुरूपदिष्टमार्गे
ण सिक्तं वस्त्रं शनैर्ग्रसेत २३ पुनः प्रत्याहरेच्चैत[illegible]र्ध्वसा धौतिकर्म तत २३ कासश्वा ८
सप्लीहकुष्टं कफरोगाश्च विंशतिः धौतिकर्मप्रभावेन यांत्येव न संशयः २४ उदरगत
पदार्थमुद्वहंति पवनमपानमुदीर्य कंठनाले क्रमपरिचयवश्यवायुवेगा गजकरणी
६

४

तिर्निगद्यते हठ[illegible] २५ अथ बस्तिकर्म नाभिदघ्नजले पायौ न्यस्तनालोत्कटासनः आ
धाराकुंचनं कुर्यात्क्षालनं बस्तिकर्म तत् २६ गुल्मप्लीहोदरं चापि वातपित्तकफोद्भवं ब
स्तिकर्मप्रभावेन क्षीयते सकलामयाः २७ धात्विन्द्रियान्तःकरणप्रसादं दद्याच्च कांतिं दहन
प्रदीप्तिं अशेषदोषोपचयं निहन्यादभ्यस्यमानं जलबस्तिकर्म २८ अथ नेतिकर्म
सूत्रं वितस्तिसुस्निग्धं नासानाले प्रवेशयेत् मुखान्निर्गमयेच्चैषा नेतिः सिद्धैर्निगद्यते
२९ कपालशोधनी चैव दिव्यदृष्टिप्रदायिनी जत्रूर्ध्वजातरोगौघं नेतिराशु निहन्ति च ३०
अथ त्राटकं निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः अश्रुसंपातपर्यन्तमाचार्यैस्त्राटकं स्मृ
तं ३१ मोचनं नेत्ररोगाणां तन्द्रादीनां कपाटकं यत्नतस्त्राटकं गोप्यं यथा हाटकपेटकं ३२
अथ नौलिः अमन्दावर्तवेगेन तुन्दं सव्यापसव्यतः नतांसो भ्रामयेदेषा नौलिः सिद्धैः प्रश
स्यते ३३ मन्दाग्निसंदीपनपाचनादिसंधापिकानन्दकरी सदैव अशेषदोषामयशोष

६८ णी च हठक्रियामौलिरियं हि नौली ३४ अथ कपालभाती भस्त्रावल्लोहकारस्य रेचपूरौ
ससंभ्रमौ कपालभातिर्विख्याता कफदोषविशोषणी ३५ षट्कर्मनिर्गतस्थौल्य
कफदोषमलादिकः प्राणायामं ततः कुर्यादनायासेन सिध्यति ३६ प्राणायामैरेव स
र्वे प्रशुष्यन्ति मला इति आचार्याणां तु केषांचिदन्यत्कर्म न संमतं ३७ ब्रह्मादयोपि त्रिद
शाः पवनाभ्यासतत्पराः तेन सिद्धिं गतास्तस्मात्पवनमभ्यसेत यावद्बद्धो मरुद्देहे याव
च्चित्तं निरामयं यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः ३९ विधिवत्प्राणसंयामैर्नाडी
चक्रे विशोधिते सुषुम्नावदनं भित्वा सुखाद्विशति मारुतः ४० मारुते मध्यसंचारे मनः
स्थैर्यं प्रजायते यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी ४१ तत्सिद्धये विधान
ज्ञाः विचित्रान्कुर्वन्ति कुम्भकान् सूर्यभेदनमुज्जायी सीत्कारी शीतली भस्त्रिका भ्रा
मरी मूर्छा केवलप्लावष्टकुम्भकाः ४२ पूरकान्ते तु कर्तव्यो बन्धो जालंधराभिधः कुम्भकां

ते रेचकादौ कर्त्तव्यस्तूड्डियानकः ४३ अपानमूर्द्ध्वमुत्थाप्य प्राणं कण्ठादधो नयेत् योगीज
राविमुक्तः सन् षोडशाब्दवया भवेत् ४४ सूर्यभेदनं॥ आसने सुखदे योगी बद्ध्वा चैवास
नं ततः दक्षनाड्या समाकृष्य बहिस्थं पवनं शनैः ४५ आकेशादानखाग्राच्च निरोधा
वधि कुंभकान् ततः शनैः सव्यनाड्या रेचयेत्पवनं पुनः ४६ कपालशोधनं वातदोषघ्नं कृ
मिदोषहं पुनः पुनरिदं कुर्यात्सूर्यभेदमुदाहृतं ४७ उज्जायी॥ मुखं संयम्य नाडीभ्यामा
कृष्य पवनं शनैः यथा लगति कंठात्तु हृदयावधि सस्वनः ४८ पूर्ववत्कुंभयेत्प्राणं रेचयेदि
डया ततः श्लेष्मदोषहरं कंठे देहानलविवर्द्धनं ४९ नाडीजलोदराधातुगतदोषविनाशनं
गच्छता तिष्ठता कार्यमुज्जाय्याख्यं तु कुंभकं ५० अथ सीत्कारः सीत्कां कुर्यात्तथा वक्त्रे घ्राणे
नैव विसर्जयेत् एवमभ्यासयोगेन कामदेवो द्वितीयकः ५१ योगिनीचक्रमान्यः सृ
ष्टिसंहारकारकः न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते ५२ भवेत्स्वच्छंददेहस्तु

ह. प्र.
८
सर्वेपि स्वेदवर्जितः अनेन विधिना यस्तु पेयूषं द्रोणभिमंडले ५३ रसना तालुमध्येन यः
प्राणं सततं पिबेत् [illegible] भवेत्तस्य सर्वरोगपरिक्षयः ५४ अथ शीतली जिह्वया वा
यु माकृष्य पूर्ववत्कुंभकान्तु शनैस्तु घ्राणरंध्राभ्यां रेचयेदनिलं सुधीः ५५ गुल्मप्लीहा
दिकं वापि ज्वरं पित्तं क्षुधां तृषां विषाणि शीतली नाम कुंभकोयं निहंति वै ५६ अथ भस्त्रिका
ऊर्वोरुपरि संस्थाप्य उभे पादतले तथा पद्मासनं भवेत्सम्यक् सर्वपापप्रणाशनं ५७ स
म्यक्पद्मासनं बध्वा समग्रीवोदरं सुधीः मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् ५८
अथैवेत्स शरीरस्थं चालयेत्पवनं बलात् यथा लगति हृत्कंठे कपाले सघनं तथा वेगे
न पूरयेत्सम्यक् हृत्पद्मावधिमारुतं ५९ पुनर्विरेचयेत्तद्वत्पूरयेच्च पुनः पुनः यथैव
लोहकाराणां भस्त्रा वेगेन चाल्यते ६० तथैव स्वशरीरस्थं चालयेत्पवनं धिया यथा
श्रमो भवेद्देहे तथा सूर्येण पूरयेत् ६१ यथोदरं भवेत्पूर्णं पवनेन तथा लघु धारये ८

नासिकामध्यतर्जनीभ्यां विनादृढं ६२ कुंभकं सर्ववत्कृत्वा रेचयेदिडयानिलं वातपित्त
श्लेष्महरं शरीराग्निविवर्द्धनं ६३ कुंडलीबोधकं क्षिप्रं पवनं सुखदं हितं ब्रह्मनाडीमु
खे संस्थकफाद्यर्गलनाशनं ६४ सम्यग्गात्रसमुद्भूतग्रंथित्रयविभेदकं विशेषेणै
व कर्तव्यं भस्त्राख्यं कुंभकं त्विदं ६५ अथ भ्रामरी वेगाद्घोषं पूरकं भृंगनादं भृंगीनादं रेच
कं मंदमंदं योगींद्राणामेवमभ्यासयोगाच्चित्ते जाता काचिदानंदलीला ६६ अथ मू
śrutyācāryaprasādācca yogābhyāsabalena ca //
īśvarānugraheṇaiva yogasiddhistu jāyate // 79 //

Tr. Success in *yoga* can be attained by favour of the (lessons of the) scriptures, grace of *ācārya, yoga* practice and grace of *īśvara.* 79.

श्रीआदिनाथमत्स्येन्द्रशाबरानन्द[5]भैरवाः ॥
शारंगी[6]मीनगोरक्षविरूपाक्षबिलेशयाः ॥ 80 ॥

---

1. निश्चला-P,T. 2. एभिर्योगश्च-N,J. 3. ईश्वरानुग्रहणेनैव–t1,n4. 4. योगसिद्धिश्च–N,n4,J.
5. सवरानन्द-N, शवरानन्द–n4. 6. सरंगी–N,n1, सारंगी–P, शरंगि-J, सरंगि–n4.

मन्थान[1]भैरवो योगी सिद्धबुद्धिश्च[2] कन्दली ॥
कोरन्दकः[3] सुरानन्दः सिद्धिपादश्च[4] चर्पटी[5] ॥ 81 ॥
करोटिः पूज्यपादश्च नित्यनाथो निरञ्जनः ॥
कपाली[6] बिन्दुनाथश्च काकचण्डीश्वराह्वयः[7] ॥ 82 ॥
अल्लमः प्रभुदेवश्च[8] नैटचूटिश्च[9] टिण्टिणिः[10] ॥
भालुकि[11]र्नागबोधश्च[12] खण्डकापालिकस्तथा[13] ॥ 83 ॥
इत्यादयो महासिद्धाः हठयोगप्रसादतः ॥
खण्डयित्वा कालदण्डं ब्रह्माण्डे विचरन्ति ते ॥ 84 ॥

śrī ādināthamatsyendraśābarānandabhairavāḥ //
śāraṅgī mīnagorakṣavirūpākṣabileśayāḥ // 80 //
manthānabhairavo yogī siddhabuddhiśca kandalī //
korandakaḥ surānandaḥ siddhipādaśca carpaṭī // 81 //
karoṭiḥ pūjyapādaśca nityanātho nirañjanaḥ //
kapālī bindunāthaśca kākacaṇḍīśvarāhvayaḥ // 82 //
allamaḥ prabhudevaśca naiṭacūṭiśca ṭiṇṭiṇiḥ //
bhālukirnāgabodhaśca khaṇḍakāpālikastathā // 83 //
ityādayo mahāsiddhāḥ haṭhayogaprasādataḥ //
khaṇḍayitvā kāladaṇḍaṃ brahmāṇḍe vicaranti te // 84 //

Tr. *śrīādinātha, matsyendra, śābara, ānandabhairava, śāraṅgī, mīna, gorakṣa, virūpākṣa, bileśaya, manthānabhairava, siddhabuddhi, kandalī, korandaka, surānanda, siddhipāda, carpaṭī,*

karoṭi, pūjyapāda, nityanātha, nirañjana, kapālī, bindunātha, kākacaṇḍīśvara, allama, prabhudeva, naiṭacūṭi, ṭiṇṭiṇi, bhāluki, nāgabodha, khaṇḍakāpālika etc. are the great *siddhas*, who by the power of *haṭha-yoga* defied the whip of *kāla* (death) and freely move in the universe. 80-84.

---

1. मथान-N,n4. 2. सिद्धिबुद्धिश्च-J. 3. गोनन्दक-P,T,J,n1,n4. 4. सिद्धपादश्च–T. 5. पर्पटी–T,t1. 6. कापाली–T, कपालि-n4. 7. काकचण्डश्चरोमकः-J,n1,n4, काकचण्डीश्वरोमयः-T,t1, चण्डीश्वरात्मकः -n2. 8. अल्लमप्रभुदेवश्च-P,T,t1. 9. फैटीछोटी च-P; फैटीछ्रोटी च-T,t1, भैटचूटि च–n4. 10. टिंटिभिः-N,n1,n4, भैवचुटिंटिभिः-**J**. 11. तालुकिर्-P,T,t1. 12. नागलोधश्च–n4. 13. खण्डःकापालिकस्तथा P,T.

Note: Some of the names of *siddhas* seem to have been erroneously written by the scribe. For example, *kandalī, korandaka, karoṭi, naiṭacūṭi.* It is obvious that these names have been taken from HP(I-5-8). The names of the *siddhas* have different variations in different copies of HP also. However, from the text of HP critically edited by the Lonavla Yoga Institute (India) and on the basis of available information about the names of the *siddhas*, we give below the information available on them.

ādinātha— A synonym for *śiva*, who is regarded as the propounder of many *śāstras* including *yoga*. The famous MYS describing *haṭhayoga* is ascribed to *ādinātha* from whom the *nāthasampradāya* was originated, according to its followers.

matsyendra—See note on i.3.

śābara—He was an alchemist and in a text called *śābaratantra*, 12 *kāpālikagurus* renowned for *yoga*, are described.

ānandabhairava— A *rasasiddha* mentioned in RRS (xvi.7-10). The drugs *ānandabhairavī-vaṭī* and *ānanda-bhairava-rasa* are ascribed to him in RRS.

śāraṅgī— This seems to be mis-spelt for *cauraṅgī*, a famous disciple of *matsyendranātha*. A work called *prāṇasaṅkalī* in Hindī is available on his name. There is also *cauraṅgīvākyaṃ* on his name, which is included in NP, deposited in RORI, Jodhpur (vide MS No. 16780).

mīna—There is no agreement about who *mīnanātha* was. In some traditions *mīnanātha* is considered as the same as *matsyendranātha*, but since *mīna* is separately mentioned here, it seems that he is different from *matsyendra*. The two works available on his name are *yogaviṣaya* and *yogasaṃgraha*.

gorakṣa— See note on i.3.

virūpākṣa— On his name three works are available, namely, *aṣṭasiddhi-vivaraṇam, amṛtasiddhiyoga* and *virūpākṣa-pañcāśikā.*

bileśaya— No information about him is available.

manthānabhairava— One of the alchemists mentioned in RRS (i.5-7, xii.76-78, xviii.172). The drug *manthānabhairavarasa* is ascribed to him in RRS (xii.72-74).

siddhabuddhi— Also described as *siddhibuddhi.* In some MSS of HP, *siddha* and *buddha* are separately mentioned. In RRS, both *siddha* and *buddha* have been named as alchemists (v.144, xx.107).

kandalī— Seems wrongly spelt for *kanthaḍī.* A famous *śaiva-yogī,* who was a contemporary of *matsyendra* and *gorakṣa.* He was related to Cola and Cālukya dynasty. His disciples were in Bīḍa region of Mahārāṣṭra. There is *kanthaḍībodha* on his name deposited in MMPP (1069-70/559-60).

korandaka— Seems to have been wrongly spelt for *koranṭaka.* He is variously referred to as *karaṇḍaka, kuranṭaka, pauranṭaka* in other MSS of HP. There is a text called *kapālakuranṭaka-haṭhābhyāsapaddhati*, which may be ascribed to him. It describes different *haṭhayogic* practices, especially 112 *āsanas.*

surānanda— One of the 27 *rasasiddhas* mentioned in RRS (i.225, vi.51-54).

siddhipāda— He is described as a *rasācārya* in RRS (xvii.120).

carpaṭi— One of the *rasasiddhas* mentioned in RRS (vi.49-

53). *śrīnivāsa* mentions *carpaṭi's* view on *jalabasti* (i.50). He was a contemporary of *gorakṣa.* King Sāhillavarmā of Cambala Kingdom was his disciple.

karoṭi— Seems to be mis-spelt for *kaneri.* He was a disciple of *nāgārjuna* and residing at Nevāsā in Mahārāṣṭra, which was then the main centre of *raseśvara* tradition. He was residing there between 1078 to 1138 AD and took *samādhi* there around the year 1138 AD.

pūjyapāda— Probably mis-spelt for *pūrvapāda.* On his name are found *yoga* and medical treatises such as — *ratnākarādi-auṣadha-yoga-saṃgraha, vaidyaka-grantha, siddhānta-bhāṣya, nidānamuktāvali* and *samādhi-śataka.*

nityanātha— One of the *rasasiddhas* mentioned in PS. He is the author of *rasaratnākara.* He calls himself *pārvatī-putra.* According to P. C. Roy, he belongs to about 1300 AD. There is also SSP available on his name. Another work available on his name is *siddhikhaṇḍa.*

nirañjana— Mentioned as a *rasasiddha* in PS.

kapālī— A *rasasiddha* mentioned in RRS (i.2).

bindunātha—A *rasasiddha,* probably the author of *rasapaddhati.*

kākacaṇḍīśvara— He was a *rasasiddha* mentioned in the RRS (i.6). There is a published work called *kākacaṇḍīśvaratantra.* It describes several *kalpas.* Another MS named *kākacaṇḍeśvaramataṃ* is deposited in the Nepāl Library.

allamaprabhudeva— He was a contemporary of *gorakṣa.*

He propounded *liṅgāyata* cult about 1150 AD. His colleague *revaṇasiddha* was related to *nāthasaṃpradāya.*

naiṭa-cūṭi— Seems to have been mis-spelt for *ghorācoli* or *ghoḍācoli.* He is also referred to as *colika* or *coli.* He was alive in 1266 AD and was staying on *kiṣkindhā* mountain in Karṇāṭaka. He was a contemporary of *gorakṣa.* He was more inclined towards *tantra.* A small treatise called *ghoḍācolivākyaṃ* is included in NP. There is a drug called *aśvakañcuki* attributerd to him. He is mentioned as a *rasasiddha* in PS.

tiṇṭiṇi— A *rasasiddha* mentioned in PS. In some copies of HP, we find the name *ciñcini.* There is a text called *ciñcinimatasāra-samuccaya* deposited in Nepāl Library.

bhāluki— In RRS (ii.143) *bhāluki* is mentioned as a *rasācārya.*

nāgabodha— Also called *nāgabuddhi* mentioned in RRS (i.2-5, vi.49-53, xv.58-65) as an eminent *rasācārya.*

khaṇḍa— One of the *rasasiddhas* mentioned in the list of 27 *rasācāryas* in RRS (i.5).

kāpālika— Mentioned as a *rasācārya* in the list of 27 *ācāryas* in RRS (vi.52).

mahā-siddhas:-

Most of the *siddhas* referred to here are the famous *rasa-siddhas* (alchemists). They were experts in the use of chemical drugs, especially those prepared from mercury, which makes possible the rejuvenation of the body conducive to liberation within the span of life. There is a science called *raseśvara-darśana* based on the idea of rendering the human body deathless and also the spiritual

liberation of man by his nomadic transformation by varied psycho-chemical processes. It is believed that the preservation of the body could be achieved by the use of medicaments. 80-84.

प्राणायामैरेव सर्वे प्रशुष्यन्ति[1] मला इति ॥
आचार्याणान्तु केषाञ्चित् अन्यत्कर्म[2] न सम्मतम्[3] ॥ 85 ॥
prāṇāyāmaireva sarve praśuṣyanti malā iti //
ācāryāṇāntu keṣāñcit anyatkarma na sammatam // 85 //

Tr. *prāṇāyāma* alone purifies all the morbidities. According to some adepts, no other technique is necessary. 85.

इदं वचनं हठाभ्यासकरणासामर्थ्यमिति[4] बोध्यम्[5] ॥
idaṃ vacanaṃ haṭhābhyāsakaraṇāsāmarthyamiti bodhyam //

Tr. This statement applies to those who are unable to undertake *haṭha* practices.

Note: *śrīnivāsa* does not agree with the view that *prāṇāyāma* alone removes all kinds of impurities. According to him, efficacy of the purificatory processes cannot be denied. To do so, reflects on the inability of a person to undergo *haṭhayogic* practices.

सम्प्रदायाब्धिमथनाज्जायते रत्नमालिका ॥
सुवर्णखचिता सेयं को वा[6] योगी ह्युपेक्षते[7] ॥ 86 ॥
sampradāyābdhimathanājjāyate ratnamālikā //
suvarṇakhacitā seyaṃ ko vā yogī hyupekṣate // 86 //

Tr. By churning the ocean of different traditions the garland of gems with golden works has been prepared. Which *yogī* would like to ignore this? 86.

Note: After this verse, in some MSS, we come across, the qualifications and background of the author, as given in the colophon. 86.

---

1. प्रशुध्यन्ते-P,T,t1, प्रशुध्यन्ति-N,n1. 2. अन्यकर्म-N. 3. शंसतं –n4. 4. हठाभ्यासकरणासामर्थ्य-विषयमिति-P,T,t1. 5. बोद्धव्यम् -T,P,t1. 6. सुवर्णखचिता चेत्स्यात्कोवा -P,T,t1. 7. ह्यपेक्षते -T; नुपेक्षते –N,n1, उपेक्षते -J.

इति श्रीनिवासयोगिविरचितायां[1] हठरत्नावल्यां प्रथमोपदेशः[2] .[3]

iti śrīnivāsayogī viracitāyāṃ haṭharatnāvalyāṃ
prathamopadeśaḥ

Here ends the first chapter of haṭharatnāvalī written by
śrīnivāsayogī

1. इति श्रीनिवासविरचितायां –J,n2,n4.

2. इति श्रीमत्स्यकलितार्किकचूडामणिसकलन्यायशास्त्रसम्प्रदायप्रवर्तकन्यायाचार्यसकलहठयोगैः प्रवर्तक–तीरभुक्ते देशीयमहादेवमिश्रादिसकलतार्किक्रकवादजयजन्ययशलक्ष्मीविराजमानवैदिकमार्गप्रतिष्ठैकधुर्यशशधर–मणिकण्ठ-व्याख्यात वेदान्तपरिभाषाद्यनेकग्रन्थकरणजन्यजययशःपुञ्जविद्योतमानतिम्मयज्योतिषिकसोमाम्बात्मज –श्रीनिवासभट्ट- महा -योगीन्द्रविरचितायां हठरत्नावल्यां प्रथमोपदेशः ||
वेधश्चन्द्रमुखी कराम्बुजलसन्माणिक्यवीणारणत्
तन्त्रे कोमलनाथभंगलहरीमाधुर्यसल्लापिनीम् |
नानार्थांकितचित्रपद्यरचितां वैदग्ध्यविद्योतितां
धत्ते तां हठयोगरत्नसरणीं श्रीश्रीनिवासः स्फुटम् ||P,T,t1. 3. अनुपलब्धपंक्तिः -t1.

nauli



vāma nauli *madhya nauli* *dakṣiṇa nauli*



vastra dhauti



gajakaraṇī

neti

sūtraneti



jalaneti



mahāmudrā



uḍḍiyāna



viparītakaraṇī



khecarī

prāṇāyāma

द्वितीयोपदेशः[1]

अष्टानां कुम्भकानां तु लक्षणं लक्ष्यते मया[2] ॥
अपूर्वाधिकसिद्ध्यर्थं[3] कुम्भकानभ्यसेत्सुधीः ॥ 1 ॥

aṣṭānāṃ kumbhakānāṃ tu lakṣaṇaṃ lakṣyate mayā //
apūrvādhikasiddhyarthaṃ kumbhakānabhyasetsudhīḥ // 1 //

Tr. The characteristics of eight *kumbhakas* are being narrated by me. A wise should practise the *kumbhakas* to achieve amazing *siddhis.* 1.

अथवा —
विधिवत् प्राणसंयामैः नाडीचक्रे विशोधिते ॥
सुषुम्नावदनं भित्वा सुखाद्विशति[4] मारुतः ॥ 2 ॥[5]

athavā —
vidhivat prāṇasaṃyāmaiḥ nāḍīcakre viśodhite //
suṣumnāvadanaṃ bhitvā sukhādviśati mārutaḥ // 2 //

Or,

Tr. When the group of *nāḍīs* is purified through the prescribed practice of *prāṇāyāma, prāṇa* easily pierces the opening of *suṣumnā* and enters into it. 2.

मारुते मध्यमे जाते[6] मनःस्थैर्यं प्रजायते[7] ॥
मनसः सुस्थिरीभावः सैवावस्था मनोन्मनी ॥ 3 ॥[5]

mārute madhyame jāte manaḥsthairyaṃ prajāyate //
manasaḥ susthirībhāvaḥ saivāvasthā manonmanī // 3 //

Tr. Mind becomes steady as the *prāṇa* moves into the middle path (i.e. *suṣumnā*). This poised state of the mind is called *manonmanī.* 3.

---

1. अथ द्वितीयोपदेशः प्रारभ्यते-R. 2. लक्ष्यतेऽधुना-P,T,t1. 3. आयुष्याधिकसिद्ध्यर्थं-P; आयुषोधिकसिद्ध्यर्थं-T,t1. 4. मुखाद्विशति-J,N,n1,n4. 5. अनुपलब्धश्लोकः -n2. 6. मध्यसंजाते-T,t1. 7. च जायते-T,t1.

तत्सिद्धये विधानज्ञः सदा[1] कुर्वीत कुम्भकान्[2] ||
विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धि[3]माप्नुयात् || 4 ||*

tatsiddhaye vidhānajñaḥ sadā kurvīta kumbhakān //
vicitrakumbhakābhyāsādvicitrāṃ siddhimāpnuyāt // 4 //

Tr. For attaining such a state (of *manonmanī)* the experts practise varieties of *kuṃbhakas.* Amazing results can be achieved by practising various *kumbhakas.* 4.

भस्त्रिका भ्रामरी[4] सूर्यभेदोज्जायी च[5] शीतली ||
मूर्च्छानामकसीत्कारं[6] केवल[7]श्चाष्टकुम्भकाः ||
भुजंगकरणी[8] चेति कुम्भका नवसंख्यकाः || 5 || *

bhastrikā bhrāmarī sūryabhedojjāyī ca śītalī //
mūrcchānāmakasītkāraṃ kevalaścāṣṭakumbhakāḥ //
bhujaṅgakaraṇī ceti kumbhakā navasaṅkhyakāḥ // 5 //

Tr. *bhastrikā, bhrāmarī, sūryabheda, ujjāyī, śītalī, mūrcchā, sītkāra* and *kevala* are the eight *kumbhakas. bhujaṅgakaraṇī* is the ninth *kumbhaka.* 5.

अथवा —
सूर्यभेदनमुज्जायी[9] तथा सीत्कारशीतली ||[10]
भस्त्रिका[11] भ्रामरी[12] मूर्च्छा केवलश्चाष्टकुम्भकाः || 6 ||[13] *

athavā —
sūryabhedanamujjāyī tathā sītkāraśītalī //
bhastrikā bhrāmarī mūrcchā kevalaścāṣṭakumbhakāḥ // 6 //
Or,

Tr. *sūryabhedana, ujjāyī, sītkāra, śītalī, bhastrikā, bhrāmarī, mūrcchā* and *kevala* are the eight *kumbhakas.* 6.

---

1. चित्रकान्-T,t1. 2. कुम्भकाः-T,t1. 3. बुद्धि–N,n1,J, बुद्धिं–n4. 4. भ्रामरीं–T, भ्रमरीं -t1. 5. सूयभेदोझायाति –T,t1. 6. सीतकारौ–N,n1,n4,J, सीत्कारां–T,t1. 7. केवला-T; कवल-N. 8. भुजंगकरिणी-T. 9. सूर्यभेदनमनुझया–t1. 10. पंक्तिः अनुपलब्धा–N,n1,J. 11. भस्त्रिकां–T,t1. 12. भ्रामरीं –T,t1. 13. अनुपलब्धश्लोकः–N,n1,J. * अनुपलब्धश्लोकः-n2,n4.

Note : This is a quotation from HP. While enumerating eight *kumbhakas*, we find in many other copies of HP *plāvinī* included in place of *kevala.* GhS(v.46) omits *sītkārī* and *plāvinī* and substitutes *sahita* and *kevala.* KP describes more than fifty *kumbhakas,* which are not found in any other texts. For details, refer to KP of *raghuvīra* published by Lonavla Yoga Institute (India). 6.

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ॥
कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियानकः ॥ 7 ॥ [1]

pūrakānte tu kartavyo bandho jālandharābhidhaḥ //
kumbhakānte recakādau kartavyastūḍḍiyānakaḥ // 7 //

Tr. *jālandhara* should be practised after *pūraka*, while *uḍḍiyāna* should be practised at the end of *kumbhaka*, but before *recaka* starts. 7.

Note : GhS (v.49) has another version for the practice of *uḍḍiyāna.* According to it, *uḍḍiyāna* should be performed after inhalation and before *kumbhaka* begins. 7.

अधस्तात्कुञ्चनेनाशु कण्ठसंकोचने कृते ॥
मध्ये[2] पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः ॥ 8 ॥[1]

adhastātkuñcanenāśu kaṇṭhasaṅkocane kṛte //
madhye paścimatānena syātprāṇo brahmanāḍigaḥ // 8 //

Tr. By contraction of the anal muscles (*mūlabandha*), by contraction of the throat (*jālandhara bandha*) and by pulling the abdominal wall backwards (*uḍḍiyāna bandha*), the *prāṇa* enters into the *brahma-nāḍī* (*suṣumnā*). 8.

Note: In this verse, the application of *mūlabandha, jālandhara bandha* and *uḍḍiyāna bandha* is suggested. 8.

अपानमूर्ध्वमुत्थाप्य[3] प्राणं[4] कण्ठादधो नयेत् ॥
योगी जराविमुक्तः स्यात् षोडशो वयसा[5] भवेत् ॥ 9 ॥[1]

1. अनुपलब्धश्लोकः -n2. 2. मध्या –N,n1,J. 3. अपानमूर्ध्वमास्थाय -P,T,t1. 4. घ्राणं –J. 5. वयसो –N,n1,n4,J.

apānamūrdhvamutthāpya prāṇaṃ kaṇṭhādadho nayet //
yogī jarāvimuktaḥ syāt ṣoḍaśo vayasā bhavet // 9 //

Tr. One should raise the *apāna* upwards and take the *prāṇa* downwards below the throat (*jālandhara bandha*). This makes the *yogī* free from old age and he becomes as young as of sixteen years. 9.

Note : Here *mūlabandha* and *jālandhara bandha* are indicated. 9.

अथ सूर्यभेदनं नाम कुम्भकः[1]—
दक्षनाड्या[2] समाकृष्य बहिःस्थं[3] पवनं शनैः ॥
यथा लगति कण्ठात्तु[4] हृदयावधि सस्वनम्[5] ॥ 10 ॥*
यथेष्टं कुम्भयेद्वायुं रेचयेदिडया ततः ॥
कपालं शोधनं चापि रेचयेत्पवनं शनैः[6] ॥ 11 ॥ *
आलस्यं वातदोषघ्नं कृमिकीटं निहन्ति च ॥ [7]
पुनः पुनरिदं कार्यं सूर्यभेदाख्यकुम्भकम् ॥ 12 ॥ [8] *

atha sūryabhedanaṃ nāma kumbhakaḥ —
dakṣanāḍyā samākṛṣya bahiḥsthaṃ pavanaṃ śanaiḥ //
yathā lagati kaṇṭhāttu hṛdayāvadhi sasvanam // 10 //
yatheṣṭaṃ kumbhayedvāyuṃ recayediḍayā tataḥ //
kapālaṃ śodhanaṃ cāpi recayetpavanaṃ śanaiḥ // 11 //
ālasyaṃ vātadoṣaghnaṃ kṛmikīṭaṃ nihanti ca //
punaḥ punaridaṃ kāryaṃ sūryabhedākhyakumbhakam //12 //

Tr. Slowly draw the external air through the right nostril in such a manner that the air causes a friction in the throat upto the heart and a sonorous sound is produced. Retain the air in to the capacity and thereafter slowly exhale through the left nostril. This cleanses the frontal sinuses. This further removes lethargy, rheumatism and worms. This *sūryabhedana kumbhaka* should be practised again and again. 10-12.

---

1. अथसूर्यभेदः-J,N,n1,n4. 2.दक्षनाड्यां–T,t1. 3. बहिस्थं–T,t1,n4. 4.हृत्कण्ठे–N,n1,n4,J. 5.सस्वनः-N,n4,J. 6.कपालशोधनं वातदोषघ्नं कृमिनाशनं –N,n1,n4, कृमिनाशकं-J. 7. अनुपलब्धपंक्तिः-N,n1,n4,J.8....सूर्यभेदाख्यं कुंभमभ्यसेत्-N, पुनः पुनरिदं सूर्यभेदनाख्यं कुम्भमभ्यसेत्-J,n1,n4. *अनुपलब्धश्लोकः -n2.

अथोज्जायी[1] —

मुखं संयम्य[2] नाडीभ्यामाकृष्य[3] पवनं शनैः ॥
यथा लगति हृत्कण्ठं[4] हृदयावधि[5] सस्वनः[6] ॥ 13 ॥ *
पूर्ववत्कुम्भयेत्प्राणं रेचयेदिडया ततः ॥
गले श्लेष्महरं[7] प्रोक्तं[8] देहानलविवर्धनम्[9] ॥ 14 ॥ *
नाडीजालोदराधातुगत[10]दोषविनाशनम् ॥
गच्छता तिष्ठता कार्य[11]मुज्जाय्याख्यं हि कुम्भकम् ॥ 15 ॥ *

athojjāyī—

mukhaṃ saṃyamya nāḍībhyāmākṛṣya pavanaṃ śanaiḥ //
yathā lagati hṛtkaṇṭhaṃ hṛdayāvadhi sasvanaḥ // 13 //
pūrvavatkumbhayetprāṇaṃ recayediḍayā tataḥ //
gale śleṣmaharaṃ proktaṃ dehānalavivardhanam // 14 //
nāḍījālodarādhātugatadoṣavināśanam //
gacchatā tiṣṭhatā kāryamujjāyyākhyaṃ hi kumbhakam // 15 //

Tr. Close the mouth. Slowly inhale fully through both the nostrils with a frictional sound felt from the throat upto the chest. Retain the breath in the manner told before and thereafter exhale through the left nostril. This is *ujjāyī kumbhaka*, which cures the phlegmatic disorders of the throat, increases the bodily fire, removes the morbidities of the network of the *nāḍīs*, stomach and the bodily constituents (*dhātus*). This should be practised all the time. 13-15.

Note The term '*gacchatā tiṣṭhatā*' is not to be understood literally as 'while walking and standing', but to be taken to mean 'all the time'. 13-15.

अथ शीत्कारः[12]—

सीत्कां[13] कुर्य्यात्तथा वक्त्रे[14] घ्राणेनैव[15] विसर्ज्जयेत्[16] ॥
एवमभ्यासयोगेन कामदेवो द्वितीयकः[17] ॥ 16 ॥ *

---

1. अथोज्जायं–T,t1. 2. सन्नम्य-P,t1. 3. नासाभ्यामाकृष्य-J,n1,n4, आकर्ष्य—T,t1. 4. हृत्कण्ठे-N,n1,n4,J; हृत्कण्ठ-T. 5. हृयावधि-N. 6. संस्थितः-P,T,t1. 7. गलेश्लेष्मकफहरं-T; गलश्लेदोषहरं-N,n1,n4;गलश्लेष्मदोषहरं-J. 8. अनुपलब्ध-N,n1,n4,T,t1. **9**. देहामलविवर्धनम्-T,t1. **10**. नाडीजलोदर-धातुगत-J,P; नाडीजलोदरंधातुगत-N,n1,n4. 11. गच्छन् तिष्ठन् प्रतीकार्य-P,T,t1, गच्छतः-n4. 12. अथ सीत्काराख्यकुंभकस्वरूपं निरूप्यते-P,T,t1. 13. सित्कं-T,t1, सित्कं-P. 14. दद्यात् स्वक्रान्ते-P,t1; दद्यात् स्वके क्रान्ते-T. 15. घ्राणेचैव-P,T,t1. 16. विजृंभणं -P,T,t1. 17. कामदेवाद्वितीयकः-N. * अनुपलब्धश्लोकः-n2.

योगिनीचक्रसंसेव्यः[1] सृष्टिसंहारकारकः[2] ॥
न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते ॥ 17 ॥ *

atha sītkāraḥ —

sītkāṃ kuryāttathā vaktre ghrāṇenaiva visarjjayet //
evamabhyāsayogena kāmadevo dvitīyakaḥ // 16 //
yoginīcakrasaṃsevyaḥ sṛṣṭisaṃhārakārakaḥ //
na kṣudhā na tṛṣā nidrā naivālasyaṃ prajāyate // 17 //

Tr. One should always inhale through the mouth producing the sound '*sīt*', hold the air in and exhale through the nostrils. With this practice, one becomes like a cupid. He is respected by the *yoginī-cakra*, becomes capable to create and destroy and does not suffer from hunger, thirst, sleep and drowsiness. 16-17.

भवेत्स्वच्छन्ददेहस्तु[3] सर्वोपद्रववर्जितः ॥
अनेन विधिना सत्यं[4] योगीन्द्रो भाति भूतले ॥ 18 ॥ *
bhavetsvacchandadehastu sarvopadravavarjitaḥ //
anena vidhinā satyaṃ yogīndro bhāti bhūtale // 18 //

Tr. Moreover, by this practice, an eminent *yogī* becomes physically fit, remains free from all the worldly sufferings and excells in life. 18.

अथ शीतली[5] —

जिह्वया[6] वायुमाकृष्य पूर्ववत्कुम्भकादनु ॥
शनैरशीतिपर्य्यन्तं[7] रेचयेदनिलं सुधीः ॥ 19 ॥ *

atha śītalī—

jihvayā vāyumākṛṣya pūrvavatkumbhakādanu //
śanairaśītiparyyantaṃ recayedanilaṃ sudhīḥ // 19 //

Tr. One draws the air in through the tongue, retains it in the manner told before and thereafter slowly exhales (through the nostrils). This is performed for eighty rounds. 19.

---

1. योगिनीचक्रसाम्राज्यं-P,T,t1, योगिनीचक्रसंसेव्यं–n4. 2. सृष्टिसंहारकारणं-P,T,t1, कारकं–n4. 3. भवेत्स्वच्छन्ददेहः स्यात्-P. भवेत्स्वच्छन्ददेहस्यात् -T,t1. 4. नित्यं-N, यस्तु- J,n1. 5. अथ शीतली लक्ष्यते-P,T, अनुपलब्धपंक्तिः-t1. शीतली-J. 6. इडया-P,T,t1. 7. शनैस्त्वशीतिपर्यन्त–J, शनैस्तु घ्राणरन्ध्राभ्यां सीतिपर्य-न्तं-n4. * अनुपलब्धश्लोकः -n2.

Note: *śrīnivāsa* has emphasized on practising *śītalīkumbhaka* upto 80 rounds. This is not mentioned specifically with other types of *kumbhakas.* This indicates great importance he attaches to *śītalī.* KP(143) calls it *kākacañcu kumbhaka* and includes *śītalī* and *sītkārī* under it. KP(144) also attaches a great importance to this *kumbhaka.* 19.

गुल्मप्लीहोदरं[1] दोषं[2] ज्वरपित्तक्षुधातृषाः[3] ॥
विषाणि शीतली नाम कुम्भकोऽयं निहन्ति च ॥ 20 ॥

gulmaplīhodaraṃ doṣaṃ jvarapittakṣudhātṛṣāḥ //
viṣāṇi śītalī nāma kumbhako'yaṃ nihanti ca // 20 //

Tr. *śītalī kumbhaka* removes dropsy, disorders of the spleen, fever, acidity, and toxicity and controls hunger and thirst. 20.

अथ भस्त्रिका—
रेचकः पूरकश्चैव[4] कुम्भकः प्रणवात्मकः[5] ॥
रेचकोऽजस्रनिःश्वासः पूरकस्तन्निरोधकः[6] ॥
समानसंस्थितो योऽसौ[7] कुम्भकः परिकीर्तितः ॥ 21 ॥

atha bhastrikā—
recakaḥ pūrakaścaiva kumbhakaḥ praṇavātmakaḥ //
recako'jasraniḥśvāsaḥ pūrakastannirodhakaḥ //
samānasaṃsthito yo'sau kumbhakaḥ parikīrtitaḥ // 21 //

Tr. *prāṇāyāma*, which is of the nature of *praṇava*, is three fold, i.e. *recaka, pūraka* and *kumbhaka. recaka* stands for exhalation to the limit. *pūraka* means opposite of it, while *kumbhaka* is maintenance of stillness of breath. 21.

यथैव[8] लोहकाराणां भस्त्री[9] वेगेन चाल्यते ॥
तथैव स्वशरीरस्थं चालयेत्पवनं सुधीः ॥ 22 ॥

---

1. गुल्मप्लीहादिकान्-P,T,t1,n2. 2. दोषान्-P,T,t1,n2. 3. तृषा–J,n1, तृषः-T,t1. 4. पूरकं चैव–T. 5. प्राणसंयमः-P,T,t1. 6. पूरकस्तन्निरोधतः-T. 7. समान संस्थिति रूप-P,T,t1. 8. यथैष-P. 9. भस्त्रा-n4.

यथा[1] श्रमो भवेद् देहे तथा[2] सूर्येण[3] पूरयेत् ॥
यथोदरं भवेत्पूर्णं पवनेन तथा लघु ॥ 23 ॥
धारयेन्नासिकां[4] मध्या[5]तर्जनीभ्यां विना दृढम् ॥
कुम्भकं पूर्ववत्कृत्वा रेचयेदिडयानिलम् ॥ 24 ॥

yathaiva lohakārāṇāṃ bhastrī vegena cālyate //
tathaiva svaśarīrasthaṃ cālayetpavanaṃ sudhīḥ // 22 //
yathā śramo bhaveddehe tathā sūryeṇa pūrayet //
yathodaraṃ bhavet pūrṇaṃ pavanena tathā laghu //23//
dhārayennāsikāṃ madhyātarjanībhyāṃ vinā dṛḍham //
kumbhakaṃ pūrvavat kṛtvā recayediḍayānilam // 24 //

Tr. A wise should rapidly blow the bodily air like the bellows of an ironsmith until he becomes exhausted. Thereafter, he should slowly inhale through the right nostril so that the cavity fully fills up with air. Now using the fingers other than the middle and the index fingers, he should firmly hold the nose and retain the air as told before and exhale through the left nostril. 22-24.

वातपित्तश्लेष्महरं शरीराग्निविवर्धनम् ॥
ब्रह्मनाडीमुखेसंस्थ[6]कफाद्यर्गल[7]नाशनम् ॥
विशेषेणैव कर्तव्यं भस्त्राख्यं कुम्भकं त्विदम् ॥ 25 ॥

vātapittaśleṣmaharaṃ śarīrāgnivivardhanam //
brahmanāḍīmukhesaṃsthakaphādyargalanāśanam //
viśeṣeṇaiva kartavyaṃ bhastrākhyaṃ kumbhakaṃ tvidam /25/

Tr. This *bhastrā-kumbhaka* cures the disorders caused due to vitiation of *vāta, pitta* and *kapha* humours, stimulates the gastric fire, removes the obstacles like phlegm etc. stuck up at the opening of *brahma-nāḍī* (*suṣumnā*). This practice should be given a special emphasis. 25.

---

1. यदा -T. 2. तदा–T,t1,P. 3. वेगेन –N,n1,n3,n4,J. 4. धारयेन्नासिका -N,J,T,t1. 5. मध्ये-N,n1,n3,n4,J,T,t1. 6. संस्थं –P,T,t1,n3. 7. कफादिगद –N,n3,n4,J.

Note: There are different varieties of *bhastrikā* described in different texts and traditions. Scientific investigation on *bhastrikā prāṇāyāma* indicated that even prolonged practice of 45 minutes does not lead to an increase in the urinary acidity. For details, refer to YM (vol. 1, No. 1, pp. 9-18).

It has been specifically mentioned in the tradition not to use the index and middle fingers for closing the nose during *kumbhaka.* The rationale of it is not clear. This arrangement of fingers is called *omkāra-mudrā.* 21-25.

अथ भ्रामरी[1]—
वेगोद्घोषं पूरकं[2] भृंगनादं भृंगीनादं रेचकं[3] मन्दमन्दम् ॥
योगीन्द्राणां नित्यमभ्यास[4]योगाच्चित्ते जाता काचिदानन्दलीला[5] ॥ 26 ॥

atha bhrāmarī—
vegodghoṣaṃ pūrakaṃ bhṛṅganādaṃ-
bhṛṅgīnādaṃ recakaṃ mandamandam //
yogīndrāṇāṃ nityamabhyāsayogāc -
citte jātā kācidānandalīlā // 26 //

Tr. One inhales forcefully producing a sonorous sound resembling that of a male bee and exhales quite slowly, while making the sound like that of a female bee. This technique, if practised daily, fills the mind of the *yogī* with exceptionally ecstatic feeling. 26.

Note: The humming sound resembling that of a male bee and a female bee during *pūraka* and *recaka* is produced by pronouncing the nasalised sound as in the word *gaṅgā,* accompanied by the vibrations of the soft palate. GhS (v.73-77) gives a different technique of *bhrāmarī.* 26.

---

1. अथ भ्रामरी नाम कुम्भकं निरूप्यते –P,t1; अथ भ्रमरी नाम कुंभकं निरूप्यते-T, भ्रमरी – n3, अथ भ्रमरी –n4. 2. रेचकं -P,T,t1. 3. पूरकं -P,T,t1. 4. एवमभ्यास –P,T,t1. 5. काचिदानन्दमूर्च्छा -N,n1,n2,n3,n4,J,T,t1.

अथ मूर्च्छा[1] —

पूरकान्ते गाढतरं बद्ध्वा[2] जालन्धरं[3] शनैः ॥

रेचयेन्मूर्च्छनाख्योऽयं[4] मनोमूर्च्छा सुखप्रदा ॥ 27 ॥

atha mūrcchā —

pūrakānte gāḍhataraṃ baddhvā jālandharaṃ śanaiḥ //

recayenmūrcchanākhyo'yaṃ manomūrcchā sukhapradā //27 //

Tr. *jālandhara bandha* (chin lock) should be practised after the *pūraka* and thereafter one should exhale (while maintaining *jālandhara bandha*). This is *mano-mūrcchā,* which is very pleasing. 27.

अथ केवलः[5] —

रेचकं पूरकं मुक्त्वा सुखं[6] यद्वायुधारणम् ॥

प्राणायामोऽयमित्युक्तः स वै[7] केवलकुम्भकः[8] ॥ 28 ॥

atha kevalaḥ—

recakaṃ pūrakaṃ muktvā sukhaṃ yadvāyudhāraṇam //

prāṇāyāmo'yamityuktaḥ sa vai kevalakumbhakaḥ // 28 //

Tr. Retention of breath with great comfort, irrespective of inhalation or exhalation, is called *kevala-kumbhaka* which is real *prāṇāyāma* . 28.

Note: HP(ii.71) classifies *kumbhaka* into *sahita* and *kevala.* The eight varieties of *kumbhaka* described in HP belong to *sahita* category, in which the breath is retained after inhalation and followed by exhalation. *kevala kumbhaka* is an advanced stage of *sahita kumbhaka* and is attained irrespective of inhalation or exhalation. Thus *sahita* variety is voluntary, whereas *kevala* is involuntary.

In this verse, the *kevala kumbhaka* is included in the nine *kumbhakas* described by *śrīnivāsa.*

In GhS(v.84-91), the words *kevalī* and *kevala* seem synonymous and it is a voluntary type of *kumbhaka.* Attainment of

---

1. मूर्च्छा–n3. 2. बन्धो-J,P,n1,n3, बन्धा-n4. 3. जालन्धरः–N,J,t1. 4. मूर्च्छनाख्येयं–P, मूर्च्छनाख्ये च–T, मूर्च्छनाख्ये –t1. 5. केवलः-J,n3, अथ केवल कुंभकः-P,T. 6. मुखे-N,n1,n3,n4,J. 7. सर्वैः -n3,n4. 8. केवलकुम्भेण-n4.

kevala stage is an indication of high progress in *yoga,* where the mind gets absorbed completely. 28.

केवले[1] कुम्भके सिद्धे रेचपूरकवर्जिते[2] ॥
न तस्य दुर्लभं किञ्चित्[3] त्रिषु लोकेषु विद्यते ॥ 29 ॥[4]

kevale kumbhake siddhe recapūrakavarjite //
na tasya durlabhaṃ kiñcit triṣu lokeṣu vidyate // 29 //

Tr. For the one who masters the *kevala-kumbhaka* without inhalation or exhalation, nothing remains unachievable for him in the three worlds. 29.

शक्तः केवलकुम्भेन[5] यथेष्टं वायुधारणम्[6] ॥
एतादृशो राजयोगो[7] कथितो नात्र संशयः ॥ 30 ॥

śaktaḥ kevalakumbhena yatheṣṭaṃ vāyudhāraṇam //
etādṛśo rājayogo kathito nātra saṃśayaḥ // 30 //

Tr. Through the technique of *kevala-kumbhaka*, one can easily hold the breath to one's desire. This is undoubtedly *rājayoga.* 30.

अथ भुजंगीकरणम्[8] —
कण्ठेन पूरयेद्वायुं रेचयेत्कण्ठनालतः ॥
भुजंगीकरणं चेति कुम्भकोऽयं नवमः[9] स्मृतः[10] ॥ 31 ॥ [11]

atha bhujaṅgīkaraṇam—
kaṇṭhena pūrayedvāyuṃ recayetkaṇṭhanālataḥ //
bhujaṅgīkaraṇaṃ ceti kumbhako'yaṃ navamaḥ smṛtaḥ //31 //

Tr. Inhale the air through the throat and exhale also through the throat. This is *bhujaṅgī-karaṇa*, the ninth *kumbhaka.* 31.

Note: *śrīnivāsa* enumerates *bhujaṅgīkaraṇa* as the ninth

---

1. केवलं–n3. 2. रेचपूरविवर्जिते-P,T,t1, वर्जितः-N,n1. 3. कश्चित्-T. 4. अनुपलब्धश्लोकः -n4. 5. केवले कुंभके-P, शक्तः केवलकुम्भेन–अनुपलब्धः–n4. 6. वायुधारणे-P,T. 7. राजयोगी-P,J,N,n1,n4. 8. अथ भुजंगी–J,N,n1,n2,n3,n4. 9. कुंभको नव-P,T, कुम्भको नवम–t1. 10. कुम्भकोऽयं नव स्मृतः-J,N,n1,n4, 11. इति कुम्भकः-N.

variety of *kumbhaka.* HP(J) calls *sītkārī kumbhaka* as *bhujaṅga-kumbhaka.* HY also refers to *bhujaṅgīkaraṇa. jayatarāma* calls it *bhuyaṅgama* in JP(chapter-v). The technique of *bhujaṅgīkaraṇa* seems to have some similarity with *bhujaṅginī mudrā* described by GhS in (iii.3,69) and *plāvinī kumbhaka* mentioned in HP-ii.70. 31.

महामुद्रा महाबन्धो महावेधस्तृतीयकः ॥
उड्डियानं मूलबन्धो[1] बन्धो जालन्धराभिधः [2] ॥ 32 ॥
करणी विपरीताख्या वज्रोली शक्तिचालनम् ॥
सम्प्रदाया[3] खेचरी सा[4] दश मुद्राः प्रकीर्तिताः ॥ 33 ॥

mahāmudrā mahābandho mahāvedhastṛtīyakaḥ //
uḍḍiyānaṃ mūlabandho bandho jālandharābhidhaḥ // 32 //
karaṇī viparītākhyā vajrolī śakticālanaṃ //
sampradāyā khecarī sā daśa mudrāḥ prakīrtitāḥ // 33 //

Tr. The well-known ten traditional *mudrās* are: *mahāmudrā, mahābandha, mahāvedha, uḍḍiyāna, mūlabandha, jālandhara, viparītakaraṇī, vajrolī, śakti-cālana* and *khecarī.* 32-33.

Note: Different texts give different number of *mudrās.* GhS (iii.1-3) describes 25 *mudrās*, in which are also included the 10 *mudrās* mentioned here. The nature of the *mudrās* given by GhS is physical at one hand and psychological at the other. JP gives 24 *mudrās* which are different from the list of GhS. These are — *saṃ kṣobhaṇī, drāvaṇī, ākarṣaṇī, vaśyā, unmanī, mahāṅkuśā, trikhaṇḍā, virajā, vīparīta-karaṇa, mūlabandha, kāmarāja, uḍḍiyāna, jālandhara, mahāmudrā, mahābandha (pūrṇagirā), mahāvedha, khecarī, varaṇaka, sahajolī, ṣaṇmukhī, cācarī, bhūcarī, agocarī* and *unmanī.*

JP(603)suggests that *mahāmudrā, mahābandha* and *mahāvedha* are to be practised together. The description of *mahābandha* and *mahāvedha* is differently given.

---

1. महावंधो-N,J. 2. उड्डियानं मूलबन्धो जालन्धराभिधः-T,t1. 3. सन्ति या -P,T,t1.
4. मुद्रा-P,T,t1, अनुपलब्ध –N.

The place of *mahāmudrā* is said to be *yoni-sthāna*, that of *mahābandha* is *kantha-sthāna* and that of *mahāvedha* is *daśama-sthāna* (*brahma-randhra*). 32-33.

आदिनाथोदिता मुद्रा अष्टैश्वर्यप्रदायकाः[1] ||
वल्लभाः सर्वसिद्धानां दुर्लभा महतामपि[2] || 34 ||

ādināthoditā mudrā aṣṭaiśvaryapradāyakāḥ //
vallabhāḥ sarvasiddhānāṃ durlabhā mahatāmapi // 34 //

Tr. These *mudrās*, propagated by *ādinātha*, bestow upon one the eight supernatural powers and are highly respected by all the *siddhas*, but are difficult to be achieved even by the great. 34.

इति मुद्रा दश प्रोक्ता आदिनाथेन शम्भुना ||
एकैका तासु मुख्या स्यान्महासिद्धिप्रदायिनी || 35 ||

iti mudrā daśa proktā ādināthena śambhunā //
ekaikā tāsu mukhyā syānmahāsiddhipradāyinī // 35 //

Tr. This is the set of ten *mudrās* told by *ādinātha śambhu.* Each one of them is of great significance, which brings about great *siddhis* (supernatural powers). 35.

अथ महामुद्रा —
महामुद्रां प्रवक्ष्यामि वशिष्ठेनोक्तमादरात् || 36 ||

atha mahāmudrā—
mahāmudrāṃ pravakṣyāmi vaśiṣṭhenoktamādarāt // 36 //

Tr. With all respect, I now narrate *mahāmudrā,* as told by *vaśiṣṭha.* 36.

Note : The reference to *vaśiṣṭha* on *mahāmudrā* is not traceable.

The technique of *mahāmudrā* given here resembles the technique given in śś (iv.16-17).

---

1. प्रदायिकाः-P,T,t1. 2. त्रिदशामपि -P,T,t1; मरुतामपि –N,n1.

There are different traditions giving different techniques of *mahāmudrā.* The general technique of *mahāmudrā* consists of the combination of four different practices, namely, *siddhāsana, paścimatāna, kumbhaka* and application of *bandhas.* We find the following variations in different traditions:—

śivasaṃhitā tradition— It prescribes only *jālandhara-bandha* omitting both *uḍḍiyāna* and *mūla-bandha.* During *jālandharabandha* the *bhrūmadhya-dṛṣṭi* is not required.

gheraṇḍa saṃhitā tradition— In this tradition, *mūlabandha* and *uḍḍiyāna-bandha* do not form a part of *mahāmudrā* technique. It advises only *jālandhara-bandha* combined with *bhrūmadhya-dṛṣṭi* or gazing in between the eyebrows.

brahmānanda's tradition— *brahmānanda*, the commentator of HP, who is trained in a tradition different from that of *svātmārāma*, differs on two points. He wants big toe and not the foot to be caught hold of in the hooks of the index fingers and not in the finger lock. Secondly, he advises *jihvā-bandha* to be coupled with *kumbhaka* and not three *bandhas.*

haṭhapradīpikā tradition—The technique described by *svātmārāma* requires only two *bandhas*, namely *mūlabandha* and *jālandhara-bandha* during the practice of *mahāmudrā.* He omits *uḍḍiyāna-bandha.*

bālakṛṣṇa's tradition— While commenting upon *mahāmudrā, bālakṛṣṇa*, the commentator of HP, mentions another variety of the technique in which *mūlabandha* and *jālandhara-bandha* are hinted and the *vāyu* is to be held in the *brahmarandhra.* He suggests that after practising with *candra-nāḍī* (left nostril), it should be repeated with *sūrya-nāḍī* (right nostril).

mādhavīya tradition— In the *mādhavīya* tradition mentioned by Swāmī Kuvalyānanda, the extended leg is caught at the foot with finger-lock. Inhalation is done with sound by partial contraction of glottis as in *ujjāyī*. There is simultaneous practice of all the three *bandhas* namely *mūla, uḍḍiyāna* and *jālandhara* during *kumbhaka*.

A comparison of the various techniques prescribed by different traditions noted above will show that the *mādhavīya* tradition makes the practice of *mahāmudrā* most difficult. However, it is the most perfect of the lot. As a progression based on simple to difficult principle, the sequence of the practice of *mahāmudrā* may be mentioned as follows—1) ŚS tradition, 2) GhS tradition, 3) *brahmānanda's* tradition, 4) HP tradition, 5) *bālakṛṣṇa's* tradition and 6) *mādhavīya* tradition.

For detailed discussion on *mahāmudrā*, refer to YM (V-1:59-76).

In these techniques, the practice of *mahāmudrā* is to be repeated on both the sides – left and right, for equal number of times. This important point has not been mentioned here by *śrīnivāsa*. 36.

पादमूलेन वामेन योनिं सम्पीड्य दक्षिणम्[1] ॥
पादं प्रसारितं कृत्वा कराभ्यां पूरयेन्मुखम्[2] ॥
कण्ठे बन्धं[3] समारोप्य पूरयेद्वायुमूर्ध्वतः ॥ 37 ॥

pādamūlena vāmena yonim sampīdya dakṣiṇam //
pādam prasāritam kṛtvā karābhyām pūrayenmukham //
kaṇṭhe bandham samāropya pūrayedvāyumūrdhvataḥ // 37 //

Tr. Press the perineum with the left heel, extend the right leg and hold it with both the hands, inhale the air and apply *jālandhara bandha* and retain the air in the upper region. 37.

---

1. दक्षिणे-N,J,n1,n4. 2. पूरयेन्मुखे-P,T,t1. 3. वेधं -J.

यथा दण्डाहतः[1] सर्पो दण्डाकारः प्रजायते ॥
ऋज्वीभूता तथा शक्तिः कुण्डली सहजा[2] भवेत् ॥ 38 ॥
yathā daṇḍāhataḥ sarpo daṇḍākāraḥ prajāyate //
ṛjvībhūtā tathā śaktiḥ kuṇḍalī sahajā bhavet // 38 //

Tr. *kuṇḍalī śakti* becomes straight, just as a snake hit by a stick, becomes straight. 38.

तथा सा[3] मरणावस्था[4] जायते द्विपुटीस्थिता[5] ॥ 39 ॥
tathā sā maraṇāvasthā jāyate dvipuṭīsthitā // 39 //

Tr. This brings about the cessation of the functioning of the two *nāḍīs* (*iḍā* and *piṅgalā*). 39.

न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः ॥
अपि भुक्तं विषं घोरं पीयूषमिव जीर्यते ॥ 40 ॥
na hi pathyamapathyaṃ vā rasāḥ sarve'pi nīrasāḥ //
api bhuktaṃ viṣaṃ ghoraṃ pīyūṣamiva jīryate // 40 //

Tr. For such a person, there is nothing like recommended or prohibited food. All that is tasteless becomes tasty. Even deadliest poison is digested like milk. 40.

क्षयकुष्ठगुदावर्त[6]गुल्माजीर्णपुरोगमाः[7] ॥
दोषाः सर्वे[8] क्षयं यान्ति महामुद्रां तु योऽभ्यसेत्[9] ॥ 41 ॥
kṣayakuṣṭhagudāvartagulmājīrṇapurogamāḥ //
doṣāḥ sarve kṣayaṃ yānti mahāmudrāṃ tu yo'bhyaset // 41 //

Tr. All the ailments like consumption, skin disease, constipation, glandular enlargement, indigestion and many others are cured by the practice of *mahāmudrā*. 41.

कथितेयं महामुद्रा जरामृत्युविनाशिनी ॥
गोपनीया[10] प्रयत्नेन न देया यस्य कस्यचित् ॥ 42 ॥

---

1. दण्डाकृतः-P,t1. 2. सहसा-P,T,n2,t1. 3. तदासौ-N,n1,n3,n4,J. 4. मरणावस्थां–n4. 5. हरते वियदास्थिताम्-N,n1,J, द्विपुटाश्रिता–n2, विपदास्थिताम्-n3,n4. 6. क्षयकुष्ठ उदावर्त -P. 7. गुल्मप्लीहपुरोगमाः-P; गुल्मौ प्लीहपुरोगमाः-T,t1, गुल्मजीर्णपुरोगमाः-J. 8. तस्य दोषां-T; तस्य दोषाः-P,t1. 9. यो न्यसेत्-P,T,t1. 10. गोपनीयं-T,t1.

kathiteyaṃ mahāmudrā jarāmṛtyuvināśinī //
gopanīyā prayatnena na deyā yasya kasyacit // 42 //

Tr. *mahāmudrā* removes old age and fear from death. Therefore, it should be carefully guarded and should not be imparted to all and sundry. 42.

अथ महाबन्धः[1] —
पार्ष्णिं वामस्य पादस्य योनि[2]स्थाने नियोजयेत् ॥
वामोरूपरि संस्थाप्य दक्षिणं चरणं तथा ॥ 43 ॥ [3]

atha mahābandhaḥ —
parṣṇiṃ vāmasya pādasya yonisthāne niyojayet //
vāmorūpari saṃsthāpya dakṣiṇaṃ caraṇaṃ tathā // 43 //

Tr. Place the left heel at the perineum, and the right foot on the left thigh. 43.

पूरयेन्मुखतो[4] वायुं हृदये चिबुकं दृढम् ॥
निभृत्य योनिमाकुञ्च्य मनो मध्ये नियोजयेत् ॥
रेचयेच्च शनैरेवं महाबन्धोऽयमुच्यते ॥ 44 ॥

pūrayenmukhato vāyuṃ hṛdaye cibukaṃ dṛḍham //
nibhṛtya yonimākuñcya mano madhye niyojayet //
recayecca śanairevaṃ mahābandho'yamucyate // 44 //

Tr. Inhale through the mouth and firmly apply *jālandhara bandha.* Carefully contract the perineum (applying *mūlabandha*) and direct the mind towards the middle path (*suṣumnā)* and slowly exhale. This is *mahābandha.* 44.

---

1. महाबन्धः-n3. 2 योनिं–J.

3. पूरयित्वा मुखं वायुं हृदये चिबुकं तथा ॥
निष्पीड्य योनिमाकुञ्च्य मनो मध्ये नियोजयेत् ॥–अधिकः पाठः-N,n1,n4, पार्ष्णिवामेन योनिमाकुञ्च्य मनोमध्ये नियोजयेत्-n3,n4. 4. पूरितोन्मुखतो–n4, पूरयित्वा मुखं–J.

अयं योगो[1] महाबन्धस्सर्वसिद्धिप्रदायकः[2] ॥
सव्यांगे[3] च समभ्यस्य दक्षिणांगे समभ्यसेत् ॥ 45 ॥

ayaṃ yogo mahābandhassarvasiddhipradāyakaḥ //
savyāṅge ca samabhyasya dakṣiṇāṅge samabhyaset // 45 //

Tr. This technique of *mahābandha* bestows upon one all the *siddhis* (supernatural powers). This should be practised first on the left and then on the right. 45.

अयं च सर्वनाडीनामूर्ध्व[4]गतिविबोधकः ॥
त्रिवेणीसंगमं धत्ते केदारं प्रापयेन्मनः[5] ॥ 46 ॥

ayaṃ ca sarvanāḍīnāmūrdhvagativibodhakaḥ //
triveṇīsaṅgamaṃ dhatte kedāraṃ prāpayenmanaḥ // 46 //

Tr. This promotes all the currents of *nāḍīs* moving in upward direction, brings about the confluence of the three *nāḍīs* (*iḍā, piṅgalā* and *suṣumnā*) and fixes the mind between the eye-brows (*kedāra*). 46.

Note: The expression '*trīveṇī saṅgama*' indicates the confluence of the three rivers, i.e., *gaṅgā, yamunā* and *sarasvatī.* This analogy is implied here in case of confluence of *iḍā, piṇgalā* and *suṣumnā.* The place of confluence here is called *kedāra*, which is the center of the eyebrows. 46.

रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना ॥
महामुद्रामहाबन्धौ[6] निष्फलौ[7] वेधवर्जितौ[8] ॥ 47 ॥

rūpalāvaṇyasampannā yathā strī puruṣaṃ vinā //
mahāmudrāmahābandhau niṣphalau vedhavarjitau // 47 //

Tr. Just as a woman with beauty serves no purpose without a man, similarly, *mahāmudrā* and *mahābandha* are futile without the practice of *vedha* (*mahāvedha*). 47.

---

1. योगी -P,T,t1. 2. महाबंधं सर्वसिद्धिप्रदायकं-P,n2,T,t1. 3. सर्वांगे-T.4.मूर्ध्व ँ-T,t1. 5. प्रापयेत्पुनः-N,n1,n3. 6. महाबन्धो–P,t1. 7. निष्फला-T,t1, निषरौ–n4.8. वेधवर्जिता-T,t1.

अथ महावेधः[1]—

महाबन्धस्थितो[2] योगी कृत्वा पूरकमेकधीः[3] ॥
वायूनां गतिमाकृष्य निभृतं कण्ठमुद्रया ॥ 48 ॥

atha mahāvedhaḥ—

mahābandhasthito yogī kṛtvā pūrakamekadhīḥ //
vāyūnāṃ gatimākṛṣya nibhṛtaṃ kaṇṭhamudrayā // 48 //

Tr. Having adopted *mahābandha*, a *yogī* should carefully inhale the air and apply *jālandhara bandha*. 48.

अष्टधा क्रियते चैतत् यामे यामे दिने दिने ॥
पुण्यसंघात[4]सन्धायी[5] पापौघभिदुरः[6] सदा ॥ 49 ॥

aṣṭadhā kriyate caitat yāme yāme dine dine //
puṇyasaṅghātasandhāyī pāpaughabhiduraḥ sadā // 49 //

Tr. If it is practised eight times a day every three hours (*yāma* = 3 hours), it helps accumulating merits and destroys multitude of sins. 49.

सम्यक् श्रद्धावतामेव सुखं प्रथमसाधने ॥
वह्निस्त्रीपथसेवां च प्रथमं परिवर्जयेत्[7] ॥ 50 ॥

samyak śraddhāvatāmeva sukhaṃ prathamasādhane //
vahnistrīpathasevāṃ ca prathamaṃ parivarjayet // 50 //

Tr. Even for those who are devoted should avoid in the beginning contact with fire, woman and taking long walk, which is beneficial. 50.

समहस्तयुगो[8] भूमौ स्फिचौ[9] सन्ताडयेच्छनैः[10] ॥
अयमेव महावेधः सिद्धिदोऽभ्यासतो[11] भवेत् ॥ 51 ॥

samahastayugo bhūmau sphicau santāḍayecchanaiḥ //
ayameva mahāvedhaḥ siddhido'bhyāsato bhavet // 51 //

---

1. अथ महाबन्धः-n2, महावेधः-n3. 2. महावेधस्थितो-J. 3. पूरकमेकधा-N,n1,n3,n4,J. 4. सन्धान-N,J. 5. सन्ध्यायां-N,n1,n4,J. 6. पापौघभिदुरं-P,T,t1. 7. वह्निस्त्रीपथसेवानामादौ वर्जनमादिशेत्-P,T,t1. 8. समहस्तयुगौ–P,T,t1. 9. स्फितौ-T; स्फिजौ-P,t1; स्फिवोति-J. 10. ताडयेच्छनैः-N,J. 11. सिद्धिदोऽभ्यासदो-P, सिद्धिदाभ्यासतो–J.

Tr. Firmly placing the palms on the ground, one carefully strikes the floor with the posteriors. This is *mahāvedha*, which is accomplished by practice. 51.

एतत्त्रयं महागुह्यं जरामृत्युविनाशनम्[1] ॥
वह्निवृद्धिकरं चैव ह्यणिमादिगुणप्रदम् ॥ 52 ॥
etattrayaṃ mahāguhyaṃ jarāmṛtyuvināśanam //
vahnivṛddhikaraṃ caiva hyaṇimādiguṇapradam // 52 //

Tr. This secret triad alleviates old age and fear of death, stimulates gastric fire and offers the supernatural powers like *aṇimā* etc. 52.

अथोड्यानबन्धः[2]—

बद्धो[3] येन सुषुम्नायां प्राणस्तूड्डियते यतः ॥
तस्मादुड्डियानाख्योऽयं योगिभिः समुदाहृतः ॥ 53 ॥[4]

athoḍyānabandhaḥ—

baddho yena suṣumnāyāṃ prāṇastūḍḍiyate yataḥ //
tasmāduḍḍiyānākhyo'yaṃ yogibhiḥ samudāhṛtaḥ // 53 //

Tr. The lock confined to *suṣumnā* which causes the *prāṇa* to rise upwards is called *uḍḍiyāna* by the *yogīs.* 53.

उड्डीनं[5] कुरुते यस्मादविश्रान्तं[6] महाखगः ॥
उड्डियानं तदेव स्यात् तत्र बन्धोऽभिधीयते[7] ॥ 54 ॥[8]
uḍḍīnaṃ kurute yasmādaviśrāntaṃ mahākhagaḥ //
uḍḍiyānaṃ tadeva syāt tatra bandho'bhidhīyate // 54 //

Tr. The practice which takes the great bird (*prāṇa*) always moving upwards incessantly, is called *uḍḍiyāna* , which is explained as under. 54.

Note: This verse has been obviously taken from HP (iii.55), where we get the reading '*tatra bandho'bhidhīyate*' instead of '*mūlabandho'bhidhīyate*'. The same reading is found in DBU-76, VU-v.7, which being appropriate, has been accepted here. 54.

1. विनाशकम् -n4. 2. अथ उड्डियानबन्धो निरुप्यते-P,T. 3. बद्ध्वा-P,T,t1,J.
4. अनुपलब्धपंक्तिः-P,T,t1. 5. उड्याणं-P,T,t1, उड्डिनं-n4. 6. अविश्रान्तो–T,t1.
7. मूलबन्धोऽभिधीयते –N,J,P,T, तस्मादुड्डियानं बन्धं –n2, उड्डियानबन्धः-n3.
8. अनुपलब्धपंक्तिः-P,T,t1.

उदरे पश्चिमं तानं[1] नाभेरूर्ध्वं च धारयेत् ॥
उड्डियानो ह्यसौ[2] बन्धो मृत्युमातंगकेसरी ॥ 55 ॥
udare paścimaṃ tānaṃ nābherūrdhvaṃ ca dhārayet //
uḍḍiyāno hyasau bandho mṛtyumātaṅgakesarī // 55 //

Tr. Pull the abdominal wall above the navel towards the back. This is *uḍḍiyāna-bandha,* which removes fear of death, like a lion killing an elephant. 55.

गुरुणा सहजं प्रोक्तं वृद्धोऽपि तरुणो भवेत् ॥
बाह्योड्याणं च कुरुते बाह्यालंकारवर्धनम् ॥ 56 ॥[3]
guruṇā sahajaṃ proktaṃ vṛddho'pi taruṇo bhavet //
bāhyoḍyāṇaṃ ca kurute bāhyālaṅkāravardhanam // 56 //

Tr. As a result of diligent practice of *uḍḍiyāna*, as per the instruction of the *guru*, even an old person becomes young. This is called *bāhyoḍyāṇa*, which enhances the external beauty. 56.

नाभेरूर्ध्वमधो वापि तानं कुर्यात् प्रयत्नतः ॥[4]
षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः ॥ 57 ॥
nābherūrdhvamadho vāpi tānaṃ kuryāt prayatnataḥ //
ṣaṇmāsamabhyasenmṛtyuṃ jayatyeva na saṃśayaḥ // 57 //

Tr. Effortfully contract (the abdomen) above and below the navel. Thus, in six months, one undoubtedly overcomes (premature) death. 57.

Note: *uḍḍiyāna* is an exercise of the diaphragm and the ribs. It is practised either in sitting or standing positions. There is no mention about the phase of respirations, but the term *'bāhyoḍyāna'* suggests that it is done under exhalatory condition. However, when *uḍḍiyāna* is practised with *prāṇāyāma*, it is done under inhalatory condition. The anatomico-physiological mechanism differs in these two techniques. For detailed scientific investigation on exhalatory type of *uḍḍiyāna*, refer to YM (vol. 1,2,3,6 & 8). 57.

---

1. ताणं–P,t1. 2. ह्ययं -P,T,t1. 3. अन्यश्लोकः उपलब्धः-
उड्डियानं च सहजं गुरुणा कथितं यथा ॥
अभ्यसेत्तदतन्द्रस्तु वृद्धोऽपि तरुणो भवेत् ॥ -J,N,n1,n3,n4. 4. अनुपलब्धपंक्तिः-P,T,t1,n1,n2.

अथ मूलबन्धः —

पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद् गुदम् ॥
अपानमूर्ध्वमाकुञ्च्य[1] मूलबन्धोऽयमुच्यते[2] ॥ 58 ॥

atha mūlabandhaḥ —

pārṣṇibhāgena sampīḍya yonimākuñcayed gudam //
apānamūrdhvamākuñcya mūlabandho'yamucyate // 58 //

Tr. Press the perineum with the heel, contract the anal sphincters and pull the *apāna vāyu* upwards. This is *mūlabandha.* 58.

अधोगतिमपानं वै ऊर्ध्वगं[3] कुरुते बलात् ॥
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिनः ॥ 59 ॥[4]

adhogatimapānaṃ vai ūrdhvagaṃ kurute balāt //
ākuñcanena taṃ prāhurmūlabandhaṃ hi yoginaḥ // 59 //

Tr. *apāna*, which has a downward movement, is forcefully raised upwards by contraction. *yogīs* call this *mūlabandha.* 59.

गुदं पार्ष्ण्या च सम्पीड्य[5] वायुमाकुञ्चयेद् बलात् ॥
वारं वार्ं यथा चोर्ध्वं समायाति समीरणः ॥ 60 ॥[6]

gudaṃ pārṣṇyā ca sampīḍya vāyumākuñcayed balāt //
vāraṃ vāraṃ yathā cordhvaṃ samāyāti samīraṇaḥ // 60 //

Tr. Press the anus with the heel and forcefully contract *apāna vāyu* repeatedly, so that the *vāyu* moves upwards. 60.

प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् ॥
गतौ तदा योगसिद्धिं[7] प्राप्नोत्येव न संशयः[8] ॥ 61 ॥

prāṇāpānau nādabindū mūlabandhena caikatām //
gatau tadā yogasiddhiṃ prāpnotyeva na saṃśayaḥ // 61 //

Tr. Thus, with the practice of *mūlabandha, prāṇa* and *apāna, nāda* and *bindu* are united. Then one certainly attains success in *yoga.* 61.

---

1. अपानवृत्तिमाकृष्य-P,T,t1, अपानमूर्ध्वमाकृष्य–J,n4. 2. मूलबन्धोऽयमिष्यते-P,T,t1. 3. मूर्ध्वगं –n4. 4. श्लोकअनुपलब्धः-T,t1. 5. पार्ष्णिना गुदमापीड्य–n3. 6 अनुपलब्धपंक्तिः -P,T,t1. 7. गत्वा योगस्य संसिद्धिं –n4. 8. ततो योगस्य संसिद्धि यच्छतां नात्र संशयः-T, t1,P.

अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः ||
युवा भवति वृद्धोऽपि सततं मूलबन्धनात् || 62 ||
apānaprāṇayoraikyaṃ kṣayo mūtrapurīṣayoḥ //
yuvā bhavati vṛddho'pi satataṃ mūlabandhanāt // 62 //

Tr. As a result of consistent practice of *mūlabandha, apāna* and *prāṇa* are unified, urine and faeces are reduced and even an old person becomes young. 62.

अपाने चोर्ध्वगे[1] जाते प्रयाते वह्निमण्डले ||
तथानलशिखादीप्ति[2]र्वायुना प्रेरिता यथा[3] || 63 ||[4]
apāne cordhvage jāte prayāte vahnimaṇḍale //
tathānalaśikhādīptirvāyunā preritā yathā // 63 //

Tr. When *apāna* rises up and reaches the region of fire (navel region), the flame of the fire blazes forth, being fanned by *vāyu*. 63.

Note: *vahnimaṇḍala* refers to the navel region and *analaśikhā* refers to *jaṭharāgni* or gastric fire. 63.

यातायातौ वह्न्यपानौ[5] मूलरूपस्वरूपकौ ||
तेनाभ्यन्तः प्रदीप्तस्तु ज्वलनो देहजस्तथा || 64 ||[6]
yātāyātau vahnyapānau mūlarūpasvarūpakau //
tenābhyantaḥ pradīptastu jvalano dehajastathā // 64 //

Tr. Then the fire and *apāna* take their original form, which intensify the bodily fire. 64.

[7]दण्डाहता[8] भुजंगीव निश्चितं[9] ऋजुतामियात्[10] ||
बिलं प्रविष्टेव[11] ततो[12] ब्रह्मनाड्यन्तरं[13] व्रजेत् ||
तस्मान्नित्यं[14] मूलबन्धः कर्तव्यो योगिभिः सदा || 65 ||[15]

1. चोर्ध्वगं–P,n1,n2,n4. 2. दीप्ता-P. 3. तथा–N,n1,n2. 4 . श्लोकअनुपलब्धः-T,t1. 5. बाह्यपानौ–J,N,n4. 6 . श्लोकअनुपलब्धः- T,P,t1. 7. तेन कुण्डलिनी सुप्ता सन्तप्ता सम्प्रबुध्यते–J,N,n1,n2,n3,n4. 8. दण्डाहतो –T,t1. 9 . निश्वस्य-T,P,t1. 10 . ऋजुतां व्रजेत्-T,P,t1. 11 . प्रविश्य -T,P. 12 . तत्रैव-T,P. 13 . भुजंगी नान्तरं-T,P,t1, ब्रह्मनाड्यन्तरे–n4. 14. तस्मादयं –n3. 15 . अनुपलब्धपंक्तिः-T,P,t1.

daṇḍāhatā bhujaṅgīva niścitaṃ ṛjutāmiyāt //
bilaṃ praviṣṭeva tato brahmanāḍyantaraṃ vrajet //
tasmānnityaṃ mūlabandhaḥ kartavyo yogibhiḥ sadā // 65 //

Tr. Thus, *kuṇḍalinī* certainly becomes straight, like a snake beaten by a stick, and enters the *brahmarandhra* (*suṣumnā*). Therefore, the *yogīs* should always practise *mūlabandha*. 65.

Note: These verses give a rationale of arousal of *kuṇḍalinī* by the practice of *mūlabandha*. 64-65.

अथ जालन्धरः[1]**—**
कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढम्[2] **॥**
बन्धो जालन्धराख्योऽयं[3] **जरामृत्युविनाशकः**[4] **॥**
बध्नाति हि शिराजालं[5] **नाधो याति नभोजलम्** * **॥ 66 ॥**

atha jālandharaḥ—
kaṇṭhamākuñcya hṛdaye sthāpayeccibukaṃ dṛḍham //
bandho jālandharākhyo'yaṃ jarāmṛtyuvināśakaḥ //
badhnāti hi śirājālaṃ nādho yāti nabhojalam // 66 //

Tr. Contract the throat and press the chin against the chest. This is *jālandhara bandha*, which removes old age and premature death. Moreover, it ties up the nervous network, which restricts the downward flow of the nectar oozing from the space. 66.

ततो जालन्धरो बन्धः कण्ठसंकोचने कृते ॥ [6]
न पीयूषं पतत्यग्नौ न च वायुः प्रकुप्यति * **॥ 67 ॥**

tato jālandharo bandhaḥ kaṇṭhasaṅkocane kṛte //
na pīyūṣaṃ patatyagnau na ca vāyuḥ prakupyati // 67 //

Tr. *jālandhara bandha* adopted by contracting the throat does not allow the nectar to fall into the fire and *vāyu* does not go astray. 67.

---

1. अथ जालन्धरबन्धः -n2, जालन्धरबन्धः -n3. 2. स्थापयेद् दृढमिच्छया -P,T,t1. 3. जालन्धरस्त्वेष-P,T,t1, जालन्धराख्यो य–J. 4. विद्यते येन मारुतः-P,T,t1. 5. शिराज्वालं –J. शिरोजालं–n4. 6. बध्नाति .... कृते -अनुपलब्ध-P,T,n2. * अनुपलब्धपंक्तिः -t1.

Note: The word *jāla* refers to the network of the nerves going through the neck into the brain and *dhara* denotes holding back the nectar by working upon the brain. The purpose of *jālandhara* during *prāṇāyāma* is to exercise considerable pressure on the carotid sinus leading to the stimulation of the carotid nerves, which slow down the heart and with constant practice, a trance like condition may supervene. *jālandhara bandha* is not only practised during *kumbhaka*, but also during *recaka* in *mūrcchā prāṇāyāma,* bringing about stupor. This technique also indicates the principle of *viparītakaraṇī* involved in it. 66-67.

बन्धत्रयमिदं श्रेष्ठं महासिद्धैश्च सेवितम् ||[1]
सर्वेषां योगतन्त्राणां साधनं योगिनो विदुः || 68 || *

bandhatrayamidaṃ śreṣṭhaṃ mahāsiddhaiśca sevitam //
sarveṣāṃ yogatantrāṇāṃ sādhanaṃ yogino viduḥ // 68 //

Tr. The set of three *bandhas* is of great importance in all the *yogic* treatises and is even practised by the eminent *siddhas.* 68.

अधस्तात्कुञ्चनेनाशु कण्ठसंकोचने कृते ||[2]
मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः[3] || 69 || *

adhastātkuñcanenāśu kaṇṭhasaṅkocane kṛte //
madhye paścimatānena syāt prāṇo brahmanāḍigaḥ // 69 //

Tr. Firmly contract the lower region (apply *mūlabandha*), contract the throat (apply *jālandhara bandha*) and retract in the middle (apply *uḍḍiyāna bandha*). Thus, *prāṇa* moves in the *brahmanāḍī.* 69.

Note : This verse indicates the application of three *bandhas*, namely, *mūlabandha, jālandhara bandha* and *uḍḍiyāna bandha*, which are practised simultaneously. 69.

---

1. न पीयूषं .... सेवितम् -अनुपलब्धः-P,T. 2. सर्वेषां ....कृते - अनुपलब्धः P,T. 3. मध्ये नाडिगः -n4. * अनुपलब्धश्लोकः -t1.

मूलस्थानं समाकुञ्च्य उड्डियानं तु कारयेत् ॥ [1]
इडां च पिंगलां बद्ध्वा वाहयेत् पश्चिमं पथम् ॥ 70 ॥[2]

mūlasthānaṃ samākuñcya uḍḍiyānaṃ tu kārayet //
iḍāṃ ca piṅgalāṃ baddhvā vāhayet paścimaṃ patham //70 //

Tr. Adopt *mūlabandha* and practise *uḍḍiyāna.* This closing of *iḍā* and *piṅgalā* directs the *prāṇa* into the posterior path (*suṣumnā*). 70.

अनेनैव विधानेन प्रयाति पवनो लयम् ॥
ततो न जायते मृत्युर्जरारोगादिकं तथा ॥ 71 ॥ [3]

anenaiva vidhānena prayāti pavano layam //
tato na jāyate mṛtyurjarārogādikaṃ tathā // 71 //

Tr. Adherence to such techniques alone merges the *pavana* into the *laya* state, which retards untimely death, diseases and old age etc. 71.

अथ विपरीतकरणी[4] —

यत्किञ्चित् स्रवते चन्द्रादमृतं दिव्यरूपि च[5] ॥
तत्सर्वं ग्रसते सूर्यस्तेन पिण्डं[6] विनाशि च[7] ॥ 72 ॥

atha viparītakaraṇī —
yatkiñcit sravate candrādamṛtaṃ divyarūpi ca //
tatsarvaṃ grasate sūryastena piṇḍaṃ vināśi ca // 72 //

Tr. Whatever divine ambrosia is secreted from the moon, all of that is devoured by the sun. That is why the human body decays. 72.

तत्रास्ति दिव्यं करणं सूर्यस्य मुखबन्धनम् ॥
गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः[8] ॥ 73 ॥

tatrāsti divyaṃ karaṇaṃ sūryasya mukhabandhanam //
gurūpadeśato jñeyaṃ na tu śāstrārthakoṭibhiḥ // 73 //

---

1. मध्ये ...कारयेत् . . अनुपलब्धः-P,T. 2. अनुपलब्धपंक्तिः-P,T,t1.
3. श्लोकअनुपलब्धः- 'कंठ संकोचनेनैव द्वि नाड्या भवति ध्रुवम् / सर्वेषां योगतन्त्राणां कर्तव्यं च मुहुर्मुहुः // अधिकपाठः-P,T,t1. 4. विपरीतकरणी –n3. 5. दिव्यरूपिणः-P,T,t1. 6. बन्धं-P,T,t1. 7. जरायुतं -P,T,t1, विनश्यति-n3. 8. शास्त्रार्धकोटिभिः-P.

Tr. There is a special way to seal the mouth of the sun, which can only be learnt from a *guru* and not by going through millions of scriptures. 73.

ऊर्ध्वं नाभिरधस्तालुरूर्ध्वं भानुरधः शशी ॥
करणी विपरीताख्या गुरुवाक्येन लभ्यते ॥ 74 ॥[1]
ūrdhvaṃ nābhiradhastālurūrdhvaṃ bhānuradhaḥ śaśī //
karaṇī viparītākhyā guruvākyena labhyate // 74 //

Tr. The technique which puts the navel up and palate down, that is, the sun up and the moon down, is called *viparītakaraṇī,* which can be learnt from a *guru.* 74.

करणी विपरीताख्या सर्वव्याधिविनाशिनी ॥
नित्यमभ्यासयुक्तस्य जठराग्निविवर्धिनी[2] ॥ 75 ॥[3]
karaṇī viparītākhyā sarvavyādhivināśinī //
nityamabhyāsayuktasya jaṭharāgnivivardhinī // 75 //

Tr. A daily practice of *viparītakaraṇī* alleviates all the diseases and stimulates gastric fire 75.

आहारो बहुलस्तस्य सम्पाद्यः साधकेन[4] वै[5] ॥
अल्पाहारो यदि भवेद्देहमग्निर्दहेत्[6] क्रमात्[7] ॥ 76 ॥[8]
āhāro bahulastasya sampādyaḥ sādhakena vai //
alpāhāro yadi bhaveddehamagnirdahet kramāt // 76 //

Tr. Such a practitioner should consume adequate amount of food or else due to inadequate consumption of food, the body will gradually be consumed by the fire. 76.

अधःशिरश्चोर्ध्वपादौ[9] क्षणं स्यात्प्रथमे दिने ॥
क्षणाच्च[10] किञ्चिदधिकमभ्यसेच्च दिने दिने ॥ 77 ॥[11]

1.पत्रमनुपलब्धम्-N, अनुपलब्धश्लोकः -n3. 2.प्रवर्धिनी-P,T. 3.पत्रमनुपलब्धम् -N. 4.साधकस्य-P,T,t1. 5.च-P,T,t1. 6.भवेदग्निर्देहं दहेत्-P,T. 7.क्षणात्-P,T,t1,n3. 8.पत्रमनुपलब्धम्-N. 9.शिरा ऊर्ध्वपादः-P,T,t1. 10.क्षणाच्चेत्-P,T. 11. पत्रमनुपलब्धम्-N.

adhaḥ śiraścordhvapādau kṣaṇaṃ syāt prathame dine //
kṣaṇācca kiñcidadhikamabhyasecca dine dine // 77 //

Tr. On the first day, one should remain in the topsy-turvy position for a short while. Each day one should maintain the posture longer, increasing the time little by little. 77.

वलितं[1] पलितं चैव षण्मासान्न तु[2] दृश्यते ॥
याममात्रं तु यो नित्यमभ्यसेत् स तु कालजित् ॥ 78 ॥[3]

valitaṃ palitaṃ caiva ṣaṇmāsānna tu dṛśyate //
yāmamātraṃ tu yo nityamabhyaset sa tu kālajit // 78 //

Tr. In six months, grey hair and wrinkles disappear. A daily practice of three hours retards premature death. 78.

स्वस्थं यो वर्तमानोऽपि[4] योगोक्तैर्नियमैर्विना ॥
करणी विपरीताख्या श्रीनिवासेन लक्षिता ॥ 79 ॥ [5]

svasthaṃ yo vartamāno"pi yogoktairniyamairvinā //
karaṇī viparītākhyā śrīnivāsena lakṣitā // 79 //

Tr. *viparītakaraṇī* has been propagated by *śrīnivāsa*, which can be taken up by the healthy person without adhering to *yogic* injunctions. 79.

Note: *viparītakaraṇī* is not only a technique, but also an important concept in *haṭhayoga.* This is involved in different *yogic* practices like *jālandhara, khecarī* and *jihvābandha. pratyāhāra* is considered as *viparītakaraṇī* in GŚ (59), which emphasizes on the reversal process. The rationale of reversal of *sūrya* at the navel and *candra* at the root of the palate, leading to the protection of oozing nectar from the moon, is not yet properly understood in terms of modern concept of anatomy and physiology.

The technique of *viparītakaraṇī* is extended to any pose which has its head down and pelvic region raised up, such as

---

1. वली च-P,T,t1. 2. षण्मासोर्ध्वं न-P,T,t1. 3. पत्रमनुपलब्धम्-N. 4. परस्वदेववर्त्तमाने- n1,n2,n3,n4 . 5. पत्रमनुपलब्धम् -N.

śīrṣāsana and *sarvāṅgāsana.* KKHP describes the technique of *viparītakaraṇī* as upside down position of the body in which one is advised to swallow the air by mouth and expel it through the anus. 79.

अथ वज्रोली[1]—
वज्रोलीं कथयिष्यामि गोपितां सर्वयोगिभिः ॥
अतीव तद्रहस्यं हि न देयं[2] यस्य कस्यचित् ॥ 80 ॥[3]

atha vajrolī —
vajrolīṃ kathayiṣyāmi gopitāṃ sarvayogibhiḥ //
atīva tadrahasyaṃ hi na deyaṃ yasya kasyacit // 80 //

Tr. I shall explain the technique of *vajrolī,* which has been kept secret by all the *yogīs.* This has to be highly guarded and should not be imparted to anybody. 80.

स्वमानैस्तु[4] समो यस्मात् तस्यैव कथयेद् ध्रुवम् ॥
पुत्रस्यापि न दातव्यं[5] गुरुशिष्यक्रमं विना ॥ 81 ॥[6]

svamānaistu samo yasmāt tasyaiva kathayed dhruvam //
putrasyāpi na dātavyaṃ guruśiṣyakramaṃ vinā // 81 //

Tr. This should be imparted only to the one who is equally meritorious. Without following the tradition of *guru-śiṣya,* this should not be taught even to the son. 81.

कुण्डलीबोधनं सम्यक् नाडीनां परिशोधनम्[7] ॥
अपानप्राणयोरैक्यं कार्यं वज्रोलिकर्मणा ॥ 82 ॥

kuṇḍalībodhanaṃ samyak nāḍīnāṃ pariśodhanam //
apānaprāṇayoraikyaṃ kāryaṃ vajrolikarmaṇā // 82 //

Tr. *vajrolī* awakens *kuṇḍalī,* thoroughly cleanses the *nāḍīs* and unifies *apāna* and *prāṇa.* 82.

---

1. अथ वज्रोलिः सम्प्रदायानुरोधेन लक्ष्यते–P,t1. अथ वज्रोलिः सम्प्रदायानुसारेण लक्ष्यते-T, वज्रोली –n3. 2. देया-P.T,t1,n1,n4. 3. पत्रमनुपलब्धम्-N. 4. स्वप्राणैस्तु-P,T,t1,n3,n4. 5. दातव्या-P,T,t1. 6. पत्रमनुपलब्धम्-N. 7. परशोधनम्-P,T.

अभ्यासस्य क्रमं वक्ष्ये सम्प्रदायानुसारतः ॥
कामिनी[1] वा नरो वाथ वज्रोलीं बुद्धिमान्नयेत्[2] ॥ 83 ॥

abhyāsasya kramaṃ vakṣye sampradāyānusārataḥ //
kāminī vā naro vātha vajrolīṃ buddhimānnayet // 83 //

Tr. I shall explain the order of the practice according to the tradition, which should be followed by a wise, whether young woman or man. 83.

फूत्कारोचितं लिंगं रन्ध्राग्रे[3] बहिः स्थाप्यमेकं लिंगरन्ध्रमध्ये[4] स्थाप्यमपरं[5] मिलित्वा नाल[6]द्वयनिरूपणमादौ क्रियते ॥ तयोर्मध्ये फूत्कारो[7]चितं नालस्वरूपं प्रदर्श्यते ॥

phūtkārocitaṃ liṅgaṃ randhrāgre bahiḥ sthāpyamekaṃ liṅgarandhramadhye sthāpyamaparaṃ militvā nāladvayanirūpaṇamādau kriyate // tayormadhye phūtkārocitaṃ nālasvarūpaṃ pradarśyate //

Tr. One hollow tube should be placed in front of the glans penis and the other one should be inserted in the urethra in such a manner that both the ends of the tube meet. The particulars of the tube suitable for blowing are as follows:

काञ्चनेस्य च रूपस्य[8] ताम्रस्याप्यथवाऽयसः ॥
नालं[9] कुर्यात्प्रयत्नेन फुत्कारकरणोचितम्[10] ॥ 84 ॥

kāñcanasya ca rūpasya tāmrasyāpyathavā'yasaḥ //
nālaṃ kuryātprayatnena phutkārakaraṇocitam // 84 //

Tr. A hollow tube of gold, silver, copper or iron should be carefully made suitable for blowing. 84.

विंशत्यंगुलदीर्घमानरुचिरं त्वादौ सुवृत्ताल्पगम्
फूत्कारोचितकालरूपसदृशं[11] नालं हठाभ्यासिभिः ॥
प्रोक्तं तादृशमेव लिंगविवरे यत्नेन संस्थापयेत्
फूत्कारं[12] तदनन्तरं प्रकुरुतां[13] वायुर्यथा सञ्चरेत् ॥ 85 ॥

---

1. कामिनीव–N. 2. बुद्धिमांश्चरेत्-J. 3. पूत्कारोचितलिंगरन्ध्राग्रे–P,T,t1. 4. मध्य–P,T,t1. 5. स्थाप्यमानमपरं–P. 6. नाली–T,t1. 7. पूत्कारो-t1. 8. रौप्यस्य–P, रूप्यस्य–T. 9. नालीं –P,T,t1. 10. पूत्कारकरणोचिताम्-P,T,t1. 11. पूत्कारोचित कोलरूपसदृशं-P,T,t1. 12. पूत्कारं–P,T,t1. 13. प्रकुरुते-P,T,t1.

viṃśatyaṅguladīrghamānaruciraṃ tvādau suvṛttālpagam
phūtkārocitakālarūpasadṛśaṃ nālaṃ haṭhābhyāsibhiḥ //
proktaṃ tādṛśamevaliṅgavivare yatnena saṃsthāpayet
phūtkāraṃ tadanantaraṃ prakurutāṃ vāyuryathā sañcaret/85/

Tr. The *haṭha* practitioners should select the tube which is twenty digits in length, smooth, fine, small and rounded at one end, which is suitable for blowing the air forcibly after the hissing of a cobra. Such a tube should be cautiously inserted into the genital. Then one should blow through the tube so that the air enters in. 85.

हठप्रदीपिकाकारस्तु—
यत्नतः शरनालेन फूत्कारं[1] वज्रकन्धरे ॥
शनैः शनैः प्रकुर्वीत वायुसञ्चारकारणात् ॥ 86 ॥

haṭhapradīpikākārastu—
yatnataḥ śaranālena phūtkāraṃ vajrakandhare //
śanaiḥ śanaiḥ prakurvīta vāyusañcārakāraṇāt // 86 //

According to the author of *haṭhapradīpikā* —

Tr. One should effortfully and slowly blow through the tube into the urethra so that the air enters in. 86.

हठप्रदीपिकाकारमतं[2] हठयोगाभ्यासे[3]ऽज्ञानविलसितमित्युपेक्षणीयम् ॥
haṭhapradīpikākāramataṃ haṭhayogābhyāse'jñānavila - sitamityupekṣaṇīyam //

Tr. The opinion of the author of *haṭhapradīpikā* should be discarded like the utterance of an ignorant person.

यदि स्याच्छरनाले[4] हि भृशं वायुर्न सञ्चरेत् ॥
वायुसञ्चारणे त्याज्ये[5] शरनालादिकं[6] मतम् ॥ 87 ॥
yadi syāccharanāle hi bhṛśaṃ vāyur na sañcaret //
vāyusañcāraṇābhyāse śaranālādikaṃ matam // 87 //

---

1. पूत्कारं–P,T,t1. 2. हठप्रदीपिकाकारोक्तमतं–P,T. 3. हठयोगांगाभ्यासे–P. 4. स्याच्छरनालं-P. 5. वायुसञ्चारणात्त्याज्यं-T,t1; वायुसञ्चारणाभ्यासार्थ-N,n1,n2,n3,n4; वायुसञ्चारणाभ्यासे–N,n1,n2,n3,n4,J,T,t1. 6. शरं नालोदितं–P, शरनालोदितं मतं–T,t1.

Tr. Since the passing of air is desirable and if the air does not pass sufficiently through the *śaranāla* (reed stalk), then the use of a reed stalk should be avoided. 87.

Note: The criticism of *śrīnivāsa* about the ignorance regarding *haṭhayoga* practice of *vajrolī* using *śaranāla* seems to be unwarranted. Although the word *śaranāla* occurs in some of the MSS of HP, there are also other copies in which we find the term *śastanāla.* The term *śastanāla* means appropriate tube, which is accepted also by *śrīnivāsa.* The main purpose of *śaranāla* is to widen the passage of urethra so that the air blown into it could pass through easily. Although the tubes made up of different metals like gold, silver, copper and iron, as suggested by *śrīnivāsa,* are convenient for blowing the air through them, for *yogīs* who were living in isolated places, had to depend on the natural sources. The *śaranāla* could be easily available on the banks of the rivers. 87.

लिंगरन्ध्रमध्ये[1] स्थापनीयनालस्वरूपं लिंगरन्ध्रविस्तारार्थं निरूप्यते ||

liṅgarandhramadhye sthāpanīyanālasvarūpaṃ liṅgarandhra-vistārārthaṃ nirūpyate //

Tr. A tube is inserted in the genital to expand the urethra, details of which are as follows:

तन्तुवत्[2] कनकं नालं[3] नागं[4] ताम्रातिनिर्मलम् ||
नालद्रव्यमिदं प्रोक्तं श्रीनिवासेन योगिना || 88 ||

tantuvat kanakaṃ nālaṃ nāgaṃ tāmrātinirmalam //
nāladravyamidaṃ proktaṃ śrīnivāsena yoginā // 88 //

Tr. According to *yogī śrīnivāsa*, the materials ideally required for the tube should be very fine, the purest form of gold, lead or copper. 88.

1.लिंगमध्यरन्ध्रं -J, लिंगरन्ध्रमध्य –P,T,t1,n3,n4. 2. जतुवत्-T,t1,P. 3.नागं-T,t1,P. 4.भागं-N,n1

निर्मितं त्रिपलैर्नागैर्द्वादशांगुलदीर्घकम्[1] ॥
छत्राकारं प्रकुर्वीत नालं स्निग्धं सितं मृदु ॥ 89 ॥

nirmitaṃ tripalairnāgairdvādaśāṅguladīrghakam //
chatrākāraṃ prakurvīta nālaṃ snigdhaṃ sitaṃ mṛdu // 89 //

Tr. Make the lead tube weighing three *palas* (about 280 gms), twelve digits in length, shaped like an umbrella, smooth, white and fine. 89.

नियोज्यं[2] लिंगरन्ध्रे च निर्भीतः स्थापयेत् क्षणम् ॥
लिंगस्थैर्यं लिंगदार्ढ्यं बहुवीर्यविवर्धनम्[3] ॥ 90 ॥

niyojyaṃ liṅgarandhre ca nirbhītaḥ sthāpayet kṣaṇam //
liṅgasthairyaṃ liṅgadārḍhyaṃ bahuvīryavivardhanam // 90 //

Tr. Insert the tube in the genital without fear and hold it for a moment. This makes the genital stable, strong and offers increment of semen. 90.

नालं काञ्चननिर्मितं मृदुतरं सांगं च नागैः कृतम् ॥
छत्राकारमतः[4] पलत्रययुतं दैर्घ्यं वितस्तैर्मितम्[5] ॥ 91 ॥

nālaṃ kañcananirmitaṃ mṛdutaraṃ sāṅgaṃ ca nāgaiḥ kṛtam //
chatrākāramataḥ palatrayayutaṃ dairghyaṃ vitastairmitam // 91 //

Tr. A tube made up of gold should be very smooth and the part made up of lead, shaped like an umbrella, weighing three *palas* (about 280 gms) and 12 digits in length could be there. 91.

नालं तादृशमेव लिंगविवरे यत्नेन संस्थापयेत् ॥ 92 ॥

nālaṃ tādṛśameva liṅgavivare yatnena saṃsthāpayet // 92 //

Tr. Cautiously insert such a tube in the urethra. 92.

विस्तारं[6] तदनन्तरं दृढतरं लिंगं ततो जायते ॥
वायुसञ्चारणे जाते ऊर्ध्वमाकृष्यते बलात् ॥ 93 ॥

---

1. दीर्घितम्-T,t1,P. 2. नियोग्यं-T,t1, नियोज्य–**P.** 3. बहुवीर्यप्रवर्द्धनम्-J. 4. सर्पाकारमतः-N, छत्राकारमथ-T,t1.; 5. वितस्तेर्मितं –J,P,T. 6. द्विस्तरात् -P, विस्तरात् -T.

vistāraṃ tadanantaraṃ dṛḍhataraṃ liṅgaṃ tato jāyate //
vāyusañcāraṇe jāte ūrdhvamākṛṣyate balāt // 93 //

Tr. This widens the urethra, which makes the penis strong, and the air has a free passage so that one can suck *(rajas)* with force. 93.

नारीं रम्यामधःस्थाप्य रहस्ये तु दिगम्बराम् ॥
स्वयं दिगम्बरो भूत्वा उत्तानायास्तथोपरि[1] ॥
शयित्वा कुम्भकं कृत्वा[2] किञ्चिन्नारी स्वयं च हि[3] ॥ 94 ॥
nārīṃ ramyāmadhaḥsthāpya rahasye tu digambarām //
svayaṃ digambaro bhūtvā uttānāyāstathopari //
śayitvā kumbhakaṃ kṛtvā kiñcinnārī svayaṃ ca hi // 94 //

Tr. In a desolate place, having placed a beautiful naked woman below and oneself also being naked, one lies in prone position. The woman also should practise *kumbhaka* a little. 94.

अन्योऽन्यं गाढमालिंग्य योनौ लिंगं निरोपयेत्[4] ॥
मिथस्त्वधरपानं च कुर्यात् गलरवादिकम्[5] ॥ 95 ॥
anyo'nyaṃ gāḍhamāliṅgya yonau liṅgaṃ niropayet //
mithastvadharapānaṃ ca kuryāt galaravādikam // 95 //

Tr. Both should closely embrace each other and the penis should be penetrated in the vagina. Both should kiss and make whinning sounds. 95.

विलिखेच्च नखेनैव धारयेत्स्वेद[6]सम्भवम् ॥
नार्या[7] भगात् पतदबिन्दुम[8]भ्यासेनोदर्ध्वमाहरेत्[9] ॥ 96 ॥
vilikhecca nakhenaiva dhārayetsvedasambhavam //
nāryā bhagāt patadbindumabhyāsenordhvamāharet // 96 //

Tr. Both should pinch (each other) with nails, hold the perspiration, mastering the technique one should suck the *bindu*

---

1. उत्तानायास्तथायतिः-N,n1,n2,n4,J 2. कुर्यात्-T,t1,P. 3. बहिः-T,N,n1,J. 4. निवेशयेत्-n3. 5 ....रहरदिकम्-J,N,n1,n4. 6. घातयेत् -T,P. 7. नालात् -n4. 8. पतद बिन्दुर –T,n1,n2,n3,n4,J. 9 ......नोदर्धमावहेत्-T,n1, नालाद भगात्यतेद्बिंदुरभ्यासेनोर्द्ध मावहेत् -J,N,n3.

back from the vagina and also pull back and preserve one's own *bindu,* which is being secreted. 96.

चलितं च निजं[1] बिन्दुमूर्ध्वमाकृष्य रक्षयेत् ॥
एवं संरक्षयेद् बिन्दुं मृत्युं जयति योगवित् ॥ 97 ॥

calitaṃ ca nijaṃ bindumūrdhvamākṛṣya rakṣayet //
evaṃ saṃrakṣayed binduṃ mṛtyuṃ jayati yogavit // 97 //

Tr. One should suck one's own *bindu* which is flowing and preserve it. Thus, preserving the *bindu,* an adept of *yoga* overcomes untimely death. 97.

मरणं बिन्दुपातेन जीवितं[2] बिन्दुधारणात् ॥
चित्तायत्तं नृणां शुक्रं[3] शुक्रायत्तं च जीवितम् ॥
तस्माच्छुक्रं[4] मनश्चैव[5] रक्षणीयं प्रयत्नतः ॥ 98 ॥

maraṇaṃ bindupātena jīvitaṃ bindudhāraṇāt //
cittāyattaṃ nṛṇāṃ śukraṃ śukrāyattaṃ ca jīvitam //
tasmācchukraṃ manaścaiva rakṣaṇīyaṃ prayatnataḥ // 98//

Tr. Secretion of *bindu* causes death, while preservation brings about longevity. Semen of a human being is under mind's control, while longevity is under the control of semen. Therefore, semen and mind should be carefully controlled. 98.

एवं यो भजते नारी[6] तामेव मनसा स्मरेत्[7] ॥ 99 ॥

evaṃ yo bhajate nārī tāmeva manasā smaret // 99 //

Tr. Such a woman, who is favourable, should be mentally perceived. 99.

सिन्दूरसदृशं योनौ स्त्रीणामास्थायिकं रजः ॥
ऋतुमत्या रजोऽप्येवं रजो बिन्दुं च रक्षयेत् ॥ 100 ॥

---

1. चलितं चलितं-T,P,J,n1,n2,n4, वलितं वलितं -T,P.. 2. जीविते – J. 3. चित्तायत्तं भवेन्नृणां –P,T,t1. 4. तस्माच्छुक्लं -t1. 5. मतश्चैव –J. 6. नारीं –P,T,t1,n2,n4. 7. रमेत् -T,P, स्मरन् -n3.

sindūrasadṛśaṃ yonau strīṇāmāsthāyikaṃ rajaḥ //
ṛtumatyā rajo'pyevaṃ rajo binduṃ ca rakṣayet // 100 //

Tr. *rajas* (menstrual discharge), which is like red lead, is located in the female genital organ. A menstruating woman should preserve both *rajas* and *bindu.* 100.

ऋतुकाले यथा शुक्रं[1] निर्दोषं योनिसंगतम् ॥
तथा तन्मारुतेनैव स्त्रीरक्तेनैकतामियात्[2] ॥ 101 ॥
ṛtukāle yathā śukraṃ nirdoṣaṃ yonisaṅgatam //
tathā tanmārutenaiva strīraktenaikatāmiyāt // 101 //

Tr. At the time of monthly cycle, the pure semen, which is ejaculated in the vagina, mixes up with woman's menstrual discharge, being moved by *vāyu.* 101.

आयुः कर्म च वित्तं च विद्या चैव चतुष्टयम्[3] ॥
आधानकाले लिखितं[4] गर्भस्थस्यैव देहिनः ॥ 102 ॥
āyuḥ karma ca vittaṃ ca vidyā caiva catuṣṭayam //
ādhānakāle likhitaṃ garbhasthasyaiva dehinaḥ // 102 //

Tr. Span of life, *karma* (profession), wealth and education— these four are destined at the very time of conception. 102.

यावद् यावदयं देहो धि"यते गर्भशायिनः[5] ॥
तावत्तावदभिव्यक्तिर्लिंगस्यास्य प्रजायते ॥ 103 ॥ *
yāvadyāvadayaṃ deho dhriyate garbhaśāyinaḥ //
tāvattāvadabhivyaktirliṅgasyāsya prajāyate // 103 //

Tr. Whenever a creature takes a (gross) body, the causal body gets manifested. 103.

आयुष्यं वर्धते नित्यं यदि बिन्दुः स्थिरो[6] भवेत् ॥
उत्पत्तिस्थितिसंहारे बिन्दुरेको हि कारणम् ॥ 104 ॥ *

---

1. शुक्लं-P,t1. 2. स्त्रीरेतेनैकतामियात्-P. 3. विद्या निधनमेव च-J,n1,n2,n3,n4, विद्यां चैव चतुष्टयं–P,T,t1. 4. लिखति-P,T. 5. गर्भशायिना–J,N,n1,n3,n4. 6. बिन्दुस्थिरो– T,n1. * अनुपलब्धश्लोकः -n2.

āyuṣyaṃ vardhate nityaṃ yadi binduḥ sthiro bhavet //
utpattisthitisaṃhāre bindureko hi kāraṇam //104 //

Tr. The span of life becomes prolonged if the *bindu* is stabilized. In all the states of birth, sustenance and death, *bindu* alone is responsible. 104.

ततो भवेद्राजयोगी नान्तरा भवति ध्रुवम् ॥
न चिन्मात्रेण सिद्धिः स्यादभ्यासात् पवनस्य वै[1] ॥ 105 ॥ *

tato bhavedrājayogī nāntarā bhavati dhruvam //
na cinmātreṇa siddhiḥ syādabhyāsāt pavanasya vai // 105 //

Tr. Thus (following this method) alone, one can certainly become a *rājayogī* and not otherwise. Neither the practice of *prāṇāyāma* nor thinking alone brings about quick success. 105.

अभ्यासस्य क्रमं वक्ष्ये नारीणां च शनैः शनैः ॥ 106 ॥ *

abhyāsasya kramaṃ vakṣye nārīṇāṃ ca śanaiḥ śanaiḥ /106/

Tr. The order of the (gradual) practice, even for the woman, is being narrated by me. 106.

लिंगं कराभ्यामाकुञ्च्य मणिं[2] चान्तः[3] प्रवेशयेत् ॥
यावन्मणिप्रवेशः स्यात्तावदभ्यासमाचरेत् ॥
ततः परं समर्था चेदूर्ध्वमाकुञ्चयेद्रजः[4] ॥ 107 ॥ *

liṅgaṃ karābhyāmākuñcya maṇiṃ cāntaḥ praveśayet //
yāvanmaṇipraveśaḥ syāttāvadabhyāsamācaret //
tataḥ paraṃ samarthā cedūrdhvamākuñcayedrajaḥ // 107 //

Tr. She should hold the penis with the hands and insert the glans (penis) in. This should be practised till penetration is perfected. After succeeding in it, one should suck the *rajas*. 107.

तस्याः शरीरे नादस्तु[5] बिन्दुतामेव गच्छति ॥
स बिन्दुस्तद्रजश्चैव एकीकृत्य स्वदेहजौ ॥ 108 ॥ *

---

1. पवनः स्वनैः-P,T,t1. 2. मणि -P,T. 3. वातः-T. 4. .....समर्थः स्यादूर्ध्व......P,T. 5. अनुपलब्धः–J. * अनुपलब्धश्लोकः -n2.

tasyāḥ śarīre nādastu bindutāmeva gacchati //
sa bindustadrajaścaiva ekīkṛtya svadehajau // 108 //

Tr. In her body, the *nāda* gets transformed into *bindu,* when *bindu* and *rajas* produced in the body become united. 108.

वज्रोल्यभ्यासयोगेन योगसिद्धिः करे स्थिता ॥
अज्ञातयोगशास्त्रेण[1] वज्रोलीं स्त्री तु नाभ्यसेत् ॥ 109 ॥
vajrolyabhyāsayogena yogasiddhiḥ kare sthitā //
ajñātayogaśāstreṇa vajrolīṃ strī tu nābhyaset // 109 //

Tr. With the practice of *vajrolī,* success in *yoga* becomes easy. A woman should not take up the practice of *vajrolī,* if she is not well-versed in the *yogic* techniques. 109.

अयं योगः पुण्यवतां धन्यानां तत्त्वशालिनाम् ॥
निर्मत्सराणां सिध्येत न तु मत्सरशालिनाम् ॥ 110 ॥
ayaṃ yogaḥ puṇyavatāṃ dhanyānāṃ tattvaśālinām /
nirmatsarāṇāṃ sidhyeta na tu matsaraśālinām // 110 //

Tr. Those who are pious, courageous, have gained insight into reality and are free from jealousy, attain success in *yoga*, but not those who'are envious. 110.

सर्वेषामेव योगानामयं योगः शुभंकरः ॥
तस्मादयं वरिष्ठोऽसौ भुक्तिमुक्तिफलप्रदः ॥ 111 ॥
sarveṣāmeva yogānāmayaṃ yogaḥ śubhaṅkaraḥ //
tasmādayaṃ variṣṭho'sau bhuktimuktiphalapradaḥ // 111 //

Tr. Among all types of *yoga*, this one is auspicious. This is supreme since it brings success both in material as well as in spiritual realms. 111.

सुगन्धिर्योगिनो[2] देहे जायते बिन्दुधारणात्[3] ॥ 112 ॥
sugandhir yogino dehe jāyate bindudhāraṇāt // 112 //

---

1. अज्ञातयोगशास्त्रस्तु –J. 2. सुगन्धो योगिनो –P. 3. दुग्धधारणात् -T.

Tr. Preservation of *bindu* creates pleasant smell in the body of a *yogī.* 112.

अथ सहजोलिः[1]—
सहजोली चामरोली वज्रोल्या एव भेदतः ॥ 113 ॥

atha sahajoliḥ—
sahajolī cāmarolī vajrolyā eva bhedataḥ // 113 //

Tr. *sahajolī* and *amarolī* are merely the variations of *vajrolī.* 113.

Note: *bhavadeva* in his YB (vii-292), commenting on *vajrolī, sahajolī* and *amarolī* remarks that *sahajolī, amarolī, vajrolī* comprise a composite process. There is no difference between them. They differ in names. But the function remains the same. When the union of *candra* and *sūrya* takes place in the *yonisthāna*, it is called *amarolī.* When one's *bindu* is held inside with the help of *yonimudrā,* it is termed as *sahajolī.* To suck one's *bindu* and raise it upwards is *vajrolī.* 113.

जले सुभस्म[2] निक्षिप्य दग्धगोमयसम्भवम्[3] ॥
वज्रोली मैथुनादूर्ध्वं स्त्रीपुंसोश्चांगलेपनम् ॥ 114 ॥

jale subhasma nikṣipya dagdhagomayasaṃbhavam //
vajrolī maithunādūrdhvaṃ strīpuṃsoścāṅgalepanam // 114 //

Tr. Both man and woman should besmear the body with clean ashes of cow-dung mixed up with water after the practice of *vajrolī.* 114.

आसीनयोः सुखेनैव[4] मुक्त[5]व्यापारयोः क्षणम् ॥
सहजोलिरियं[6] प्रोक्ता कर्तव्या[7] योगिभिः सदा[8] ॥ 115 ॥

āsīnayoḥ sukhenaiva muktavyāpārayoḥ kṣaṇam //
sahajoliriyaṃ proktā kartavyā yogibhiḥ sadā // 115 //

---

1. सहजोली –P,T,n2,n3. 2. जलेषु भस्म–J,n1,n4. 3. अनुपलब्धपंक्तिः –T,t1. 4. मुखेनैव -J. 5. मुक्तः -n1. 6. सहजोलिरिति-n1. 7. श्रद्धया-P.T,t1. 8. तथा -P,T.

Tr. Thus, one remains in a state of Bliss unmindful of the worldly affairs. This is called *sahajolī*, which should always be practised by the *yogīs*. 115.

अथामरोली[1] —
विहाय नित्यां प्रथमां[2] च धारां
विहाय निःसारतयान्त्यधाराम्[3] ॥
निषेव्यते[4] शीतलमध्यधारां
कापालिकैः खण्डमतैरनर्घ्याम्[5] ॥ 116 ॥

athāmarolī —
vihāya nityāṃ prathamāṃ ca dhārāṃ
vihāya niḥsāratayāntyadhārām //
niṣevyate śītalamadhyadhārāṃ
kāpālikaiḥ khaṇḍamatairanarghyām // 116 //

Tr. The first and the last flow, which is useless, should be avoided and the cool middle flow be consumed. This is highly respected by the *khaṇḍa kāpālikas.* 116.

अमरीं यः पिबेन्नित्यं नस्यं कुर्याद्दिने[6] दिने ॥
वज्रोलीमभ्यसेन्नित्यममरोलीति[7] कथ्यते ॥ 117 ॥
amarīṃ yaḥ pibennityaṃ nasyaṃ kuryād dine dine //
vajrolīmabhyasennityamamarolīti kathyate // 117 //

Tr. While undergoing the course of *vajrolī*, when one daily drinks and snuffs *amarī* (urine), it is called *amarolī.* 117.

Note: The description of *vajrolīmudrā* is grossly misunderstood by the masses and uninitiated. This has led to consider *vajrolī* as an obsene practice and in some editions of HP, it is completely omitted.

Although *śrīnivāsa* has elaborately described *vajrolī*, it is important in this connection to note the remarks of *bhavadeva miśra*

---

1. अनुपलब्धः–N,n1,n2,n3,n4,J. 2. पित्तोल्बणत्वात्प्रथमं-P.T,t1. 3. विहारनिःसारतयाल्पधारां –J. निःसरयतां तु धारणं–P,T,t1. 4. निषिंचते-P.T,t1. 5. खंडमतैकमय्यां-P.T,t1, खण्डमतैरनर्घ्या -J. 6. कुर्वन्दिने-P.T. 7. ....मभ्यसेदेवममरोलीति-P.T.

in his YB. He says, "The practice of *bindusiddhi* through *vajrolī* is for the infatuated and ignorant people. For the spiritual knowledge, the behaviour consisting of renouncing all the desires, attachments, and ego consciousness leads to Bliss and Ultimate Peace." 80-117.

अथ शक्तिचालनम् —

पुच्छे[1] प्रगृह्य भुजगीं सुप्तामुद्बोधयेदभीः ॥
निद्रां विहाय सा ऋज्वी ऊर्ध्वमुत्तिष्ठते हठात् ॥ 118 ॥

atha śakticālanam —

pucche pragṛhya bhujagīṃ suptāmudbodhayedabhīḥ //
nidrāṃ vihāya sā ṛjvī ūrdhvamuttiṣṭhate haṭhāt // 118 //

Tr. Just as one catches hold of the sleeping serpent by the tail and pulls it up, similarly, one should awaken the *kuṇḍalī* from its slumber. Then she suddenly rises up. 118.

द्वादशांगुल[2]दैर्घ्यञ्च विस्तृतं[3] च षडंगुलम् ॥
हठज्ञैः मृदुलं प्रोक्तं वेष्टनाम्बरलक्षणम्[4] ॥ 119 ॥

dvādaśāṅgula dairghyañca vistṛtaṃ ca ṣaḍaṅgulam //
haṭhajñaiḥ mṛdulaṃ proktaṃ veṣṭanāmbaralakṣaṇam //119//

Tr. An expert of *haṭha* should cover the tongue with a thin, smooth and clean cloth of twelve digits in length and six digits in width. 119.

विस्तारितेन तां जिह्वां वेष्टयित्वा ततः सुधीः[5] ॥
अङ्गुष्ठतर्जनीभ्यां च[6] हस्ताभ्यां धारयेद् ध्रुवम् ॥
स्वशक्त्या चालयेद्वामे दक्षिणे च पुनः पुनः ॥ 120 ॥

vistāritena tāṃ jihvāṃ veṣṭayitvā tataḥ sudhīḥ //
aṅguṣṭhatarjanībhyāṃ ca hastābhyāṃ dhārayed dhruvam //
svaśaktyā cālayedvāme dakṣiṇe ca punaḥ punaḥ // 120 //

---

1. पुच्छं–P,T,t1,n2.2.द्वादशांगुलि–P,t1.3.अन्तरं–P,t1. 4.वेष्टिताम्बरलक्षणम्-J.5.अनन्तर्रविस्तारितेन ......सुधीः-अनुपलब्धपाठः-N,n1,n2,n3,n4,J,t1. वितस्तिप्रमितं दीर्घ विस्तारे च षडंगुलम् ॥ अधिकः पाठः-P.T,t1. 6. तु–T,t1.

Tr. After spreading and covering the tongue with the cloth, a wise should firmly catch hold of it with thumb and index fingers of both the hands and frequently move it to right and left to the capacity. 120.

मुहूर्तद्वयपर्यन्तं निर्भीत[1]श्चालयेदसौ ॥
ऊर्ध्वमाकृष्यते[2] किञ्चित्सुषुम्णां[3] कुण्डलीगताम्[4] ॥
षण्मासाच्चालनेनैव[5] शक्तिस्तस्योर्ध्वगा[6] भवेत् ॥ 121 ॥
muhūrtadvayaparyantaṃ nirbhītaścālayedasau //
ūrdhvamākṛṣyate kiñcitsuṣumṇāṃ kuṇḍalīgatām //
ṣaṇmāsāccālanenaiva śaktistasyordhvagā bhavet // 121 //

Tr. If one fearlessly undertakes this practice for six hours, *kuṇḍalī* rises a little and enters into *suṣumnā.* A six month's practice alone makes the *śakti* rising upwards. 121.

सूर्येण पूरयेद्वायुं[7] सरस्वत्यास्तु चालयेत्[8] ॥
शब्दगर्भाचालनेन[9] योगी रोगैः प्रमुच्यते ॥ 122 ॥
sūryeṇa pūrayedvāyuṃ sarasvatyāstu cālayet //
śabdagarbhācālanena yogī rogaiḥ pramucyate // 122 //

Tr. One should inhale air through right nostril and activate the *sarasvatī* (*kuṇḍalī*), by manipulation of the tongue. Thus, the *yogī* frees himself from the diseases. 122.

Note: The process of *śakticālana* does not seem to have been clearly described and is mixed with *khecarī.* HP(iii.110-116) suggests different practices like inhalation through the right nostril, pressing of *kanda* and practice of *bhastrā* in the process of *śakticālana.* 122.

येन सञ्चालिता[10] शक्तिः स योगी सिद्धिभाजनः ॥
किमत्र बहुनोक्तेन मृत्युं जयति लीलया ॥ 123 ॥
yena sañcālitā śaktiḥ sa yogī siddhibhājanaḥ //
kimatra bahunoktena mṛtyuṃ jayati līlayā // 123 //

1. विभीत-P.T. 2. ऊर्ध्वमाकृष्य तौ-P.T,t1. 3. सुषुम्नां–T,t1. 4. कुण्डलीगता-P.T,t1. 5. अभ्यासाच्चालनेनैव-N,n1,n2,n3,n4,J. 6. शक्तिःस्यादूर्ध्वगा-P.T. 7. सूर्येणापूरयेद्वायुं–J.N. 8. चालनम्-P.T,t1,n2,n4.J. 9. शब्दगर्भचालनेन–P. 10. संचारिता P.T,t1.

Tr. A *yogī,* who stimulates *śakti* (*kuṇḍalī*), accomplishes supernatural powers (*siddhis*). He easily transcends *kāla* (death). What to speak more ? 123.

सशैलवनधात्र्यास्तु[1] यथाधारोऽहि नायकः[2] ॥
अशेषयोगतन्त्राणां तथाधारो हि कुण्डली ॥ 124 ॥
saśailavanadhātryāstu yathādhāro'hi nāyakaḥ //
aśeṣayogatantrāṇāṃ tathādhāro hi kuṇḍalī // 124 //

Tr. Just as the Lord of serpents is the support of the earth, with all her forests and mountains, similarly, *kuṇḍalinī* forms the very substratum of the entire science of *yoga*. 124.

फणी कुण्डलिनी[3] नागी चक्री[4] वक्री सरस्वती ॥
ललना[5] रसना क्षत्री ललाटी[6] शक्तिः शंखिनी[7] ॥ 125 ॥
रज्वी[8] भुजंगी शेषा च कुण्डली सर्पिणी मणिः ॥
आधारशक्तिः कुटिला[9] कराली[10] प्राणवाहिनी[11] ॥ 126 ॥
अष्टवक्रा[12] षडाधारा व्यापिनी कलनाधरा[13] ॥
कुरीत्येवं[14] च विख्याताः शब्दाः पर्यायवाचकाः ॥ 127 ॥
इति शक्तिचालनम्[15] ॥

phaṇī kuṇḍalinī nāgī cakrī vakrī sarasvatī //
lalanā rasanā kṣatrī lalāṭī śaktiḥ śaṅkhinī // 125 //
rajvī bhujaṅgī śeṣā ca kuṇḍalī sarpiṇī maṇiḥ //
ādhāraśaktiḥ kuṭilā karālī prāṇavāhinī // 126 //
aṣṭavakrā ṣaḍādhārā vyāpinī kalanādharā //
kurītyevaṃ ca vikhyātāḥ śabdāḥ paryāyavācakāḥ // 127 //
iti śakticālanam //

Tr. *phaṇī, kuṇḍalinī, nāgī, cakrī, vakrī, sarasvatī, lalanā,*

---

1. सशैलवनधात्रीणां–P,T,t1. 2. यथाधारः सुराचलः-P.T,t1, कुण्डली–n2. 3. फणी कुण्डलिनी-अनुपलब्ध-N,n1,n3. 4. चक्री-अनुपलब्धः-J,n2. 5. लभना-P,n1,n2,n3, दलना-T,t1. **6.** क्षेत्रललाटी-P,T,t1. 7. शंकिणी-P,t1; शंकणी-T. 8. रुजी P; रजी-T,t1. 9. कुंडली-P.T,t1. 10. फनाली–n1,2,3, फलाली –n4. अनुपलब्धः-J. 11. माणवहिनी-J, फणवाहिनी–N. 12. अष्टावक्रा-P.T,t1, अष्टवक्त्रा-J,N. 13. ककनोधरा-P.T, कलनोधरा-t1. 14. कुंतीत्येवं-P.T,t1,J, कुरीत्येवं -J. 15. इति चालन विधिः-N,n1, अनुपलब्धपाठः -n2.

rasanā, kṣatrī, lalāṭī, śakti, śaṅkhinī, rajvī, bhujaṅgī, śeṣā, kuṇḍalī, sarpiṇī, maṇi, ādhāraśakti, kuṭilā, karālī, prāṇavāhinī, aṣṭavakrā, ṣaḍādhārā, vyāpinī, kalanādharā, kurī are the wellknown synonyms of *kuṇḍalinī*. 125-127.

Thus finishes *śakticālanam* .

Note: The synonyms of *kuṇḍalinī* given here are not found in other available texts. 125-127.

अथ खेचरीमुद्रा[1]**—**

खेचरी चान्तिमा मुद्रा अचिराद् ब्रह्मरन्ध्रगा ॥
सुषुम्णगामृता मूर्ध्वा[2] लम्बिका वाचकाः[3] स्मृताः ॥ 128 ॥

atha khecarīmudrā —

khecarī cāntimā mudrā acirādbrahmarandhragā //
suṣumṇagāmṛtā mūrdhvā lambikā vācakāḥ smṛtāḥ // 128 //

Tr. *khecarī* forms the ultimate *mudrā,* which quickly makes the *prāṇa* move into *brahmarandhra. suṣumnagā, amṛtā, mūrdhvā, lambikā* are its synonyms. 128.

न क्रमेण विना शास्त्रं[4] नैव शास्त्रं[5] विना क्रमः ॥
शास्त्रं क्रमयुतं[6] ज्ञात्वा तन्यते[7] श्रीमतां भुवि ॥ 129 ॥

na krameṇa vinā śāstraṃ naiva śāstraṃ vinā kramaḥ //
śāstraṃ kramayutaṃ jñātvā tanyate śrīmatāṃ bhuvi // 129 //

Tr. Without a proper order, there is no science and a science cannot be learnt without an order. By learning the science in proper order, one attains success in life. 129.

जिह्वाकृतिनिभं शस्त्रमल्पं तच्छेदने क्षमम्[8] ॥
स्नुहीपत्रनिभं बल्यं[9] शस्त्रं कुर्याद्विचक्षणः[10] ॥ 130 ॥

1.अथ खेचरी–J,n1,n4, अथ खेचरी महामुद्रा दिङ्मात्रं प्रदर्श्यते–P,T,t1. 2. सुषुम्ना गम्यता मूर्ध्वा-P.T, सुषुम्णागामृतामूर्च्छा–J,N,n3. 3. वाचकः-P,T,t1. 4. शास्त्रा-J. 5. न शास्त्रेण-n3. 6. शास्त्रक्रमयुतं–J,P,T,t1. 7. वर्ण्यते-P.T,t1. 8. शस्त्रमाहोस्विच्छेदने क्षमः-P; शास्त्रं आटे ...स्विच्छेदने क्षमं-T,t1. 9.चाल्यं–P,T,t1. 10. अनुपलब्धपंक्तिः-T.

jihvākṛtinibhaṃ śastramalpaṃ tacchedane kṣamam //
snuhīpatranibhaṃ balyaṃ śastraṃ kuryādvicakṣaṇaḥ // 130//

Tr. A wise person should collect a strong weapon resembling the leaf of milk-hedge, appearing like a tongue, which would be able to cut the tongue very little. 130.

Note: The word *śastra* not only refers to weapon, but also is employed for all the ingredients used during the process of *khecarī*. KKHP refers to various *śastras* with the names given to them according to the ingredients used. For example, black pepper is *sūryaśastra*, rock-salt (*saindhava*) is *candra-śastra*, chebulic myrobalan (*harītakī*) is *dhanvantarī śastra*, spear-headed shape of the weapon is *indra-śastra*, cardamom (*elā*) is *brahma-śastra,* scissors are *caurāsī-śastra*, weapon prepared with sulpher (*gandhaka*) or orpiment (*haritāla*) or vermilion (*hiṅgula*) is *bhavānī-śastra*, extract of white leadwort (*citraka-arka*) is *agni-śastra*. 130.

[1]इडायाः पिङ्गलायाश्च सुषुम्णायाश्च मध्यतः ॥
प्रज्ञावताङ्गुलिं दत्वा ग्रन्थिमध्यं[2] समुच्छिनेत् ॥ 131 ॥
iḍāyāḥ piṅgalāyāśca suṣumṇāyāśca madhyataḥ //
prajñāvatāṅgulim datvā granthimadhyaṃ samucchinet //131//

Tr. The wise should place a finger at the center of *iḍā, piṅgalā* and *suṣumnā* and cut the center of the knot. 131.

द्विनिष्कं निष्कनिष्कार्द्धं[3] पथ्यानागरसैन्धवान्[4] ॥
चूर्णयित्वा तु तच्चूर्णं तेन चूर्णेन घर्षयेत्[5] ॥ 132 ॥
dviniṣkaṃ niṣkaniṣkārddhaṃ pathyānāgarasaindhavān //
cūrṇayitvā tu taccūrṇaṃ tena cūrṇena gharṣayet // 132 //

Tr. Take 2 *niṣkas* of *pathyā* (chebulic myrobalan), one *niṣka* of *nāgara* (dried ginger) and half *niṣka* of rock salt and powder them. Rub this powder (on the tongue). 132. (1 *niṣka* = 25gms).

---

1. जिह्वाधो ग्रन्थिमालोक्य तिलमात्रं समुच्छिनेत् -अधिकः पाठः-P,T,t1,n1,n2,n3,n4.
2. ग्रन्थे मध्यं-P.T,t1. 3. निष्कपादार्थ-P,T,t1. 4. पथ्यासागरसैंधवान्-P,T,t1. 5. 'चूर्ण यित्वा तु ये चूर्ण तेन चूर्णेन् घर्षयेत्' -P,T,t1; ......धारयेत् -N,n1,n3,n4,J.

पूर्वोक्तेन प्रकारेण शक्तिचालनमाचरेत् ||
गोदोहनं यथा तद्वच्छक्तिचालनमाचरेत्[1] || 133 ||

pūrvoktena prakāreṇa śakticālanamācaret //
godohanaṃ yathā tadvacchakticālanamācaret // 133 //

Tr. Practise *śakticālana* as told before, like one milks a cow. 133.

पुनः सप्तदिने प्राप्ते तिलमात्रं समुच्छिनेत् || 134 ||

punaḥ saptadine prāpte tilamātraṃ samucchinet // 134 //

Tr. On the seventh day again cut (the frenum) to the thinness of a sesame. 134.

छेदनादिक्रमेणैव यावद् भ्रूमध्यगा भवेत्[2] ||
तावच्छनैः प्रकर्तव्यं श्रीनिवासस्य भाषणम् || 135 ||

chedanādikrameṇaiva yāvadbhrūmadhyagā bhavet //
tāvacchanaiḥ prakartavyaṃ śrīnivāsasyabhāṣaṇam // 135 //

Tr. One should cautiously follow the processes of *chedana* (cutting) etc., so that the tongue touches the center of the eyebrows. This is told by *śrīnivāsa.* 135.

अत्रायं हठयोगसम्प्रदायः—

शिशुर्लम्बिकायोगेनातीतानागतं[3] जानाति[4] / गर्भनिःसरणाद् भूमिपाते लम्बिकायोगे[5] जिह्वाबन्धो पातिनी[6] भवति / लम्बिका प्रतिबिम्बत्वेन[7] जिह्वायाम्[8] अधोग्रन्थि[9]-सूक्ष्मरूपतया[10] सर्वेषां नराणां प्रत्यक्षतया अद्यापि दृश्यते || तत्रैव लम्बिका प्रतिबन्धकसूक्ष्मग्रन्थिभेदनं कार्यमिति मम[11] प्रतिभाति ||

atrāyaṃ haṭhayogasampradāyaḥ —

śiśurlambikāyogenātītānāgataṃ jānāti / garbha-niḥsaraṇād-bhūmipāte lambikāyoge jihvābandho pātinī bhavati / lambikā pratibimbatvena jihvāyāṃ adhogranthisūkṣmarūpatayā / sarveṣāṃ narāṇāṃ pratyakṣatayā adyāpi dṛśyate / tatraiva lambikā pratibandhakasūkṣmagranthibhedanaṃ kāryamiti mama pratibhāti //

---

1. तद्वत् जिह्वादोहनमाचरेत्-P,T,t1. 2. भ्रूमध्यभाग्भवेत्-P,T,t1. 3. . . नातींतं नागतं-P. 4. योगेनातं ...नाति–T. 5. लम्बिकायोग-P; लम्बिका जिह्वा योगे-T. 6. याति-N,n1,n3,J. 7. प्रतिबिबकत्वेन–P,T,t1. 8. जिह्वाया:-P,T. 9. अत्र ग्रन्थः-P,T, अथोग्रन्थः-n3. 10. सूक्ष्मसूयतमा–J. 11. अनुपलब्धः-N,n3.

According to the tradition of *haṭhayoga*—

Tr. Through *lambikā yoga,* an infant knows the past and the future. On coming out of the womb and taking birth, *lambikā yoga* turns out to be *jihvā-bandha*, which is subtly reflected below the tongue as a knot. This can be verified in all the human beings. I feel that one should pierce the band at this subtle knot which obstructs *lambikā.*

परमेश्वरप्रोक्तखेचरीनामपटले तु[1]—

स्नुहीपत्रनिभं[2] शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् ॥
समनायां[3] तु जिह्वायां[4] रोममात्रं समुच्छिनेत् ॥ 136 ॥

parameśvaraprokta khecarīnāmapaṭale tu —

snuhīpatranibhaṃ śastraṃ sutīkṣṇaṃ snigdhanirmalam //
samanāyāṃ tu jihvāyāṃ romamātraṃ samucchinet // 136 //

In *khecarī-paṭala as told by parameśvara*—

Tr. Get a sharp, clean and smooth weapon of the shape of the leaf of milk-hedge. With this the tongue (frenum) has to be evenly cut to a hair's breadth. 136.

रोममात्रछेदने[5] न विलम्बेन हि लम्बिका ॥
हृदये[6] ग्रन्थकाराणामाकूतं[7] भणितं[8] मया ॥ 137 ॥

romamātrachedane na vilambena hi lambikā //
hṛdaye granthakārāṇāmākūtaṃ bhaṇitaṃ mayā // 137 //

Tr. *lambikā* (*yoga*) is soon attained if one cuts (the frenum) to a hair's breadth. I have explained what has been left unsolved by the writers in the texts. 137.

दत्तात्रेयस्तु —

कपालकुहरे जिह्वा प्रविष्टा[9] विपरीतगा ॥
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ 138 ॥[10]

1. परमेश्वर प्रोक्तं पटले तु-N,n1,n2,J. 2. स्नुहीपत्रनिभे–J, स्नुहिपत्रनिभं–P. 3. समतायास्तु-P,T,t1, समतायान्तु-n1. 4. जिह्वा-P, जिह्वाया-T,t1. 5. रोममात्रभेदेन-P,T,t1, रोममात्रच्छेदनेन-n4. 6. हृदयं –n4. 7. हृदयग्रन्थकारणमत्कृतं-P,T,t1. 8. फणितं-T,t1, कथितं–J. 9. अनुपलब्ध ःP. 10. कपालकुहरे जिह्वा विपरीता गोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी-**t1**.

***dattātreyastu*—**
kapālakuhare jihvā praviṣṭā viparītagā //
bhruvorantargatā dṛṣṭirmudrā bhavati khecarī // 138 //

According to *dattātreya*—

Tr. Fold the tongue and insert it into the nasopharyngeal cavity and fix the gaze between the eyebrows. This is called *khecarī mudrā.* 138.

न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा ॥
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥ 139 ॥[1]
na rogo maraṇaṃ tasya na nidrā na kṣudhā tṛṣā //
na ca mūrcchā bhavettasya yo mudrāṃ vetti khecarīm / 139 /

Tr. One who masters *khecarī mudrā,* does not get affected by diseases, death, sleep, hunger, thirst and stupor. 139.

पीड्यते न स[2] **रोगेण**[3] **लिप्यते न च कर्मणा ॥**
बाध्यते[4] **न च कालेन यो मुद्रां वेत्ति खेचरीम् ॥ 140 ॥**
pīḍyate na sa rogeṇa lipyate na ca karmaṇā //
bādhyate na ca kālena yo mudrāṃ vetti khecarīm // 140 //

Tr. One who attains *khecarī mudrā,* does not suffer from disease, does not get bound by *karma* and is not affected by (untimely) death. 140.

हठप्रदीपिकायाम्[5]**—**
छेदनचालनदोहैः कलां[6] **क्रमेण वर्धयेत्तावत् ॥**
यावदियं भ्रूमध्ये स्पृशति[7] **तदानीं**[8] **खेचरीसिद्धिः ॥ 141 ॥**
***haṭhapradīpikāyām* —**
chedanacālanadohaiḥ kalāṃ krameṇa vardhayettāvat //
yāvadiyaṃ bhrūmadhye spṛśati tadānīṃ khecarīsiddhiḥ /141/

---

1. श्लोकः अनुपलब्धः-P,T,t1. 2. च-P,T,t1. 3. योगेन-P,T,t1. 4. बध्यते–t1,n4. 5. हठप्रदीपिकाकारोऽपि-P,T. 6. कला–P. 7. सा यावत् भूमध्यं स्पृशति-P; सा याति यावद् भूमध्यं स्पृशति हि–T,t1,n2. 8. तदा-P,n4.

According to HP—

Tr. The tongue should be gradually lengthened by cutting, moving and milking, till it touches the center of the eyebrows. Then alone *khecarī* is attained. 141.

छेदनस्य प्रकारोक्तेरभावान्मूढता यतः ॥
साधारणोक्त्या[1] दुर्बोधान्नांगीकार्यमिदं मतम् ॥ 142 ॥
chedanasya prakārokterabhāvānmūḍhatā yataḥ //
sādhāraṇoktyā durbodhānnāṅgīkāryamidaṃ matam // 142 //

Tr. The opinion given above is unacceptable as it does not provide details, which may lead to confusion of a layman. 142.

गुरुदर्शितमार्गेण संकेतः कथ्यते मया ॥
संकेतशृंखलाभावे खेचरी तु कथं भवेत् ॥ 143 ॥
gurudarśitamārgeṇa saṅketaḥ kathyate mayā //
saṅketaśṛṅkhalābhāve khecarī tu kathaṃ bhavet // 143 //

Tr. I am explaining *saṅketa* as per the guidelines of *guru*. How *khecarī* can be attained without *saṅketa* and *śṛṅkhalā*? 143.

सर्पाकारं सवलयं शृंखलाद्वयसेवितम्[2] ॥
सखर्परं[3] षड्वितस्तिदैर्घ्यं संकेतलक्षणम् ॥ 144 ॥
sarpākāraṃ savalayaṃ śṛṅkhalādvayasevitam //
sakharparaṃ ṣaḍvitastidairghyaṃ saṅketalakṣaṇam // 144 //

Tr. The characteristics of a *saṅketa* are: shaped like a snake, rounded, containing two *śṛṅkhalās* (chains?), (providing) rest for elbow, measuring six *vitastis* (72 digits) in length. 144.

Note: *śrīnivāsa* gives here the technique and use of *saṅketa* according to the tradition of his *guru*. The characteristics of *saṅketa* are not found described in the available texts of *yoga*. Although *śrīnivāsa* describes '*saṅketa*' in the form of two spiral rings for the insertion of the tongue into it, the description is not clear. 144.

---

1. साधारकृणोक्त -P; साधारणोक्ति-T,t1. 2. श्रृंखलाद्वयसंमितं-P,T,t1. 3. सकूर्परं-P,T,t1.

शृंखलाद्वितयनिर्मितां परां[1]
सर्पवद्वलयखर्परान्विताम् ॥
विंशदंगुलमितां सुदीर्घिकां
लम्बिकाभ्युदयकारिणीं[2] विदुः ॥ 145 ॥[3]

śṛṅkhalādvitayanirmitāṃ parāṃ
sarpavadvalayakharparānvitām //
viṃśadaṅgulamitāṃ sudīrghikāṃ
lambikābhyudayakāriṇīṃ viduḥ // 145 //

Tr. (A *saṃketa* is) finely made up of two *śṛṅkhalās,* rounded like a snake, containing *kharpara* (a rest), measuring twenty digits in length, which brings success in *lambikā.* 145.

शृंखलायाश्च वलये जिह्वां तत्र प्रवेशयेत् ॥[4]
यथा भवेत्सुषुम्णागा[5] तथा भवति खेचरी ॥ 146 ॥

śṛṅkhalāyāśca valaye jihvāṃ tatra praveśayet //
yathā bhavet suṣumṇāgā tathā bhavati khecarī // 146 //

Tr. Insert the tongue in the circle of *śṛṅkhalā.* As the tongue is able to enter *suṣumnā, khecarī* is perfected. 146.

Note: *khecarī mudrā* has been greatly eulogized in *haṭhayogic* texts. There are six processes involved in the perfection of *khecarī mudrā* which are *chedana, cālana, dohana, manthana, praveśana* and *mantra.* The processes of *chedana, cālana* and *dohana* are to start simultaneously. *manthana* or *gharṣaṇa* consists of rubbing with thumb on the four places, three times a day. The four places are frenum under the tongue, root of the tongue, palate and uvula. A detailed description of *khecarī* is found in MYS by *ādinātha.*

These six verses (ii.141-146) seem to have been taken from *khecarīpaṭala* as stated in AR (xxvii.4742-4745). 146.

खेचर्या मुद्रणे जाते देही देहं न मुञ्चति ॥
कायं[6] त्यक्त्वा तु कल्पान्ते ब्रह्मस्थानं व्रजत्यसौ ॥ 147 ॥

---

1. निर्मितां बरां–T,t1. 2. लम्बिकोत्पातकारिणीं –t1. 3. अनुपलब्धश्लोकः-P. 4. एतदनन्तरं – कपालकुहरे यस्तु ततो जिह्वां प्रवेशयेत् - अधिकः पाठः -P,T,t1. 5. भवेत्सुषुम्णागौ-P,T,t1. 6. कामं–P,T,t1.

khecaryā mudraṇe jāte dehī deham na muñcati //
*kāyaṃ tyaktvā tu kalpānte brahmasthānaṃ vrajatyasau//*147//

Tr. As the *khecarī* is attained, a mortal does not face (premature) death. Rather, at the end of a *kalpa*, he renounces the body and goes to *brahmasthāna.* 147.

प्राणे सुषुम्णा[1]सम्प्राप्ते नादं तु[2] श्रूयतेऽष्टधा ॥
घण्टादुन्दुभिशंखादि[3]वीणावेणुनिनादवत्[4] ॥
तनूनपात्तडित~ तारेशपवनोपमम् [5] ॥ 148 ॥
prāṇe suṣumṇāsamprapte nādaṃ tu śrūyate'ṣṭadhā //
ghaṇṭādundubhiśaṅkhādivīṇāveṇuninādavat //
tanūnapāttaḍittāreśapavanopamam // 148 //

Tr. When *prāṇa* enters into *suṣumnā,* eight types of *nādas* are heard, like sounds resembling that of a bell, trumpet, conch, *vīṇā,* flute, tiny bell, tinkling of ua very fine pot, cracking sound of the fire, loud thunders and shrill sound of blowing air. 148.

वासुक्याद्यैश्च नागैश्च तक्षकेनाथवा पुनः ॥
दष्टस्य योगिनो देहे न विषं कर्तुमर्हति ॥ 149 ॥
vāsukyādyaiśca nāgaiśca takṣakenāthavā punaḥ //
daṣṭasya yogino dehe na viṣaṃ kartumarhati // 149 //

Tr. Such a *yogī,* even being bitten by (deadliest of) the serpents like *vāsukī, nāga* or *takṣaka,* will not be affected by poison. 149.

उत्कल्लोल[6]कलामृतं[7] च विमलं धारामृतं यः पिबेत् ॥
निर्दोषः स मृणालकोमलतनु[8]र्योगी चिरं जीवति ॥ 150 ॥
utkallolakalāmṛtaṃ ca vimalaṃ dhārāmṛtaṃ yaḥ pibet //
nirdoṣaḥ sa mṛṇālakomalatanuryogī ciraṃ jīvati // 150 //

---

1. सुषुम्नां–P,T,t1,n1,n3. 2. नादस्तु–P,T,n3. 3. . .शंखाभिः-P,T,t1,...शंखाद्दै-N,J. 4. वीणावेण्वग्नितालवत्-P,T,t1. 5. तनूनपात्रविस्तारतारेशपवनोपमम् -J,T,t1,n1,n2,n3,n4. 6. तत्कल्लोल–N,n1,n4,J; उत्कंलोक-T. 7. कलभृतं–P. 8. वपुर्-P,T,t1.

Tr. The *yogī,* who sucks the divine ambrosia secreting from the moon, maintains the body as tender as the lotus stalk and lives long without diseases. 150.

सेवन्ते यदि लम्बिकाग्रमनिशं जिह्वा रसस्यन्दिनी
सक्षाराकटुतिक्तदुग्धसदृशं मध्वाज्यतुल्यं यदा[1] ‖ 151 ‖
sevante yadi lambikāgramaniśaṃ jihvā rasasyandinī //
sakṣārākaṭutiktadugdhasadṛśaṃ madhvājyatulyaṃ yadā /151/

Tr. The tip of the elongated tongue tastes the nectar, as salt, pungent, sour or milk, honey or ghee. 151.

अशेषाणां च नाडीनां जिह्वाग्रे रन्ध्रमागतः[2] ‖
विधत्ते[3] येन मार्गेण तेन चान्द्री[4] कलां व्रजेत् ‖ 152 ‖
aśeṣāṇāṃ ca nāḍīnāṃ jihvāgre randhramāgataḥ //
vidhatte yena mārgeṇa tena cāndrī kalāṃ vrajet // 152 //

Tr. Entire set of the *nāḍīs* has its base at the tip of the tongue, wherefrom the *yogī* enjoys (ambrosia oozing from *candra*). 152.

कन्यावादाखिला[5]वादरसवादादि[6]सिद्धयः ‖
योगिनः[7] सम्प्रवर्तन्ते तेषां वज्रोलि[8]खेचरी ‖ 153 ‖
kanyāvādākhilāvādarasavādādisiddhayaḥ //

yoginaḥ sampravartante teṣāṃ vajrolikhecarī // 153 //

Tr. All the *siddhis* attained through *kanyāvāda* (*kuṇḍalī*), *rasavāda* (alchemy) etc. are for those *yogīs* who attain *vajrolī* and *khecarī.* 153.

त्रिकटुम्बी[9] हठा चैव[10] गोलीढं[11] शिखरं तथा ‖
त्रिशंखी[12] वज्रमोंकारी[13] मूर्ध्वनालं[14] भ्रुवोर्मुखे ‖ 154 ‖

---

1. मध्वाज्यतुल्याथवा–P,T,t1. 2. रन्ध्रगामता-N,n1,n3,n4,J,T,t1. 3. विद्यते-P,t1; विद्यन्ते-T. 4. चान्द्रीं–J, चाण्डीं -n1,n3. 5. बिलवाद–T,t1,n2. 6. रसवादस्तु–P,T. 7. योगिनां–P,T,t1. 8. वज्रोलि-J, वज्रली–T. 9. त्रिकुंड-P,T,t1. 10. सुचिहठा चैव-P,T,t1. 11. गोवीठं-P. 12. त्रिशंखि – P, श्रीशंखी –T,t1. 13. वज्रिमोंकारी-P,T,t1. 14. मूर्ध्वा नालं-P,T,t1.

trikaṭumbī haṭhā caiva golīḍhaṃ śikharaṃ tathā //
triśaṅkhī vajramoṅkārī mūrdhvanālaṃ bhruvormukhe //154 //

Tr. The opening between two eyebrows is called *trikaṭumbī, haṭhā, golīḍha, śikhara, triśaṅkhī, vajra, oṃkārī, mūrdhvanāla.* 154.

पिंगला दम्भिनी[1] सूर्या यमिना काक्षरा[2] तथा[3] ॥
कालाग्निः रुद्री[4] चण्डी च[5] ते[6] स्युः पिंगलनामकाः[7] ॥ 155 ॥
piṅgalā dambhinī sūryā yaminā kākṣarā tathā //
kālāgniḥ rudrī caṇḍī ca te syuḥ piṅgalanāmakāḥ // 155 //

Tr. The synonyms of *piṅgalā* are: *piṅgalā, dambhinī, sūryā, yaminā, kākṣarā, kālāgni, rudrī* and *caṇḍī.* 155.

इडा चन्द्रा सिनीवाली[8] गंगा[9] चामरबोधिता[10] ॥
इडायाः वाचकाः शब्दाः पर्यायेण प्रकीर्तिताः ॥ 156 ॥
iḍā candrā sinīvālī gaṅgā cāmarabodhitā //
iḍāyāḥ vācakāḥ śabdāḥ paryāyeṇa prakīrtitāḥ // 156 //

Tr. The synonyms of *iḍā* are: *iḍā, candrā, sinīvālī, gaṅgā* and *amarabodhitā.* 156.

गोशब्देनोदिता जिह्वा तत्प्रवेशो हि[11] तालुनि ॥
गोमांसभक्षणं तत्तु महापातकनाशनम् ॥ 157 ॥
gośabdenoditā jihvā tatpraveśo hi tāluni //
gomāṃsabhakṣaṇaṃ tattu mahāpātakanāśanam // 157 //

Tr. The term '*go*' denotes tongue, which is to be inserted in the '*tālu*' (roof of the nasopharyngeal cavity). This literally means 'consuming *gomāṃsa*', which eliminates the severest of the sins. 157.

---

1. दुंभिनी-P. 2. यमिनाक्षरा-P; यमिकाक्षरा-T. 3. यथा –N,J. 4. कालाग्निरुद्री –P. 5. कालाग्नी रुद्रचण्डीं च –T. 6. चेते -N,J. 7. पिंगलना तथा –T, अनुपलब्धपंक्तिः-t1. 8. चन्द्राशचीवाली -T; चन्द्राशशीवाली –P,t1. 9. गलगा –T,t1. 10. मधुबोधिता –T,t1; वामस्तुबोधिता -P. 11. अपि -P,T,t1.

गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम् ||
कुलीनं तमहं मन्ये अन्ये तु[1] कुलघातकाः || 158 ||
gomāṃsaṃ bhakṣayennityaṃ pibedamaravāruṇīm //
kulīnaṃ tamahaṃ manye anye tu kulaghātakāḥ // 158 //

Tr. I consider him the noble, who consumes '*gomāṃsa*' (insertion of the tongue) and sucks the divine ambrosia (secretion from the moon). Others are black-sheep. 158.

जिह्वाप्रवेशसम्भूत[2]वह्निनोत्थापिता[3] खलु ||
चन्द्रात् स्रवति[4] यः सारः सा स्यादमरवारुणी || 159 ||[5]
jihvāpraveśasaṃbhūtavahninotthāpitā khalu //
candrāt sravati yaḥ sāraḥ sā syādamaravāruṇī //159 //

Tr. *amara-vāruṇī* (the divine ambrosia) is the secretion of the nectar, which is made to flow from the moon by the stimulation of fire through insertion of the tongue in the cavity. 159.

इति श्रीनिवासयोगी[6]विरचितायां[7] हठरत्नावल्यां द्वितीयोपदेशः[8]

iti śrīnivāsayogīviracitāyāṃ haṭharatnāvalyāṃ dvitīyopadeśaḥ
This is the second chapter of haṭharatnāvalī composed by śrīnivāsayogī

---

1. इतरे P; त्वितरे –T,t1. 2. जिह्वाप्रवेशनं भूतं-P,T,t1. 3. वह्निनोद्घापिताखलु-P,T,t1, वह्निनोत्थापितः-n3. 4. द्रवति–T. 5. 'इति खेचरी मुद्रा'-P,T,t1. 6. योगीन्द्र-P,T. 7. श्रीनिवासविरचितायां–n2,n3,n4. 8. एतदनन्तरम्–
"वज्रोली वर—– दश महामुद्रान्वितैः कुम्भकैः
युक्तिः केवलकुम्भकेण महता क्षेमंकरेणाधिकम् ||
ख्याते रम्यसुवर्णराजकथिते रत्नावलीनामके
ग्रन्थेऽस्मिन्नुपदेश एष विहितारम्भो (विविधारम्भो-t1) द्वितीयो गतः || "
अधिकः पाठः -P,T,t1.

तृतीयोपदेशः[1]

अथाष्टांगयोगः[2]—

अथातोऽष्टांगयोगानां स्वरूपं किञ्चिदुच्यते[3] ||
बहवो योगिनः सिद्धा अङ्गैरेतैश्च शोभनैः || 1 ||

***athāṣṭāṅgayogaḥ* —**

athāto'ṣṭāṅgayogānāṃ svarūpaṃ kiñciducyate //
bahavo yoginaḥ siddhā aṅgairetaiśca śobhanaiḥ // 1 //

Tr. Now the nature of *aṣṭāṅga-yoga* is being explained. Many *yogīs* have attained *siddhis* through these efficacious methods. 1.

मनःप्रसादसन्तोषो मौनमिन्द्रियनिग्रहः ||
दया दाक्षिण्यमास्तिक्यमार्जवं मार्द्दवं क्षमा || 2 ||
भावशुद्धिरहिंसा च ब्रह्मचर्यं स्मृतिर्धृतिः[4] ||
इत्येवमादयश्चान्ये[5] मानसा[6] नियमाः स्मृताः || 3 ||

manaḥprasādasantoṣo maunamindriyanigrahaḥ //
dayā dākṣiṇyamāstikyamārjavaṃ mārddavaṃ kṣamā // 2 //
bhāvaśuddhirahiṃsā ca brahmacaryaṃ smṛtirdhṛtiḥ //
ityevamādayaścānye mānasā niyamāḥ smṛtāḥ // 3 //

Tr. Pacification of the mind, contentment, silence, control of sense organs, kindness, politeness, belief in God, straightforwardness, gentleness, forgiveness, purification of the thoughts, non-violence, celebacy, memory, forbearance and some such more—are known as *niyamas* for the mind. 2-3.

---

1. अनुपलब्धपाठः-N,J,P,T. 2. अष्टांगयोगमाह–J,n2, अथाष्टांगयोगमाह-P,J,T,n4, अथाष्टांगयोगः-n2,n3,n4, अनुपलब्धपाठः-P,T. 3. अनुपलब्धपाठः-N,n1,J, अनुपलब्धपंक्तिः-n2,n3,t1. 4. स्मृतिधृतिः-N. 5. इत्येवमाद्या येऽन्ये च–T,t1. 6. मनसो–P,T.

इति मूलाधारं[4] प्रथमं चक्रम् ॥
iti mūlādhāraṃ prathamaṃ cakram ॥
This is the first *cakra* — the *mūlādhāra*.

लिंगापानान्तराले भगगरविगतत्र्यस्रवह्न्या[5]लयान्ते
अष्टावर्ता[6] शोणवर्णा वसति मलगृहं गर्भशय्या च तत्र ॥
तत्रैवोड्यानबन्धस्तदुहितमचलं[7] कामरूपीठमाद्यं
कामाख्योऽग्निः सदेवो[8] विलसति कुहरिण्यात्मशक्तिश्च नागी[9] ।२४।

liṅgāpānāntarāle bhagagaravigatatryasravahnyālayānte
aṣṭāvartā śoṇavarṇā vasati malagṛhaṃ garbhaśayyā ca tatra ॥

---

1. पुरामयोक्तं–a. 2. महाश्चर्यीभूत–a. 3. इति मूलदेशं सरोजं तु प्रदीप्तज्वालभास्वरं / उपस्थ ततो ज्ञेयं ज्वलदाग्निशिखोपममिति –अधिकपाठः —b. 4. मूलाधार –b. 5. गतग्रसुवह्न्या –b. 6. अष्टाऽयर्त्ता —b. 7. स्तदुदितिमचलं –b. 8. कामाख्योऽपिग्निः सदेव –a. 9. नागो –a.

tatraivoḍḍyānabandhastaduhitamacalaṃ kāmarūpīṭhamādyaṃ kāmākhyo'gniḥ sadevo vilasati kuhariṇyātmaśaktiśca nāgī ||24||

Tr. In the generative organ and *apāna*, at the core of the vagina (*bhaga*) which has three fires of *ravi* (sun) in the three foldings of fire where lies the *malagṛha* (store of faeces) and the womb deep red in colour, having eight circles. This is the place of *uḍḍiyānabandha*, where *kāmarūpīṭha* is located and wherein the fire called *kāma* (desire) is always existing with the presiding deities. Here in this cavity *ātmaśakti*—the serpent power exists. 24.

चतुर्द्दलान्तर्गतकन्दसंस्था
त्र्युस्रेऽरुणो[1]ऽधोमुखकोणगेऽस्ति ॥
बिन्दौ[2] भुजंगी वलयान्तरस्थे
स्वयम्भुलिंगं[3] खलु पश्चिमास्यम् ॥ २५ ॥

caturddalāntargatakandasaṃsthā
tryusre'ruṇo'dhomukhakoṇage'sti ।
bindau bhujaṅgī valayāntarasthe
svayambhuliṅgaṃ khalu paścimāsyam ॥ 25 ॥

Tr. The *kanda* which lies in (the lotus of) four petals, having three rays, red in colour, shaped as an inverted triangle. At this point the coiled *kuṇḍalinī (bhujaṅgī)* lies, in which *svayambhūliṅga* facing posteriorly, exists. 25.

तथा चोक्तं योगसारे –

tathā coktaṃ yogasāre —

It has been narrated in *yogasāra*—

गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ।
शिवस्य दीपरूपस्य स्थानं शक्तिप्रकाशकम् ॥
यत्र कुण्डलिनी नाम पराशक्तिः प्रतिष्ठिता ॥ २६ ॥

gudameḍhrāntarālasthaṃ mūlādhāraṃ trikoṇakam ।
śivasya dīparūpasya sthānaṃ śaktiprakāśakam ॥
yatra kuṇḍalinī nāma parāśaktiḥ pratiṣṭhitā ॥ 26 ॥

तस्माद्वायुस्ततो वह्निस्तस्माद् बिन्दुः शरीरिणाम् ।

---

1. त्र्यस्नेऽरुणो –b. 2. विदौ –b. 3. लिंग –b.

यस्मान्नादो यतो[1] हंसो यस्मादुत्पद्यते मनः ॥
तदेतत्कामरूपाख्यं पीठं कामफलप्रदम् ॥ इति ॥ २७ ॥

tasmādvāyustato vahnistasmād binduḥ śarīriṇām ।
yasmānnādo yato haṃso yasmādutpadyate manaḥ ॥
tadetatkāmarūpākhyaṃ pīṭhaṃ kāmaphalapradam ॥ *iti* ॥27॥

Tr. The *parāśakti* named *kuṇḍalinī* is situated in the triangular *mūlādhāra* between the anus and the generative organ which is the place of *śiva* in the form of light, which enkindles *śakti*. There from *vāyu (prāṇa)*, *vahni* (fire), *bindu*, *nāda* (the unstruck sound) , *haṃsa* and mind of the human beings originate. This seat is called *kāmarūpa*, which fulfills the desires. 26-27.

इदं शक्तिस्थानं मूलाधारचक्रमिति ज्ञेयं ॥

idaṃ śaktisthānaṃ mūlādhāracakramiti jñeyam ॥

This seat of *śakti* should be known as *mūlādhāracakra*.

मूलस्यान्तः कर्णिकाशक्तिपीठं
नित्याभ्यासात्तत्र शक्तिप्रबोधे ॥
वायोश्चित्तेन प्रवेशः सुषुम्णा
मध्ये जारग्रन्थिभेदाद् गुरूक्तात् ॥ २८ ॥

mūlasyāntaḥ karṇikāśaktipīṭhaṃ
nityābhyāsāttatra śaktiprabodhe ॥
vāyościttena praveśaḥ suṣumṇā
madhye jāragranthibhedād gurūktāt ॥ 28 ॥

Tr. In the pericurp of *mūlādhāra* is the seat of *śakti*. Through a regular practice, being guided by a *guru*, *śakti* is awakened. *prāṇa* alongwith *citta* moves into *suṣumṇā* by piercing the *jāragranthi (brahmagranthi)*. 28.

इडा चापाकृतिर्भूत्वा[2] महापथं आश्लिष्य नासापुटान्तं गतोत्था त्र्यस्रवामतः[3] ॥ २९ ॥

iḍā cāpākṛtirbhūtvā mahāpathaṃ āśliṣya nāsāpuṭāntaṃ gatotthā tryasravāmataḥ ॥ 13 ॥

Tr. *iḍā* making three arcs (like a bow) moves along *suṣumṇā* originating from the (left point of the) triangle (*mūlādhāra*) and ending at the left nostril. 29.

---

1. यस्मान्नादोपतो —a. 2. चामाकृतिर्भूत्वा —a. 3. गतोत्तस्त्यस्रवामतः —a.

पिंगलैवं दक्षभागं[1] स्यात् त्रिकोणस्य नाडीका ।
वक्रीभूयाश्लिष्य नाडी दक्ष[2]नासापुटं गता ॥ ३० ॥

piṅgalaivaṃ dakṣabhāgaṃ syāt trikoṇasya nāḍīkā ।
vakrībhūyāślişya nāḍī dakṣanāsāpuṭaṃ gatā ॥ 30 ॥

Tr. The *nāḍī* known as *piṅgalā* is on the right side of the triangle and with arcs around *suṣumṇā* ends in the right nostril. 30.

नाडी सुषुम्णा ।

nāḍī suṣumṇā ।

nāḍī stands for *suṣumṇā*.

महापथान्तर्गतचित्रनाड्यां स्युः पञ्चभूताधिपदेवताश्च ।
शरीरिणां मोक्षपथं सुषुम्णा यद्ब्रह्मसूत्रं[3] प्रवदन्ति सैषा ॥ ३१ ॥

mahāpathāntargatacitranāḍyāṃ
syuḥ pañcabhūtādhipadevatāśca ॥
śarīriṇāṃ mokṣapathaṃ suṣumṇā
yadbrahmasūtraṃ pravadanti saiṣā ॥ 31 ॥

Tr. The presiding deities of the five elements dwell in *citrāṇāḍī* which is situated in *mahāpatha (suṣumṇā).* The *brahmasūtra*, in the form of *suṣumṇā* is considered as the path of liberation for the human beings. 31.

अधिदेवतास्तु[4] –

adhidevatāstu –

The presiding deities are—

ब्रह्मा जनार्द्दनो रुद्र ईश्वरश्च सदाशिवः ।
चित्राख्यनाड्यान्तरस्थाः पञ्चभूताधिदेवताः ॥ इति ॥ ३२ ॥

brahmā janārddano rudra īśvaraśca sadāśivaḥ ।
citrākhyanāḍyāntarasthāḥ pañcabhūtādhidevatāḥ ।iti।32।

Tr. The presiding deities of the five *mahābhūtas* situated inside the *citrānāḍī* are *brahmā, janārdana, rudra, īśvara* and *sadāśiva*. 32.

तथा च श्रुतिः –

tathā ca śrutiḥ –

1. पिंगलैवं दक्षभागोत्था –b. 2. दक्ष्य –b. 3. नाड्यां स्युः पञ्चभूताधिपदेवताश्च शरीरिणां मोक्षपथं सुषुमणा यद्ब्रह्मसूत्रं – अनुपलब्धपाठः —b. 4. आधिदेवतास्तु -b.

This is corroborated by the *śruti* too—

तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥ इति ॥ ३३ ॥

tasyānte suṣiraṃ sūkṣmaṃ
tasmin sarvaṃ pratiṣṭhitam ॥ *iti* ॥ 33 ॥

Tr. Inside that lies a subtle aperture where everything exists. 33.

कन्दं संवेष्ट्य सर्वं तरणिशशिशिरा[1]मध्यगा पृष्ठलग्ना
पायुग्रीवं च दण्डाकृतिरिह सरला ब्रह्मदण्ड्यऽस्थिनाली[2] ॥
मध्ये तस्याः सुषुम्णा विलसति पिहिता पश्चिमास्येन्दुसूर्यः
नाड्यौ द्वे पूर्ववाहेन हि भवति मुखेऽस्या हठो दोषनद्धे ॥ ३४ ॥

kandaṃ saṃveṣṭya sarvaṃ taraṇiśaśiśirāmadhyagā pṛṣṭhalagnā
pāyugrīvaṃ ca daṇḍākṛtiriha saralā brahmadaṇḍya'sthinālī ॥
madhye tasyāḥ suṣumṇā vilasati pihitā paścimāsyendusūryaḥ
nāḍyau dve pūrvavāhena hi bhavati mukhe'syā haṭho doṣanaddhe ॥ 34 ॥

Tr. All the *nāḍīs* like *taraṇi (piṅgalā), śaśi (iḍā)* and *madhyagā (suṣumṇā)* wind around the *kanda* and are situated at the back. The passage in the spine is *brahmadaṇḍī* which is as straight as a stick and originates from anus and ends at the neck. At its center *suṣumṇā* is concealed which faces posteriorly. The two *nāḍīs* i.e. *indu (iḍā)* and *sūrya (piṅgalā)* course anteriorly upto the mouth where they merge with the practice of *haṭha* as a result of which all the impurities are removed. 34.

दोषा विकृतरसाद्याः । क्रोधादयो वा । हठो हठयोगः ॥ ३५ ॥

doṣā vikṛtarasādyāḥ । *krodhādayo vā* । *haṭho haṭhayogaḥ*35

Tr. The impurities are harmful *rasa* (plasma) etc., or even anger etc. *haṭha* stands for *haṭhayoga*. 35.

शुद्धस्य कुम्भाग्निविदग्धदोषे मुद्रासनैर्नाडिविवर्तनैर्जितौ ।
आरम्भके पश्चिमवाहवायू[3] साग्नी यदा शक्तिवितापनं[4] तदा३६

śuddhasya kumbhāgnividagdhadoṣe
mudrāsanairnāḍivivartanairjitau ॥
ārambhake paścimavāhavāyū
sāgnī yadā śaktivitāpanaṃ tadā ॥ 36 ॥

---

1. सर्वन्तराणि शशिरा –b. 2. ताली –b. 3. वाह्य —b. 4. वितापन –b.

Tr. *kumbhaka (prāṇāyāma)* which burns out the morbidities and also practice of *āsana* and *mudrā* which alters the conditions of the *nāḍīs* in the *ārambha* state brings about purity and moves the *prāṇa* (and *apāna*) along with fire through the posterior path which agitates the *śakti (kuṇḍalinī)*. 36.

मुनेः कामदुघा शक्तिः सुषुम्णा कल्पवल्लरी ।
चिन्तामणिः संयमोऽस्य सिद्धिकैवल्यकांक्षिणः ॥ ३७ ॥

muneḥ kāmadughā śaktiḥ suṣumṇā kalpavallarī ।
cintāmaṇīḥ saṃyamo'sya siddhikaivalyakāṅkṣiṇaḥ ।37।

Tr. For a *muni* aspiring for *kaivalya* state, *śakti* is like *kāmadhenu* (wish fulfilling cow), *suṣumṇā* is *kalpavallarī* (wish fulfilling the creeper) and practice of *saṃyama* is like *cintāmaṇi* (wish fulfilling stone). 37.

सहजमाद्यमिदं तनुपञ्चकं चिदमृतास्पद[1]शक्तिमहापथौ ।
रसनतालुसहस्रदलाम्बुजान्यभिभवन्ति मिथो युजि मुक्तये ॥३८॥

sahajamādyamidaṃ tanupañcakaṃ
cidamṛtāspada-śaktimahāpathau ॥
rasanatālusahasradalāmbujāny-
abhibhavanti mitho yuji muktaye ॥ 38 ॥

Tr. The natural and pristine path for this body which has five sheaths *(pañcakośa)* leads towards immortality and consciousness through *śakti (kuṇḍalinī)* and *mahāpatha (suṣumṇā)* which overpowers the tongue, palate and the lotus of thousand petals and leads to emancipation. 38.

तमसीव मनोराज्यं निद्रायां स्वप्नवेष्टनम्[2] ।
मौढ्यरूपं तथा शक्तेः स्पन्दपुर्यष्टकं तदा ॥ ३९ ॥

tamasīva manorājyaṃ nidrāyāṃ svapnaveṣṭanam ।
mauḍhyarūpaṃ tathā śakteḥ spandapuryaṣṭakaṃ tadā।39।

Tr. The fanciful-state is enveloped in darkness, like one dreams in the sleep state, because the *śakti (kuṇḍalī)* is overpowered by ignorance in the living body of eight *puras* (cities) where creative pulsation throbs. 39.

---

1. विदऽमृतास्पद –b. 2. चेष्टनं —b.

वासनादृढविकल्प[1]कुण्डलैर्यन्त्रितात्मनि सुरागिणी[2] ततः ।
क्लेशकर्म्यऽसुसुशक्तिकुण्डली स्वं स्वपित्यऽथ तदज्ञतायुजा ।४०।

vāsanādṛḍhavikalpakuṇḍalair-
yantritātmani surāgiṇī tataḥ ||
kleśakarmya'susuśaktikuṇḍalī
svaṃ svapitya'tha tadajñatāyujā || 40 ||

Tr. One is engulfed in the intricate craving, severe mental constructions which are attractive. (Without finding the way out) due to ignorance (one indulges in) *karma* leading to suffering which puts the *kuṇḍalī* asleep. 40.

अथ कन्दः —

atha kandaḥ —

The description of *kanda* follows—

चिद्ब्रह्मणः कल्पकालेत्यविद्या[3]
मायात्मनाऽसच्छवलं स कन्दः ॥
स ब्रह्मग्रन्थिः प्रकृतेश्च पुंसा
योगः क्रियाभूस्त्रिगुणैः त्रिशूली ॥ ४१ ॥

cidbrahmaṇaḥ kalpakāletyavidyā
māyātmanā'sacchavalaṃ sa kandaḥ ||
sa brahmagranthiḥ prakṛteśca puṃsā
yogaḥ kriyābhūstriguṇaiḥ triśūlī || 41 ||

Tr. *kanda* is the *brahmagranthi* which has been evolved from union of *prakṛti* and *puruṣa*, which is the seat of *karma* of the nature of three *guṇas* in the form of the triad of sufferings (*triśūlī*). This (*kanda*) is the *kalpakāla* (time of creation) of *brahma* which is in the form of *avidyā* that has *māyā* (illusion) at its very core and which is variegated. 41.

आधारकन्दोऽस्तु च नाभिकन्दः
स कुण्डलिन्या जडभावभूः परा ॥
आश्रित्य तं स्वप्नगता भुजंगी[1]
शक्त्याऽनयात्मा[2] भ्रमति स्वकर्मवान् ॥ ४२ ॥

ādhārakando'stu ca nābhikandaḥ
sa kuṇḍalinyā jaḍabhāvabhūḥ parā ||

---

1. दृढकल्प -b. 2. तात्मतिसरागिणी –b. 3. कालेदविद्या –b.

āśritya taṃ svapnagatā bhujaṅgī
śaktyā'nayātmā bhramati svakarmavān ॥ 42 ॥

Tr. *ādhāra-kanda* is also known as *nābhikanda* which in companion of *kuṇḍalinī* turns inert. The *bhujaṅgī (kuṇḍalinī)* dwelling in *kanda* lies dormant. The *ātmā* wanders being pushed by the power of its own *karma*. 42.

आधारपद्मान्तरकर्णिकान्ते कन्दः सहस्रछद[3]कञ्जकन्दः ।
मेरोरधोलम्बिमहापथस्य जनिः सहस्राम्बुजरन्ध्रमध्यात् ॥ ४३ ॥

ādhārapadmāntarakarṇikānte
kandaḥ sahasrachadakañjakandaḥ ॥
meroradholambimahāpathasya
janiḥ sahasrāmbujarandhramadhyāt ॥ 43 ॥

Tr. *kanda* having thousand petals is located at the root of the spine at the pericurp of the lotus (i.e. *mūlādhāra)* wherefrom *suṣumṇā* originates, from the aperture of the lotus of a thousand petals. 43.

उक्तं च गोरक्षे[1] –

uktaṃ ca gorakṣe --

According to *gorakṣa*—

योनिमध्ये महालिंगं पश्चिमाभिमुखं स्थितम् ।
मस्तके मणिमुद्भिन्नं यो जानाति[5] स योगवित् ॥ ४४ ॥

yonimadhye mahāliṅgaṃ paścimābhimukhaṃ sthitam ।
mastake maṇimudbhinnaṃ yo jānāti sa yogavit ॥ 44 ॥

Tr. At the center of the *yoni* the great *liṅga*, facing posteriorly is situated like a shining *maṇi* (jewel) worn on the head. One who learns this is a true *yogī*. 44.

तप्तचामीकराभासं तडिल्लेखेव विस्फुरत् ।
चतुरस्रं परं वह्नेरधोमेढ्र[6]मवस्थितम् ॥ इति ॥ 45 ॥

taptacāmīkarābhāsaṃ taḍillekheva visphurat ।
caturasraṃ paraṃ vahneradhomeḍhramavasthitam ।*iti*।45।

Tr. It is as shining as hot gold, or as bright as a lightning. It is quadrangular in shape, situated above the fire and below the generative organ. 45.

---

1. भुजंगो –a. 2. शक्त्याऽनयात्मा –a. 3. छन्द –a. 4. गोरक्ष्ये –b. 5. जानीति –b. 6. मेढं –b.

योनिमध्ये योनिः कामाक्षा गुदलिंगान्तरालवर्त्तिनी । तन्मध्ये महालिंगं ज्ञेयं ॥ ४६ ॥

yonimadhye yoniḥ kāmākṣā gudaliṅgāntarālavarttinī । tanmadhye mahāliṅgaṃ jñeyam ॥ 46 ॥

Tr. *yonimadhye* means, the *yoni* named *kāmākṣā* which is between the anus and the organ of reproduction. *mahālinga* exists there. 46.

किंविशिष्टं ?

kiṃviśiṣṭam ?

पश्चिमाभिमुखे स्थितं । पुनर्मस्तके शिरसि । मणिं उद्भिन्नं[1] सहितं मणिसहितम् शिर इति । यः वेत्ति स योगवित् ॥ ४७ ॥

paścimābhimukhe sthitam । punarmastake śirasi । maṇiṃ udbhinnaṃ sahitaṃ maṇisahitam śira iti । yaḥ vetti sa yogavit ॥ 47 ॥

Tr. What are its characteristics? It faces backwards. It adorns a *maṇi* (jewel) on the head. One who knows this is a true *yogī*. 47.

तथा च त्रिपुरासारे –

tathā ca tripurāsāre —

So also according to *tripurāsāra*—

अंगं लिंगवपुर्भृतो भगवतो देवो द्विरण्डोऽभवद् ॥ इति ॥ ४८ ॥

aṅgaṃ liṅgavapurbhṛto bhagavato devo dviraṇḍo'bhavad ॥ *iti* ॥ 48 ॥

Tr. The *liṅgaśarīra* represents the *bhagavān* who has become the deity *dviraṇḍa*. 48.

एतादृशं मेढ्रं लिंगं योगी पश्येत् ॥

etādṛśaṃ meḍhraṃ liṅgaṃ yogī paśyet ॥

Tr. A *yogī* should perceive such a *liṅga*.

---

1. शिरसिमऽभिन्नं –b.

॥ इति कुण्डलीपदसुषुम्णास्वरूप-
कन्दस्वरूपविवेचनोद्योतः ॥

॥ iti kuṇḍalīpadasuṣumṇāsvarūpa-
kandasvarūpavivecanodyotaḥ ॥

Here ends the chapter describing the seat of *kuṇḍalinī*, nature of *suṣumṇā* and *kanda*.

Chapter — 26

अथ स्वाधिष्ठानचक्रम् —

atha svādhiṣṭhānacakram —

svādhiṣṭhānacakra —

स्वाधिष्ठानं तु सरोजं रसगणितदलं६ पीतवर्णं च तत्र
सावित्रीशक्तियुक्तो द्रुहिण इह यती[1] राकिनी देव्यधीशा ॥
प्राप्ता कामाग्निरूर्वी[2] वसति च नियमो वैखरी वाक्सिद्धः
बालाक्षाख्यः[3] स ऊज्जाप्य न[4] वसति तथा धारणा स्थूलदेहः ।

svādhiṣṭhānaṃ tu sarojaṃ rasa gaṇitadalaṃ6 pītavarṇaṃ ca tatra
sāvitrīśaktiyukto druhiṇaiha yatī rākinī devyadhīśā ॥
prāptā kāmāgnirūrvī vasati ca niyamo vaikharī vāksiddhaḥ
bālākṣākhyaḥ sa ūjjāpya na vasati tathā dhāraṇā sthūladehaḥ ॥ 3 ॥

Tr. The lotus of *svādhiṣṭhāna* has six yellow petals. *druhiṇa (brahmā)* along with the power of *sāvitrī* stays here as a *yatī*, presided over by the goddess *rākinī*. The intense blazing fire of (kernel) desire resides here which has *vaikharī* as *vāk* (speech), *bālākṣa* as *siddha*, where one chants loudly and *dhāraṇā* is practiced on the gross body. 1.

स्वाधिष्ठाने लिंगमृषिर्मोक्षः[5] सायुज्यता रजः ।
आकारो बादिषट्लान्ता मात्राः स्युर्हंसवाहनम् ॥ २ ॥

svādhiṣṭhāne liṅgamṛṣirmokṣaḥ sāyujyatā rajaḥ ।
ākāro bādiṣaṭlāntā mātrāḥ syur-haṃsavāhanam ॥ 2 ॥

Tr. In *svādhiṣṭhāna*, *liṅga* is the *ṛṣi*, *mokṣa* (emancipation) is unification, *rajas* is letter *ā*. Here are letters from *ba* to *la* (i.e. *ba, bha, ma, ya, ra, la*), the swan is vehicle. 2.

धातुः शक्तेश्च वाण्याः स्थितिसदनमिदं योगिनो ज्ञानमूलम्
स्वाधिष्ठानं सहंसं मुनिरिह कलयेच्छान्तिमेधाक्षमे स्वम् ॥
शक्तिर्धर्मात्मिका या व्यवहृति[6]रखिला कुण्डली सेयमंगे
जीवानां शक्तिरुच्चैर्विदमृतजडतास्वादशा व्याकरोति ॥ ३ ॥

dhātuḥ śakteśca vāṇyāḥ sthitisadanamidaṃ yogino jñānamūlam
svādhiṣṭhānaṃ sahaṃsaṃ muniriha kalayecchāntimedhākṣame svam ॥
śaktirdharmātmikā yā vyavahṛtirakhilā kuṇḍalī seyamaṅge
jīvānāṃ śaktiruccairvidamṛtajaḍatāsvādaśā vyākaroti ॥ 3 ॥

1.पती--b. 2.रूदी–b. 3.वालाक्ष्यख्यः-b. 4.नु-b. 5.मोंक्ष्यः-b. 6.व्यवस्थिति–b.

Tr. This is the abode of the creator, *śakti* and speech (*vāṇī)* and the source of wisdom for the *yogīs*. A *muni* should resort to this *svādhiṣṭhāna* along with the *hamsa* (swan) for peace and intellect. The entire virtuous behaviour of *śakti* is *kuṇḍalī* which resides here. The *śakti* when awakened, offers heightened taste of nectar and motionlessness to the living creatures. 3.

तथा चोक्तं त्रिपुरासारसमुच्चये –

tathā coktaṃ tripurāsāra-samuccaye—

It is said in *tripurāsāra-samuccaya*—

इह स्वाधिष्ठाने निहितनिजचेतो लयवशाद्
अमन्दानन्दौघः[1] स्तिमितहृदयः साधकवरः ॥
समेतांगोऽनंगः क्षितितलगतो वा मृगदशां
स्मरस्मेरायांगं[2] रमयति गणं कान्तिकलितम् ॥ ४ ॥

iha svādhiṣṭhāne nihitanijaceto layavaśād
amandānandaughaḥ stimitahṛdayaḥ sādhakavaraḥ ॥
sametāṅgo'naṅgaḥ kṣititalagato vā mṛgadaśām
smarasmerāyāṅgaṃ ramayati gaṇaṃ kāntikalitam ॥ 4 ॥

Tr. A great *sādhaka* directs his consciousness in this *svādhiṣṭhāna* and with a gratifying (heart) gets absorbed to enjoy ocean of Bliss. Herein one may enjoy Bliss by defeating the cupid or else being attracted by the beautiful women gratifies the sensual desires. 4.

इह वेत्ति निधाय मानसं स्वं कविविधं[3] वाश्रुतशास्त्रजालमुच्चैः ।
अवधूतजरामयः[4] स मर्त्यः सुचिरं जीवति वीतमृत्युभीतिः ॥५॥

iha vetti nidhāya mānasaṃ svaṃ
kavividhaṃ vāśrutaśāstrajālamuccaiḥ ॥
avadhūtajarāmayaḥ sa marttyaḥ
suciraṃ jīvati vītamṛtyubhītiḥ ॥ 5 ॥

Tr. Focusing the mind into it, one becomes wise and knows the entire range of scriptures which has not been heard of. Such a mortal who has transcended old age and diseases, lives long overcoming fear from death. 5.

---

1. नदौघः —b. 2. स्मेरायागं –b. 3. एवंकविविधं –b. 4. जरायः – b.

वपुषोऽशुचिभाजनस्य शश्वत्परमां शुद्धिमिहातनोति पुंसाम् ।
शरदम्बुदपेलवस्य[1] देहे दृढरुद्धो घनतां च शुक्रबिन्दुः ॥ ६ ॥

vapuṣo'śucibhājanasya śaśvat-
paramāṃ śuddhimihātanoti puṃsām ॥
śaradambudapelavasya dehe
dṛḍharuddho ghanatāṃ ca śukrabinduḥ ॥ 6 ॥

Tr. Overcoming impurity of the body a human being here would achieve eternal and supreme purity. His body becomes as slender as the autumn cloud but sturdy and stout and the semen turns condensed. 6.

चलितं सहसा महारसेन्द्रं[2] कमलालोकनतो वियत्स[3]रोजात् ।
इह ये विनिवारयन्ति[4] सन्तो ननु धीराः पुरुषोत्तमास्त[5] एव ।७।

calitaṃ sahasā mahārasendraṃ
kamalālokanato viyatsarojāt ॥
iha ye vinivārayanti santo
nanu dhīrāḥ puruṣottamāsta eva ॥ 7 ॥

Tr. Those who restrict the flow of *mahārasendra* (nectar) here, which oozes from the *ākāśakamala* (lotus at the aperture above) by concentrating on this *kamala* (lotus) are indeed sages, wise and superior among the human beings. 7.

मदधौतकटो महागजेन्द्रो[6] वशतामेति यथा शनैरुपायात्[7] ।
बलवानिह वै सुधाकरोऽसौ क्रमरुद्धः स्ववशो भवत्यवश्यम्[8] ॥८॥

madadhautakaṭo mahāgajendro
vaśatāmeti yathā śanairupāyāt ॥
balavāniha vai sudhākaro'sau
kramaruddhaḥ svavaśo bhavatyavaśyam ॥ 8 ॥

Tr. Even an intoxicated elephant, can be gradually brought under control tactfully. Similarly, the powerful moon certainly comes under ones control by and by. 8.

एतस्मिन् कुलिशाब्जयोगनिरतादादौ लयो जायते
रागादिन्द्रियदन्तिनां लयवशात्[9] संवित्तिरप्यूर्जिता ॥

---

1. दयेलयस्य -a. 2. तद्वारसेन्द्र —b. 3. विपत् —a. 4. विनिवारपरंयति –b. 5. पुरुषो तमास्त --a. 6. गजेन्द्री –b. 7. रुपधात् –b. 8. वशम् —a. 9. दन्तितालुयवशात् — b.

अन्तर्लीनमहारसद्रवजुषां नृणां च चेतोलयाद्
आविर्भावमुपैत्यमन्दसहजानन्दछलेन्दूदयः[1] ॥ ९ ॥

etasmin kuliśābjayoganiratādādau layo jāyate
rāgādindriyadantināṃ layavaśāt saṃvittirapyūrjitā ॥
antarlīnamahārasadravajuṣāṃ nṛṇāṃ ca cetolayād
āvirbhāvamupaityamandasahajānandachalendūdayaḥ ॥ 9 ॥

Tr. At this *cakra*, in the beginning, through the practice of *yoga* on the lotus the state of *laya* (absorption) supervenes and as a result of control gained through *laya*, the forceful senses are withdrawn like an elephant is controlled with a goad, from the objects of attachment which results in attainment of the state of *saṃvitti* (state of *samādhi*). Those who are absorbed in the internal flow of the great nectar makes the *cetas* absorbed (in it). To them the supreme Blissful state of *sahaja (samādhi)* shines like a shining moon. 9.

अपानचन्द्रस्थिति[2]चक्ररन्ध्रे धत्ते यदाभ्यासगुरूक्तयुक्त्या ।
योगी तदाऽस्तद्रव[3]मूर्तिरिन्दुररोगता बिन्दुमनोजयौ स्तः ॥ १० ॥

apānacandrasthiticakrarandhre
dhatte yadābhyāsagurūktayuktyā ॥
yogī tadā'stadravamūrtirindur-
arogatā bindumanojayau staḥ ॥ 10 ॥

Tr. Through an advanced practice, as guided by a teacher, a *yogī* holds the *apāna* and *candra* in the aperture of this *cakra*, thus preventing the flow of the nectar from moon and he enjoys good health and he controls *bindu* and *manas*. 10.

॥ इति हठतत्वकौमुद्यां
स्वाधिष्ठानचक्रोद्योतः ॥

॥ iti haṭhatatvakaumudyāṃ svādhiṣṭhānacakrodyotaḥ ॥

Here ends the chapter describing *svādhiṣṭhānacakra* in *haṭhatatvakaumudī*.

---

1. छलेदूदयः —b. 2. चन्द्रांस्थिति –b. 3. तदाऽतद्रव –b.

Chapter—27

अथ मणिपूरकं चक्रम् —

atha maṇipūrakaṃ cakram—

Description of *maṇipūracakra* follows—

नाभिस्थं मणिपूरकं दशदलं१० नीलाञ्जनाभैर्युतं
डावर्णैर्दलगैश्च[1] बिन्दुसहितैर्युक्तं श्रिया[2] विष्णुना ॥
प्राप्ता[3] भूरिह दक्षिणाग्नि[4]रनिलोऽस्यर्षिश्च[5] वाङ् मध्यमा
स्वप्नावस्थितिलिंगदेहयुगिदं सारूप्यमोक्षास्पदम् ॥ १ ॥

nābhisthaṃ maṇipūrakaṃ daśadalaṃ10 nīlāñjanābhairyutaṃ
ḍāvarṇairdalagaiśca bindusahitairyuktaṃ śriyā viṣṇunā ॥
prāptā bhūriha dakṣiṇāgniranilo'syarṣiśca vāṅ madhyamā
svapnāvasthitiliṅgadehayugidaṃ sārūpyamokṣāspadam ॥ 1 ॥

Tr. *maṇipūra* of ten petals, blue in colour, is located at the navel, adorned by the letters from *ḍa (ḍaṃ, ḍhaṃ, ṇaṃ; taṃ, thaṃ, daṃ, dhaṃ, naṃ, paṃ, phaṃ)* on the petals with the nasalized sound, presided over by *lakṣmī* and *viṣṇu*. Here *dakṣiṇāgni* is related to earth, *anila* the *ṛṣi*, *vāk* (speech) is *madhyamā*, It is in the state of sleep, related to the causal body (*liṅgadeha*), and it offers *sārūpya* (unification) and emancipation. 1.

मणिपूरे उकारः स्यात्सत्वमुड्डीयनं तथा ।
लाकिन्या युग्यजुश्रुत्या वाहनं गरुडो भवेत् ॥ २ ॥[6]

maṇipūre ukāraḥ syātsatvamuḍḍīyanaṃ tathā ।
lākinyā yugyajuśrutyā vāhanaṃ garuḍo bhavet ॥ 2 ॥

Tr. *ukāra* (the letter *u*) is located in *maṇipūra*. *prāṇa* rises upwards from here, deity *lākinī* presides over here, *yajurveda* is the *śruti* and *garuḍa* is the vehicle. 2.

मणिपूरे दशदले१० नाभिस्तत्र षडस्रकः[7] ।
तत्राऽर्कवलयान्तस्थतनुदीप[8]शिखान्तरे ॥ ३ ॥
महाविष्णुः परं ज्योतिरणुः तिष्ठति सूर्याभः[9] ।
स्थितौ वालात्र त्रिपुरा[10]शक्तिः सर्वेप्सितार्थदा ॥ ४ ॥

---

1. डाघर्णैदलगैश्च –b. 2. म्रिया –b. 3. शप्ता b. 4. भूमिरहदक्ष्यिणाग्नि –a. 5. स्पर्शिश्च –b. 6. अनुपलब्धश्लोकः —b. 7. नाभिस्वत्रषड्ऽस्रकः —b. 8. तनुदीपा –b. 9. सूर्यभः —b. 10. चिपुरा –b.

maṇipūre daśadale10 nābhistatra ṣaḍasrakaḥ ।
tatrārkavalayāntasthatanudīpaśikhāntare ॥ 3 ॥
mahāviṣṇuḥ paraṃ jyotiraṇuḥ tiṣṭhati sūryābhaḥ ।
sthitau vālātra tripurāśaktiḥ sarvepsitārthadā ॥ 4 ॥

Tr. *maṇipūra* with ten petals, which is at the navel which has six angles, there in the orb of the sun in the body of the flaming light, subtle *mahāviṣṇu* is located who is as bright as sun which is all illumining. Herein is the young goddess *tripurāśakti* who fulfills all desires. 3-4.

Note: According to *ṣaṭcakra-nirūpaṇa* the shape of *maṇipūra* is described as triangular and that of *anāhata* hexagonal. However, *sundaradeva* mentions the shape of *maṇipūra* as hexagonal but does not describe the shape of *anāhata*. 3-4.

धातुर्वादसुसिद्धयः[1] कलयति च द्राक् सिद्ध[2]सम्भाषणम्
वश्याकर्षणं निर्विषीकरणपूः[3] क्षोभादिकं[4] धत्तेऽपि च ॥
तेजस्वी शुभयोगसौख्यनिरतः स्यादत्र सत्साधको
अभ्यासाधिक्यतयाभितो हततमाः सत्वप्रकाशाद् भुवि ॥ ५ ॥

dhāturvādasusiddhayaḥ kalayati ca drāk siddhasambhāṣaṇam
vaśyākarṣaṇaṃ nirviṣīkaraṇapūḥ kṣobhādikaṃ dhatte'pi ca ॥
tejasvī śubhayogasaukhyanirataḥ syādatra satsādhako
abhyāsādhikyatayābhito hatatamāḥ satvaprakāśād bhuvi ॥ 5 ॥

Tr. One gains mastery over alchemy, get the ability to converse with the *siddhas*, exerts influence on others, detoxification, (can manage with) disturbances of emotions. Remaining devoted to auspicious *yoga*, a sincere *sādhaka* becomes lustrous. Through a pronounced practice he dispels ignorance and enjoys all-round *satva*. 5.

स्थानेऽस्मिन्निहितात्मनः सुकृतिनः पातालसिद्धिः परा
खड्गस्याप्रतिमस्य[5] साधनमपि स्यादीप्सितं च क्षितौ ॥
रूपं भूमिविसर्जनं परपुरे शक्तिः प्रवेष्टुं जरा-
हानिं चाखिलदुःखरोगशमनं कालस्य वा वञ्चनम् ॥६॥

---

1. सिद्धिपः —a. 2. चन्दसिद्ध –a. 3. करणयूः —b. 4. क्षोभाधिकं –a. 5. पराखद्वस्याऽप्रतिमस्य --a.

sthāne'sminnihitātmanaḥ sukṛtinaḥ pātālasiddhiḥ parā
khaḍgasyāpratimasya sādhanamapi syādīpsitaṃ ca kṣitau ॥
rūpaṃ bhūmivisarjanaṃ parapure śaktiḥ praveṣṭuṃ jarā-
hāniṃ cākhiladuḥkharogaśamanaṃ kālasya vā vañcanam ॥ 6 ॥

Tr. A fortunate one gains *pātālasiddhi* at this point, gains capacity to make use of an invaluable weapon through full concentration. One gains desired sources on this earth, a great look, levitation, capacity to enter in another body, removal of ailments and the entire range of suffering and overcomes (premature) death. 6.

गोरक्षः —
gorakṣa—
According to *gorakṣa* —-
तन्तुना मणिवत् प्रोतो यत्र कन्दः सुषुम्णया ।
तन्नाभिमण्डलं चक्रं[1] प्रोच्यते मणिपूरकम् ॥ इति ॥ ७ ॥
tantunā maṇivat proto yatra kandaḥ suṣumṇayā ।
tannābhimaṇḍalaṃ cakraṃ procyate maṇipūrakam ॥*iti*॥7॥

Tr. As a bead is strewn with a thread, similarly, *kanda* is pierced with *suṣumṇā*. This *cakra* at the navel is called *maṇipūra*. 7.

॥ इति हठतत्वकौमुद्यां मणिपूरचक्रोद्योतः ॥
॥ iti haṭhatatvakaumudyāṃ maṇipūracakrodyotaḥ ॥

Here ends the chapter describing *maṇīpūracakra* in *haṭhatatvakaumudī*.

1. मण्डलचक्र –b.

Chapter—28

अथ अनाहतचक्रम् —

atha anāhatacakram —

anāhatacakra—

हृद्देशेऽनाहताब्जं तरणि[1]दल१२युतं बाणलिंगास्पदं तद्
रक्तं रुद्रोऽस्य नाथो भवति परिगता भूमिकोमाथ शक्तिः ॥
प्राणो को गार्हपत्याऽनलसदन[2]मिदं सामवेदोऽस्ति वाचा
पश्यन्ती कारणाख्यं वपुरिह च सुषुप्तिर्दशा काकिनी[3] च ॥ १ ॥

hṛddeśe'nāhatābjaṃ taraṇidala12yutaṃ bāṇaliṅgāspadaṃ tad
raktaṃ rudro'sya nātho bhavati parigatā bhūmikomātha śaktiḥ ॥
prāṇo ko gārhyapatyā'nalasadanamidaṃ sāmavedo'sti vācā
paśyantī kāraṇākhyaṃ vapuriha ca suṣuptirddaśā kākinī ca ॥ 1 ॥

Tr. *anāhata* the lotus having 12 petals is situated in the heart region, which is the seat of *bāṇaliṅga* which is red in colour. *rudra* is its presiding deity who is along with *umā*-- his *śakti*, *prāṇa* is *vāyu*. *gārhapatya* is the fire. *sāma* is the *veda*, *paśyantī* is *vāk*. (Causal) is the body. *suṣupti* is the state and *kākinī* is the deity. 1.

ज्योतिः कलार्षिश्च[4] हिरण्यगर्भः सायुज्यता मुक्तिरिह प्रदिष्टा ।
सिद्धः पिनाकी च तमो गुणोऽत्र वर्णो[5] मकारो वृषवाहनं च ।२।

jyotiḥ kalārṣiśca hiraṇyagarbhaḥ
sāyujyatā muktiriha pradiṣṭā ॥
siddhaḥ pinākī ca tamo guṇo'tra
varṇo makāro vṛṣavāhanaṃ ca ॥ 2 ॥

Tr. *jyoti* (the light) is the *kalā*, *hiraṇyagarbha* is the *ṛṣi*, *sāyujyatā* is emancipation, *pinākī (śiva)* is the *siddha*, *tamas* is *guṇa*, *varṇa* (letter) is *ma*, bull is the vehicle. 2.

युग्मम् —

yugmam—

A *śloka* follows—

अधोमुखं यत्कमलमेतन्मध्येऽवलम्बते ।
जीवात्मा[6] विचरत्यत्र मनोवायुप्रचोदितः ॥ ३ ॥

---

1. ऽनाहताऽज्वंतराणि –b. 2. क्षदन a. 3. कारणाख्यं पुरिदृषुप्तिर्दशाकिनी –b. 4. कलाषिश्च –b. 5. कर्णो —b. 6. बीम्बात्मा –a.

adhomukhaṃ yatkamalametanmadhye'valambate ।
jīvātmā vicaratyatra manovāyupracoditaḥ ॥ 3 ॥

Tr. In this *cakra* lies the lotus facing downwards, wherein the *jīvātmā* moves being swayed by *manas* and *prāṇa*. 3.

अनाहते मारुततत्वभेदाद्
योगी स्वयं खेचरसिद्धिमेति ॥
स्वेच्छाविहारी खलु भूचरीं[1] च
सिद्धिं सुदूरश्रुतिदृक्[2] सुवित् स्यात् ॥ ४ ॥

anāhate mārutatatvabhedād-
yogī svayaṃ khecarasiddhimeti ॥
svecchāvihārī khalu bhūcarīṃ ca
siddhiṃ sudūraśrutidṛk suvit syāt ॥ 4 ॥

Tr. When *prāṇa* pierces *anāhata* a *yogī* attains *siddhis* like success in *khecarī*, movement at will on the earth, clairvoyance, clairaudience and omniscience. 4.

अनाहतारे यमिनः सुषुप्तेर्
दशां हि जीवाय ददाति शक्तिः ॥
ज्ञानात्मने स्यादिह धारणाख्यो
लयो मुनिः स्वेप्सितयान्त[3] आस्ते ॥ ५ ॥

anāhatāre yaminaḥ suṣupter-
daśāṃ hi jīvāya dadāti śaktiḥ ॥
jñānātmane syādiha dhāraṇākhyo
layo muniḥ svepsitayānta āste ॥ 5 ॥

Tr. The *yogīs* attain the state of *suṣupti* which energizes the *jīva* in this *anāhatacakra*, and a wise achieves the state of *laya* (absorption) named *dhāraṇā* here and remains in it at will. 5.

एतस्मिन्सततं निविष्टमनसः स्थाने विमानस्थिताः
क्षुभ्यन्त्यद्भुतरूपकान्तिकलिता दिव्यस्त्रियो[4] योगिनः ॥
ज्ञानं चाप्रतिमं त्रिकालविषयं क्षोभः पुरस्य श्रुतिर्
दूरादेवं[5] च दर्शनं च खगतिः[6] स्याद्योगिनी[7]मेलनम् ॥ ६ ॥

1. भूचरी –b. 2. श्रुतिदक –b. 3. स्वेप्सितयात –b. 4. दिव्यास्त्रियो –b. 5. दूरादेवचं –b. 6. स्वगतिः –b. 7. स्थायोगिनी –b.

etasminsatataṃ niviṣṭamanasaḥ sthāne vimānasthitāḥ
kṣubhyantyadbhutarūpakāntikalitā divyastriyo yoginaḥ ॥
jñānaṃ cāpratimaṃ trikālaviṣayaṃ kṣobhaḥ purasya śrutir
dūrādevaṃ ca darśanaṃ ca khagatiḥ syādyoginīmelanam ॥ 6 ॥

Tr. Through unswerving concentration on this (*cakra*) the *yogī* gets strong feelings in the celestial damsels in the space who are possessing exquisite charm and lustre. (The *yogīs)* attain, matchless wisdom encompassing three times (past, present and future), feeling of agitation towards the body, clairaudience, clairvoyance, moving in the space and contact with the *yoginīs*. 6.

इह ककारादिठकारान्तद्वादशसबिन्द्वक्षरयुक्तानि दलानि ॥

iha kakārādi-ṭhakārāntadvādaśasabindvakṣarayuktāni dalāni ॥

Tr. In this (*cakra*) there are twelve letters from *ka* to *ṭha* along with *bindu* (*m*) like *kaṃ, khaṃ, gaṃ, ghaṃ, ṅaṃ, caṃ, chaṃ, jaṃ, jhaṃ, ñaṃ, ṭaṃ, ṭhaṃ)* embossed on the petals.

गोरक्षः —

gorakṣaḥ

According to *gorakṣa* —

द्वादशारे महाचक्रे पुण्यापुण्यविवर्जिते ।
तावज्जीवो भ्रमत्येव यावत्तत्वं न विन्दति ॥ इति ॥ ७ ॥

dvādaśāre mahācakre puṇyāpuṇyavivarjite ।
tāvajjīvo bhramatyeva yāvattatvaṃ na vindati ॥ *iti* ॥ 7 ॥

Tr. In this great *cakra* of twelve spokes, which is beyond all that is pious or sinful, the *jīva* wanders till it attains the *tatva* (Self). 7.

॥ इति सुन्दरदेवविरचितायां
हठतत्वकौमुद्यामनाहतचक्रोद्योतः[1] ॥

॥ iti sundaradevaviracitāyāṃ
haṭhatatvakaumudyāmanāhatacakrodyotaḥ ॥

Here ends the chapter describing *anāhatacakra* of *haṭhatatvakaumudī* composed by *sundaradeva*.

1. चक्राद्योतः —b.

Chapter—29

अथ विशुद्धचक्रम् —

atha viśuddhacakram—

Description of ***viśuddhacakra***—

कण्ठस्थाने विशुद्धं भवति सरसिजं धूम्रवर्णं नरेन्द्र१६-
संख्या पत्रं च जालन्धर इह छगलण्डोऽस्ति सिद्धोऽथ देवः ॥
हंसोऽयं प्राणशक्त्या विलसति सततं शाकिनी देवतास्ते[1]
तुर्याऽवस्था विराट् स्यान्मुनिरथ च परा वाग[2]थर्वश्रुतिश्च ॥ १ ॥

kaṇṭhasthāne viśuddhaṃ bhavati sarasijaṃ dhūmravarṇaṃ narendra16-
saṃkhyā patraṃ ca jālandhara iha chagalaṇḍo'sti siddho'tha devaḥ ॥
haṃ'soyaṃ prāṇaśaktyā vilasati satataṃ śākinī devatāste
turyāvasthā virāṭ syānmuniratha ca parā vāgatharvaśrutiśca ॥ 1 ॥

Tr. The lotus of *viśuddha* located in the throat, smoky in colour, having 16 petals is the abode of *jālandhara* wherein there is god *chagalaṇḍa* as *siddha*, the *haṃsa* (swan) residing always with the vitality of *prāṇa*, *śākinī* the goddess, *turīya* is the state, *virāṭ* as *muni*, *vāk* is *parā* and *śruti* (*veda*) is *atharva*. 1.

ज्वाला कला जंगमलिंगमास्ते उदानवायुः समिता च भूमिका ।
सालोकता मोक्ष इह प्रदिष्टस्तथा[3] महाकारणदेह उत्तमः ॥ २ ॥

jvālā kalā jaṅgamaliṅgamāste
udānavāyuḥ samitā ca bhūmikā ॥
sālokatā mokṣa iha pradiṣṭas-
tathā mahākāraṇadeha uttamaḥ ॥ 2 ॥

Tr. *jvālā* is *kalā*, *liṅga* is *jaṅgama*, *udāna* is *vāyu*, *samitā* is the *bhūmikā*, *sālokatā* is *mokṣa* (emancipation)—these are said to be here, and the *mahākāraṇa* (great causal body) is *deha*. 2.

विशुद्धचक्रेऽम्बरतत्वभेदात् प्राप्नोति योगी गुटिकादि[4]सिद्धिम् ।
क्रोधादिलैन्यात्परिवृद्ध[5]सत्वः कायेऽक्षयः सृष्टिविकम्पनः[6] स्यात् ।३।

---

1. देवतांस्ते –a. 2. परावागः —b. 3. प्रदिष्टस्तव्या –b. 4 . पुटिकादि –b. 5. परिवृध –b. 6. विकम्पन —a.

viśuddhacakre'mbaratatvabhedāt
prāpnoti yogī guṭikādisiddhim ॥
krodhādilainyātparivṛddhasatvaḥ
kāye'kṣayaḥ sṛṣṭivikampanaḥ syāt ॥ 3 ॥

Tr. A *yogī* by piercing the *ākāśatatva* in the *viśuddhacakra* attains the *guṭikāsiddhi* etc. (alchemy solidifying mercury). Moreover, by subjugating anger etc. the *satva* is increased, the body becomes imperishable, and one gains the power to move the world. 3.

अभ्यासयोगादिह सन्निविष्टस्वान्तस्य शश्वन्नरपुंगवस्य ।
समर्थता स्यादनधीतशास्त्रसद्भावभावे वसुधातलेऽस्मिन् ॥ ४ ॥

abhyāsayogādiha sanniviṣṭa-
svāntasya śaśvannarapuṅgavasya ॥
samarthatā syādanadhītaśāstra-
sadbhāvabhāve vasudhātale'smin ॥ 4 ॥

Tr. (In *viśuddhacakra*) a great *yogī* through consistent practice of *yoga* becomes established in his own Self. He gains the ability in this world to reproduce the scriptures which are not studied. 4.

स्थानेऽत्र संसक्तमना मनुष्यस्त्रिकालदर्शी विगताधिरोगः[1] ।
जित्वा जरामञ्जनं[2] नीलकेशः क्षितौ चिरं जीवति वीतमृत्युः ॥५॥

sthāne'tra saṃsaktamanā manuṣyas-
trikāladarśī vigatādhirogaḥ ॥
jitvā jarāmañjanaṃ nīlakeśaḥ
kṣitau ciraṃ jīvati vītamṛtyuḥ ॥ 5 ॥

Tr. At this point (*cakra*) the man with a poised mind, knows (the events of) three times and overcomes diseases. By controlling old age, maintaining black hair he lives long on this earth overcoming (premature) death. 5.

इह स्थाने चित्तं सततमवधायात्तपवनो[3]
यदि क्रुद्धो योगी चलयति समस्तं त्रिभुवनम् ॥

---

1. विगताधिवेगः —b. 2. जयमजन —b. 3. सन्ततमवधायातपवनो —a.

न च ब्रह्माविष्णुः न च हरिहयो नैव[1] खमणिस्
तदीयं सामर्थ्यं शमयितुमलं नापि गणपः[2] ॥ ६ ॥

iha sthāne cittaṃ satatamavadhāyāttapavano
yadi kruddho yogī calayati samastaṃ tribhuvanam ॥
na ca brahmāviṣṇuḥ na ca harihayo naiva khamaṇis
tadīyaṃ sāmarthyaṃ śamayitumalaṃ nāpi gaṇapaḥ ॥ 6 ॥

Tr. At this point one should focus the mind continuously by controlling *prāṇa.* If the *yogī* gets angry, the three worlds shake. Even *brahmā, viṣṇu, indra, sūrya (khamaṇi*—sun), or *gaṇapa (śiva)* would not be able to pacify his anger (power). 6.

इह अकारादि[3]स्वरैर्दलपरिगतं तद्यथा अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं[4] एं ऐं ओं औं अं अः ॥

iha akārādisvarair-dalaparigataṃ tadyathā aṃ āṃ iṃ īṃ uṃ ūṃ ṛṃ ṝṃ lṛṃ lṝṃ eṃ aiṃ oṃ auṃ aṃ aḥ ॥ 6 ॥

Tr. The vowels adorning the petals are—*aṃ āṃ iṃ īṃ uṃ ūṃ ṛṃ ṝṃ lṛṃ lṝṃ eṃ aiṃ oṃ auṃ aṃ aḥ.* 6.

इति षोडशस्वरयुक्तम् ॥

iti ṣoḍaśasvarayuktam ॥

These are the sixteen vowels.

॥ इति हठतत्वकौमुद्यां विशुद्धचक्रोद्योतः ॥ ५ ॥

॥ iti haṭhatatvakaumudyāṃ viśuddhacakrodyotaḥ ॥

Here ends the chapter on *viśuddhacakra* in *haṭhatatvakaumudī.*

---

1. नैवं -b. 2. मलनापिगणयः —a. 3. श्रकायदि -b. 4. लृं ॡं– not available-b.

Chapter –30

अथ आज्ञाचक्रम् —

atha ājñācakram—

Description of *ājñācakra* is as follows—

चक्राणामिति पञ्चकावधि मुनावास्ते विकारस्य हा[1]
संस्कारोत्थ[2]लवोत्तरोत्तरलयात् स्याज्जाग्रदादित्रयम्[3] ॥
यद्वत्तुर्यगतं[4] न बाधत इहैवं भ्रवन्तरे लीनतां
चित्तं याति विकारशून्यमुपसर्गे तं वशीकारतः ॥ १ ॥

cakrāṇāmiti pañcakāvadhi munāvāste vikārasya hā
saṃskārotthalavottarottaralayāt syājjāgradāditrayam ॥
yadvatturyagataṃ na bādhata ihaivaṃ bhrvantare līnatām
cittaṃ yāti vikāraśūnyamupasarge taṃ vaśīkārataḥ ॥ 1 ॥

Tr. In a *yogī*, elimination of impurities occurs upto the fifth of the *cakras*, wherein the three states of consciousness i.e. *jāgrat, svapna* and *suṣupti* take place here and the latent impression diminish gradually. On attainment of the fourth state *(turya)* the *citta* merges between the eyebrows *(ājñācakra)* and through controlling the obstacles, the impurities are removed. 1.

यथा यथोर्ध्वं व्रजति क्रमेण ग्रन्थीन् विभिद्याऽभ्यसनातियोगतः[5] ।
योगी तथा ज्ञानसुसत्वधीमान् स्यादुन्मनीं[6] याति विकारशून्यः ।२।

yathā yathordhvaṃ vrajati krameṇa
granthīn vibhidyā'bhyasanātiyogataḥ ॥
yogī tathā jñānasusatvadhīmān
syādunmanīṃ yāti vikāraśūnyaḥ ॥ 2 ॥

Tr. As the *yogī* gradually moves up piercing the *granthis* through intense practice, the wise who is free from disturbances and is equipped with the wisdom of the self attains the state of *unmanī* which is immutable. 2.

आज्ञाब्जं भ्रूयुगान्ते दहनपतियुतं[7] हंसचैतन्यशून्यैर्
जीवस्थानं द्विमात्रं द्विदलमनुपमा वाक् च शक्तिः[8] सुषुम्णा ॥

---

1. विकारस्पृ –b. 2. संकारोत्थ –b. 3. ज्जगदादित्रयं –b. 4. यद्वतुर्यगतं –a. 5. भ्यसनानियोगतः —b. 6. स्यादुन्मनो –b. 7. इह नयति युतं –a. 8. वस्वचशक्तिः —b.

साम श्रुत्यऽर्धमात्रा विमलमणिसमे ज्ञानदेहः प्रसाद-
लिंगं विज्ञानपन्था[1] विलसति सबिलेऽस्मिन्निरालम्बयोगः[2] ॥ ३ ॥

ājñābjaṃ bhrūyugānte iha nayati yutaṃ haṃsacaitanyaśūnyair
jīvasthānaṃ dvimātraṃ dvidalamanupamā vāk ca śaktiḥ suṣumṇā
sāma śrutya'rdhamātrā vimalamaṇisame jñānadehaḥ prasāda-
liṅgaṃ vijñānapanthā vilasati sabile'sminnirālambayogaḥ ॥ 3 ॥

Tr. The lotus of *ājñā* at the center of the eyebrows which leads to the union of *haṃsa, caitanya* (consciousness) and *śūnya* (void) which is the place of *jīva*, fire adorned with two syllables and two petals, where the *vāk* is *anupamā, śakti* is *suṣumṇā*, the *śruti* (*veda*) being *sāma*, syllable is half (*anusvāra*), which shines like a pure jewel *(maṇi)*, wisdom as the body, *prasāda* the *liṅga*, the path being *vijñāna*, the *nirālaṃbayoga* is accomplished and flourishes here. 3.

आकाशतत्वं प्रविभाति दिव्यं सिद्धो महाकाल इहास्ति दिव्यः ।
देवी सदा रक्षति हाकिनीदं विश्वेश्वरक्षेत्रमियं हि काशी ॥ ४ ॥

ākāśatatvaṃ pravibhāti divyaṃ
siddho mahākāla ihāsti divyaḥ ॥
devī sadā rakṣati hākinīdaṃ
viśveśvarakṣetramiyaṃ hi kāśī ॥ 4 ॥

Tr. The element of *ākāśa*, which is divine, gleams here. The divine *mahākāla* as *siddha* dwells here. The goddess *hākinī* always protects it. This is *kāśī*, the abode of *viśveśvara*. 4.

ब्रह्मार्गलद्वारमिदं यदुक्तमाज्ञाख्यचक्रं गिरिशेन सिद्धिदम् ।
तद्द्वारमध्ये रसनां[3] विधाय योगी यदा याति सुधां तदामरः ।५।

brahmārgaladvāramidaṃ yaduktam-
ājñākhyacakraṃ giriśena siddhidam ॥
taddvāramadhye rasanāṃ vidhāya
yogī yadā yāti sudhāṃ tadāmaraḥ ॥ 5 ॥

Tr. This is the gateway to *brahma*-hood, which is called the *ājñācakra*, wherein *giriśa (śiva)* offers success (in *yoga*). A *yogī* who inserts the tip of the tongue inside this door (aperture) and sucks the ambrosia, becomes immortal. 5.

---

1. पथा -b. 2. स्मिन्निएलंवयोगः -b. 3. रसना -b.

केदारवैचूलिका भ्रूतलोर्ध्वं[1] प्रालेयाद्रेः शैत्यमस्मादुदेति[2] ।
तत्सारस्याप्लावनाद्रोगनाशो दुष्टो नासास्राव आयति यः सः ।६।

kedāravaicūlikā bhrūtalordhvaṃ
prāleyādreḥ śaityamasmādudeti ॥
tatsārasyāplāvanādroganāśo
duṣṭo nāsāsrāva āyati yaḥ saḥ ॥ 6 ॥

Tr. The aperture above the center of the eyebrows is known as *kedāra* wherefrom the rest of the snowy mountain — the cool flow (of nectar) oozes. Rhinitis is cured by the flow of this essence. 6.

अहो पिंगला नासिकान्तं गतोक्ता
तदूर्ध्वं हि धारा सुधायाः प्रधाना ॥
भ्रुवो ब्रह्मरन्ध्रान्तमुक्ताऽमरत्वे
तदर्थं पुरा[3] साधयेत् खेचरीं ताम् ॥ ७ ॥

aho piṅgalā nāsikāntaṃ gatoktā
tadūrdhvaṃ hi dhārā sudhāyāḥ pradhānā ॥
bhruvo brahmarandhrāntamuktā'maratve
tadarthaṃ purā sādhayet khecarīṃ tām ॥ 7 ॥

Tr. *piṅgalā* extends upto the edge of the nose, above which the prime nectar flows. From the eyebrows upto *brahmarandhra* is the location of immortality, where one should practice *khecarī* first. 7.

विषवाहः पिंगलाया[4]मिडायां सुधया समः ।
नाभ्यासः सूर्यवाहे सच्चन्द्रवाहे स शस्यते ॥ ८ ॥

viṣavāhaḥ piṅgalāyāmiḍāyāṃ sudhayā samaḥ ।
nābhyāsaḥ sūryavāhe saccandravāhe sa śasyate ॥ 8 ॥

Tr. Toxin flows through *piṅgalā*, while ambrosia flows through *iḍā*. Therefore, one should not practise when *sūryanāḍī* (right nostril) is active, practice through *candranāḍī* (left nostril) when active is beneficial. 8.

धारणाच्चन्द्रवाहे च योगी कुम्भकमाचरेत् ।
शशिवाहे तु पवनं पूरयेदात्मनस्तनुम् ॥ ९ ॥

dhāraṇāccandravāhe ca yogī kumbhakamācaret ।

---

1. भूतलोर्ध्वं –b. 2. शैत्यमूष्माददेति –b. 3. तदर्थपुग –b. 4. पिंगलाद्या –b.

śaśivāhe tu pavanaṃ pūrayedātmanastanum ॥ 9 ॥

Tr. A *yogī* should practise *kuṃbhaka* and *pūraka* when left nostril is active. 9.

रविवाहे न चोत्सर्गः शस्यते देहवृद्धये[1] ।
सुगुह्यमि[2]दमाख्यातं शिवेनाभ्यासिनां मुदे ॥ १० ॥

ravivāhe na cotsargaḥ śasyate dehavṛddhaye ।
suguhyamidamākhyātaṃ śivenābhyāsināṃ mude ॥ 10 ॥

Tr. For the growth of the body, excretion etc. is not recommended when right nostril is active. This is a great secret related by *śiva* for the success (pleasure) of the practitioners. 10.

आज्ञाख्यचक्रे भुवि चित्ततत्व-
सम्पूर्णभेदादखिलः विजित्य ॥
योगी शिवः केवल एव साक्षान्
मनोजयात् सर्वमिदं सुसिद्ध्येत्[3] ॥ ११ ॥

ājñākhyacakre bhuvi cittatatva-
sampūrṇabhedādakhilaḥ vijitya ॥
yogī śivaḥ kevala eva sākṣān-
manojayāt sarvamidaṃ susiddhyet ॥ 11 ॥

Tr. By completely piercing the element of *citta* at the *ājñācakra*, a *yogī* controls all on this earth and becomes *śiva* alone. By controlling the mind one achieves all success. 11.

तस्मादादौ योगिना चित्तभेदाभ्यासः सेव्यस्तदृते नास्ति सिद्धिः[4] ।
षट्चक्राणां चिन्तनं भेदबीजं प्राणायामाद्यैर्मनःस्थैर्यहेतुः ॥ १२ ॥

tasmādādau yogīnā cittabhedā-
bhyāsaḥ sevyastadṛte nāsti siddhiḥ ॥
ṣaṭcakrāṇāṃ cintanaṃ bhedabījaṃ
prāṇāyāmādyairmanaḥsthairyahetuḥ ॥ 12 ॥

Tr. Therefore, a *yogī* should undertake the practice of *cittabheda* (control of mind) without which there is no attainment of success. Contemplation on six *cakras* causes piercing of the *citta* (mind). Stability of mind is achieved through the practice of *prāṇāyāma*. 12.

---

1. देहवृधये –b. 2. सुगुप्तमि –b. 3. सुसिद्धयेत्—a. 4. सेव्यस्तद्वतेनास्तिसिधिः—b.

बकवदिह तु तूष्णीं[1] भावलब्धिर्न किञ्चिद्
दृतिवदुदरपूर्त्तौ[2] वायुना श्रान्तिरेव[3] ॥
विविधकरणबन्धैर्देहबन्धे[4] जगतां
न भवति हठसिद्धिश्चामनस्कं विनैषत् ॥ १३ ॥

bakavadiha tu tūṣṇīṃ bhāvalabdhirna kiñcid
dṛtivadudarapūrttau vāyunā śrāntireva ॥
vividhakaraṇabandhairdehabandhe jagatāṃ
na bhavati haṭhasiddhiścāmanaskaṃ vinaiṣat ॥13॥

Tr. Remaining quiet like a crane and not attaining any *bhāva* (state), filling the stomach with air like a bellows only results in fatigue. Practice of various *mudrās* and *bandhas* does not bring about even little success in *haṭha* without the state of *amanaska* (transcending the mind). 13.

आज्ञाचक्रेऽभियातो महित[5]शिवपदे ज्ञानदेहस्तु जीवः
शक्त्या मृत्युव्यपेतः[6] क्रमत उपगतान् मानसात् स्वास्पदे[7]ऽत्र ॥
आत्मा याति स्वरूपं विलयमथ गुणा धर्ममेघोदयेन[8]
शक्त्या लैन्यं श्मशाने कलयति पुरुषः स्वस्वरूपे स एकः ॥१४॥

ājñācakre'bhiyāto mahitaśivapade jñānadehastu jīvaḥ
śaktyā mṛtyuvyapetaḥ kramata upagatān mānasāt svāspade'tra ॥
āttmā yāti svarūpaṃ vilayamatha guṇā dharmameghodayena
śaktyā lainyaṃ śmaśāne kalayati puruṣaḥ svasvarūpe sa ekaḥ ॥ 14॥

Tr. On arrival at *ājñācakra*, the *jīva* transforms into *jñānadeha* (wisdom) and achieves the high state of *śiva*-hood. Gradually one overcomes (premature) death and mind through *śakti (kuṇḍalinī)* at this point and gets established in his own nature. On arousal of *dharmamegha* (state) attributes (*guṇas*) are eliminated and the *ātmā* realizes its nature. The *puruṣa* gets merged in *śmaśāna (sahasrāracakra)* through *śakti* and he establishes in his true form. 14.

इह दलयुग्मे हंसं वर्णद्वयं भवति पद्ममिदं तु श्वेतम् ।
ध्यानयोगनिरतस्य जायते पूर्वजन्मकृतकर्मणां स्मृतिः ॥

---

1. वकठदिहतुतूणी –b. 2. किंचिदतिवदुदरपूर्तौ –b. 3. वायुर्ना आति रवे –b. 4. वन्धर्देहबन्धे –b. 5. माहिन –b. 6. मृव्ययेन –b. 7. उपगतात्मानसात्स्वास्पदेऽ –b. 8. धर्मघोदयेन –b.

अत्र बिन्दुनिलये च[1] दूरतो दर्शनश्रवणयोः समर्थता[2] ॥ १५ ॥

iha dalayugme haṃsaṃ varṇadvayaṃ bhavati padmamidaṃ tu śvetam ।
dhyānayoganiratasya jāyate pūrvajanmakṛtakarmaṇāṃ smṛtiḥ ॥
atra bindunilaye ca dūrato darśanaśravaṇayoḥ samarthatā ॥ 15 ॥

Tr. Herein (in this *cakra*), in the pair of the petals of the white lotus the two *varṇas* (letters) *haṃ* and *saṃ* are embossed. Memory of the deeds in past lives appear to one who is engaged in meditation. In the abode of *bindu* here one gains clairvoyance and clairaudience. 15.

इह सन्निहितस्वचित्तवृत्तिः प्रतिमायाः परिजल्पनं करोति ।
गमनं च नरः पुरे परेषां पुनरुत्थापनमप्यहो[3] मृतस्य ॥ १६ ॥

iha sannihitasvacittavṛttiḥ
pratimāyāḥ parijalpanaṃ karoti ॥
gamanaṃ ca naraḥ pure pareṣāṃ
punarutthāpanamapyaho mṛtasya ॥ 16 ॥

Tr. By directing the mental modifications to this *cakra*, one converses inarticulately with the *pratimā* (divine bodies). One becomes able to enter another body and resurrect a dead body. 16.

निरालम्बां मुद्रां[4] निजगुरुमुखेनैव विदिताम्
इह स्थाने बद्ध्वा स्थिरनिशितधीः साधकवरः ॥
सदाभ्यासात् पश्यत्यमरनिलयानन्तरखिलाम्
उडुश्रेणीं[5] विष्णोरपि पदमुडूना[6]मधिपतिम् ॥ १७ ॥

nirālambāṃ mudrāṃ nijagurumukhenaiva viditām
iha sthāne baddhvā sthiraniśitadhīḥ sādhakavaraḥ ॥
sadābhyāsāt paśyatyamaranilayānantarakhilām
uḍuśreṇīṃ viṣṇorapi padamuḍūnāmadhipatim ॥ 17 ॥

Tr. At this point *(cakra)* one should adopt the *nirālamba mudrā* learning it from one's own *guru*, through firm and undeterred attention. A bona fide student, through consistent practice, sees the abode of the immortals (deities), the entire range of constellations, the abode of *viṣṇu* and the moon. 17.

---

1. व –b. 2. समर्थना –b. 3. परेषापुनस्त्थापनमप्यहो –b. 4. नियलम्बा मुद्रा –b. 5. मुदुश्रेणी –a. 6. पदमुड्ना –b.

आपातालं सत्यलोकान्तमत्र
लोकान् सर्वान्[1] वीक्षते साधकेन्द्रः ॥
अन्तःपृथ्वीमेरुमधींश्च[2] देवान्
यक्षान्नागान्मानवांश्चाद्भुतानि[3] ॥ १८ ॥

āpātālaṃ satyalokāntamatra
lokān sarvān vīkṣate sādhakendraḥ ॥
antaḥpṛthvīmerumadhīṅśca devān
yakṣānnāgānmānavāṅścādbhutāni ॥ 18 ॥

Tr. A *sādhaka* sees all the *lokas* (worlds) from *pātāla* (worlds underneath) upto the *satyaloka*. He also sees the deities, *yakṣas* (demigods), serpents, human beings and supernatural beings on and above the earth. 18.

एतस्मिन् परमाद्भुताव्ययमहानन्दैककन्दे परे[4]
स्थाने मानसमात्मनः स्थिरमतिः[5] संयोजयेन् मुद्रया ॥
योगी तन्मयतामुपैति शनकैश्चेतो निरालम्बया
पश्चान्नैजमहासुखं लयवशादाविर्भवन्त्यान्तरम् ॥ १९ ॥

etasmin paramādbhutāvyayamahānandaikakande pare
sthāne mānasamātmanaḥ sthiramatiḥ saṃyojayen mudrayā ॥
yogī tanmayatāmupaiti śanakaiśceto nirālambayā
paścānnaijamahāsukhaṃ layavaśādāvirbhavantyāntaram ॥ 19 ॥

Tr. In this *kanda*, which is highly astonishing, immutable and supreme Bliss, which also is the abode beyond, one having stabilized the mind, should focus the mind on it, through *nirālambamudrā*. The *yogī* gradually attains the state of absorption of the mind, which brings supreme Bliss to the self, which arises through absorption in due course of time. 19.

लीने चेतसि तत्र[6] विश्वनिलये वह्नेरिवादौ कणा
दृश्यन्तेऽन्तरनन्तरं च विलसद्रूपाः[7] प्रदीपांकुराः[8] ॥
बालस्येव दिवाकरस्य बहुलोद्योतस् ततो द्योतते[9]
यद्वा[10] भूगगनान्तरालविलसन् ज्योत्स्ना समर्थं महः ॥ २० ॥

1. लोकात्सर्गन –b. 2. मध्वीश्च –b. 3. मानवाश्चाऽद्दता –b. 4. महानन्दैकर्पदे –b. 5. स्थिरप्रतिः –b. 6. तन्त्र –b. 7. विलसदयाः –b. 8. प्रदीपांकुष –b. 9. द्योतत –b. 10. यदा –b.

līne cetasi tatra viśvanilaye vahnerivādau kaṇā
dṛśyante'ntaranantaraṃ ca vilasadrūpāḥ pradīpāṅkurāḥ ||
bālasyeva divākarasya bahulodyotas tato dyotate
yadvā bhūgaganāntarālavilasan jyotsnā samarthaṃ mahaḥ ||20||

Tr. On absorption of the mind in the Universal abode, one sees the subtle sparkling of the fire at intervals, glowing little lamps and many morning rising sun. Moreover, one sees illumination of moonlight everywhere from the earth to sky. 20.

नित्यानन्द इति श्रियः पतिरिति श्रीवासुदेवः पुमान्
आत्मेत्यच्युत इत्यचिन्त्य[1]महिमा यो गीयते योगिभिः ॥
स्थानेऽस्मिन् परमेश एव भगवान् व्यक्तो भवत्यव्ययः
साक्षीराहुरि[2]वान्तरान्तरगतश्चन्द्रार्कयोर्मण्डले[3] ॥ २१ ॥

nityānanda iti śriyaḥ patiriti śrīvāsudevaḥ pumān
ātmetyacyuta ityacintyamahimā yo gīyate yogibhiḥ ||
sthāne'smin parameśa eva bhagavān vyakto bhavatyavyayaḥ
sākṣīrāhurivāntarāntaragataścandrārkayormaṇḍale || 21 ||

Tr. That which is eulogized by the *yogīs* is this ever Blissful, *śrīpati, śrīvāsudeva, ātmā* or *acyuta.* At this place the immutable *parameśa* the God, who is unmanifest becomes visible, who is known as *sākṣī* (observer) and perceived at the center of the orb of sun and moon. 21.

विश्वस्यायतनं महद्भगवतः स्थानं तदेतत्परम्
यत्रारोप्य समीरणं सुकृतिनः प्राणप्रयाणोत्सवे ॥
दिव्यं तं परमं पुराणपुरुषं वेदान्तवेद्यं कविम्
विश्वाद्यं प्रविशन्ति सन्ततमहानन्दैककन्दं भुवि ॥ २२ ॥

viśvasyāyatanaṃ mahadbhagavataḥ sthānaṃ tadetatparam
yatrāropya samīraṇaṃ sukṛtinaḥ prāṇaprayāṇotsave ||
divyaṃ taṃ paramaṃ purāṇapuruṣaṃ vedāntavedyaṃ kavim
viśvādyaṃ praviśanti santatamahānandaikakandaṃ bhuvi || 22 ||

Tr. This stands to be the highest abode of *bhagavān* and also the source of the Universe. The great *yogīs* would direct *prāṇa* at this (point) at the time of leaving the (corporeal) body from this world and enter the divine supreme self, who is

1. इत्यर्चित्य –a. 2. साक्षीराहरि –b. 3. मण्डलेः –b.

puruṣa (primeval supreme being), realized through *vedānta*, is *kavi* (omniscient), the source of the Universe and who is source of the eternal Bliss. 22.

॥ इति हठतत्वकौमुद्यामाज्ञाचक्रोद्योतः ॥

॥ iti haṭhatatvakaumudyāmājñācakrodyotaḥ ॥

Here ends the chapter describing *ājñācakra* in *haṭhatatvakaumudī*.

अथ ब्रह्मरन्ध्रे[1] सहस्रदलकमलम् ॥

atha brahmarandhre sahasradalakamalam ॥

In *brahmarandhra* the lotus of thousand petals is located.

योनौ[2] भालसहस्रपत्रकमलान्ते महरूर्ध्वं[3] ततो
ब्रह्माण्डाख्यतनो[4]र्बहिर्विलसति श्र्यब्जां[5] सहस्रछदम् ॥
कैलासः स विमुक्तिदः शिवपदं चैतन्यशक्त्या गुरुः
स्वामी यत्र विराड् ऋषिः[6] स्थितिदशा वाणी परा यत्र[7] हि ।१।

yonau bhālasahasrapatrakamalānte maharūrdhvaṃ tato
brahmāṇḍākhyatanorbahirvilasati śryabjāṃ sahasrachadam ॥
kailāsaḥ sa vimuktidaḥ śivapadaṃ caitanyaśaktyā guruḥ
svāmī yatra virāḍ ṛṣiḥ sthitidaśā vāṇī parā yatra hi ॥ 1 ॥

Tr. At the center of the lotus of thousand petals in the forehead there lies the *mahar(-loka)* above which flourishes the *śrīkamala* having thousand petals representing the body called *brahmāṇḍa*. That is *kailāsa*, the abode of *śiva*, which offers emancipation through power of consciousness, wherein the *guru* is the *svāmī*, which has *virāṭ* as *ṛṣi*, *sthiti* (existence) is the state, where *vāk* is *parā*. 1.

तुर्यातीतः साक्षीः भूतश्चैतन्या[8]त्मा सोऽहं वेदः[9] ।
मात्रा वर्णाः सर्वा यत्रावल्यो[10] वैराट् देहोऽत्रास्ते[11] ॥ २ ॥

turyātītaḥ sākṣīḥ bhūtaścaitanyātmā so'haṃ vedaḥ ।
mātrā varṇāḥ sarvā yatrāvalyo vairāṭ deho'trāste ॥ 2 ॥

Tr. Here is the complete range of all these— state transcending the *turīya*, witness, *bhūta*, the conscious *ātmā*, *so'haṃ*, the *vedas*, the *mātrās*, *varṇas* (letters), the *virāṭ deha*. 2.

युग्मम् —

yugmam —

Here follows a *śloka*—

1. ब्रह्मरन्ध्र —b. 2. योनो —b. 3. मुरूर्ध्वं तनो —b. 4. तमो —b. 5. श्चत्वं —b. 6. वियदुषिः —b. 7. प्रजापत्र —a. 8. भूतश्चैतन्या —b. 9. सोहंदेवेदः —b. 10. यत्रांवल्यो —a. 11. वैयटहेहोऽत्रास्ते —b.

ब्रह्मरन्ध्रं सुषुम्णा भूरग्न्यागारे[1] ध्वनिर्महान् ।
ऊर्ध्वप्रयोग[2]मार्गोऽयं सुषुम्णावस्थितिस्त्विह ॥ ३ ॥

brahmarandhraṃ suṣumṇā bhūragnyāgāre dhvanirmahān
ūrdhvaprayogamārgo'yaṃ suṣumṇāvasthitistviha ॥ 3 ॥

Tr. *suṣumṇā* is *brahmarandrha* in which are situated *bhū (pṛthvī* —earth), *agni* (fire), *dhvni* and is the path of transcendence. 3.

शक्तिः सा मूलमाया शिव इह परमं दैवतं पीतवर्णम्[3]
वाक्चित्तागोचरा ता[4] परमलयपदं निःप्रपञ्चं च शून्यम् ॥
संस्मरेन् मनसा तत्र भूमिं च चतुरस्रकम् ॥१३ ॥

jānvantaṃ bāhyagulphāntaṃ bhūsthānaṃ caraṇāditaḥ ।
iḍayā vāyumāpūrya bhūmisthānaṃ nirudhyatam ॥

saṃsmaren manasā tatra bhūmiṃ ca caturasrakam || 13 ||

Tr. From feet upto the outer ankles and the knees is the location of earth element. One should inhale through left nostril and hold *(prāṇa)* in the abode of earth element, while mentally concentrating on the earth (element) which is quadrangular in shape. 13.

इत्यादि पञ्चभूतानां धारणाप्रकारो ध्यानपूर्वकः प्रत्येकमिडया वायुपूरणपूर्वस्ततोऽपादिस्थानमूर्त्तिवर्णाक्षरादिः सिद्धान्तशेखरे द्रष्टव्यः ॥

ityādi pañcabhūtānāṃ dhāraṇāprakāro dhyānapūrvakaḥ pratyekamiḍayā vāyupūraṇapūrvastato'-pādisthānamūrtti-varṇākṣarādiḥ siddhāntaśekhare draṣṭavyaḥ ||

Tr. In this manner one should practise the five *dhāraṇās* on the five elements with full attention after inhaling through the left nostril and applying on the locations of *apas* (water element) etc., image (deity), *varṇa* (colour) and *akṣara* (letters). One may consult *siddhāntaśekhara* for this.

तत्तत्स्वेप्सितसिद्धिबीजमथ तत्तत्सिद्धिसंस्थं च तत्
तादात्म्यसुसंरामैर्जितमरुच्चित्तेन्द्रियो योगिराट् ॥
विष्णुं हृत्कमलान्तरेऽभिकलयेत्तद्धारणां धारयन्
तत्तत्स्वेप्सितसिद्धिमेति गतभीर्मुक्तिं स वीतस्पृहः ॥१४॥

tattatsvepsitasiddhibījamatha tattatsiddhisaṃsthaṃ ca tat
tādātmyasusaṃrāmairjitamaruccittendriyo yogirāṭ ||
viṣṇuṃ hṛtkamalāntare'bhikalayettaddhāraṇāṃ dhārayan
tattatsvepsitasiddhimeti gatabhīrmuktiṃ sa vītaspṛhaḥ || 14 ||

Tr. The secret of success in the desired *siddhis* is (imbued) in those respective points, which a *yogī* can explore for success through a concentrated effort by controlling *prāṇa*, mind and senses and by holding *viṣṇu* in the lotus of the heart and practising a particular *dhāraṇā*. Thus one becomes free from fear, liberated and relinquishes desires and attains desired goals. 14.

जितां जितां शनैः शनैः समारुहन् मुनीश्वरः ।
शमेत्यऽथान्यथा गदानुपैति भूमिरर्जिता ॥ १५ ॥

jitāṃ jitāṃ śanaiḥ śanaiḥ samāruhan munīśvaraḥ ।
śametya'thānyathā gadānupaiti bhūmirarjitā ॥ 15 ॥

Tr. A *muni* very gradually controls each step and attains peace. Otherwise, despite control gained on the *bhūmis* he contracts diseases. 15.

बीजात् संयमविषयसाक्षात्कारात्तु सिद्धयः ।
संयमस्वस्वविषयसाक्षात्कारनिमित्ततः ॥ १६ ॥

bījāt saṃyamaviṣayasākṣātkārāttu siddhayaḥ ।
saṃyamasvasvaviṣayasākṣātkāranimittataḥ ॥ 16 ॥

Tr. Realization of the subject of *saṃyama* through *bīja* (essence) leads to *siddhis* (success). Moreover, success is gained by realizing the respective object of *saṃyama*. 16.

क्रमाद्धीनमध्योत्तमं चित्तरोधं मुनेः कुर्वतः संयमैः पक्तितुल्यम् ।
अतीतादिसाक्षात्कृतौ ज्ञानमीड्यं भवेन्निर्विचारे स्युरस्योपसर्गाः ।१७।

kramāddhīnamadhyottamaṃ cittarodhaṃ
muneḥ kurvataḥ saṃyamaiḥ paktitulyaṃ ॥
atītādisākṣātkṛtau jñānamīḍyaṃ
bhavennirvicāre syurasyopasargāḥ ॥ 17 ॥

Tr. A *muni* controls *citta* with *saṃyama* till its maturity while indulging in an orderly practice of inferior, mediocre and superior practices. Thus he perceives the past (life) etc. and acquires higher wisdom in the state of *nirvicāra* wherein he encounters the obstacles. 17.

निजपरिणतिकाले प्राप्तधर्मान्तरं यत्
तरुफलमिह मिष्टं प्राक्कषायं यथा स्यात् ॥
मलवृत्तिजचेतो मुक्तकाषायमच्छं
कलयति शुभसिद्धोः सन्निरोधोऽस्य पाके ॥ १८ ॥

nijapariṇatikāle prāptadharmāntaraṃ yat-
taruphalamiha miṣṭaṃ prākkaṣāyaṃ yathā syāt ।
malavṛttijaceto muktakāṣāyamacchaṃ
kalayati śubhasiddhoḥ sannirodho'sya pāke ॥18॥

Tr. Transformation in the quality in due course of time makes a fruit sweet, which otherwise tastes astringent. Similarly, impure mental modifications are rid off like astringence, turning

it (mind) pure on maturity through restraint leading to success. 18.

मृच्चूर्णपिण्डः परिणामभेदैरनेकतां याति परीक्षिणोऽक्ष्णि ।
यथा तथा योगहुताशपक्वं पाकानुरूपा मन एति सिद्धिः ॥ १९ ॥

mṛccūrṇapiṇḍaḥ pariṇāmabhedair-
anekatāṃ yāti parīkṣiṇo'kṣṇi ॥
yathā tathā yogahutāśapakvaṃ
pākānurūpā mana eti siddhiḥ ॥ 19 ॥

Tr. It is observed that a lump of mud takes various shapes and forms due to transformation. Similarly, mind is transformed accordingly due to the fire of *yoga*. 19.

न ग्रन्थबाहुल्यधियाऽत्र सिद्धिसंघस्त्वनन्तः कथितो मुनीनाम् ।
आनन्त्य एजद्विषयप्रभेदभाजां यमादेरुपसर्ग एषः ॥ २० ॥

na granthabāhulyadhiyā'tra siddhi-
saṅghastvanantaḥ kathito munīnām ॥
ānantya ejadviṣayaprabheda-
bhājāṃ yamāderupasarga eṣaḥ ॥ 20 ॥

Tr. To avoid inflation of the size of the book we avoid elaboration. Otherwise, there are innumerable *siddhis* for the *munis*. For those who see many, the *siddhis* pose as obstacles in the practice of *yama*. There are many *siddhis* due to variation in the objects, which pose as obstacles in observance of the *yamas*. 20.

यः पञ्चघट्यात्मककाल उक्तः प्रवृत्तसज्ज्योतिरसावृतम्भरः ।
षड्भूमिकान्ते स्थिरचित्तवृत्तेऽत्र भूतेन्द्रियजेऽप्यशक्तिकः ॥२१॥

yaḥ pañcaghaṭyātmakakāla uktaḥ
pravṛttasajjyotirasāvṛtambharaḥ ॥
ṣaḍbhūmikānte sthiracittavṛtte'-
tra bhūtendriyaje'pyaśaktikaḥ ॥ 21 ॥

Tr. If one indulges in the practice for five *ghaṭikās*, one perceives light and is called *ṛtambhara*. At the end of six *bhūmikās*, one gains stability of the mind by gaining control over *bhūtas* (elements) and the senses making them powerless. 21.

शरीरमेतत् खलु पञ्चभूतात्मकं मरुत्पित्तकफावृते इह ।
सद्धारणां भूरि च कुर्वतोऽग्नौ नश्यन्ति सर्वे पवमानजा गदाः।२२।

śarīrametat khalu pañcabhūtā-
tmakaṃ marutpittakaphāvṛte iha ॥
saddhāraṇāṃ bhūri ca kurvato'gnau
naśyanti sarve pavamānajā gadāḥ ॥ 22 ॥

Tr. The (human) body is comprised of the five *bhūtas* (elements), which is further constituted of *marut* (*vāta*), *pitta* and *kapha*. One should abundantly practise auspicious *dhāraṇā* on *agni* (fire) which will burn all the diseases caused by fire. 22.

नश्यन्ति सर्वे कफजाश्च वातजाश्च द्राक् पार्थिवांशे ह्यथवा जलांशे
विधास्यतो धारणमेकचित्तस्त्रिदोषजा वा खलु वै अनिलांशे ॥२३॥

naśyanti sarve kaphajāśca vātajāś-
ca drāk pārthivāṅśe hyathavā jalāṅśe ॥
vidhāsyato dhāraṇamekacittas-
tridoṣajā vā khalu vai anilāṅśe ॥ 23 ॥

Tr. Moreover, all the diseases caused due to *kapha* (phlegm) and *vāta* humours or all the three humours effecting the elements of earth, water and air can soon be cured if one practises *dhāraṇā* with devotion. 23.

प्राणसंयमनतस्तु समस्ता वातपित्तकफजाः खलु रोगाः ।
शोणितोद्भवगदाः सुदृढा ये सम्प्रयान्ति सहसा विलयन्ते ॥२४॥

prāṇasaṃyamanatastu samastā
vātapittakaphajāḥ khalu rogāḥ ॥
śoṇitodbhavagadāḥ sudṛḍhā ye
samprayānti sahasā vilayante ॥ 24 ॥

Tr. Practice of *prāṇāyāma* indeed certainly removes all the ailments caused by *vāta*, *pitta* and *kapha* humours. The toxic fluids causing severe diseases (flowing) in the blood are also quickly overcome. 24.

पञ्चभूतधारणां समभ्यसेत्तु यः सदा ।
तस्य मृत्युभीः क्वचिन्न जायते युगक्षये ॥ २५ ॥

pañcabhūtadhāraṇāṃ samabhyasettu yaḥ sadā ।
tasya mṛtyubhīḥ kvacinna jāyate yugakṣaye ॥ 25 ॥

Tr. One who consistently practises *dhāraṇā* on the five *bhūtas* would not be frightened of (premature) death and lives long. 25.

वाशिष्ठे —

vāsiṣṭhe —

According to *vāśiṣṭha*—

सर्वासां शक्तीनां जवं तेजः प्रददाति शरीरे अष्टशक्तयः ।
तिष्ठन्ति तासां प्रधाना कुण्डली तस्याश्चलनेन सर्वाश्चलन्ति ।।इति।।२६।।

sarvāsāṃ śaktīnāṃ javaṃ tejaḥ
pradadāti śarīre aṣṭaśaktayaḥ ॥
tiṣṭhanti tāsāṃ pradhānā kuṇḍalī
tasyāścalanena sarvāścalanti ॥ *iti* ॥ 26 ॥

Tr. There are eight *śaktis* in the body which stimulate and give vigour to all the *śaktis* prominent of which is *kuṇḍalī*. Movement of *kuṇḍalī* moves all the *śaktis*. 26.

सर्वशक्तिजवप्रदा ।

sarvaśaktijavapradā ।

It enhances allround power.

पुर्यष्टकां पराख्यस्य जीवस्य प्राणनामिकाम् ।
विद्धि कुण्डलीनीमन्तरामोदयेव मञ्जरीम् ॥ २७ ॥

puryaṣṭakāṃ parākhyasya jīvasya prāṇanāmikām ।
viddhi kuṇḍalīnīmantarāmodayeva mañjarīm ॥ 27 ॥

Tr. One should know *kuṇḍalinī* named *prāṇa*, which energizes all the *śaktis* and which resides in the *puryaṣṭaka* (body) of *jīva* named *prāṇa*, awakening of which offers Bliss. 27.

तां यदा पूरकाभ्यासादापूर्य स्थीयते समम् ।
तदेति भैरवं स्थैर्यं तथा कायस्य पीनता ॥ २८ ॥

tāṃ yadā pūrakābhyāsādāpūrya sthīyate samam ।
tadeti bhairavaṃ sthairyaṃ tathā kāyasya pīnatā ॥ 28 ॥

Tr. If she (*kuṇḍalinī*) is stabilized by the practice of *pūraka* then alone one attains stability of *bhairava (śiva)* and the body becomes stout. 28.

यदा पूरकपूर्णोत्तरा यत प्राणमारुते ।

नीयते संविदेवोर्ध्वं सोढुं घर्मपरिश्रमः ॥ २९ ॥

yadā pūrakapūrṇottarā yata prāṇamārute ।

nīyate saṃvidevordhvaṃ soḍhuṃ gharmapariśramaḥ ।29।

Tr. After fully filling up of *prāṇa-vāyu* (followed by inhalation), consciousness is moved upwards and one experiences perspiration due to exertion. 29.

सर्पीव त्वरितैवोर्ध्वं याति दण्डोपमां गता ।

नाड्यः सर्वाः समादाय देहबद्धलतोपमाः ॥ ३० ॥

sarpīva tvaritaivordhvaṃ yāti daṇḍopamāṃ gatā ।

nāḍyaḥ sarvāḥ samādāya dehabaddhalatopamāḥ ॥ 30 ॥

Tr. Having been like a stick, she (*kuṇḍalinī)* moves up like a snake, involving all the *nāḍīs* in the body like a creeper. 30.

तदा समस्तमेवेदमास्नावयति देहकम् ।

नीरन्ध्रपवनापूर्णा भस्त्रेवाम्बुगता नरम् ॥ ३१ ॥

tadā samastamevedamāsnāvayati dehakam ।

nīrandhrapavanāpūrṇā bhastrevāmbugatā naram ॥ 31 ॥

Tr. Then all the channels of the body of a man fills with *prāṇa* like a bellows filled with water. 31.

इत्यभ्यासविलासेन योगेन व्योमगामिना ।

योगिनः प्राप्नुवन्त्युच्चैर्हीना इन्द्रदशामिव ॥ ३२ ॥

ityabhyāsavilāsena yogena vyomagāminā ।

yoginaḥ prāpnuvantyuccairhīnā indradaśāmiva ॥ 32 ॥

Tr. Thus the *yogīs* who are devoted to the *yoga* practice move in the space and attain the lofty as well as degraded (deprived) seat like that of *indra*. 32.

ब्रह्मनाडीप्रवाहेण शक्तिः कुण्डलिनी यदा ।

बहिरूर्ध्वं कपाटस्य द्वादशांगुलमूर्धनि ॥ ३३ ॥

brahmanāḍīpravāhena śaktiḥ kuṇḍalinī yadā ।

bahirūrdhvaṃ kapāṭasya dvādaśāṅgulamūrdhani ॥ 33 ॥

रेचकेन प्रयोगेण नाडीशतनिरोधिना ।

मुहूर्त्ते स्थितिमाप्नोति तदा व्योमगदर्शनम् ॥ ३४ ॥

recakena prayogeṇa nāḍīśatanirodhinā ।
muhūrte sthitimāpnoti tadā vyomagadarśanam ॥ 34 ॥

Tr. When *kuṇḍalinī-śakti* moves to the *brahmanāḍī* outside the opening twelve digits in the head. Practice of *recaka* for a *muhūrta* (48 minutes) blocks all the *nāḍīs* and one attains stability. Thus one perceives the entities in the space. 33-34.

विज्ञानादूरसंस्थेन बुद्धिर्नेत्रेण राघव ।
दृश्यन्ते व्योमगाः सिद्धाः स्वप्नवत् स्वार्थदा अपि ॥ ३५ ॥
vijñānādūrasaṃsthena buddhirnetreṇa rāghava ।
dṛśyante vyomagāḥ siddhāḥ svapnavat svārthadā api ।35।

Tr. O *rāghava* ! Through the internal eyes (*buddhi*) and through special wisdom one can perceive (the objects) at a remote place like the *siddhas* (adepts) who move in the space which is like a dream and which brings desired success. 35.

मुखाद् बहिर्द्वादशान्ते रेचकाभ्यासयुक्तितः ।
प्राणे चिरं स्थितिं नीते प्रविशत्यपरां पुरीम् ॥ ३६ ॥
mukhād bahirdvādaśānte recakābhyāsayuktitaḥ ।
prāṇe ciraṃ sthitiṃ nīte praviśatyaparāṃ purīm ॥ 36 ॥

Tr. During the practice of *recaka*, *prāṇa* is held for a long time twelve digits outside the mouth which enables one to enter into another body. 36.

सर्वथात्मनि तिष्ठेच्चेत् क्वाध्वोर्ध्वे गमागमौ
तज्जन्तोर्हीयते व्याधिरन्तर्मारुतरोधतः ॥
राज्यादिमोक्षपर्यन्ताः समस्ता एव सम्पदाः
देहानिलविधेयत्वसाध्याः सर्वस्य राघव ॥ इति ॥ ३७ ॥
sarvathātmani tiṣṭheccet kvādhvordhve gamāgamau
tajjantorhīyate vyādhirantarmārutarodhataḥ ॥
rājyādimokṣaparyantāḥ samastā eva sampadāḥ
dehānilavidheyatvasādhyāḥ sarvasya rāghava iti ॥ 37 ॥

Tr. O *rāghava* ! If one remains with the Self, there arises no occasion for upward or downward movements. Internal retention of *prāṇa* alleviates all the diseases. From the kingdom

to liberation all the wealth is achievable through the practice of *prāṇāyāma*. 37.

॥ इति सुन्दरदेवविरचितायां हठतत्वकौमुद्यां धारणानिरूपणोद्योतः ॥

॥ iti sundaradevaviracitāyāṃ haṭhatatvakaumudyāṃ dhāraṇānirūpaṇodyotaḥ ॥

Here ends the chapter narrating *dhāraṇā* in *haṭhatatvakaumudī* composed by *sundaradeva*.

Chapter—49

अथ ध्यानम् —

atha dhyānam —

dhyāna **follows—**

प्रोक्ता पुरा भूतजयाय धारणा ऋतम्भरप्रज्ञमुनेः सुयोगात् ।
भूतेन्द्रियाणां विजयी निरूप्यते ध्येयावलम्बाऽस्तभवप्रपञ्चः ॥१॥

proktā purā bhūtajayāya dhāraṇā
ṛtambharaprajñamuneḥ suyogāt ॥
bhūtendriyāṇāṃ vijayīnirūpyate
dhyeyāvalambā'stabhavaprapañcaḥ ॥ 1 ॥

Tr. Earlier, *dhāraṇā* has been narrated for gaining control on the *bhūtas* (elements). A *muni* who has attained *ṛtaṃbharā-prajñā*, who has gained control over *bhūtas* and senses and who has overcome the paraphernalia of the worldly affairs (for him the technique of *dhyāna* follows). 1.

शब्दादीनां सूक्ष्मतन्मात्रकं तु यावत् कर्णादीन्द्रिये पुरस्थितं स्यात्
तावद्देहे ध्यानमाहुर्मुनीन्द्रास्तेषां लैन्येषां दशा सा समाधिः ॥२॥

śabdādīnāṃ sūkṣmatanmātrakaṃ tu
yāvat karṇādīndriye purasthitaṃ syāt ॥
tāvaddehe dhyānamāhurmunīndrās-
teṣāṃ lainyeṣāṃ daśā sā samādhiḥ ॥ 2 ॥

Tr. According to the munis, so long as the subtle *tanmātrās* like sound etc. are heard in the ears in the body, it is called *dhyāna*. Complete absorption of all these leads to *samādhi*. 2.

अथ ध्यानलक्षणम् —

atha dhyānalakṣaṇam—

Now follows the characteristics of *dhyāna*—

तत्र सूत्रम् —

***tatra sūtraṃ*—**

A *sūtra* (of *pātañjali*) follows—

प्रत्ययैकतानता ध्यानम् ॥ इति ॥

pratyaikatānatā dhyānam ॥ *iti* ॥

Uninterrupted flow (of the mind) towards the (chosen) object (for meditation) is *dhyāna*.

प्रत्ययस्य एकतानता तत्वैकविषयः प्रवाहः ॥

pratyayasya ekatānatā tatvaikaviṣayaḥ pravāhaḥ ॥

Continuous flow of the mind faculty towards the object of meditation.

स च द्विविधः । विच्छिद्य विच्छिद्य ज्ञायमानः सन्ततश्चैति । तावुभौ ध्यानसमाधी भवतः । तदुभयं सर्वानुभवयोगिना दर्शितं चित्तैकाग्र्याद्यतो ज्ञानमुक्तं समुपजायते । तत्साधनमतो ध्यानं यथा बहूपदिश्यते ॥ ३ ॥

sa ca dvividhaḥ । vicchidya vicchidya jñāyamānaḥ santataścaiti । tāvubhau dhyānasamādhī bhavataḥ । tadubhayaṃ sarvānubhavayoginā darśitaṃ cittaikāgryādyato jñānamuktaṃ samupajāyate । tatsādhanamato dhyānaṃ yathā bahūpadiśyate ॥ 3 ॥

Tr. This is of two kinds—intermittent flow and continuous flow. Both of these become *dhyāna* and *samādhi*. Both are experienced by the *yogīs*. The above said knowledge is experienced through concentration of mind—as the technique of *dhyāna* is widely taught. 3.

विलीय प्रकृतिं कृत्स्नां सम्भवं व्यत्ययक्रमात् ।
परिशिष्टं च सन्मात्रं चिदानन्दं विचिन्तयेत् ॥ ४ ॥

vilīya prakṛtiṃ kṛtsnāṃ sambhavaṃ vyatyayakramāt ।
pariśiṣṭaṃ ca sanmātraṃ cidānandaṃ vicintayet ॥ 4 ॥

Tr. Absorb the entire *prakṛti* following the process of involution and meditate only on *cit* (conscious) and *ānanda* (Bliss), which alone is *cit* (eternal). 4.

ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना ।
सम्प्रज्ञातसमाधिः स्याद् ध्यानाभ्यासप्रकर्षतः ॥ इति ॥ ५ ॥

brahmākāramanovṛttipravāho'haṃkṛtiṃ vinā ।
samprajñātasamādhiḥ syād dhyānābhyāsaprakarṣataḥ॥*iti*॥ 5॥

Tr. With the intense practice of *dhyāna* on *brahma*-hood where there is complete absence of ego, is called *saṃ prajñāta samādhi*. 5.

स्कान्दे –

skānde—

According to *skanda(-purāṇa)* —

ध्यै चिन्तायां स्मृतो धातुः चिन्ता तत्वे सुनिश्चला ।

या तद्ध्यानमिति प्रोक्तं सगुणं निर्गुणं द्विधा ॥ ६ ॥

dhyai cintāyāṃ smṛto dhātuḥ cintā tatve suniścalā ।

yā taddhyānamiti proktaṃ saguṇaṃ nirguṇaṃ dvidhā6

Tr. The root '*dhai*' denotes *cintā* (to think). Absorption only in one thought is called *dhyāna*. This is of two types—*saguṇa* and *nirguṇa*. 6.

सगुणं सर्वभेदेन निर्गुणं केवलं मतम् ।

समन्त्रं सगुणं विद्धि निर्गुणं मन्त्रवर्जितम् ॥ इति ॥ ७ ॥

saguṇaṃ sarvabhedena nirguṇaṃ kevalaṃ matam ।

samantraṃ saguṇaṃ viddhi nirguṇaṃ mantravarjitam॥iti॥ 7।

Tr. *saguṇa* is on varied objects. While *nirguṇa* is (Absolute). With *mantra* it is *saguṇa*. Without *mantra*, it is *nirguṇa*. 7

विष्णुपुराणे –

viṣṇupurāṇe—

According to *viṣṇupurāṇa*—

तद्वति प्रत्ययैकाग्रसन्ततिर्या ऽन्यनिःस्पृहा ।

तद्ध्यानं प्रथमैः षड्भिरंगैः निष्पाद्यते नृप ॥ इति ॥ ८ ॥

tadvati pratyaikāgrasantatiryā 'nyaniḥspṛhā ।

taddhyānaṃ prathamaiḥ ṣaḍbhiraṅgaiḥ niṣpādyate nṛpa ॥ iti ॥ 8 ॥

Tr. When mind is unidirectionally absorbed in one object alone and is detached towards everything else, it is called *dhyāna* which, O king! is attained through (the practice of) the first six components (of *yoga*). 8.

भारते —

bhārate—

It has been said in *(mahā-) bhārata*—

पौनःपुन्येन तत्रैव विषये सैव धारणा ।
ध्यानाख्यं लभते राजन् समाधिमपि मे शृणु ॥ इति ॥ ९ ॥

paunaḥpunyena tatraiva viṣaye saiva dhāraṇā ।
dhyānākhyaṃ labhate rājan samādhimapi me śṛṇu ॥*iti*॥9॥

Tr. One repeatedly concentrates on one object which is called *dhāraṇā* which leads to *dhyāna*. O king! Now I narrate *samādhi*. 9.

यमादिधारणान्तानि षडंगानि ध्यानं
समाधिः शुभधारणा चेत्येतत् त्रयम् ॥
साध्ववलम्ब्य यत्नात् एकत्र सद्ध्येय
उमेश एतत् स्थूलादिमूर्त्तिक्रमतो विधेयम् ॥ १० ॥

yamādidhāraṇāntāni ṣaḍaṅgāni dhyānaṃ
samādhiḥ śubhadhāraṇā cetyetat trayam ॥
sādhvavalambya yatnāt ekatra saddhyeya
umeśa etat sthūlādimūrttikramato vidheyam ॥10॥

Tr. The six components from *yama* to *dhāraṇā* and three (components of) *dhāraṇā*, *dhyāna* and *samādhi*— are to be carefully adhered to on *umeśa (śiva)*. These three are practised together on gross idol to subtle objects in an orderly fashion. 10.

ध्यानं हरेर्वागीशस्य योजितं पूर्वं सगर्भेषु समाधिषूत्तमम् ।
स्थूलेति तं चित्तमनुक्रमेण हि शनैः सुसूक्ष्मां विशते च भूमिकाम्११

dhyānaṃ harervāgīśasya yojitaṃ
pūrvaṃ sagarbheṣu samādhiṣūttamam ॥
sthūleti taṃ cittamanukrameṇa hi
śanaiḥ susūkṣmāṃ viśate ca bhūmikām ॥ 11 ॥

Tr. In the preliminary course of practice of *sagarbha samādhi* the finest form of practice would be to properly meditate on *hari* and *vāgīśa*. Though this may be considered as gross practice, gradually the *citta* enters extremely subtle *bhūmikā* (state). 11.

गुरुप्रसादाद्यदि चेश्वरस्य वा विलोक्यते हृत्स्थितियोग्यता पुरा ।
सुसूक्ष्मभूमौ विनिवेश इष्यते स्थूलादिमूर्त्तौ न तदा स्थितिर्हिता१२

guruprasādādyadi ceśvarasya vā
vilokyate hṛtsthitiyogyatā purā ॥
susūkṣmabhūmau viniveśa iṣyate
sthūlādimūrttau na tadā sthitirhitā ॥ 12 ॥

Tr. By the grace of *guru* if the mind gains stability and perceives *īśvara*, it can enter from subtle to subtler levels. Then it is not desirable to continue concentration on gross idols etc. 12.

ध्येयावलम्बनेन हि वृत्तेरेकाग्रता परमा ।
तज्ज्ञैर्ध्यानं कथितं सम्प्रज्ञातः परः समाधिः सः ॥ १३ ॥

dhyeyāvalambanena hi vṛtterekāgratā paramā ।
tajjñairdhyānaṃ kathitaṃ samprajñātaḥ paraḥ samādhiḥ saḥ ॥ 13 ॥

Tr. The mind (it's modifications) becomes highly one pointed only when one sticks to the (one) object of *dhyāna*. This makes *dhyāna*. This further culminates into *saṃprajñāta samādhi*. 13.

सद्धारणान्तः खलु मध्यवर्त्ती प्रज्ञातनामा समयः समाधिः ।
ध्यानं तदुक्तं प्रहराष्टमानं स्थूलं तदन्ते शुभसिद्धयः स्युः ॥१४॥

saddhāraṇāntaḥ khalu madhyavarttī
prajñātanāmā samayaḥ samādhiḥ ॥
dhyānaṃ taduktaṃ praharāṣṭamānaṃ
sthūlaṃ tadante śubhasiddhayaḥ syuḥ ॥ 14 ॥

Tr. The intermediate time at the end of *dhāraṇā* is called *prajñāta-samādhi*. This is called *sthūla-dhyāna* which extends for eight *praharas*. This is followed by the auspicious *siddhis*. 14.

तथा चोक्तं दत्तात्रेयभगवता –

tathā coktaṃ dattātreyabhagavatā –

It has been maintained by *bhagavān dattātreya*-

समभ्यसेत्ततो ध्यानं घटिकाषष्टिमेव च ।
वायुं निरुध्य ध्यायेत्तु देवतामिष्टदायिनीम् ॥
सगुणध्यानमेवं स्यादणिमादिगुणप्रदम् ॥ इति ॥ १५ ॥

samabhyasettato dhyānaṃ ghaṭikāṣaṣṭimeva ca ।
vāyuṃ nirudhya dhyāyettu devatāmiṣṭadāyinīm ॥
saguṇadhyānamevaṃ syādaṇimādiguṇapradam ॥ *iti* ॥15॥

Tr. Thereafter, one should parctise *dhyāna* for sixty *ghaṭikās*, and by holding the *prāṇa*, the tutelary deity should be meditated upon. This forms *saguṇa dhyāna* which results in *siddhis* like *aṇimā* etc. 15.

तथा च भागवते एकादशे भगवद्वाक्यमुद्धवं प्रति –

tathā ca bhāgavate ekādaśe bhagavadvākyamuddhavaṃ prati –

It has been stated in the eleventh chapter of *bhāgavata* which is addressed to *uddhava* by *bhagavān*

मुनिर्म तादात्म्येन यां यां सिद्धिं भावयेत्तं तत्तत्सिद्धावहं योजयामि ॥ इति ॥ १६ ॥

munirma tādātmyena yāṃ yāṃ siddhiṃ bhāvayettaṃ tattatsiddhāvahaṃ yojayāmi ॥ *iti* ॥ 16 ॥

Tr. When one devotedly meditates on whichever *siddhi*, I bestow upon him that very particular *siddhi*. 16.

अतः सगुणध्यान एव सिध्युपसर्गा आविर्भवन्ति । संयमपरिणतौ कीटभृंगीन्यायेन यद्धारणं तत्तादात्म्यापत्तौ शुद्धस्फटिकार्ककरयोगयोरन्तरग्नेरिव निर्विचारादचेतो ज्ञानात्मशुद्धेश्वरयोः सोऽहंभावतादात्म्ये शुभसिद्धयः ॥ इति ॥ १७ ॥

ataḥ saguṇadhyāna eva siddhyupasargā āvirbhavanti । *saṃyamapariṇatau kīṭabhṛṅgīnyāyena yaddhāraṇaṃ tattādātmyāpattau śuddhasphaṭikārkakarayogayorantraragneriva nirvicārādaceto jñānātmaśuddheśvarayoḥ so'haṃbhāvatādātmye śubhasiddhayaḥ* ॥ *iti* ॥ 17 ॥

Tr. Therefore, in *saguṇa dhyāna*, *siddhis* appear in the form of obstacles. In the culmination of *saṃyama*, as per the logic of *kīṭa-bhṛṅgi*, on whichever (object) *dhāraṇā* is practised, the mind merges in the same form like a pure crystal placed in the sun which appears containing fire. When the mind attains the state of *nirvicāra* (no-thought), then alone the wisdom of the

pure Self and *īśvara* with *sohambhāva* (I am That) and auspicious *siddhis* arise. 17.

प्राथमिको धानुष्कः स्थूलं लक्ष्यं यथा पुरा विध्येत् ।
अनु सूक्ष्मं चाभ्यासात्तद्वत् स्थूलेऽन्वणीयसिद्धयः ॥ १८ ॥

prāthamiko dhānuṣkaḥ sthūlaṃ
lakṣyaṃ yathā purā vidhyet ॥
anu sūkṣmaṃ cābhyāsāttadvat
sthūle'nvaṇīyasiddhyaḥ ॥ 18 ॥

Tr. In the beginning an archer shoots at a gross object and afterwards the subtle one. Similarly, one should (meditate) on gross to the subtler (objects). 18.

सविषयमतिरम्यं ध्यानमादौ विधेयं
तदनु विषयहीने साधु निर्बीजमुक्तम् ॥
भृशमिति हृदयस्य स्थैर्यतो धैर्यवृत्ति-
सकलदुरितसंघा ध्यानतो यान्ति नाशम् ॥ १९ ॥

saviṣayamatiramyaṃ dhyānamādau vidheyaṃ
tadanu viṣayahīne sādhu nirbījamuktaṃ ॥
bhṛśamiti hṛdayasya sthairyato dhairyavṛtti-
sakaladuritasaṅghā dhyānato yānti nāśam ॥ 19 ॥

Tr. In the beginning, one should practise meditation *(dhyāna)* on objects which is very much enjoyable and thereafter, it is wise to meditate without object. (The later) is called *nirbīja*, repeated practice of which brings stability of the mind. Continuation of this meditation removes all the sufferings. 19.

प्रागुक्ताधारचक्रादिषु विशदमिदं ध्यानमग्र्यविधेयं
स्थित्वैकान्ते गुहायां नियमितपवनः सन्नियम्येन्द्रियाणि ॥
चित्तं संरुध्य हित्वा भवविषयसमस्ताः क्रियाः संविसृज्य
ध्येयैकाग्र्ये सुचित्ते भवति वरमुनौ सत्समाधिस्तदैव ॥ २० ॥

prāguktādhāracakrādiṣu viśadamidaṃ dhyānamagryavidheyaṃ
sthitvaikānte guhāyāṃ niyamitapavanaḥ sanniyamyendriyāṇi ॥
cittaṃ saṃrudhya hitvā bhavaviṣayasamastāḥ kriyāḥ saṃvisṛjya
dhyeyaikāgrye sucitte bhavati varamunau satsamādhistadaiva ॥20॥

Tr. As explained earlier, one should first meditate on *ādhāracakra* etc. while staying in a lonely place, like a cave. *prāṇāyāma* must be practised regularly by controlling the senses and the mind *(citta)* and by relinquishing all the mundane objects and activities. Only when a *yogī* is able to meditate with intense concentration (of *citta)*, then alone he attains the state of *samādhi*. 20.

समाधिनिष्पत्तिनिदानमुक्तं ध्यानं सबीजं सविकल्पकं यत् ।
यदैव निष्पत्तिभृशं समाधिः स्यात् स्वेच्छया योगिन एव आर्यः२१

saṃādhiniṣpattinidānamuktaṃ
dhyānaṃ sabījaṃ savikalpakaṃ yat ॥
yadaiva niṣpattibhṛśaṃ samādhiḥ
syāt svecchayā yogina eva āryaḥ ॥ 21 ॥

Tr. *sabīja* and *savikalpaka dhyāna* are the characteristics of *samādhi*. Only when the state of *samādhi* leading to *niṣpatti* happens on its own, this is called the (superior or) true state of *samādhi* of a *yogī*. 21.

तदा क्रियाशक्तिमरं सुचेतनां प्राणो गृहीत्वा भृशवेगवर्त्ती ।
निर्जित्य चक्राण्यखिलानि योगिनोऽसौ ज्ञानशक्तौ परिलीयतेऽनु ॥२२॥

tadā kriyāśaktimaraṃ sucetanāṃ
prāṇo gṛhitvā bhṛśavegavarttī ॥
nirjitya cakrāṇyakhilāni yogino' -
sau jñānaśaktau parilīyate'nu ॥ 22 ॥

Tr. *prāṇa*, which is forceful and speedy, takes *kriyāśakti* and *araṃ (cakra)* along with consciousness and controls all the *cakras* of a *yogī* which (*kriyāśakti)* subsequently merges in *jñānaśakti*. 22.

युग्मम् —

yugmam

A *śloka* follows—

तदारूढयोगिनः परावशिकारविवेकख्यातिपरिणतौ ॥
गुणान्तहेतुधर्ममेघसमाधिरसंप्रज्ञसमाधिप्राग्रूपघ्नाविर्भवति ।इति।२३।

tadārūḍhayoginaḥ parāvaśikāra-
vivekakhyātipariṇatau ॥
guṇāntahetudharmameghasamādhir-
asamprajñasamādhiprāgrūpaghnāvirbhavati ।*iti*23

Tr. Then for the *ārūḍha-yogī*, the culmination of the pair (of the states) i.e. *parā-vaśīkāra* and *vivekakhyāti* brings an end to *guṇas*, (and the following states such as) *dharmamegha samādhi* and *asamprajña samādhi* supervene. 23.

असम्प्रज्ञाते अस्मिन् विगलितविकल्पे भृशतरं
सदा ध्येयाकारं स्फुरति गतभेदं हृदि दृशिः ॥
न निद्रा नोन्विता स्मृतिरपि न वाचि स्मृतिरपि
चिदानन्दे मग्नस्य हि परसमाधौ प्रभवति ॥ २४ ॥

asamprajñāte asmin vigalitavikalpe bhṛśataraṃ
sadā dhyeyākāraṃ sphurati gatabhedaṃ hṛdi dṛśiḥ ॥
na nidrā nonvitā smṛtirapi na vāci smṛtirapi
cidānande magnasya hi parasamādhau prabhavati ॥ 24 ॥

Tr. In this (state of) *asamprajñāta*, *vikalpa* (mental constructions) is completely annihilated. Thus only object (of meditation) remains and in the heart and (all) discrimination is removed. He attains a state in which there is no sleep, no memory and no speech. One gets absorbed in the Bliss of consciousness and (the state of) Ultimate *samādhi* supervenes. 24.

तथा चोक्तं हठप्रदीपिकायाम् —

tathā coktaṃ haṭhapradīpikāyām —

It has been stated in *haṭhapradīpikā*—

यत्र दृष्टिर्लयस्तत्र भूतेन्द्रियसनातनः ।
न सा शक्तिर्भावभूतानां दृष्टे लक्षे क्षयं गता ॥ २५ ॥

yatra dṛṣṭirlayastatra bhūtendriyasanātanaḥ ।
na sā śaktirbhāvabhūtānāṃ dṛṣṭe lakṣe kṣayaṃ gatā ॥25॥

Tr. The interaction between the objects of perception and senses is eternal in the form of *śakti*. Therefore, on whatever the mind is fixed, it merges into it. 25.

वेदशास्त्रपुराणानि सामान्यगणिका इव ।
एकैव शाम्भवीमुद्रा सर्वतन्त्रेषु गोपिता ॥ २६ ॥

vedaśāstrapurāṇāni sāmānyagaṇikā iva ।
ekaiva śāmbhavī mudrā sarvatantreṣu gopitā ॥ 26 ॥

Tr. The *vedas, śāstras* and *purāṇas* are like public women. *śāṃbhavī mudrā* alone is kept a secret in all the scriptures. 26.

अन्तर्लक्षविलीनचित्तपवनो योगी यदा वर्त्तते ।
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ॥
मुद्रेयं खलु शाम्भवी भवति सा युष्मत्प्रसादात् गुरोः ।
शून्याशून्यविवर्जितं स्फुरति यत्तत्वं पदं शाम्भवम् ॥ २७ ॥

antarlakṣavilīnacittapavano yogī yadā varttate
dṛṣṭyā niścalatārayā bahiradhaḥ paśyannapaśyannapi ॥
mudreyaṃ khalu śāmbhavī bhavati sā yuṣmatprasādāt guroḥ
śūnyāśūnyavivarjitaṃ sphurati yattatvaṃ padaṃ śāmbhavam ।27।

Tr. When the *yogī* is in a state where both *citta* and *prāṇa* are merged in the internal object of concentration and the gaze is directed outwards but remains steady, seeing yet not seeing, that indeed is *śāṃbhavī mudrā*, which is received only by the fortunate ones by the grace of the *guru*, who bestows upon the state of *śāṃbhavī*, transcending both *śūnya* and *aśūnya*. 27.

तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद् भ्रुवौ
पूर्वयोगस्य मार्गोऽयमुन्मनीकरणं क्षणात् ॥ २८ ॥

tāre jyotiṣi saṃyojya kiñcidunnamayed bhruvau ।
pūrvayogasya mārgo'yamunmanīkaraṇaṃ kṣaṇāt ॥ 28 ॥

Tr. Direct the vision towards the (internal) *jyoti* (light) and raise the eye-brows a little. This is the pristine technique which brings about the state of *unmanī* . 28.

केचिदागमजालेन केचिन्निगमसंकुले ।
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम् ॥ २९ ॥

kecidāgamajālena kecinnigamasaṃkule ।
kecittarkeṇa muhyanti naiva jānanti tārakam ॥ 29 ॥

Tr. Some get bewildered by contradictory views available in the *āgamas* (scriptures), some by those expressed in the *nigamas*, others are perplexed by logic and reasoning. No one knows *tāraka* (the highest state of consciousness). 29.

अर्धोद्घाटितलोचनः स्थिरमना नासाग्रदत्तेक्षणः
चन्द्रार्कावपि लीनतामुपनयेन्निस्पन्दवाच्यं ततः ॥
ज्योतीरूपविशेषबाह्यरहितं देदीप्यमानं परं
तत्वं तत्परमस्ति वस्तु परमं वाच्यं किमत्राधिकम् ॥ इति ॥३०॥

ardhodghāṭitalocanaḥ sthiramanā nāsāgradattekṣaṇaḥ
candrārkāvapi līnatāmupanayennispandavācyaṃ tataḥ ॥
jyotīrūpaviśeṣabāhyarahitaṃ dedīpyamānaṃ paraṃ
tatvaṃ tatparamasti vastu paramaṃ vācyaṃ kimatrādhikaṃ ॥*iti*॥30॥

Tr. Keep the eyes half open and mind poised, fix the gaze on the tip of the nose, suspend the movement of both *iḍā* and *piṅgalā*, maintain the internal calm, visualize the Ultimate Reality as brightly shinning internal light. Thus, one attains the Absolute State of *tatva* (Self) beyond all material realms. What else remains to be said? 30.

इति निर्गुणध्यानमुद्रा ॥

iti nirguṇadhyānamudrā ॥

(Here ends) the technique of *nirguṇa-dhyāna.*

अथ सगुणध्यानमुद्रा –

atha saguṇadhyānamudrā —

Here follows the technique of *saguṇa-dhyāna*—

यथा –

yathā—

Which is—

अधः समास्थाप्य सुखासनं सदन्तर्मनोबाह्यनिरीहचक्षुः ।
समत्वमुच्चैर्वपुषस्तु यत्र सा ध्यानमुद्रा कथिता मुनीन्द्रैः ॥ ३१ ॥

adhaḥ samāsthāpya sukhāsanaṃ sad-
antarmanobāhyanirīhacakṣuḥ ॥
samatvamuccairvapuṣastu yatra
sā dhyānamudrā kathitā munīndraiḥ ॥ 31 ॥

Tr. Adopt *sukhāsana* (a comfortable posture) on the floor. Fix the eyes and withdraw the mind from the external objects and focus it internally. Keep the body steady and straight. The great *yogīs* know this as *dhyāna-mudrā* (meditation). 31.

योगचन्द्रिकायाम् —

yogacandrikāyām —

According to *yogacandrikā*—

अन्तश्चेतो बहिश्चक्षुर्बद्धस्थेव सुखासने ।
संमत्वं च शरीरस्य ध्यानमुद्रेति सिद्धिदः ॥ ३२ ॥

antaśceto bahiścakṣurbaddhastheva sukhāsane ।
samatvaṃ ca śarīrasya dhyānamudreti siddhidaḥ ॥ 32 ॥

Tr. Mind is internally tuned even though the eyes are fixed on an external object while one adopts *sukhāsana* which keeps the body straight. This is called *dhyānamudrā* which brings success. 32.

अन्तः अभ्यन्तरे । मनः बाह्यव्यापाररहितम् । चक्षुर्भ्रुवोरन्तरे संस्थाप्य । क्व सहीति सुखासने बद्धे सति । समत्वं शरीरस्य देहस्य ॥ ३३ ॥

antaḥ abhyantare । manaḥ bāhyavyāpārarahitam । cakṣurbhruvorantare saṃsthāpya । kva sahīti sukhāsane baddhe sati । samatvaṃ śarīrasya dehasya ॥ 33 ॥

Tr. *antaḥ* means internal.The *manas* (mind) is suspended of external activity. Eyes are fixed between the eyebrows and one adopts *sukhāsana*. *samatva* means steadiness of trhe body. 33.

शान्तिगुणत्वं केनापि प्रकारेण न विकृतिं याति शरीरम् ।
तच्छरीरसमत्वं स्थैर्यं स त्रैकालिकज्ञानकरं हि ॥ ३४ ॥

śāntiguṇatvaṃ kenāpi prakāreṇa na vikṛtiṃ yāti śarīram
taccharīrasamatvaṃ sthairyaṃ sa traikālikajñānakaraṃ hi34

Tr. One also keeps the body steady and at peace by not allowing any diviation of the body. Such a practice bestows upon knowledge of all three times (past, present and future). 34.

योगाभ्यासात्तथाध्यात्मिकबोधबीजकमुपाधिहान्या ।
भवति प्रयुक्तं ध्यानं हरेर्हीपवदज्ञाताद्यजित् ॥ ३५ ॥

yogābhyāsāttathādhyātmikabodhabījakamupādhihānyā ॥
bhavati prayuktaṃ dhyānaṃ harerddīpavadajñātādyajit ।35।

Tr. By removing the attributes through practice of *dhyāna* on *hari* in the course of *yoga* sows the seed of spiritual evolution. This enkindles wisdom like a lamp dispelling darkness of ignorance. 35.

बुद्धिप्रवाहरूपस्य ध्यानस्यास्यावलम्बनम् ।
ध्येयमित्युच्यते सद्भिस्तच्च साम्बः सदाशिवः ॥ ३६ ॥

buddhipravāharūpasya dhyānasyāsyāvalambanam ।
dhyeyamityucyate sadbhistacca sāmbaḥ sadāśivaḥ ॥36॥

Tr. The flow of consciousness makes the support for *dhyāna*. According to wise, continuation of this on *sadāśiva* along with *ambā* makes (the best) technique of *dhyāna*. 36.

ज्ञानवैराग्यसम्पन्नो नित्यमुद्रिक्तमानसः ।
श्रद्दधानः प्रसन्नात्मा ध्याता सद्भिरुदाहृता ॥ ३७ ॥

jñānavairāgyasampanno nityamudriktamānasaḥ ।
śraddadhānaḥ prasannātmā dhyātā sadbhirudāhṛtā ॥ 37 ॥

Tr. According to the wise, a practitioner of *dhyāna* is always endowed with wisdom, detachment, a poised mind, devotion and remains cheerful. 37.

.असम्प्रज्ञातपर्यन्तं परमेश्वरसंयमः ।
योगेऽनुकल्पो जीवात्मसंयमो विघ्नहेशधीः ॥ ३८ ॥

asaṃprajñātaparyantaṃ parameśvarasaṃyamaḥ ।
yoge'nukalpo jīvātmasaṃyamo vighnaheśadhīḥ ॥ 38 ॥

Tr. Till the state of *asaṃprajñāta* appears, one should practise *saṃyama* on *parameśvara*. This will help (developing) devotion and merger of *jīva* and *ātmā* (the embodied soul), which (empowers) the conscience to overcome obstacles and devotion to *īśa* (God). 38.

तथा चास्य मुखत्वं स्मर्यते । तस्मान्मुमुक्षोः सुमुखो मार्गः श्रीविष्णुसंश्रयः चित्तेन । चिन्तयानेन वञ्च्यते । ध्रुवमन्यथेति । तदेवमुपायप्रत्ययो व्याख्यातः ॥ ३९ ॥

tathā cāsya mukhatvaṃ smaryate । tasmānmumukṣoḥ sumukho mārgaḥ śrīviṣṇusaṃśrayaḥ cittena । cintayānena vañcyate । dhruvamanyatheti । tadevamupāyapratyayo hyākhyātaḥ ॥ 39 ॥

Tr. The significance of this is upheld. Therefore, for the one who is craving for liberation has the effective path of wholeheartedly surrendering to *śrīviṣṇu*. Thus one is saved from the worries. Therefore, *upāyapratyaya* (*yogic* techniques) has been narrated. 39.

असम्प्रज्ञातस्तु ध्येयाभावान्निरालम्बः ।
योगस्योत्तमाधिकारी योगारूढः ॥
स योगे उदात्त उच्यते ॥ ४० ॥

asamprajñātastu dhyeyābhāvānnirālambaḥ ।
yogasyottamādhikārī yogārūḍhaḥ ॥
sa yoge udātta ucyate ॥ 40 ॥

Tr. *asaṃprajñāta* means — where there remains no object for meditation, that forms the absolute supportlessness. A *yogārūḍha* is the one who commands expertise in *yoga*. He is considered illustrious in *yoga*. 40.

तदुक्तं गीतायाम् —

taduktaṃ gītāyāṃ

It has been stated in the *gītā* —

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ इति ॥ ४१ ॥

yadā hi nendriyārtheṣu na karmaṣvanuṣajjate ।
sarvasaṃkalpasannyāsī yogārūḍhastadocyate ॥ *iti* ॥ 41 ॥

Tr. When one does not get involved in the objects of the senses, and the *karmas* and gives up all the mental constructions, then alone one is called a *yogārūḍha*. 41.

योगारूढत्वं तु दीर्घाभ्यासपाटवादुपैति । अभ्यासो नाम चित्तस्थितौ यत्नः । यत्नो नाम ध्येयाद् बहिर्गच्छतो मनसः पौनःपुन्येन ध्येये आनयनम् ॥ ४२ ॥

yogārūḍhatvaṃ tu dīrghābhyāsapāṭavādupaiti | abhyāso nāma cittasthitau yatnaḥ | yatno nāma dhyeyād bahirgacchato manasaḥ paunaḥpunyena dhyeye ānayanam || 42 ||

Tr. The state of *yogārūḍha* is attained after a prolonged and skillful practice. Practice *(abhyāsa)* stands for putting an effort to make the mind steady. 'Putting an effort' –'*yatna*' means to bring the mind back on the object again and again which keeps on straying outwardly. 42.

तथा चोक्तं गीतायां भगवता –

tathā coktaṃ gītāyāṃ bhagavatā –

Therefore, in the *gītā* *bhagavān* has stated—

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेद् ।। इति ।। ४३ ।।

yato yato niścalati manaścañcalamasthiram |
tatastato niyamyaitadātmanyeva vaśaṃ nayed || *iti* || 43 ||

Tr. The mind which is restive and unsteady has to be brought back from the objects through discipline and has to be focused on the Self. 43.

तद्यथा –

tadyathā --

For instance—

पिण्डीकृत्याक्षवर्गं मुनिरुपल इवासीन एकान्तदेशे
श्रोत्राभ्यां नैव विन्द्यान्निनदमपि मनाक् स्पर्शमक्ष्णा च रूपम् ।।
विद्यान्नो जिह्वयेशदूरनिचयमुदाराणि कर्माणि जह्याद्
योगीन्द्रः खप्रमाथीन्यतिधृतिकलितस्तानि नैच्छेत् कदापि ।।४४।।

piṇḍīkṛtyākṣavargaṃ munirupala ivāsīna ekāntadeśe
śrotrābhyāṃ naiva vindyānninadamapi manāk sparśamakṣṇā ca rūpam ||
vidyānno jihvayeśadūranicayamudārāṇi karmāṇi jahyād
yogīndraḥ khapramāthīnyatidhṛtikalitastāni naicchet kadāpi ||44||

Tr. A *muni* withdraws all the senses and sits steadily in a desolate place like a rock. He does not listen even to a loud sound through the ears, does not feel any touch, does not see

any form through the eyes, does not taste any taste through the tongue. A *yogī* gives up all the *karmas* inclusive of the noble ones which cause afflictions and he should never aspire for them. 44.

तमो मनसि संसृज्य पञ्चवर्गं विचक्षणः ॥
समादध्यान्मनोभ्रान्तिमिन्द्रियार्थैः स पञ्चभिः ॥ ४५ ॥

tamo manasi saṃsṛjya
pañcavargaṃ vicakṣaṇaḥ ॥
samādadhyānmanobhrāntim-
indriyārthaiḥ sa pañcabhiḥ ॥ 45 ॥

Tr. *tamas* (darkness) lying in the mind is removed by a wise. The group of five senses which embodies the five objects of the senses (five) is also dissolved which causes mental illusion. 45.

पूर्वं पञ्चद्वारमत्यन्तलोला-
ऽलोलं निःसंसार्यः नालम्बमेकः ॥
नित्यं दध्याद् ध्यानमार्गे सुधीरः
स्वस्यान्तर्हृत्खैश्च पिण्डीकरोति ॥ ४६ ॥

pūrvaṃ pañcadvāramatyantalolā'-
lolaṃ niḥsaṃsāryaḥ nālambamekaḥ ॥
nityaṃ dadhyād dhyānamārge sudhīraḥ
svasyāntarhṛtkhaiśca piṇḍīkarotī ॥ 46 ॥

Tr. First of all, all the five restless senses should be completely controlled, so that not even a single object remains. A wise should regularly devout to the practice of meditation, so that he merges the heart in the void by withdrawing the senses. 46.

ध्यानपथ पूर्वो मया परिवर्णितः सुधियाम् ।
स्थानाऽध्वन्यत्र समाहितः क्षणं तिष्ठति प्राज्ञः ॥ ४७ ॥

dhyānapatha pūrvo mayā parivarṇitaḥ sudhiyām ।
sthānā'dhvanyatra samāhitaḥ kṣaṇaṃ tiṣṭhati prājñaḥ॥47॥

Tr. This is the technique of meditation narrated by me in the beginning, which is for the wise. A wise becomes

samāhita (tranquil) even if he follows this for a little. 47.

भ्रान्तं पुनर्वायुपथेन चित्तं भवत्यवार्यं प्रचलं समीरवत् ।
अपास्तखेदो गतमत्सरोऽस्तक्लेशोऽपतन्द्रः सुसमाहितमनः ॥४८॥

bhrāntaṃ punarvāyupathena cittaṃ
bhavatyavāryaṃ pracalaṃ samīravat ॥
apāstakhedo gatamatsaro'sta-
kleśo'patandraḥ susamāhitamanaḥ ॥ 48 ॥

Tr. If the mind again wonders due to the movement of *prāṇa*, which is difficult to restrain like air, a *yogī* being intuitively discriminative gives up worries, jealousy, conflicts and lethargy, thus being highly concentrated through the practice of *dhyāna*. 48.

ध्यानेन कुर्यान् मुनिराड् विचारवितर्कवांश्चानुविवेकवान् स्यात् ।
समादधानस्य मुनेस्तु पूर्वं ध्यानं भवेदात्मन उक्तरीत्या ॥ ४९ ॥

dhyānena kuryān munirāḍ vicāra-
vitarkavāṅścānuvivekavān syāt ॥
samādadhānasya munestu pūrvaṃ
dhyānaṃ bhavedātmana uktarītyā ॥ 49 ॥

Tr. A poised *yogī* who has developed an analytical and logical mind along with discrimination, gains success in the practice of *dhyāna* on the Self as told earlier. 49.

पिण्डीकृत्य प्रत्याहृत्येत्यर्थः ॥

piṇḍīkṛtya pratyāhṛtyetyarthaḥ ॥

'*piṇḍīkṛtya*' means withdrawing (the senses).

याज्ञवल्क्ये –

yājñavalkye –

According to *yājñavalkya*—

अहमेव परं ब्रह्म परमात्माहमव्ययः ।
एवं यद्वेदनं चित्ते सगुणं ध्यानमुच्यते ॥ इति ॥ ५० ॥

ahameva paraṃ brahma paramātmāhamavyayaḥ ।
evaṃ yadvedanaṃ citte saguṇaṃ dhyānamucyate ॥*iti*॥50॥

Tr. I am the Absolute *brahma*, *paramātmā* and *avyaya*.

When such a feeling arises in the mind, it is called *saguṇa dhyāna*. 50.

भागवत एकादशस्कन्धे भगवद्वाक्यम् —

bhāgavata ekādaśaskandhe bhagavadvākyam —

Here follows the words of *bhagavān* in the eleventh chapter of the *bhāgavata*—

इन्द्रियाणीन्द्रियार्थेभ्यो मनसाकृष्य तन्मनाः ।

बुद्ध्या सारथिना धीरः प्रणमेन्मयि सर्वतः ॥ इति ॥ ५१ ॥

indriyāṇīndriyārthebhyo manasākṛṣya tanmanāḥ ।

buddhyā sārathinā dhīraḥ praṇamenmayi sarvataḥ ॥*iti*॥51॥

Tr. The senses are withdrawn from their (respective) objects with the mind by the one who is absorbed. A wise surrenders completely in me by directing the *buddhi* (discrimination) which is like a charioteer. 51.

॥ इति सुन्दरदेवविरचितायां हठतत्वकौमुद्यां ध्यानविधिविवेचनोद्योतः ॥

॥ *iti sundaradevaviracitāyāṃ haṭhatatvakaumudyāṃ dhyānavidhivivecanodyotaḥ* ॥

Here ends the chapter narrating the technique of *dhyāna* in *haṭhatatvakaumudī* composed by *sundaradeva*.

Chapter—50

अथ ध्यानसमासः —

atha dhyānasamāsaḥ —

Here follows a brief sketch of *dhyāna*—

भक्त्या भावयेच्चेतसि सम्प्रसादस्ततः स्मृतिर्ध्यानमनाकुलं ततः ।
क्रमात्स्वरूपस्य हरेः सबीजाल्लयादतोऽगर्भलयो मुनेः स्यात् ॥१॥

bhaktyā bhāvayeccetasi samprasādas-
tataḥ smṛtirdhyānamanākulaṃ tataḥ ॥
kramātsvarūpasya hareḥ sabījā-
llayādato'garbhalayo muneḥ syāt ॥ 1 ॥

Tr. Devotion (in the heart) brings pacification which results into (clarity of) memory and (the state of) poise through *dhyāna* and thereafter follows (perception of the) real form of *hari*. From absorption in *sabīja* (state) a *muni* enters (the state of) absorption in *agarbha (nirbīja)*. 1.

अतः अस्मात् —

ataḥ asmāt—

***ataḥ* means thereafter—**

विमार्गयापि प्रचलं मनो मुहुः प्रवेशयन्ती स्थितिलम्भनेन ।
मातेव भक्तिः परिपाति योगिनं कृत्वा हरेर्ध्यानसुधा लयान्ते ।२।

vimārgayāpi pracalaṃ mano muhuḥ
praveśayantī sthitilambhanena ॥
māteva bhaktiḥ paripāti yoginaṃ
kṛtvā harerdhyānasudhā layānte ॥ 2 ॥

Tr. Even if the mind gets distracted, it quickly returns to steadiness due to devotion which protects one like a mother. Devotion transforms a *yogī* and turns him towards the nectar of meditation on *hari* at the end of *laya* (absorption). 2.

उपरतिमुपयातस्यामवैराग्यभाग्यं
प्रणवजपपरस्य प्राणसंरोधनेन ॥
विचलहृदयमेतद्यावदाप्तं न भक्तेः
अमृतमचलताऽस्मिन् नास्ति तावद्धठैः किम् ॥ ३ ॥

uparatimupayātasyāmavairāgyabhāgyaṃ
praṇavajapaparasya prāṇasaṃrodhanena ॥

vicalahṛdayametadyāvadāptaṃ na bhakteḥ
amṛtamacalatā'smin nāsti tāvaddhṭhaiḥ kim ॥ 3 ॥

Tr. One who has practised *prāṇāyāma* coupled with recitation of *praṇava (om)* attains quietude and qualifies for *vairāgya* (detachment). What is the use of *haṭha* if one does not find out the nectar (Bliss) and stability for a fickle mind through *bhakti* (devotion)? 3.

आनन्दाश्रूण्यभिसृजति मुहुर्योगिनः प्रेमभक्ति-
प्रोद्यद्भागच्छरितहृदयं लीयते श्रीशरूपे ॥
प्रेम्णा सत्तद्गुणमधुसुधापानसद्ध्यानमुग्धं
सौख्याम्भोधौ प्लुतमिव सदा जायते निष्प्रपञ्चम् ॥ ४ ॥

ānandāśrūṇyabhisṛjati muhuryoginaḥ premabhakti-
prodyadbhāgaccharitahṛdayaṃ līyate śrīśarūpe ॥
premṇā sattadguṇamadhusudhāpānasaddhyānamugdhaṃ
saukhyāmbhodhau plutamiva sadā jāyate nisprapañcam ॥ 4 ॥

Tr. A *yogī* frequently gets drenched in the tears of intense Bliss arising out of love and devotion in the heart which merges in the form of *śrīśa*. The *yogī* enjoying the sweet nectar of eternal love springing out of absorption in meditation, plunges in the ocean of love. He becomes ever free from mundane paraphernalia. 4.

विवेकवैराग्य उभं सुयोगिनो-
ऽभ्यासस्तृतीयो हरिभक्तिरुत्तमा ॥
ध्यानस्य निष्पत्तिरिति त्रिभिर्भवेत्
प्राणावरोधादि यदंगमस्य तत् ॥ ५ ॥

vivekavairāgya ubhaṃ suyogino'-
bhyāsastṛtīyo haribhaktiruttamā ॥
dhyānasya nispattiriti tribhirbhavet
prāṇāvarodhādi yadaṅgamasya tat ॥ 5 ॥

Tr. For a *yogī* conscience, detachment, (regular) practice, devotion towards *hari*, *nispatti* state of *dhyāna* and *prāṇāyāma* form the components of *yoga*. 5.

अथ ध्यानम् —

atha dhyānam —

dhyāna follows—

हृत्पद्मेऽष्टदलोपेते कन्दमध्यात् समुत्थिते ।
द्वादशांगुलनालेऽस्मिन् चतुरंगुलवन्मुखे ॥ ६ ॥

hṛtpadme'ṣṭadalopete kandamadhyāt samutthite ।
dvādaśāṅgulanāle'smin caturaṅgulavanmukhe ॥ 6 ॥

Tr. One should meditate on the lotus of eight petals in the heart which shoots from *kanda* which has a stalk of twelve digits having breadth of four digits. 6.

प्राणायामैर्विकसिते केसरान्वितकर्णिके ।
वासुदेवं जगन्नाथं नारायणमजं हरिम् ॥ ७ ॥

prāṇāyāmairvikasite kesarānvitakarṇike ।
vāsudevaṃ jagannāthaṃ nārāyaṇamajaṃ harim ॥ 7 ॥

चतुर्बाहुमुदारांगं शंखचक्रगदाधरम् ।
किरीटकेयूरधरं पद्मपत्रनिभेक्षणम् ॥ ८ ॥

caturbāhumudārāṅgaṃ śaṅkhacakragadādharam ।
kirīṭakeyūradharaṃ padmapatranibhekṣaṇam ॥ 8 ॥

श्रीवत्सवक्षसं विष्णुं पूर्णचन्द्रनिभाननम् ।
पद्मोदरतलाभाक्षं सुप्रसन्नं शुचिस्मितम् ॥ ९ ॥

śrīvatsavakṣasaṃ viṣṇuṃ pūrṇacandranibhānanam ।
padmodaratalābhākṣaṃ suprasannaṃ śucismitam ॥ 9 ॥

शुद्धस्फटिकसंकाशं पीतवाससमच्युतम् ।
पद्मच्छविपदद्वन्द्वं परमात्मानमीश्वरम् ॥ १० ॥

śuddhasphaṭikasaṅkāśaṃ pītavāsasamacyutam ।
padmachavipadadvandvaṃ paramātmānamīśvaram ॥10॥

प्रभाभिर्भासयद्रूपं परितः पुरुषोत्तमम् ।
मनसालोक्य देवेशं सर्वभूतहृदि स्थितम् ॥
सोऽहमात्मेति विज्ञाय सगुणं ध्यानमुत्तमम् ॥ ११ ॥

prabhābhirbhāsayadrūpaṃ paritaḥ puruṣottamam ।
manasālokya deveśaṃ sarvabhūtahṛdi sthitam ॥
so'hamātmeti vijñāya saguṇaṃ dhyānamuttamam ॥ 11 ॥

Tr. Practice of *prāṇāyāma* which blossoms through the pericurp adorned with filament (wherein) *vāsudeva*, *jagannātha*, *nārāyaṇa*, the Unborn, *hari*, who has four hands with a handsome body, holding a conch, a wheel *(cakra)* and a club, a crown and

peacock feather (adorning the crown), eyes like the blossoming lotus, the chest embossed with *śrīvatsa*, who is *viṣṇu* whose face is as bright as the full moon, and eyes as shinning as the core of the lotus, who is very delighted and smiling, who is *acyuta* wearing a yellow drape, who is as blazing as the pure crystal, who has the pair of feet like lotus, who is but *paramātmā, īśvara* who is the Supreme *puruṣa* who enlightens everything with His brightness. He is *deveṣa* (God of all gods) residing in every heart. `That *ātmā* is me' — this realization should be followed which forms the *saguṇa* kind of meditation which is considered superior. 7-11.

इति योगयाज्ञवल्क्यात् ॥

iti yogayāñjyavalkyāt ॥

This is quoted from *yoga-yājñavalkya.*

तथा च भागवते –

tathā ca bhāgavate -

It has been said also in *bhāgavata*—

केचित् स्वदेहान्तहृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथांगशंखगदाधरं धारणया स्मरन्ति ॥ १२ ॥

kecit svadehāntahṛdayāvakāśe
prādeśamātraṃ puruṣaṃ vasantam ॥
caturbhujaṃ kañjarathāṅgaśaṅkha-
gadādharaṃ dhāraṇayā smarani ॥ 12 ॥

प्रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिंजल्कपिशंगवाससम् ।
लसन्महारत्नहिरण्मयांगं स्फुरन् महारत्नकिरीटकुण्डलम् ॥१३॥

prasannavaktraṃ nalināyatekṣaṇaṃ
kadambakiñjalkapiśaṅgavāsasam ॥
lasanmahāratnahiraṇmayāṅgaṃ
sphuran mahāratnakirīṭakuṇḍalam ॥ 13 ॥

Tr. Some meditate consistently on the *puruṣa* (the Supreme Being) residing in the space of the heart in the body pervading the whole region, having four arms holding lotus, a *cakra* (wheel), conch and a club, having a pleasing countenance, eyes like a lotus, wearing the tawny cloth as shinning as the filament of a lotus, sparkling great jewels on the body, the

crown and *kuṇḍala* with a shinning big jewel. 12-13.

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरा स्थापितपादवल्लभम् ।
श्रीलक्ष्मणं कौस्तुभरत्नकधरमम्लानलक्ष्म्या वनमालयाञ्चितम् ॥१४॥

unnidrahṛtpaṅkajakarṇikālaye
yogeśvarā sthāpitapādavallabham ॥
śrīlakṣmaṇaṃ kaustubharatnakadharam-
amlānalakṣmyā vanamālayāñcitam ॥ 14 ॥

Tr. The *yogīs* establish the holy feet along with *śrīlakṣmaṇa* (having signs of *śrīlakṣmī*) adorned with the jewel of *kaustabha* and delightful *lakṣmī* having garland in the head in the blossomed lotus of the *citta*. 14.

विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ।
स्निग्धामलाकुञ्चितनीलकुन्तलैर्विरोचमानाननहासपेशलम् ॥ १५ ॥

vibhūṣitaṃ mekhalayāṅgulīyakair-
mahādhanairnūpurakaṅkaṇādibhiḥ ॥
snigdhāmalākuñcitanīlakuntalair-
virocamānānanahāsapeśalam ॥ 15 ॥

Tr. He is decorated with waistband, highly precious rings, anklets and bracelets. He has flowing soft curling beautiful dark hair and a smiling face. 15.

अदीनलीलाहसितेक्षणाल्लसद्भ्रूभंगसम्भूतभूर्यनुग्रहम् ।
ईक्षेत चिन्तामयमेनमीश्वरं यावन्मनोधारणयावतिष्ठते ॥ १६ ॥

adīnalīlāhasitekṣaṇāllasadbhrū-
bhaṅgasambhūtabhūryanugraham ॥
īkṣate cintāmayamenamīśvaraṃ
yāvanmanodhāraṇyāvatiṣṭhate ॥ 16 ॥

Tr. One should visualize and meditate on this *īśvara* who is graceful, glancing with a pleasant smile, bestowing immense grace with a knitting of the eyebrows, so long as the mind remains in the state of *dhāraṇā*. 16.

एकैकशोऽगानि धिया च भावयेत्
पादादि यावद्धसितं गदाभृतः ॥
जितं जितं स्थानमपोह्य धारयेत्
परं परं शुद्ध्यति धीर्यथा यथा ॥ १७ ॥

ekaikaśo'ṅgāni dhiyā ca bhāvayet
pādādi yāvaddhasitaṃ gadābhṛtaḥ ||
jitaṃ jitaṃ sthānamapohya dhārayet
paraṃ paraṃ śudhyati dhīryathā yathā || 17 ||

Tr. One should hold the mind on a particular limb like feet etc. after visualizing the smiling (God *viṣṇu*) holding the club and then leaving for another limb. Thus consequently the mind gets purified. 17.

यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ।
तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयत स्मरेत ॥इति॥१८॥

yāvanna jāyeta parāvare'smin
viśveśvare draṣṭari bhaktiyogaḥ ||
tāvat sthavīyaḥ puruṣasya rūpaṃ
kriyāvasāne prayat smareta || *iti* || 18 ||

Tr. So long as one does not inculcate *bhaktiyoga* (devotion) in *viśveśvara* who is the Absolute Seer, one should meditate on gross form, activities and their results. Therefore, one should meditate on Him. 18.

इति याज्ञवल्क्ये ॥

iti yājñavalkye ||

This above is quoted from *yājñyavalkya*.

भ्रुवोः मध्येऽन्तरात्मानं भारूपं सर्वकारणम् ।
स्थाणुवत् मूर्धपर्यन्तं मध्यदेहात् समुत्थितम् ॥ १९ ॥

bhruvoḥ madhye'ntarātmānaṃ
bhārūpaṃ sarvakāraṇam ||
sthāṇuvat mūrdhaparyantaṃ
madhyadehāt samutthitam || 19 ||

जगत्कारणमव्यक्तं ज्वलन्तममितौजसम् ।
मनसालोक्य सोऽहं स्यामित्येतद् ध्यानमुत्तमम् ॥ २० ॥

jagatkāraṇamavyaktaṃ jvalantamamitaujasam |
manasālokya so'haṃ syāmityetad dhyānamuttamam ||20||

Tr. One should meditate on the *ātmā*, which originates from the center of the body and reaches up to the top of the head and is stable-- the Absolute cause, who is in the form of illumination at the centre of the eyebrows. One meditates upon

the cause of the creation who is unmanifest, blazing with lustre and thinking 'May I be That'. This forms the superior technique of meditation. 19-20.

अथ वा बद्धपर्यंकः शिथिलीकृतविग्रहः ।
शिव एव स्वयं भूत्वा नासाग्रारोपितेक्षणः ॥ २१ ॥
atha vā baddhaparyaṅkaḥ śithilīkṛtavigrahaḥ ।
śiva eva svayaṃ bhūtvā nāsāgrāropitekṣaṇaḥ ॥ 21 ॥

Tr. Or else – adopt *baddhaparyaṅka āsana* and keep the body relaxed. Imagine yourself as *śiva* while keeping the gaze at the tip of the nose. 21.

निर्विकारं शिवं शान्तं परमात्मानमव्ययम् ।
भारूपममृतं ध्यायेद् भ्रुवोर्मध्ये वरानने ॥ २२ ॥
nirvikāraṃ śivaṃ śāntaṃ paramātmānamavyayam ।
bhārūpamamṛtaṃ dhyāyed bhruvormadhye varānane।22।

Tr. O beautiful lady! One should meditate on *śiva* who is *nirvikāra* (without mutation), *paramātman*, peaceful, *avyaya* (eternal), in the very form of illumination and *amṛta* (immortal) at the center of the eyebrows. 22.

सोहमेवेति या बुद्धिः सा च ध्याने प्रशस्यते ।
अहमेव परं ब्रह्म परमात्माहमव्ययम् ॥
एवं यद्वेदनं ध्येये सगुणध्यानमुच्यते ॥ इति ॥२३ ॥
sohameveti yā buddhiḥ sā ca dhyāne praśasyate ।
ahameva paraṃ brahma paramātmāhamavyayam ॥
evaṃ yadvedanaṃ dhyeye saguṇadhyānamucyate ।*iti*।23।

Tr. Attitude of 'I am That' is considered beneficial. 'I am eternal *paramātmā* and *brahma* the immutable'—such a feeling in the course of meditation is known as *saguṇa dhyāna*. 23.

बोधेत्तदीशप्रणिधातो हठात् ध्यानेऽमनस्के सगुणस्वरूपे ।
जीवात्मनोरैक्यमनुक्रमेण स्वयं भवेद्यत्र स मोक्ष उक्तः ॥ २४ ॥
bodhettadīśapraṇidhāto haṭhāt
dhyāne'manaske saguṇasvarūpe ॥
jīvātmanoraikyamanukrameṇa
svayaṃ bhavedyatra sa mokṣa uktaḥ ॥ 24 ॥

Tr. In the course of meditation through *haṭha* practice remains in the state of *amanaska* (no mind), while meditating on *īśa* with his attributes (*saguṇa*), followed by unification of *jīva* and *ātman*. This is called (liberation). 24.

तद्यथा –

सर्वे तत्र लयं यान्ति यत्र देवो निरञ्जनः ॥ इति ॥ ५३ ॥

nādakoṭisahasrāṇi bindukoṭiśatāni ca ।
sarve tatra layaṃ yānti yatra devo nirañjanaḥ ॥ *iti* ॥ 53 ॥

Tr. All the thousands of crores of *nāda* and hundreds of crores of *bindu* are merged in the Absolute. 53.

तथा चोक्तं योगसारे शिवपार्वतीसंवादे –

tathā coktaṃ yogasāre śivapārvatīsaṃvāde—

It has been stated in *yogasāra* in the dialogue between *Śiva* and *pārvatī*—

ईश्वर उवाच –

īśvara uvāca—

***īśvara* said—**

या मूलाधारगा[1] शक्तिः सा परा बिन्दुरूपिणी ।
तस्यामुत्पद्यते नादो बीजात् सूक्ष्मादिवांकुरः ॥ ५४ ॥

1. मूलाधारणा –b.

yā mūlādhāragā śaktiḥ sā parā bindurūpiṇī ।
tasyāmutpadyate nādo bījāt sūkṣmādivāṅkuraḥ ॥ 54 ॥

Tr. The *śakti* which resides at the *mūlādhāra* is in the form of the finest *bindu* known as *parā*. From this *nāda* emanates like a sprout springs from a subtle seed. 54.

तां पश्यन्तीं विदुर्विश्वं[1] यया पश्यन्ति योगिनः ।
हृदये व्यज्यते घोषो गर्जत्पर्जन्यसन्निभः ॥ ५५ ॥

tāṃ paśyantīṃ vidurviśvaṃ yayā paśyanti yoginaḥ ।
hṛdaye vyajyate ghoṣo garjatparjanyasannibhaḥ ॥ 55 ॥

Tr. With which the *yogīs* perceive the whole universe, it is called *paśyantī*. The sound resonates in the heart which resembles that of a loud thunder. 55.

तत्र स्थिता महादेवी मध्यमेत्यभिधीयते ।
प्राणेन विखराख्येन प्रेरिता वैखरी पुनः ॥ ५६ ॥

tatra sthitā mahādevī madhyametyabhidhīyate ।
prāṇena vikharākhyena preritā vaikharī punaḥ ॥ 56 ॥

Tr. *mahādevī* which is also known as *madhyamā*, is located therein. The *prāṇa* which is also called *vikhara* stimulates *vaikharī* too. 56.

शाखापल्लवरूपेण ताल्वादिस्थानघट्टनात्[2] ।
अकारादिक्षकारान्ताद्यक्षराणि[3] समीरयेत् ॥ ५७ ॥

śākhāpallavarūpeṇa tālvādisthānaghaṭṭanāt ।
akārādikṣakārāntādyakṣarāṇi samīrayet ॥ 57 ॥

Tr. The *prāṇa* hits at the points like palate etc., which produces the letters starting with *akāra* and ending with *kṣakāra*, which are like its leaves and branches. 57.

एषा सरस्वती देवी सर्वभूतगुहाशया ।
वायुना वह्नियुक्तेन प्रेर्यमाणा शनैः शनैः ॥ ५८ ॥

eṣā sarasvatī devī sarvabhūtaguhāśayā ।
vāyunā vahniyuktena preryamāṇā śanaiḥ śanaiḥ ॥ 58 ॥

Tr. This Goddess (of speech) *sarasvatī* resides in all

---

1. पश्यन्तीं विश्वं –b. 2. ताल्वादिस्थानघनघदनात् –b. 3. क्षकारान्ताद्यः क्षराणि –b.

the creatures. She would be gently moved by the *vāyu* which is mixed with fire. 58.

अक्षरेभ्यः पदानि स्युः पदेभ्यो वाक्यसम्भवः ।
सर्ववाक्यात्मका मन्त्रा वेदाः शास्त्राणि सर्वशः ॥ ५९ ॥

akṣarebhyaḥ padāni syuḥ padebhyo vākyasambhavaḥ ।
sarvavākyātmakā mantrā vedāḥ śāstrāṇi sarvaśaḥ ॥ 59 ॥

Tr. From letters words are formed, while words form a sentence. All the *mantras, vedas* and scriptures are in the nature of sentences alone. 59.

पुराणानि च काव्यानि भाषाश्च विविधा अपि ।
सप्तस्वराश्च गाथाश्च सर्वे[1] नादसमुद्भवाः ॥ ६० ॥

purāṇāni ca kāvyāni bhāṣāśca vividhā api ।
saptasvarāśca gāthāśca sarve nādasamudbhavāḥ ॥ 60 ॥

Tr. Even the *purāṇas*, poems and various languages, the seven *svaras*, *gāthās* (religious verses)—all emanate from *nāda* alone. 60.

गुदमेढ्रान्तरालस्थं मूलाधारं त्रिकोणकम् ।
शिवस्य दीपरूपस्य शक्तिरूपस्य तत्पदम् ॥ ६१ ॥

gudameḍhrāntarālastham mūlādhāram trikoṇam ।
śivasya dīparūpasya śaktirūpasya tatpadam ॥ 61 ॥

Tr. In between anus and generative organ the triangular *mūlādhāra* is located. This seat of *śiva*, the luminous is in the form of *śakti*. 61.

यत्र कुण्डलिनी नाम परा शक्तिः प्रतिष्ठिता ।
तस्माद्वायुश्च वह्निश्च बिन्दुनादस्ततः[2] शिवे ॥ ६२ ॥

yatra kuṇḍalinī nāma parā śaktiḥ pratiṣṭhitā ।
tasmādvāyuśca vahniśca bindunādastataḥ śive ॥ 62 ॥

Tr. O *śive*! Where *kuṇḍalinī*, the Absolute *śakti* is situated, therefrom *prāṇa*, fire, *bindu* and *nāda* emanate. 62.

यस्माद्धंसो यत इदं[3] मन उत्पद्यते[4] नृणाम् ।
तदेतत्कामरूपाख्यं पीठं कामफलप्रदम् ॥ ६३ ॥

---

1. सर्व —b. 2. बिन्दुनादिस्ततः —b. 3. यस्माद्वंसोद्यत इदं —b. 4. उपद्यते —b.

yasmāddhaṃso yata idaṃ mana utpadyate nṛṇām ।
tadetatkāmarūpākhyaṃ pīṭhaṃ kāmaphalapradam ॥ 63 ॥

Tr. From this point *haṃsa* as well as mind of the human beings emerge. This is the seat of *kāmarūpa* which fulfills all desires. 63.

हृदये ऽनाहताख्यं[1] तु पूर्णगिर्याख्यपीठकम्[2] ।
पीठं कण्ठे[3] षोडशास्रं[4] चक्रं जालन्धरं भवेत् ॥
आज्ञा नाम भ्रुवोर्मध्ये पीठमुड्यानानामकम् ॥ इति ॥ ६४ ॥

hṛdaye'nāhatākhyaṃ tu pūrṇagiryākhyapīṭhakam ।
pīṭhaṃ kaṇṭhe ṣoḍaśāsraṃ cakraṃ jālandharaṃ bhavet ॥
ājñā nāma bhruvormadhye pīṭhamuḍyānanāmakam ॥ *iti* ॥ 64 ॥

Tr. In the heart, the seat (*pīṭha*) of *anāhata* known as *pūrṇagiri*, is situated. In the throat the seat (*pīṭha*) of *cakra* having sixteen spokes is situated, which is called *jālandhara*. At the center of the eyebrows, *ājñā* is located the seat (*pīṭha*) of which is called *uḍḍyāna-pīṭha* . 64.

इति नादोत्पत्तिः[5] ॥

iti nādotpattiḥ ॥

Here ends the description of evolution of *nāda*.

अत्र चक्रभेदक्रमेण सिद्धिक्रम ईश्वरमीननाथसंवादे यथा –

atra cakrabhedakrameṇa siddhikrama īśvaramīnanātha-saṃvāde yathā—

In *īśvaramīnanātha-saṃvāda* the order (of hearing of *nāda*) which occurs due to an orderly piercing of the *cakras* and control over them has been described as follows—

यदा परिचये शक्तिश्चलिता तूर्ध्वमेति खम् ।
षट्चक्राणि विभिद्योच्चैस्तदा स्युरणिमादयः ॥ ६५ ॥

yadā paricaye śaktiścalitā tūrdhvameti kham ।
ṣaṭcakrāṇi vibhidyoccaistadā syuraṇimādayaḥ ॥ 65 ॥

---

1. ऽनाहताख्यां -b. 2. पीटकं -b. 3. पीटके -b. 4. षापडशासुं -b. 5. नादोत्पत्तिः इति -b.

Tr. In the *paricaya* state, *śakti* being stimulated, moves up. She reaches upwards to *kha* (space— *brahmarandhra*) after piercing the six *cakras*. Then the *aṇimā* etc. occur. 65.

पुरा ग्रन्थित्रयं भित्वा यात्यूर्ध्वं शक्तिरात्मनः ।
स्फुटन्ति पृष्ठवंशास्थिग्रन्थयो[1] योगिनस्तदा ॥ ६६ ॥

purā granthitrayaṃ bhitvā yātyūrdhvaṃ śaktirātmanaḥ ।
sphuṭanti pṛṣṭhavaṃśāsthigranthayo yoginastadā ॥ 66 ॥

Tr. Then alone the *śakti* of a person moves up after piercing three *granthis*. Then alone a *yogī* pierces the *granthis* situated in the spine. 66.

तदैव वायुः सर्वांगे लीनो भवति सञ्जितः ।
धीरैः केवलकुम्भः स उच्यते सिद्धिमूलकः ॥ ६७ ॥

tadaiva vāyuḥ sarvāṅge līno bhavati sañjitaḥ ।
dhīraiḥ kevalakumbhaḥ sa ucyate siddhimūlakaḥ ॥ 67 ॥

Tr. Then alone *vāyu (prāṇa)* being controlled spreads thoroughly all over the body. The savants know this as *kevala-kuṃbhaka* which spearheads success (in *yoga*). 67.

मूलाधारं यदापानो भित्वोर्ध्वं याति वेगतः ।
तदातीतानागतज्ञो योगी भवति[2] सत्वधीः ॥ ६८ ॥

mūlādhāraṃ yadāpāno bhitvordhvaṃ yāti vegataḥ ।
tadātītānāgatajño yogī bhavati satvadhīḥ ॥ 68 ॥

Tr. When *apāna* pierces *mūlādhāra* and speedily moves upwards, then a *yogī* who is committed to *satva* (Self), knows past and future. 68.

स्थितिं भित्वोर्ध्वगोऽपानो यदा क्षोभयन्तीश्वरीम् ।
तदा नादोत्पत्तिरस्य योगिनो हृदि जायते ॥ ६९ ॥

sthitiṃ bhitvordhvago'pāno yadā kṣobhayantīśvarīm ।
tadā nādotpattirasya yogino hṛdi jāyate ॥ 69 ॥

Tr. After piercing the *mūlādhāra*, while moving upwards, *apāna* stirs up *īśvarī*, then in the heart of a *yogī* *nāda* is revealed. 69.

---

1. वंतास्थिगग्रथयो -b. 2 भूवन्ति -b.

मृदंगनादोत्पत्तिस्तु मणिपूरभिदा भवेत् ।
अनाहतविभेदेन घण्टाध्वनिरुदेति च ॥ ७० ॥
mṛdaṅganādotpattistu maṇipūrabhidā bhavet ।
anāhatavibhedena ghaṇṭādhvanirudeti ca ॥ 70 ॥
विशुद्धचक्रभेदेन यन्त्रनाद प्रजायते ।
आज्ञाचक्रविभेदात्तु मुनेर्याति मनोलयम् ॥ ७१ ॥
viśuddhacakrabhedena yantranāda prajāyate ।
ājñācakravibhedāttu muneryāti manolayam ॥ 71 ॥

Tr. When *maṇipūra* is pierced, the sound of *mṛdaṅga* (a small drum) is generated. Piercing of *anāhata* generates ringing of the bells and piercing of *viṣuddha cakra* produces mechanical (metallic) sounds. When *ājñācakra* is pierced the mind of a *muni* is absorbed. 70-71.

भित्वा सहस्रपत्राब्जवायुना शक्तिरेति खम् ।
यदा तदा मुनिस्तिष्ठेद[1]खण्डसहजेऽश्मवद् ॥ इति ॥ ७२ ॥
bhitvā sahasrapatrābjavāyunā śaktireti kham ।
yadā tadā munustiṣṭhedakhaṇḍasahaje'śmavad ॥ *iti* ॥72॥

Tr. When the lotus of a thousand petals is pierced through *prāṇa*, the *śakti* reaches the *kha (sahasrāra)*. Then the *muni* stays in an unbridled *sahaja* state like a rock. 72.

॥इति गोविन्ददेवसुतविरचितायां हठतत्वकौमुद्यां नादानुसन्धानविवेचनोद्योतः ॥

॥ iti govindadevasutaviracitāyāṃ haṭhatatvakaumudyāṃ nādānusandhānavivecanodyotaḥ ॥

Here ends the chapter narrating *nādānusandhāna* in *haṭhatatvakaumudī* composed by the son of *govindadeva*.

1. मुनिस्तिष्ठेद – b.

॥ इति नादानुसन्धानोल्लासोऽष्टमः ॥ ८ ॥

॥ iti nādānusandhānollāso'ṣṭamaḥ ॥ 8 ॥

Here ends the eighth *ullāsa* on *nādānusandhāna*.

Chapter—55

अथ वै[1] हठयोगनिष्पत्त्यन्तं योगनिष्पत्त्या योगारूढस्य स्वयं जितप्राणाग्निदेहमनसो जातदृढबोधस्य योगिनः प्रमोदाय राजयोगो निरूप्यते[2]--

atha vai haṭhayoganiṣpattyantaṃ yoganiṣpattyā yogārūḍhasya svayaṃ jitaprāṇāgnidehamanaso jātadṛḍhabodhasya yoginaḥ pramodāya rājayogo nirūpyate—

At the end of *haṭha-yoganiṣpatti* a *yogāruḍha* through *yoganiṣpatti,* after gaining control over *prāṇa,* fire, body and mind, gains mastery over consciousness. Now for the pleasure of such *yogīs, rājayoga* is being narrated—

तथा चोक्तम् —

tathā coktam—

It has been stated—

हठं[3] विना राजयोगो राजयोगं विना[4] हठः ।
न सिद्ध्यति ततो युग्ममानिष्पत्तेः समभ्यसेत् ॥ १ ॥

haṭhaṃ vinā rājayogo rājayogaṃ vinā haṭhaḥ ।
na siddhyati tato yugmamāniṣpatteḥ samabhyaset ॥ 1 ॥

Tr. *rājayoga* without *hatha* and *haṭha* without *rājayoga* does not bring about success. Therefore, both have to be parctised till *niṣpatti* occurs. 1.

तस्मात् प्रवर्त्तते योगी हठे सद्गुरुमार्गतः ।
आयामज्ञानवैराग्यमृते स्थैर्यं न चेतसः ॥ २ ॥

tasmāt pravarttate yogī haṭhe sadgurumārgataḥ ।
āyāmajñānavairāgyamṛte sthyairyaṃ na cetasaḥ ॥ 2 ॥

Tr. Therefore a *yogī* should undertake the practice of *haṭha* under the guidance of a bonafide *guru.* Stability of the mind does not occur without *prāṇāyāma,* wisdom and detachment. 2.

बोधेन प्राणरोधेन वैराग्यसाधितं[5] मनः ।
अखण्डराजयोगे स्यात् स्थिरं निर्वातदीपवत् ॥ ३ ॥

1. वं –b. 2. रूप्यते –b. 3. हठ –b. 4. विन –b. 5. वैराग्येणजितं –b.

bodhena prāṇarodhena vairāgyasādhitaṃ manaḥ ।
akhaṇḍarājayoge syāt sthiraṃ nirvātadīpavat ॥ 3 ॥

Tr. Just as the flame of a light is placed in a wind-free place (remains steady), similarly, wisdom, *prāṇāyāma* and detachment make the mind stable in the continued state of *rājayoga*. 3.

अभ्यासपाकपर्यन्तं मितान्नशरणो भवेत् ।
अन्यथा राजयोगं न कर्त्तुं पारयति ज्ञराद्[1] ॥ ४ ॥

abhyāsapākaparyantaṃ mitānnaśaraṇo bhavet ।
anyathā rājayogaṃ na karttuṃ pārayati jñarāt ॥ 4 ॥

Tr. Till the end of the practice, one should religiously stick to moderate diet. Otherwise even a wise does not gain success in *rājayoga*. 4.

अतीवसाधु[2]संलापं साधुसंगं सदा भजेत् ।
अश्नीयात् पिण्डरक्षार्थं बह्वालापं विवर्जयेत् ॥ ५ ॥

atīvasādhusaṃlāpaṃ sādhusaṅgaṃ sadā bhajet ।
aśnīyāt piṇḍarakṣārthaṃ bahvālāpaṃ vivarjayet ॥ 5 ॥

Tr. One should always adhere to noble speech and enjoy company of noble persons. One should consume food only to preserve the body and eschew talkativeness. 5.

त्याज्यं त्याज्यं च संगश्च सर्वथा त्यजतां[3] भृशम् ।
अन्यथा न लभेन्मुक्तिं सत्यं सत्यं मयोदितम् ॥ ६ ॥

tyājyaṃ tyājyaṃ ca saṅgaśca sarvathā tyajatāṃ bhṛśam ।
anyathā na labhenmuktiṃ satyaṃ satyaṃ mayoditam ॥6॥

Tr. Emphatically I would say that one should renounce attachment. Or else liberation cannot be attained. This is the truth told by me. 6.

स राजयोगो यथा तत्स्वरूपसमासतः[4] –

sa rājayogo yathā tatsvarūpasamāsataḥ –

Here follows a brief sketch of the nature of *rājayoga*—

तथा चोक्तं शिवसंहितायाम् —

1. ज्ञाएद् —b. 2. साध —b. 3. त्यतां —b. 4. समाप्तः —b.

tathā coktaṃ śivasaṃhitāyām—

It has been stated in *Śivasaṃhitā*—

आदौ स्वस्तिकविष्टरोपरिगतः पार्श्वोपधानान्वितः

एकान्ते शुचि[1]जन्तुवर्जितमठे स्थित्वा प्रणम्येश्वरम् ॥

शश्वत्तत्वविवेचनेन सुधिया निश्चिन्तया[2] भावनाम्

तस्मिंश्चेतसि भावयेत् प्रथममात्माऽभ्यासवैराग्यतः ॥ ७ ॥

ādau svastikaviṣṭaroparigataḥ pārśvopadhānānvitaḥ
ekānte śucijantuvarjitamaṭhe sthitvā praṇamyeśvaram ॥
śaśvattatvavivecanena sudhiyā niścintayā bhāvanām
tasmiṃścetasi bhāvayet prathamamātmā'bhyāsavairāgyataḥ ॥7॥

Tr. Stay in an isolated good hermitage (cottage) which is free from insects. Firstly assume *svastikāsana* with a lateral support (of a pillow). Bow down to *Īśvara*. With one-pointedness firmly meditate on that *tatva* (Self) which is eternal being free from worries. Practise meditation on the Self *(ātmā)* with detachment. 7.

ऐक्येन[3] शान्तसद्बुद्धौ जीवात्मपरमात्मनोः ।

अहं ममेतदुभयं[4] त्यक्त्वाऽखण्डं विचिन्तयेत् ॥ ८ ॥

aikyena śāntasadbuddhau jīvātmaparamātmanoḥ ।
ahaṃ mametadubhayaṃ tyaktvā'khaṇḍaṃ vicintayet ॥8॥

Tr. With a poised and pure mind unify *jīvātmā* and *paramātmā*. Relinquish 'I' and 'mine' and meditate on the 'One' (undivided). 8.

अध्यारोपापवादाभ्यां यत्र सर्वं विलीयते ।

तद्बीजमाश्रयेद्योगी सर्वसंगविवर्जितः ॥ ९ ॥

adhyāropāpavādābhyāṃ yatra sarvaṃ vilīyate ।
tadbījamāśrayedyogī sarvasaṅgavivarjitaḥ ॥ 9 ॥

Tr. Through (knowledge of) *adhyāropa* (superimposition) and *apavāda* (logic of exception) everything gets merged in that (Supreme). A *yogī* should adhere to that *bīja* (ultimate source) after giving up all attachment. 9.

---

1. शुवि –b. 2. निश्चितया –a. 3. एक्येन –b. 4. तदुभय –a.

सलिले करकाश्मेव दीप्ताग्नाविव तन्मयः ।
जीवो मौढ्यां[1] पृथग्बुद्धौ युक्तो ब्रह्मणि लीयते ॥ १० ॥

salile karakāśmeva dīptāgnāviva tanmayaḥ ।
jīvo mauḍhyāṃ pṛthagbuddhau yukto brahmaṇi līyate ॥10॥

Tr. Just as a pebble sinks in water or (an object) merges (burns) in fire, similarly, *jīva* (embodied soul), on dissolution of ignorance merges in *brahma* (cosmic soul). 10.

अपरोक्षं चिदानन्दं ध्यात्वा तस्मिन्[2] प्रलीयते ।
भ्रमाकुलः[3] परोक्षं च कृत्वा मूढो भ्रमत्यहो ॥ ११ ॥

aparokṣaṃ cidānandaṃ dhyātvā tasmin pralīyate ।
bhramākulaḥ parokṣaṃ ca kṛtvā mūḍho bhramatyaho ॥11॥

Tr. One gets merged in it after meditating on *aparokṣa* (direct), *cit* (conscious agent) and Blissful. Everything *parokṣa* (indirect) is illusive and alas! an ignorant wanders aimlessly. 11.

जीवकञ्चुकवानात्मा[4] शिवांशः केवलः शिवः[5] ।
स्वज्ञानेन कञ्चुकं[6] छिन्धि सोऽहमस्मीति मायिकम् ॥ १२ ॥

jīvakañcukavānātmā śivāṃśaḥ kevalaḥ śivaḥ ।
svajñānena kañcukaṃ chindhi so'hamasmīti māyikam 12

Tr. *ātmā* puts on the garb of *jīva* who is but a part and parcel of *śiva* itself. Remove the cover of ignorance in the form of *māyā* (illusion) by acquiring Self-knowledge which comes as 'I am That (*brahma*)'. 12.

चराचरमिदं[7] विश्व[8]मलीकं नश्वरं भ्रमः ।
एकोऽहं पुरुषो[9]ऽस्मीह नान्यदस्तीति भावय ॥ १३ ॥

carācaramidaṃ viśvamalīkaṃ naśvaraṃ bhramaḥ ।
eko'haṃ puruṣo'smīha nānyadastīti bhāvaya ॥ 13 ॥

Tr. The mundane world is illusive, mutable and delusion. Ponder over 'me alone exist as *puruṣa*; nothing else exists'. 13.

---

1. मौघात् —b. 2. नस्मिन् —b. 3. भ्रमकुलः —b. 4. जीवकंचुकवातात्मा –b. 5. अनुपलब्धपाठः —b. 6. कंचुकं –b. 7. मिद –b. 8. घिश्व –b. 9. पुषो –b.

एवमभ्यासतो[1] नित्यं स्वप्रकाशं प्रकाशते ।
श्रोतुर्बुद्धौ समर्थायां निवर्त्तन्ते गुणो[2] गिरः ॥ १४ ॥

evamabhyāsato nityaṃ svaprakāśaṃ prakāśate ।
śroturbuddhau samarthāyāṃ nivarttante guṇo giraḥ ॥14॥

Tr. Such a regular practice enkindles the light of the Self. The observer, through his power of discrimination (*buddhi*) fails to explain its nature. 14.

तदभ्यासवशादेव स्वतो ज्ञानं प्रजायते ।
अतो योगी राजयोगं प्रभजेत निरन्तरम् ॥ १५ ॥

tadabhyāsavaśādeva svato jñānaṃ prajāyate ।
ato yogī rājayogaṃ prabhajeta nirantaram ॥ 15 ॥

Tr. Such a practice enables spontaneous revelation of wisdom. Therefore, the *yogī* continuously enjoys *rājayoga*. 15.

ज्ञानं[3] कारणमानन्दो यदा[4] नोत्पद्यते भृशम् ।
अभ्यासं कुरुते योगी तदा संगविवर्जितः ॥ १६ ॥

jñānaṃ kāraṇamānando yadā notpadyate bhṛśam ।
abhyāsaṃ kurute yogī tadā saṅgavivarjitaḥ ॥ 16 ॥

Tr. When no more knowledge (cognition), cause (and effects relationship) or joy take place, then a *yogī* undertakes the practice with a detached attitude. 16.

यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह ।
तदभ्यासवशादेव स्वतो ज्ञानं[5] प्रवर्त्तते ॥ १७ ॥

yato vāco nivarttante aprāpya manasā saha ।
tadabhyāsavaśādeva svato jñānaṃ pravarttate ॥ 17 ॥

Tr. When both speech and mind cease to function, such a practice (state) alone gives rise to natural flow of wisdom. 17.

साधनादमलं ज्ञानं स्वयं स्फुरति तद्ध्रुवम् ।
आनन्दो जायते ज्ञानात् परानन्दोऽमृतं स्मृतम् ॥ १८ ॥

sādhanādamalaṃ jñānaṃ svayaṃ sphurati taddhruvam ।
ānando jāyate jñānāt parānando'mṛtaṃ smṛtam ॥ 18 ॥

Tr. Through *sādhanā* (practice) pure wisdom certainly

---

1. मभ्यसतो –b. 2. गुणौ –b. 3. ज्ञात –b. 4. पदा –b. 5. ज्ञान –b.

supervenes on its own. Bliss springs from wisdom which is absolute Bliss known as ambrosia. 18.

राजयोगे –

rājayoge –

In (the text of) *rājayoga* –

चित्ते चलति संसारो जायते चाऽचले लयः ।
तस्माच्चित्तं स्थिरं कुर्याद् औदासीन्यपरायणः ॥ १९ ॥

citte calati saṃsāro jāyate cā'cale layaḥ ।
tasmāccittaṃ sthiraṃ kuryād audāsīnyaparāyaṇaḥ ॥ 19 ॥

Tr. When the mind functions, the world appears (as real) and when it does not, the world disappears. Therefore, one should make the mind stable through detachment. 19.

यदा भवेदुदासीन[1]स्तदा तत्वं प्रकाशते ।
स्वयं प्रकाशिते तत्वे स्वानन्दस्तत्क्षणात् भवेत् ॥ २० ॥

yadā bhavedudāsīnastadā tatvaṃ prakāśate ।
svayaṃ prakāśite tatve svānandastatkṣaṇāt bhavet ॥ 20 ॥

Tr. When one is detached, then alone the *tatva* (Self) is revealed. When *tatva* (Self) reveals on its own, immediate Bliss of Self is experienced. 20.

आनन्देन च सन्तुष्टः सदाभ्यासरतो भवेत् ।
सदाभ्यासे स्थिरीभूते न विधिर्नैव च क्रमः ॥ २१ ॥

ānandena ca santuṣṭaḥ sadābhyāsarato bhavet ।
sadābhyāse sthirībhūte na vidhirnaiva ca kramaḥ ॥ 21 ॥

Tr. Drawing contentment from Bliss, one should involve in consistent practice. When consistent practice gets well settled, there remains no need for regimen or order. 21.

न किञ्चिच्चिन्तयेद्योगी ह्यौदासीन्यपरो भवेत् ।
न किञ्चिच्चिन्तनादेव स्वयं तत्वं प्रकाशते ॥
स्वयं प्रकाशिते तत्वे तत्क्षणात्तन्मयो भवेत् ॥ २२ ॥

na kiñciccintayedyogī hyaudāsīnyaparo bhavet ।
na kiñciccintanādeva svayaṃ tatvaṃ prakāśate ॥
svayaṃ prakāśite tatve tatkṣaṇāttanmayo bhavet ॥ 22 ॥

---

1. भवेददासीन –b.

Tr. A *yogī* should not think of anything at all and should rather remain indifferent. Freedom from thoughts reveals the Self. When Self is revealed, one gets instantly merged (into it). 22.

मनोदृश्यमिदं[1] सर्वं[2] यत्किञ्चित् सचराचरम् ।
मनसस्तु उन्मनीभावो द्वैताभावं प्रचक्षते ॥ २३ ॥

manodṛśyamidaṃ sarvaṃ yatkiñcit sacarācaram ।
manasastu unmanībhāvo dvaitābhāvaṃ pracakṣate ॥23॥

Tr. All animate or inanimate (world) is but mind's projection. On attaining the state of *unmanī*, one perceives the absence of duality. 23.

सदा जाग्रदवस्थायां सुप्तवद् योऽवतिष्ठते ।
निःश्वासोच्छ्वासहीनश्च निश्चितं मुक्त एव सः ॥ २४ ॥

sadā jāgradavasthāyāṃ suptavad yo'vatiṣṭhate ।
niḥśvāsocchvāsahīnaśca niścitaṃ mukta eva saḥ ॥ 24 ॥

Tr. One who in the state of awakening, remains always as if in sleep and remains without inhalation or exhalation, is indeed a liberated one. 24.

निद्रादौ जागरस्यान्ते यो भावस्तूपजायते ।
तं भावं भावयन् योगी निश्चितं मुक्त एव सः ॥ २५ ॥

nidrādau jāgarasyānte yo bhāvastūpajāyate ।
taṃ bhāvaṃ bhāvayan yogī niścitaṃ mukta eva saḥ ॥25॥

Tr. The *bhāva* (a state) which prevails before entering into sleep and after (at the end of) awakening should be contemplated upon by a *yogī*. Thus he certainly gets liberation. 25.

यथा सुप्तोत्थितः कश्चिद् विषयान् प्रतिपद्यते ।
जागर्त्त्येव ततो योगी योगनिद्राक्षयात्तथा ॥ इति ॥ २६ ॥

yathā suptotthitaḥ kaścid viṣayān pratipadyate ।
jāgarttyeva tato yogī yoganidrākṣayāttathā ॥ *iti* ॥ 26 ॥

Tr. Just as one recollects all the objects after getting up from sleep. Similarly, a *yogī* awakens after coming out of *yoganidrā*. 26.

---

1. मनोदशामिदं –b. 2. सर्वे –b.

योगबीजे ईश्वर उवाच –

yogabīje īśvara uvāca—

***īśvara* maintains in *yogabīja*—**

हकारेण बहिर्याति सकारेण विशेत् पुनः ।
हंस हंसेति मन्त्रोऽयं सर्वे जीवा जपन्ति[1] वै ॥ २७ ॥

hakāreṇa bahiryāti sakāreṇa viśet punaḥ ।
haṃsa haṃseti mantro'yaṃ sarve jīvā japanti vai ॥ 27 ॥

Tr. With '*ha*' it moves out and with '*sa*' it enters again . All the *jīvas* (embodied souls) chant this *mantra* '*haṃsa*', '*haṃsa*'. 27.

गुरुवाक्यात् सुषुम्णायां विपरीतो भवेज्जपः[2] ।
सोऽहं सोऽहमिति प्राप्तः मन्त्रयोगस्तदोच्यते ॥ २८ ॥

guruvākyāt suṣumṇāyāṃ viparīto bhavejjapaḥ ।
so'haṃ so'hamiti prāptaḥ mantrayogastadocyate ॥ 28 ॥

Tr. Guidance of a *guru* reverses the process of repetition in *suṣumnā* in the form of '*so'ham*', '*so'ham*' which is known as *mantrayoga*. 28.

प्रतीतिर्मन्त्रयोगाच्च जायते पश्चिमे पथि ।
हकारेण तु सूर्योऽसौ ठकारे[3]णेन्दुरुच्यते ॥ २९ ॥

pratītirmantrayogācca jāyate'paścime pathi ।
hakāreṇa tu sūryo'sau ṭhakāreṇendurucyate ॥ 29 ॥

Tr. '*ha*' represents *sūrya* (sun), while '*ṭha*' represents *indu* (moon). One experiences this *mantrayoga* in the posterior path *(suṣumnā)*. 29.

हंसेन[4] ग्रस्यते जाड्यं[5] सर्वदोषसमुद्भवम् ।
क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् ॥ ३० ॥

haṃsena grasyate jāḍyaṃ sarvadoṣasamudbhavam ।
kṣetrajñaḥ paramātmā ca tayoraikyaṃ yadā bhavet ॥30॥

Tr. By union of *kśetrajña (ātmā)* and *paramātmā*, the inertia which is the root cause of all demerits is removed by *haṃsa*. 30.

---

1. जयन्ति –b. 2. भवे जये—b. 3. टकारे –b. 4. हठेन –b. 5. जाग्रं –b.

तदैक्यसाधिते देवि चित्तं याति विलीनताम् ।
पवनः स्थैर्यमायाति लययोगोदये सति ॥ ३१ ॥
tadaikyasādhite devi cittaṃ yāti vilīnatām ।
pavanaḥ sthairyamāyāti layayogodaye sati ॥ 31 ॥

Tr. O *devi*! When this union takes place, the mind becomes absorbed, *prāṇa* is stabilized and the state of *layayoga* appears. 31.

लयी सम्प्राप्यते सौख्यं स्वात्मानं परमं पदम् ।
अणिमादिपदं प्राप्तो राजते राजयोगतः ॥ ३२ ॥
layī samprāpyate saukhyaṃ svātmānaṃ paramaṃ padam
aṇimādipadaṃ prāpto rājate rājayogataḥ ॥ 32 ॥

Tr. One who attains *laya* enjoys Bliss of the Self and the Transcendental State. After gaining *aṇimā* etc., one excels through *rājayoga*. 32.

प्राणापानसमायोगे ज्ञेयं योगचतुष्टयम् ।
संक्षेपात् कथितं वा[1] विनान्यथा शिवभाषितम्[2] ॥ इति ॥ ३३ ॥
prāṇāpānasamāyoge jñeyaṃ yogacatuṣṭayam ।
saṃkṣepāt kathitaṃ vā vinānyathā śivabhāṣitam ॥*iti*॥33॥

Tr. Four kinds of *yoga* should be understood as union of *prāṇa* and *apāna*. It is all narrated in a nut shell all of which is said by *śiva*. 33.

हठप्रदीपिकायाम् —
haṭhapradīpikāyām —
It is stated in *haṭhapradīpikā*—

सर्वे हठलयोपाया राजयोगाय केवलम् ।
राजयोगसमारूढः पुरुषः कालवञ्चकः ॥ ३४ ॥
sarve haṭhalayopāyā rājayogāya kevalam ।
rājayogasamārūḍhaḥ puruṣaḥ kālavañcakaḥ ॥ 34 ॥

Tr. All the *haṭha* and *laya* practices are meant for accomplishment of *rājayoga*. On attaining *rājayoga*, one transcends *kāla*. 34.

---
1. वि –b. 2. शिवभाषितः — a.

अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं[1] महत् ।
लयामृतमयं सौख्यं राजयोगादवाप्यते ॥ इति ॥ ३५ ॥

astu vā māstu vā muktiratraivākhaṇḍitaṃ mahat ।
layāmṛtamayaṃ saukhyaṃ rājayogādavāpyate ॥ *iti* ॥35॥

Tr. There may or may not exist a state of (final) emancipation, but this certainly is a state of profound and uninterrupted Bliss. This Blissful absorptive state is attained through *rājayoga*. 35.

॥ इति सुन्दरदेवविरचितायां हठतत्त्वकौमुद्यां राजयोगनिरूपणोद्योतः ॥

॥ iti sundaradevaviracitāyāṃ haṭhatatvakaumudyāṃ rājayoganirūpaṇodyotaḥ ॥

Here ends the chapter narrating *rājayoga* in *haṭhatatvakaumudī* composed by *sundaradeva*.

1. मुक्तिस्तत्रैवाखण्डितं तं -b.

Chapter—56

अथैवं योगारूढेन कालवञ्चनार्थं स्वसमुपस्थितकालज्ञानार्थं कालज्ञानं सम्पादनीयम् ॥

athaivaṃ yogārūḍhena kālavañcanārthaṃ svasamupasthitakālajñānārthaṃ kālajñānaṃ sampādanīyam ॥

Tr. A *yogārudha* should learn the knowledge of *kāla* (time of death) so that he can know the time of approaching death and thus he can deceive death (consciously preparing to pass away).

तत्कालज्ञानसमासः कथ्यते –

tatkālajñānasamāsaḥ kathyate—

Here follows a brief sketch of the knowledge of approaching death --

तथा चोक्तं मार्कण्डेयपुराणे –

tathā coktaṃ mārkeṇḍeyapurāṇe —

It is stated in *mārkaṇḍeya-purāṇa*—

अरिष्टानि महाराज शृणु वक्ष्यामि[1] तानि ते ।
येषामालोकनान्मृत्युं निजं जानाति योगवित् ॥ १ ॥

ariṣṭāni mahārāja śṛṇu vakṣyāmi tāni te ।
yeṣāmālokanānmṛtyuṃ nijaṃ jānāti yogavit ॥ 1 ॥

Tr. O king! Listen to me narrating the signs of approaching death. By knowing this, a *yogī* learns about (his time of approaching) death. 1.

यस्य वै भुक्तमात्रस्य हृदयं बाधते क्षुधा ।
जायते दन्तघर्षश्च स गतासुरसंशयम् ॥ २ ॥

yasya vai bhuktamātrasya hṛdayaṃ bādhate kṣudhā ।
jāyate dantagharṣaśca sa gatāyurasaṃśayam ॥ 2 ॥

Tr. One certainly has exhausted life, who experiences hunger even after taking food and clenching of the teeth. 2.

ऊर्ध्वा च दृष्टिर्न च संप्रतिष्ठा
ता[2] रक्ता[3] पुनः सम्परिवर्त्तमाना[4] ॥

---

1. महाराजन् मृण्डवस्यामि –b. 2. दृष्टिर्नचसंप्रतिष्ठिता –b. 3. त्यक्त्वा –b. 4. सेपर्वर्तमाना –b

मुखस्य चोष्मा[1] शिशिरा च नाभिः
शंसन्ति[2] पुंसामपरं शरीरम् ॥ ३ ॥

ūrdhvā ca dṛṣṭirna ca sampratiṣṭhā
tā raktā punaḥ samparivarttamānā ॥
mukhasya coṣmā śiśirā ca nābhiḥ
śaṃsanti puṃsāmaparaṃ śarīram ॥ 3 ॥

Tr. The body of a person perishes to take up another when one's eyes are upturned but unstable and red, the mouth becomes hot and the navel is cool. 3.

स्ववस्त्रममलं शुक्लरक्तं पश्यत्यथासितम् ।
यः पुमान् मृत्युमासन्नं तस्यापि हि विनिर्दिशेत् ॥ ४ ॥

svavastramamalaṃ śuklaraktaṃ paśyatyathāsitam ।
yaḥ pumān mṛtyumāsannaṃ tasyāpi hi vinirddiśet ॥ 4 ॥

Tr. A person has exhausted the life span and faces death when he sees his white cloth turning into red or black. 4.

अरश्मिबिम्बं सूर्यं[3] वा वह्निं[4] चैवांशुमालिनम् ।
दृष्ट्वैकादशमासांस्तु नरो वर्षं स जीवति ॥ ५ ॥

araśmibimbaṃ sūryaṃ vā vahniṃ caivāṃśumālinam ।
dṛṣṭvaikādaśamāsāṃstu naro varṣaṃ sa jīvati ॥ 5 ॥

Tr. A man who does not see the rays of the luminous sun and fire does not live beyond eleven months. 5.

वमेन् मूत्रं पुरीषं च यः स्वर्णरञ्जितं[5] तथा[6] ।
प्रत्यक्षमथवा स्वप्ने जीवितं[7] दशमासिकम् ॥ इति ॥ ६ ॥

vamen mūtraṃ purīṣaṃ ca yaḥ svarṇarañjitaṃ tathā ।
pratyakṣamathavā svapne jīvitaṃ daśamāsikam ॥ *iti* ॥6॥

Tr. One who vomits urine or faeces yellow in colour in a state of awakening or dream, lives only for ten months. 6.

तथा च स्कान्द[8]पुराणे –

tathā ca skāndapurāṇe—

It has been stated in *skandapurāṇa*—

1. मुखस्यघोष्मा –b. 2. शंसति —b. 3. सूर्य —b. 4. वह्नि –b. 5. स्वर्णरंजित –b. 6. यथा –b. 7. जीवित –b. 8. स्कन्द –b.

वामनासापुटे यस्य वायुर्वाति दिवानिशम् ।
अखण्डमेकं तस्यायुर्नश्यत्यब्दत्रयेण[1] हि ॥ ७ ॥

vāmanāsāpuṭe yasya vāyurvāti divāniśam ।
akhaṇḍamekaṃ tasyāyurnaśyatyabdatrayeṇa hi ॥ 7 ॥

Tr. One whose breath is flowing continuously through left nostril alone for the day and night will face death in three years. 7.

अहोरात्रं त्र्यहोरात्रं[2] रविर्वहति सन्ततम् ।
आद्येकवर्षं[3] तस्येह जीवितावधिरुच्यते ॥ ८ ॥

ahorātraṃ tryahorātraṃ ravirvahati santatam ।
ādyekavarṣaṃ tasyeha jīvitāvadhirucyate ॥ 8 ॥

Tr. If the breath is continuously flowing through right nostril for one or three days, it is said that such a person lives only for one year. 8.

वहेन्नासापुटे युगे दशाहनि[4] निरन्तरम् ।
वायुश्चेत् प्रतिसंक्रान्तिं[5] तदा जीवेदृतुत्रयम् ॥ ९ ॥

vahennāsāpuṭe yuge daśāhani nirantaram ।
vāyuścet pratisaṃkrāntiṃ tadā jīvedṛtutrayam ॥ 9 ॥

Tr. If both the nostrils are equally dominant for ten days, one lives for three seasons. 9.

नासावर्त्मद्वयं[6] हित्वा मातरिश्वामुखद्वमन्[7] ।
शंसे तस्माद्धिया चार्वाक् प्रयाणं तस्य खाध्वनि ॥ १० ॥

nāsāvartmadvayaṃ hitvā mātariśvāmukhadvaman ।
śaṃse tasmāddhiyā cārvāk prayāṇaṃ tasya khādhvani 10

Tr. If the breath flows through the mouth and not through the nose, it is apprehended that such a person heads towards death. 10.

सूर्ये सप्तमराशिस्थे जन्मर्क्षे च निशाकरे[8] ।
पौष्णः[9] स कालो नेष्टव्यो यदा याम्ये रविर्वहेत् ॥ ११ ॥

1. तस्यार्युर्नश्यत्यःब्दत्रयैण –b. 2. त्रहोरात्रं –b. 3. आद्येकवर्षे —b. 4. दशाहानि –b. 5. संकान्ति –b. 6. वर्तमद्वयं –b. 7. द्धमन् —b. 8. विनाशाकरे –b. 9. पौष्यः – a.

sūrye saptamarāśisthe janmarkṣe ca niśākare ।
pauṣṇaḥ sa kālo neṣṭavyo yadā yāmye ravirvahet ॥ 11 ॥

Tr. When the sun is passing through the seventh sign of the zodiac and the moon is in the birth zodiac, when there is *revatī* constellation and the *prāṇa* moves through the right nostril, it is not a favourable time. 11.

अकस्मात्तस्य तत्काले मृत्युः सन्निहितो भवेत्[1] ।
चिन्तनीयः प्रयत्नेन स कालो मृत्युभीरुणा ॥ १२ ॥

akasmāttasya tatkāle mṛtyuḥ sannihito bhavet ।
cintanīyaḥ prayatnena sa kālo mṛtybhīruṇā ॥ 12 ॥

Tr. Such a person faces death suddenly at that very time. One who is scared of death should carefully learn about (approaching) death. 12.

अकस्माद्वीक्षते[2] **यस्तु पुरुषं कृष्णपिंगलम्**[3] ।
तस्मिन्नेव क्षणे रूपं स जीवेद्[4] **वत्सरद्वयम् ॥ १३ ॥**

akasmādvīkṣate yastu puruṣaṃ kṛṣṇapiṅgalam ।
tasminneva kṣaṇe rūpaṃ sa jīved vatsaradvayam ॥ 13 ॥

Tr. One who suddenly sees the figure of a twany person lives only for two years. 13.

यस्य वीर्यं मलं मूत्रं क्षुतं[5] **मूत्रं मलं तु वा ।**
इहैकदा[6] **चेत् पतते वर्षं**[7] **तस्यायुरीरितम् ॥ १४ ॥**

yasya vīryaṃ malaṃ mūtraṃ kṣutaṃ mūtraṃ malaṃ tu vā ।
ihaikadā cet patate varṣaṃ tasyāyurīritam ॥ 14 ॥

Tr. One lives for one year if one passes out semen, faeces, urine and sneezing simulteneously. 14.

इन्द्र[8]**वृन्दनिभं व्योम्नि नागवृन्दं**[9] **निरीक्षते**[10] ।
इतस्ततः प्रचलितं षण्मासं तु जीवति ॥ १५ ॥

indravṛndanibhaṃ vyomni nāgavṛndaṃ nirīkṣate ।
itastataḥ pracalitaṃ ṣaṇmāsaṃ tu jīvati ॥ 15 ॥

---

1. भवेवे –b. 2. द्वीक्ष्यते –b. 3. पिंगल –b. 4. संजीवेद् –b. 5. क्षत –b. 6. इहैकं दा –a. 7. वर्षे –b. 8. इन्दु –b. 9. वृन्द –b. 10. निरीक्ष्यते –b.

Tr. One who sees the group of snakes in the sky like a rainbow, which moves a bit here and there, may live only for six moths. 15.

छाया प्रकम्पते यस्य देहबन्धेऽपि निश्चले ।
कृतान्तदूता बध्नन्ति चतुर्थे मासि तं नरम् ॥ १६ ॥

chāyā prakampate yasya dehabandhe'pi niścale ।
kṛtāntadūtā badhnanti caturthe māsi taṃ naram ॥ 16 ॥

Tr. When the shadow shakes even though the person remains steady, such a person may live only for four months. 16.

मतिर्भ्रश्येच्[1]चलेद्वाणी धनुरैन्द्रं निरीक्षते ।
रात्रौ चन्द्रद्वयं चैव दिवा च द्वौ दिवाकरौ ॥ १७ ॥

matirbhraśyeccaledvāṇī dhanuraindraṃ nirīkṣate ।
rātrau candradvayaṃ caiva divā ca dvau divākarau ।17।

दिवा सतारका चन्द्रं रात्रौ व्योम वितारकम् ।
युगपच्च चतुर्दिक्षु[2] शाक्रं कोदण्डमण्डलम् ॥ १८ ॥

divā satārakā candraṃ rātrau vyoma vitārakam ।
yugapacca caturddikṣu śākraṃ kodaṇḍamaṇḍalam ।18।

भूधरे भूधराग्रे वा गन्धर्वनगरालयम् ।
दिवा पिशाचनृत्यं च ह्येते पञ्चत्वहेतवः ॥ १९ ॥

bhūdhare bhūdharāgre vā gandharvanagarālayam ।
divā piśācanṛtyaṃ ca hyete pañcatvahetavaḥ ॥ 19 ॥

सर्वेष्वेतेषु चिह्नेषु यद्येकमपि वीक्षते[3] ।
तदा मासावधि[4] मृत्युं प्रतीक्षेत न चाधिकम्[5] ॥ इति ॥ २० ॥

sarveṣveteṣu cihneṣu yadyekamapi vīkṣate ।
tadā māsāvadhi mṛtyuṃ pratīkṣeta na cādhikam ॥*iti*॥20।

Tr. One whose mind and speech are shaky, sees a rainbow, two moons in the night or two suns in the day, moon along with the stars in the day or the night-sky without stars, simultaneously sees the rainbow in all the four directions, the

---

1. मतिभ्रश्ये —b. 2. युगपच्चचतुर्दिक्षु –b. 3. वीक्ष्यते –b. 4. मासावधिं –b. 5. मृत्युप्रतीदोतनचाधिकं –b.

city of the demigods in the mountain or at the top of it, dancing of the demons (*piśāca*) in the day — if one sees anyone of these signs, one does not live for more than one month. 17-20.

अथ छायापुरुषलक्षणम् —

atha chāyāpuruṣalakṣaṇam —

Here follows the description of *chāyāpuruṣa* (examination of the shadow of a person) —

एकान्ते विजने विधाय तरणिं पृष्ठिस्थिरोऽलं निजाम्
छायां कण्ठतटे ततोऽम्बरतटं वीक्षेत शम्भुं ततः ॥
नूनं पश्यति दैशिको मनुजयेनाष्टोत्तरो यच्छतम्
कर्पूरप्रवरावदातवपुषं नानाकृतिं[1] सुन्दरम् ॥ २१ ॥

ekānte vijane vidhāya taraṇiṃ pṛṣṭhisthiro'laṃ nijām
chāyāṃ kaṇṭhataṭetato'mbaratataṃ vīkṣeta śambhuṃtataḥ ॥
nūnaṃ paśyati daiśiko manujayenāṣṭottaro yacchatam
karpūrapravarāvadātavapuṣaṃ nānākṛtiṃ sundaram ॥ 21 ॥

Tr. In a lonely place one should turn the back towards the sun. One should see one's own shadow from throat below and then he should visualize the same in the sky. One should chant the *mantra* as guided by the *guru* for hundred and eight times. Thus one indeed sees *śambhu* and different beautiful forms as bright as camphor. 21.

मृत्युर्गुल्फपदोदरप्रतिहतौ वर्षन्तदर्धद्वयं
नष्टे दक्षकरे स्वबन्धुमरणं वामेऽगनाया मृत्ति-
जंघोनं न च[2] कन्धरो न मुरगाहानिः[3] ध्रुवं दक्षदोर्
मूर्धभौमशिरा[4] तु मासमरणं छायाविलोपे क्षणात् ॥ २२ ॥

mṛtyurgulphapadodarapratihatau varṣantadardhadvayaṃ
naṣṭe dakṣakare svabandhumaraṇaṃ vāme'ṅganāyā mṛtti-
jaṅghonaṃ na ca kandharo na muragāhāniḥ dhruvaṃ dakṣador
mūrdhabhaumaśirā tu māsamaraṇaṃ chāyāvilope kṣaṇāt ॥ 22 ॥

Tr. If one does not see heels, legs and abdomen in the shadow one faces death in one year, and if right hand is not seen one's relatives die in six months. If the left side is not visible one faces loss of wife. If thigh and shoulder are not seen one

1. नानीकृतं –b. 2. नव –b. 3. हानि –b. 4. मूर्धम्यांमऽशिरा –b.

certainly dies. If the right hand, head and *bhaumaśirā* are not seen suddenly (in the shadow) one dies in a month. 22.

हन्यानिले[1] मासषट्केन मृत्युः कृष्णे[2] पीते त्रासरोगौ[3] भवेताम् ।
उद्योगः[4] स्याद् भूरिवर्णस्वरूपे छायापुंसो[5] लक्षणं प्रोक्तमेतत्[6] ॥ २३ ॥

hanyānile māsaṣaṭkena mṛtyuḥ
kṛṣṇe pīte trāsarogau bhavetām ॥
udyogaḥ syād bhūrivarṇasvarūpe
chāyāpuṃso lakṣaṇaṃ proktametat ॥ 23 ॥

Tr. If the *anila (prāṇa)* is waning, one faces death in six months. If a person turns black or yellow, fear and ailments arise. If a person turns into different colours, one faces troubles. This is the narration of signs of *chāyāpuruṣa*. 23.

मन्त्रस्तु –

mantrastu—

***mantra* for *chāyāpuruṣa*—**

ओं ह्रीं[7] परब्रह्मणे नमः ॥

oṃ hrīṃ parabrahmaṇe namaḥ.

इति छायापुरुषलक्षणम् ॥

iti chāyāpuruṣalakṣaṇam ॥

Here ends the narration of *chāyāpuruṣa*.

हठविद्या परं गोप्या योगिना सिद्धिमिच्छता ।
भवेद्वीर्यवती गुप्ता निर्वीर्या तु प्रकाशिता ॥ इति ॥ २४ ॥

haṭhavidyā paraṃ gopyā yoginā siddhimicchatā ।
bhavedvīryavatī guptā nirvīryā tu prakāśitā ॥ *iti* ॥ 24 ॥

Tr. The science of *haṭha* is to be carefully kept secret if one desires to gain success. If well protected, the *vidyā* (science) yields good results, if not, it becomes futile. 24.

विस्तरस्तु मत्कृतयोगहृदये द्रष्टव्य इति दिक् ॥

vistarastu matkṛtayogahṛdaye draṣṭavya iti dik ॥

For a detail account one may consult *yogahṛdaya* authored by me.

---

1. इत्यांनीले –b. 2. कृदमे –b. 3. न्नासरोगौ –b. 4. उद्यागः –b. 5. छायार्युसो –b. 6. प्रोक्तमेतत्तु –b. 7. ह्री –b.

सुन्दरस्य कृतिः सैषा हठहृत्तत्व[1]कौमुदी ॥
श्रीनृसिंहात्मादिनाथप्रीत्यै भूयाद्धठप्रसूः ॥ २५ ॥

sundarasya kṛtiḥ saiṣā haṭhahṛttatvakaumudī ।
śrīnṛsiṃhātmādināthaprītyai bhūyāddhaṭhaprasūḥ ॥25॥

Tr. *haṭhahṛttatvakaumudī* is the composition of *sundaradeva* which may please *śrīnṛsiṃha* and *ādinātha* and which may promote the science of *haṭha*. 25.

॥ इति श्रीकाश्यपगोत्रपवित्र-
देववंशा[2]वतंसकाशिस्थद्विजवर-
विश्वनाथदेवात्मजगोविन्ददेव-
सुतसुन्दरदेव[3]विरचितायां हठतत्वकौमुद्यां[1]
कालवञ्चनोद्योतः ॥

॥ iti śrīkāśyapagotra-pavitra-devavaṃśāvataṃsa-kāśistha-
dvijavara-viśvanāthadevātmaja-govindadeva-suta-
sundaradeva-viracitāyāṃ haṭhatatvakaumudyāṃ
kālavañcanodyotaḥ ॥

Here ends the chaper on the signs of approaching death in *haṭhataṭvakaumudī* composed by *sundaradeva*, the son of *govindadeva*, the grand son of *viśvanāthadeva* who was a respected *brāhmaṇa* descendent of a virtuous *brāhmaṇa* of *deva* dynasty belonging to *śrīkāśyapa* clan resident of *kāśi*. 9.

॥ इति राजयोगोल्लासः नवमः ॥ ९ ॥

॥ iti rājayogollāsaḥ navamaḥ ॥ 9 ॥

1. हठह्रतत्व b. 2. देवर्व्यंशा –b. 3. देववैद्य b. 4. हठहृतत्वकौमुद्यां b.

Here ends the ninth *ullāsa* named *rājayoga*.

॥ समाप्तेयं[1] हठतत्वकौमुदी[2] ॥

॥ samāpteyaṃ haṭhatatvakaumudī ॥

Here ends *haṭhatatvakaumudī*.

॥ ॥ शुभं भवेत्[3] ॥ ॥

॥ ॥ śubhaṃ bhavet ॥ ॥

May it be auspicious.

॥ ॥ श्रीसंवत् १९४६[4] ॥ ॥

॥ ॥ śrīsamvat ॥ ॥

***śrīsaṃvat* 1946.**

***

1. समाप्तोयं –b. 2. हठहृतत्वकौमुदी –b. 3. अनुपलब्धपाठः —b. 4. संवत् १९३४ –b.

Glossary

A

abja—synonym for *padmāsana*, lotus posture.

adharā— a state when *prāṇa* is held for a couple of *palas*.

ādhāra— vital points which are sixteen in number like *mūlādhāra* etc.

adhimātratama sādhaka—a *yoga* practitioner who excels in all the *yoga* practices.

adhyāropa— superimposition (a Vedantic term).

ādimāyā— a synonym for *śāmbhavī*.

ādiśakti—the primal energy, the unmanifest cause of creation.

agni—the bodily fire said to be in the form of *pitta* (bile).

aihikasukha— worldly pleasure.

ajagranthi—a synonym for *brahmagranthi*.

ajapāgāyatrī— the *mantra* of '*haṃsa*' which an embodied soul continuously chants naturally in the course of exhalation and inhalation.

akṣa—the sense organs.

aliṅga—a synonym for *puruṣa*.

amanaska—the state of consciousness which transcends mind.

āmarasa—undigested food residue in the body which is toxic in nature.

ambumaṇḍala— stands for the nasal half-syllable '*m*'.

amṛta—ambrosia oozing from the moon.

āmuṣmikasukha— spiritual Bliss which occurs on transcending the material world.

anilanirodhana— practice of *prāṇāyāma*.

anuśravika— scriptures which are received through hearing.

apakva—one who is bereft of *yoga*. One who has not undergone penance which symbolizes the fire of *yoga*.

apavāda—exception, exclusion.

ardhacandra—a synonym for *svādhiṣṭhāna*.

arkamukha—mouth of the sun that is the opening of the right nostril.

ārūḍha—one who is accomplished in the path of

yoga.

ārūḍhayoga—a *yogī* who hears *nāda* and the mind is internally absorbed.

asaṃsakti—the fifth state of *jñānabhūmi.*

asu—*prāṇa.*

āśuśukṣaṇi— *śiva* facing north.

ātmasvarūpa—the pure state of the Self.

atikrāntabhāvanī— a stage where in one faces the obstacles.

atimātrā— extra *mātrā* (measure of time) which are four in number as narrated by the ancient sages.

avidyā— ignorance which is the only cause of birth, rebirth and suffering.

aviśeṣa—five *tanmātrās* and *ahaṅkāra.*

āyāma—practice of *prāṇāyāma.*

B

bāla— *śiva* facing the east is called as *bāla.*

bālākṣā— name of a *siddha* who resides at *svādhiṣṭhāna cakra.*

bhāvanā— feeling, attitude, emotion.

bhūtajaya—control over the *bhūtas* (elements).

bīja- *bindu* in the male body and *rajas* in the female body which represents the Absolute Principle. It also means semen which is considered to be the embodiment of *śiva* in the human body, which represents moon.

bījabhāva— foundation in the practice of *yoga* in the form of practice of *yama* and *niyama.*

bindujaya—success in making the *bindu* stable in the body.

brahmabodha— attainment of *brahma*-hood.

brahmadhamanī— a synonym for *suṣumṇā.*

brahmadvāra—the opening of *brahmarandhra.*

brahmagranthi—this is a knot responsible for creation located below the navel.

brāhmamuhūrta— early morning, two hours before the sunrise.

brahmapura—the abode of *brahma.*

brahmasuṣira—an aperture in the head.

brahmasūtra—a

synonym for *suṣumṇā*.

brahmasvarūpa—the state of *brahma*-hood.

C

cakravāla—a synonym for *iḍā* and *piṅgalā*.

cakrī—an epithet of *viṣṇu*. A synonym for *kuṇḍalinī*.

candra—the moon located at the left side of the body.

candrapraveśa—flow of *prāṇa* thorough the left nostril.

cāraṇā—*cāraṇā* stands for a technique wherein one makes rapid movements of the limbs. There are ten inent *cāraṇās*, others are called *jaghanya*—the subordinate ones.

chagalaṇḍa—*śiva* facing left.

cicchakti—the basic energy in the form of consciousness.

cintāmaṇī—wishfulfilling stone which is equated with the practice of *saṃyama*.

cittaprasāda—pacification of the mind.

D

daṇḍa—a stick, a symbol of control gained over the sense organs..

daṇḍadhāraṇā—one closes *iḍā* and *piṅgalā* by contracting the throat and moves the *prāṇa* through *suṣumṇā*. This is called *daṇḍadhāraṇa*.

daṇḍasthiratva—stability of the spine.

devayāna—the *piṅgalā nāḍi*.

dhāraṇā—repeated attempt to concentrate on one object.

dharmamegha—the state of *samādhi* which a *yogi* enjoys while living.

dhātusaṃkṣobha—aggravation of the bodily constituents.

dhyāna—absorption only in one thought.

druhiṇanilaya—abode of *brahma*.

dūragati—ability to travel to distant places.

dūraśruti—clairaudience

dviraṇḍa—a *siddha* by this name who resides at the *ādhāracakra*.

E

ekāntavāsa — living alone in a desolate place.

ekastambha — a stamp, a support. Here it stands for the embodied soul in the human body.

G

gaganadvāra — doorway to *brahmarandhra*.

garbhajñāna — knowledge of the process of evolution of life.

ghaṇṭikā — uvula.

guṭikāsiddhi — the process of alchemy which solidifies mercury.

H

haṃsapada — also known as *nirvāṇaśakti* located at the core of *brahmarandhra*.

haṃsasvarūpa — the pure state of the Self in the form of *haṃsa*.

hṛdgranthi — the heart.

I

indu — moon said to be flowing through the spinal column.

īśvara-praṇīdhāna — surrendering all the results of action to God.

īśvarī — the origin of all the *nāḍīs* which remains coiled. *kuṇḍalinī*.

ibhajihvā — a synonym for *hastijihvā*.

J

jāragranthi — a synonym for *brahmagranthi*.

jaṭharāgni — gastric fire located two digits above perineum and two digits below the genital. It is red and triangular in shape.

jīvanmukta — a state of liberation while living.

jīvaśakti — a synonym for *kuṇḍalinī*.

jñānaśakti — the power of knowledge.

K

kāla — duration of time which determines a *mātrā*.

kāladaṇḍa — whip of time (death).

kālāgnimūla — the center of the eyebrows.

kālajaya — control over *kāla* (time — death).

kālakūṭa — the deadliest of the poisons.

kālī — the *tāntrika*

Goddess of destruction who is considered the *jīvaśakti* i.e. life force.

kāpālika—a clan of *haṭha*-practitioners shooting out of the tradition of *khaṇḍamata*.

kolhāṭika—a group of people which earn a livelihood by performing small physical feats on the street.

kāma—fire, desire. Desire also is named *śikhī* which has flame like fire.

kāmacāritā—ability to move freely.

kāmadhenu—a mythological wish-fulfilling cow.

kāmākṣā—a synonym for *yoni* (perineum).

kāmarāja—*kāmabīja* which is *klīṃ*.

kandayoni—location of *kanda* which is like the egg of a bird placed above the organ of generation.

kapālakuhara—the cavity in the forehead.

kapilāṅgī—a synonym for *suṣumṇā*.

karaṇa—a synonym for *mudrās*. A synonym for practice of *mudrā*.

karmāra—wheel of *karma*.

karmanāśa—annihilation of *karma*.

karmatrikūṭa—three types of *karma*, namely, *sañcita*, *prārabdha* and *kriyamāṇa*.

karijihvikā—a synonym for *hastijihvikā*.

kaulakīśakti—a synonym for *kuṇḍalinī*.

kāyasiddhi—accomplishment of a fortified body.

kedāra—the confluence that is the center of the eyebrows.

khaga—that which flies in the sky, a bird, *prāṇa*.

khaṇḍamata—a clan of *haṭha*-practitioners.

khecarāvasatha—*khecara* means *hakāra*, *āvasatha* is *īśvara*.

khecarībīja—*bījamantra* of *khecarī* which are *hrīṃ* etc.

kramābhyāsa—sequential practice.

kriyāyoga—worship of *īśvara*- God.

kriyāśakti—the power of action.

L

lakṣya—visualization. According to

advayatārakopaniṣad there are three *lakṣyas*, namely, *antar*, *bāhya* and *madhya*.

liṅgamātra — it comprises *prakṛti* and *buddhi*.

M

madhumatī — an auspicious stage which follows the seven *prāntabhūmis* wherein a *siddha* experiences self-realization.

madhyamārga — the middle channel i.e. *suṣumṇā*.

mahākāla — *śiva* facing upwards is called *mahākāla*.

mahāliṅga — the great *liṅga* which resides at the *yoni* – perineum.

mahāmātrā — *a*, *u* and *m* as considered by the ancients.

mahānandapada — the state of Absolute Bliss.

mahāvidyā — the immovable technique of *khecarī*.

mahāvrata — a vow not to kill any species, in any place, or in any season.

marmasthāna — vital point.

maraṇasadṛśabhāva — a death-like state that supervenes *mahāmudrā*.

mātrā — measure of time which is nine-fold.

māyā — illusion, the very cause of creation.

meru — final stage of *kumbhaka* which may be equated with *kevalakumbhaka*. Spine.

mitāhāra — consumption of unctuous food, keeping one-fourth of the stomach empty.

mitokti — moderate use of speech.

mohinī — the enchanter – goddess *kālī* is so called.

mṛdusādhaka — a *yoga* practitioner of mediocre quality who practices *manuyoga* (rituals).

mṛtāvasthā — a state of pure consciousness wherein one experiences a death-like condition.

mṛtyu — death, when *prāṇa* ceases its movements in the body.

mūlabila — the cavity of *brahmarandhra*.

mumukṣu — one who is keenly devoted to the path of liberation.

muktibhāg — one

who qualifies for liberation.

N

nābhikanda—it resembles a bulbous root placed nine digits above the *ādhāracakra*.

nābhimūla—root of the navel where *bindu* is located and wherefrom *nāda* originates.

navadvāra—nine doors, nine openings in the human body like nostrils, ears etc.

niḥśvāsa—exhalation.

nirālamba—supportless.

nirguṇadhyāna—absorption without a *mantra* is *nirguṇadhyāna*.

nirvāṇakalā—located at *brahmarandhra*.

nirvāṇaśakti—it is located at the core of *brahmarandhra*.

nirvāṇapada—the state of liberation.

niyama—according to the *munis* there are ten *niyamas* viz. belief in God, listening to scriptural doctrines and saints, generosity, modesty, *japa* (chanting) and noble intention etc.

P

padārthābhāvinī—the sixth stage of *jñānabhūmi*.

padmayoni—an epithet of *viṣṇu*.

pakva—one who has undergone the penance of *yoga*. A *sādhaka* who has seasoned in the fire of *yoga*.

pañcabhūtādhidevatā—the five deities presiding in *citrānāḍī* are *brahmā*, *janārdana*, *rudra*, *īśvara* and *sadāśiva*.

pañcādhidaivata—five residing deities of the human body.

pañcamukha—one who has five faces, an epithet of *śiva*.

pañcāsya—one who has five faces, an epithet of *śiva*.

pañcatā—death of the body when *prāṇa* departs it.

pathya—suitable, recommended and wholesome food for a practitioner of *yoga* in the initial phase considering the factors of place and time (season).

paramahaṃsa—one who holds the Supreme

discriminatory knowledge in the form of a *daṇḍa* (stick).

paramapada—the abode of *brahma* which is the aim of a *yogī*.

parānanda—the state of Absolute Bliss.

parapura—another place, the transcendental existence.

paścimapatha—the posterior path that is *suṣumṇā nāḍī*.

pātāla—worlds underneath.

pāvaka—*agni*—the bodily fire which performs ten types of functions in the body.

pinākī— *śiva* facing backwards is called *pinākī*.

piṇḍatatva—the real self, the eternal principle residing in the corporeal frame.

pīṭha—a synonym for *āsana*.

pīṭhastha—one who has mastered the *āsanas*.

pitṛyāna— *iḍānāḍī*.

prakṛti—a state of equilibrium of *satva, rajas* and *tamas*.

pralaya—the process of dissolution of the world.

praṇava—the *mantra* *om*.

prāntabhūmi—level of *yogic* attainment.

prāṇī— a living creature having *prāṇa* moving in and out.

prātibha—intuitional knowledge.

pratyāhāra—withdrawal of the senses from their respective objects.

pratyaya—cognition, function of the senses and the mind faculty.

pudgala—the human body.

puṃpiṇḍa—the corporeal body of a human being.

puṣkarāgrayoni—an epithet of Lord *nārāyaṇa*.

R

rājadanta—the frontal teeth.

rajas—menstrual discharge called *śakti* which represents sun in the human body.

rasa—mercury, plasma that is the immediate product of the digested food which forms the first of the seven bodily constituents.

S

ṣaḍūrmi—distresses which are six—like sorrow,

infatuation, old age, (premature) death, hunger and thirst.

sagarbhakāyāma—*sagarbha-prāṇāyāma* which is practised along with repetition of *om.*

saguṇadhyāna—meditation on several objects. Absorption in one *mantra* in *saguṇa.*

sahaja—the state of *samādhi.* The state of Self-realization which is the natural state.

śakti—powers like *ḍākinī* etc. which resides in the human body.

samādhi—absorption of *prāṇa* with *citta* (mind).

saṃvitti—consciousness.

saṃjñādvaya—duality.

sampradāya—a particular tradition of *yoga.*

saṅketavid—an adept in the secret science of *saṅketa.*

satva—the *satvaguṇa,* light. One of the three *guṇas* which brings light and illumination.

satvāpatti—the fourth stage of *jñānabhūmi.*

śeṣa—the mythological snake on whose head the earth is supposed to be resting.

siddhāntaśravaṇa—listening to the discourses regarding the scriptures.

śītagu—moon.

somakalājala—flow of ambrosia that oozes from the moon placed at the aperture above the uvula.

śmaśāna—crematorium, void that is *brahmarandhra.*

somāmṛta—ambrosia that flows from the moon.

śrāvaṇa—intuitional ability of hearing.

śubhecchā— the first stage of *jñānabbūmi.*

sumeru—the spinal column.

sūrya—the sun that resides in the human body.

sūryapraveśa—entry of *prāṇa* through the right nostril.

suvāṇī— a synonym for *sarasvatī.*

svādhyāya—recitation of *praṇava* etc.

śvāsasaṃrodhana—control of breath, practice of *prāṇāyāma.*

śyāmā— Goddess *kālī*

who is black.

T

tanumānasa—the third stage of *jñānabhūmi*.

tapas—austerity like *kṛcchracāndrāyaṇa* and the like.

tāra—a synonym for *praṇava*—*om*.

tatva—the Self. The mind.

taraṇi—a synonym for *piṅgalā*.

tīrtha—a preceptor, a *guru*.

tripurābālā—Goddess *tripureśvarī*.

turyagā— the seventh stage of *jñānabhūmi*.

U

ucchvāsa—exhalation.

udgītha—a synonym for *om*.

udghāta—strike of the *prāṇa* at the head in the practice of *prāṇāyāma*.

unmanī— the highest mindless or transcendental state of *samādhi*.

upādhirakta—with the attributes.

upasarga—obstacles in the path of *yoga*.

utpannāvasthā— the initial state of spiritual evolution occurring through *yoga*.

utpannayoga—a *yogī* who does not hear *nāda* and the mind is not internally absorbed.

uttamādhāraṇā—*nabhodhāraṇā*.

V

vāgbhavabīja—the *bīja mantra aiṃ*.

vajradaṇḍa—spine.

vālā— death.

vaikṛta—a practice or process which has gone astray.

vairāśā— a *synonym* for *payasvinī*.

varṇāśramakarma—prescribed duties according to ones *varṇa* (caste) and *āśrama*.

vaśī— one who has gained control over the senses.

vetaṇḍajihvā— a synonym for *hastijihvā*.

vicāraṇā— the second stage of *jñānabhūmi*.

videhasiddhi—transcendence of the body while remaining alive.

vijñāna—Self-realization.

vikāra—distraction of the senses.

viśeṣa—the five *mahābhūtas*, five *karmendriyas* (senses) and mind.

bondage and liberation lie on the tip of the tongue. Hence proper use of tongue is essential for achieving perfection. It is therefore laid down that the spiritual adept should concentrate his mind on the tip of tongue, thereafter raise the vital air from the *mūlādhāra* centre upto the highest level. He should meditate on the highest *tattva* which lies beyond all and wherefrom the milky way flows down. If one drinks from that holy water, then within a month he could develop strong body like that of *Vajra*, divine body, divine speech, divine look, and divine intellect. He then visualises the goddess of wealth satiated fully on drinking the highest nectar, sitting on the tip of his tongue. The spiritual adept then is able to acquire the entire kingdom of Yoga. i.e. the body characterised by five treasures viz the *Kuṇḍalinī* power, the *suṣumnā*, the tongue, upper palate, and *brahmarandhra*. All these are instruments for acquiring great powers and ascent to higher spiritual level. When the spiritual adept is able to raise the vital air through the narrow path of *suṣumnā* which is like the spider web going up, replendent with dazzling illumination like thousands of sun, and piercing through the different *cakras*, reaches the level where *Svayambhu* Śiva resides, he is able to drink from the ocean of bliss, cool and refreshing. He then becomes fully satiated by the experience of bliss, and obtains divine vision. He develops the capacity of moving around in the sky, his body free from disease and death. He is able to travel through the three *lokas*. He becomes equipped with the great spiritual powers such as *aṇimā* (capacity to assume the form of atom) etc. He develops within him power equal to that of thousands of elephants.

The text then turns to the esoteric description of the different *nāḍis*. It tells that the resplendent *suṣumnā* lies between two other *nāḍis*, called *iḍā and piṅgalā*, also called the Ganges and Yamuna. The spiritual adept should rest in his Śakti till he experiences himself the ecstatic bliss, following the knowledge of the Supreme

Being. He then experiences surrounded by bliss and peace everywhere, reaching the highest level of spiritual elevation. He then gives up performance of rituals, study of scriptual texts.

He should however engage himself in the worship of the image of Śiva day and night. Such spiritual adept is sure to attain immortality and omniscience within six months. He is able to pierce his way through the 'Stars and moons' and visualize the dazzling light comparable to that of thousands of suns.

He remains enjoying the glory of his spiritual attainments, if he chooses to remain in this world in mortal frame to dispense divine grace to others. Later at the time of cosmic dissolution, he takes his place in his real divine nature, leaving the mortal frame.

Seventeenth Paṭala

This *Paṭala* containing 60 verses on *anuṣṭup* metre opens with a question posed by the goddess on the nature of *Khecarīvidyā and the yogic discipline leading to its attainment. Lord* Śiva first explains the significance of this spiritual wisdom which has not been described openly in other Tantric texts though it is capable of bestowing the highest *siddhi* and also warding off of old age and death.

Lord Śiva describes the esoteric practices, mainly in terms of the arousal of *Kuṇḍalinī Śakti* though different centres by control of breath. As the *Kuṇḍalinī Śakti* ascends resting in different centres, such as *mūlādhāra* where it rests coiled in the form of the *bindu* on the four petalled lotus, through the *Svādhiṣṭhāna* on the twelve-petalled lotus. *maṇipūra* etc., he has different kinds of spiritual experiences. On these levels exist the different deities whom he visualises. For instance, Brahma. Viṣṇu. Rudra, Īśvara and Sadāśiva exist on the 'level of Ājñā cakra. all radiating their resplendence all around on that particular level. Lord Śiva tells the goddess that all these yogic practices should be performed under the strict

supervision of the teacher who should first test the capacity of disciple before initiating him to the extremely secret yogic discipline. In order to preserve secrecy, the *guru* should choose lonely place for imparting instructions to the disciple. The *guru* then should reveal the secret knowledge which is not available anywhere except from the lips of the teacher. The teacher should be propitiated like a god because he alone can deliver the supreme knowledge capable of bringing about the divine union of the individual with the Supreme Being. The disciple should faithfully obey all commands given by the *guru*, perform the spiritual discipline as instructed by him. Only then he can reach the supreme goal, and not otherwise.

Eighteenth Paṭala

This *Paṭala* containing 72 verses in *anuṣṭup* metre describes in detail all the practices the disciple should perform to reach the supreme goal. The *Kula* worship should be carried out in lonely place, free of disturbance. The place should be properly decorated with flowers, vermilion and prescribed diagrams of *maṇḍalas* and performance where the spiritual adept should sit in proper posture. He should have full control over his breath, mind and senses so that he could concentrate on the divine Śakti laying coiled in the *mūlādhāra Cakra*. By stopping his breath, he should force the divine Śakti to rise up in conjunction with the *nāda* and the radiating illumination till it reaches the Brahmā opening on the top, where he should get it merged in the void, which is the root cause of the emergence of creation. After he reaches that level, the nectar of Kula in the form of bliss gushes forth which he should drink and then enter the region of Kula. He then achieves the highest *siddhi*. This is called the *Khecarīmudrā* which is not revealed even to great yogins. But once the spiritual adept is able to achieve elevation to this high level, he automatically acquires knowledge of all Śāstras, gains mastery over all

languages and is able to compose verses effortlessly with the power so gained. Various kinds of *siddhis* are achieved by the spiritual adept as the Śakti crosses through different centres e.g. when the Śakti crosses the *maṇipūra cakra*, he becomes attractive; when it passes through the *anāhata cakra* he develops extraordinary physical powers; when it crosses *Viśuddha cakra*, he achieves complete freedom from hunger, thirst, old age and disease and so on. Different kinds of experiences that the spiritual adepts have in course of their yogic practices prescribed in the Kula tradition have been described. It is said that within one year the spiritual adept attain *jīvanmukti*. He then is able to see the universe around him is new light, the light of divine illustration. He then is able to retire to divine regions such as *Candradvipa*, Kailāsa which lie beyond the mortal world and enjoy bliss perennially.

Nineteenth Paṭala

This *Paṭala* containing 27 verses in *anuṣṭup* metre describes in detail the mode of contemplation *(dhyāna yoga)* according to the Kula traditions. It enjoins the spiritual adepts to imagine that the entire universe is their own physical body which is replete with bliss of their pure consciousness-nature, after affecting self-extensions or universalisation. When this is achieved by them, they rise above the world of time and space, thereby achieve freedom from death, disease and change.

Twentieth Paṭala

This *Paṭala* containing 31 verses in *anuṣṭup* metre describes in detail the various kinds of yogic powers that the spiritual adepts develop within themselves through deep contemplation and meditation. ❑

मत्स्येन्द्रसंहिता

। ॐ श्री गणेशाय नमः ।

। श्री नाथाय नमः ।

[f 1a]

ॐ वन्दे संभुजगन्नाथं (शम्भु°) सर्वविज्ञानधीमयम्।

सर्वागममहारत्नधाम(म्) सागरमीश्वरम्। ।१। ।

अप्रमेयगुणाधारं सर्वैश्वर्यफलप्रदम।

वन्दे(ऽ)हं शांभवीसूनुं हेरंभं विश्ववन्दितम्। ।२। ।

सर्वशास्त्रकलाधारं सर्वज्ञत्वप्रदायिनी (नीम्)

वागीश्वरीमहं वंदे (वन्दे) वागीश्वर्यप्रसिद्धये (वागैश्वर्य°)। ।३। ।

अशेषदुरितव्रातनीहारकुलभावनः।

शिवादिगुरवो मह्यं प्रसीदं तु (प्रसीदन्तु) कृपालवः। ।४। ।

शिवशैवागमां भोयौ (शिवशैवागमाभ्यां यो) सम्य(क्)-क्रीडाविनोदिनम्।

मत्स्येन्द्रनाथमानौमि (मत्स्येन्द्रनाथं नौमि) सर्वज्ञं योगिनां वरः (वरम्)। ।५। ।

येन शंभुमुखोद्गीतं शास्त्रसारं सुदुर्लभम्।

सम्यग (सम्यगा?) श्रावितं वन्दे मत्स्य (त्स्येन्द्र) नाथमकल्मष्वं (षम्) ।।६। ।

पुरा योगिवरः (योगीवरः) कश्चिदभीक्ष-(च्छ)-त्सिद्धिमात्मनः।

चचार धरणीमेतां निर्ममो निरहंकृतिः। ।७। ।

स पुर्वं (पूर्वं) दासजातीयो नावमारुह्य सागरे।

वडिशेन महामत्स्यानानयत्यति नृ(घृ)णः। ।८। ।

कदावि(चि?)त्पुलिने नद्या गुप्ताचारपरायणान्।
शैवागमोक्तविधिना सपर्यासक्तमानसान्।।६।।

ददर्श ब्राह्मणान्साधून् विविक्ते भक्तिभावनात्।
समासससादरं येवं (?) दृष्ट्वा च वडिक्षा-(शा)-युधः।।१०।।

जालोद्यतकरं तं च दृष्ट्वा त (तेऽ) पि द्विजोत्तमः (माः)।
वभुबुर्व्यथिताः सर्वे षाक (साकं) भयसं-(शं)-किताः।।११।।

स चापि तानुपासाद्य दासः समभिवीक्ष्य च।
अब्रवीत् के भवंतो (भवन्तो)ऽस्मिन्पुलिने(ऽ)त्र समागताः।।१२।।

[f 16]
किमिदं क्रियते कर्म भवद्भिरिह गूहितैः।
व्रत (ब्रूत) मे सकलं विप्रा भवतामत्र संस्थितम्
(संस्थितिम्)।।१३।।

ते चापि प्रोचुर् स भस्याभिः त्र (अस्माभिः) (पूज्यते?) परमेश्वरः।
शम्भुर्गिरिजया साकमर्च्यते शास्त्रमार्गतः।।१४।।

नेदं च विदितं कर्म सर्वज्ञेन शिवेतवं (शिवेतरेण)।
घृणीतं पशुमापाशौ (पशुपाशौ?) च वेदनायातनाहतम।।१५।।

य शिवोक्तामिमां साधु सपर्यां गुप्तमाचरेत्।
जीवन्मुक्त (°मुक्तः) स विज्ञेयः सर्वदीषच (°दोष)भयोत्थितः।।१६।।

तस्माद्विमुक्तैरस्माभिः पूज्यते परमेश्वरः।
प्राक् ध्याय (ध्यात)बहुदीषाणि (-बहुदोषाणि) प्रवदन्ति
बहुर्मुखानि।।१७।।

स सम्यग्वेदिनः पूजामिमां ये विघ्नयन्ति हि।
ते योगिनीशापहताः विनश्यन्त्यचिरेण तु।।१८।।

तस्मात्त्वयापि सन्मार्गरक्षासंप्राप्तबुद्धिमान्।
न वक्तव्यमिमं गुह्यं लोकद्वयजिगीषुणा।१६।।

यदि त्वमिदमन्येषां न वदिष्यसि दासज (कदाचन ?) कदाचन।
षण्मासात्तदयस्य (°मासादासादयसि) स्वसिद्धिं परमदुर्लभाम्।।२०।।

इत्युक्तो (°त्युक्त्वा) वा च (वाचः) तान् भूयः
सान्त्वयन्निव दाशजः (दासजः)।
नाहं वक्ष्यामि भद्रं वः (?) परेषामीदृशीं स्थितिम्।।२१।।

युष्म(द्)द्वेष न मे कश्चि(द्) धूर्य व्रजत निर्भया(याः)।
जालो(ऽ)स्म(द्)दैवतं तेन शयेमेनान्यथालयः (?) ।।२२।।

इत्युक्ता (उक्त्वा) स्ते (ते) न विश्वासं प्राप्य निर्यातिकं (निर्यात्रिकं)
च तम्।
प्रोचुः परमसंतुष्टास्तस्यानुग्रहकारिणः ।।२३।।

किमीहसे धनं दत्तमस्माभिरथवा प्रियम्
विद्यां वा दुर्लभतरां ब्रूहि यत्ते मनोमयम्।।२४।।

तैरुक्तः स महाविद्धि (°सिद्धि)रित्युवाच कृताञ्जलिः।
विद्यां दत्तामभिच्छामि (अभिजानामि) भवद्भिरतिदुर्लभाम्।।२५

[f 2a]
ततश्च (तदस्य) स्ने(ह)वरं भावं दृष्टा (दृष्ट्वा) प्रोचुर्विदां वराः।
अनेनाभृतमत्स्येन महापातकहारिणा।।२६।।

नि(र्द्धू)ताखिलपाया(°पापा) रुचं(रुचां)विद्यां दिव्यामवाश्यसि
(°वाप्स्यसि?)।
इत्युक्तः सेभिषेकानां (साभिषेकानां) सप्रसादां यथाविधि
(विधिः)।।२७।।

दद्रु (ददुः) विद्यां महात्मानो योगिनीनां महोदयाम्
दत्वा विदूयां च संदृस्य (संदृश्य) योगित्वं च धीमतः।।२८।।

प्रोचुर (प्रोचुः) नम (तम्?) कर्मज्ञाः सस्नेहमनुशासनम्।
जपोध्यान परो (जपध्यानपरो) नित्यामिमां विद्यामतन्द्रितः।।२९।।

वर्षत्रयेण या सिद्धिर्जायते ह्यजरामराः
महेश्वरप्रसादेन जायते सिद्धिरुत्तमा। ।३०। ।

षण्मासाज्ञायते सत्यमित्युक्ता (°मित्युक्त्वा) प्रययुर्द्विजाः।
दासो(ऽ)पि तत्परित्यज्य स्वजालवडिशादिकम्। ।३१। ।

त्यक्तसंसारबन्धुश्च पशुपाशविवर्जितः
तस्मिन्नेव सरि(द्) द्वीपे जपन्नास्ते महायशाः। ।३२। ।

तपस्याभिरतस्यास्य विजितेन्द्रियपने (°पद्धतेः)।
वत्सरार्धमतिक्रान्तं अहोरात्र समं तदा। ।३३। ।

षण्माशन्ते (°मासान्ते) महाभागे (°भागं) स्नातुमप्यागतं जले।
जग्राहासाद्य (जग्राह आसाद्य) व (च) महानुग्राहो दैवप्रवोदितः
(°प्रचोदितः)। ।३४। ।

गिरिकूटनिभस्यास्य देहमध्याङ्गतो(ऽ)पि सन्।
नमभाभरं (?) प्रग्व्य (?) स्ततत्कोत (°कोट)रं वह्निना। ।३५। ।

मत्स्यग्रस्तं स्वमात्मान मन्यमानो महाद्युतिः।
तत्रापि जयन्नेव (जपन्नैव) निनाय कतिचिद् दिनम्। ।३६। ।

एतस्मिन्नेव कलि (काले) तु कैशाला(कैलासा)द्रिनिकेतनम्।
पप्रच्छा (पपृच्छा)साद्य गिरिजा योगशास्त्रं सुगोपितम्। ।३७। ।

भगवन्मम सर्वज्ञ शम्भो वक्तुं त्वमर्हसि।
योग (योगं) योगविदां श्रेष्ठ जरामरणनाशनम्। ।३८। ।
[f 2b]
महीधरेन्द्रसुतया पृष्टो (पृष्ट) (उ)वाच महेश्वरः।
नेहाहं संप्रपश्यामि योगं परमदुर्लभम्। ।३९। ।

श्रृणयु स्त्वपरे? देवि सुगोप्यं मृत्युनाशनम्।
तस्माद् विविक्तश्रा (विविक्ताञ्चा) साद्य वसे (वक्षे?)
देशे समाहितः। ।४०। ।

इत्युक्ता (क्त्वा) भगवान् शम्भु गिरीन्द्रसुतया सह।
प्रययौ जलधेद्वीपं (र्द्वीपं) विजनं ब(हु)काननम्।।४१।।

तश (तदा)सीनः क्वचिद देशे विविक्ते विजिते (विजने?) शिवः।
योगशास्त्रं समाचष्ट देव्यै चन्द्रार्द्ध(र्ध)शेषारः (शेखरः)।।४२।।

दासं ग्र(स्त्वा) महामत्स्यः सर्वतः परिचक्रमन्।
तद् द्वीपगह्वरं प्राप्य तथा च विधिचोदितः।।४३।।

तस्योपरिष्टाद् विश्यात्मा (विश्वात्मा) शिवः परमदुर्लभः।
योगशास्त्रं समाचष्ट गिरिजायै सुगोपितम्।।४४।।

मत्स्यदेहगतः श्रीमान् स च दासकुलोत्तमः।
सुस्रा षीदखिलं (अश्रौषीदखिलं) शास्त्रं सम्यक्
शंभुमुखोदगतम् ।।४५।।

य (यः) (पू)र्वं विप्रवाग्वज्र (°वज्र) - हतपातकपर्वतः।
भूयः श्रीशाम्भवं शास्त्रं श्रुतवानमृतोपमम् ।।४६।।

तच्छास्त्रं (स्त्र-) श्रवणोद्भूतं (द्धूत-) महापातकसञ्चयं (सञ्चयः)।
बभूव निर्मलमतिः सर्वज्ञः सर्वयोगिराट् ।। ४७

भगवानपि तत्रैव समासा(सी)नो महेश्वरः।
योगशास्त्रं तदा देव्यै शतकोटिप्रविस्तरम्।।४८।।

नु (उ)वाच चाखिलं तेन शुभं देव्यै सुदुर्लभम्
समाप्य शास्त्र (शास्त्रं) विधिवत् विश्वप(पाः)शङ्करः।।४९।।

गन्तुमैच्छत्स (°मैच्छन् म-) हेशात्मा स्तस्मात्वं (तस्मात स्व) धामपूजितं।
अथोवाच जलौकस्य (स) देहमध्यगतो महान्।।५०।।

[f 3a]
सर्भाक्त (अर्भाष्ट)दर्शनं तस्य शिवस्य परमेष्ठिनः।
भगवंस्त्वन्मुखोद्गीतं शास्त्राणामतिविस्तरात्।।५१।।

ग्राहदेहान्तरस्थेन प्रेरितेन विधानृणा (°तृणा?)।
ममानुग्रहकामेन भवता परमेश्वरः।।५२।।

इदं देशमनुप्राप्य प्रोक्तं शास्त्रमनुत्तमम्।
विप्रदत्तप्रसादस्य भुक्तपातकपद्धृते (°पद्धृतेः)।।५३।।

त्वयोक्तं शाम्भवं शास्त्रं सुकरं भवतु प्रभो।
इति व्याहृतमाकर्ण्य शंभुः (शंभुं) स्मृत्वा मुहुर्त्तकम्।।५४।।

प्रोवाच गिरिजां देवीं सर्वलोकनमस्कृतः।
महादेशोऽयमिति मत्वा मया शुभे।।५५।।

प्रोक्तं योगं तद-(वै)-पि मत्स्योक्तं मर्त्यजन्मना।
मद्भक्तवचनादेव मत्प्रसादपविवतः (प्रभावतः?)।।५६।।

तस्मादस्य पुनर्दास्ये वरं मत्तप्रचोदितः।
सत्यं कर्तुमभिच्छामि (°मभीच्छामि) तत्प्रसादाधृतात्मनाम्।।५७।।

ब्राह्मणानां वचः श्रुत्वा गुप्तज्ञानविदामहम्।
इत्युक्तो(क्त्वो?)त्पादय मत्स्यं तनुज्ञहारस्य (उज्जहारास्य?)
कोष्टतः ।।५८।।

योगिन त्वमु दागत्मा (तमुदारात्मा) भगवान्परमेश्वरः।
सोऽपि दृष्टा (दृष्ट्वा?) तदा रुद्रं सार्द्र (सार्द्धं)
गिरिजया स्थितम्।।५९।।

त्वत्प्रसादं (तत्प्रसादं?) समालश्म्या (समालभ्य?) दिव्यज्ञाननिधिः
स्वयम्।
तुष्टा व (?) परमेशानं एकाग्रच्छदयोगतः।।६०।।
ॐ नमस्ते शम्भवे देव्यै (देवाय) शिवाये (शिवाय) परमेष्टिने।
दिव्ययोगमहाशास्त्रो (°शास्त्र-) शारदायाखिलात्मने ।।६१।।

नमस्ते भिगिने (भोगिने) योगदायिने शुभयोगिने।
महामनय (महासन्नाय) सन्मार्गपालिने मृत्युमूर्तये।।६२।।

[f 3b]

डाकिन्यादिमहासप्तयोगिनी वृन्दमण्डलैः।
सप्ताधारपदे सम्यक् पूजिताया रुपिणे।।६३।।

योगिनीनां चतुः षष्टिः षणा (षण्णां?) मध्यनिवासिने।
परमामृतसंतृप्त-सद्भावानन्द-मूर्तये ।।६४।।

जीवन्मुक्तपदप्राप्तिकारणामृतदायिने।
भक्तानामखिलज्ञानप्रदानासक्तेचेतसे।।६५।।

स्वप्रसादसमु-क्तं (?)भक्तपातकराशये।
स्वप्रजाप्यान् (?)जप्यादि वि(घ्न)कोटिविभेदिने ।।६६।।

श्रीशांभवमहाशास्त्र प्रधानसुरधेनवे।
कल्पद्रुमाय भक्तानां कामितार्थप्रदायिने।।६७।।

स्वशक्तिमहिम....ल पशुपाशाय मायिने।
रमणीयगुणाधारमूर्त्तये लिङ्गमूर्त्तये।।६८।।

भैरवाष्टकरूपाय भक्तानां भयहारिणे।
अरलाहि (अर्गलाहि) महामन्त्ररुपिणे मन्त्रभेदिनि।।६९।।

बर्कविम्बमध्योत्थ (बालार्कविम्ब°) सुधावि....नमूर्वैः(?)।
सन्तार्पितमहामूर्ति- भेदकोटिशतात्मने।।७०।।

भ्वादिकुट(न्य)स्तजटाकालमृत्युभयात्मने।
सद्रिकूट (साद्रिकूट) महादिव्यो-(-व्य) निष्कलारूपरूपिणे ।।७१।।

क्रादिकुटमहाबीजत्रयसंस्थितशोधनैः (°शोधिने)।
लुब्धमाम्राज्य (लब्धसाम्राज्य) विभवश्रीविद्यायोगचारिणे।।७२।।

भौतिकादिमहामूलविद्यात्रयसमर्थितान् (°समर्थिने)।
सद्यः संलब्ध्य (संलब्ध)सद्भावपरमानन्दशालिने।।७३।।

महार्श्रीशाम्भवीदिक्षा लब्ध ब्रह्मादिसम्पदे।
वलीपलित (वलिपलित) नाशैकमूर्त्तये (अ)मृतदायिने।।७४।।

सुमहाशम्भविद्यालब्धसिद्धिपरामृतैः।
कालहलाहला ल्लोल (°हालाहलोल्लोल)कलनशमकारिणे।।७५।।

दिव्यागमागमाधस्थानचन्द्रपूजितविग्रहे।
जगमगणगागादिहारिणे पापहारिणे।।७६।।

श्रीशाम्भवामृतास्वादपूजायोगकलेवरे।
विलीनपातकव्रातहारिणे परमाणवे।।७७।।

महाधामाग्र ....त्यग्र मध्यवासिपदाग्रिणे।
महारसायनास्वादामृतपूतमहातनो ।।७८।।

महाव्याधिमहामृत्युमहापालितहारिणे
सर्वावयवसौन्दर्यगुणसंहार्ण(°श्रृङ्गार)- वेषिणे ।।७९।।

नमस्ते परमानन्दस्वरूपरूपाय शम्भवे।
महाभूतपिशाचादिभयहत्रे (हर्त्रे) महात्मने ।।८०।।

महोत्पातमहाघोर दुःखघ्नभयनाशिने ।
नमस्ते क्षेत्रपालाय लोकरक्षाविधायिने ।।८१।।

गुप्ताचारगुहां प्राणग्रसनासक्तचेतसे।
श्रीमत्समयसन्मार्गपालकानां महात्मनाम् ।।८२।।

महासाम्राज्यसौभाग्ययोगवृद्धिप्रदायिने ।
शक्त्यालिङ्गितदेवाय शम्भवे सकलात्मने ।।८३।।

नमः शिवाभ्यामिष्टा (°इष्टाय ...) फलदाभ्यां यतात्मने।
श्रीमन्महेश्वरज्ञानपालकाभ्यां नमो नमः ।।८४।।

एवं स्तु(ता) शिवः शांवः (शान्तः) प्राप्तज्ञानेन योगिना ।
प्रसादात् सुखः (सुखं) प्राह वर च प्रददौ तदा ।।८५।।

न चैवं ह्याह (?) तं शास्त्रं स गुप्तं (सुगुप्त°) भवता श्रुतं ।
तदारं भ्य (तदारभ्य)दिवा सूत्रं (-रात्रं) नियत्मा-
तंद्रितः(नियतमतन्द्रतः)।।८६।।

भविष्यामि तयो (ततो) योगि (योगी) लोके(ऽ)स्मिन् ह्यजरामरः।
आत्मवन्तं महात्मानं शिष्यं कृत्वा जितेन्द्रियम् ।।८७।।

ब्रूहि गुह्यमिदं शास्त्रं अस्मिन् लोके यथा भवेत्।
मत्प्रसादाच्च ते सिद्धिर्भविष्यत्यजरामरः (°मरा) ।।८८।।

[f 4b]
यस्मात्वमिह (°त्त्वमिह) मत्स्यस्य मध्यदेशात्समुद्गतः ।
तस्मान्मत्स्येन्द्रनाथाख्यो भविष्यसि जगत्त्रये ।।८९।।

यदिदं व्याहृतं स्तोत्रं त्वया योगविदां वरः (वर) ।
जपतां योगसंसिद्धिं ददामि वर्ष(वत्सर ?)त्रयात् ।।९०।।

इत्युक्तां (त्युक्त्वा) तर्हितः (अन्तर्हितः) शम्भुः सह देव्या त्रिलोचन।
योगिमत्स्येन्द्रनाथो(ऽ)पि यथा भगवतो हतं (दिवम्) ।।९१।।

कृत्वा यस्य समाराध्य गुह्यावार (गुह्याचार)विधानवित् ।
त्वद् भेदा रसिकां सिद्धिं देवैरपि सुदुर्लभाम् ।।९२।।

ततः शंभोर्वचः श्रुत्वा लोकानुग्रहकाम्यया ।
मेदिनीं परिचक्राम विधिनून् (?) शिष्यमात्मनः ।।९३।।

स लोकेनाससादैकं शिष्यमात्मगुणोपमं ।
यदा न लेभे सर्वज्ञं शिष्यं योगविदां वरः ।।९४।।

यदेवं व्याहृतं वाचा परिचक्राम भूतले ।
आधिमृत्युमहाग्राहग्रस्तमेतच्चराचरम् ।।९५।।

विद्यमाने(ऽ)मृते दिव्ये शम्भुप्रोक्तो सुदुर्लभे ।
इत्युच्चैरुद्गिर(न्वा)चा चरत्येव दिवानिशम् ।।९६।।

ततः कालेन महता वोतो (चोलो)राजा महायशाः ।
सुश्राव तस्य तां वाणीं दुर्ज्ञेयम् बुधैः जनैः ।।६७।।

स विविक्ते महात्मानं मत्स्येन्द्रं योगिनां वरम् ।
अब्रवी(त्) (भू)पतिः प्रीत्या जिज्ञासस्तस्य कारणम् ।।६८।।

कस्तं (कस्त्वं) प्राकृतवेषेण वरिष्यस्य (चरिष्य)अनमरोपमः (?)
का त्वयो(त्वया) गीयते गाथा शम्भुप्रोक्ता च का (शु)भा ।।६६।।

श्रोतुमिच्छामि ते गुह्य (गुह्यं) श्रोतव्यं यदि सत्तम ।
इत्युक्ताः (इत्युक्तः) स महायोगी चोलेन धरणीभुजा ।।१००।।

प्रोवाचैनं त (?) वक्तव्यं गुह्यं राजकुलोद्भवम् ।
कालेन त्वे (ते) प्रवक्षामि युक्तावातंर (प्रवक्ष्यामीत्युक्त्वान्तर)-
धीयते (धीयत) ।।१०१।।

[f 5a]
तस्मिन्तर्हि ते (तस्मिन्नन्तर्हिते) मत्स्यनाथे चोलमहीपतिः ।
चिन्तासोक (चिन्ताशोक)समादिष्ट(समाविष्टः) प्रदधौ
मनसा चिरम् ।।१०२।।

हा हन्त स्वल्चयं को नु चरन्त्येतन् (चरत्येतन्) महीतले ।
किमर्थं यति(?) रोगतः किं मया प्रकृतं तस्य ।।१०३।।

नूनमेषः स्वयं शम्भुरथवा हरिरव्ययः ।
नान्येषामीदृशो भावं (भावो) भविष्यति कदाचन ।।१०४।।

कदायत्थाम्यहं भूयं (कदा पश्याम्यहं भूयः) इति संचिन्त्य पार्थिवः ।
चिन्तां तीव्रां समापेदे तद् दर्शनसमुत्सुकः ।।१०५।।

पुनश्च चिन्तयामास कालेन महता तपः ।
गुह्यमेतत् प्रवक्ष्यामीत्युक्ता (° मीत्युक्त्वा ऽ)- न्तर्हित स्वयम् ।।१०६।।

एतदेव परं (दैवा)नुग्रहं मम साम्प्रतं ।
इत्युक्ता (इत्युक्त् वा) निर्ययौ राजा नगरादेकपवसः (?)।।१०७।।

मत्स्येन्द्रनाथा (मत्स्येन्द्रनाथं) योगीन्द्रं दृष्टुमिच्छन् उदारधी ।
चचार चयरामेतां (सचारमेतां) अवधूतः शिवः स्वयम् ।।१०८।।

तमेव मनसा ध्यायन् शाकमूलक्षता(?) शनः ।
अथ संवत्सरे पूर्णे गोमन्ते नागसत्तमे ।।१०६।।

कदाचित् ....षा तप्तो राजा शंसय (संशय)मागतः ।
श्रमेण महता युक्तः तथा तव (?) महीतले ।।११०।।

ततो मत्स्येन्द्रनाथो (ऽ) पि ....प्राप्तं नराधिपं ।
विस्मापय(न्) जगामाशुरूपविभू (?) तिरस्कृतम् ।।१११।।

नरास्थिमानादि (नराधिप°) ततो मधी (?) पूर्णकलापभृत्
स्रिया (श्रिया?) कदाचि(त्) ह्यनुपातैः शुचिर्वृतः ।। ११२

महालचुमदा (?) ख्यातो घूर्णमानाक्षिमण्डलः ।
प्राद्रु शासि (प्रादुरासन्) सुरास्तस्य पौर्वा गाथामुदीरयन् ।।११३।।

[f 5b]

सो(ऽ)पि दृष्टवा तदाप्राप्तं तं च (तञ्च) वेषमनिन्दितम् ।
आसाविति (?) च विज्ञाय परिदध्यौ मुहूर्त्तकम् ।।११४।।

निन्दिते तत्स्वरूपेण मोहं विष्यति (?)मामयम् (?)।
तस्मादितं (?) मोक्ष्यामि वन्दनीयश्च सर्वथा ।।११५।।

इत्युक्तो (इत्युक्त्वो)त्थाय तत्पादौ गृहीत्वा वाक्यमब्रवीत्।।
कस्त्वं मे ब्रूहि तत्त्वेन तृप्तोऽहं तव साम्प्रतम् ।।११६।।

त्वद्दर्शनमभीछन्नै (?)पये ......त्वा (?) महीमिमाम् ।
कथञ्चिदमहद्राक्षं त्वं चमेतिरस्कृतः(?) ।।११७।।

किमेतद् इति विज्ञानं नैव सक्नोमि (शक्नोमि) चिन्तयन्।
ब्रूहि मे तव वृत्तान्तं कस्तं (कस्त्वं) प्रकृतरूपवान् ।।११८।।

इत्युक्तः सान्त्वयित्वा एनं सम्यक् पृष्टं द्विजेन ।
विविक्ते साभिधिकां (साभिषिक्तां ?) च विद्या° दत्वा
महाशयाः ।।११६।।

योगित्वं प्रददौ तस्मै सम्यक् प्रोक्तेन कर्मणा ।
यदायोगामृत (तापा) स्त-पशुपाशो महा(य)तिः ।।१२०।।

तदास्य कथयामास शाम्भवं शास्त्रमुत्तमम् ।
श्रुतं मया शम्भुमुखात् शास्त्रसारं सुदुर्लभम् ।।१२१।।

कथ्यमानं महेशान्यै यच्छृणु समाहितः ।
शिवेन च समाख्यातं सच्छिष्यायेदम् उत्तमम् ।।१२२।।

मया प्रोक्तं न वक्तव्यं लोकानुग्रहकारणात् ।
त्वं चेच्छ्रुत्वा समभस्व (समभ्यस्य) शास्त्रं शाम्भवमुत्तमम् ।।१२३।।

मुमहायोगसाम्राज्यं लब्धा सित्वा (जित्वा) जरामरः ।
शास्त्राणाममृतं सर्वेषां सर्वज्ञेन शिवेन च ।।१२४।।

मत्प्रणीतम(म)लं शास्त्रं तत्प्रमाणं न संशयः ।
यदि चेदप्रमाणं स्यात् शास्त्रं सर्वज्ञ (सर्वत्र) चाखिलम् ।।१२५।।

किं प्रमााणं जगत्यस्मिन् दृश्यते शास्त्रकोटिषु ।
प्रमाणं शाम्भवशास्त्रं प्रवदन्ति विपश्चितः ।।१२६।।

[f 6a]
तस्मात् ज्ञेयमिदं शास्त्रं गुरुवक्त्रात् सुदुलर्भम् ।
योगविद्याविहीनानां पशु (पशू)नामसुरात्मनाम् ।।१२७।।

बहिर्मुखानां तन्निन्दामानसानां दुरात्मनाम् ।
गुह्याचारदुहां तर्कभेदवादोपसेविनाम् ।।१२८।।

शम्भुप्रसादहीनानां तत्सपर्याविरोधिनाम् ।
न वक्तव्यमिदं शास्त्रं गोप्यं श्रीशम्भुभाषितम् ।।१२६।।

नेदं लाक्षणिकं शास्त्रं पशुधीवृद्धिगोचरम्।
गुरुप्रसादतो लभ्यं नोपहासं (नोपहास्यं) हि सात्त्विकैः ।।१३०।।

न संसदि वदनेनं (वदेत् एनं) सतामपि कदाचन ।
विजनेशु (विजनेषु) प्रवक्तव्यमित्याज्ञा पारमेश्वरी ।।१३१।।

तं च श्रुत्वा इदं शास्त्रं सम्यगभ्यस्य यत्नतः ।
चोलेन्द्रनाथ नामा (?) त्वं भविष्यसि योगिराट् ।।१३२।।

पुरा महा(र्णव)मध्ये तु द्वीपवर्ये महेश्वरम् ।
पप्रच्छ परमेशानी विविक्ते श्रृण्वतो तम् ।।१३३।।

तत्ते वक्षाम्यहं सर्वं सिद्धानां हितकाम्यया
तपो न सारो (ऽ)ध्ययनं न सारो
यज्ञो (ऽ) थ दानप्रचयं न सार
सम्पत्तिचय न सारो
दिव्यागमो (ऽयं) खलु सारसारः ।।१३४।।

।। इति श्री मत्स्येन्द्रसंहितायां प्रथमः पटलः ।।१।।

।।द्वितीयः पटलः।।

[6 a] श्रीदेव्युवाच —

जय सर्वज्ञ विश्वेश त्र्यम्बकाखिलवन्दित।
सर्वागममहाशास्त्रसारज्ञ परमेश्वरः (परमेश्वर)।।१।।

भवतां कथितं शास्त्रं मया श्रीवि (मयाश्रावि) सुविस्तरात्।
तत्रमेषु (?) चिरं शास्त्रं शाम्भवं योगसाधनम्।।२।।

न च विस्तरतः प्रोक्तो इदानीं विस्तराद् वद।
अप्रकाश्यं महाशास्त्रमित्यादौ प्रोक्तवान्स्वयम्।।३।।

देशो ये (अयं) निर्जनः शान्तां (शान्तो) निराबाधो (ऽपि) दृश्यते।
योगासारं ममाचक्ष्व तस्मादिह यथा तथा।।४।।

[f 6b]
देहशुद्धिः कथं देव कथं स्यादसनक्रमः।
प्राणायामः कथं प्रोक्तः प्रत्याहारः कथं भवेत्।।५।।

कथं साधारणो योगो ध्यानयोगश्च कीदृशः।
कथं श्रीकुण्डली (कुण्डलिनी) योगः त्रिलिङ्गार्चापि कीदृशी।।६।।

कानि क्षेत्राणि देहे(ऽ)स्मिन् कानि तीर्थानि शङ्करः।
सर्वस्नानाधिकस्नानं कः परः परमेश्वरः ।।७।।

कापौषध-(काप्यौषध)-प्रयोगानि किञ्चिदेव रसायनम् ।
कथं स्यात्पा(दुका)-सिद्धिर्देहसिद्धिः कथं भवेत् ।।८।।

वेतालसिद्धिश्च कथं कपालस्य च साधनम् ।
कथमञ्जनसिद्धिस्स्याद् यक्षिणीसिद्धिरेव च ।।९।।

अणिमादि (:) कथं देव योगिनीमेलनं कथम् ।
एतान्येव तथान्यानि भवता सूचितानि च ।।
तानि सर्वाणि ब्रूहि विस्तरेण महेश्वर ।।१०।।

श्रीमहेश्वरः उवाच—
श्रृणु देवि प्रवक्षामि योगशास्त्रं सुदुर्लभम् ।
येन विज्ञानमात्रेण भैरवा भोवितानि (भवितानि?) च।।११।।

देहशुद्धिं प्रवक्ष्यामि तत्रादौ सर्वसिद्धये ।
न सिद्धिर्जायते तेन विना वर्षायुतैरपि ।।१२।।

तस्मात्सर्वप्रयत्नेन देहशुद्धिं समाचरेत् ।
येन सम्यगापूतात्मा सिद्धिं पारमिकां लभेत् ।।१३।।

प्रातः स्नात्वा यथा न्यायं भस्मना सलिलेन वा ।
मन्त्रस्नानं प्रकुर्वीत् तद् यथा श्रृणु पार्वति ।।१४।।

गृहीत्वा दक्षिणे हस्ते जलं चुलुकमात्रकम् ।
वामाङ्गुष्ठानामया च स्पृर्श तेन (स्पृशन्तेन) समाहितः ।।१५।।

सविन्दुकैर्भूतबीजैः पञ्चप्रणवसंयुतैः ।
प्रजपेत्सप्तधा देवि मूलमंत्रेण च त्रिधा ।।१६।।

[f 7a]
वामाङ्गुलिशिलायोगा(ज्ञ)लेन सह दीपितम् ।
पातकं प्रक्षिपेद् वामे शिववजृ (वज्र)- शिलोपरि ।।१७।।

अथाचम्य त्वात्मानं दोषहत्यादिशान्तये ।
प्रोक्षयेन्मूलमन्त्रेण तत्पूतं त्रिः पिबेज्ज़लम् ।।१८।।

ततः स्वदेहमस्नाव्य (स्वदेहमाभाव्य) मुद्रया धेनुरूपया ।
मूर्धादिपादपर्यन्तं मुक्तशेषं पुनस्तन्मुम् ।।१९।।

परिभाव्य चिरं देवि भूतबीजैस्तथा पुनः ।
पादे गुह्ये च मौने च हृदि मू (मूर्ध्नि) सबिन्दुकैः ।।२०।।

विन्यस्य व्यापयेत्पञ्चतारसम्पुटपूर्वकैः ।
प्रजपेच्च यथाशक्ति पञ्चप्रणवसम्पुटात् ।।२१।।

एवं प्रोक्तं मया देवि कर्मै तद(घ)-मर्षणम् ।
अनेन स्नानमात्रेण गताहोरात्रिपातकम् ।।२२।।

सर्वतीर्थस्थानपुण्यमाप्नुयान्नात्र संशयः ।
भस्मस्नानविधि (धिं) वक्ष्ये येन योगी मलक्षयम् ।।२३।।

लभते सर्वसिद्धीनामाधिपत्यमवाप्नुयात् ।
वामहस्ततले भस्मं गृहीत्वा परमेश्वरि ।।२४।।

संस्पृशं (संस्पृशन्) दक्षहस्तेन न्यासमेवं समाचरेत् ।
पञ्चतारं समुच्चार्य व्योमेन्द्राननबिन्दुवत् ।।२५।।

बीजमुक्तानिवृत्यं (?) ते प्रवदेच्च कलात्मने।
नमो तं देव देवेशि पादयोः परिविन्यसेत ।।२६।।

चतुः प्रणवमुच्चार्य व्योमाम्बुशशिदृगयुतम ।
सबिन्दुकं बीजमुक्त्वा प्रतिष्ठा शब्दमुच्चरेत् ।।२७।।

कलात्मने नमो (ऽ) न्तं च नाभौ मन्त्रं प्रविन्यसेत् ।
प्रणवत्रयमुच्चार्य कण्ठे शानलनृत् (?) स्वनैः ।।२८।।

[f 7b]
बिन्दुबीज-(स)-मुच्चार्य पुनर्विद्याकलात्मने ।
नमो तं (?) हृदि विन्यस्य पुनश्च प्रणवद्वयम् ।।२९।।

प्रोक्ता(प्रोच्य?) व्योमानलमहाभौतिकार्धेन्दुभूषितम ।
बीजं प्रोक्ता (प्रोच्य?) महाशान्तिगद्यन्ते च कलात्मने ।।३०।।

नमो तं (?) विन्यसेद् वक्तो(वक्रे) प्रोक्ता (प्रोच्य) च प्रणवं पुनः ।
व्योम (यु)ग्मानुग्रहे................ बीजान्ते शांत्यभीतकम् ।।३१।।

पदमुक्त्वा कला ते वै चात्मवेति(?) नमः पदम् ।
मन्त्रं प्रविन्यसेत् मूर्द्धि (मूर्ध्नि) प्रतिलोमेन चैव हि ।।३२।।

एतान्येवं प्रविन्यस्येच्छान्त्यतीतादिकान् क्रमात् ।
एवं विन्यस्य मेधावी ऋष्यादीन् विन्यसेत्पुनः ।।३३।।

अथ मूर्द्धा (मूर्धा) च ऋषिरनुष्टश्द्दन्द (श्रनुष्टुपश्छन्द) उच्यते ।
देवता परमेशानि देवः पशुपतिः स्वयम् ।।३४।।

ऋष्यादीनां तु विन्यस्य पुनरेव समुच्चरेत् ।
अग्निरिति वायुरिति व्योमेति जलमित्यपि ।।३५।।

त्रि मन्त्राणि च भस्मानि भस्मान्तानि पृथक् पृथक् ।
सर्वं ह वा (?) पदं प्रोक्ता (प्रोच्य) (वदेत्?) भस्मपदं पुनः ।।३६।।

मन इत्येतानि पदं च(क्षु)षि पदमुच्चरेत् ।
भस्मानीनि पदं भूयः प्रोक्तायं(?) वाक्षरेण तु ।।३७।।

रुद्रवारं जपित्वैवं विभाव्य च करे त्रिधा ।
आद्यां चां (?) पञ्च धी क्षत्वा (?) नेमेशनाय (?) चेति च ।।३८।।

आकाशात्मने नम इति शिरस्येकं विनिक्षिपेत् ।
मं (?) तत्पदं समुच्चार्य पुरुषायानिलात्मने ।।३९।।

नमश्चेति द्वितीयांशं सविभज्य च पञ्चधा ।
पञ्चार्णाद्यैस्तथेशादिमूर्तिभिः सचतुर्थकैः ।।४०।।

ऊर्ध्वं प्रदक्षिणे दिव्ये पश्चिमे प्रमुखेषु च ।
वक्रात्मने ति नत्यं तैः (?) कर्मणे च विनिक्षिपेत् ।।४१।।

[f 8a]

पुनस्तृतीयकं चांशं प्रोक्ता पञ्चाक्षरं सुधीः ।
कुर्याद् योगी त्रिपुण्ड्राणि सर्वदुःखोपशान्तये ।।४२।।

एतदोत्लेयम् उद्दिष्टं स्नानं पातकनाशनम् ।
पुण्यं पाशुपतं देवि पशुपाशविमोचनम् ।।४३।।

एवं स्नानादिसंशुद्धः प्रातः प्रातः समाहितः ।
सप्त सप्त यथा न्यायं शोषणादि समाचरेत् ।।४४।।

भां तां तं बिन्दुसंयुक्तं उच्चरन् प्रणवादिकम् ।
इडया वायुमापूर्य कुम्भकेन महेश्वरि ।।४५।।

मूलाधारे स्मरेद् बिन्दुं षङ्गलाकित(? षडगांलङ्कृत)- मण्डलम् ।
धूम्राभं मत्विलं (?) बीजं तस्य मध्ये विभावयेत् ।।४६।।

तन्मध्याद् अद्भुतं वायुं आ-पादतलमस्तकम् ।
शोषयन्तं स्वकं देहं पाप्मना सह संस्मरेत् ।।४७।।

अद्य तं रुद्रमनिलं देवि पिङ्गलया शनैः ।
प्रमुञ्चेत् पूर्ववद् बीजमुच्चरेद् भुवनेश्वरि ।।४८।।

भूयः समतनुर्भूत्वा प्राणार्णं प्रजपेच्छनैः ।
यथा शक्तिचरं ध्यायेत् सशुष्कं सकलेवरम् ।।४९।।

सप्रक्षुत्य (सप्तकृत्य)-श्चरेदेवं शोषणं पर्वतात्मजे ।
तत स्वच्छंदये दीप्तां सुरक्तप्रभयान्वितम् ।।५०।।

ऋशानोर्मण्डलं ध्यात्वा तन्मध्ये बीजमानसम् ।
पातान्तबिन्दुसहितं ध्यायेत्तद् वर्णमध्यतः ।।५१।।

प्रादुर्भूतमहाज्वाला मण्डलोदारविग्रहम् ।
ग्रहं चित्रार्कं चिन्तयेदर्कं नाडीमार्गेण खे गतिम् ।।५२।।

प्रपूर्य कुम्भकावस्थां प्राप्य वायुं विशोषितम् ।
प्रदहेद् आत्मनो देहं एनसा साकमात्मवित् (?)।।५३।।

[f 8b]
पुनर्विशोधितं प्राणमिडाचक्रेण वा त्वरन् ।
विमुच्येत् स्वस्य देहस्तु यथाशक्त्यानलं जयेत् ।।५४।।

पूर्वोक्तसंख्यया सम्यगाचरेद् देवि दाहनम् ।
अनेन विधिना सर्वं पातकानि दहेत् ध्रुवम् ।।५५।।

अग्रे देवि भ्रुवोर्मध्ये सुषिरं चन्द्रण्डलम् ।
यशोहारं समुद्दिष्टं तन्मध्यस्थं विभावयेत् ।।५६।।

ततस्तद् वर्णितं भूतं चैन्द्रतारसुधातनुम् ।
श्रवं सममृतं (?) शुभ्रं भावयेच्चिरमादरात् ।।५८।।

इडाचक्रे समापूर्य पवनं कुम्भकान्वितम् ।
तच्चन्द्रगतपीयूषधारया शीतलात्मना ।।५९।।

आसिञ्च्य अनलसंदिव्यं पुनर्जातं च तत्तनुम् ।
चिन्तयेत् कलुषैर्मुक्तं तेजोरूपं चिदात्मवित् ।।६०।।

पिङ्गलायां समुत्सृज्य यथाशक्ति जपेच्च तम् ।
सप्तकृत्वस्तु कृत्यैव (कृत्वैव)- मिडापिङ्गलयोः परे ।।६१।।

आपूर्य कुम्भकैः प्राणं पिनाकीशं सबिन्दुकम् ।
प्रोच्चरन्तं महाशक्तिसारभूतं कलेवरम् ।।६२।।

सम्भावेच्छनैर्वायुं उभाभ्यां सम्यग् उत्सृजेत् ।
भूयः समतनुः स्वच्छं स्वदेहं देवतामयम् ।।६३।।

ध्यायेच्चिरं प्रसन्नात्मा जपेत् मन्त्राणि चैव हि ।
अनेन विधिना शुद्धदेहे स्मिनोर (?) सिद्धयः ।।६४।।

प्रवर्तन्ते (अ)चिरादेव चान्यथानर्थकृद् भवेत् ।
भावेन सह शुद्धश्चेत् सर्वयोगमाप्नुयात् ।।६५।।

भावहीनस्य नैवास्ति सिद्धि वर्षायुतैरपि ।
उदकुम्भसहस्रेण मृदाढकशतेन वा ।।६६।।

अपि वर्षसहस्रेण भावदुष्टो न शुध्यति ।
तस्मादेतानि देवेशि भावपूतः समाचरेत् ।
इति षण्मासतः शुद्धः सम्यग् योगं प्रिये लभेत् ।।६७।।

।। इति श्रीमत्स्येन्द्रसंहितायाः (यां) द्वितीयः पटलः ।।

।।तृतीयः पटलः।।

[9a] ईश्वर उवाच —

यथासतक्रमं (यथागतक्रम°) वक्ष्ये साधकानां हिताय वै ।
यदभ्यासक्रमेव(यदभ्यासक्रमेणैव) स्थिरत्वं सुकरं भवेत् ।।१।।

समादाय शुचौ देशो ....+........+.........वस्तोत्तरं छदं (?) ।
शङ्कं च दक्षिणं (दक्षिणे) स्थाप्यं सम्यग् वामोरूमूर्ध्वनि ।।२।।

सम-ग्रीवशिरोव(क्त्रं)ह(स्तौ) विन्यस्य चोपरि ।
आकुञ्च्य गुदमेकाग्रो वीरासनमिदं परम् ।।३।।

अनेन आसनयोगेन योगरूढः प्रसिध्यति ।
न चाभ्यासविधौ वैतच्छेत्स्यति सर्वसिद्धये ।।४।।

तस्यैव (तस्यैवं) दक्षिणां जङ्घां न्यसेद् वामोरूमूर्धके
कूर्मासनं तद्विज्ञेयं सर्वेद्रिवशंकरं (सर्वेन्द्रियवशं करम्) ।।।५।।

दक्षपादं च वामोरू मूले विन्यस्य तत्पदम् ।
दक्षोरुमूलपीठार्थं कल्पयेत् सुदृढासनम् ।।६।।

बाहुयुग्मं समुसृज्य श्वलिका(?) -सनमीरितम् ।
सर्वसिद्धिप्रदं देवि सर्वरोगविनाशनम् ।।७।।

वामगुल्फमधः कृत्वा कृत्वोपरि च दक्षिणम् ।
गुदेनापीड्य वै जानुयुगलं परिपाल्य च ।।८।।

वामहस्ताङ्गुलीमूले (°मूल)-मवष्टभ्य यथाबलम् ।
दक्षिणहस्ताङ्गुलीमूलैः परिवर्त्य च तत्तलौ ।।९।।

कुरूमूलद्वये (उरूमूलद्वये) पीड्य स्थानाग्रे स्थापये(द्) दृशौ ।
कुक्कुटासनमेतद्वै मनसः स्थिरकारणम् ।।१०।।

उरूमूलद्वयाद् अधस्तात् पादयुग्मं निधाय च ।
तयोर्मध्ये स्थिरगुद पृच्छनुचम्य (?) निश्चलः ।।११।।

तथा करतलद्वन्दं समा-(श्लि)-ष्य परस्परम् ।
उर्वोरूपरि विन्यस्य नासिकामवलोकयेत् ।।१२।।

[9b]
मयूरासनमेतद् वै सर्वव्याधिविनासनम् (°विनाशनम्)।
एतस्य बाहुयुगलं कारयेद् दण्ड-(युग्म)-वत् ।।१३।।

करद्वयतलं भूमौ पुटाकारं निधापयेत् ।
किञ्चि(द्) दानमिततनु निश्चलस्थिरमानमः (° मानसः) ।।१४।।

पुरोवलोकयेद् द्वाभ्यां (स)मग्रीवः समाहितः ।
व्याघ्रासनमिदं सद्यो व्याधिघ्नं योगसिद्धिदम् ।।१५।।

वामपादम् अथोत्तानं कृत्वा दक्षोरुमण्डले ।
दक्षपादं तु वामोरौ तथाभूतं निधापयेत् ।।१६।।

उरुभ्यामुपरि स्थाप्य बाहुं त्यज्य (न्यस्य?) यथार्थतः ।
करपृष्टं दक्ष्यास्य (दक्षस्यास्य) न्यसेद् वामतलान्तरे ।।
अजु(ऋजु)ग्रीवशिरो भूत्वा तथाभूतं निधापयेत् ।।१७।।

उरूभ्यामुपरि स्थाप्य बाहुं त्यज्य(न्यस्य) यथार्थतः ।
करपृष्टं दक्ष्यास्य (दक्षस्यास्य) न्यसेद् वामतलान्तरे ।।१८a।।

ऋजुग्रीवशिरो भूत्वा नासिकामवलोकयेत् ।
तन्निमीलनं चोन्मील(न)म् कुर्यादाकुञ्च्य वै गुदम् ।।१८।।

समदेहस्थिरमतिः पद्मासनमिदं पदम् ।
सर्वयोगप्रसिद्ध्यर्थमभ्यस्तं भवति प्रिये ।।१९।।

वामजङ्घोपरि स्थाप्य दक्षजङ्घां जितेन्द्रियः ।
दक्षजङ्घाधरे वामगुल्फपार्श्वं निधापयेत् ।।२०।।

हस्तादिनाभिपर्यन्तं पद्मासनवदाचरेत् ।
विजयासनमेतद्धि सर्वसिद्धिकरं परम् ।।२१।।

उरुभ्यामुपरि स्थाप्य पादयुग्मं प्रयत्नतः ।
दक्षिणं सव्यदेशे च सव्यं दक्षिणदेशके ।।२२।।

करद्वयं पृष्ठदेशे परिवर्त्त्य प्रयत्नतः ।
पादांगुष्ठयुगं सम्यक् कराभ्यां संनिगृह्य च ।।२३।।

किञ्चिदुत्तानहृदयो नासिकामवलोकयेत् ।
दृढासनमिदं प्रोक्तं सद्यो रोगविनाशनम् ।।२४।।

[10a]
एतस्याङ्गुष्ठयोर्मूले कर्पूरे (कुर्परे) सन्निवेशयेत् ।
परिवर्त्त्य करौ स्पृष्टवङ्गुलीतल - गोपिता ।।२५।।

अङ्गुलीपृष्ठयो हेतु चिबुकं सन्निधापयेत् ।
अङ्गुष्ठौ सरलौ कृत्वा तालुमूलसमाश्रितौ ।।२६।।

धृत्वा स्थिरमना भूत्वा गृध्रासनमिदं परम् ।
सर्वदोषक्षयकरं सर्वोपद्रवनाशनम् ।।२७।।

वामगुल्फकपृष्ठे तु दक्षगुल्फं निधापयेत् ।
पातयित्वा महेशानि जानुयुग्मं महीतले ।।२८।।

उर्वोः कुर्परमाधाय कृताञ्जलिपुटौ करौ ।
कुचे चिबुकसंयोगान् नासिकाग्रं निरीक्षयेत् ।।२९।।

गरुडासनमेतद् वै सर्वसिद्धिकरं भवेत् ।
गुदेनापीड्य धरणीं पादाभ्यामपि च स्फुटम् ।।३०।।

जान्वोरू ....करौ स्थाप्यं स्थिरं देशे भवेद् दृढम् ।
एतद् यक्षासनं सर्वविघ्नच्छेदस्य कारणम् ।।३१।।

उरूयुग्ममूलं पीठार्थं जंघा वाश्लिष्य पार्वति ।
पादयुकु(ग्म) पश्चिमौ (?) न्यस्य पर्यंकेन दृढं तनुम् ।।३२।।

कमटी(?)मुद्रया मूले समवष्टभ्य यत्नतः ।
समदेहस्थिरो भूत्वा सिद्धासनमिदं परम् ।।३३।।

सर्वसिद्धिप्रदं देवि सर्वव्याधिविनाशनम् ।
जङ्घाभ्यामुरुयुग्मं च समाश्रित्य निपात्य च ।।३४।।

कर्पूरंस्तं भवत्कृत्वा (?) पार्श्वेनैकेन संश्रयेत् ।
एतत् प्रोक्तं मया देवि वृषभासनमुत्तमम् ।।३५।।

सर्वरोगविघातार्थं प्रोक्तमेतन्महात्मभिः ।
एषा चान्ये च बहवो ह्यासना(नि) योगसिद्धिदाः ।।३६।।

[10b]
यथाभ्यासं यथायोगं तेषामेकतरं भजेत् ।
स सिद्धे ह्यासने सम्यक् सर्वेन्द्रियवशीकरम् ।।३७।।

भविष्यति दृढकायं मनोनिश्चलता तथा ।
अभ्यस्ते नासने नैव समासीनो दिवानिशम् ।।३८।।

योगं युञ्जीत विजने निःशब्दे जन्तुवर्जिते ।
सुसमे च सुसम्पृष्ठे गन्धधूपादिवासिते ।।३९।।

शिवाश्रमे गुह्यस्थाने गृहे वापि विविक्तके ।
श्रीपरामृतसंतृप्तचेतनो नियतात्मवान् ।।४०।।

अभ्यसेदनिशं योगी सर्वसिद्ध्यर्थमादरा(त्) ।
एकाग्रमतिरव्यग्रस्तत् प्रमाण(म्) सुनिश्चयः ।।४१।।

नित्योद्युक्तः सदोत्साही गुरुवानमृताशयः ।
मृदघटादि (?) र्निशं योगी सर्वसिद्ध्यर्थमादग्रे ।।४२।।

.... विभेदेन भवेदुत्साहयोगतः
तथा भवति देहो(ऽ)यमभ्यासेन तु योगिनः ।
सहसा नाभ्यसेद् योगं शनैः सम्यक् तमाचरेत् ।।४३।।

युगपत्सेवितो दोषान् करोति बहूंस्तनौ ।
तस्मादभ्यासयोगेन शनैर्योगश्च सिद्ध्यति ।।४४।।

एककालं द्विकालं वा त्रिकालं वापि पार्वति ।
सर्वविघ्नप्रशान्त्यर्थं भूतेभ्यो बलिमाहरेत् ।
अन्यथा बहुना (बहून्) विघ्नान् कुर्वन्ति परमेश्वरि ।।४५।।

स्नानादिभिः शुद्धतनुः स्वदेहे,
विशोषदाह........वनादिकृत्वा ।
अद्यापि संततमतिः प्रवरासनानि,
संसिद्धिमेति ब (?) चिराय महेशि योगी ।।४६।।

।। इति मत्स्येन्द्रसंहितायां तृतीयः पटलः ।।

।।चतुर्थः पटलः।।

[f. 11a] ईश्वर उवाच —

अथातः संप्रवक्ष्यामि प्राणसंयमनक्रमम् ।
यस्मिन् सिद्धे भवेद् योगी सम्यग्योगविशेषवित् ।।१।।

प्राणस्यैव जयो योग प्राणस्यैव जयस्तथा ।
प्राणस्यैव जया(द्) देवि सिद्धिः देवि सुदुर्लभः ।।२।।

नाजीर्णे न रसोद्गारे न च विण्मूत्रधारणे ।
न छर्दि नातिसारे च नातिभूतसमन्विते।।३।।

नैयम्ये (?) गुरुकार्येवा (?) न चापि क्षुत्पिपासतः ।
न दंशमशकाकीर्णे न च श्वापदसेविते ।।४।।

(न) नदीसमुद्रतीरे वा न जलाशयसन्निधौ ।
श्मशाने चैत्यवृक्षे वा न महाजनसंसदि ।।५।।

प्राणायामं न कुर्वीत कुर्याच् चेद् व्याधिभाग्भवेत् ।
स्थितः शि(वा)श्रमे गुह्ये निःशब्दे जनवर्जिते ।।६।।

आसनं मूलसम्पूर्णं विन्यसेन् मृगचर्मणा ।
तत्रासीनः सुखं योगी गुर्वादीन् सम्प्रणम्य च ।।७।।

अभ्यसेदासनेनैव समासीनः समाहितः ।
रेचकः पूरकश्चैव कुम्भकश्च प्रकीर्तितः ।।८।।

नासिकापुटम् अङ्गुल्यापीड्यैकमपरेण च ।
(उ)दर्यं रेचयेद् वायुं रेचकः स उदाहृतः ।।९।।

बाह्येन वायुना देहं दृतिवत् पूरयेत् शुभे ।
पूरणात् पूरकः प्रोक्तः कुम्भकं च तथा शृणु ।।१०।।

[f. 11b]
त (न्न) मुञ्जति न गृह्णाति वायुमन्तर्बहिः स्थितम् ।
सम्पूर्णकुम्भकवृत्ति(॰वत्) तिष्ठेद् अचलः स तु कुम्भकः ।।११।।

लघुद्वादशमात्रस्तु मध्यमो द्विगुणः स्मृतः ।
त्रिगु(ण)श्चोत्तमः प्रोक्तः षद्विशं (षट्त्रिंश)त्तालमात्रकः ।।१२।।

अकारश्चैकमात्र स्याद् आकारस्तु द्विमात्मूकः (द्विमात्रकः) ।
तदेकबिन्दुर्नादाद्यस्त्रिगुणः परिकीर्तितः ।।१३।।

इत्यादि क्रमयोगेन संसिद्धात्मा दिने दिने ।
यद् यत्सुकरतामेति तत्र तत्राधिकं चरेत् ।।१४।।

मा आत्ममात्राधिकं वापि चान्यत् कुर्याद् दिने (दिने) ।
यद् यदभासतामेति न तत् पक्तो (तत्त्यक्तो ?) परिव्रजेत् ।।१५।।

शनैरभ्यासयोगेन यदा प्राणो जितो भवेत् ।
तदा विघ्नानि (चिन्हानि) दृश्यन्ते योगिनः सिद्धिसूचका ।।१६।।

प्रथमश्चिञ्चिणीनादो द्वितीयः किङ्किणीरवः ।
तृतीयं वेणुनादः स्यात् घण्टानादश्चतुर्थकः ।।१७।।

पञ्चमस्तालनादः स्याद् भृङ्गनादश्च षष्टकः ।
सप्तमं (सप्तमो) दौन्दुभं (दौन्दुभो) नाद (नादो)
भेरीनाद(स्त)थाष्टमः।।१८।।

[f. 12a]
नवमं (नवमो) मेघनादं (मेघनादश्)च दशमं
(दशमः) सागरस्वनं (सागरस्वनः) ।
स्वेदस्तु प्रथमं (प्रथमो) देवि द्वितीयं (द्वितीयो)
कण्ठ (कम्प) उच्यते ।।१९।।

तृतीयो (ऽ)द्भुतकम्पश्च चतुर्थो (ऽ) पि गलस्तथा ।
शरीरस्य ऊर्धाङ्ग मित्रं (खिन्नं) पञ्चमं (पञ्चमः) प्रकीर्तितः ।।२०।।

षष्टञ्च दूरश्रवणं च सप्तमं दूरदर्शनम् ।
दिव्याज्ञा चाष्टमं देवि नवमं खेचरी गतिः ।।२१।।

जीवन्मोक्षं च दशमं त्रिकालज्ञानमेव च ।
चिन्हान्येतानि दृश्यन्ते निर्विघ्ने सति योगिनः ।।२२।।

असम्यक् कारकस्येह विघ्नाः प्रादुर्भवन्ति च ।
हिक्का - काशस्तथाभ्यासे कर्णदन्ताक्षिवेदना ।।२३।।

वातं पित्तं सन्निपातं शूलघात्युदरामयाः ।
ग्रहणीज्वरं सम्मोहमूर्च्छातिसारसाध्वसा ।।२४।।

तस्माच्छनैर्यो जपेद्य योगी संसिद्धये चिरात् ।
तस्माद् रोगचिकित्सां तु शृणु देवि यथा तथा ।।२५।।

स्निग्धां यवागूमत् पूग्रं (?) पीत्वा तत्रैवाधारयेत् ।
चिन्तयेद् अमृतं देहे सर्वरोगापनुत्तये ।।२६।।

आग्नेयीं धारणां ध्याये(द्) योगे वायव्यवारुणौ ।
मुर्च्छायामधियाते च भूतप्रेताद्युपद्रवे ।।२७।।

प्रजपेद् वै शनै(:) प्राणं विषदोषे च दारुणे ।
सर्वरोगप्रपीडासु प्रक्षद् (?) योगी सषि (?) भवेत् ।।२८।।

पिनाकिपीठगोमेदस्तथा पावकमारुतौ ।
स........श विन्दुमद् (?) बीजमुच्यते रोगनाशनम् ।।२९।।

बीजान्ते वैद्यशब्दं च मेयो दण्डी च दण्डिनौ ।
व्योमसूनो(ऽ)ग्निजापान्तो ताशद्यो (ऽ) यं महामनुः ।।३०।।

(f 12b)

षड्दीर्घस्वरयुक्तेन बीजेन धानम् (?) उच्यते ।
प्रदृश्य (प्रदर्श्य) अमृतमुद्रां च मंत्रेण व्यापयेत् तनुः ।।३१।।

कुन्देन्दुस्फटिकामलं त्रिनयनं दिव्यामृतारं घटं,
वित्ते दक्षकरे तथेतरकरे सर्वौषधीनां रसैः ।
पूर्णं पात्रवरं दधत् स्वशि(रसा) श्रीवैद्यनाथं प्रभुं,
ध्यायन् व्याधिगणैः क्षणो न मनुजो मुक्तश्चिरं जीवति ।।३२।।

एवं ध्यात्वा जपेन्मंत्रं सप्तसाहस्रमादरात् ।
मुच्यते सर्वरोगैश्च तथा भूताद्युपद्रवैः ।।३३।।

अथवा अन्यप्रकारेण देवं धन्वन्तरिं स्मरेत् ।
प्रजपेत् (त)न्मनुं सर्वव्याधिपीडाविनाशनम् ।।३४।।

मनुताराान्वधोबिन्दु (?) मण्डितं बीजमीरितम्।
दान्तो मेषोवुपीठस्थो (?) बिन्दुमन्तरये (?) पुनः ।।३५।।

त्रियुगां नाहितारादिरणुं (?) युक्तोमदान्तकृत् (?)
बीजवर्णेन पञ्चाङ्गं कारयेद् आदरेण तु ।।३६।।

श्रीमच्छारदचन्द्रकोटिसदृशं दिव्यौषधपूरितं,
पात्रं च अमृतकुम्भमध्य विदधद् दोर्भ्यां वरं चाभयम् ।
सर्वव्याधिसमुच्चयक्षयकरा पद्मसहस्रच्छदे,
व्याधिः सर्वजरापमृत्युभयहा स्याद् आशु धन्वन्तरिः ।।३७।।

एवं ध्यात्वा जपेन्मंत्रं पूर्वं सेव्यमनुत्तमम् ।
सद्यः प्रमुच्यते रोगैर्भूतिघ्नैः विघ्नसंचयैः ।।३८।।

यान्यौषधानि विद्यते व्याधिघ्नानि महेश्वरि ।
एतानि श्चाद्वदाभ्य (?) च श्रृणु नाडीविशोधनम् ।।३९।।

मूलाधारात् समुद्यन्तं सुषुम्णा परिकीर्तिता ।
इडा च पिङ्गला चैव तस्य सव्ये च दक्षिणे ।।४०

इडा तस्याः स्थिता सव्ये दक्षिणे पिङ्गला स्थिता ।
इडायां पिङ्गलायां च परतश्चन्द्रभास्करौ ।।४१।।

इडायां चन्द्रमो ज्ञेय पिङ्गलायां रविः स्मृतः ।
भावयित्वा अथ सकलं कालरात्रिदिवात्मकम् ।।४२।।

चन्द्रस्तामस इत्युक्तः सूर्यो राजस उच्यते ।
विषभागो रवेर्भागः सोमभागे(ऽ)मृतः स्मृतः ।।४३।।

[13a]
भोक्तृ-सुषुम्णा कालस्य गुह्यमेतद् उदाहृतम् ।
अन्यधमन्याः प्रोक्ताः गान्धारी हरितजिह्वका ।।४४।।

सपूषालं विकाचैव (?) यज्ञो(ऽ)स्मिन्नापि शङ्खिनी ।
कुद्दरीवि (?) च विद्वद्भिः प्राधान्यात् व्यापिकास्तनौ (?) ।।४५।।

काचिन् नाडी बहिर्वक्रात् या मातु (?) हृदि बुध्यते ।
पपातु तुष्टेमाप्नोति कोशे र (?) इव कल्पना ।।४६।।

मातुराहाररसजैः धातुभिः पुष्यते क्रमात् ।
गान्धारी नाम या जिह्वा पिङ्गलापार्श्ववर्तिनी ।।४७।।

उन्मुखी ब्रह्मरन्ध्रान्तं बहुशाखा समुद्यता ।
इडायाः पार्श्वगा नाडी सम्प्रोक्ता हस्तिजिह्विका ।।४८।।

बहुशाखा बहुस्कन्धा मूलात् कांतु (यातु?) मुखोन्मुखी ।
समुखालं (?) वुखौ (?) चोभे पार्श्वयोरूर्ध्वगे स्मृते ।।४९।।

कराङ्गुल्फ(गुंल्या) पर्य(न्तं) बहुशाखा समुद्यताः
यशस्विनी च दक्षस्य पादाङ्गुष्ठान्तमिष्यते ।।५०।।

बहुशाखाविभेदेन मूलाधारादधोमुखाः ।
शंङ्खिनी या महानाडी वामे चाधोमुखी स्थिता ।।५१।।

शाखोपशाखभेदेन पादाङ्गुल्यं तमीश्वरि ।
कुहुरिति च या नाडी साधश्चोर्ध्वं च सुस्थिताः ।।५२।।

बहुशाखाविभेदेन देहं व्याप्य व्यवस्थिता ।
सरस्वती च मूलोत्था जिह्वाग्रान्तं व्यवस्थिता ।।५३।।

जया च विजया व्योमा नाभिमूले समुद्भवेत्।
अयुग्मे नेत्रकर्णान्तं कपोलं व्याप्य संस्थिता।।५४।।

सुषुम्णा दक्षे वामे च उभे (इ)डापिङ्गले स्थिते।
वामदक्षिणनासान्त शरीरे(ऽ)स्मिन् व्यवस्थिते।।५५।।

एवं देवि समारव्याता नाड्यः प्राधान्यतः शुभे।
बहुत्वाच्चैव नामानि सम्यक् वक्तुं न शक्यते।।५६।।

शाखोपशारवतां प्राप्ताः शिरा लक्षत्रयात्मकम्।
अ(सा?)र्धलक्षमिति प्राहुः शरीरार्द्धविचारकैः ।।५७।।

[13b]
तद्भाश्च (?) बहूनाहु ताभिः सर्वाभिरेव च ।
व्याप्नोति सर्वतो वायुर्येन देह प्रवर्तते ।।५८।।

देहत्रिमूलाधारे तु देहाद्यन्तसमीरणः ।
नाडीभ्यामस्तमभ्येति घ्राणतो हि षड्ङ्गुले ।।५६।।

अहोरात्रमनेन्दुभ्यां ऊर्ध्वाधो वृत्तिरिष्यते ।
वामदक्षिणनाडीभ्यां स्याद् वा दक्षिणायनम् ।।६०।।

याश्च ना(ड्याः) शरीरेऽस्मिन् माहत्यय (?) व्यवस्थिते ।
तासु सर्वासु देवेशि विचरन्ति तु वायवः ।।६१।।

प्राणोऽपानः समानश्च उदानो व्यान एव च ।
नागः कूर्मेश् चक्षकरौ (?) देवदत्तो धनञ्जयः ।।६२।।

एते नाडीसु सर्वासु वसन्ति दश वायवः ।
एतेषु वायवः पञ्च नशः (नरे?) प्राणादयः स्मृता ।।६३।।

तेषु मुख्यतरः प्राणः स्कन्धः स्या(द)धः प्रतिष्ठितः ।
आस्यनासिकयोर्मध्ये हृदये भानुमण्डले ।।६४।।

पादाङ्गुष्ठे च प्राण एतेष्वपि च तिष्ठति ।
आपाने (अपाने) मिट्पायोश्च (?) कुरु दक्षिणजानुषु ।।६५।।

जंघोदरेषु कट्यां च स्थानेष्वेतेषु तिष्ठति ।
व्यानः श्रीशक्षि(श्रोणि ?)मध्यस्थः भ्रूक (?)........
गुल्फयोर्द्वयो ।।६६।।

नागादिवायवः पञ्च त्वग......दिषु (च) संस्थिता ।
दशसंख्या प्रकारादि प्राणकूर्मेति कीर्त्यते ।।६७।।

अपानवायोर्यत्कर्म विशमूत्रादिविसर्जनम् ।
देहावयवचेष्टादिः व्यानकर्मेति कीर्त्यते ।।६८।।

उदानकर्म यत् प्रोक्तं देहस्थो नयनादिकम् ।
पोषणादिः समानस्य शरीरे कर्म कीर्त्यते।।६६।।

भुक्तं सर्वरसं गात्रे व्यापयन् वह्निना सह ।
द्विसप्ततिसहस्रेषु नाडीमार्गेषु सञ्चरन् ।।७०।।

[14a]
समानवायुरेव एतद् देहं व्याप्य व्यवस्थितः ।
उद्गारादिगुणो यस्तु नागमेतीनि (नाग इत्येव) कीर्त्यते ।।७१।।

निमीलनादि कूर्मस्य द्रुतं च कृकलस्य च ।
देवदत्तस्य देवेशि तन्द्राकर्मेति कीर्त्यते ।।७२।।

धनञ्जयस्य शोषादि सर्वकर्मसमीकृता ।
ज्ञात्वैव वायुसंस्थानं नाडीस्थानं च यत्नतः ।।७३।।

नाडीसंशोधनं कुर्यात् यथाविधिपुरस्सरम् ।
नाडीशुद्धि (शुद्धिं) विना देवि प्राणायामो न सिध्यति।।७४।।

नाडीषु सम्यक्सिद्धास्तु (सिद्धैस्तु) सुकरं प्राणसाधनम् ।
शनैः संशोधयेन् नाडी रेचकादिविधानधित् ।।७५।।

ॐकारैर्धारणायोगैः प्राणायामैश्च भेषजैः ।
प्रशुध्यन्ते शनैर्नाड्यो योगिनो यत्नतः क्रमात् ।।७६।।

युग.....(?)(आ)श्रयेद्योगी नाडीशुद्धिं शनैश्चरेत् ।
यच्छीघ्रमभ्यसेत् सद्यस्तस्य रोगो(ऽ)भिजायतो ।।७७।।

महोदरामयछर्दिरतिसारी महाज्वरः ।
संभवन्त्यचिरेणैव जहि सम्यक् प्रवर्तनात् ।।७८।।

श्रुंठी (शुण्ठी?)कषायं सुस्निग्धं पीत्वा तदारणा-(तद्धारणा)-बलात् ।
पूर्वोक्तमन्त्रस्मरणान् मुच्यते व्याधिभिः शुभे ।।७९।।

यदभिर्व्याधिभिस्त्यक्तस्तदा प्राणे जिते तथा ।
स्वेच्छया वर्त्तते देहम् आत्मनाद्रुद्यालिष्यति ।।८०।।

यावदासनमुत्सृज्य देहो व्योम न चाश्रयेत् ।
तावद् रोगाश्च विघ्नाश्च संभविष्यन्ति अनेकधी (अनेकधा) ।।८१।।

यदा स्वदेहमुद्धृत्य योगी व्योमं समाश्रयेत् ।
तदोपसर्गास्तद् विघ्नकारका (:) न संभवन्ति हि ।।८२।।

नागाः सुरेन्द्रकन्याश्च यक्षिण्यः सिद्धकन्यकाः ।
प्रार्थयिष्यन्ति तं देवि छत्स्थ (सुस्थ?) येन भयातुराः ।।८३।।

श्रृणोति दिव्यवार्ता च दिव्यदर्शनमेव च ।
रसायनाद्यौषधं च स्वयं प्रवर्तते ।।८४।।

नृपाश्च पृथिवीदानै बहुमानैश्च पुस्करैः (पूष्करैः) ।
योगिन संप्रवर्तन्ते विघ्नार्थमितरे(ऽ)पि च ।।८५।।

यस्याज्ञा वर्तते देवि तिर्यग(म)नुनगादिषु ।
एवं प्राप्तान् महाभोगान् देवा सुषुम्णा
व्या वायुं (सुरमहीभुजाम्) ।।८६।।

तृणवद् यस्त्यजेद् योगी स परां सिद्धिमाप्नुयात् ।
यदा प्राणं स्वके देहे स्वेच्छया नयितुं (?) क्षमः ।।८७।।

तदा सुषुम्णाव्या (°स्थ) वायुं सन्निरुद्ध्य समुत्सृजेत् ।
सुषुम्णायां च शुद्धायां शुद्ध्यन्ते ताश्च नाडिकाः ।।८८।।

स्वरवर्णप्रभावाः स्यात् षडाधारं च शुध्यति ।
विन (?) मूत्रश्लेष्मदोषाणां अल्पता चैव जायते ।।८९।।

निर्दोष बहुसामर्थ्यं चिराद् वर्षशतं तथा ।
इति प्राणजययुक्तो योग युञ्जन् महेश्वरि ।
कालेन महता योगं प्राप्य सिद्धिं परां व्रजेत् ।।९०।।

।। इति श्री मत्स्येन्द्रसंहितायां चतुर्थः पटलः ।।

।।पञ्चमः पटलः।।

[14b] ईश्वर उवाच—

अथ प्रत्याहरि (प्रत्याहरेत्?) चित्तं निःसृतं भोगतृष्णया ।
यतो यतो(ऽ)नुक्रमति मनश्चञ्चलमस्थिरम् ।।१।।

ततस्ततोऽनुसंगृह्य स्वात्मन्येव लयं भवेत् ।
मनोभाजिनमत्युग्रं निगृह्णीयात् पुनः पुनः ।।२।।

प्राणायामकरो (°परो?) देवि बहुधा परिधावितम् ।
यस्मिन् स्तत्वे (तत्त्वे) समासक्तं मनो यदि न तिष्ठति ।।३।।

पुनः पुनर्निगृह्यैव योगीं स्थिरतरं नयेत् ।
विषयेषु समासन्नानीन्द्रियाणि शनैः शनैः ।।४।।

संनिगृह्य निगृह्यै(वं) च मनः प्रत्याहरेत् सदा ।
मन एव महेशानि कारणं बन्धमोक्षयोः ।।५।।

तस्मात् सर्वप्रयत्नेन मनो निर्मलतां नयेत् ।
योषिद् अन्नपानेषु समुत्क्रान्तं समंततः ।।६।।

संनिगृह्य प्रयत्नेन शुद्धतत्त्वे निवेशयेत् ।
संन्निरुध्य मनो देवि प्रयत्नान् नैव (एव) तिष्ठति ।।७।।

आकृष्याकृष्य यत्नेन तन्मनो वशमानयेत् ।
मनसो विजयो योगो मनसो विजयस्तपः ।।८।।

मनसो विजयो ज्ञानं तस्मात्प्रत्याहरेन् मनः ।
इन्द्रियाणि च सर्वाणि शनैः प्रत्याहरेत् सुधीः ।।९।।

श्रोत्रमाकाशम् ईशानि शब्दतन्मात्रलक्षणम् ।
व्योम्नै (व्योम्नि) च तत् समाधाय तत्कर्म च समाहरेत् ।।१०।।

त्वक्त (त्वक्?) वायुमयं देवि स्पर्शतन्मात्रलक्षणम् ।
तत्समावेश्य पवने तत्कर्म समतिक्रमेत् ।।११।।

चक्षुस्तेजोमयं विद्यात् रूपतन्मात्रलक्षणम् ।
तत् तेजसि समाधाय तस्य कर्म च संहरेत् ।।१२।।

जिह्वा वायोमयी (वारिमयी) देवि रसं तन्मात्रलक्षणम् ।
तामस्मिन् संतिवेश्यैव (संन्निवेश्यैव) तत्कर्म परिसंहरेत् ।।१३।।

घ्राणं महीमयं विद्याद् गन्धं तन्मात्रलक्षणम् ।
तत्समावेश्यैव तत्रैव तत्कर्महरणं चरेत् ।।१४।।

वाक्पाणिपादत्रयं (त्रितयं) पायूपस्थद्वयं क्रमात् ।
एतद् भूतेषु संवेश्य तत्कर्म (परि)संहरेत् ।।१५।।

यदा यदा मनो देवि चेन्द्रियाणि च कर्मसु ।
समुत्क्र(त्क्रा)मन्ति हृष्यन्ति महेशानि तदा तदा ।।१६।।

संनिगृह्य स्थिरीकुर्यात् इन्द्रियाणि मनस्तथा ।
यदा निश्चलतामेति मनः सर्वेन्द्रियैः सह ।
शनैरभ्यासयोगेन प्रत्याहारमुपक्रमेत् ।।१७।।

।। इति श्रीमत्स्येन्द्रसंहितायां पञ्चमः पटलः ।।

।।षष्ठः पटलः।।

[15a] ईश्वर उवाच—

धारणां संप्रवक्ष्यामि येन दोषक्षयो भवेत् ।
प्राणायामं द्विषट्कन्तु (?) धारणा योगः उच्यते ।।१।।

धारणा त्रिविधा देवि तां श्रुणुश्च (श्रुणुष्व) यथाविधिः ।
आदौ प्राणं (प्राणान्) समागृह्य धारयेद् वायुधारणाम् ।।२।।

वायुधारणादाध्वस्तमहापातकशं(स)ञ्चयः ।
आग्नेयीं धारणां ध्यायेत् सर्वदोषापनुत्तये ।।३।।

अग्निमारुतसंयोगाद् वारुणाकर्मयोगतः ।
संसिद्धियोगिनो देहे चिह्नमे (चिह्नमे)तत् प्रदृश्यते ।।४।।

चल (?) वर्णप्रसादं च स्वरलाघवसौष्टक (°सौष्ठवम्) ।
आरोग्यं शीघ्रगामित्वम् अरोगत्वं च जायते ।।५।।

एवं सिद्धस्तनुर्योगी क्षुत्पिपासाविघातनीम् ।
धारयेद् वारणां भूयः अमृताख्यां महेश्वरि ।।६।।

मूर्द्धादिपादपर्यन्तं प्लावये(द)मृतां शुचि ।
संभृत्य चिन्तयेज् जीवे-अमृतप्रशनेन (°प्रथनेन) तु ।।७।।

देहं चामृतसम्पूर्णं तत् तृप्तिपरिमोदितम् ।
भावयेदनिशं योगी जरामरणशान्तये ।।८।।

दिव्यामृतमहाध्यानधारणापूतविग्रहः ।
क्षत (क्षुत्) पिपासामहानिद्राजरारोगैर्विमुच्यते ।।९।।

षण्मासं धारयेद् यस्तु दिव्यामृतधारणाम् ।
बलीपलितनिर्मुक्तः स योयो (योगी) योगभा(क्) भवेत् ।।१०।।

सिध्यन्ति सर्वकार्याणि वाञ्छितानि महेश्वरि ।
तत् धारणान्महेशानि दृश्यन्ते योगसिद्धयः ।।११।।

तस्मात् सर्वप्रयत्नेन धारणायोगमाचरेत् ।
शनैर्धारणया सिद्धिः धारणां च समुत्क्रमेत् ।।१२।।

प्राणायामैः दहेद् दोषं धारणाभिश्च किश्विषं (किल्विषम्) ।
सर्वैन्द्रियवशीकारः प्रत्याहारेण जायते ।।१३।।

[15b]
देवि शिरणा (शिरसा) योगं यद्धि कुर्याद् दिने दिने ।
मद्दासः सिद्धिमापन्नः तदाशक्तो (तदासक्तो) परिव्रजेत् ।।१४।।

धारणायां च सिद्धायां योगीनो यच्चेतसः ।
विघ्नार्थमभिवर्तन्ते गुह्यकाः कलिकामुकाः ।।१५।।

तस्मात् तेषां वलिं दद्यात् अभीच्छन् सिद्धिमात्मनः ।
अन्यथा वर्त्तमानस्य विघ्नं कुर्वन्ति दारुणा ।।१६।।

रोगैर्बहुविधैर्देवि समसा (तमसा)निद्रा तत्त्वथ (तत् तथा) ।
प्रतिबन्धैश्च विविधैरविश्वासैश्च जृम्भणैः ।।१७।।

तस्मात् तेषां बलिं दद्यात् यथावन् नियतात्मवान् ।
एककालं द्विकालं वा त्रिकालं वा बलिं हरेत् ।।१८।।

अर्धरात्रे विशेषेण तद् यथा श्रृणु पार्वति ।
एकान्ते विजने देशे ऋत्वा (कृत्वा) मण्डलमुत्तमम् ।।१९।।

ऐं व्यापक मं कलाय (मण्डलाय) ऐम् इत्थं सकृदर्चयेत् ।
चतुरस्रं महेशानि मण्डलं जस्तुमाक्षतैः (कुसुमाक्षतैः) ।।२०।।

तत्र मण्डलमाधाय साधारं पात्रमुत्तमम् ।
अर्घ्यान्नं पूर्णसलिलं सपुष्पं साक्षतं गृहे ।।२१।।

बलिं दद्याच(द्य) मन्त्रेण तर्ज्जन्या संप्रदर्शयन् ।
सर्वभूतेभ्य इत्यन्ते हं कारं सम्यगुच्चरेत् ।।२२।।

स्वार्हं तोयं महामन्त्रः तारपञ्चकसंपुटः ।
सर्वविघ्नविघातार्थं ईरितः परमेश्वरि ।।२३।।

सर्वस्यादिति भूतांश्च भूतानांश्च तर्पयेत् ।
दक्षिणे सकलान्यक्षात् यक्षकन्याश्च तर्पयेत् ।।२४।।

पश्चिमे राक्षसान् देवि तथा राक्षसयोषितः ।
उत्तरे क्षेत्रपालाश्च तत्कन्याश्च प्रतर्पयेत् ।।२५।।

[16a]
ऊर्ध्वायां दिशि देवांश्च देवकन्याश्च तर्पयेत् ।
अधस्ताद् दिशिनागांश्च नागकन्यांश्च तर्पयेत् ।।२६।।

मध्ये चराचरगुरुमांश्च भुवने सहः (सह) ।
भैरवान् योगिनीक्षेत्रनायकान् गणनानपि (गणकानपि) ।।२७।।

तर्पयेतांश्च भूताद्यै भावयेदपि विष्टियं (व्यष्टितान्) ।
तत्परामृतसंतृप्तां भावयेत् सचराचरम् ।।२८।।

अनेन बलिना तृप्ताः योगिनः सिद्धिमुत्तमाम् ।
विशन्ति भूतनाथास्ते चान्यथा विघ्नयन्ति च ।।२९।।

अनेन वाञ्छिता तृप्ताः योगिनं योगसाधकम् ।
रक्षयन्ति महेशानि विघ्नमुत्सादयन्ति च
तस्मात्सर्वप्रयत्नेन बलिं दद्याद् विचक्षणाः ।।३०।।
न दान (दानै) यज्ञैर्न तपोभिरुग्रै (ग्रै?)
न चोपवासैर्नियमैः कदाचित् ।
संसिध्य देवि शिशु(?) योगमार्गं
विना गुरुं तत्फलदानदक्षम् ।। ३१

।। इति श्रीमत्स्येन्द्रसंहितायां षष्ठः पटलः ।।

।।सप्तमः पटलः।।

ईश्वर उवाच—

अथातः संप्रक्ष्यामि ध्यानयोगमनुत्तमम् ।
येन विज्ञानमात्रेण योगी स्याद् ईश्वरः स्वयम् ।।१।।

[16b]
पूर्वोक्तोसनमभ्यस्य (पूर्वोक्तासनमभ्यस्य) समासीनो जितेन्द्रियः ।
ध्यायेत् परतरं तस्व (तत्त्वं) निश्चलेन अन्तरात्मना ।।२।।

सर्वविघ्ननिवृत्यर्थं पूर्वं ध्यायेन् महावपुः ।
पातालतलपादं च भूकटि (भ्रुकुटि) व्योमदेहकम् ।।३।।

स्वर्गादिलोकशीर्षी (°शीर्षा) च दिग् बाहुं देवताभयम् ।
आदित्यचन्द्रनयनं नक्षत्रगणभूषणम् ।।४।।

समुद्रवसनं व्याप्तब्रह्माण्डमद्भुतम् ।
ब्रह्मादितृणपर्यन्तं जगदेतच् चराचरम् ।।५।।

स्वरोमकूपकं ध्यायेत् स्वदेहं च जगन्मयम् ।
एवं ध्यायेन् महारूपं देवि चित्तस्थिराप्तये ।।६।।

इति प्रध्याथ (प्रध्याय) तत् सम्यक् योगिनश्चित्तवृत्तयः ।
शनै (:) निश्चलतां यात्ति दिव्यज्ञानविचिन्तनात् ।।७।।

एवं चित्तं स्थिरीकृत्य तं च ध्यानमुपक्रमेत् ।
ध्यायेत् स्वहृदये पद्मं शिवशक्त्यात्मकं परम् ।।८।।

तारकं दं (?) शक्तिर्नाम प्रासादमणिकर्णिकाम् ।
अग्निमण्डलपत्र (?)........ सूर्यमण्डलकेसरम् ।।६।।

सोममण्डलकिञ्जकं बालार्कयुतभास्करम् ।
नवशक्तिसमायुक्तं चिन्तयेच्चिरमात्मवित् ।।१०।।

तन्मध्ये परमेशानं ध्यायेद् आत्मविशुद्धये ।
नील-जीमूतसंकाशं जटाबद्धंमहोरगम् ।।११।।

बालेन्दुशेखरं भीमं हुङ्कारव्याप्तदिङ्मुखम् ।
खड्गमूलान् (?) नवधरं नागपाशचरं प्रभुम् ।।१२।।

कपालघंटा (?) सहितं विषार्ण (?) वरदं तथा ।
रक्ताम्बर (°अम्बरा) धरं रक्तमाल्यगन्धविभूषितम् ।।१३।।

नागाष्टकमहाहारं गर्जन्तं भयनाशनम् ।
व्याघ्रचर्मपरिधानं सिंहचर्मोत्तरच्छदम् ।।१४।।

[17a]
नूपुरछन्नहीरादिभूषणैः परिभूषितै (परिभूषिताम्) ।
सोमसूर्याग्निनयनं दंष्टा (दंष्ट्रा) तिर्यङ् महानलम् ।।१५।।

असन्तमखिलं दोषं विघ्नकोटिविभेदकम् ।
सर्वशत्रुक्षयकरं महामृत्युविनाशनम् ।।१६।।

बलीपलितदौर्भाग्यं जरारोगविनाशनम् ।
सर्वसिद्धिकरं देवं भैरवं भक्तिरक्षकम् ।।१७।।

माध्वीमदसमाघूर्णं नयनत्रयमण्डलम् ।
मदिरानन्दं चेतस्कं सर्वलोकगुरुं हरम् ।।१८।।

ध्यायेद् एकाग्रया बुध्या (बुद्धया) सर्वविघ्नसा(शा)न्तये ।
तद् वामाङ्कस्थलगतां चण्डिकां दुःखनाशिनीम् ।।१९।।

कालाभ्राजनसंकाशं (?) व.......र्ध्व शिरोरुहाम् ।
मुण्डासनमंकितां (?) ऋस्म (?) सर्पक्षं कलमंकिताम् ।।२०।।

रक्तगन्धप्रसूनाद्यौ (°प्रसूनाक्ष्यैः) भूषितां भूषणैरपि ।
षड्वक्रां (षड्वक्त्रां) द्वादशभुजां प्रतिवक्रं (°वक्त्रं) त्रिलोचनाम् ।।२१।।

व्याघ्रचर्मपरिधानां सिंहचर्मोत्तरच्छदाम् ।
वज्रोकुशधरां (वज्राङ्कुशधरां) चक्रशंखखेटत्रिशूलिनीम् ।।२२।।
कर्त्रिकादण्डमुशलवरदाभयधारिणीम् ।
भद्रां त्रिनेत्रां भक्तार्तिभञ्जिनीं चन्द्रक्षरवरो (चन्द्रशेखराम्) ।।२३।।

भक्ततापत्रयहरां कालग्रसनरूपिणीम् ।
माध्वीपूर्णकांध्रां xx नवयौवनगोचरा(म्) ।।२४।।

योगिनीगणसं(शं)मुरव्यां भैरवीं भयहारिणीम् ।
सर्वेद्रित(सर्वेप्सित)फलप्राप्तिकारणां कारणत्रयाम् ।।२५।।

एवं ध्याये (च्) चिरं देवीं योगी योगफलाप्तये ।
सर्वोपद्रवशान्त्यर्थं सर्वाभीष्टफलाप्तये ।।२६।।

[17b]
अनेन ध्यानयोगेन कालमृत्युभयादपि ।
मुच्यते परमेशांनि (परमेशानि) न मयोक्तं मृषा भवेत् ।।२७।।

अधीत्यैतन्महाध्यानः (अधीत्यैतन्महाध्यान -) त्यक्तोपद्रवसञ्चयः ।
पुनः ध्यायेन् महादेवि सर्वोपद्रवशान्तये ।।२८।।

ग्रंथिंततोभित्वासर्वपीठगतोऽनिलः॥निष्पत्तौवैष्णवःशब्दःक्वणद्वीणाक्वणोभवेत्॥एकी
भूतंतयाचित्तंराजयोगाभिधायकं॥सुरेश्वराचार्याः॥प्राणेसुषुम्णांसंप्राप्तेनादोंतःश्रू
यतेमहान्घंटादुंदुभिशंखाब्धिवीणावेणवादिनादवत्॥तनूनपात्तडिन्नारातारेशातपनो
पमं॥ब्रह्मनाडीगतेप्राणेविश्वरूपंप्रकाशयेत्॥त्रिपुरासारसमुच्चयेनादोत्पत्तिविधिः॥अ
थपार्ष्णिनिरुद्धकंबुमूर्धध्वजमूलार्पितसम्यपादपार्ष्णिः॥ऋजुकायशिरोधरोयतात्मा
विषयेभ्योविनिवर्तितेंद्रियश्च॥काकीचंच्वाभिकुंचैर्मुहुरुदरदरीपूरयित्वासमीरैरंगु
ष्ठाभ्यामुभाभ्यांश्रुतिविवरेतर्जनीभ्यांचनेत्रेनासांरंध्रेनिरुध्यस्थिरविमलमतिर्मध्यमा

भ्यामथास्यंतुल्याभिर्न्नातिगात्रै कमलजनिलयेस्थापयेन्मानसंस्वं ॥ यथाशक्त्याभ्यासंप्रतिदि

वसमेवंविदधतः सुषुम्णातश्चापंप्रविशति शनैर्देहपवनः ॥ तदानादोनैजोभवतिसहजा
नंदजनकः क्रमाद्वीणावाद्यप्रहतकलवीणारवसमः ॥ अथो मत्तालिमालाजनितरवसमस्ता
रहुंकारहारीनादोसौवांशिकस्यानिलभरितलसद्वंशनिस्वानतुल्यः ॥ घंटानादानुकारीतद
नुचजलधिध्वानधीरोगभीरो गर्जत्पर्जन्यघोषः परइह कुहरे वर्त्तते ब्रह्मनाड्याः ॥
विजितोभवतीहतेनवायुः सहजोयस्यसमुत्थितः प्रणादः अणिमादिगुणाभवंतितस्यामि
तपुण्यस्यमहागुणास्पदस्य ॥ सुरराजतनूजवैरिरंध्रेविनिरुध्यस्वकरांगुलिद्वयेनजलधे
रिवधीरनादमंतः प्रसरंतंसहसाशृणोतिमर्त्यः ॥ परिभावयतोपिनादमेनंत्रिदशाधीशत
नूजवैरिजातं ॥ सततंभवतीहतस्यजंतोर्गुणसंप्राप्तिरपेतकल्मषस्य ॥ शृंगाग्र्यंगुलिभि

निरुध्यविधिवत्कोदंडयोः पंक्तितो मध्येरुद्रमरुन्निरुध्यवृषभश्चाष्टंचषष्ठेंद्रियं ॥ साक्षा
त्लक्षणमेवपश्यतिशनैस्तृप्यंतगीतंपरंज्योतिस्त्रैपुरमंकमुत्तरशरामल्लक्ष्याविलक्षभ्र
मम्मिति ॥ याज्ञवल्क्यः ॥ एवंवायुजयोपायः प्राणस्यतुवरानने ॥ शक्यमासनमास्थायस
माहितमनास्तथा ॥ करणानिवशीकृत्यविषयेभ्योवलात्सुधीः ॥ अपानमूर्द्ध्वमाकृष्यप्रण
वेनसमाहितः ॥ हस्ताभ्यांबंधयेत्सम्यक्कर्णादिकरणानिच ॥ अंगुष्ठाभ्यामुभेश्रोत्रेतर्ज्ज
नीभ्यांचचक्षुषी ॥ नासापुटेतथामाभ्यांप्रच्छादयकरणानिवै ॥ आनंदानुभवोयावत्तावन्मू
र्द्धनिधारयेत् ॥ प्राणः प्रयात्यनेनैवततस्त्वापूर्विज्ञानकृत ॥ ब्रह्मरंध्रेसुषुम्णायांमृणालांतरसू
त्रवत् ॥ नादोत्पत्तिस्त्वनेनैवशुद्धस्फटिकसंनिभा ॥ आमूर्द्ध्नावर्त्ततेनादोवीणानादवद्बहुस्थितः ॥
शंखध्वनिनिभस्त्वादौमध्येमब्दध्वनिर्यथा ॥ व्योमवर्त्मगते नादेगिरिप्रस्रवणंयथा ॥ व्योमव

र्भगते वायौ चित्तस्यात्मनि स्थिते ॥ सदानंदी भवेद्योगी वायुस्तेन जितो भवेत् ॥ इति स्कंदपुराणे ॥ पवन
ने गगनं प्राप्ते ध्वनिरुत्पद्यते महान् ॥ घंटादीनां प्रवाद्यानां ततः सिद्धिरंत इति हठप्रदीपिकायां ॥ श्रव जाय
णपुटनयननासापुटनिरोधनं कार्यं ॥ श्रीशुद्धसुषुम्णासरणौ स्फुटममलः श्रूयते नादः ॥ काष्ठको
निं ष्ठीप्रसंगेन नादमंतर्भणुौ ॥ पुरामत्स्येंद्रबोधाया दिनाथेनोदितं वचः मनः पाकमवाप्नोति नि =
रालंबाख्यबोटनैं नादोपास्तिरतो नित्यमवधेया हि योगिनां नादश्रवणता सूचितं मंतरं गतु दे
रंगमः विश्रून्यं सर्वमेकाग्र्यं कुत्रचिन्न हि धावति ॥ नादोंतर्णसारंगबंधेन वागुरायते ॥ अंतरं गु
गतुरंगस्य बंधने लीयते पि च ॥ घंटानिनादसक्तस्य शब्दनिःकरणस्य च अनाहतस्य शब्दस्य तस्य
शब्दस्य यो ध्वनिः ॥ ध्वनेरंतर्गतं ज्योतिर्ज्योतिरंतर्गतं मनः ॥ यन्मनो विलयं याति तद्विष्णोः परमं प
दं तावदाकाशसंकल्पो यावच्छब्दः प्रवर्तते निःशब्दं तत्परं ब्रह्म परमात्मा समीर्यते यत्किंचिन्नाम

रूपेण श्रूयते शक्तिरेव सा ॥ यस्तत्त्वांतो निराकारः स एव परमेश्वरः ॥ नादकोटिसहस्राणि बिंदुको
टिशतानि च सर्वे तत्र लयं यांति यत्र देवो निरंजन इति ॥ राजयोगे ॥ चित्ते चलति संसारोऽचले
लयः प्रजायते ॥ तस्माच्चित्तं स्थिरं कुर्यादौदासीन्यपरायणः ॥ यदा भवेदुदासीनस्तदा तत्त्वं
प्रकाशते ॥ स्वयं प्रकाशितेन तत्त्वे स्वानंदस्तत्क्षणाद्भवेत् ॥ आनंदेन च संतुष्टः सदाभ्यासपरो
भवेत् ॥ सदाभ्यासपरे भूते न विधिर्नैव च क्रमः ॥ न किंचिच्चिंतये द्योगी ह्यौदासीन्यपरो भवेत् ॥
न किंचिच्चिंतनात्तस्य स्वयं तत्त्वं प्रकाशते ॥ स्वयं प्रकाशिते तत्त्वे तत्क्षणात्तन्मयो भवेत् ॥ मनो दृ
श्यमिदं सर्वं यत्किंचित्सचराचरं ॥ मनसस्तून्मनीभावो द्वैताभावं प्रचक्षते ॥ जायमाना मनस्कस्य
कठिणत्वं उदासीनस्य तिष्ठतः ॥ मृदुत्वं च शरीरस्यापि जायते ॥ अमनस्कखनित्रेण समूलोन्मूलितं कृ
ते ॥ अंतःकरणशल्ये न सुखी संजायते मुनिः ॥ श्वाससूत्रसमापन्नमिंद्रियालयसंकुलं ॥ श

ॐ

यो·वि· यस्मिन्वा मनोजालं मौनवध्यायते सुखी ॥ प्रशांतेंद्रियवर्गोयं बुद्धिशक्तिसमन्वितः ॥ वायुना लयुतं जित्वा
मनःशत्रुं सुखी भवेत् ॥ गुणत्रयमयी रज्जुः सुदृढात्माल्मबंधिनी अमनस्कक्षुरेणैव क्षित्वा मोक्षम
३० वाप्नुयात् ॥ यथा संलीयते सर्वमस्तं गच्छति भास्करे ॥ करजालं तथा विश्वममनस्के विलीयते ॥ इं
द्रियग्राहविमुक्तो निर्वाते निर्मलायते ॥ अमनस्कहृदस्मात् परमामृतमश्नुते ॥ प्रनष्टोच्छ्वासनिः
श्वासविध्वस्तविषयग्रहः ॥ निश्चेष्टो निर्गतारंभो ध्यानं रपति योगिकः ॥ उच्छिन्नसर्वसंकल्पो
निर्गताशेषचेष्टकः स्वावगम्यो लयः कोपि जयतां वागगोचरः ॥ एकदंडत्रिदंडादिजटाभस्मा
दिकं तथा केशलुंचननग्नत्वं रक्तवस्त्रस्य धारणं ॥ उत्पन्नस्वावबोधस्य उदासीनस्य सर्व
दा सदाभ्यासरतस्यैतन्न कुत्राप्युपयुज्यते ॥ नदा दृष्टिविशेषाश्च विविधान्यासनानि च ॥ अं
तःकरणभावाश्च योगिनो नोपयोगिनः ॥ सदा जाग्रदवस्थायां सुप्तवद्योवतिष्ठते नि श्वा

धो सोच्छ्वासहीनश्च निश्चितं मुक्त एव सः ॥ निद्रादौ जागरस्यांते यो भावस्तूपजायते ॥ तं भावं भावयेद्
योगी निश्चितं मुक्त एव सः ॥ यथा सुप्तोत्थितः कश्चिद्विषयान्प्रतिपद्यते ॥ जागर्त्येव ततो योगियो
गनिद्राक्षयात्तथा ॥ औदासीन्यमतो ह्येव नवर्द्धमानेन योगिना ॥ उन्मूलितमनोमूलो जगर
द्वृक्षः पतिष्यति ॥ यदा यत्र यथा यस्मात्स्थिरो भवति मानसं तदा तत्र तथा तस्मात् तु चास्यं
कदाचन ॥ यत्र यत्र मनो याति न निवार्येत तत्ततः ॥ अवारितं मनस्तस्मात्स्वयमेव विलीयते ॥ नि
वार्यमाणं यत्नेन त्वत्कर्त्तुं नैव शक्यते ॥ उत्तिष्ठति क्षणे नैव मारुतस्य वशादतः ॥ दुर्निवार्य्यमनस्ताव
धावनत्वं न विंदति ॥ विदितेनु परे तत्त्वे मनो नौस्तंभकाकवत् ॥ यथा तुलां तुलाधारश्चंचलां [illegible]
[illegible] ंडे स्थिरां ॥ जाते सौख्यसदाभ्यासान्मनोवृत्तिस्तथात्मनि ॥ निक्षिप्य केवलं वि
द्यायफलं पं यद्वन्दं वन्निर्मलं निर्वातस्थितनिस्तरंगमुदकं स्वच्छस्वभावं परं ॥ तद्वत्सर्वमिदं विहा

 यसहसादेदीप्यतेनिः कलंतत्वंतत्सहजस्वभावममलंजानेऽमनस्के ध्रुवं॥ तस्मात्त्यागात्सकलवि
 षयंनिःकलाध्यात्मयोगाद्वायोर्नाशस्तदनुमनसस्तद्विनाशश्चमोक्षः॥सत्विदेवंसहजममलंनिः
कलंनिर्विकारंप्राप्स्यैमतंकुरुतकुशलाः पूर्वमेवामनस्कं। चतुर्विधामनोवस्थाविज्ञातव्यात्म
नीषिणा॥ विश्लिष्टंचगतायातंसुश्लिष्टंचसुलीनकं॥ विश्लिष्टंतामसंप्रोक्तंराजसंतुगतागतं।
सुश्लिष्टंसात्विकंप्रोक्तंसुलीनंगुणवर्जितं॥ विश्लिष्टंचगतायातंविकल्पंविषयग्रहं॥सुश्लिष्टं
[illegible] चसुलीनत्वंविकल्पविषयापहं॥ ततोभ्यासनियोगेननिरालंबंभवेद्यदि॥ तदा
समरसीभूतंपरमानंदमेवतत्॥ सानंदंनिश्चलेचेतस्ततःसुश्लिष्टमुच्यते॥ अतीवनिश्चली
भूतंसानंदंचसुलीनकं॥ अभ्यस्यतोमनःपूर्वंविश्लिष्टंचलमुच्यते॥ ततश्चलाचलंकिंचि
त्सानंदंचगतागतं॥ एवंभूतस्यकर्माणिपुण्यानिसंशयानिच॥ प्रयांतिनैवलिंपंतिक्रियमा

णानिसाधुनेति॥ योगारूढस्यस्वरूपंवदन्तस्यैवसमाधिरभ्यासदशायांब्रह्मानंदाविर्भाव
माहभगवान्वासुदेवः॥ तथाहि॥ यदाविनियतंचित्तमात्मन्येवावतिष्ठते॥ निस्पृहःसर्व
कामेभ्योयुक्तइत्युच्यतेतदा॥ इत्यारभ्य ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनइत्यंतेन श्रु
तिश्च॥ समाधिनिर्धूतमलस्यचेतसोनिवेशितस्यात्मनियत्सुखंभवेत्॥ नशक्यतेवर्णयितुं
गिरातदास्वयंतदंतःकरणेनगृह्यतइति॥ विद्यारण्यश्रीपादाः॥ यावद्यावदहंकारोविस्मृ
ताभ्यासयोगतः॥ तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयते॥ यद्यप्यसौचिरंकालंसमाधिर्दु
र्लभोनृणां॥ तथापिक्षणिकोब्रह्मानंदंनिश्चाययत्यसौ इति॥ पातंजलेपि॥ गुणभेदेन
चित्तस्यचतस्रोवस्थाउक्ताः॥ व्युत्थानं॥ समाधिप्रारंभः॥ एकाग्रता॥ निरोधश्चेति॥ एषांतुन
त्रमक्रियात्रिगुणात्मकप्रकृतिकार्यत्वाच्चित्तस्यत्रिगुणप्रकृतेःपूर्वमेवाक्रांतत्वनिरूपणा

यो॰वि॰ नसरे॥गुणास्तुसत्वरजस्तमांसि॥तत्रसत्वंप्रसादप्रकाशधर्मशीलंरजः प्रवृत्तिपरितापशोका
३२ दिधर्मशीलं॥तमस्तुप्रवृत्तिविरोधिस्थित्याख्यधर्मशीलंगौरवावरणदैन्यादिधर्मशीलंचएवं न्या
चचित्तस्यैतादृशगुणत्रयवत्वाद्गुणत्रयस्यचपरस्परोपर्मर्दोपमर्दकरूपविचित्रपरिणामभेदेन म
क्षिप्तमूढविक्षिप्तैकाग्र्यानिरोधाख्यभूमिशब्दिताःपंचावस्थाभवंति॥तत्रक्षिप्तंरजसातेषु
याविषयेषुसुपादिषुप्रेरितमत्यंतमस्थिरंमूढंतमसानिद्रावृत्तिमन्मूर्छाद्युपेतंक्रोधादिभिः
पंक्ति कृत्याकृत्यविवेकशून्यंपरापकारनिरतंविक्षिप्तंप्राद्विशिष्टंवैशिष्ट्यंचास्यैमबहुलत्व कादा
प क्षिं कस्यैमायप्रयत्नसत्वोद्रेकोप्यस्तितथापिसत्वात्किंचिदूनरजस्तमस्स्पृष्टत्वात्॥ऐश्व
र्यशब्दादिविषयेषुचप्रियंभवतिसत्वप्राधान्याच्चतत्वंप्रणिधित्सदपितत्वस्यतमसापिहि
तत्वादणिमादिकमेवैश्वर्यमन्यमानंप्रणिधित्सति॥प्रणिधंतेचक्षणं॥अथरजोंशेन
३२

क्षिप्यमानंतत्रालब्धस्थितितत्रप्रियमात्रंभवति॥शब्दादिषुस्वरसवाहित्वेननिरूढप्रेमत्वमि
तिक्षिप्तैकाग्र्यविलक्षस्यसमाधेर्विक्षेपोपसर्जनतात्तयोगेऽनुपयोगित्वमिति॥सर्वस्याप्यत्रवृत्ति ये
विरोधेपारंपर्येणाप्यमोह साधनत्वाभावाद्धेयत्वमिति॥तिस्त्रोप्येताभूमयोहेयाएवए
काग्रनिरुद्धेतुभूमीसत्वोत्कर्षधियाक्रमंवहिर्वृत्तिनिरोधसर्वसंस्कारविलयद्वारेणसमा
ध्युपयोगिन्यावित्युपादेये॥तत्रैकाग्र्यमेकतानं॥अत्रहिचित्तमाविर्भूतसत्वमयंगतत
मःपटलमपिरजोमात्रयासंस्पृष्टत्वाद्धर्मज्ञानवैराग्यैश्वर्याद्यपगमंभवति॥यथासंप्रज्ञात
समाधिसंपन्नयोर्मधुमतीभूमिकप्रज्ञाज्योतिषोर्मध्यमयोगिनापेतसत्वंनिरुद्धंतुसकलवृ
त्तिकसंस्कारमात्रशेषं॥यथातिक्रांतभावनीयस्ययोगिनश्चित्तसत्वमपगतरजोलेशमलं
स्वरूपप्रतिष्ठंअभ्यासवैराग्यपुटपाकप्रबंधविधूतरजस्तमोमलस्यबुद्धिसत्वंनूपनीयस्य
ग

[redacted]स्वरूपप्रतिष्ठायांविषयेंद्रियप्रत्यात्वतस्यानवसिता
३३ धिकारकतयाचकार्यकारिणाविवेकख्यातिपरंकार्यविषेमेयशिष्यनरति॥अत्रभावनीयपद य
मान्यातिरिक्तवस्तुपरं॥एवंचैकाग्रेबहिर्वृत्तिनिरोधः॥निरुद्धेचसर्वासांवृत्तीनांसंस्कारस
हितानांप्रविलयइत्यनयोर्भूम्योर्योगस्यास्तिसंभवइति॥तत्रक्षिप्तमुक्षिप्तचित्तभूमीव्युः स
क्षि त्थानंविक्षिप्तभूमिः सत्वोद्रेकात्समाधिप्रारंभः एकाग्रतानिरोधःपर्यंतभूमी॥प्रतिपरिणा
मंचसंस्काराः॥तत्रव्युत्थानजनिताःसंस्काराःसमाधिप्रारंभजैःसंस्कारैर्हन्यंते॥तत्राप्येका
ग्रताजैःएकाग्रताजनितैःनिरोधैः॥निरोधजाअपिसंस्कारास्तैरेवहन्यंते॥यथासुवर्णसंव
रलितंध्मायमानंसीसमात्मानंसुवर्णमलंचनिर्दहति॥एवमेकाग्रत जनितान्संस्कारान्नि

रोधजाआत्मानंचनिर्दहंतीति॥अथोक्तोपायैःस्थिरचित्तस्ययोगिनःक्रमेणसविकल्पकसमा
धिप्रकाराआविर्भवंतिततो संप्रज्ञाताख्योनिर्बीजःसमाधिश्चाविर्भवतीत्येतत्प्रदर्शनपरा
णिपतंजलिसूत्राणिव्याख्यासहितानिप्रदर्श्यंते॥क्षीणवृत्तेरभिजातस्येवमणेर्ग्रहीतृ ग्र
ते हणग्राह्येषुतत्स्थतदंजनतासमापत्तिः॥उक्तोपायैर्लब्धस्थितिकस्यस्फटिकमणेरिवस्व
भावतःशुद्धस्यरजस्तमोभ्यामनभिभवेमहाभूततन्मात्रस्थूलसूक्ष्मरूपग्राह्येकाग्रतापू
र्विकाग्राह्यमयतारूपाग्राह्यसमापत्तिः॥ततोरजस्तमोलेशानुविद्धांतःकरणेकाग्रता र
पूर्विकातन्मयतारूपाग्रहणसमापत्तिस्ततोस्मिताख्यशुद्धसत्वांतःकरणेकाग्रता
पूर्विकातन्मयतारूपागृहीतृसमापत्तिश्चभवति॥सूत्रेतत्स्थत्वंतदेकाग्रतातदंजनत्वं
तन्मयत्वं॥क्षीणभूते चित्ते विषयस्यभाव्यमानस्यचोत्कर्षःतथाविधासमापत्तिस्तद्रूपः

यो॰ परिणाम इत्यर्थः।। साच समापत्तिः सविकल्पनिर्विकल्पसविचारनिर्विचारभेदेन चतुर्विधा।।
३४ तत्र शब्दार्थज्ञानविकल्पैः।। संकीर्णा सवितर्का यस्यां समापत्तौ शब्दार्थज्ञानविकल्पसंभि
न्नः स्थूलावभासः सा सविकल्पा समापत्तिः स्मृति परि शुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा
निर्वितर्का यदा अर्थमात्रप्रवणेन चेतसा अर्थमात्राविष्टेन तदभ्यासात्रांतरीयकता
नुपगता संकेतस्मृतिस्यक्ता तदा योगेच श्रुतानुमानविकल्पो तन्मूलो मुक्तौ तदा तच्छू
न्यायां समाधिप्रज्ञायां स्वरूपमात्रेणैवस्थितोर्थः।। तत्स्वरूपतयैवन तु विकल्पत्वेनेना
कारेणापि विघ्नते सा स्थूलविषया सती निर्वितर्का समापत्तिः।। एतयैव सविचारा निर्वि
चारा च सूक्ष्मविषया व्याख्याता। सूक्ष्मस्तन्मात्रेंद्रियादिः शब्दार्थविकल्पसहितत्वेन देश
कालधर्माद्यवच्छिन्नः सूक्ष्मार्थः प्रतिभाति यस्यां सा सविचारा समापत्तिः।। देशकालध ३४

र्मादिरहितो धर्मिमात्रतया सूक्ष्मोर्थः प्रतिभाति यस्यां सा निर्विचारा समापत्तिः।। सा योगि
नामेव परं प्रत्यक्षा असदारोपगंधस्याभावात्।। एतासु च समापत्तिषु सवितर्का स्थूलवि
न्यं षयामपेक्ष्य निर्वितर्कायाः प्राधां ततोपि सूक्ष्मविषयायाः सविचारायास्ततोपि निर्विक
ल्परूपायाः प्रधानपर्यंतसूक्ष्मार्थविषयायां निर्विचारायास्तस्याश्चापि निर्विचारायाः।।
प्रकृष्टाभ्यासवशान्नैर्मल्ये वितते क्लेशवासनारहितं स्थितिप्रवाहयोग्यं भवति।। ऋतंभरा
तत्र प्रज्ञा।। तदा च विपर्ययगंधेनापि न संस्पृष्टा ऋतं सत्यं नान रारब्धा प्रज्ञा जायते।। श्रुतानुमा
नप्रज्ञाभ्यामन्यविषयविशेषार्थत्वात्।। या ऋतंभरा प्रज्ञा शब्दानुमानज्ञानविलक्षणा सूक्ष्म
व्यवहितानू विषयान् स्फुटेनैव रूपेण भासयति।। तथा च माष्यं क्रं न्दिरुत्तोलितं श्लोक
द्वयं प्रज्ञाप्रासादयारुह्य अशोच्यः शोचते जनान् भूमिष्ठानिव शैलस्थः सर्वान्प्राज्ञोनुपश्य

यो॰चि॰ ति॥आगमेनानुमानेन ध्यानाभ्यासबलेन चैत्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तममिति॥तज्जः
३५ संस्कारोन्यसंस्कारप्रतिबंधी एतज्ज निश्चेतैः संस्कारैर्विक्षेपजाः संस्काराः कार्याक्षमा भवंति।
न एवं सबीजः समाधिः नदेवमुक्ताश्चतस्रः समापत्तयः॥सहबीजेनालंबनेन वर्तत इति व्यु
त्पत्त्या सबीजः समाधिरित्युच्यते।यः सविकल्पः संप्रज्ञातसमाधिरिति पूर्वमुक्तः॥तस्या
पि निरोधे सर्वनिरोधान्निर्बीजः समाधिः तस्यापि सबीजस्यापि प्रविलये सर्वासां चित्तवृत्तीनां
स्वकारणप्रविलयायां संस्कारमात्राद्वृत्तिरुद्देति तस्यां नेति नेति केवलं पर्युदासनाविकल्पा
को निर्बीजाख्योऽसंप्रज्ञातसमाधिर्भवति॥यस्मिन्सति पुरुषः स्वरूपमात्रज्योतिः प्रतिष्ठः
शुद्धो भवति अयमेव निर्बीजसमाख्यो योगः परमपुरुषार्थहेतुः नैतद्व्यतिरेकेण मोक्षसंभावना
प्यस्ति॥अत्र च श्रुतिस्मृतीतिहासपुराणादिवाक्यं प्रमाणं॥वासिष्ठे॥दुःसहाराम संसारवि ३५

षवेगविषूचिका॥योगगारुडमंत्रेण पावनेनोपशाम्यति॥गरुडपुराणे॥तथा यत्नेत मतिमान्
यास्यान्निर्वृतिः परा।योगेन लभ्यते सा तु न चान्येन तु केन चित्॥भवतापप्रतप्तानां योगो हि पर
मौषधं॥परावरप्रसक्ता धीर्यस्य निर्वेदसंभवा॥स च योगाग्निना दग्धसमस्तक्लेशसंचयः॥
निर्वाणं परमं सर्वं प्राप्नोत्यपि न संशयः॥समात्मयोगसिद्धिस्तु पूर्णो यत्स्वात्मदर्शनात्॥न किं
चिद्दृश्यते कार्यं नैमैव सकलं कृतं॥आत्मारामः सदा पूर्णः सुखमात्यंतिकं गतः॥अतस्तस्या
पि निर्वेदः सदानंदमयस्य च॥तपसा भावितात्मानो योगिनः संयतेंद्रियाः।प्रतरंति महात्मा
नो योगेनैव महार्णवमिति॥याज्ञवल्क्यस्मृतौ॥ईज्याचारदमाहिंसादानस्वाध्यायकर्म
णां॥अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति॥महर्षिमातंगः॥अग्निष्टोमादिकान्यज्ञा २
न्विहाय द्विजसत्तमः॥योगाभ्यासरतः शांतः परं ब्रह्माधिगच्छति॥ब्राह्मणक्षत्रियविशां स्त्री

या॰चि॰ त्राद्दस्यचपावने॥शांतयेकर्मणामं[blot]योगान्नास्तिविमुक्तये॥कूर्मपुराणे॥शिववाक्यं॥अतः
३६ परंप्रवक्ष्यामियोगंपरमदुर्लभं॥येनात्मानंप्रपश्यंतिभानुमंतमिवेश्वरं॥योगाग्निर्दह
तिक्षिप्रमशेषंपापपंजरं॥प्रसन्नंजायतेज्ञानंसाक्षान्निर्वाणसिद्धिदं॥सं[blot]स्मिनोगह स्था
ने स्याश्चवनस्याब्रह्मचारिणः॥तेषां[blot]त्याभियुक्तानांमायातत्त्वंसमुत्थितं॥नाशयामितमः
कृत्स्नंज्ञानदीपेनमाचिरात्॥तथा॥विधूयमोहकलिलंलब्ध्वायोगमनुत्तमं॥गृहस्थोमुच्यते
बंधान्नात्रकार्याविचारणा॥तथावानप्रस्थप्रकरणे॥योगाभ्यासरतश्चस्यादूर्ध्वाध्यायीभ
वेत्सदेति॥अग्नीनात्मनिसंस्थाप्यद्विजःप्रव्रजितोभवेत्॥योगाभ्यासरतोनित्यमात्मविद्या
परायणः॥इतियतिधर्मप्रकरणेमनुः॥भूतभावान्नवेक्षेतयोगेनपरमात्मनः॥देहेषुचेचोप
यतिमुक्तमेवधर्मेचेति॥नरसिंहपुराणे॥योगाभ्यासरत स्येहपुंसोनश्यतिपातकं॥ ३६

विघातयोभ्यांसंपन्नोपःपुमान्योगतत्परः॥देहद्वयंविहायाशुमुक्तोभवतिबंधनात्॥स्कंदपुरा
णे॥अत्यल्पोपियथादीपःसुमहन्नाशयेत्तमः॥योगाभ्यासस्तथाल्पोपिमहापापंविनाश
येत्॥विष्णुधर्मे॥पृष्टश्चयःसर्वभूतानांस्त्रीणामप्युपकारकं॥अपिकीटपतंगेभ्यस्तन्मःश्रेयः
परंवद॥इत्युक्तःकपिलःपूर्वंदेवैर्देवर्षिभिःसह॥योगएवपरंश्रेयस्तेषामुक्तवासुरेति॥म ल
हाभारतेयोगमार्गंप्रकृत्याहव्यासः॥अपिवर्णावकृष्टस्तुनारीवाधर्मकांक्षिणी॥तावप्ये
तेनमार्गेणगच्छेतांपरमांगतिं॥यदिवासर्वधर्मज्ञोयदिवाप्यकृतोपुमान्॥यदिवाधार्मि
कश्रेष्ठोयदिवापापकृत्तमः॥यदिवापुरुषव्याघ्रोयदिवाक्लैब्यधारकः॥तरत्येवमहादुः
खंजरामरणसागरं॥अपिजिज्ञासमानोपिशब्दब्रह्मातिवर्ततइति॥योगत्वप्रकाशदत्तात्रे तो
यः॥ब्राह्मणःश्रमणोवापिबौद्धोवापतितोपिवा॥कापालिकोवाचार्वाकःश्रद्धयासहितःसुधीः॥ ध
य

यो॰वि॰ योगाभ्यासरतोनित्यंसर्वसिद्धिमनामुयादिति॥भगवद्गीतायां॥यत्सांख्यैः प्राप्यतेस्थानंत
३७ द्योगैरपिगम्यते॥एकंसांख्यंचयोगंचयःपश्यतिसपश्यति॥योगयुक्तोविशुद्धात्माविजिता
त्माजितेंद्रियः॥सर्वभूतात्मभूतात्माकुर्वन्नपिनलिप्यते॥नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभा
वना॥नचाभावयतःशांतिरशांतस्यकुतःसुखं॥युंजन्नेवंसदात्मानंयोगीनियतमान
सः॥शांतिंनिर्वाणपरमांमत्संस्थामधिगच्छति॥नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यतेस्व
र्म ल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात्॥वेदेषुयज्ञेषुतपःसुचैवदानेषुयत्पुण्यफलंप्रतिष्ठं॥
अत्येतितत्सर्वमिदंविदित्वायोगीपरंस्थानमुपैतिचाद्यं॥तस्माद्योगाययुज्यस्वयोगःक
र्मसुकौशलमिति॥योगशास्त्रे॥एतद्विमुक्तिसोपानमेतत्कालस्यवंचनं॥यद्व्यावृत्तंम
नोभोगादासक्तंपरमात्मनि॥योगबीजे॥देव्युवाच॥नमस्तेआदिनाथायविश्वनाथाय ३७

तेनमः॥नमस्तेविश्वरूपायविश्वातीतायतेनमः॥उत्पत्तिस्थितिसंहारकारिणेतेनमोनमः
नमस्तेदेवदेवेशनमस्तेपरमात्मने॥नमस्तेपरिपूर्णायजगदानंदहेतवे॥सदाशिवजगन्ना
थकरुणामृतवारिधे॥सर्वेजीवाःसुखैर्दुःखैर्मायाजालेनवेष्टिताः॥तेषांमुक्तिःकथंदेवकृ
पयावदशंकर॥सर्वसिद्धिकरोमार्गोमायाजालनिकृंतनः॥जन्ममृत्युजराव्याधिनाशकः
सुखदश्चयः॥नानामार्गास्त्वयादेवकथितास्तुमहेश्वर॥अधुनामोक्षदंमार्गंब्रूहियोगवि
दांवर॥ईश्वरउवाच॥वक्ष्यायेनविमुच्यंतेदेविमार्गमनः परं॥तमहंकथयिष्यामितवप्री
त्यासुरेश्वरि॥नानामार्गैस्तुदुःप्रापंकैवल्यंपरमंपदं॥सिद्धमार्गेणलभ्येतनान्यथाशिवभा
षितं॥अनेकशतसंख्याभिस्तर्कव्याकरणादिभिः॥पतिताःशास्त्रजालेषुप्रज्ञयातेविमोहि
ताः॥अनिर्वाच्यपदंवक्तुंशक्यतेनसुरैरपि॥स्वात्मप्रकाशरूपंतत्किंशास्त्रेणप्रकाश्यते॥

यो· निःकलंनिर्मलंशांतंसर्वातीतंनिरामयं॥तदेतज्जीवरूपेणपुण्यपापफलैर्वृतं॥देव्यु
वाच॥परमात्मपदंनित्यंतत्कथंजीवतांगतं॥तत्वातीतंमहादेवप्रसादात्कथयस्वमे॥ईश्व
३८ रउवाच॥सर्वभावपदातीतंज्ञानरूपंनिरंजनं॥वायुवत्स्फुरितंस्वस्मिंस्तत्रोहंकारउत्थितः॥
पंचात्मकमभूत्पिंडंधातुबंधगुणात्मकं॥सुखदुःखैःसदायुक्तंजीवभावनयाकुलं॥तेनजीवा
भिधाप्रोक्ताविशुद्धेपरमात्मनि॥कामःक्रोधोभयंचिंतालोभमोहमदांबुपैःजरामृत्युश्चका
र्पण्यंशोकस्तंद्राक्षुधातृषा॥द्वेषोलज्जासुखंदुःखंविषादोहर्षएवच॥जाग्रत्स्वप्नस्सुषु
प्तिश्चशंकोगर्वस्तथैवच॥एभिर्दोषैर्विनिर्मुक्तस्सजीवश्शिवएवहि॥तस्माद्दोषविनाशा
र्थमुपायंकथयामिते॥ज्ञानंकेचिद्वदंत्यत्रकेवलंतत्रसिद्धये॥योगहीनंकथंज्ञानंमोक्षदंभव
तीश्वरि॥योगोपिज्ञानहीनस्तुनक्षमोमोक्षकर्मणि॥देव्युवाच॥अज्ञानादेवसंसारोज्ञाना ३८

देवविमुच्यते॥योगेनैषांतुकिंकार्यंमेप्रसन्नोभगवद॥ईश्वरउवाच॥सत्यमेवत्वयाप्रोक्तंकथ
यामिसुरेश्वरि॥ज्ञानस्वरूपमेवादौज्ञेयंज्ञानेनसाधनं॥अज्ञानंकीदृशंचेतिप्रविचार्यविवेकि
नाज्ञातंयेननिजंरूपंकैवल्यंपरमंशिवं॥असौदोषैर्विमुक्तः किंकामक्रोधभयादिभिःसर्व
दोषैर्वृतोजीवःकथंज्ञानेनमुच्यते॥देव्युवाच॥स्वात्मरूपंयदाज्ञातंपूर्णंतद्व्यापकंत
दा॥कामक्रोधादिदोषाणांस्वरूपान्नास्तिभिन्नता॥पश्चात्तस्यविधिःकोवानिषेधोपि
वाकथंभवेत्॥विवेकीसर्वदामुक्तःसंसारभ्रमवर्जितः॥ईश्वरउवाच॥यदिपूर्णंस्वरूपं
तत्सत्यमेतद्वरानने॥सकलंनिःकलंचैवपूर्णत्वाच्चतदेवहि॥कलनात्स्फूर्तिरूपेणसं
सारभ्रमतांगतं॥निःकलंनिर्मलंसाक्षात्स्वरूपंगगनोपमं॥उत्पत्तिस्थितिसंहारस्फूर्ति
ज्ञानविवर्जितं॥एवंरूपंसमापन्नःसकथंमोहसागरे॥निमज्जतिवरारोहेत्यक्त्वाविद्यः

यो· पुनःपुनःसुखदुःखादिमोहेषु यथा संसारिणां स्थितिः ॥ तथाज्ञानी यदा तिष्ठेद्वासनावासि
३९ तस्तदा ॥ तयोर्नास्ति विशेषोत्र समा संसारभावना ॥ ज्ञानं चेदीदृशं जातमज्ञानं कीदृशं पु
नः ॥ ज्ञाननिष्ठो विरक्तोपि धर्मज्ञोपि जितेंद्रियः ॥ विना योगेन देवोपि न मोक्षं लभते प्रिये
॥ देव्युवाच ॥ अन्यत्किंचित्परिज्ञेयं ज्ञानिनां नास्ति शंकर ॥ विरक्तात्मकनिष्पत्तौ कथं
मोक्षो भवेन्ननु ॥ ईश्वर उवाच ॥ अपक्वाः परिपक्वाश्च द्विविधा देहिनः स्मृताः ॥ अपक्वा
योगहीनास्तु पक्वा योगेन देहिनः ॥ पक्वो योगाग्निना देही अजडः शोकवर्जितः जडस्तु
पार्थिवो ज्ञेयः अपक्वो दुःखदो भवेत् ॥ ध्यानस्थोसौ तथाप्येवमिंद्रियैर्विवशो भवेत् ॥ ता
नि गाढं नियंतापि तथाप्यन्यैः प्रबाध्यते ॥ शीतोष्णसुखदुःखाद्यैर्व्याधिभिर्मानवैस्तथा ॥
॥ अन्यैर्नानाविधैर्जीवैः शस्त्राग्निजलमा रुतैः ॥ शरीरं पीड्यते तैस्तु चित्तं संक्षोभ्यते ३९

ततः ॥ तथा प्राणविपत्तौ तु क्षोभमायाति मारुतैः ततो दुःखशतैर्व्याप्तं चित्तं क्षुब्धं भवेत्क्षणं ॥
ध देहावसानसमये चित्ते यद्यद्विभावयेत् ॥ तत्तदेव भवेज्जीव इत्येवं जन्मकारणं ॥ देहांते किं भवे
ज्जन्म तन्न जानंति मानवाः ॥ तस्माज्ज्ञानं च वैराग्यं जयश्च केवलं श्रमः ॥ पिपीलिका पदाल
ग्ना देहे ज्ञानाद्विमुच्यते ॥ असौ किं वृश्चिकैर्दष्टो देहांते वा कथं सुखं ॥ तस्मान्मूढा न जानंति मि
थ्यातर्केण चेष्टिताः ॥ अहंकृतिर्यदा यस्य नष्टा भवति देहतः स भवेत्तु नष्टो वै व्याधयस्तस्य किं
पुनः जलाग्निशस्त्रव्यालादिगंधः कस्य भविष्यति यथा यथा परिक्षीणा पुष्टा बहिः कृतिर्भवेत्
॥ तन्मानेनास्य नश्यंति ये सर्वेपि गुणादयः कारणेन विना कार्यं न कदाचन विद्यते ॥ अहंका
रं विना तद्वद्देहे दुःखं कथं भवेत् ॥ देव्युवाच ॥ योगिनः कथ्यमानास्तु किं ये व्यवहरंति च ॥ तेः क
थं व्यवहारस्तु क्षीयते वद शंकर ॥ देहावसानमप्येवं तेषां भवति कीदृशं ॥ एतन्मे संशयं छि

यो॰वि॰ छेत्तुमर्हसि यत्नतः॥ ईश्वर उवाच॥ शरीरेण जिताः सर्वे शरीरं योगिभिर्जितं॥ तत्कथं कुरुते तेषां सु
४० खदुःखादिकं फलं॥ इंद्रियाणि मनो बुद्धिः कामक्रोधादिकं जितं॥ तेनैव विजितं सर्वं नासौ केनापि
केनापि बाध्यते॥ महाभूतानि तत्त्वानि संहृतानि क्रमेण तु॥ सप्तधातुमयो देहो दग्धो योगा
ग्निना शनैः॥ देवैरपि न लक्ष्येत योगदेहो महाबलः॥ छेदबंधैर्विनिर्मुक्तो नानाशक्तिधरः परः॥
यथाकाशस्तथा देहो आकाशादपि निर्मलः॥ सूक्ष्मात्सूक्ष्मतरो देहः स्थूलात्स्थूलो जडाज्ज
डः॥ इच्छारूपो योगदेहः स्वतंत्रस्त्वजरामरः॥ क्रीडति त्रिषु लोकेषु लीलया यत्र कुत्रचित्॥ अचिंत्य
शक्तिमान्योगी नानारूपाणि धारयन्॥ संहरेच्च पुनस्तानि स्वेच्छया विजितेंद्रियः॥ मरणं तस्य
किं देवि पृच्छसी दुसमानने॥ नासौ मरणमाप्नोति पुनर्योगबलेन च॥ पुनरेव मृतो वासौ मृ
तस्य मरणं कुतः॥ मरणं यत्र सर्वेषां तत्रासौ सखि जीवति॥ यत्र जीवंति मूढास्तु तत्रासौ म्रि ४०

यते सदा॥ कर्तव्यं नैव तस्यास्ति कृते नासौ न लिप्यते॥ जीवन्मुक्तः सदा स्वच्छः सर्वदोषवि
वर्जितः॥ विरक्ता ज्ञानिनश्चान्ये देहेन विजिताः सदा॥ ते कथं योगिभिस्तुल्या मांसपिंडाः
कुदेहिनः॥ देव्युवाच॥ ज्ञानिनश्च मृता ये वै तेषां भवति कीदृशी॥ गतिः कथय देवेश कारुण्या
२ मृतवारिधे॥ ईश्वर उवाच॥ देहांते ज्ञानिनः पुण्यात्पापात्फलमाप्यते॥ यादृशं तु भवेत्तत्तद्भुक्त्वा
ज्ञानी पुनर्भवेत्॥ पश्चात्पुण्येन लभते सिद्धेन सह संगतिं॥ ततः सिद्धस्य कृपया योगी भवति नान्य
था॥ ततो नश्यति संसारो नान्यथा शिवभाषितं॥ देव्युवाच॥ ज्ञानादेव हि मोक्षं च वदंति ज्ञानि
नः सदा॥ न कथं सिद्ध्यति ततो योगः किं मोक्षदो भवेत्॥ ईश्वर उवाच॥ ज्ञानेनैव तु मोक्षो
हि वाक्यं तेषां तु नान्यथा॥ सर्वे वदंति खड्गेन जयो भवति तर्हि किं॥ विना युद्धेन वीर्येण कथं जय
मवाप्नुयात्॥ तथा योगेन रहितं ज्ञानं मोक्षाय नो भवेत्॥ ज्ञानं विना हि योगोऽपि न सिद्ध्यति कदाच

यो॰भ॰वि॰ न॥ तस्मादत्र वरारोहे तपःश्रेष्ठं दोनविं ते॥ जन्मांतरैश्च बहुभिर्योगो ज्ञानेन लभ्यते॥ ज्ञानं तु ज
४१ न्मनैकेन योगादेव प्रजायते॥ तस्माद्योगात्परतरो नास्ति मार्गस्तु मोक्षदः॥ देव्युवाच॥ बहुभि
तृ र्जन्मभिर्ज्ञानी योगः संप्राप्यते कथं। योगात्तु जन्मनैकेन कथं ज्ञानमवाप्यते॥ ईश्वर उवाच॥
अविचार्य चिरं ज्ञानान्मुक्तोहमिति मिन्यते॥ किमस्य मननादेव मुक्तिर्भवति तत्क्षणात्॥ पुमा
न्जन्मांतरशतैर्योगादेव विमुच्यते॥ न तथा भविता योगाज्जन्ममृत्युः पुनः पुनः॥ प्राणापान मं
स्समायोगाच्चंद्रसूर्यैक्यता भवेत्॥ सप्तधातुमयं देहमग्निना जरयेद्बुधः॥ व्याधयस्तस्य नश्यं
ति छेदघातादिकास्तथा॥ तथासौ परमाकाशरूपो देही वतिष्ठते॥ किं पुनर्बहुनोक्तेन मरणं
नास्ति तस्य वै॥ देहीव दृश्यते लोके दग्धकर्पूरवत्स्वयं॥ योगात्परतरं पुण्यं योगात्परत
रा स्थितिः॥ योगात्परतरं सूक्ष्मं योगमार्गात्परं न हीति महाभारते॥ समीरणगतो वह्निरीहे ४१

त्कृत्स्नां महीमपि॥ तद्वज्ज्ञानबलो योगी दीप्ततेजा महाबलः॥ अंतकाल इवादित्यः कृत्स्नं
संशोषयेज्जगत्॥ विशंति चावशान्पार्थ योगान्योगबलान्विताः॥ प्रजापतीनृषीन्देवान्महाभूतानि
चेश्वराः॥ न यमो नांतकः क्रुद्धो न मृत्युर्भीमविक्रमः॥ ईशते नृपते सर्वे योगस्यामिततेजसः॥ आ
त्मनां सहस्राणि बहूनि भरतर्षभ॥ योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्॥ प्राप्नुयाद्विषया
न्कांश्चित्पुनश्चोग्रं तपश्चरेत्॥ संक्षिपेच्च पुनस्तात सूर्यस्तेजोगुणानिवेति॥ मानसोल्लासे॥ श्रुत्वा
चार्यप्रसादेन योगाभ्यासबलेन च॥ ईश्वरानुग्रहेणापि स्वात्मबोधो यदा भवेत्॥ भुक्तं यथा त्वं कु
क्षिस्थं स्वात्मत्वेन च पश्यति॥ पूर्णाहंता कवलितं विश्वं योगीश्वरस्तथेति॥ राजयोगे वामदेवं
प्रति शिववाक्यं॥ राजयोगस्य माहात्म्यं को हि जानाति तत्त्वतः॥ तज्ज्ञानी वसते यत्र स देशः पु
ण्यभाजनं॥ दर्शनादर्चनात्तस्य त्रिसप्तकुलसंयुताः॥ अज्ञा मुक्तिपदं यांति किं पुनस्तत्प

यो॰वि॰ रायणाः॥ अंतर्योगं बहिर्योगं योजानाति विशेषतः॥ त्वयामयाप्यसौवंद्यःशेषैर्वंद्यस्तु किंपुनरिति॥
४२ कूर्मपुराणे॥ एककालं द्विकालंवा त्रीकालं नित्यमेववा॥ येयुंजंतेमहायोगं विज्ञेयस्तेमहेश्वराइति
गीतायां॥ तपस्विभ्योधिकोयोगी ज्ञानिभ्योऽपिमतोधिकः॥ कर्मिभ्यश्चाधिकोयोगी तस्माद्योगी
भवार्जुनेति॥ ब्रह्मांडपुराणे॥ गृहस्थानां सहस्रेणवानप्रस्थशतेनच॥ ब्रह्मचारिसहस्रेण
गी योगीएवविशिष्यते इति ब्रह्मवैवर्ते॥ कृतार्थौपितरौतेन धन्योदेशः कुलंचतत्॥ जायतेयोग
वान्यस्यदत्तमक्षयतांव्रजेत्॥ दृष्टस्संभाषितस्स्पृष्टः पुंसश्चान्योविवेकवान्॥ वकोटिशतोपि न
ध तंपुनातिव्रजिनंनृणाम्॥ अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमिति वाशिष्ठे॥ यस्यानुर्ध्वपर्यंतं भ
तत्वबुद्धिःप्रवर्तते॥ तद्दृष्टिगोचराः सर्वेमुच्यंतेसर्वपातकैः॥ स्कंदपुराणे॥ आसनेनरुजंहंतिप्रा
णायामेनपातकं॥ विकारंमानसंयोगीप्रत्याहारेणमुंचति॥ धारणाभिर्मनोधैर्यंध्यानादीश्व ४२

रदर्शनं॥ समाधिनालभेन्मोक्षंत्यक्त्वाकर्मशुभाशुभमिति॥ ननुचित्तवृत्तिनिरोधाख्ययोगस्यप्रमा
णवहिर्भूतस्यकथंतज्जन्यज्ञानेनाज्ञाननिवृत्तिमंतरामोक्षस्यसंभावनाप्यस्ति॥ तथाचश्रुतिः॥
तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविमुक्तये इतिचेत्॥ सत्यं॥ मनसैवानुद्रष्टव्यं दृश्यतेत्व
ग्र्यया बुद्ध्यासूक्ष्मदर्शिभि इत्यादिश्रुतिबलात्मनः प्रमाणंतत्वमस्यादिवाक्यंतुपरोक्षज्ञान
जनकमेवेतिपक्षोपदाश्रीयतेतदायोगाभ्यासनिरस्तसमस्तदोषेणमनसात्मसाक्षात्कारोद
योभवेत्॥ यदातुयतोवाचोनिवर्तंतेअप्राप्यमनसासह॥ एतदप्रमेयंध्रुवमित्यादिश्रुतिब
लात्प्रमाणसहकारिताद्वसंस्कारवन्मनोऽप्रमाणंतत्त्वमसीत्यादिवाक्यादेवापरोक्षज्ञानो
नि दयइतिपक्षस्वीकारस्तदापिसमाधिरस्तसमस्तचित्तदोषस्यपुंसोमहावाक्यादेवसाक्षा
त्कारसंभवः॥ तथाचविद्यारण्यश्रीपादाःध्यातः ध्यानेपरित्यज्यक्रमाद्ध्यानैकगोचरं निर्वा

नदीपवद्बीजसमाधिरभिधीयते॥अमुनावासनाजालेनिःशेषंप्रविलापिते॥समूलोन्मूलितेपु

ण्यपापाख्यकर्मसंचये॥वाक्यमप्रतिबद्धंसत्प्राक्परात्म्यावभासिते॥करामलकवद्बोधमपरो
क्षंप्रसूयतेइति॥किंच॥प्रमाणप्रमेयप्रमातृनिष्ठात्रिविधासंभावनातन्निवारकस्यसांगयोगा
नुष्ठानस्यसाक्षात्कारोद्देशेनश्रुत्यैवविहितत्वात्॥तथाहि॥आत्मावारेद्रष्टव्यः श्रोतव्योमं
तव्योनिदिध्यासितव्यइति॥स्मृतिश्च॥श्रोतव्यःश्रुतिवाक्येभ्योमंतव्यश्चोपपत्तिभिः॥मत्वाचस
ततंध्येयएतेदर्शनहेतवइति॥श्रवणमननेनियमएवेत्युक्तंनिदिध्यासनंतुनिर्गुणोपासनरूपंध्या
नंवासंप्रज्ञातसमाधिरूपंवापरिपक्वंसन्निर्बीजसमाधिर्भवति॥तथाचविद्यारण्यश्रीपादाः॥निर्गु
णोपासनंपक्वंसमाधिः स्याच्छनैस्ततः॥यःसमाधिर्निरोधाख्यःसोनाभ्यासेन लभ्यते॥निरो
धलाभेपुंसोंतरसंगंवस्तुशिष्यते॥पुनःपुनर्वासितेस्मिन्वाक्याज्जायेततत्त्वधीः॥योगाभ्यासस्त्वे ४३

तदर्थोमन्तविंद्वादिषुश्रुतः॥धर्ममेघमिमंप्राहुःसमाधिंयोगवित्तमाः॥वर्षत्येषयतोधर्मामृत
धाराःसहस्रशः॥अनादाविहसंसारेसंचिताःकर्मकोटयः॥अनेनविलयंयांतिशुद्धोधर्मोविवर्द्धतइ
ति॥अत्रयद्यपिउद्दालकपुराणादिवाक्येषुप्राणिमात्रस्ययोगेधिकारोलभ्यते॥तथापिमोक्ष
रूपफलवतियोगेविरक्ताधिकारस्यैवोचितत्वात्॥तथाचवायुसंहितायां॥दृष्टेतथानुश्रविके
विरक्तंविषयेमनः॥यस्यतस्याधिकारोस्मिन्योगेनान्यस्यकस्यचित्॥सुरेश्वराचार्याः॥इहामुत्रविर
क्तस्यसंसारंप्रजिहासतः॥जिज्ञासोरेवचैकाग्र्यंरस्यसेत्यधिकारितेति॥अत्रेयंव्यवस्थाचतु
र्वर्ये।पुब्राह्मणस्यैव॥तत्रापिसंन्यासिनएवतत्रापिइहजन्मजन्मांतरचिराभ्यस्तयोगेनदेहा
त्मज्ञानवत्तानदेहात्मज्ञानबाधकमेतादृशसमुत्पन्नतत्त्वसाक्षात्कारस्यैवमोक्षोभवति॥अ
न्येषांतुक्षत्रियवैश्यशूद्रस्त्रीणांयोगाभ्यासेनतत्त्वनिष्ठानामपिक्रमेणब्राह्मणजन्मासाद्यैव

यो·विं· मोक्षोभवति॥तथाचगीतायां॥मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये॥यततामपिसर्वेषांकश्चिन्मां
४४ वेत्तितत्त्वतइति॥तथाचगरुडपुराणे॥योगाभ्यासोन्नृणांयेषांनास्तिजन्मांतराहृतः॥योगस्यप्राप्त
येतेषांशूद्रवैश्यादिकःक्रमः॥स्त्रीत्वाच्छूद्रत्वमभ्येतिततोवैश्यत्वमाप्नुयात्॥ततश्चक्षत्रियोविप्रः
क्रियाहीनस्ततोभवेत्॥अनूचानस्ततोयज्वाकर्मन्यासीततःपरं॥ततोज्ञानित्वमभ्येतियोगीमुक्तिं
क्रमाल्लभेदिति॥येषांजन्मांतराभ्यस्तयोगसंस्कारोनास्तितेषांस्त्रीशूद्रवैश्यक्षत्रियाणांयोगस्यप्रा
प्त्यपेमोक्षस्यलाभपदानींतनयोगांगानुष्ठानेनवास्ववर्णाश्रमविहितधर्मानुष्ठानेनवाउक्तं २
सूक्ष्मधर्मांतरेणवाक्रमेणप्राप्तब्राह्मणजन्मनांकृतसंन्यासानांचिराभ्यस्तयोगानांमोक्षोभ
वतीत्ययंक्रमः॥येषांपुनर्जन्मांतराभ्यस्तयोगसंस्कारोनुवर्ततेतेषांतेनैवपूर्वसंस्कारेणपुनःप्रा
प्तयोगानांक्रमेणब्राह्मजन्मप्राप्तिद्वारामोक्षोभवतीत्यर्थः॥दानधर्मेतुशक्रेणब्राह्मण्या ४४

र्थंतप्यस्यतेमतंगायअयमर्थोविस्तरेणोपवर्णितः॥कदामुक्तिर्भवित्रीनोधर्मजेतेतिचापगाः॥स
माष्टयःप्रत्युवाचब्राह्मणोभवितायदा॥प्रार्थितोमुचुकुंदेनमोक्षार्थमिहकेशवः॥उक्तवानग्रजो
भूत्वामोक्षसेभवबंधनात्॥भरताख्योमहीपालोधर्मव्याधादयस्तथा॥योगाभ्यासरताःशांता
ब्रह्मज्ञानरताअपि॥विप्रजन्मसमासाद्यतेमुक्ताइतिदृश्यते॥तद्व्याख्यानेनलिखितंग्रंथविस्तर
भीतितः॥एवंचसतिजनकादयःक्षत्रियास्तुलाधारादयोवैश्याःगार्गीसुलभाद्याःस्त्रियोविदुरधै
त्नवकादयः॥शूद्राब्राह्मणजन्मासाद्यैवमुक्ताइतिनिश्चीयते॥ननुनिरस्तसमस्तशंकाकलंक
संजातब्रह्मात्मतत्त्वसाक्षात्काराणामपिपुनर्जन्मेत्यसंबद्धमिवभासइतिचेत्॥नसर्वब्रह्मत
चूडामणीनांवसिष्ठादीनामेवानेकजन्मश्रवणात्॥आस्तामेषांजन्मवार्तायेषांप्रसादादेते
षांतत्त्वसाक्षात्कारस्तेषामीश्वराणांब्रह्मविष्णुशिवादीनामनेकजन्मश्रवणात्॥तथाचवासि

द्वेवसिद्धंमतिमुशंकेत्तिः॥मुनेनेवब्रह्मपुत्रस्यजन्माष्टममिदंकिल॥संस्मराम्यष्टमेसर्गेतस्मिंस्त्वम
 मसंगतःकदाचिज्जायसेव्योम्नःकदाचिज्जायसेजलात्॥कदाचिज्जायसेशैलात्कदाचिज्जायु
धे से नलात्॥रक्षसांहननयेविलोमहीमवनारे तः॥अधुनैकादशंजन्मरामनाम्नीभविष्यति॥
वसुदेवगृहे विलोर्भुवोभारनिवृत्तये॥अधुनाषोडशंजन्मभविष्यतिमुनीश्वर॥रेणुकाजन्म
तोजातःपष्ठवारमिमंहरिः॥शतंकलियुगानांचहरेर्बुद्धदशाशत मितिसंस्मरामीत्थंरियासं न
वं धः गीतायांवहूनिमेव्यतीतानिजन्मानितवचार्जुन॥तान्यहंवेदसर्वाणिनत्वंवेत्थप
रंतप॥ननुतेषांजगद्रक्षारूपनियतपालनार्थंजन्मेतिचेत्॥एवंतर्हिमत्कृतेपिब्राह्मणाए
वमोक्षाधिकारीतिपारमेश्वरनियतेर्विद्यमानत्वात्॥ननुजन्ममरणलक्षणसंसारोविद्यते।
स्तत्वज्ञानवैयर्थ्यमितिचेत्॥नभोगैकनाश्यप्रारब्धकर्मप्रतिबंधकायगमेमोक्षस्यावश्यंभा

वित्वात्॥तन्देशगसमयेपिजीवन्मुक्तिकरत्वात्तथाचश्रुतिःतस्यतावदेवचिरंयावन्नविमोक्ष्येथ
संपत्स्येइत्यादिकाःप्रसिद्धश्चायमर्थःश्रुतिस्मृतिपुराणेतिहासादिषु॥यथाचयोगिनमुक्ति
स्तथात्रापियोगबीजवाक्यान्युदाहरतादर्शितमेवपूर्वं॥ननुकाशीमरणात्प्राणिमात्रस्यमुक्तिः र
श्रूयतेकथंब्राह्मणएकमोक्षाधिकारीतिचेत्॥सत्यं॥तत्रापिशुभाशुभस्वकर्मभुक्तवतएवब्रा
ह्मदिव्यशरीरस्यैवविश्वनाथोपदेशाधिकारिणःश्रुतत्वात्॥दिव्यशरीरस्यचब्राह्मणशरीरस
मशीलत्वात्॥व्यक्तश्चायमर्थोब्रह्मवैवर्ते॥अन्येतुयोगश्रद्धावंतः॥योगाभ्यासेसर्वाधिकारश्चव
त् र्णोयोगोस्यतत्वज्ञानेनसर्वएवमुच्यंते॥योगहीनानांक्षत्रियादीनांतुक्रममुक्तिरित्याहुः॥कूर्म
पुराणेऋषयऊचुः॥भगवन्देवतारिघ्नहिरण्याक्षनिषूदन॥चत्वारोह्याश्रमाः प्रोक्तायोगिना
मकउच्यते॥कूर्मउवाच॥सर्वकर्माणिसंन्यस्यसमाधिमचलंश्रितः॥यआस्तेनिश्चलोयोगी॥

ससंन्यासीनपंचमः॥तस्मादेतद्द्विजातीनामाश्रमाणांचतुष्टयं॥सर्वेषुवेदशास्त्रेषुपंचमोनोप
पद्यतइति॥यःसंप्राप्तनिर्वीजसमाधिःसएवसंन्यासीज्ञेयःसर्वकर्मणांनिःशेषतस्त्यक्त्वात्सा
क्षाज्ज्ञानमोक्षाधिकारित्वात्॥अतएवयोगाभावेसंन्यासोदुःसाध्योऽनर्थाश्चपदेपदेभवंति
॥भगवद्गीतायां॥यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव॥नह्यसंन्यस्तसंकल्पोयोगीभवतिक
श्चन॥संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः॥योगयुक्तोमुनिर्ब्रह्मनचिरेणाधिगच्छति॥न
नुबहुकालसाध्येयोगेप्रवृत्तस्यपुरुषस्यदैवान्मध्येमृतस्यव्यर्थपरिश्रमभयेनप्रचंडविघ्ने
स वीविषयसंगेदोषेणवायोगंपरित्यक्तवतोदुरत्ययप्रत्यवायशंकयावनप्रेक्षावतोनप्रवृत्तिर्यु
ज्यतइतिचेत्॥योगाभ्यासमध्येनतस्ययोगिनोयागतिः॥साचवसिष्ठेनोक्तायोगसप्तभूमिकावि
वरणेभूमिकाश्चवक्ष्यंते॥रामउवाच॥मूढस्यासकृत्न्योत्यस्यप्रवृत्तस्याधमस्यच॥अप्राप्तयो

च
गसंगस्यकथमुत्तरणंभवेत्॥एकमथद्वितीयांवातृतीयामुत्तराःचवा॥आरूढस्यमृतस्यापिकीदृ
भूत शीभवेद्गतिः॥वसिष्ठउवाच॥भूम्यारूढ[illegible]स्यतावत्संसृतिरातता॥यावज्जन्मांतरशतैर्नो
दितासमयमात्रभूः॥अथवासाधुसंगत्याकाकतालीययोगतः॥संसारस्यपरामर्शाद्वैराग्यंसमु
देतिहिवैराग्येभ्युदितेजंतोरवरंभूमिकोदयः॥ततोनश्यतिसंसारइतिशास्त्रार्थसंग्रहः॥योगभू
मिकयोत्क्रांतजीवितस्यशरीरिणः॥भूमिकांशानुसारेणक्षीयतेपूर्वदुःकृतं॥ततःसुरविमाने
षुलोकपालपुरेषुच॥मेरूपवनकुंजेषुरमतेरमणीसखः॥ततःसुकृतसंभारेदुःकृतेचपुराकृते॥भो
गक्षयात्परिक्षीणेयोगीचजायतेपुनः॥शुचीनांश्रीमतांगेहेगुप्तेगुणवतांसतां॥जनित्वायो
गमेवैषसेवतेयोगवासितः॥तत्रप्राग्भावनाभ्यस्तयोगभूमिक्रमंबुधः॥दृष्ट्वोपरिपतत्युच्चैरुत्तरं
भूमिकाक्रमं॥योगबीजेदेव्युवाच॥कथंयत्वंप्रहादेवकाकमर्कटयोर्मते॥ईश्वरउवाच॥

अन्यग्रंथेमयाप्रोक्तंकथयामिसुरेश्वरि॥ आदिनाथमहामार्गएकएवहिनान्यथा॥ द्विधेवसंप्रती
येनजन्मांतरविभेदतः॥ क्रमेणप्राप्यतेप्राप्यमभ्यासादेवनान्यथा॥ एकेनैवशरीरेणयोगाभ्यासाछ
नैःशनैः॥ चिरात्संप्राप्यतेसिद्धिर्मर्कटक्रमएवसः॥ योगसिद्धिंविनादेहःप्रमादाद्यदिनश्यति॥ पूर्ववा
सनयायुक्तःशरीरंचान्यदाप्नुयात्॥ ततःपुण्यवशात्सिद्धगुरुणासहसंगतिः॥ पश्चिमद्वारमा
र्गेणजायतेत्वरितंफलं॥ पूर्वजन्मकृताभ्यासात्सत्वरंफलमश्नुते॥ एतदेवहिविज्ञेयंतत्काकम
तमुत्तमं॥ नस्मात्काकमतान्नास्तिह्यभ्यासस्यपरंपदमिति॥ भगवद्गीतायां॥ अर्जुनउवाच॥
अतिःप्रश्रद्धयोपेतद्धत्यारम्यतनोपतिपरांगतिमित्यंतप्रश्नोत्तररूपं॥ कीदृशोयोगोमयाविज्ञेय
इतिश्रद्धयायोगंजिज्ञासमानोपिपुरुषः॥ शब्दब्रह्मवेदस्तस्यातिवर्तनंचेदं॥ सर्ववेदोक्तसर्वक
र्मसर्वफलायेक्षयाधिकंचिरकालंब्रह्मादिलोकवासलक्षणंफलंप्राप्नोतिपदायोगजिज्ञासामा

त्रेणैतादृशंफलंतदाकिमुवक्तव्यंयोगाभ्यासेनफलाधिक्यमितिकैमुतिकन्यायमाहजिज्ञासुरपीत्या
न् दिना॥ राजयोगे॥ आरिशत्तिपुर्मोवेयामत्तोलब्धवत्तोपुरा॥ अधुनाजन्मसंस्कारंत्वमेकोलब्धवानसि॥
अन्यजन्मकृताभ्यासात्स्वयंतत्त्वंप्रकाशते॥ सुप्तोत्थितोसोप्रत्यक्षंगुपदेशादिनाविनेतिस्कंदपुरा
यत् णेअमार्गेणापियोगंश्रद्दधानःसमभ्यसेत्॥ सोपिकालेनवहुनाध्रुवंयोगमवाप्नुयादिति॥ जै
गीषव्योयथाविप्रोयथाचैवोषितादयः॥ क्षत्रियाजनकाद्यास्तुतुलाधारादयोविशः॥ संप्राप्तापूर्वजन्म न्म
समाधितःपरमांसिद्धिंपूर्वाभ्यस्तस्वयोगतः॥ धर्मव्याधादयः॥ सत्यशूद्राःपैलवकादयः॥ मैत्रेयीसु
लभाशार्ङ्गीशांडिलीचतपस्विनी॥ एतेचान्येचवहवोनीचयोनिगताअपि॥ ज्ञाननिष्ठांपरांप्राप्ताः
स पूर्वजन्मसमाधितः॥ केचपूर्वजन्माभ्यस्तयोगाःस्वाभ्यासपुण्यतारतम्येनकेचिद्ब्रह्मत्वंकेचि...
...केचिद्ब्रह्मपुत्रत्वंकेचिद्ब्रह्मर्षित्वंकेचिन्मुनित्वंभूपत्वंचप्राप्ताःसंतस्तत्रोपदेशंविनैवात्मसाक्षात्का

ति

नि रवँतावभूवुः॥यथाहिरण्यगर्भवसिष्ठनारदसनत्कुमारादिशैववामदेवशुकादयोजन्मसिद्धा ह्येव ३

पुराणादिषुश्रूयन्ते॥नास्तिरागसमंदुःखंनास्तित्यागसमंसुखं॥नास्तिशंभुसमोदेवोनास्तियोगस
मागतिः॥भूमिकास्तुहेयदुःखात्यंतहानाख्यकैवल्यसाधनीभूततत्वज्ञानेसत्यमपज्ञोर्याभिरूपिता नी
भगवतापतंजलिनासप्तमोक्तः॥सप्तविधातस्यप्रांतभूमौप्रज्ञेतिसूत्रेण॥तद्व्याख्यानंतु॥उत्प
न्नविवेकख्यातेःपुंसःप्रांतभूमौसकलसालंबनसमाधिपर्यंतेप्रज्ञासप्तविधाभवति॥तत्रका
र्यमुक्तिरूपाचतुर्विधा॥ज्ञातंमयाज्ञेयंनज्ञातव्यंकिंचिदस्ति॥क्षीणामेक्लेशानक्षेतव्यंकिंचिद
स्ति॥अधिगतंमयाहातं॥प्राप्तामयाविवेकख्यातिरिति॥प्रत्ययांतरपरिहारेणतस्यामवस्था
यामीदृश्येवप्रज्ञाजायते॥एषाधीःकार्यविषयनिर्मलज्ञानरूपत्वात्कार्यविमुक्तिरित्युच्यते॥
चित्तविमुक्तिस्त्रिविधाचरितार्थामेवुद्धिः॥गुणाःकृताधिकारागिरिशिखर॥पतिताग्रावाएवेन

पुनः॥स्थितिर्यास्यंतिस्वकारणेप्रलयाभिमुखानामेषांमोहाख्यमूलकारणाभावान्निःप्रयोजनत्वा
च्चकुतःप्रवाहः॥सात्मीभूतश्चमेसमाधिस्तस्मिन्सतिस्वरूपेप्रतिष्ठोहमित्येतादृशीत्रिविधाचित्तविमु
क्तिरिति॥तदस्याःसमस्तप्रज्ञायाःस्वरूपनिष्ठोहमित्याकारकत्वात्स्वरूपस्यचएतदात्म्यमिदं
सर्वंतत्सत्यंसआत्मातत् त्वमसि॥कमिह्यन्यंवावदिपतसएतमेवपुरुषंतमपश्यदितिएषतआ
त्मांतर्याम्यमृतइतिनान्यदतोस्तिद्रष्टेति॥अहंत्वमसित्वंवाहमस्मि॥सत्वमेवतदितिश्रुतिभिर्व्रति
स्वभेदसिद्धेरहंब्रह्मास्मीत्याकारोविवेकख्यातौभवत्येव॥अस्यापिनसाक्षान्मोक्षसाधनत्वंकिं
त्वेतदनंतरभाविनिर्विकल्पकद्वारैवतस्यैवसर्ववृत्तिनिरोधरूपस्यमुख्ययोगस्यमोक्षसाधन
ली त्वंपूर्वोपन्यस्तेपुस्मृतिपुराणवाक्येषुनिर्देशात्॥अस्याश्चहानसाधनीभूतायाविवेक रे
ख्यातेरुत्पत्तौयमनियमाद्यंगानुष्ठानमेवचित्तशुद्धिद्वारानिमित्तमितिव ते॥एतास्तुवासिष्ठे
ते क्ष्ये

यो॰वि॰ स्तरेणप्रोक्ताःतयाएष्ववाक्येषुनिर्देशात्॥अस्याश्चहानिःवसिष्ठउवाच॥इमांसप्तपदांज्ञानभूमि
४८ माकर्णयानघ॥नानयाज्ञातयाभूयोमोहपंके.नमज्जति॥वदंतिवहुभेदेनवादिनोयोगभूमिकाः
॥ममत्वभिमतानूनमिमाएवसुखप्रदाः॥अवबोधंविदुर्ज्ञानंतदिदंसप्तभूमिकं॥मुक्तिस्तुज्ञे
यमित्युक्तभूमिकाभूमिकांतरे॥ज्ञानभूमिःशुभेच्छाख्याप्रथमासमुदाहृता॥विचारणाद्विती
यातुत्ततीयातनुमानसा॥सत्वापत्तिश्चतुर्थीस्यात्ततोसंसक्तिनाभूमिका॥पदार्थभावनीषष्ठी
सप्तमीतुर्यगास्मृता॥आसामंतस्थितामुक्तिर्यस्यांभूयोनशोचति॥एतासांभूमिकानांत्वमि
दंद्विवचनंशृणु॥ किंमिस्तिष्ठामिमूढएवप्रेक्ष्येहंशास्त्रसज्जनैः॥वैराग्यपूर्वमिच्छेतिशुभेच्छेत्युच्यते
वुधैः॥शास्त्रसज्जनसंपर्कैर्वैराग्याभ्यासपूर्वकं॥सदाचारप्रवृत्तिर्याप्रोच्यतेसाविचारणा॥विचा
रणाशुभेच्छाभ्यामिंद्रियार्थेष्वरक्तता॥यत्रसातनुताभावात्प्रोच्यतेतनुमानसा॥भूमिकात्रितया ४८
भ्या

भ्यासाच्चित्ते र्थविरतेर्वशात्॥सत्वात्मनिस्थितेशुद्धेसत्वापत्तिरुदाहृता॥दशाचतुष्टयाभ्या
९ सादसंगफलाभ्यशं॥रूढसत्वचमत्कारात्प्रोक्तासंसक्तिनामिका॥भूमिकापंचकाभ्यासात्स्वा
त्मारामतयादृढं॥आभ्यंतराणांवाह्यानांपदार्थानांचभावनात्॥परप्रयुक्तेनचिरंप्रय
त्नेनावबोधनं॥पदार्थभावनीषष्ठीनामसंजायतेगतिः॥भूमिषट्कचिराभ्यासाद्भेदस्यानु
पलंभतः॥यत्स्वभावैकनिष्ठत्वंसाज्ञेयातुर्यगागतिः॥एषाहिजीवन्मुक्तेषुतुर्यावस्थेहविद्यते॥
विदेहमुक्तिविषयेतुर्यातीतमतःपरं॥रामउवाच॥सप्तानांयोगभूमीनामभ्यासःक्रियते
कथं॥कीदृशानितुचिन्हानिभूमिकांप्रतियोगिनः॥वसिष्ठउवाच॥प्रवृत्तश्चनिवृत्तश्चभवति
द्विविधःपुमान्॥स्वर्गापवर्गोन्मुखयोःशृणुलक्षणमेतयोः॥कियत्तन्नामनिर्वाणंवरंसंस्
तिरेवमे॥इतिनिर्णीयकर्तायःसप्रवृत्तउदाहृतः॥चलार्णवयुगच्छिद्रकूर्मग्रीवामवेशवत्॥

अनेकजन्मनामंते विवेकी जायते पुमान्॥ असारावत्तसंसारव्यवस्यालंममैत्तया॥ किंकर्मभिः
पर्युपितैर्द्दिनं तेनैवनीयते॥ क्रियातिशयनिर्मुक्तं किंस्याद्विश्रमणं परं॥ इतिनिश्चयवान्योऽहि
सनिवृत्तइतिस्मृतः॥ कथंविरागवान्भूत्वासंसारात्तुराम्यहं॥ एवंनिवारणपरोयदाभवतिसर ते
न्मतिः॥ विरागमुपयात्यंतर्वासनास्वनुवासरं॥ क्रियासूदाररूपासुक्रमतेमोदतेऽन्वहं॥ ग्रा
म्यासुजडचेष्टासुसततंविचिकित्सति॥ नोदाहरतिकर्माणिपुण्यकर्माणिसेवते॥ पापाद्वि
भेतिसततंनचभोगमपेक्षते॥ स्नेहप्रणयगर्भाणिपेशलान्युचितानिच॥ देशकालोप
ना पन्नानिवचंस्यभिभापते॥ तदासौप्रथमामेकांप्राप्तोभवतिभूमिकां॥ मनसाकर्मणावाचास
ज्जनानुपसेवते॥ यतःकुतश्चिदानीयज्ञानशास्त्राण्यवेक्ष्यते॥ एवंविचारणानाम्नीमागर
तोयोगभूमिकांश्रुतिस्मृतिसदाचारधारणाध्यानकर्मणा॥ मुख्यया व्याख्य यास्वातानश्रेष्ठ

पंडितान्॥ पदार्थप्रविभागज्ञःकार्याकार्यविनिर्णयं॥ जानात्यधिगतश्चान्योगृहंगृहपतिर्यथा॥ मदाभिर
मानमात्सर्यदंभमोहातिशायतां॥ वहिरर्थास्थितामीषत्यजत्यहिरिवत्वचं॥ इत्थंभूतमतिःशास्त्र
स गुरुज्जनसेवया॥ सरहस्यशेषेणयथावदधिगच्छति॥ असंसंगाभिधामन्यांतृतीयांयोगभूमिकां॥
त ॥ततःपंत्यसौकांतःपुष्पशय्यामिवामलां॥ यथावच्छास्त्रवाक्यार्थेमतिमाधाय निश्चलां॥
तापसाश्रमविश्रांतैरध्यात्मकथनक्रमैः॥ संसारनिरदकैस्तद्वदध्यात्मकथनक्रमैः॥ शिलाशय्यासना
सीनोजरयत्यापुरातनं॥ वनावविहारेणचित्तोपरमशोभिना॥ असंगसुखसौख्येन कालेनयति न
नीतिमान्॥ अभ्यासात्साधुशास्त्राणांकरणात्पुण्यकर्मणां॥ जंतोर्यथावदेवेयंवस्तुदृष्टिःप्रसीदतिप्र ३
॥तृतीयांभूमिकांप्राप्यबुद्धोऽनुभवतिस्वयं॥ द्विप्रकारमसंसंगंतस्यभेदमिमंश्रृणु॥ द्विविधायः
[illegible]

यो॰वि॰ [redacted])मसंमंगसामान्यःश्रु
५१ एवच॥नाहंकर्त्तानभोक्ताचनवाध्योनचवाधकः॥इत्यसंजनमर्थेषुसामान्यासंगनामकं॥प्राक्कर्म
निर्मितंसर्वमीश्वराधीनमेववा॥सुखंवाथदिवादुःखंकेवात्रममकर्तृता॥भीतुभो॰ ॰गामहारो
गाःसंपदःपरमापदः॥वियोगायैवसंयोगाआधयोव्याधयोधिपः॥कालःकलेवनीयुक्तःसर्वभा
वाश्विनाशयन्॥तियनीतिविचारोयःसामान्यासावसंगनः॥अनेनक्रमयोगेनसंयोगेनमहात्म
नां॥वियोगेनासत्तामंतः प्रयोगेनात्मसंविदां॥पौनुषेणप्रयत्नेनसंततात्प्यासयोगतः॥करा
६ मलकवैस्तुन्यागमेस्फुटतांदृढं॥नाहंकर्तेश्वरःकर्ताकिमेवाप्रा क्तनंमम्मैकृत्वादूरतरेनूनमिति
शब्दार्थभावनं॥संसारांवुनिधेःपारसाराम्सारपरमकारणं॥मं॰नसंभ्रामसश्रेष्ठासंगउ न्मौ
च्यते॥यत्रांतर्लेवहिर्न्नाधोनोर्ध्वनाशासुतांवरे॥नपदार्थेनवैक्यार्थेनहेनावैवचननं॥आमितंरे ५१
वा

भासनंशौन्सभाज्ञनसभावनं॥अनाद्यंतमजंकांतंतच्छ्रेष्ठोसंगउच्यते॥संतोषामोदमधुरसंगको
मलपल्लवः॥चित्तनालाग्रसंलीनोविद्रूकंटकसंकटः॥विवेकपयोरूढोनविवेकार्कविकाशितः॥
फलंफलात्पसंसंगात्तीयांभूमिकामिमां॥समवायाद्विशुद्धानांवियात्पुण्यकर्मणां॥काकता तं
लीययोगेनप्रथमोदेतिभूमिका॥भूमिःप्रोदितमात्रांतरम्नतांकुरिकेक्सा॥विवेकेनांवुसेकेन
रक्षापाल्याप्रयत्नतः॥येनांशेनाञ्जसत्वेपांविचारेणादयंनयेत॥तमेषानुदिनंयत्वाकृपीवल
द्रुवांकुरं॥एपाहिपरिमष्टांतरन्यासांपसवैक्कभूःद्वितीयांभूमिकांप्लानात्तीयांप्रामुयात्ततः॥
श्रेष्ठात्पसंगनाख्येपात्ततीयाभूमिकात्रहि॥[redacted]॥भषतिभ्रांतिनाशेपसंकल्पकलनःपुमान्॥भूमिकात्रि॥तयंवितद्रामजा

यो॰ वि॰ ग्रदिदं स्मृतं जाग्रं जीवात्र विस्पष्टं भेदबुद्ध्यनुवर्तनात्॥ उदेति योगयुक्ता नाम न्नके वलमां र्यता॥ यां द

५२ भ ष्ट्वा मूढबुद्धीनोप्युदेति मुमुक्षुता॥ कर्तव्यमाचरन्काममकर्तव्यमनाचरन्॥ तिष्ठति प्रकृताचारो यः

सत्रायं इति स्मृतः॥ प्रथमायामंकुरितं भूमौ विकाशितं ततः॥ द्वितीयायां तृतीयायां फलत्याये व

मुत्तमं॥ आर्यतायां मतो योगी शुद्धः संकल्पसंभ्रतान्॥ भोगान्मुक्त्वापि रंका लयो भवान्जायते पु

नः॥ भूमिकात्रितयाभ्यासादज्ञाने क्षयमागते॥ सम्यग्ज्ञानोदयो किते पूर्णचंद्रोदयोपमे॥ निर्विभा

गमनाद्यं तेयोगिनो युक्तचेतसः॥ समं सर्वं प्रपश्यंति चतुर्थी भूमिकां गताः॥ अद्वैते स्थैर्यमायाते द्वैते

भ प्रशमागते॥ पश्यंति स्वप्नवल्लोकं चतुर्थी भूमिकामिताः॥ भूमिकात्रितयं जाग्रच्चतुर्थी स्वप्न उच्यते॥

चित्तं शरत्तु रदभ्रांशविलासं प्रविलीयते॥ सत्तावशेष एवास्ते पंचमी भूमिकां गतः॥ जगद्विक

ल्पि नोदेति चित्तस्यात्र विलापनात्॥ पंचमी भूमिकामेत्य सुषुप्तपद नामिकां॥ शांताशेष विशेषां

५

शस्तिष्ठत्य द्वैतमात्रके॥ गलितद्वैतनिर्भासो मुदितोंतः प्रबुद्धवान्॥ सुषुप्तघन एवास्ते पंचमी॥

भूमिकां गतः॥ अंतर्मुखतया तिष्ठन्बहिर्वृत्तिपरोपि सन्॥ परिशांततया नित्यं निद्रालुरिव लक्ष्यते

॥ कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः॥ षष्ठीं तुर्याभिधामन्यां क्रमात्पतति भूमिकां॥ यत्र

नासन्न सद्रूपो नाहं कृतिः॥ केवलं क्षीणमनन आस्ते द्वैतैक्यनिर्गतः॥ निर्ग्रंथिः शांतसंदेहो

जीवन्मुक्तो विभावनः॥ अनिर्वाणोपि निर्वाणश्चित्रदीप इव स्थितः॥ अंतःशून्यो बहिःशून्यः शून्यः

कुंभ इवांबरे॥ अंतःपूर्णो बहिःपूर्णः पूर्णः कुंभ इवार्णवे॥ किंचिदेव परं संपन्नस्त्वथवैव न किंचन॥

षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात्॥ विदेहमुक्तिता नात्र सप्तमी योगभूमिका॥ अ

गम्या वचसां शांता सा सीमा भूमिपुकेश्चित्सा शिव इत्युताके श्चिद्ब्रह्मेत्युदान्हताके श्चिद्विद्वपुर

निप्रात्काकेश्चिच्छून्यमिति स्मृता॥ अर्थ इत्युदिता केश्चित्केश्चित्काल इति रोता॥ केश्चित्स्व कृति

पुंभावविभाग इति भावितः ॥ अन्यैरप्यन्यथा नानाभेदैरात्मविकल्पितैः ॥ नित्यमव्यपदेश्यं च कथं
चिद्व्यपदिश्यते ॥ सप्तैता भूमिकाः प्रोक्ता मयात्र वरवृद्धह ॥ आसामभ्यासयोगेन नरः स्वमनुभूय
न इति ॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीरामचंद्रसदानंदसरस्वतीशिष्यशिवानंदविरचि
ते योगचिंतामणौ प्रथमः परिच्छेदः ॥ अथ योगिनः ॥ ॥ कृत्याकृत्यनिर्णयः ॥ ॥ सम्य
ग गाराधितसद्गुरुप्रसादा साधितसरहस्यसांगोपांगयोगो निरंतराभ्यसनशीलो यथोक्तफलं प्राप्नोत्येव
मुमान् ॥ स्कंदपुराणे ॥ आचार्याद्योगसर्वस्वमवाप्य स्थिरधीः स्वयं ॥ यथोक्तं लभते तेन प्राप्नोत्य
च पि निर्वृतिमिति ॥ सुरेश्वराचार्याः ॥ गुरुप्रसादाल्लभते योगमष्टांगसंयुतं ॥ शिवप्रसादाल्लभते
योगसिद्धिं च शाश्वतीमिति श्रुतिस्तु ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता
ह्यर्थाः प्रकाशंते महात्मनः ॥ आचार्यवान्पुरुषो वेद इति ॥ योगबीजे ॥ मरुज्जयो यस्य सिद्धः सं ५३

सेवेत गुरुं सदा ॥ गुरुवक्त्रप्रसादेन कुर्यात्प्राणजयं बुधः ॥ याज्ञवल्क्यः ॥ गुरवः पंच सर्वेषां चतुर्णां
श्रुतिचोदिताः ॥ माता पिता तथाचार्यो मातुलः श्वशुरस्तथा ॥ एषां मुख्यास्त्रयः प्रोक्ता आचार्यः
पिता तथा ॥ एषां मुख्यतमस्त्वेक आचार्यः परमार्थवित् ॥ तस्मात्सर्वेषु कालेषु सर्वैर्निःश्रेय
सार्थिभिः ॥ गुरवः श्रुतिसंपन्नाः पूज्या वाङ्मनसादिभिरिति राजयोगे ॥ वेदांततर्कोक्तिभिरागमै
श्च नानाविधैः शास्त्रकदंबकैश्च ध्यानादिभिः सत्करणैर्न गम्यश्चिंतामणिस्त्वेकगुरुं विहाय
॥ दृष्टिः स्थिरा यस्य विनैव दृश्यं वायुः स्थिरो यस्य विना प्रयत्नं चित्तं स्थिरं यस्य विनावलंबं स नं
एव योगी स गुरुः स सेव्यः ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुदेवात्परं नास्ति तस्मात्तं
पूजयेत्सदा ॥ गुरुणा दर्शितं तत्त्वं तत्क्षणात्तन्मयो भवेत् ॥ मत्वा विमुक्तं चात्मानं मुच्यते नात्र संश
यः ॥ यथा सिद्धरसस्पर्शात्ताम्रं भवति कांचनं ॥ गुरूपदेशश्रवणाच्छिष्यस्तत्त्वमयस्तथा ॥ न केवलं

 गुरूपदेशमात्रादेवसिद्धिःस्यस्यैवपरिश्रमादेवसर्वः सर्वमाप्नोति॥ हठप्रदीपिकायां॥ श्रुतिप्रतीतिः
 स्वगुरुप्रतीतिःस्वात्मप्र तीतिर्मनसोनिरोधः॥ एतानिसर्वाणिसमुच्चितानिधीरैरिहैः कारणानि॥ वात्र
वाशिष्ठे उपदेशक्रमोरामव्यवस्थामात्रपालनंस्यस्यकारणंशुद्धाशिष्यप्रज्ञैवकेवलं॥ विनिवारि
तसर्वार्थारूपहस्तिनंबंधनात्वनस्थघैर्याद्भतेकश्चिदभ्युद्धरतिसंकटात्॥ वैराग्येणाथशास्त्रेणम
हत्वादिगुणैरपि॥ यत्नेनापद्धिआतार्यस्वमेवोल्लासयेन्मनः॥ नतत्त्रिभुवनैश्वर्यान्नकोशाद्धनधा
धे रिणः॥ फलमासाद्यतेचित्ताद्यन्महत्वापद्बृंहितात्॥ राजयोगे॥ तस्मादुपासीतसम्यक्तह्यंमाप्य
ता सद्गुरोः॥ अनायासेनसततमात्माभ्यासरतोभवेत्॥ नित्याभ्यसनशीलस्यस्वसंवेद्यंहितद्भवेत्
॥ इदंतदितितद्वक्तुंगुरुणापिनशक्यते॥ वाङ्मनःकायसंभोगमपत्नेनविवर्जयेत्॥ ब्रह्माहमस्मी
त्यात्मानंसुस्थिरंधारयेत्सदा॥ हठप्रदीपिकायां॥ वर्जयेद्दुर्जनप्रीतिंवह्निस्त्रीपथसेवनं॥ प्रा ५४

स्था

तःस्नानोपवासादि...कायक्लेशादिकंतथा॥ अल्पाहारःप्रयासश्चप्रजल्पोनियमग्रहः॥
न जनसंगश्चलौल्यंचषड्भिर्योगःप्रणश्यति॥ उत्साहात्साहसाद्धैर्यात्तत्त्वज्ञानाद्धिनिश्चयात्॥ जनसं
गपरित्यागात्षड्भिर्योगःप्रसिद्ध्यति॥ मारुतस्यविधिंसर्वंमनोयुक्तंसमभ्यसेत्॥ अन्यत्रतुनकर्तव्या वै
मनोवृत्तिर्मनीषिणेति॥ लिंगपुराणे॥ तप्तांगारसमानारीघृतकुंभसमःपुमान्॥ तस्मान्नारीपुंसंस
च र्ग...नयत्नेनविवर्जयेदिति॥ नारीसंसर्गवर्जनवन्महाविघ्नभूतांधूर्तगोष्ठींचप्रयत्नेनविव न
र्जयेत्॥ धूर्तस्वरूपंतुयथायोगतत्त्वप्रकाशेदत्तात्रेयेणोक्तं॥ तथाहि॥ मुंडितोदंडधारीवा
काषायवसनोपिवा॥ नारायणवदोवापिजटिलोभस्मलेपनः॥ नमः शिवायवाच्योवास्वाचा
रपरिपूजकः॥ स्थानद्वादशयुक्तोवामालाबाहुल्यभूषितः॥ क्रियाहीनोथवाक्रूरः कथंसिद्धि थ
मवाप्नुयात्॥ नवेषधारणंसिद्धेःकारणंनचतत्कथा॥ क्रियैवकारणंसिद्धेःसत्यमेतद्धिसांकृते

यो·चिं· शिश्नोदरार्थंयोगस्यकथयंतिवेषधारिणः॥अनुष्ठानविहीनास्तुवंचयंत्यखिलान्जनान्॥उच्चावचैः

प्रलापैस्तेकुशलादांभिकानराः॥योगिनोवयमित्याहुर्मूढाभोगपरायणाः॥शनैः [illegible] शनैस्तथावि

५५ द्यान्योगाभ्यासविवर्जितान्॥कृतार्थाश्चवचनैरेववर्जयेद्वेषधारिणः॥पतंत्येतेमीविघ्नभूतायोगा

भ्यासस्यसर्वदा॥वर्जयंतिप्रयत्नेनतादृशान्सुधियोनराइति॥वासिष्ठेयस्यस्त्रीतस्यभोगेछानिः

स्त्रीकस्यक्वभोगभूः॥स्त्रियंत्यक्त्वाजगत्त्यक्तंजगत्त्यक्त्वासुखीभवेत्॥नविषंविषमित्याहुर्विष

यंविषमंविषं॥जन्मांतरघ्नाविषयाएकजन्महरंविषं॥यथाशास्त्रविहरतात्वरकायानसिद्धि

रा षु॥चिरंकालप्रपक्वासिद्धिःपुष्टफलाभवेत्इति॥मार्कंडेयपुराणे॥अलर्कः॥भगवन्योगिन

श्चर्यांश्रोतुमिच्छामितत्वतः॥ब्रह्मवर्त्मन्यनुसरन्येनयोगीनसीदति॥दत्तात्रेयः॥संगदोषोभवेद्दुःखं

ममत्वासक्तचेतसां॥तस्मात्संगंप्रयत्नेनमुमुक्षुःसंत्यजेन्नरः॥संगाभावान्ममेत्यस्याःख्यातेर्हा ५५

निःप्रजायते॥निर्ममत्वंसुखायैववैराग्याद्दोषदर्शनं॥ज्ञानादेवचवै ज्ञानंवैरा ग्यपूर्वकं॥त राग्यात्

द्गृहंयत्रवसतिस्तद्भोज्यंयेनजीवति॥यन्मुक्तयेतदेवोक्तंज्ञानमज्ञानमन्यथा॥उपभोगेनपुण्याना

मपुण्यानांचपार्थिव॥कर्तव्यानांचनित्यानामकामकरणात्तथा॥असंचयादपूर्वस्यक्षयात्पू

र्वार्जितस्यच॥कर्मणोवंधनात्यातिशरीरंनपुनर्नरः॥मानापमानौयावेतौप्रीत्युद्वेगकरौनृ

णां॥तावेवविपरीतार्थौयोगिनःसिद्धिकारकौ॥मानापमानौयावेतौतावे वाहुर्विषामृतौ॥अपमा

नोमृतंतत्रमानस्तुविषमंविषं॥चक्षुःपूतंन्यसेत्पादंवस्त्रपूतंपिवेज्जलं॥सत्यपूतांवदेद्वाणींबु

द्धिपूतंविचिंतयेत्॥आतिथ्यश्राद्धयज्ञेषुदेवयात्रोत्सवेषुच॥महाजनेचसिद्ध्यर्थंनगच्छेद्योगवि

त्क्वचित्॥यथैवअवमन्यंतेजनाःपरिभवंतिच॥तथायुक्तश्चरेद्योगीसतांधर्ममदूषयन्॥सारभू

तमुपासीतज्ञानंयत्कार्यसाधकं॥ज्ञानानांवहुतायेयंयोगविघ्नकरीहिसा॥इदंज्ञेयमिदंज्ञेयमि

 नियस्तलिप्तश्चरेत्॥ अपिकल्पसहस्रेषु नैवज्ञेयमवाप्नुयात्॥ वाग्दंडः कर्मदंडश्च मनोदंडश्च ते
त्रयः॥ यस्मैते नियतारंडाः स त्रिदंडी महायतिः॥ सर्वमात्ममयं यस्य सदसज्जगदीदृशं॥ गुणा
५६ गुणमयं तस्य कः प्रियः को नृपाप्रियः॥ विशुद्धबुद्धिः स ॥मलोष्टकांचनः समस्तभूतेषु वसन्समा
चनत् हितः॥ स्थानं परंशाश्वतमव्ययंपरंहिगत्वा न पुनः प्रजापते॥ समाहितो ब्रह्मपरोप्रमादी शुचिस्त्व
थैकांतरुचिर्जितेंद्रियः॥ समामुपा घोगमिमं महात्मा विमुक्तिमाप्नोतिनतश्च योगतः॥ नाध्मा
तक्षुधितः। श्रांतो न चव्याकुलचेतनः॥ मुंजीत योगराजेंद्र योगी सिद्ध्यर्थमादृतः॥ रजसातमसो
वृत्तिं सत्वेन रजसस्तथा॥ संछाद्य विमले तत्वे स्थितो मुंजीत योगवित्॥ एतत्सर्वं समाख्यातं तवा
लर्क यथार्थवत्॥ प्राप्य सेयेन तद्ब्रह्म सनातनं॥ संक्षेपात्रिबोध मे॥ शशांकरश्मिसंयोगाच्चंद्रकांतो
मणिः पयः॥ समुत्सृजति नायुक्तः सोपमा योगिनः स्मृता॥ यथा र्करश्मिसंयोगादर्ककांतो हुता ५६

२ शनं॥ आविः करोति नैकः सन्नुपमा सापि योगिनः॥ पिपीलिकाखुनकुलगृहगोधाकपिंजलाः
॥ वसंति स्वामिवद्गेहे ध्वस्ते यांति ततोन्यतः॥ दुःखं तु स्वामिनो ध्वंसे न तस्य तेषां न किंचन॥ वेश्म
नो यत्र राजेंद्र सोपमा योगसिद्धये॥ नद्धृहंयत्र वसतिस्तन्मेराज्यं येन जीवति॥ यत्न संपद्यते स्वा
र्थस्तत्स्वकं ममता त्रका॥ अल्पपिनापितैः कार्यं करोति करणैर्यथा॥ तथा बुद्ध्यादिभिर्योगी
पारंपर्यैः साधयेत्परं॥ मृद्देहिका ल्पदेहापि मुखाग्रेणाल्पणीयसा॥ करोति मृन्मरा चयमुपमा
सैव योगिनः॥ द्रव्यपूर्णमुपादाय पात्रमारोहतो भुवः॥ तुंगमार्गं विलोक्याच्चैर्विज्ञानं तेन योगि
नः॥ रुनुशाव विषाणाग्रमालोक्य तिलकाकृतिं॥ सहते नैव वर्द्धनं योगी सिद्धिमवाप्नुयात्॥
जीवनोपालं सर्वस्वेति॥ रवान्तपुत्रस्य याचेष्टाताता तं त्वतो ज्ञात्वा योगिनः कृतकृत्यं लति॥
स्वं दपुराणैनानितन्नतः शुधार्तो न न विण्मूत्रप्रबाधितः॥ नाघ्रखिन्नो न चिंतार्तो योगंयुंजी

या·चिं· नयोगवित्॥युक्ताहारविहारश्चयुक्तचेष्टश्चकर्मसु॥युक्तस्वप्नावबोधश्चयोगीतत्वंप्रपश्यति
॥भगवद्गीतायां॥नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्नतः॥नचातिस्वप्नशीलस्यजाग्रतोनै
५२ वचार्जुन॥युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु॥युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहा॥
आत्मौपम्येनसर्वत्रसमंपश्यतियोर्जुन॥सुखंवायदिवादुःखंसयोगीपरमोमतः इति॥ब्रह्म
पुराणे॥रजन्याःपश्चिमेयामेपूर्वेचसुसमाहितः॥पूर्वाह्नेमध्यमेचाह्नियुक्ताहारोजितेंद्रियः॥
योगंयुंजीतेतिसंबंधः॥याज्ञवल्क्यः॥प्रातःकालेप्रदोषेचनिशांतेसुसमाहितः॥इतिलिंगपुरा
णे॥नाजीर्णोनरसोहारीनविण्मूत्रप्रबाधितः॥नच्छर्दीनातिसारीचनातिभुक्तःश्रमान्वितः॥
नचातिकर्मनिरतश्चिंताव्याकुलितेंद्रियः॥नमुक्तोगुनुकार्येचनचातिक्षुत्पिपासितः॥नाचरेद्द्
ह्वाधायरोमेनस्याद्दिसंभव॥इतिवायुपुराणे॥नव्याध्यार्तःकदाचनेत्यादिनिषेधानंतरमुक्तं ५२

चोतलगे

४ मूत्रेपुरीषे[illegible]भोजनेचनराधिप॥त्रिकालेनाभियुंजीतयोगंयोगीकदाचन॥अप्रमत्तोयथाध्यायीलक्षंहेति
एतान्दोषान्विनिश्चित्यप्रमादाद्योयुनक्तिवै॥तस्यदोषाःप्रकुप्यंतिशरीरेविघ्नकारकाःजडत्वंब
धिरत्वंचमूकत्वंचापिजायते॥अंधत्वंधृतिलोपश्चज्वरोरोगस्तथैवच॥एतेदोषाःप्रकुप्यंतिह्यज्ञा
नाद्योयुनक्तिवै॥तस्माज्ज्ञानेनशुद्धेनयोगीयुंजन्समाहितः॥अप्रमत्तःसदाचैवनदोषान्प्राप्नु
यात्क्वचिदिति॥महाभारते॥ [illegible] धारःसमाहितः॥महार्णवगतांशीघ्रंनयेत्पार्थि
वसत्तम॥तद्वदात्मसमाधानेयुक्तोयोगेनतत्त्ववित्॥दुर्गमंस्थानमाप्नोतिहित्वादेहमिमंनृप
॥व्यासः॥योगदोषान्समुच्छेद्यान्पंचयान्कवयोविदुः॥कामंक्रोधंचलोभंचभयंस्वप्नं[illegible]
[illegible]चपंचमं॥क्रोधंशमेनजयतिकामंसंकल्पवर्जनात्॥सत्वसंसेवनाद्धीरोनिद्रामुच्छेत्तुमर्हति
धृत्याशिश्नोदरंरक्षेत्पाणिपादंचचक्षुषा॥चक्षुःश्रोत्रेचमनसामनोवाचंचकर्मणा॥अप्रमा
दाद्भयंजह्याद्दंभंप्राज्ञोपसेवनात्॥एवमेतान्योगदोषाञ्जयेन्नित्यमतंद्रितः॥मनसश्चेंद्रियाणां

या॰ चिं॰ चकृत्वैकाग्र्यंसमाहितः॥पूर्वरात्रापरार्द्धेचधारयेन्मनआत्मनि॥कुर्यात्परिचयंयोगेत्रैकाल्येनिय
५८ तोमुनिः॥संनियम्येंद्रियग्रामंकोशभांडमनाइव॥एकाग्रंचिंतयेन्नित्यंयोगान्नोद्वेजयेन्मनः॥येनो
पायेनशक्येतसंनियंतुंचलंमनः॥तंचयुक्तोनिषेवेतनचैवविचलेत्ततः॥नाभिषज्जेत्परेवाचाकर्मणा
मनसापिवा॥उपेक्षकोयताहारोलब्धालब्धेसमोभवेत्॥यश्चैनमभिनंदेतयश्चैनमपवादयेत्
॥समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभं॥नप्रहृष्येत्लाभेषुनालाभेषुचचिंतयेत्॥एवं
स्वस्यात्मनःसाधोःसर्वत्रसमदर्शिनः॥षण्मासान्नित्ययुक्तस्यशब्दब्रह्मातिवर्तते॥एतस्मिन्नि
रतोमार्गेविरमेन्नचमोहितः॥इतिदेशकालाभावेयोगोनसिध्यत्येवनतत्स्तावदादौनिरूप्यते॥
लिंगपुराणे॥स्थानंलब्ध्वैवकुर्वीतयोगांगानितुवैक्रमात्॥अदेशकालेयोगस्यदर्शनंनचवि॰
द्यतइति॥मार्कंडेयपुराणे॥सत्वस्यानुपपन्नोचदेशकालविवर्जिते॥नसतोदर्शनंयोगेतस्मात्त ५८

त्परिवर्जयेत्॥नातिशीतेनचोष्णेवैद्वंद्वेनाग्न्यनिलात्मके॥कालेष्वेतेषुयुंजीतनयोगीध्यानतत्प
रः॥सशब्दाग्निजलाभ्यासेजीर्णगोष्ठेशिवालये॥शुष्कपर्णचयेनै[illegible]श्मशानेऽसरीसृपे॥समये धौ
कूपतीरेवाचैत्यवल्मीकसंचये॥देशेष्वेतेषुतत्वज्ञोयोगाभ्यासंविवर्जयेत्॥स्कंदपुराणे॥नतो
यवह्निसामीप्येनजीर्णारण्यगोष्ठयोः॥नदंशमशकाकीर्णेनचैत्येनचचत्वरे॥केशभस्मतु
षांगारकीकसादिप्रदूषिते॥नाभ्यसेत्पूतिगंधादौनस्थानेजनसंकुले॥इतिलिंगपुराणादिष्व
न्वि पि॥नाशुभेदुर्जनाक्रांतेमशकादिसमे॥नइत्यादिनिषेधाद्रष्टव्याः॥ब्रह्मपुराणे॥नदंशमश
काकीर्णेयोगंयुंजीतकर्हिचित्॥इत्यादिनिषेधानंतरमुक्तदोषानेताननादृत्यमूढत्वाद्योयुनक्ति
वै॥प्रवक्ष्येतस्यदेहेयेजायंतेविघ्नकारकाः॥बाधीर्यंजडतालोपःस्मृतेर्मूकत्वमंधता॥कास
श्वजायतेसद्यस्तद्वदज्ञाननयोगिनः॥तस्मात्सर्वात्मनाकार्यारक्षायोगविदासदा॥धर्मार्थ

यो·चिं· कामंमोक्षाणांशरीरंसाधनंमतरति॥रतात्रेयस्कएतदेशकालनिषेधानंतरंप्रमादेशोका
५८ नेवजन्यत्वादिदोषानभिधायतच्चिकित्सामाह॥प्रमादाद्योगिनांदोषामद्येतस्तुश्चिकित्सितं
॥तेषांनाशायकर्तव्यंयोगिनांतंनिबोधमे॥स्निग्धांयवागूमत्युष्णांभुक्त्वातत्रैवधारयेत्॥वात
गुल्मप्र शांत्यर्थमुदावर्तेतथावधियवागूंचापिपवनंचानयुर्ध्विंप्रतिक्षिपेत्॥तद्वत्कंपमहा
[illegible]शैलंस्थिरंमनसिधारयेत्॥विघातेषचसोवाचिवाधिर्यश्रवणेंद्रिये॥तथैवाम्ल
फलंध्यायेत्तृषार्तोरसनेंद्रिये॥यस्मिन्यस्मिन्रुजोदेहेशेतस्मिंस्तदुपकारिणीं॥धारयेद्धार
णामुष्णेशीतांशीतेविदाहिनीं॥कीलंशिरसिसंस्थाप्यकाष्ठंकाष्ठेनताडयेत्॥तु ल्पस्पत
यो स्मृतिःसद्योयोगिनस्तेनजायते॥[illegible]वाष्टथिवि[illegible]वाद्यग्नेर्व्यापिनावभिधारयेत्॥अमानुषाः
सत्वजानावाधास्वैताश्चिकित्सिताः॥अमानुषंसत्वमंतर्योगिनंप्रविशेद्यदि॥वाय्वग्निधारणा ५८
घो

हे
चैनदेहसंस्थंविनिर्दहेत्॥एवंसर्वात्मनाकार्यारक्षायोगविदान्पप धर्मार्थकाममोक्षाणांशरीरंसा
धनंयतइति अथविहितानिकथ्यंते॥तत्रकालः॥पूर्वमुक्तोवक्ष्यतेच॥आदिपुराणे॥एकांत
गिरिदुर्गेपुनीर्थायतननगद्धरे॥योगस्याभ्यासनंकार्यमितितत्त्वविदोविद्[illegible]दुरिति॥मात्तव
ल्क्यः॥तपाक्तंसुसंप्राप्यफलमूलोदकान्वितं॥तत्ररम्येशुचौदेशेब्रह्मघोषसमन्विते॥स्व
धर्मनिरतैःशांतैर्ब्रह्मविद्भिःसमावृते॥वारिभिश्चसुसंपन्नेपुष्पैर्नानाविधैर्युते॥फलमूलैः नी
सुसंपन्नेसर्वकामफलप्रदे॥देवालयेवानद्यांवाग्रामेवानगरेपिवा॥सुशोभनंमठंकृत्वासर्वकाम ग
समन्वितं॥तस्मिन्योगसबंधःयोगत लप्रकाश॥सुशोभनंमठंकुर्यात्सूक्ष्मद्वारंतुनिःप्रभं॥सु
लिप्तंगोमयेनैवसुधयावाप्र तेयतः॥मक्षिकाम शकैर्देशैरतैश्चवर्जितंसदा॥दिनेदि
नेचसंमृष्टंसंमार्जन्याप्रयत्नतः॥वासितंचसुगंधेनधूपितंगुग्गुलादिभिः॥इति हठप्रदीपिका

यो. वि.

६० यं॥सुराज्येधार्मिकेदेशेसुभिक्षेनिरुपद्रवे॥एकांतेमठिकामध्येस्थातव्यंहठयोगिना॥अल्पद्वा
रमरंध्रगर्तविवरंनात्युच्चनीचायतंसम्यग्गोमयसांद्रलिप्तममलंनिःशेषजंतूज्झितं॥बाह्येमंड
पकूपवेदिरचितंप्राकारसंवेष्टितंप्रोक्तंयोगमठस्यलक्षणमिदंसिद्धैर्हठाभ्यासिभिः॥एवंविधेमठे
स्थित्वासर्वचिंताविवर्जितः॥गुरूपदिष्टमार्गेणयोगमेवसदाभ्यसेदिति॥स्कंदपुराणेसर्वबा
धाविरहितेसर्वेंद्रियसुखावहे॥मनःप्रसादजननेस्रग्धूपामोदमोदितइति॥नंदिपुराणे॥मंदि
प रंरम्यविन्यासंनात्तंगंधोवासितं।धूपामोदादिसुरभिकुसुमोत्करमंडितं॥मुनितीर्थनदीवृक्षपद्मिनी ते
शैलशोभितं॥चित्रकर्मनिबद्धंचचित्रभेदविचित्रितं॥कुर्याद्योगगृहंधीमान्सुरम्यंशुभवर्त्मनाज
या॥दृष्ट्वाचित्रगतांश्लोकांमुनीन्यातिमनःशमं॥सिद्धान्दृष्ट्वाचित्रगतान्मतिरभ्युद्यमेभवेत्॥
मध्येयोगगृहस्याथलिखेत्संसारमंडलं॥श्मशानंचमहाघोरंनरकांश्चलिखेत्क्वचित्॥तान्दृष्ट्वा

६०

भीषणाकारान्संसारेसारवर्जितं॥अनवसादोभवतीयोगीसिध्यतिलालुकः॥पश्यंश्चव्याधिता
न्नग्नान्मत्तांश्चलक्षणान्॥एवंविधश्चशुद्धात्मास्थितोयोगगृहेशुभे॥योगांगान्यभ्य
सेदितिसंबंधः॥लिंगपुराणादिष्वप्येतदेवयोगमठलक्षणमुक्तं॥आहारनियमस्यनाडीशु
द्धिद्वारायोगेऽत्यंतानुकूलत्वादाहारशुद्धौसत्त्वशुद्धिरितिश्रुतेश्चनाडीशुद्धेः॥प्रागाहारोनि
रूप्यते॥तत्रवर्ज्यानि॥दत्तात्रेयः॥अथवर्ज्यानिवक्ष्यामियोगविघ्नकरायोगेऽत्यंतानुकूल
करा णिच॥लवणंसर्षपंचाम्लमुष्णंरूक्षंचतीक्ष्णकं॥अतीवभोजनंत्याज्यमतिनिद्रातिभाष
णमिति॥स्कंदपुराणेऽपित्यजेत्कट्वम्ललवणंक्षीरभोजीसदाभवेदिति॥हठप्रदीपिकायां॥
कट्वम्लतीक्ष्णलवणोष्णहरीतशाकसौवीरतैलतिलसर्षपमत्स्यमद्यं॥अजादिमांसदधि
तक्रकुलत्थकोलपिण्याकहिंगुलशुनाद्यमपथ्यमाहुः॥भोजनमहितंविद्यात्पुनरुष्णीकृतंत

थ॥ अतिलवणं सर्षपं चाम्लमुष्णं चाप्रसितं शाकोत्कटं वर्ज्यं॥ अथ देयानि च॥ गोधूमशालियव
६३ २नी पाष्टिकशोभनान्नं क्षीराज्यमंड न वैत [illegible] मधूनि शुंठीपटोलकफलादिक। तैला२
पंचशाकं मुद्गादि वाल्पमुदकं च मुनींद्रपथ्यं॥ पिष्टं सुमधुरं स्निग्धं गव्यं धातुप्रपोषणं॥ मनो
भिलषितं योग्यं योगी भोजनमाचरेदिति॥ दत्तात्रेये॥ आदेयानि च वक्ष्यामि क्षिप्रं योगस्य
सिद्धये॥ क्षीरं घृतं च मिष्टान्नं मिताहारश्च शस्यत इति॥ केचित्कर्पूरमिच्छंति तांबूलं शोभनं
तथा॥ चूर्णेन रहितं शस्तं पवनाभ्यासयोगिनां योगग्रंथे॥ भानुनाडीगते प्राणे योगी भोजन
माचरेत्॥ सोमनाडीगते प्राणे भोजनं नैव शस्यत इति॥ प्रथमाभ्यासे क्षीरमेव शस्तमित्याह
आत्मारामः॥ अभ्यासे प्रथमे काले शस्तं क्षीरभोजनं॥ ततोभ्यासे दृढीभूते न तादृक् नियम
ग्रहः इति॥ अत्र तांबूलभक्षणं नित्यं तांबूलभक्षक गृहस्थविषयं ज्ञेयमन्येषां भिक्षुकोरिति ६१

निषेधस्योक्तत्वात्॥ नायमस्ति नियमः क्षीरमेव भोक्तव्यमिति॥ किंतु देशकालानुसारेण
यदा यत्प्राप्यते यद्वस्तु विपूर्वकं स्वशरीरसहनेन तदेव भुक्त्वा योगोभ्यसनीय इति ध्येयं॥ य
च्चोक्तं भानुनाडीवहिन्येव प्राणे योगिना भोजनं कार्यमिति॥ तत्तु यदाकाशगमनसामर्थ्यं योगि
नः स्यात्तदा ज्ञेयं तदानीं खलु योगप्रतिबंधन तत्त्वज्ञानानुत्पत्त्या मोक्षासिद्धेः॥ ननु सायंप्रात
र्मनुष्याणामशनं देवनिर्मितं॥ अंतराभ्यासेन तत्र सर्वनियमानुष्ठानस्यावश्यकत्वं वक्ष्यमा
णत्वात्॥ प्रथमाभ्यासे तु यदा क्षुधा न दैव भोक्तव्यमेवान्यथा योगाग्निनिरोधे धातुवैषम्येन नाना
रोगसंभवादि संभवेन योगप्रतिबंधेन तत्त्वज्ञानानुत्पत्त्या मोक्षासिद्धेः॥ ननु सायंप्रातर्मनुष्याणा
मशनं देवनिर्मितं॥ अंतरा नाशनं कुर्यादग्निहोत्रसमो विधिः॥ यतीच ब्रह्मचारी च विधवा च र
जस्वला पुनर्भोजनं नाप्नुलं भुक्त्वा चांद्रायणं चरेदित्यादि॥ धर्मशास्त्रे चतुर्णामपि वर्णाश्रमाण

मेकद्विकालभोजनस्य विहितत्वात्कथमनियतभोजनं नियम्यते न च योगीनामाश्रमांतरमस्ति पू
र्वोक्तानामेव चतुर्णां वर्णाश्रमाणां योगाभ्यासेधिकारस्य दात्तत्पुराणादिवाक्येषु दर्शितत्वादिति
चेत्॥ न तथा तस्याः योगिविषयत्वात्॥ कुतो ज्ञातमिति चेत्॥ अतितस्यस्याति क्षुधार्तस्य योगा
भ्यासनिषेधात्सदाचाभ्यासविधानादवगच्छामः यदा यदा क्षुधान्तदा तदा भोक्तव्यमेवेति
न चैककालभोजनस्य ज्ञानांगभूतस्यानुरोधेन सर्वापेक्षया प्रधानभूतज्ञानस्य लोपो युक्त इति
मुख्यामुख्ययोः संपाते मुख्यं बलवदिति न्यायात्॥ अत एव श्रुत्यंतरे योगाभ्यासिनो
भोजनानियमः श्रूयते तथा हि॥ एककालं द्विकालं वा चरेत्परमहंसकः॥ येन केन प्रकारेण ज्ञा
नाभ्यासपरो भवति रिति॥ अत्र यतिपदं आश्रमत्रयस्याप्युपलक्षणं॥ अथाचरयं ज्ञातव्यं शरी
रयोगिना यन्नि रूप्यते न च न तज्ज्ञानं विना योगसिद्धिरस्ति तथा च गोरक्षः षट्चक्रं षोडशाधारं
न्नि

द्विलक्ष्यं व्योमपंचकं॥ स्वदेहे ये न जानंति कथं सिध्यंति योगिनः॥ एकस्तंभं नवद्वारं गृहं पंचाधि
दैवतं॥ स्वदेहं ये न जानंति कथं सिध्यंति योगिन इति॥ षट्चक्रं षोडशाधारा वक्ष्यं वा व्योमाभ्यांत
रं चा॥ भूब्राणादिकं मूलाधाराधिकं मव्योमपंचकं तुरीयं ठनानुमूर्रं भ्रांतं॥ एकस्तंभं नवगृहमन ले
सद॥ शरीरं धियतमनस्तंभरूपं मन एव मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्यंते षुय
थाक्रमं ब्रह्मविष्णुरुद्रेश्वरसदाशिवा देवताः कनोयापनशुद्धाः स्युर्न्नीरूपः सर्वदेहिनां॥ उ
चैव त्पत्तिं चौडीनां धारणां च यथाविधि॥ केदृशस्तु कीदृशप्रातः क तिति ष्ठंति वायवः स्थानानि
चैव वायूनां कर्माणि च पृथक् पृथक्॥ विज्ञातव्यानि यान्यस्मिन्देहे हे रमनां वर॥ वक्तुमर्हसि
तत्सर्वं न्ननो वतानविघते॥ इत्युक्तो भार्यया तत्र सम्यक्तद्गतमानसः॥ गार्गी तां च समालोक्य
तत्सर्वं समभाषत॥ शरीरं तावदेव देहं परंए वत्यंगुलात्मकं॥ विद्यते तत्सर्वजंतूनां स्वांगुलीभिरिति

यो·चिं· प्रीये॥ शरीराद्धिकः प्राणो द्वादशांगुलमानतः॥ चतुर्दशांगुलं केचिद्वदंति मुनिसत्तमाः॥ द्वादशां
गुलमेवेति वदंति ज्ञानि[illegible]नो नराः॥ प्राणोऽपानः समानश्च उदानो व्यान एव च॥ नागः कूर्मश्च कृ
६३ कलो देवदत्तो धनंजयः॥ एते नाडीषु सर्वासु चरंति हि दश वायवः॥ एतेषु वायवः पंच मुख्याः प्राणाद
यः स्मृताः॥ तेषु मुख्यतमावेतौ प्राणापानौ नरोत्तमे॥ प्राण एवैतयोर्मुख्यः सर्वप्राणभृतां
क्ष्य सदेति॥ नाडीशुद्धिरुपरिष्टाद्वते॥ नकुलीशयोगपरायणैः कौर्मीवायुः प्राणः नादिकर्मभेदा
द्यथाक्रमं॥ प्राणापानसमानोदिनां मांतरमुपागतरति अमस्तसिद्धौ॥ असंख्या वायवो दे
हे संति यद्यप्युदाहृताः॥ तथापि श्रेष्ठकर्त्तारौ प्राणापानौ कृतावुभौ॥ याज्ञवल्क्यः॥ आस्यनासि
कयोर्मध्ये हृन्मध्ये नाभिमध्यगे॥ प्राणालयमिति प्राहुः पादांगुष्ठेपि केचन॥ अधश्चोर्ध्वं च कुंडल्याः
परितः प्राणसंज्ञकः॥ तिष्ठत्यनेषु चतुर्षु प्रकाशयति दीपवत्॥ अपानानिलयं केचिद्गुदमेढ्रानुजानु ६३

षु॥ उदरे चेक्षणे कघाजंघेनाभौ च वदंति हि॥ व्यानः श्रोत्राक्षिमध्ये च कृकाटीगुल्फयोरपि॥ प्राणे ग
ले स्फिजोर्देशे तिष्ठत्यत्र न संशयः॥ उदानः सर्वसंधिस्थः पादयोर्हस्तयोरपि॥ समानः सर्वगात्रे
षु सर्वव्यापी व्यवस्थितः॥ भुक्तं सर्वरसं गात्रे व्यापयन् वह्निना सह॥ द्विसप्ततिसहस्रेषु नाडीमार्गे
ग्नि षु संचरेत्॥ समानवायुरेवैकः सोऽग्निर्व्याप्य व्यवस्थितः॥ अर्चिभिः सह सर्वत्र सांगोपांगकलेवरे॥
नागादिवायवः पंच त्वगस्थ्यादिषु संस्थिताः॥ तुंदस्थजलमन्नं च रसादि च समीकृतं॥ तुंदम
ध्यगतः प्राणस्तानि कुर्यात्पृथक् पृथक्॥ उपर्यग्रे जलं स्थाप्य त्वन्नादीनि जलोपरि॥ स्वयं त्व
पानं संप्राप्य तेनैव सह मारुतः॥ प्रयाति ज्वलनं तत्र प्राणो मध्यगतः पुनः॥ वायुना चलितो वह्नि
रपानेन शनैः शनैः॥ तदा ज्वलति विप्रेंद्र स्वकले देहमध्यमे॥ ज्वालाभिर्ज्वलनस्तत्र प्राणेन प्रेरित
स्ततः॥ जलमत्युष्णमकरोत्कोष्ठमध्यगतं तदा॥ अन्नं व्यंजनसंयुक्तं जलोपरि समर्पितं॥ ततः सुपक्वम

यो॰ वि॰ करोद्भिद्भिः संततत्रवारिणा ॥ स्वेदमूत्रे जलं स्यात्तो रूपं वीर्ये रसो भवेत् ॥ पुरीषमन्नं स्याद्द्वारिप्राणन्कुर्या

६४ त्पृथक्पृथक् ॥ समानवायुसार्द्धरसं सर्वासु नाडिषु ॥ व्याप्य पंछ्वासरूपेण देहे चरति मारुतः ॥ व्योमरं

ध्रेष्वनवभिर्विण्मूत्रादिविसर्ज्जनं ॥ कुर्वंति वायवः सर्वे शरीरेषु निरंतरं ॥ निश्वासोच्छ्वासकासा

श्च प्राणकर्मेति कीर्तितं ॥ अपानवायोः कर्मैतद्विण्मूत्रादिविसर्ज्जनं ॥ हानोपादानचेष्टादि

र्व्यानकर्मेति चेष्यते ॥ उदानकर्म तत्प्रोक्तं देहस्योन्नयनादि यत् ॥ पोषणादि समानस्य शरीरे कर्म

कीर्तितं ॥ उद्गारादिगुणो यस्तु नागकर्मेति चोदितं ॥ निमीलनादि कूर्मस्य क्षुतं च कृकरस्य च ॥ देव

दत्तस्य विप्रेंद्र जृंभनं कर्म कीर्तितं ॥ धनंजयस्य शोभादि सर्वं कर्म प्रकीर्तितं ॥ तथा पंचानामपि प्राणा

दीनां स्थानवर्णबीजानि नकुलीश योगपरायणे ॥ प्राणो घ्राणाग्रहृन्नाभिपादांगुष्ठांतसंस्थितः नी

लः सोंकाररेफादिबीजेन विनियोजितः ॥ कृष्णोपानः कृकटिस्थः पृष्ठपृष्ठांत्यपार्श्विगः सतारक ६४

नकारांतबीजेन विनियोजितः ॥ शक्रचापनिभो व्यानः सर्वगिंद्रियनिकेतनः ॥ तारको यत्तयोन्तौ

तयोर्ज्जा विराजितः ॥ मूर्द्धस्योन्मध्यतात्वग्रपाणिपादतलस्थितः उदानो ... छायस्तारका

क्रांतपांतपुरुः स्त्रुतः समानो हृन्नाभि सर्वसंधिनिकेतनः ॥ न्यणवाक्रांतलांतेन वाजेनात्यंत्तमुच्य

तेः रफस्यादिर्यकारः स चासौ वोंकारसहितो यकारः प्राणस्य बीजमित्यर्थः सतारकः सप्रणवः स

चासौ नकारस्यांतः पकारस्तेन बीजेन रंजितो ऽपानः पांतो तो लकारः सोंकारो लकारो व्यानस्य

बीजमित्यर्थः अस्यारुणोऽत्यंतस्त्रोहितस्ताल्वग्रं घंटिकाकोटिपललं रणतलं यांतो रफः ॥ सों

कारो रक उदानस्य बीजमित्यर्थः ॥ प्रणवनाक्रांतश्वासोलांतो वकारः स्वसोंकारो वकारः समानस्य

बीजमित्यर्थः ॥ अत्र सर्वत्र वायूनामरूपाणामपि नील्यादिवर्णविशेषो ध्यानार्थमभिहितः

इति द्रष्टव्यं ॥ याज्ञवल्क्यः ॥ देहमध्ये शिखिस्थानं तप्तजांबूनदप्रभं ॥ त्रिकोणं तु मनुष्याणां चतु

यो॰टी॰ रस्रं चतुःपदं मंडलं तु पतंगानांस त्यमेतद्ब्रवीमि ते॥ तन्मध्ये तु शिखा तन्वी सदा तिष्ठति यावकी
॥ देहमध्यं तु कुत्रेति श्रोतुमिच्छसि चेच्छृणु गुदात्तु द्व्यंगुलादूर्ध्वं मेधो मेद्रात्तु द्व्यंगुलात्॥ देहमध्य
६५ मिनीरितं॥ कंदस्थानं मनुष्याणां देहमध्यान्नवांगुलं चतुरंगुलविस्तारमायामं च तथाविधं॥ कु
कुक्कुटांडवदाकारं भूषितं तत्तु त्वगादिभिः चतुःपदां तिरश्चां च द्विजानां तु रमध्यमे॥ तन्मध्यं ना
भिरित्युक्तं नाभौ चक्रसमुद्भवः द्वादशारयुतं तच्च तेन देहः प्रतिष्ठितः॥ चक्रेस्मिन् भ्रमते जीवः
पुण्यपाप प्रचोदितः तंतु पंजरमध्यस्थो यथा भ्रम्यति लूतकः॥ जीवस्य मूलचक्रेस्मिन्न
धः प्राणश्चरत्यसौ॥ प्राणरूढो भवेज्जीवः सर्वदेहेषु सर्वदा॥ तस्योर्ध्वे कुंडलीस्थानं नाभेस्तिर्यगथा
ली गतं॥ अष्टप्रकृतिरूपा सा अष्टधा कुंडलीकृता॥ यथावद्वायुसंचारं जलान्नादीनि नित्यशः॥ परितः कं
दपार्श्वेषु निरुध्यैव सदा स्थिता॥ सुखेनैव समावेष्ट्य ब्रह्मरंध्रमुखं तया॥ योगकाले त्वपानेन प्र ६५

बोधं नीति वह्निना स्फुरंती न्हृदयाकाशे नागरूपा महोज्ज्वला॥ वायुर्वायुसखेनैव ततो याति सु
षुम्णाम्॥ कंदमध्ये स्थिता नाडी सुषुम्णेति प्रकीर्तिता॥ तिष्ठंति [illegible] परितः सर्वाश्चक्रेस्मिन्न हि
संतकाः नाडीनामपि सर्वासां मुख्या गार्गि चतुर्दश॥ इडा च पिंगला चैव सुषुम्णा च सरस्वती॥
वारुणी चैव पूषा च हस्तिजिह्वा यशस्विनी विश्वोदरी कुहूश्चैव शंखिनी च यशस्विनी॥ अलंबुषा
च गांधारी मुख्याश्चैताश्चतुर्दश॥ तासां मुख्यतमास्तिस्रस्तिसृष्वेकोत्तमा मता॥ मुक्तिमार्गेति सा
प्रोक्ता सुषुम्णा विश्वधारिणी॥ कंदस्य मध्यमे भागे सुषुम्णा सुप्रतिष्ठिता॥ पृष्ठवंशास्थिनेना
स्थ्ना सह मूर्ध्नि स्थिता सदा मुक्तिमार्गेति सा प्रोक्ता ब्रह्मरंध्रेति कीर्तिता अव्यक्ता सेव विश्वरूपा
सूक्ष्मरूपा च वैष्णवी स्मृता हठप्रदीपिकायां सुषुम्णा शून्यपदवी ब्रह्मरंध्रं महापथः श्मशानं शांभवी
अस्य मार्गश्चेत्येकवाचकमिति॥ अत्र सुषुम्णाया मुक्तिमार्गत्वं तया ईर्ष्मापन्नमत त्क्रमेनीति

यो॰ची॰ वक्ष्यमाणयाछांदोग्यश्रुत्यामुक्तिसाधनद्वारधारणादतएवकाशीवरिष्ठमविमुक्तमितिप्र
६६ समाख्यायतेतथाचोक्तमविमुक्तंत्रैविध्यंकाशीमीमांसायां॥त्रीण्याध्यात्मिकाधिदैविका
धिभौतिकानीतिसूत्रेआध्यात्मिकाविमुक्तमिडपिंगलानाडीतिस्कंदपुराणेपिदर्शितं॥स्कंदोवाचेडा ये
बालिरानुणोसिरिडामुता॥वरुणापिंगलानाडीतदंतस्त्वविमुक्तमित्नितथासासुषुम्णाप
रानाडीत्वियंवाराणसीत्वसाविति॥कूर्मपुराणेप्यस्याएवतत्तत्प्रदेशविशेषावच्छेदेनमु
श्री क्तिप्रदत्वात्क्षेत्रप्रदेशानामविमुक्तत्वसमाख्यानं॥भ्रूमध्येनाभिमध्येचहृदयेपिचमूर्द्ध
नि॥यथाविमुक्तमादित्येवाराणस्यांव्यवस्थितं॥वरुणायास्तथाचास्यामध्येवाराणसीपुरीति॥
यश्चात्रचाविमुक्तशब्दःशब्दचारःतथाचायमत्रान्वयःयथाविमुक्तशब्दआधिदैविकेद्या
वापृथिव्योःसंधिरूपेआदित्येव्यवस्थितइति॥याज्ञवल्क्यः॥इडाख्यपिंगलाचैवतस्याः ६६

सव्यक्ववदक्षिणे॥इडातस्याःस्थितासव्येदक्षिणेपिंगलास्मृता॥इडायांपिंगलायांचचरतश्चंद्रभा
स्करौ॥इडायांचंद्रमाज्ञेयःपिंगलायांरविःस्मृतः॥चंद्रस्तामसइत्युक्तःसूर्योराजसउच्यते॥विष
भागोरवेर्भागः सोमभागोऽमृतंस्मृतं॥तावेवधत्तःसकलंकालंरात्रिंदिवात्मकं॥भोक्त्रीसुषुम्णा २
कालस्यगुह्यमेतदुदाहृतम्॥अमृतसिद्धौ॥मेरुशृंगेस्थितश्चंद्रोद्विरष्टकलयान्वितः॥अहर्निशंतु
षारात्मासुधांवर्षत्यधोमुखः॥ततोऽमृतंद्विधाभूतंविज्ञातव्यंविवेकिभिः॥इडामार्गेणपुष्ट्यर्थंवि
यन्मंदाकिनीजलं॥पुष्णातिसकलंदेहंसूक्ष्मानाडीयथागतं॥एषचंद्रस्वरूपोहिवाममार्गेव्यव
स्थितः॥अपरःकुंदवृंदाभोहर्षाकर्षितविग्रहः॥मध्यमामध्यमार्गेणसृष्ट्यर्थंयातिचंद्रमाः॥म
ध्यमामूलसंस्थानेतिष्ठतेसूर्यमंडलं॥कलाद्वादशसंपूर्णोदीप्यमानश्चरश्मिभिः॥ऊर्द्ध्ववहति
दक्षेणनीत्वामूर्तिःप्रजापतिः॥एषसूर्यःपरामूर्तिर्नगंरीदक्षिणेपथि॥वहतेलग्नयोगेनसृष्टिसंहा

यो०चिं० रकारकः॥ रक्षतरगतिंत्पत्कायदामेरुसमोरविः विषुवंतं द्विजानीयात्पुण्युः कालंकलेवरे ज्ञा
क्री त्वा च विषुवं देहे साभ्यासावर्मशालिनः॥ उत्क्रांतिंकालयोगेनसुखंकुर्वंतियोगिनः॥ अतुःसंध्या
६७ दिशाः रात्रिः कलाकाष्ठाक्षणादयः॥ आदानश्च विसर्गश्च सर्वं तत्सूर्यतो भवेत् ग्रहणं तद्विजानी
याद्वाह्याभ्यंतरतो ध्रुवं बाह्ये पुण्यतमः कालो मुक्तिश्चाभ्यंतरे भवेत् चंद्रावेव यदा सूर्यो गच्छातिचं
द्रमंडले अन्योन्यं जायते योगस्तस्मा घोगो हि लभ्यते सूर्यो वहिर्यदा देवा दृ ईव हतिर्देहिनां अथ
श्चंद्रामृतं याति तदाभ्युत्पुभवेन्नणं॥ सर्वाण्येव हि तत्वा निव्रजंत्पूर्ड्ढकलेवरे॥ एतौ मुक्तिप्रदौ ख्यातौ
सूर्यचंद्रमसौ सदेति याज्ञवल्क्यः॥ सरस्वती कुहूश्चैव सुषुम्णा पार्श्वयोः स्थिते॥ गांधारी हस्तिजिह्वा
याः चद्रडाः पृष्टपूर्वयोः॥ पूषा पयस्विनी चैव पिंगलापृष्ठपूर्वयोः॥ कुहोश्च हस्तिजिह्वाभ्यामध्ये विश्वो
दरी स्थिता॥ पयस्विन्या कुहोर्मध्ये वारुणी च प्रतिष्ठिता पूषायाश्च सरस्वत्या स्थिता मध्ये
६७

पयस्विनी॥ गांधार्याश्च सरस्वत्याः स्थिता मध्ये च शंखिनी॥ आलंवुषा च विप्रेंद्र कंदमध्या
दधः स्थिता॥ पूर्वभागे सुषुम्णायास्त्वा मेढ्रांतं कुहूः स्थिता॥ अधश्चोर्द्ध्वं च विज्ञेया वारुणी
सर्वगामिनी॥ यशस्विनी च याम्यस्य पादांगुष्ठांतमिष्यते॥ पिंगला चोर्द्ध्वगा याम्य नासांतं वि
द्धि मे प्रिये याम्य पूषानु नेत्रांतं पिंगलायास्तु पृष्ठतः॥ पयस्विनी तथा गांधारी याम्य कर्णांतमि
ष्यते॥ सरस्वती तथा चोर्द्ध्वमा जिह्वायाः प्रतिष्ठिता॥ असव्यकर्णाद्विप्रेंद्र शंखिनी चोर्द्ध्वमाम
ता॥ गांधारी सव्यनेत्रांतमिडायाः पृष्ठतः स्थिता॥ इडा च सव्यनासांतसव्यभागे ... पायु
लादधो गता॥ एतास्त्वन्याः समुत्पन्ना नाड्योन्याश्च तास्वपि यथाश्वत्यदले तद्वदन्या प
त्रेषु वा शिराः॥ नाडीषितासु सर्वासु विज्ञातव्यास्तपोधनेदृति॥ सांख्ययोगे॥ चक्रमध्ये
स्थिता नाड्यस्तिस्त्रस्तिस्रोत्र देवताः॥ इडा च वैष्णवी नाडी पिंगला ब्रह्मदेवता॥ ऐश्वरी सा

सुषुम्णास्यान्मेरुमध्येप्यवस्थिता॥नाडीमध्यगतग्रंथित्रयपुक्तात्रिवेणिका॥उत्तरेस्कंहे
नेगंगायमुनादक्षिणस्मृता॥सरस्वतीपश्चिमायास्तासांसंगःसदांतरइति॥अमृतसिद्धौ॥
गंगायमुनयोर्मध्येवहत्येकासरस्वती॥आसांतुसंगमेस्नात्वाधन्यायांतिपरांगतिमिति
॥मानसोल्लासे॥गांधारीहस्तिजिह्वाच्चनयनांतंप्रधावतः॥नाडीचक्रेणसंस्पृतेनासिकांत
मुभेगते॥नाभिमंडलमाश्रित्यकुक्कुटांडमिवस्थिते॥पूषाचालंबुषानाडीकर्णद्वयमु
पाश्रितेनाडीशुक्लाह्वयातस्माद्भ्रूमध्यमनुसर्पति॥सरस्वत्याह्वयानाडीजिह्वांतावरसा त्व
रिणीनाडीविश्वोदरीनामभुंक्तेन्नंसाचतुर्विधंपीत्वापयस्विनीतोयंकंठस्याकुरुतेस्रु
तं॥नाडीचक्रात्समुद्भूतानाड्यस्तिस्रस्त्वधोमुखाः एकाशुक्रंसिनीवालीमूत्रंसिंचेत्कुहू
र्मलं॥मुक्तान्तरसमादायशंखिनीपुनःकपालकुहरंणंत्वामूर्द्धिसंचिनुतेसुधांशतंवे

न्ते

काचनाड्यःस्युस्तासामेकाशिरोगतास्तयोर्मार्गेन्मुक्तःस्यादिति वेदांतशासनं॥अत्रसुषुम्णा
मुखंमूलाधारएवविक्षेपंतथाचसुरेश्वराचार्यैःदेहस्यमध्यसंस्थानंमूलाधारइतीर्यते॥
गुदात्तुद्व्यंगुलादूर्द्ध्वंमेढ्रात्तुद्व्यंगुलादधःत्रिकोणाधोमुखाग्रश्चकन्यकायोनिसंनिभःयत्रकुं
डलिनीनाममहाशक्तिःप्रतिष्ठिता॥प्राणाग्निविंदुनादानांसावित्रीसासरस्वती॥मूला
धाराग्रकोणस्यासुषुम्णाब्रह्मरंध्रगामूलोर्द्ध्वछिन्नवंशाभापद्माधार[illegible]न्विता॥तत्पार्श्वको सम
णयोर्ज्ञातेद्वेइडापिंगलेस्थिते॥नाडीचक्रमितिमाहुस्तस्मात्राड्यौविनिर्गताःप द्मकभेद
नेनदेवीस्तवष्टिःश्रीशंकराचार्यैरपिसुषुम्णामुखंमूलाधारएवोक्तंतथाहि॥महींमूलाधा
रेकमणिपूरेहुतवहंस्थितंस्वाधिष्ठानेहृदिमरुतमाकाशमुपरी॥मनोपिभ्रूमध्येसकल
मपिहित्वाकुलपथंसहस्रारेपद्मेसहरहसिपत्याविहरसिइतिसर्वमंत्रशोस्त्रेघकंदस्थ

ध्ये

ग

यो·चिं· प्रेतपिशाचादीनाँधर्वनगराणि च सुवर्णवर्ण वृक्षांश्च नवमासं स जीवति स्थूलः कृशः [illegible] कृशः स्थू
६.१ लो यो कस्मादेव जायते प्रकृतेश्च निवर्तेत तस्यायुश्चाष्टमासिकं रवं उंयस्य पदं पांशुर्ण पादस्याग्रे
सा थवा भवेत् पांसुकर्दमयोर्मध्ये सप्तमासं स जीवति कपोतो गृध्रकाजोवाय सो वापि मूर्द्धनि कव्या द्वा
दो वा खगस्तिष्ठेत्षण्मासायुः प्रदर्शकः हन्यते काकपंक्तीभिः पांशुवर्षेण वा नरः पुष्पेत्रवै यस्य
या मर्मस्थानानि दामाद धस्तनं तस्यापि पंचभिर्मासैः विंघान्मृत्युमुपस्थितं स्वां छायामन्यथा दृष्ट्वा चतुर्मा
द्धे सान्स जीवति अनभ्रे वियुतं दृष्ट्वा दक्षिणां दिशमास्थितां उ दर्षे इंद्रधनुर्वापि वा ॥ तस्या जीवितं
द्वित्रिमासिकं घृतते लेतथादर्शे तोये वाप्यात्मनस्तनुं यः पश्येदशिरस्कां वा मासादूर्ध्वं न जीव
ति यस्य वस्तिसमो गंधो गात्रे शवसमोपि वा तस्यार्द्धमासिकं क्षेपं योगिनोऽन्यजीवितं यस्य वैस्ना
नमात्रस्य हृत्प्रमवशुष्यति पिबंश्च जलं चोष्ठे दशाहं सोपि जीवति संभिन्नो मानुतो यस्य ६८
त्य

मर्मस्थानानि कृंतति नत्वृष्यत्यंवुसंस्पर्शात्तस्य मृत्युरुपस्थितः ऋक्षवानरयानस्थः स्वय
न्यो दक्षिणां दिशं स्वप्ने प्रयाति तस्यापि न मृत्युः कालमिच्छति र क्तकृष्णांवरधरा गायती हस
ती च यं दक्षिणाशां नयेन्नारी स्वप्ने सोपि न जीवति नग्नं क्षपणकं स्वप्ने हसमानं महाबलं एवं
वावीक्ष्य बलांतं विंघान्मृत्युमुपस्थितं आमस्तकतलाद्यस्तु निमग्नः पंकसागरे स्वप्ने पश्य
त्यथात्मानं स सद्यो म्रियते नरः केशांगारांस्तथा भस्मा भुजंगं निर्जलां नदीं दृष्ट्वा स्वप्ने दशाहा
न्मृत्युरेकादशे हनि करालैर्विकटैः कृष्णैः पुनुष्ठैः तायुधैः पाषाणैस्ताडितः स्वप्ने स घो मृत्यु ध
मवाप्नुयात् ॥ सूर्योदये यस्य शिवा क्रोशंती याति सन्मुखं विपरीत्यापरीत्या च स सद्यो मृत्युम्
च्छति यस्य वै भुक्तमात्रस्य हृदयं वाधते क्षुधा जायते दंतघर्षश्च स गतायुरसंशयं दीपादि
गंधं नो वेत्ति त्रसत्यह्नि तथा निशि नात्मानं परनेत्रस्थं वीक्षते न स जीवति शक्रायुधं सार्द्ध

यो॰चि॰ राचेदिवं दुग्रहणं तथा दृष्ट्वा मन्येत संक्षीणमात्मनः ॥ जीवितमात्मवित् नासिकावक्रता मेति कर्णयोर्न
७० मनोन्नती ॥ नेत्रं च वामं स्रवति यस्य तस्यायुरंतगं आरक्तता मेति मुखं जिह्वा चाप्यसिता यदा तदा श
ग्रो ग्रो विजानीयान्मृत्युमासन्नमात्मनः ॥ उष्ट्रसभयानेन यः स्वप्ने दक्षिणां दिशं प्रयाति तं विजानीया
घ्रो त्सं मृत्युं नरेश्वर ॥ पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसंभवं नश्यते च चक्षुषोर्ज्योतिर्यस्य सोपि
न जीवति ॥ पतितस्य च वै गर्ते यस्य द्वारं पिधीयते ॥ न चोत्तिष्ठति यः स्वप्ने तदंतं तस्य जीवितं ऊ
तो ओ र्ध्वा च दृष्टिर्न च संप्रतिष्ठिता रक्ता पुनः संपरिवर्तमाना मुखस्य चोष्मा शुषिरस्य चोष्म शिशिरा च नाभिः
शंसंति पुंसामपरं शरीरं स्वप्नेग्निमविशेय स्तनच तिक्रमते पुनः जलमवेशादपि वा तदंतं तस्य
न्य जीवितं पश्चाभिर्हन्यते दृष्टो भूतै रात्रावथो दिवा स मृत्युं सप्तरात्रांते नरः प्राप्नोत्यसंशयं स्ववस्त्रममलं सं
शुक्लं रक्तं पश्यत्यथासितं यः पुमान्मृत्युमासन्नं तस्यापि हि विनिर्दिशेत् स्वभाववैपरीत्यं ७०

च प्रकृतेश्च विपर्ययः कथयंति मनुष्याणां समासन्नौ यमांतकौ येषां विनीतः सन्नं यस्य पूज्यतमा
मताः नैव चावजानाति तानेव च विनिंदति देवानार्चयते वृद्धान् गुरून्विप्रांश्च निंदति मातापित्रोरहं
कारं जामातृणां करोति च ॥ योगिनां ज्ञानि विदुषामन्येषां च महात्मनां प्राप्ते काले च विदुषां तद्दिने यं
विचक्षणैः योगिना सततं यत्नात् दृरिष्टान्यवहनीयनते संवः ॥ पितन्नैव तन्मुखमुक्तं ॥ याज्ञवल्क्यवसि त
ष्ठादिमुनीनां गोरक्षादियोगिनां च मतेनाभिस्यकंदमध्ये सुषुम्णामुखं कुंडलिनी च ब्रह्मविष्णु
ग्रंथिभेदकृतयोर्मूलाधारस्वाधिष्ठानचक्रयोर्भेदादुपपते मेतन्मिहृचिंत्यं योगभास्करे ॥ दशना
ड्यो दशास्थीनि वन्हयो दश वायवः एतेषाम् विरोधेन योगाभ्यासपरो भवेत् ॥ तत्र नाड्यो वाय
वः पूर्वमेवोक्ताः पृष्टवंशो ललाटस्थिकंधरं चिबुकं तथा नासावंश शिरोबाहुः पादाबूरू च जानुनी
॥ एतानि तु दशास्थीनि ॥ दशवन्हीस्ततः शृणु ॥ भ्राजको रंजकश्चैव वा तक्षः श्लेष्मकस्तथा ॥ पा

वकोरचकः षष्ठो दाहकः शोषकोष्टमः॥ पोषको वं धुकश्चेति देहेस्मिन्दशवन्हयः॥ अमृतसिद्धो कं
लाभिर्दशभिर्युक्तः सूर्यमंडलमध्यगः॥ वेसत्तवस्ति प्रदेशे वन्हिरस्त विपावकः यावत्सूर्यस्यम ध्य

त स्थः कालानलः कले वेरेत्तावबिंदुप्रभावोपमविच्छिन्नः सुधामयः॥ वन्हिर्बलप्रदो लोके वन्हिरायुःप्र
दायकः स्वस्थो यावत्स्वंवन्हिर्निरस्तावन्निरामयः॥ अतस्तद्विरोधेनैव योगाभ्यासः कर्त्तव्य इति
भावः॥ अथ धाराः शिवयोगे॥ अथ तेषोडशाधारान्कथयामि विशेषतः॥ तेजो ध्यानं पदां
गुष्टे कुर्याद्दृष्टिः स्थिरा भवेत्॥ पादस्य पार्ष्णिनाभ्यासः कर्त्तव्य इति भानुमूलं द्वितीयाधारल
क्षणं॥ संपीड्य स्थापयेदग्निदीपनं भवति क्षणात्॥ आकुंचयेद्गुदाधारं पादसंकोचनेन तु
॥ अपानमरुतो धैर्य्यं जायते ततती यकं॥ मद्धाधारे दंडसंकोचनेन ब्रह्मग्रंथी स्त्रीन्समुत्प
धयश्वातु॥ चैतो वायो ब्रह्मनाद्यप्रवेशाद्बिंदुस्तंभः संभवत्येव स घः॥ पंचमाधारं मोडनं तु ना ७१

नं दत्वा मुहुर्मुहुः॥ मलमूत्र कृमीणां चतारणं भवति ध्रुवं॥ नाभ्याधारं ततस्तत्र प्रणवं योजयद्बुधः॥
समाधिनैक चित्तेन तस्य नादोदयो भवेत्॥ सप्तमं हृदयाधारं तत्र प्राणान्निरोधयेत्॥ तदात
न्मध्यकमलविकाशो भवति क्षणात्॥ कंठाधारं कं कूपं पीडयेच्चिबुकेन तु इडापिंगलयोर्वायु ८
प्रग्रहः सुस्थिरो भवेत्॥ नवमं घंटिकाधारं जिह्वाग्रं तत्र दापयेत्॥ सुधाकलास्रवत्येषा सा र
तुसंस्तंभकारिणी॥ १०॥ पालंबिकाचालनदोहनाभ्यां दीर्घीकृतासा विपरीतमार्गात्॥ यस्ता
लुमूलांतरगर्भदेशे प्रवेशयेत्सो मरतां प्रयाति॥ सेयं खेचरीमुद्रास्याः स्वरूपं प्रभावश्च मुद्रा
प्रकरणे वक्ष्यते॥ जिह्वाधो रसनाधारं कुर्याच्चेमघनं पदि सिद्ध्येत स्यामृतस्वादः कवित्ताच
स्फुटी भवेत्॥ द्वादशं दशनाधारमूर्द्ध्वतद्राजदंतकं॥ षण्मासात् दृश्यते ज्योतिस्तत्र जिह्वात्र
वेदनात्॥ त्रयोदशं घ्राणमूलं तत्र दृष्टिः स्थिरीकृता॥ यदिस्यान्मनसा नित्यं वायुस्तत्र स्थिरो भ

वेत्॥ चतुर्द्दशं ललाटाख्यमाधारं यत्र योगवित्॥ मनसा वायुमारोप्य सर्वसिद्धिमवाप्नुयात्॥ व्यो

माधारं पंचदशं नदूर्द्धं चक्षुषानु धः॥ पश्येत्स किरणाकारं शीघ्रमेव हि पश्यति॥ नेत्राधारं षोड

७२ शं तत्र दूर्द्धं चालयेद्बुधः॥ ज्योतिःपुंजमयं योगे तत्पश्यति क्षिप्रमेव हि॥ १६॥ अथ षट्चक्राणि॥ सां

ख्ययोगे॥ अतः परं प्रवक्ष्यामि षट्चक्राणि शृणु प्रिये॥ मूलाधारमधिष्ठानं मणिपूरमनाहतं

॥ कंठदेशे विशुद्धिः स्यादाज्ञा भ्रूमध्यसंस्थिता॥ चतुष्कोणो यमाधारः स्थितिः षट्कोणरूपि

णी मणिरर्द्धेंदुसंकाशस्त्रिकोणं स्यादनाहतं॥ विशुद्धिचक्रं पूर्णेंदुसदृशं परिकीर्त्तितं॥ आ

ज्ञा दिव्यशिखाकारा शृणु चातः परं प्रिये॥ आधारः पीतवर्णः स्यात्स्वाधिष्ठानं जलात्मकं॥ म

णिर्नीलांजनप्रख्यो रक्तवर्णं त्वनाहतं॥ विशुद्धिः स्फटिकप्रख्या स्यादाज्ञा सर्ववर्णभाक्॥

केचिद्वदंति शोणाभं स्वाधिष्ठानारविंदकं तथा पंकज शुक्लं परमात्मप्रकाशनं॥ शाक्तियोगे च॥ ७२

च

त्वारि च षट्। आधारादिद्वादश षोडश द्विच पद्मासनादीनां पत्रसंख्या समीरिता॥ अत्र द्विरंडेवा

न्याख्यस्तथा फणिपिनाकिना॥ छागलंडो महाकालः सिद्धास्त्वेते यथाक्रमं डाकिनी राकिनी

चैव लाकिनी काकिनी तथा॥ शाकिनी चैव क्रमाद्व्यो भवंति च त्वात्वेवं हंस त्वात्वेवं सर्वचक्रा

णि सर्वसिद्धिकराणि वै॥ गुरूपदेशविधिना भिंद्यात्तानि यथाक्रमं चक्रभेदनप्रकारस्त्रिपु

रासारसमुच्चये॥ अथ पूरकयोगयोजितांतःपृषदश्वो निज मूलचक्रे धृतिं विदधीत बुधः स म

ब्रह्मे वीर्यं माहितां जोपचिपदयं ग्रंथिविभेदनप्रयत्नेश कुसुमसमुत्सज्यशनैर्याः स्वं संकोचयेत्कुंडलिनीमा

र्गमध्यं बुधस्तथाधारनियोजितात्मा संकोचयेत्कुंडलिनीमार्गमुच्चैः विदधीत मुहुर्मुहुः गुरूक्तक्र

मतो हुंकृतिमंकलयन् पापिंडे द्रुतगुरुध्वजांतरालस्थितं तेजोमयपुष्पराग्र्यपानिः अथ कुंडलिनीमा

रुतं प्राणनिलास्य शनैःप्रवेशयन्तं ततः सनपंकजस्य मूलं स्वगुरुप्रोक्तविधानतो दृगायं अमुना विधि

यतात्मा

यो॰ चिं॰ नामुहुः कृतेन क्रमशः कंबुनिभा रुनस्ततो सौ॥ अजपंकजमूलदेशमार्गप्रणयग्रंथिविभेदनं करोति।
७३ परित्यत्परवगंधिपस्ततो सौ सरणिं चंद्रमसो नभोमणेश्च॥ कमलं कमलासनस्य पश्चाद्धृदधी
तोर्द्ध्वमुखं प्रविश्य सम्यक्॥ प्रतिभानमयाद्भुतं प्रविष्टे भवनांतः परमेष्ठिनः खगेशे॥ लघुनावपुषा
भवत्पुरग्राजठरां तर्द्दहनस्य चापि दीप्तिः तडित्कोटिभस्वयं स्वरुचिजितका लानलरुचि सहस्रारि
त्यांशुप्रकरसदृशोर्यांतकलितं। अमंत्रयोन्यंतः स्फुरत्तरुणबंधूककुसुमप्रभं कामं ध्यायेज्ज्वरठ
शशभ त्कोटिशिशिरं तस्योर्द्ध्वग्निशिखाचिरं तिलना पुंजप्रभाभास्वरा सूक्ष्मा ब्रह्मपथांतरांत ध्रु
रगता चैतन्यमात्राकला एकीभूतमनंतरं सहतपा ध्यायेद्धियानिश्चलं स्वात्मानं च निवातदी
पनिभया हं सस्वरूपं बुधः शक्तिः कुंडलिनीति या निगदिता आद्या समं संज्ञा जगन्निर्मणि सततो घ
ताभविलसत्सौदामिनीसंनिभा॥ शंखावर्त्तनिभां प्रसुप्तभुजगाकारां जगन्मोहिनी तन्मध्ये परिभा
७३

विधि
वपेद्विसलेन्नतंतूपमेयाकृतिं॥ हुंकारेण गुरूपदिष्टनाप्रोत्थाप्य सुप्तां ततः कृत्वा तां कलयात पाप
रमया चिद्रूपया संभुनां मायां कुंडलिनीं समाहितमनास्तामुच्चरेत्कौलिकी शक्तिर्ब्रह्ममहापथे
नसहिता माधारतः स्वात्मनां॥ भित्वा लिंगत्रयमथ च बुधो ब्रह्ममार्गे ... र्द्ध्वं गच्छंतीं तां कमलजनि ण-पो ३
लयात्याप्य पेरां ब्रह्मशक्तिं व्योमांभोजप्रणयि परमानंदकंदं विसर्गस्थानं चंद्रोपरि परिगलद्रक्त गुंढ
पीयूषधारं॥ पीत्वा कुलामृतरसं पुनरेव दिव्यं मध्ये विशेत्पवनस्य समाहितात्मा॥ यायात्कु
लादकुलमेव पुनश्च मात्रायोगेन देशिकवरप्रतिपादितेन॥ सा शक्तिः सकलस्य जीवभूता स्यु
प्राणेसाविनिपरिपठते मुनींद्रैः॥ उद्धातः सतु परिपठ्यते मुनींद्रैः प्राणानस्य शांति यदाक्रमेण व्य
नीतः॥ अमुं स्वाचारस्य प्रतिदिवसमभ्यासनिरतः करोति श्रद्धावान्सततनमवधूताखिलमलः॥
ने समुक्तो दुःखौघैरपगत जराक्लेशमरणो गुणग्रामोपेतः सुरइव चिरंजीवति भुवि चतुर्विधायाक
गदितान्नं तत्रसुरत्ने २

सौकलयाच

यो॰चिं॰ यिनेहसृष्टिः प्रवर्तते प्रासकालानियस्यां प्रलीयते त्वापि जगत्समग्रं कालाग्निरुद्रादि... शिवां

मे॰त॰॥ तेसिद्धं मयोक्ता खलु योनिमुद्रावंधस्तदेवैरपि दुर्लभोस्याः अनेनवंधेनन साध्यते यन्नास्त्येव त

२४ त्साधकपुंगवस्यगुरुतल्पनिषेवणं चपानं द्विजहत्यामधुनः सुवर्णचौर्यं अमुनाविलयं प्रयातिस पं॥

म्यक्सकृदप्याचरितेनवंधनेनसतुमंत्रिवरः सएव योगीगुणसिद्धः परमास्थितः सएव॥ अमुना

चरतीहबंधनं यः सततं स्वोचितधर्मकर्मनिष्ठः अमुनाभवतीहदेहभाजां नततास्यासकृतेन

वंधनेन॥ नजरापित्तराजवेजयं तीनचमृत्युप्रतिपादितापिभीतिः एतस्यैव हि बंधनस्य मनुजः प्रामो

ति... कृतास्याष्टणिमादि सिद्धिमतुलां संचितेमभूर्जितां योगं वाप्नतिमं जपंचमरुतः काल

स्यवावंचनं तद्बिलोः परमंपदंपरतरं पश्यतियत्सूरयइति॥ पारमेश्वरतंत्रे ईश्वरउवाच॥ पश्चि

मा भीमुखं लिंगं योनिस्यं परिकीर्तितं हृद ... यिर्विंदु संपुटं स्वयंभूवाणवाचकं इतरं वांतरालस्थं

सा॥ गं॥

७४

ध॰ विसर्गाधस्तथा परं महापद्मवनं चांतर्योगयोठं प्रकीर्तितं॥ करंबगोलकाकारं तत्कामं विंदुरूपिणं॥

म्णा ब्रह्मरंध्रं तु तत्रैव सुषुम्नाधारमंजसे पृथिव्यादीनिरंध्राणि सूत्राणां वाचकानि तु॥ पूर्णरव्यंच

दनं तत्वं कोरंडद्वयमध्यगं तद्दूर्द्धं नाद्नामानमुङ्गोयानं प्रकीर्तितं कामरूपे भवेद्भुक्तिर्विसर्गम

तुलं प्रियेवंधं तस्याः प्रवक्ष्यामि संवितिलभते मया॥ आदौ पूरकयोगेन ह्याधारे योजयेन्मनः॥

गुदमेढ्रांतरे योनिस्तामाकुंच्य प्रबोधयेत्॥ क्रमयोनिगतं ध्यात्वा कामं वंधूकसंनिभं॥ सूर्य

कोटिप्रतीकाशं चंद्रकोटिसुशीतलं तस्योर्द्ध्वं तु शिखासूक्ष्मा विचित्रापावकी कला॥ तयासहि

तमात्मानमेकीभूतं विचिंतयेत्॥ गच्छंती ब्रह्ममार्गेण लिंगत्रयक्रमेण तु अमृतं तद्विसर्गस्थं पर

मानंदलक्षणं द्रुतं रक्तं स्वनेजाख्यं धारापातैः प्रवर्तितं पीत्वा कुलामृतं दिव्यं पुनरेवविशेत्कुलं॥ पु

नरेवा कुलं गच्छेन्मात्रायोगेन नान्यथा साचप्राणः समाख्याता अस्मिंस्तंत्रे मयोदिते॥ सामात्रा

यो॰चिं॰ जायते भूय उच्चारवशवर्तिनी॥ उद्घातः प्रोच्यते सोपि प्राण संस्पृशते पदा॥ एवमभ्यसमानस्य ब्र
ह्मस्पृहनिनिश्चयं॥ जरामरणदुःखौघैर्मुच्यते भवबंधनात्॥ चतुर्विधा तु यास्सृष्टिर्यस्यां योनौ प्रवर्त्तते॥
.७५ पुनः प्रलीयते यस्यां कालाग्नादिशिवांतगा॥ योनिमुद्रा परा ह्येषा बंधस्तस्याः प्रकीर्तितः॥ तस्यास्तु
बंधमात्रेण तन्नास्ति यन्न साधयेत्॥ छिन्नानुद्रास्तथा मंत्राः कीलिताः स्तंभिताश्च ये॥ दग्धा मन्त्राः शि
खाहीनाम लिनास्त्तिरस्कृताः॥ भेदिता भ्रमसंयुक्ताः शप्ताः संमूर्छिताहताः॥ मंदा बालास्तथा या
वृद्धा प्रौढा यौवनगर्विताः॥ अरिपक्षे स्थिता ये च निर्वीर्याः सत्त्ववर्जिताः॥ तथांशकेन हीनाश्च खंड
शः शतधा कृताः॥ विधिनानेन संयुक्ताः प्रभवंत्यचिरेण तु॥ सिद्धिमोक्षप्रदाः सर्वे गुणा विनियो-
जिताः॥ यद्यदुच्चरते मंत्ररूपं शुभाशुभं॥ तत्तत्सिद्ध्यत्यनायासाद्योनिमुद्रानिबंधनात्॥ दीक्षयित्वा
विधानेन अभिषिच्य सहस्रधा॥ ततो मंत्राधिकारार्थमेषा मुद्रा प्रकीर्तिता॥ ब्रह्महत्यासहस्राणि ७५

त्रैलोक्यमपि घातयेत्॥ नासौ लिप्यति पापेन योनिमुद्रानिबंधनादिति॥ अथ चक्राणि लययोगि-
नि॥ शिवयोगे मूलाधारे त्रिधावर्त्तं ब्रह्मचक्रं भगोपमं॥ तत्कंदेग्निनिभं ध्यायेदधः शक्तिमभीष्ट-
दां॥ स्वाधिष्ठानं ततश्चक्रं तत्र चातुर्दलांबुजं॥ तदेवोड्डियानं ध्यायेत्पश्चिमाभिमुखं शिवं॥ पंचावर्त्ते
नाभिचक्रं स्य मकारांतं डिंभाभं तत्र कुंडलिनीस्थाप्य मध्यशक्तिं सुसिद्धिदां॥ अधोमुखाष्टप
त्राब्जयुक्तं हृच्चक्रमिष्टदं॥ तन्मध्यकर्णिकां ध्यायेज्ज्योतिर्लिंगाकृतिं विभां॥ पंचमं कंठचक्रं चतुरं
गुलचतुर्युतं॥ इडापिंगलयोर्ध्यायेत्सुषुम्णां मध्यसंस्थितां॥ षष्ठं च घंटिकामूलं लिंगं तद्राजदंतकं॥
ध्यायेत्तु दशमद्वारं तत्र शून्यं सुसिद्धये॥ भ्रूचक्रं संप्रभं सत्वे बिंदुनालं करं बाह्यप्रदं॥ ध्यायेद्दीपशिख
खाकारं तन्मध्ये ज्ञानलोचनं॥ ब्रह्मरंध्रे ष्टमं चक्रं निर्वाणाख्यं सुसूक्ष्मदं तत्र जालंधरं ध्यायेद्धूमसमीक्षम
दं ततः आकाशबीजं नवमं प्रशस्तं त्रिकूटकं पूर्णगिरेश्च दृष्टे॥ तत्रोर्ध्वशक्तिं शुभदां सुशून्यां ध्यायेद्व

साधारस्सरोजमध्ये इति॥ शास्त्रांतरे तु॥ प्रथमं मूलचक्रं स्यात्त्रिरावृत्तं भगाकृति॥ अपानेमूलकंदा
ख्यं कामरूपं च तज्जगुः॥ तदेव वह्निकुंडं स्यात्तत्र कुंडलिनी स्थिता॥ तां जीवरूपिणीं ध्यायेज्ज्योतिष्कं
मुक्तिहेतवे॥ स्वाधिष्ठानं मध्यमं स्याच्चक्रं तन्मध्यगं विदुः॥ पश्चिमाभिमुखं लिंगं प्रवालांकुरसन्निभं॥ त
त्रोड्डियानपीठं तु तं ध्यात्वाकर्षयेज्जगत्॥ तृतीयं नाभिचक्रं स्यात्तन्मध्ये भुजगी स्थिता॥ पंचाव
र्तेमध्यशक्तिश्चिद्रूपा विद्युदाकृतिः॥ तां ध्यात्वा सर्वसिद्धीनां भाजनं जायते बुधः॥ चतुर्थं हृदये चक्रं वि
ज्ञेयं तदधोमुखं॥ ज्योतिरूपं च तन्मध्ये हंसं ध्यायेत्प्रयत्नतः॥ तं ध्यायतो जगत्सर्वं वश्यं स्यान्नात्र सं
शयः॥ पंचमं कंठचक्रं स्यात्तत्र वामे इडा भवेत्॥ दक्षिणे पिंगला ज्ञेया सुषुम्णा मध्यतः स्थिता॥ त
त्र ध्यात्वा शुचिर्ज्योतिः सिद्धीनां भाजनं भवेत्॥ षष्ठं च तालुकाचक्रं घंटिकास्थानमुच्यते॥ दशमद्वा
रमार्गं तद्राजदंतं च तज्जगुः॥ तत्र शून्ये लयं कृत्वा मुक्तो भवति निश्चितं॥ भ्रूचक्रं सप्तमं विद्याद्बिंदुस्था

नं च तद्बिंदुः॥ भ्रुवोर्मध्ये वर्तुलं च ध्यात्वा ज्योतिः प्रमुच्यते॥ अष्टमं ब्रह्मरंध्रं स्यात्परं निर्वाणसूचकं॥
तं ध्यात्वा सूचिकाग्रं भूधूम्राकारं विमुच्यते॥ तच्च जालंधरं ज्ञेयं मोक्षदं लीनचेतसां॥ नवमं व्योमचक्रं
स्याद्दलैः षोडशभिर्युतं॥ संविद्रूपा च तन्मध्ये शक्तिरूर्द्ध्वे स्थिता परा॥ तत्र पूर्णगिरौ पीठे शक्तिं ध्या
त्वा विमुच्यते॥ ऊर्द्ध्वशक्तिनिपातेन अधःशक्तेर्निकुंचनात्॥ मध्यशक्तिप्रबोधेन जायते परमं सुख
मिति॥ एतत्फलं त्रिपुरासारसमुच्चये विस्तरेणोक्तं॥ तथा हि॥ अथाधारपंकेरुहाद्यपत्र वक्ष्ये सु
षुम्णांतरस्थे निसंक्षेपतोहं॥ तदंभोजपत्रस्थितां स्थापिते वास्तदाधारवर्णास्तदाधारदेवीः॥ अज
ग्रंथिपद्मं पुरा यन्मयोक्तं तदाधारमाद्यं चरंतीह संतः सुवर्णा ... वर्णैश्चतुर्भिः समेतं दलैर्योगिगम्यं
महाश्चर्यभूतं॥ चतुर्षु ज्वपत्रेषु देवी निरुद्धा ... वर्णैस्ससेत्केवलात्वा॥ स बिंदून मंदः स्वभा
वात्स सिद्धा स्फुरन्तो ति षाडाकिनी देवतात्र मूलाधारे संततं ध्यानयोगात् ... भस्तोभावुत्लुतिर्दुर्दुरी

भ
दिवर्णा
स्तादंभोजवर्णाषडाधार

यो॰ची॰ ७ व॥भूमित्यागः खेचरत्वं क्रमेणान्हृणामेतदूर्ध्वमुणाः संभवंति कांतिप्रकर्षो वपुषोपि नादव्यक्तिः प्रदी
प्तिर्जठरानलस्य॥लघुत्वमंगस्य निजेंद्रियाणां यत्त्वमारोग्यमदीनता च॥कृत्वा मनो निश्चलं
११ मध्ये मूलचक्रे नराः संततमादरेण भूतं भवच्चापि भविष्यदर्थं वदंति शास्त्राण्यपि चाश्रुतानि॥विहा
य सद्यः कमलासनस्य वक्त्रांबुजं प्रीतितरंगसंगात्॥तदीयवक्त्रांबुरुहोदरांतं सरस्वती नृत्यति दिव्य रे
रूपिणी॥अधिगम्य रसेंद्रमंत्रसिद्धीरपि कालं च विजित्य दुर्निवारं॥अजरामरतामवाप्य चांते प
रमानंदपदे स्मरारमंते॥एकीभूतार्णवांभस्सु तमखिलजगत्पूर्वमासीद्यत्पूर्वं ज्योतिर्मूर्तिस्तदंत ग
र्महिमहिमभूल्लिंगरूपी बभूव॥षट्सिद्धाधिष्ठितात्मा सकलसुरनुतः षड्भिरास्येरुपेतः ष तनुः
ड्भिः कोशैश्चदेवो नवभयतिमिरध्वंसहंसो महेशः॥अंगं लिंगं वपुर्यत्तो भगवतोदेवोदिरंग
नवद्वालीपूर्वमुखं त्रिवस्य तु महाकालस्तथोर्द्ध्वाननं॥वक्त्रं दक्षिणमाशुशुक्षणिरसोदेवः पिना ण
११

त्वं कीपुनः पार्श्व । हुगलेद एष भगवान्वामास्यमस्याभवत्॥स्वाधिष्ठानसमाह्वयं रसदलैर्मूले
ध्वजस्यांबुजं बालादित्यनिभं दलोपरिगतैः षष्ठादितर्कोक्षरैः॥विंदूभ्रासितमस्तकैर्भगवतो लिं
गात्मनः शूलिनः स्थानं योगिवरेण्यगोचरमिदं स्वास्याधिपा नाकिनी॥इहस्वाधिष्ठाने निहितनि
तो जचै...लम्बवशात्संदानंतो बुभिमितत्हृदयः साधकवरः॥समेतं गोनंगः क्षितितलमितो वामग
दृशां स्मरस्मेराभोगैरमयति गणं कांतिकलितं॥इह वेत्ति निधायमानसं स्वं विविधं चाश्रुतशास्त्र
जालमुच्चैः॥अवधूतजरामयः समर्त्येषु चिरंजीवति वीतमृत्युभीतिः॥वपुषोंशुचिभाजनस्पर्श स्व
रै त्परमां शुद्धिमिहातनोति पुंसां॥शरदंबुदस्मल स्पदे हे दृढरुद्धाव नतां चशी नरास्त्रिः॥चलितं सहसा
महारसेंद्र कमलालोकननो वियत्सरोजात॥इह ये विनिवारयंति संतोन्नुधीराः पुरुषोत्तमास्त एव॥
मदघातकटामहागजेंद्रोवशतामिति यथाशनैरुपायात्॥बलवानिह वैसुधाकरांसौ क्रमवद्धः

स्ववशो भवत्यवश्यं ॥ एतस्मिन्कुलिशाख्ययोगनिरता दार्दोलयो जायते ॥ रागादिंद्रियदंतिनां लर
 यवशात्संविन्निरपूर्जिता ॥ अंतर्लीनमहारसद्रवजुषां नृणां क्वेतालयं दाविर्भावमुपैत्यमंदसह
जानंदच्छलं दूरयः नाभिस्थं मणिपूरकं दशदलैर्नीलांजनाभैर्युतं डाद्यैस्तापिदशाक्षरैर्दलगतै
विंदूल्लसन्मस्तकैः ॥ लाकिन्यासमधिष्ठितं च सततं ध्यानान्नरः केवलं वश्याकर्षणनिर्विषीकरण
भूक्षोभादिकं कुर्वते ॥ स्थानेस्मिन्निहितात्मनः सुकृतिनः पातालसिद्धिः परा स्वर्गस्याप्रतिमस्य
साधनमपि स्याद्दीप्सितं च क्षितौ ॥ रूपं भूमिविसर्जनं परपुरे शक्तिः प्रवेशं जराहानिः सर्वाखिलदुः
खरोगशमनं कालस्य वा वंचनं ॥ हृदये सरसेंद्रगोपसंध्याद्युतसिंदूरसुवर्णवर्णमब्जं ॥ यदना
हतमित्युशंतिसंतो रविसंख्यैरुपशोभितं दलैश्च ॥ कादीशाद्यैर्भैरवैर्भानुसंख्यैर्ठांतोपेतैर्मंडि
तं चंडवीर्यैः ॥ तत्काकिन्याधिष्ठितं दिव्यशक्त्या देव्या हंसेनापि देवेन शश्वत् ॥ एतस्मिन्सततं नि

विष्टमनसः स्थाने विमाने स्थिताः क्षुभ्यंत्यद्भुतरूपकांतिकलिता दिव्यस्त्रियो योगिनः ॥ ज्ञा
नं चाप्रतिमं त्रिकालविषयं क्षोभं पुरस्यं श्रुतिर्दूराद्देक्च दर्शनं च खगतिः स्याद्योगिनीमेलनं ॥ विशु
नेत्रेने द्धाख्यं कंठे कमलममयधूम्रालिरुचिभिर्युतं श्रीकंठादिस्वरपरिगतैः षोडशदलैः ॥ इहस्थाने शाकि
न्यतुलनिजशक्तिर्भगवती स्थिता नित्यं देवी शरणगजनार्तिप्रशमनी ॥ अभ्यासयोगादिह संनिवि
ष्टस्वांतस्य शश्वन्नरपुंगवस्य ॥ समर्पतां स्यादनधीतशास्त्रसद्भावभावे वसुधातलेस्मिन् ॥ स्थानेत्र संस
क्तमना मनुष्यस्त्रिकालदर्शी विगताधिरोगः ॥ जित्वाजरांमञ्जनीलकेशः क्षितौ चिरंजीवति वीतमृत्युः
॥ इह स्थाने चित्तं सततमवधायात्तपवनो यदि क्रुद्धो योगी चलयति समस्तं त्रिभुवनं ॥ न च ब्रह्मा वि
 ष्णुर्न च हरिहरो नापि खमणिस्तदीयं सामर्थ्यं शमयितुमलं नापि गणपः ॥ आज्ञानाम भ्रूयुगमध्ये
दलयुग्मोपेतं पद्मं शारदचंद्रमयूखाभं ॥ हाकिन्युक्ता तत्रापि च देवी दलयुग्मे वर्णौ संत्या विंदुतौ सं
प

स्मरणीयो॥ध्यानयोगनिरतस्यजायतेपूर्वजन्मकृतकर्मणांस्मृतिः॥अत्रबिंदुनिलयेचदूरतोदर्शनश्रव-
णयोःसमर्थता॥इहसंनिहितस्वचित्तवृत्तिःप्रतिमायाःप्रतिजल्पनंकरोति॥गमनंचनरःपुरेपरेषांपु-
१० नरुत्थापनमं स्योम्नतस्य॥निरालंबामुं निर्विवदितामिहस्थानेवध्वास्थिरनिहितधीःसाधकवरः
॥सदाभ्यासात्पद्यत्यमरनिलयानंतरखिलामुहुश्रेणीविष्णोरपिपदमुडूनामधिपतिं॥ब्रह्माणं
सुरवृंदवंदितपदद्वंद्वंमुकुंदंतथात्र्यंबुंदेवनिकायनायकमपिप्रेताधिपंवारिपं॥अन्हांवन्हिमपिप्र
भुंचपवनंतार्क्ष्यंचयक्षेश्वरंगंधर्वानपिकिंनरानपिगुणैःसिद्धान्नसिद्धानपि॥यक्षान्राक्षसपुंग
वानपिमुनीन्दिव्यांश्चभव्याकृतीनंतःकांतिकलाकलापैलिता न्विद्याधरान्मानरः॥रंगोत्तुं
गत्तरंगसंततजलांसल्लोकिकल्लोलिनीर्योगीपश्यतिदाश्वरंचिरचिरंवापिहेमाचलंउत्तुंगपी
२ वरपयोधरभारनम्रकम्रांगमंगजमतंगजमंदपातं॥उल्लासिविल्लियुगलंचकितैणशावलोलेक्ष ७९

२ णंविसरमपास्तसांतथैव॥समुत्तुंगैःशृंगैःस्थगितगगनाभोगककु भोलसन्नानारत्नाकलितकटका
न्भूधरवरान्॥कुरंगैःसारंगैरपिचरमणीयांवनभुवंतथागुर्वीमुर्वीमहितविविधक्षेत्रसहितां॥तरं
गैरुत्तुंगैरहिमकरमातंगनिकरैःकरालानांभीरैरपिजलधरैर्भूधरवरैः॥तथापारावारान्मलसरितो
वारिस्फुरिताःसहंसालीपालीमपिचसरसांसारसजुषां॥चस्मरालंसचकोरमालं नडित्कराव्नस्वारि
नीलं॥कलापिकालंसधवानुकूलंप्रवासिकालंनवमेघमालं॥एतस्मिन्परमाद्भुतात्ययमहानं
देकंदरपरेस्थानेमानसमात्मनःस्थिरमतिःसंयोजयेन्मुद्रयायोगीतन्मयतामुपैतिज्ञानकैश्चेतोभि
रालंबयाथश्चाल्लैजमहासुखंलयवशादाविर्भवत्यां लीनेचतसितत्रविश्वनिलयेवन्हेरिवादौक
णाहश्यंतेचबरनंतरंचकितसद्रूपाःप्रदीपांकुराः॥बालस्येवदिवाकरस्यवहलोद्योतस्ततोद्योततेयद्वाभूग
गनांतरालविलसज्ज्योत्स्नासप महः॥नित्यानंदरतिश्रियःपतिरितिश्रीवासुदेवःपुमानात्मेत्यच्युतरत्य
दं

यो·चिं· चिंत्यमहिमा। योगीयतेयोगिभिः॥ स्थानेऽस्मिन्परमेश एव भगवान्व्यक्तोभवत्यव्ययः साक्षीराहुरिवांब
रांतरगतश्चंद्रार्कयोर्मंडले॥ विश्वस्यायतनंमहद्भगवतः स्थानंतदेतत्पं रंयत्रारोप्यसमीरणंसु
८० कृतिनःप्राणप्रयाणेनराः॥ दिव्यंतत्परमंपुराणपुरुषंवेदांतवेद्यंकविर्विश्वाद्यंप्रविशंतिसंततमहा
नंदैककंदंविभुं॥ सहस्रारपद्मंविसर्गादधस्तादधोवक्त्रमारक्तकिंजल्कपुंजं॥ कुरंगे हीनस्त्रिश्चं ण
त गस्तरं स्फुरद्रश्मिजालःसुधांशुःसमास्तेऽंतर्गतंब्रह्मरंध्रंसुसूक्ष्मंयदाधारभूतंसुषुम्णाख्य त
नाड्याः तदेतत्पदंदिव्यमत्यंतगुह्यंसुरैरप्यगम्यंसुगोप्यंप्रयत्नात्॥ एतत्कैलाशसंज्ञंपरमकुल
पदंविंदुरूपीस्वरूपीयत्रास्तेदेवदेवोभवभयतिमिरध्वंसहंसोमहेशः॥ भूतानामादिभूतोरसवि
सरसितासंततामृततरंगैः सौधाधारांविमुंचन्नभिमतफलदोयोगिनांयोगगम्यः॥ स्थानस्यास्यज्ञानमा ग
त्रेण पुंसांसंसारेस्मिन्संभवोनैवभूयः॥ भूतग्रामंसंततंतावत्यासयोगात्कर्तुंहर्तुंस्यात्रशक्तिः स राम:
मे. ८०

मग्र॥ स्थानेपरेहंसनिवासभूते कैलाशनाम्नीहनिविष्टचेताः॥ योगीगतव्याधिरधःकृताधिर्वाधि
श्चिरंजीवतिरम्यमुक्तः॥ स्थानेस्मिन्क्षयवृद्धिभावरहिता नित्योदिताधोमुखीबालादित्यनिभप्रभा
शशभृतःसास्तेकलाषोडशी॥ वालाग्रस्यविखंडितस्यशतधाभागेनचैकेनयासूक्ष्मत्वात्सदृशीनि
रंतरगलत्पीयूषधाराधरा। एतस्याःपरतःस्थिताभगवतीभूतादिदैवाधिपा निर्वाणाख्यकलार्द्ध
चंद्रकुटिलासाषोडशांतंगता वालाग्रस्यसहस्रधाविदलितस्यैकेनभागेनयासूक्ष्मत्वात्स
दृशीत्रिलोकजननीयाद्वादशार्कप्रभा॥ निर्वाणाख्यकलापदोपरिगतानिर्वाणशक्तिःपरा॥ कोट्यादि
त्यसमप्रभातिगहनावालाग्रभागस्यया॥ कोट्यंशेनसमासमस्तजननीनित्योदितानिर्मला॥ नित्यानं
दपरंपरांसुविगलद्धारानिरालंबना॥ एतस्याःपरतःपरात्परतरंनिर्वाणशक्तेःपदंशैवंशाश्वतमेयम मत्र
मलंनित्योदितंनिष्क्रियंतद्विष्णोःपदमित्युशंतिसुधियःकेचित्पदंब्रह्मणः केचिद्धंसपदंनिरंजनपदंकेचि

न्निरालंबनं॥आरोप्यारोप्यशक्तिं कमलजनिलयादात्मनासाकमेवस्थानेस्थानेषवसाने षवहितत्वदयश्चित
पीत्वाक्रमेणनीत्वानादावसानंस्वगमकुलमहापद्मसद्मांतरस्थांध्यायेद्वैतन्यरूपामंतफलसंप्राप्तयेश
क्तिमाद्यां॥साक्षाल्लाक्षारसाभंगगनगतमहापद्मसद्मस्थहंसासीनादिव्याम्नतौघंपुनरपिचविशं
न्मध्यदेशं कुलस्य।चक्रेचक्रेक्रमेणाम्नतरसविसरैस्तर्पयेद्देवतास्ताह्याविन्याद्याःसमस्ताःकमल
जपदगांतर्पयेत्कुंडलीतां॥अथषट्कर्माणि॥हठप्रदीपिकायां॥धौतिर्वस्तीतथानेतीत्राटकंनौलिकं
तथाकपालभातीचैतानिषट्कर्माणिप्रचक्षते॥कर्मषट्कमिदंगोप्यंघटशोधनकारकं॥विचित्रगुण
संधायिपूज्यतेयोगिपुंगवैः॥अथधौती॥चतुरंगुलविस्तारंसूक्ष्मंवस्त्रंशनैर्ग्रसेत्॥पुनःप्रत्याहरेदेत
दभ्यासाद्धौतिकर्मवित्॥कासश्वासप्लीहकुष्ठंकफरोगाश्चविंशतिः॥धौतीकर्मप्रभावेनप्रयांत्येवनसं
शयः॥अथवस्ती॥नाभिदघ्नेजलेपायुन्यस्तनालोत्कटासनः॥आधाराकुंचनंकुर्यात्क्षालनंवस्तिकर्म

कर्मवित्॥गुल्मोदरंचापिवातपित्तप्लीहकफोद्भवाः॥वस्तिकर्मप्रभावेनक्षीयंतेसकलामयाः॥धा
त्विंद्रयांतःकरणप्रसादंदध्याच्चकांतिंदहनप्रदीप्तिं॥अशेषदोषोपचयंनिहन्यादभ्यस्यमानंज
लवस्तिकर्म॥अथनेती॥सूत्रंवितस्तिसुस्निग्धंनासानालेप्रवेशयेत्॥मुखान्निर्गमयेत्साहिनेति
सिद्धैर्निगद्यते॥कपालशोधनीचैवदिव्यदृष्टिप्रदायिनी॥जत्रूर्ध्वजातरोगौघान्नेतिराशुनिहंति
वै॥अथत्राटकं॥निरीक्षेन्निश्चलदृशासूक्ष्मलक्ष्यंसमाहितः॥अश्रुसंपातपर्यंतमाचार्यैस्त्राट
कंमतं॥मोचनंनेत्ररोगाणांतंद्रादीनांकपाटकं॥यत्नतस्त्राटकंगोप्यंयथाहाटकपेटकं॥अथनौली
॥अमंदावर्तवेगेनतुंदंसव्यापसव्यतः॥नतांसोभ्रामयेदेषानौलीयोगैःप्रचक्षते॥मंदाग्निसं
दीपनपाचनादिसंदीपिकानंदकरीसदैव॥अशेषदोषामयशोषिणीचहठक्रियामौलिरियंचनौ
लिः॥अथकपालभाती॥भस्त्रावल्लोहकारस्यरेचपूरौससंभ्रमौ॥कपालभातीविख्या

यो॰चिं॰ नाकफदोषविशोषिणी॥ अथमुद्राः पवनयोगसंग्रहे॥ महामुद्रामहाबंधोमहावेधश्चखेचरी॥ शक्ति
८३ चालोमूलबंधुउड्डीयानंततःपरंजालंधराभिधोबंधोविपरीतकृतिस्तथेति॥ हठप्रदीपिकायां॥
सशैलवनधात्रीणांयथाधारोहिनायकः॥ सर्वेषांयोगतंत्राणांतथाधारोहिकुंडली॥ सुप्तागुरु
प्रसादेनबोधितासुखदाभवेत्॥ तथासर्वाणिपद्मानिभिद्यंतेग्रंथयोपिच॥ प्राणस्यशून्यप
दवीतथाराजपथायते॥ तथाचित्तंनिरालंबंतदाकालस्यवंचनं॥ तस्मात्सर्वप्रयत्नेनप्रबो
धयितुमीश्वरीं॥ ब्रह्मद्वारमुखेसुप्तांमुद्राभ्यासपरोभवेत्॥ महामुद्रामहाबंधोमहावेधश्च
बंधो खेचरी॥ उड्डीयानंमूलबंधोजालंधरोभिधः॥ करणीविपरीताख्यातथावैशक्तिचालनं॥ एत
द्धिमुद्रानवकंजरामरणवर्जितं॥ आदिनाथोदितंदिव्यमष्टैश्वर्यप्रदायकं॥ वल्लभंसर्वसिद्धीनां
दुर्लभंमरुतामपि॥ गोपनीयंप्रयत्नेनयथारत्नकरंडकं॥ कस्यचिन्नैववक्तव्यंकुलस्त्रीसुर ८३

तंयथा॥ अथमहामुद्रा॥ स्कंदपुराणे॥ शोधनंनाडिजालस्यचालनंचंद्रसूर्ययोः॥ रसानांशोष
णंसम्यक्महामुद्राभिधीयते॥ ईश्वरप्रोक्तंमहामुद्रांप्रवक्ष्यामितंत्रेस्मिन्ममदुर्लभां॥ यांप्रा
घ्रा: प्यसिद्धकाः सिद्धिंकपिलाद्याःपुरागताः॥ अपसव्येनसंपीड्यपादमूलेनसादरं॥ गुरूपदेश
तोयोनिंगुदमेढ्रांतरालगां॥ सव्यंप्रसारितंपादंधृत्वापाणियुगेनतु॥ नवद्वाराणिसंयम्य
चिबुकंहृदयोपरि॥ चित्तंचतुःपथेदत्वाप्रारभेद्वायुधारणं॥ महामुद्राभवेत्येषा स
र्वतंत्रेषुगोपिता॥ वामांगेनसमभ्यस्यदक्षांगेनाभ्यसेत्पुनः॥ प्राणायामंसमंकृत्वायोगीनियत
मानसः॥ मुद्रामेतांतुसंप्राप्यगुरुवक्त्रात्सुगोपितां॥ अनेनविधिनायोगीमंदभाग्योपि
सिद्ध्यति॥ सर्वासामेवनाडीनांचालनंबिंदुधारणं॥ जारणंतुकषायस्यपातकानांविनाशनं॥
कुंडलीतापनंवायोर्ब्रह्मरंध्रप्रवेशनं॥ सर्वरोगोपशमनंजठराग्निविवर्द्धनं॥ वपुषःकांति

यो·चिं· कमल्लाजराम्त्युविनाशनंवांछितार्थोवलंसौख्यमिंद्रियाणांचमार्ण॥एतान्युक्तानिसर्वाणिमा
२३ र्गानूढस्पयोगिनः॥मुद्राकामदुघात्वेषासाधकानांमयोदितांगुप्ताचारेणकर्त्तव्यानदेयायस्यक
स्यचित्॥इयंखलुमहामुद्रामहासिद्धैःप्रशस्यते॥महाक्लेशायनोदोषादीप्यंतेमरणादयःम
हामुद्राचतेनैववदंतिविविधानमादति॥हठप्रदीपिकायां॥यथादंडाहतःसर्पोदंडाकारःप्रजा
यते॥ऋज्वीभूतातथाशक्तिःकुंडलीसहजाभवेत्॥पादमूलेनवामेनयोनिसंपीड्यदक्षिणं॥
पादप्रसारितंधत्वाकराभ्यांपूरयेन्मुखं॥कंठवंधंसमारोप्यधारयेद्वायुमूर्द्धतः॥तयासोमरणाव
स्थांहरतेद्विपदाअयांमदिपथ्यमपथ्यंचारसाःसर्वेपिनीरसाः॥अपिभुक्तंविषंघोरंपीयूषमिवजी
र्यतिक्षयकुष्टगुदावर्त्तगुल्मप्लीहपुरोगमाः॥तस्यरोगाःक्षयंयांतिमहामुद्रांचयोभ्यसेत्॥अथ
महावंधःईश्वरप्रोक्ते॥योस्यांप्रसारितःपादोविन्यस्यतमुरूपरि॥गुदयोनीसमाकुंच्यनीत्वाचा २३

पानमूर्द्धगे॥योजयित्वासमानेनकृत्वाचास्याम धोमुखं॥वंधयेदूर्द्धगत्यर्थमपानप्राणयोःसुधीः
॥कथितोयंमहावंधःसिद्धिमार्गप्रदायकःनाडीगलदसचहमूर्द्धनिमतियोगिनः॥उभाभ्यांसा
धा धयेत्त्र्यं मेकैकंसुप्रयत्नतः॥मतमन्यंतुकेषांचित्कंठवंधंविवर्जयेत्॥राजदंतद्वयंतत्रजिह्वयां
स्तंभयेदितिभवेदभ्यासतोवायुःसुषुम्णामध्यसंगतः॥अनेनवपुषःकीर्तिर्दृढवंधोस्थिपंजरः॥सं
पूर्णहृदयोयोगीभवंत्येतानियोगिनः॥वंधेनानेनयोगींद्रःसाधयेत्सर्वमीप्सितं॥अथापानप्राणयो
रैक्यंकृत्वात्रिभुवनेपुवेहठप्रदीपिकायां॥पार्ष्णिवामस्यपादस्ययोनिस्थानेनियोजयेत्॥वामो
रूपरिसंस्थाप्यदक्षिणंचरणंतथा॥पूरयित्वामुखेवायुंहृदयेचिवुकंतथा॥निःपीड्ययोनि
माकुंच्यमनोमध्येनियोजयेत्॥रेचयेच्चशनैरेवमहावंधायमुच्यते॥अयंखलुमहावंधोमहासिद्धि
प्रदायकः॥कालपाशमहावंधविमोचनविचक्षणःअयंतुसर्वनाडीनामूर्द्धगमननिरोधकः॥त्रिवे

यो॰वि॰ णीसंगमंधत्नेकेदारंप्रापयेन्मनः अयमहावेधः॥रूपलावण्यसंपन्नायथास्त्रीपुरुषंविना॥ महा
मुद्रामहाबंधौ निःफलौवेधवर्जितौ॥ महाबंधेस्थितोयोगी कृत्वापूरकमेकधा॥ वायूनांगतिमावृत्य
८४ निभृतंकंठमुद्रया॥ समहस्तायुगोभूत्वास्फिजौसंताडयेछनैः॥पुटद्वयंसमाक्रम्यवायुःस्फुरतिमध्य
गः॥सोमसूर्याग्निसंधानंजायतेचामृतायते॥मृतावस्थासमुत्पन्नंततोमृत्युभयंकुतः॥महावेधोय
मभ्यासान्महासिद्धिप्रदायकः॥वली पलित वेपघ्नः सेव्यतेसाधकोत्तमैः॥ एतत्त्रयंमहागुह्यंजराम्
त्युविनाशनं॥वन्हिवृद्धिकरंचैव अणिमादिगुणप्रदं॥अष्टधाक्रियतेचैवयामेयामेदिनेदिने॥
पुराप्सेसंभारसंधायिपापोघभिदुरंसदा॥सम्यकुसिक्षावतामेवंस्वल्पंप्रथमंसाधनं॥इ स्वरप्रोक्ते॥
महाबंधस्थितोयोगीकुक्षिमापूर्यवायुना॥स्फिजौसंताडयेद्विद्वान्वेधोयंकीर्तितोमया॥वेधनानेन
संविद्धंवायुनायोगिपुंगवः॥ग्रंथीन्सुषुम्णामार्गेणब्रह्मरंध्रंभिनत्यसो॥यःकरोतिसदाभ्यासंमहावे ८४

धंसुगोपितं॥वायुसिद्धिर्भवेतस्यजरामृत्युविनाशिनः॥चक्रमध्येस्थितादेवाःकंपतेवायुताडना
त्॥कुंडल्यपिमहामाया कैलाशेसेविलीयते॥तस्माद्योगीप्रयत्नेनकरोतित्रितयंक्रमात्॥
एतत्त्रयंप्रयत्नेनचतुर्वारंकरोतियः॥षण्मासाभ्यंतरेमृत्युंजयत्येवनसंशयः॥एतत्त्रयस्य
माहात्म्यंसिद्धोजानातिनेतरः॥यज्ज्ञात्वासिद्धकाःसर्वेसिद्धास्थांलेभिरे चिरात्तत्[illegible]गोप
नीयंप्रयत्नेनसाधनंसिद्धिमिछता॥अन्यथाचनसिद्धिःस्यान्मुद्राणामेषनिर्णय इतिम्त्र
थखेचरी॥योगवीजे॥वितस्तिप्रमितंदीर्घंविस्तारंचतुरंगुलं॥मृदुलंधवलंप्रोक्तंचेष्टनाधा
रलक्षणं॥ हठप्रदीपिकायां॥छेदनचालनदोहैर्जिह्वांसंवर्धयेत्तावत्॥यावदियं भ्रूमध्यंस्
पृशतितदाखेचरीसिद्धिः॥कलांपराङ्मुखीकृत्वात्रिपथेपरिवर्तयेत्॥साभवेत्खेचरीमुद्रा
व्योमचक्रंतदुच्यते॥रसनामूर्ध्वगांकृत्वाक्षणार्धंयदितिष्ठति॥विषयैर्मुच्यतेयोगीव्याधि

ति

यो॰ चिं॰ मृत्युजरादिभिः खेचर्यामुद्रितं येन चित्तं विकोर्द्धतः न तस्य क्षरते विंदुः कामिन्यालिंगितस्य च ॥ च
८५ लितो पि यदा विंदुः संप्राप्तश्च हुताशनं ॥ व्रजत्यूर्द्धं हितश्चक्त्या निरुद्धो योनिमुद्रया ॥ संपानन विधौ
विंदुः पांडुरो लोहितस्तथा ॥ पांडुरं शुक्रमास्यातं लोहिताख्यं महारजः ॥ सिंदूरसंनिभं वीजं रविस्था
ने स्थितं रजः शशिस्थाने भवेद्विंदुस्तयोरैक्यं सुदुर्लभं ॥ विंदुः शि[illegible]वो रजः शक्ति विंदुरिंदू रजो रवि
याति विरोः स हैकत्वं भवेद्दिव्यं वपुस्तदा शुक्रं चंद्रेण संयुक्तं रजः सूर्येण संवृतं ॥ तयोः समरसैक
त्वं यो जानाति स योगवित् ॥ चिनाय [illegible]जंतूनां शुक्रं शुक्रायतं च जीवितं ॥ तस्माद्विंदुं च शुक्रं च र
क्षणीयं प्रयत्नतः तत्नातालुद्विय तिशिरे मेरुमूले तद्द्स्तिनत्वं चैतन्य वद्दति सुधीः संमुखे निम्न
ते गानां ॥ चंद्रात्सारः स्रवति सि नितेन मृत्युर्नराणां तद्बध्नीयात्स्वकरणमदानान्यथा कायसिद्धिः ॥ ई
धनाने ॥ यथा वन्हिस्तेलनर्तीव दीपकः ॥ निसंसोमकलापूर्णं देही देहं न मुंचति ॥ रसनावेशये दूर्द्ध ८५

पिबेन छ्रावितं जलं ॥ गोमांसं भक्षयेन्नित्यं संपिबेद मरवारुणीं कुलीनं तमहं मन्ये नेतरा न्कुलघातका
न् ॥ गोशब्देनोदिता जिह्वा तत्प्रवेशो हि तालुनि ॥ गोमांसभक्षणं तत्तु महापातकनाशनं ॥ जिह्वाप्र
वेशसंभूतवन्हिनोत्पादितः खलु चंद्रात्स्रवति यः सारः सा स्यादमरवारुणी ॥ एकं सृष्टिमयं वीजमे
का मुद्रा च खेचरी ॥ एको देवो निरालंबः एकावस्था मनोन्मनी ॥ नासनं सिद्धसदृशं न कुंभः के
वलोपमः ॥ न खेचरीसमा मुद्रा न नादसदृशो लयः ॥ मूर्द्धः षोडशपत्रपद्मगलितं प्राणादवाप्तं हठा
दूर्द्ध स्यो रसनां निपत्य विवरे शक्तिं परां चिंत्यतयन् ॥ तत्कल्लोलकलानलं च विमलं जिह्वाकु
लं यः पिबेन्निर्दोषः स मृणालकोमलतनुर्योगी चिरंजीव भिंचुवंती यदिलंवि काग्रमनिशं र
जिह्वारसस्पंदिनी सक्षारा कटुकाम्लदुग्धसदृशं मध्वाज्यतुल्यं सदा व्याधीनां हरणं जरांतक
करणं शास्त्रागमोच्चारणं तस्य स्यादिह सिद्धिरष्टगुणिता सिद्धांगनाकर्षणं ॥ स्कंदपुराणे ॥ कपा

यो॰वी॰ लकुहरे जिह्वाप्रविष्टा विपरीतगा। भ्रुवोरंतर्गता दृष्टिर्मुद्रा भवति खेचरी॥ चित्तं चरति खे यस्मा
८६ ज्जिह्वा चरति खे गता॥ तेनैषा खेचरीनाममुद्रा सिद्धैर्निषेविता॥ यावद्बद्धा नभोमुद्रा॥
तावद्बिंदुर्न गच्छति॥ यावद्बिंदुः स्थितो देहे तावत्कालभयं कुतः॥ पीयते न स रोगेण न च लि
प्यते कर्मणा॥ बाध्यते न स कालेन यो मुद्रां वेत्ति खेचरीं॥ रसनां तालुविवरे निधायोर्द्ध्व
मुखामृतं॥ पिबेन्निर्ज्जरतां गच्छेत्परा मासान्नात्र संशयः॥ उर्द्ध्वजिह्वः स्थिरो भूत्वा सोमपानं
करोति यः॥ मासार्द्धेन न संदेहो मृत्युं जयति योगवित्॥ संपीड्य रसनाग्रेण राजदंतबिलं मह
त्॥ ध्यात्वामृतमयीं देवीं षण्मासेन कविर्भवेत्॥ अमृतापूर्णदेहस्य योगिनो द्वित्रिवत्सरा
त्। ऊर्द्ध्वं प्रवर्त्तते रेतो ह्यणिमादिगुणोदयं॥ नित्यं सोमकलापूर्णं शरीरं यस्य योगिनः॥ तक्ष
केणापि दष्टस्य विषं तं न च सर्पतीति॥ दत्तात्रेयः अंतःकपालविवरे जिह्वां व्यावृत्य चार्पयेत् ८६

भ्रूमध्ये दृष्टिरप्येषा मुद्रा भवति खेचरी। न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा न च मूर्छा भवेत्तस्य
यो मुद्रां वेत्ति खेचरीमिति॥ ईश्वर उवाच॥ लंबिकोर्द्ध्वस्थिते गर्ते रसनां विपरीतगां॥ संयोजयेत्प्र
यत्नेन सुधाकूपे विचक्षणः॥ मुद्रैषा खेचरी प्रोक्ता भक्तानामनुरोधतः॥ निरंतरं कृताभ्यासः पी
यूषं प्रत्यहं पिबेत्। तेन विग्रहसिद्धिः स्यान्मृत्युमातंगकेसरी॥ मुद्रैषा खेचरी यस्य सुस्थिरा स्यात् तं
दृष्टिनाशतः ब्रह्मगतेनापि क्षणार्द्धमन्यत्ते हि से ति॥ अथ मूलबंधः॥ पादमूलेन संयोज्य गुदमा ज्य
न गे सुयंत्रितं॥ बलादपानमाकृष्य क्रमादूर्द्ध्वं समभ्यसेत्॥ कथितोयं मूलबंधो जरामरणनाशनः॥
र अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः॥ बंधेनानेन सुतरां योनिमुद्रा प्रसिद्ध्यति॥ सिद्धायां यो
निमुद्रायां किं न सिद्ध्यति भूतले। बंधस्यास्य प्रसादेन गगने विजितानिलः॥ पद्मासनस्थितो यो
गी भुवमुत्सृत्य वर्त्तते॥ सुगुप्ते निर्जने देशे बंधमेनं समभ्यसेत्॥ संसारसागरं तर्तुं यदीच्छेद्यो

गिपुंगवइति॥हठप्रदीपिकायां॥पार्ष्णिभागेनसंपीड्ययोनिमाकुंचयेद्गुदं॥अपानमूर्ध्वमाकृष्यमूल
वंधोयमुच्यते॥अधोगतमपानंचतदूर्ध्वकुरुतेहठात्॥आकुंचनेनतंप्राहुर्मूलवंधंतुयोगिनः॥
योगवीजे॥गुदंपार्ष्ण्यातुसंपीड्यवायुमाकुंचयेद्बलात्॥वारंवारंतथाचोर्ध्वंसमायातिसमीरणः॥
प्राणापानौनादविंदूमूलवंधेनचैकतां॥गत्वायोगस्यसंसिद्धिंगच्छतेनात्रसंशयः॥अपानेचो
प ध्वंगतेप्राप्तेसंप्राप्तेवन्हिमंडले॥तथानलशिखादीर्घावर्द्धतेवायुनाहता॥ततोयातौवन्ह्यपानौप्रा तौ
णमुक्तस्वरूपकौ॥तेनात्यंतप्रदीप्तस्तुज्वलनोदेहजस्तथा॥तेनकुंडलिनीसुप्तासंतप्तासंप्रबो
ध्यते॥दंडाहतभुजंगीवनिश्वस्यतंऋजुतांव्रजेत्॥विलंप्रविष्टेवततोब्रह्मनाड्यंतरंव्रजेत्॥त
स्मान्नित्यंमूलवंधःकर्तव्योयोगिपुंगवैः॥अथोड्डियानवंधः॥वद्धोयेनसुषुम्णायांप्राणस्तू
न् ड्डीयतेयतः॥तस्मादुड्डीयानाख्यायोगिभिःसमुदाहृतः॥उड्डीनंकुरुतेयस्मादविश्रांतंमहा

खगः॥उड्डीयानंतदेवस्यात्मूलवंधोभिधीयते॥उदरेपश्चिमंतानंनाभेरूर्ध्वंसमाचरेत्॥उ
ड्डियानोह्यसौवंधोमृत्युमातंगकेसरी॥उड्डीयानंतुसहजंगुरुणाकथितंयथा॥अभ्यसे
त्सततंयस्तुवृद्धोपितरुणायते॥नाभेरूर्ध्वमधोवापितानंकुर्यात्प्रयत्नतः॥षण्मासमभ्यसे
न्मृत्युंजयत्येवनसंशयः॥हठप्रदीपिकायां॥सतिवज्रासनेपादौकराभ्यांधारयेद्दृढं॥गुल्फ
देशसमीपेचतुउदरंतत्रपीडयेत्॥पश्चिमंताणमुदरेकारयेच्चिवुकंहृदि॥शनैःशनैर्यथाप्रा
व णस्तंदशुद्धिंनिगच्छति॥सर्वेषामेवंधानामुत्तमोह्युड्डियानकः॥उड्डियानेदृढेवद्धमूलः
स्वाभाविकोभवेत्इति॥ईश्वरप्रोक्तेनाभेनूर्ध्वमधश्चापितानंनिर्भरमभ्यसेत्॥उड्डियानो
वंधएषकंठदुःखौघनाशनः॥नित्यंयःकुरुतेयोगीचतुर्वारंदिनेदिने।तेननाभेर्विशुद्धिः
स्याद्येनसिद्धोभवेन्मरुत्॥षण्मासमभ्यसन्योगीमृत्युंजयतितत्त्ववित्॥तस्योदराग्निर्ज्वल

यो॰चिं॰ तिरसश्च सिद्धिश्च जायते॥ अनेन सुतरां सिद्धिर्विग्रहस्य प्रजापते॥ रोगाणां संक्षयश्चापि योगिनो
८८ भवति ध्रुवं॥ गुरोर्लब्ध्वा प्रयत्नेन साधयेत्तु विचक्षणः॥ निर्जने सुस्थिते देशे बंधं परमदुर्लभ
मिति॥ अथ जालंधरः॥ बध्वा गलशिराजालं हृदये चिबुकं न्यसेत्॥ बंधो जालंधरः प्रोक्तो देवाना
मपि दुर्लभः॥ नाभिस्थवह्निर्जंतूनां सहस्रकमलच्युतं॥ पिबेत्पीयूषं रसवत्तदर्थं बंधयेदिमं॥
बंधेनानेन पीयूषं स्वयं पिबति बुद्धिमान्॥ अमरत्वं च संप्राप्य मोदते भुवनत्रये॥ जालंधरो बं
धरूपः सिद्धानां सिद्धिदायकः॥ अभ्यासः क्रियते नित्यं योगिनां सिद्धिमिच्छता॥ इति योगबी
२ जे॥ कंठमाकुंच्य हृदये स्थापयेद्दृढमिच्छया॥ बंधो जालंधराख्योयममृताव्ययकारक इति॥ हठ
प्रदीपिकायां॥ बध्नातीह शिराजालमधोगामि नभोजलं॥ ततो जालंधरः ख्यातः कंठदुःखौघना
शनः॥ जालंधरे कृते बंधे कंठसंकोचलक्षणे॥ न पीयूषं पतत्यग्नौ न च वायुः कुप्यति॥ मध्यचक्र प्र
८८

मिदं ज्ञेयं षोडशाधारबंधनं॥ बंधत्रयमिदं श्रेष्ठं महासिद्धनिषेवितं॥ सर्वेषां हठतंत्राणां सा
धनं योगिनो विदुरिति॥ अथ विपरीतकरणी॥ हठयोगे नाभिदेशस्थितो नित्यं भास्करो दहना
त्मकः॥ अमृतात्मा स्थितो नित्यं तालुमध्ये च चंद्रमाः॥ वर्षत्यधोमुखश्चंद्रो ग्रसत्यूर्ध्वमुखो रविः॥ क
रणं तच्च कर्तव्यं येन सा प्राप्यते सुधा॥ विशुद्धे परमे चक्रे बुद्धा सोमकलामृतं॥ तन्मार्गेण क्र
तं याति वंचयित्वा मुखं रवेः॥ भ्रमतं कंदरे कृत्वा नासांते शिखरे क्रमात्॥ स्वयमुज्ज्वलितं याति
वंचयित्वा मुखं रवेः॥ वहत्सोमकलाजलं च विमलं कंठस्थलादूर्ध्वतो नासांते शिखरे प्रयाति
गगनद्वारं ततः सर्वतः॥ ऊर्ध्वस्था भुवि से नित्यं निरंतरामृतानपारः पिबेदेवं यत्नतु नु जितेंद्रियश्च
योनवास्ति तस्य क्षयः॥ हठप्रदीपिकायां॥ यत्किंचित्स्रवते चंद्रादमृतं दिव्यरूपि च॥ तत्सर्वं ग्रस
ते सूर्यस्तेन पिंडो विनाशि च॥ तत्रास्ति करणं दिव्यं सूर्यस्य मुखवंचनं॥ गुरूपदेशतो ज्ञेयं न तु

यो.चिं. शास्त्रार्थकोटिभिः॥ ऊर्द्ध्वनाभिरधस्तालुरूर्द्ध्वं भानुरधः शशी॥ करणी विपरीताख्या सर्वव्याधिविनाशि
८८ नी॥ एतात्रेयः ऊर्द्ध्वभानुरधश्चंद्रस्तु यथा स्यात्तथा कर्त्तव्यं अधःशिर ऊर्द्ध्वपादः क्षणं स्यात्प्रथमे दिने॥
क्षणाच्च किंचिदधिकमभ्यसेच्च दिने दिने॥ वलिश्च पलितं चैव षण्मासार्द्धेन दृश्यते॥ याममात्रं तु यो
नित्यमभ्यसेत्स तु कालजित्॥ नित्यमभ्यासयुक्तस्य जठराग्निविवर्द्धनं॥ आहारो बहुलस्तस्य ६
संपाद्यः साधकेन ध्रुवं॥ अल्पाहारो यदि भवेदग्निर्दाहं करोति वै॥ अथ शक्तिचालनं ईश्वरप्रोक्ते
॥ आधारकमले सुप्तां चालयेत्कुंडलीं दृढां॥ अपानवायुना कृष्य बलात्तां कुंचयेद् बुद्धिमान्॥ श
क्तिचालनमेवं हि प्रत्यहं यः समभ्यसेत् अग्निवृद्धिर्भवेत्तस्य रोगाणां च विनाशनं॥ विहाय निद्रां
भुजगी पयमूर्द्ध्वं भवेत्खलु॥ तस्मादभ्यसनं कार्यं योगिना सिद्धिमिच्छता॥ यः करोति सदाभ्यासं श
क्तिचालनमुत्तमं॥ येन विग्रहसिद्धिः स्यादणिमादिगुणप्रदा॥ गुरूपदेशविधिना तस्य मृत्युभ ८९

यं कुतः॥ मुहूर्त्तद्वयपर्यंतं विधिना शक्तिचालनं वज्रासनगतो नित्यं मासार्द्धं तु समभ्यसेत्॥ वा
२ युना ज्वलितो वह्निः कुंडलीं दहते नि शं॥ संतप्ता साग्निना जीव शक्तिस्त्रैलोक्यमोहिनी विश
५ ते वज्रतुंडे न सुषुम्णा वदनांतरे॥ वायुना वह्निना सार्द्धं ब्रह्मग्रंथिं विभिद्य सा॥ विष्णुग्रंथिं ततो भि ९
त्वा रुद्रग्रंथौ च तिष्ठति॥ ततस्तु कुंभकैर्गाढं पूरयित्वा पुनः पुनः भिद्यते ग्रंथयो वंशे तप्त लोहश
लाकया॥ तथैव पृष्ठवंशस्य ग्रंथिभेदस्तु वायुना पिपीलिका यथा लग्ना वंशस्तत्र प्रवर्त्तते॥
सुषुम्णायां तथाभ्यासात्सततं वायुना भवेत्॥ रुद्रग्रंथिं ततो भित्वा ततो याति शिवात्मकमिति
हठयोग॥ उद्घाटयेत्कपाटं तु यथा कुंचिकया हठात्॥ कुंडलिन्या तथा योगी मोक्षद्वारं विभेदयेत्
॥ येन द्वारेण गंतव्यं ब्रह्मस्थानं निरामयं॥ मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी॥ कंदोर्द्ध्वं कुंड
लीशक्तिर्बुद्धमोक्षाय योगिनां॥ बंधनाय मूढानां यस्तां वेत्ति स योगवित्॥ अंभोधि शैलदीपाना

यो· चिं·

माधारःशेषकुंडली॥अशेषयोगतंत्राणामाधारःकुंडलीतथा॥कुंडलांगीकुंडलिनीभुजगीशक्ति

ता रीश्वरी॥कुटि[illegible]रुंधतीदेवीशब्दाःपर्यायवाचकाः॥कुंटिलीकुटिलाकारासर्पवत्सरिकीर्तिता॥

९० ॥साशक्तिश्चालितायेनसमुक्तोनात्रसंशयः॥गंगायमुनयोर्मध्येबालरंडांतपस्विनी॥बलात्का

रेणगृह्णीयात्तद्विष्णोःपरमंपदं॥पुच्छंप्रगृह्यभुजंगीसुप्तामुद्बोधयेदभि॥निद्रांविहायसाशक्ती

ऊर्द्धमुत्तिष्ठतेहठात्॥परिस्थितावैफणावतीसाप्रातश्चसायंप्रहरार्द्धमात्रं॥प्रपूर्य्यसूर्य्यात्प

रिधानमुक्त्याप्रगृह्यनित्यंविचालितासा॥वज्रासनस्थितोयोगीचालयित्वातुकुंडली॥सूर्य्या ता

दनंतरंभस्त्राकुंडलीमाशुबोधयेत्॥भानोराकुंचनंकुर्यात्कुंडलींचालयेत्ततः॥मृत्युवक्त्रगतस्या

पितस्यमृत्युभयंकुतः॥नासादक्षिणमार्गवाहिपवनात्प्राणोतिदीर्घीकृतश्चंद्रांभःपरिपूरि

तामृततनुःप्राग्घंटिकायास्ततः॥भिंदन्कालविशालवन्हिवशगान्भ्रूरंध्रनाडीगणान्संकीर्यकु ९०

रुतेपुनर्नवतरंजीर्णद्रुमस्कंधवत्॥कुंडलीचालयित्वातुकुर्याद्भस्त्रांविशेषतः॥एवमभ्यासतो

नित्यंयमिनःशंकतेयमः॥तदाभ्यसेत्सूर्य्यभेदमुज्जायीचापिशीतली॥एवमभ्यासयुक्तस्य

यमस्तत्रयमिनःकुतः॥मुहूर्त्तद्वयपर्य्यंतंनिर्भयंचालनाद्धिवै॥ब्रह्मचर्यरतस्यैवनित्यंहितमि

ताशिनः॥मंडलाद्दृश्यतेसिद्धिःकुंडल्याभ्यासयोगिनः॥द्विसप्ततिसहस्राणांनाडीनांमलशो

धनं॥कुतःप्रक्षालनोपायःकुंडल्याभ्यासतोविना॥अत्रशक्तिचालनेयमासनमेवद्रष्टव्यंन

वज्रासनमनुभवविरोधात्तथाचग्रंथांतरे॥कृत्वासंपुटितौकरौदृढतरंबद्ध्वाचपद्मासनंगाढंव

क्षसिसंनिधायचिबुकंध्यानंचतच्चेतसि॥वारंवारमपानमूर्द्ध्वमनिलंप्रोत्सारयेत्पूरितंप्राणंमुंच

तिबोधमेतिनिपतंशक्तिःप्रबोधोदयात्॥इतिमुद्रानवप्रोक्ताआदिनाथेनशंभुना॥एकैकाता

सुयमिनांमहासिद्धिप्रदापि.नी॥दत्तात्रेयः॥अभ्यासभेदतोभेदःफलानुसममेवहि॥अभ्या

सक्रमश्चोक्तः पवनयोगसंग्रहे॥ महामुद्रां समभ्यस्य महाबंधं ततः परं॥ महावेधश्च नियतं प्रकुर्या
च्छक्तिचालनं॥ आसनं सुदृढं बध्वा मूलबंधं विधाय च॥ उड्डीयानं तथा बंधं ततो जालंधराभि
धं॥ अभ्यासेदिति संबंधः हठप्रदीपिकायां॥ मूलस्थानं समाकृष्य उड्डियानं तु कारयेत्॥ इडां च
पिंगलां बध्वा वाहयेत्पश्चिमे पथि॥ अनेनैव विधानेन सेवयेसबनालयं॥ ततो न जायते मृत्युर्ज
रारोगादिकं तथेति॥ योगबीजे॥ चतुर्णामपि भेदानां कुंभके समुपस्थिते॥ बंधत्रयमिदं कार्यमेव
क्ष्यमाणं मया स्फुटं॥ पूरकांते तु कर्तव्यो बंधो जालंधराभिधः॥ कुंभकांते रेचकादौ कर्तव्यस्तूड्डिया
नकः॥ अधस्तात्कुंचनेनाशु कंठसंकोचनेन च॥ मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः॥
अपानमूर्ध्वमुत्थाप्य प्राणं कंठादधो नयन्॥ योगी जराविमुक्तः सन्वयसा षोडशो भवेत्॥ उड्डी
यानस्य सहजिकत्वात् कुंभकदशायां कर्तव्यः॥ अत्र केचित्प्यघपिकपलादिसिद्धानामेवम ८१

हामुद्रादयः संमता न याज्ञवल्क्यादिमुनीनां तथापि साधारण्येन बोद्धव्या इत्याहुः तत्तु न
हृद्यार्थविबोधविधुरत्वात्॥ तथाहि॥ नादोत्पत्तिप्रकरणे॥ अपानमूर्ध्वमाकृष्य प्रणवेन
समाहितः इत्यत्र मूलबंधः॥ कंठमतरोबोक्तः तदुक्ताच तत्संबंधिनावुड्डियानजालंधरावपि
प्राप्तौ॥ एकसमयावच्छेदेन त्रयाणामनुष्ठानस्य पूर्वं दर्शितत्वात्॥ किंच जिह्वायां वायुमानीर
य जिह्वामूले निरोधयेत्॥ यः पिबेदमृतं विद्वान्सकलं भद्रमश्नुते इत्यत्र खेचरीं विनानुपप
त्तेः स्पष्टत्वात्॥ तस्मात्संति याज्ञवल्क्यादीनामपि मुद्रा अभिप्रेताः॥ प्रतिपादनं तु ग्रंथांत
रे प्रसिद्धत्वाद्विशेषेण न कृतमस्माभिरित्यवधेयं॥ इदानीं पूर्वोक्तबाह्याभ्यंतरसाधनसंपन्नस्या
धारमुद्रा च मुद्राचक्रादिज्ञानवतो मुमुक्षोश्चित्तशुद्धिद्वारा मोक्षसाधनीभूततत्त्वज्ञानोपयोगी
नि योगांगानि निरूप्यंते॥ तथा च पातंजले॥ योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवे

कख्यातेरिति॥ वक्ष्यमाणानांयोगांगानामनुष्ठानादाविवेकख्यातेरशुद्धिक्षये चित्तसत्वस्यक्ला
शावरणक्लेशाख्यायाअशुद्धेर्नाशेसतियाभवतिज्ञानदीप्तिः॥ सात्विकःपरिणामोविवेकख्यातिप उ

र्यंतः॥ सतस्याविवेकख्यातेर्हेतुरित्यर्थः॥ योगांगोद्देशापरंचसूत्रं॥ यमनियमासनप्राणायामप्र
त्याहारधारणाध्यानसमाधयोष्टावंगानिइति॥ याज्ञवल्क्यः वक्ष्याम्यंगानितसम्यक्यथापूर्वं
मयाश्रुतं॥ समाहितमनागार्गिऋषिभिःसहतंशृणु॥ यमश्चनियमश्चैवआसनंचतथैवच॥ प्रा
णायामस्तथागार्गिप्रत्याहारश्चधारणा॥ ध्यानंसमाधिरनानियोगांगानि वरानने॥ यमश्च
नियमश्चैवदशधासंप्रकीर्तितः॥ आसनान्युत्तमान्यष्टौत्रयंतेषूत्तमोत्तमं॥ प्राणायामस्त्रि
धा धाप्रोक्तःप्रत्याहारश्चपंचधा॥ रणापंचधाप्रोक्ताध्यानंपीठाप्रकीर्तितं॥ त्रयंतेषूत्तमंप्रोक्तंस
माधिस्त्वेकरूपतः॥ वहुधाकेचिदिच्छंतिविस्तरेणपृथक्शृणु॥ अहिंसासत्यमस्तेयंब्रह्मचर्य्यं

दयार्जवं॥ क्षमाधृतिर्मिताहारःशौचंचेतियमादश॥ कर्मणामनसा वाचासर्वभूतेषुसर्व
दा॥ अक्लेशजननंप्रोक्तात्त्वहिंसासैवयोगिभिः॥ सत्यंभूतहितंप्रोक्तंयथार्थाभिभाषणं॥ कर्मणा म
मनसावाचापरद्रव्येषुनिःस्पृहा॥ अस्तेयमितितत्प्रोक्तमृषिभिस्तत्वदर्शिभिः॥ कर्मणामन
सावाचासर्वावस्थासुसर्वदा॥ सर्वत्रमैथुनत्यागोब्रह्मचर्यंप्रचक्षते॥ ब्रह्मचर्याश्रमाणांहिय
तीनांनैष्ठिकस्यच॥ ब्रह्मचर्यमिदंप्रोक्तंतथैवारण्यवासिनां॥ ऋतौ कृतौस्वदारेषुसंगतिर्याविधानतः॥ ब्रह्म चर्यंतुसैवोक्तागृहस्थाश्रमवासिनां॥ राज्ञश्चैवगृहस्थस्यब्रह्मचर्यंप्रकीर्ति
तं॥ शुश्रूषांचगुरोर्नित्यंब्रह्मचर्यमुदाहृतं॥ दयाचसर्वभूतेषुसर्वत्रानुग्रहःस्मृतः॥ विदितेपुत
दन्येषुमनोवाक्कायकर्मभिः॥ प्रवृत्तौवानिवृत्तौवाएकरूपत्वमार्जवं॥ प्रियाप्रियेषुसर्वेषुसमत्वंय
च्छरीरिणां॥ क्षमासैवतिविद्वद्भिर्गदितावेदवादिभिः॥ अर्थहानेभवेद्बंधूनांवियोगेष्वपिसंपदि॥

यो॰चिं॰ ॥तयोः प्राप्नोच सर्वत्र चित्तस्य स्थापनं धृतिः॥ आश्रमास्तामुने प्रोक्ताः षोडशारण्यवासिनां॥ द्वा

त्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणां॥ एषामयं मिताहारो ह्येषामल्पभोजनं॥ शौचं च द्विविधं प्रो

८३ क्तं बाह्यमाभ्यंतरं तथा॥ मृज्जलाभ्यां स्मृतं बाह्यं मनःशुद्धिस्तथांतरं॥ मनःशुद्धिश्च विज्ञेया धर्मेणा

अ ध्यात्मविद्यया॥ विद्याधर्मश्च पित्राचार्येण चानघ॥ तपः संतोष आस्तिक्यं दानमीश्वरपूजनं॥

श्री ॥सिद्धांतश्रवणं चैव ह्रीर्मतिश्च जपो व्रतं॥ एते तु नियमाः प्रोक्तास्तांश्च सर्वान्पृथक् शृणु॥ विधि

र नोक्तेन मार्गेण कृच्छ्रचांद्रायणादिभिः॥ शरीरशोषणं चैव प्राहुस्तापसास्तपः॥ इदं तु योगाभ्यासान्योगे प्रो

क्तव्यं॥ अभ्यासकाले कायक्लेशोपवासादीनां निषेधात्॥ भगवद्गीतोक्तमौनादिलक्षणं युज्यते

र्जे ॥तथा हि देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं इत्यादि॥ याज्ञवल्क्यः॥ यदृच्छालाभतो नित्यमलं पुंसो भवे

मति दिति या मतिः प्राहुः संतोषं सुखलक्षणं॥ धर्माधर्मेषु विश्वासो यस्तदास्तिक्यमुच्यते॥ न्याया ८३

उनमे४

र्जितं धनं चान्नमन्यद्वा यत्प्रदीयते॥ अर्थिभ्यः श्रद्धया युक्तं दानमेतदुदाहृतं॥ यत्तमसं ब्रह्म तद्ब्रह्म

स्वभावेन विष्णुं वा रुद्रमेव वा॥ यथाशक्त्यर्चनं भक्त्या ह्येतदीश्वरपूजनं॥ रागाद्येतं तु हृदयं वागदुष्टा

नृतादिना॥ हिंसया रहितः कायः एतदीश्वरपूजनं॥ सिद्धांतश्रवणं प्रोक्तं वेदांतश्रवणं बुधैः॥ द्विज

ि वत्क्षत्रियस्यापि सिद्धांतश्रवणं बुधैः॥ विशां च केचिदिच्छंति शीलं कनवृतां सतां॥ शूद्राणां च स्त्रि

यां चैव स्वधर्मस्य तपस्विनां॥ सिद्धांतश्रवणं प्रोक्तं वेदांतश्रवणं बुधैः वेदलौकिकमार्गेषु कु

त्सितं कर्म यद्भवेत्॥ तस्मिन्भवति या लज्जा ह्रीः सैवेति कीर्तिता॥ विहितेषु सर्वेषु श्रद्धया या सा ⁊

मतिर्भवेत्॥ गुरुणा चोपदिष्टोपि वेदबाह्यविवर्जितः॥ विधिनोक्तेन मार्गेण मंत्राभ्यासो जपः स्मृतः॥

अधीत्य वेदसूत्रं वा पुराणं सेतिहासकं॥ वेदेष्वध्ययनं तत्र सदाभ्यासो जपः स्मृतः॥ व्यक्तिविपर्ययं तत्रो

ब्रह्म या विशेषमाह॥ अस्तेयं [illegible]चर्यं च त्यागो लोभस्य एव च॥ व्रतानि पंच भिक्षूणामहिंसा परमाणि च॥

अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं॥ नित्यंस्वाध्याय इत्येते नियमाः पंच कीर्तिता इति॥ पातंजले
पि अहिंसासत्यमस्तेयं ब्रह्मचर्यापरिग्रहा यमाः॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानान्यनि
यमा इति॥ गरुडपुराणे तु॥ आनृशंस्यं मनोलौल्यं वैराग्यं चार्जवं परं॥ अचापल्यं धृतिः सत्यं ज्ञा
नं चैव यमं विदुः॥ आनृशंस्यं घातकत्वाभावः॥ शौचमाहारनियमो निर्ममत्वमसंगता॥ शमः क्षमा
दमस्तुष्टिरित्यष्टौ नियमाः स्मृताः अथासनं तत्र पतंजलिः स्थिरसुखमासनं॥ आस्यतेनेनेत्यास
नं पद्मादि तद्यदा निःकंपं सुखमनुद्वेजनीयं च भवति तदा तद्योगांगतां भजते तत्स्थानस्यैव सुखाप
त्यर्थं सूत्रं॥ प्रयत्नशैथिल्यासमापत्तिभ्यामिति तत्रानंतेति भावप्रत्ययांत पाठ इति भोजदेवः॥ प्रय
त्नशैथिल्येनानंतसमापत्त्या च स्थिरं सुखं च भवतीति संबंधः॥ यदासनं बध्नाति तदा प्रयत्नशैथिल्ये

प्यत्नेन शरीरं निःकंपं तद्यदा वाकाशगतानंत्ये चेतसः समापत्तिः क्रियते अवधानेन तादात्म्यमापद्य

ते तदा देहाहंकाराभावान्नासनं दुःखजनकं भवति॥ अस्मिंश्चासनजये सति समाध्यंतरायभूतान
प्रभवंत्यंगमेजयत्वादयः अनंतसमापत्तिभ्यामिति भावप्रत्ययरहितः सूत्रपाठ इति भाष्यसंप्रदा
यः॥ अत्र अनंतेनागनायकेन स्थिरतरफणासहस्रविधृतविश्वंभरामंडलेन समापन्नं चित्तमासनं नि
र्वर्तयतीति व्याख्यानमिति वाचस्पतिमिश्राः आसनसामान्यलक्षणं तु करचरणसंस्थानविशे
ष आसनमिति विशेषलक्षणं तु धर्मपुत्रिकायां॥ स्थानकौ भूतले पादौ वासनस्थेन योगिना दक्षि
णं वामभागे तु वामपादं तु दक्षिणे॥ अन्योन्याभिमुखं कृत्वा समशीर्षकरद्वयं॥ योगसंसिद्धि
हेतोस्तु स्वस्तिकमुच्यते॥ तलपादेन वामेन जानुना दक्षिणेन च॥ स्थित्वाहस्तपुटं कार्यमर्द्ध
चंद्रासनं विदुः॥ भुवि स्थित्वा तु जानुभ्यां तावन्मात्रेण योगिना॥ हृदि हस्तपुटं कार्यं ज्ञेयमंजलिकासनं॥
सुखप्रसारितौ पादौ सुश्लिष्टौ भूमिसंस्थितौ॥ उपविश्य पादकायं तु दंडासनमिति स्मृतं॥ आसनस्थेन पादौ

यो॰ वि॰ न्यस्येतो भूतलेसमौ॥ जानुद्वयेहस्ततलंकृत्वापीठासनंभवेदिति॥ मतंगः पर्यंकंयोगपट्टेनवध्री
८५ यात्पृष्ठयोगतः॥ आकुंच्यजानुनीसम्यक्कूर्परौत्वातुदक्षिणंवामतोवामजंघाभ्यांवामंसव्यादधो
बहिः॥ विनिर्गतंकृत्वासंनिविष्टाम्पृवैकटीं॥ पर्यंकमितिविख्यातमासनंयोगसिद्धिदं॥ आग्ने
यपुराणेपादौद्वौद्विगुणीकृत्यतिर्यग्दृष्ट्वायथाक्रमं॥ न्यसेत्पाणीयथायद्दंस्थितंश्लिष्टांगुलीन कृ
खो॥ योगपट्टासनंत्वेतत्सर्वेषामपिपूजितमितिचंद्रार्द्धलेशतः॥ भगुणे तद्वत्पादद्वयंकृत्वा
सुत्तलान्योन्यसंस्थितं॥ चंद्रार्द्धमेवंकथितमितितद्वत्पद्मासनवत्॥ द्विगुणपादद्वयंकृत्वोत्पर्यः
तद्वत्पाददद्वयंकुर्यात्तन्मुखंतुप्रणामितं॥ पृष्ठतोप्युप धानस्थंसंप्रसार्यकरद्वयंप्रसारितासनं
त्वेतत्सूचितंयोगसिद्धिदं॥ वसिष्ठः गुदंनियम्यगुल्फाभ्यांव्युत्क्रमेणसमाहितः॥ कूर्मासनंभवेदे
तदितियोगविदोविदुः॥ कूर्मपुराणे॥ एकंपादमथैकस्मिन्विन्यस्योरुणिसंस्थितः॥ आसीनार्द्धास ॥ राम॰

८५

नमिदंयोगसाधनमुत्तमं॥ याज्ञवल्क्यः जानूर्वोरंतरेसम्यक्कृत्वापादतले उभे॥ ऋजुकायःसमा
सीनःस्वस्तिकंतत्प्रचक्षते॥ सीवन्यामात्मनःपार्श्वेगुल्फौनिःक्षिप्यपादयोःसव्येदक्षिणगु
ल्फं तुदक्षिणेदक्षिणेतरं॥ एतत्तुस्वस्तिकंप्रोक्तंसर्वपापप्रनाशनं॥ सव्येदक्षिणगुल्फंतुपृष्ठ
पार्श्वेनिवेशयेत्॥ दक्षिणेपितथासव्यंगोमुखंयथा॥ एकंपादमथैकस्मिन्विन्यस्योरुणिसंस्थि गोमुखं
नः इतरस्मिंस्तथाचोरुंवीरासनमुदाहृतं॥ गुल्फौचवृषणस्याधःसीवन्याःपार्श्वयोःक्षिपेत्दक्षि
णंसव्यगुल्फेनदक्षिणेनतथेतरं॥ हस्तौजानूपरिस्थाप्यस्वांगुलीःसंप्रसार्यचव्यात्तवक्त्रोनिरीक्ष ध्र
ननासाग्रंसुसमाहितः॥ सिंहासनंभवेदेतत्पूजितंयोगिभिःसदा॥ गुल्फौचवृषणस्याधःसीवन्याः
पार्श्वयोःक्षिपेत्॥ पार्श्वपादौचपाणिभ्यांदृढंबद्ध्वासुनिश्चलः॥ भद्रासनंभवेदेतत्सर्वव्याधि
विषापहं॥ संपीड्यसीवनींसूक्ष्मांगुल्फेनैवतुसव्यतः॥ सव्यंदक्षिणगुल्फेनमुक्तासनमितिस्मृ

येन्ना

यो·पिं तंअवष्टभ्यधरांसम्यकू तलाभ्यांकरयोर्द्वयोः॥हस्तयोःकूर्परेचापिस्थापर्ये ।निपार्श्वयोः॥समुन्नतशि
९६ रःपादोदंडवद्व्योम्निसंस्थितः॥मयूरासनमेतद्धिसर्वपापप्रणाशनं॥सर्वेचाप्यंनरारोगाविनश्यंतिवि
षाणिचंहठप्रदीपिकायां॥वशिष्ठाद्यैश्चमुनिभिर्मत्स्येंद्राद्यैश्चयोगिभिः॥अंगीकृतान्यासनानिवर
क्ष्यंतेकानिचिन्मया॥हठस्यप्रथमांगत्वादासनंपूर्वमुच्यते॥तत्कुर्यादासनंस्थैर्यमारोग्यंचांगलाघवं॥
पद्मासनंतुसंयोज्यजानूर्वोरंतरेकरौ॥निवेश्यभूमौसंस्थाप्यव्योमस्थंकुक्कुटासनं॥कुक्कुटास
नवंधस्थोदोर्भ्यांसंबध्यकंधरां॥भवेत्कूर्मवदुत्तानएतदुत्तानकूर्मकं॥पादांगुष्ठौतुपाणिभ्यांगृही
त्वाश्रवणावधि॥धनुराकर्षणंकृत्वाधनुरासनमीरितं॥वामोरुमूलार्पितदक्षपादंजान्वोर्वहिर्वे
ष्टितदक्षदोष्णा॥प्रगृह्यतिष्ठेत्परिवर्तितांगश्रीमत्स्यनाथोदितमासनंस्यात्॥मत्स्येंद्रपीठंजठरप्रदू
दिप्रचंडरुग्मंडलखंडनास्त्रं॥अभ्यासतःकुंडलिनीप्रबोधंदंडस्थिरत्वंप्रकरोतिपुंसां॥प्रसार्यपा ९६

दौभुविदंडरूपौदोर्भ्यांचपादद्वितयंगृहीत्वा॥जानूपरिन्यस्तललाटदेशोवसेदिदंपश्चिमतान
माहुः॥इतिपश्चिमतानमासनाग्र्यंपवनंपश्चिमवाहिनंकरोति॥उदयंजठरानलस्यकुर्यादुद
रेकार्श्यमरोगितांचपुंसां॥धरामवष्टभ्यपुनःकराभ्यांतत्कूर्परस्थापितनाभिपार्श्वः॥तदासनेदंड
वदुत्थितःखेमयूरमेतत्प्रवदंतिसंतः॥हरतिसकलरोगान्नाशुगुल्मोदरादीनभिभवतिचदो
षानासनंश्रीमयूरं॥बहुकदशनभुक्तंभस्मकुर्यादशेषंजनयतिजठराग्निंजारयेत्कालकूटं॥
उत्तानंशववद्भूमौशयनंतच्छवासनं॥शवासनंश्रांतिहरंचित्तविश्रांतिसा धनं॥भूमौस्वम
स्तकंस्थाप्यहस्तयोःकूर्परेतथा॥पादौरेवदंडवत्कुर्यात्तत्रकासनमीरितं॥स्कंदपुराणे॥आस
नानीहतावंतियावंतोजीवयोनयः॥सिद्धंचैवस्वपद्मंचपर्यंतपुष्टक्षिप्रसिद्धिदे॥गोरक्षःचतुर ५ र
शीतिलक्षाणामेकैकंसमुदाहृतं॥एतेषामखिलान्भेदान्विजानातिमहेश्वरः॥ततःशिवेनपीठानां
म

षोडशोनंशानंक्षतं॥आसनेभ्यः समस्तेभ्यो[illegible]द्वयमेतदुदाहृतं॥एकंसिद्धासनंप्रोक्तंद्वितीयंक
मलासनंहठप्रदीपिकायांचतुरशीत्यासनानिशिवेकथितानिवै॥तेभ्यश्चतुष्कमादायसारभू
तंब्रवीम्यहं॥सिद्धंपद्मंतथाभद्रंसिंहंचेतिचतुष्टयं॥श्रेष्ठंतत्रापिचैपस्मिन्तिष्ठेत्सिद्धासनंसदा॥भद्र
सिंहासनेपूर्वमुक्ते॥याज्ञवल्क्यः दक्षिणेतरगुल्फेनसीवनींपीडयेच्छिरां॥अधस्ताद्दंडयोःसू॰
क्ष्मांसव्योपस्थिदक्षिणं॥जंघोर्वोरंतरंगार्गिनिष्क्रिष्टंबंधयेदृढं॥समग्रीवशिरःस्कंधःसमपृष्ठःस
मोदरः॥नेत्राभ्यांदक्षिणंगुल्फंलोकयन्नुपरिस्थितं॥एतत्सिद्धासनंनामशीघ्रसिद्धिविधायकं
॥तथासव्येनगु॰ ल्फेनगुदंनिपीड्यसव्येतरेणैवनिनुद्यसंधिं॥स्वव्येकरेंतरस्मिन्‌शिरवांसमा न्यस्तकर
लोकयथावकस्य॥आपुर्विब्रातकल्याणेनिनुद्दस्त्वासनेनबैयातिगार्गितदापानाकुलंव
शनैः न्हः शनैःपवनयोगसंग्रहे॥योनिस्थानकमंघ्रिमूलघटितंकृत्वादृढंविन्यसेन्मेढ्रेपादमथैकमेक

हृदयःकृत्वासमंविग्रहं॥स्थाणुःसंयमितेंद्रियोवलदृशापश्येद्भ्रुवोरंतरंत्वेतन्मोक्षकपाटभेदन
करंसिद्धासनंप्रोच्यतेतथा॥मेढ्रादुपरिविन्यस्यसव्यंगुल्फंतथोपरि॥गुल्फांतरंतुविन्यस्यसि
द्धासनमिदंभवेत्॥एतत्सिद्धासनंप्राहुःपद्मासनमथोविदुः॥गुप्तासनंवदंत्येकेप्राहुर्वज्रासनंपरेकेचि
न्मुक्तासनंप्राहुरिदमासनमुत्तमंहठप्रदीपिकायां॥नियमेषुमिताहारोपथ्याहिंसायमेष्विव॥मु॰
ख्यंसर्वासनेषेवंसिद्धासनमिदंविदुः॥चतुरशीतिपीठेषुसिद्धासनंसमभ्यसेत्॥द्वासप्ततिसह॰
स्त्रेषु सुषुम्णामिवनाडिषु॥आत्मध्यायीमिताहारोयावद्द्वादशवत्सरं॥सदासिद्धासनाभ्या
साद्योगीनिष्पत्तिमाप्नुयात्॥श्रमदैर्बहुभिःपीठैःकिंस्यात्सिद्धासनेसति॥प्राणानिलेसावधानेव
द्धेकेवलकुंभके॥उत्पद्यतेनिरायासात्स्वयमेवोन्मनीयथा॥अथैकस्मिन्नेवदृढे सिद्धासनेसहा बद्धे
दौबंधत्रयमनायासात्स्वयमेवोपजायते॥अथपद्मासनंयाज्ञवल्क्यः अंगुष्ठौचनिबध्नीयाद्धस्ता

भ्यांस्युत्क्रमेणतुउर्व्वोनुपरिविन्यसेत्कृत्वापादतलेउभेपद्मासनंभवेदेतत्सर्वेषामपिपूजितं॥मतंगः
अंगुष्ठेतुसमेरम्यविनिवेश्यसमाधिना॥दक्षिणेतुगंब्वामपादंवामोनुसंस्थितं॥दक्षिणंतुसमाकृ
ष्यतज्जंघेतुपरस्परं॥एतद्धिकमलंनामविधेरासनमुत्तमंहठयोगे॥वामोरूपरिदक्षिणंचचरणंसं
स्थाप्यवामंतथादक्षोरूपरिपश्चिमेनविधिनाधृत्वाकराभ्यांदृढं॥अंगुष्ठौहृदयेनिधायचिबु
न कंनासाग्रमालोकयेदेतद्व्याधिविकारनाशकरंपद्मासनंप्रोच्यते॥दत्तात्रेयः॥उत्तानौचरणौकृत्वा
ऊरूसंस्थौप्रयत्नतः॥ऊरूमध्येतथोत्तानौपाणीकृत्वाततोदृशौ॥नासाग्रेविन्यसेद्राजदंतमू
लंतुजिह्वयाउत्तभ्यचिबुकंवक्षस्युत्थाप्यपवनंशनैः॥यथाशक्त्यासमाकृष्यपूरयेदुदरंशनैः क्या
यथाशक्त्यैवपश्चात्तुरेचयेत्पवनंशनैः॥इदंपद्मासनंप्रोक्तंसर्वव्याधिविनाशनं॥दुर्लभंयेनकेनापि
गी धीमतालभ्यतेभुवि॥पद्मासनस्थितोयोगीनाडीद्वारेषुपूरयन्॥मारुतंधारयेद्यस्तुसमुक्तोनात्रसंश ९८
पू

यः॥एवमासनबंधेषुयोगींद्रोविजितश्रमः॥अभ्यसेन्नाडिशुद्धिंचमुद्रापवनक्रियामिति॥
॥ ॥०॥ ॥इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्रामचंद्रसदानंदसरस्वतीशिष्यशि
वानंदसरस्वतीविरचितेयोगचिंतामणौद्वितीयः परिच्छेदः॥ ॥ ॥अथोक्तदेशेयथोक्त
लक्षणविशिष्टमठेशुभकालेस्वानुकूलशुभताराचंद्रबलमुहूर्तेयोगयुक्तायांतिथौविनायकं
न् शिवंशिवांविष्णुंक्षेत्रपालंचगुरूंस्तच्छिष्यान्योगींद्रांश्चयथाशक्तिसंपूज्यकुशाजिनपोडशगुणि
तवस्त्रयुक्तासनेयमादिगुणसंपन्नःप्राङ्मुखोदङ्मुखोवोपविश्यशिवादिदेवान्योगीगुरूंश्च गीनो
प्रणम्यगुरुशास्त्रोक्तमार्गेणप्राणायामस्याभ्यासंततोतरंगंप्रथमंनाडीशोधनंकुर्यात्॥गीतासु॥
शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः॥नात्युच्छ्रितंनातिनीचंचैलाजिनकुशोत्तरमिति॥रा
जयोगे॥विविक्तेविजनेदेशेपवित्रेतिमनोहरे॥समासनेसुखासीनःपश्चात्तुकिंचित्समाश्रितः॥

या॰वि॰ सुसुखस्थितसर्वांगः सुस्थिरात्मा सुनिर्मलः॥ अतो विविक्तदेशे च सुखासनस्थः शुचिः॥ समग्रीवशि
रः शरीरः अंत्याश्रमस्थः सकलेंद्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्येति॥ कूर्मपुराणे शिववा
९० क्यं॥ नमस्कृत्वाथ योगीशान् सशिष्यांश्च विनायकं॥ गुरुं चैवाथ मां योगी युंजीत सुसमाहितः॥ या
ज्ञवल्क्यः॥ कृतविघ्नो जितक्रोधः सत्यधर्मपरायणः॥ गुरुशुश्रूषणरतः पितृमातृपरायणः॥ स्वा
श्रमस्थः सदाचारो विद्वद्भिश्च सुशिक्षितः॥ विनायकं सुसंपूज्य फलमूलोदकादिभिः॥ इष्टदेवं गु
रुं नत्वा तत आरुह्य चासनं॥ ज्ञात्वैवं नाडिसंस्थानं वायूनां स्थानमेव च॥ विधिनोक्तेन मार्गेण नाडी
संशोधनं कुरु॥ वसिष्ठयोगे॥ विमुक्तकर्मसंयुक्तः सर्वकामविवर्जितः॥ यमादिगुणसंपन्नः सर्व
संगविवर्जितः॥ तपोवनं ततो गत्वा फलमूलोदकान्वितं॥ तत्र रम्ये शुचौ देशे नद्यां वा कानने पि
वा॥ सुशोभनं मठं कृत्वा सर्वरक्षासमन्वितं॥ त्रिकालस्नानसंयुक्तः शुचिर्भूत्वा समाहितः॥ मं ९१

त्रन्यस्ततनुधीरः सितभस्मधरः सदा॥ मृद्वासने परि कुशान्समास्तीर्याथ वाजिनं॥ विनायकं
सुसंपूज्य फलमूलोदकादिभिः॥ इष्टदेवं गुरुं नत्वा तत आरुह्य चासनं॥ प्राङ्मुखोदङ्मुखो वा ध्य
स्यात् जितासनगतः स्वयं॥ समग्रीवशिरस्कायः संवृतास्यः सुनिश्चलः॥ नासाग्रदृक् समासीनः
सव्येन्यस्येतरं करं॥ नासाग्रे शशभृद्बिंबं ज्योत्स्नाजालवितानितं॥ सप्तमस्य तु वर्गस्य चतुर्थं
बिंदुसंयुतं॥ विंबमध्यस्थमालोक्य नेत्राभ्यां मनसा सह॥ इडया पूरयेद्वायुं बाह्यं द्वादशमात्रकं॥ धं
॥ ततोग्निं पूर्ववद्ध्यायेत्स्फुरज्ज्वालावलीयुतं॥ रेफं च बिंदुसंयुक्तमग्निमंडलसंस्थितं॥ ध्याय
न्विरेचयेत्पश्चान्मंदं पिंगलया पुनः॥ ततः पिंगलयापूर्य प्राणं दक्षिणतः सुधीः॥ तद्वद्विरेचयेद्धी
मानिडयात्तु शनैः शनैः॥ त्रिचतुर्वत्सरं वापि त्रिचतुर्मासमेव वा॥ पुट्कृत्वा तु चरेदेवं त्रिषु कालेषु
यत्नतः॥ नाडीशुद्धिमवाप्नोति पृथक् चिह्नोपलक्षितां॥ शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनं॥ नाद

मो॰ चिं॰ भिव्यक्तिरित्येतच्चिन्हं तत्सिद्धिसूचकं॥ यावदेतानि संपश्येत्तावदेवं समाचरेत्॥ विध्युक्तक
र्मसंयुक्त इति यथायोग्यं वर्णाश्रमविहितकर्मानुष्ठानयुक्तः यमादीत्यादिशब्देन नियमासनयो
१०० र्ग्रहणं तेषां यमनियमादीनां ये गुणास्तत्सिद्धिचिन्हभूतास्तत्प्रतिशयावैरत्यागादिस्वांगा
जुगुप्सादिशब्देनाभिव्याताद्यः तैः संयुक्त आर्यः तयोक्तं ततो गत्वेत्यादिना यं नाडीशुद्धेर रे
श नियमविधिर्वाक्यस्य क्रमपरत्वात्॥ अतोयं प्राणायामादियोगांगपंचागतया प्राप्तानां यो या
गदशानामेकदेशस्यानुवादः कुशान्समास्तीर्याथवा तिनमित्यत्राथवेति शब्दो न विकल्पप
रः किंतु अनुक्तसमुच्चयार्थो अथ्यपानामनेकार्थत्वात्॥ तथा चायमर्थः मृदुकुशोपरि चर्म व
स्त्रमपि दत्वेत्यर्थः तथा च भवद्दीनायां॥ नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरमित्यत्र पा
ठक्रमादर्थक्रमो बलीयानिति न्यायात्पाठक्रमो विपरीतक्रम इति शंकराचार्यचरणैरप्यभि १००

धानात् कुशोपरि मृगस्य व्याघ्रस्य वा चर्म तदुपरि कोमलं वस्त्रमिति व्याख्येयं चैलाजिनयोः कु
शाउत्तरः धस्ताध स्मिन्नासने तच्चैलाजिनकुशोत्तरमिति व्याख्यानेन काप्यनुपपत्तिः योगा
सारे कुशचैलाजिना … स्तीर्ण इति नारदीयपुराणे॥ कुशैश्च मृदुभिः श्छन्ने पवित्रेणाथ चर्मप
णा तत्रोपविष्टः सततं योगांगानि समभ्यसेत् इति॥ याज्ञवल्क्यः मद्धासनोपरि कुशान्समा
स्तीर्य ततो ऽजिनमिति॥ अन्ये तु अथ वेति शब्दः कुशाजिनयोर्विकल्पपर इत्याहुः तदयुक्तं स
र्वलोकगुरोर्भगवद्वासुदेवस्य वाक्यार्थानुसारेणान्यवाक्यार्थस्योचितत्वात्॥ किंच वसि
ष्ठगीता…स्त्रस्यानुक्तत्वात् कुशाजिनयोर्विकल्पाशये केवलकुशनिर्मिते केवलाजिननि
रं र्मिते वासने योगाभ्यासंभवस्यानुभवसिद्धत्वात्॥ ननु आसनतूलसंपूर्णसितवस्त्रावगुंफि
तं॥ कृष्णाजिनान्तरीयं च विन्यस्तं मृदुकर्मणी स्वगस्त्यगीतासु॥ धैर्यसंपन्नः सततं वस्त्रं चा

यो॰ चिं॰ जिनमेवबोनात्युच्छ्रितंनातिनीचमिति दत्तात्रेयवाक्ये च कुशाराहित्यस्यापि दर्शनाद्युक्त एव
विकल्प इति चेत्न तत्रापि सर्वशास्त्राधिकर ।णन्यायेन ह्रवन्तश्रुतौ भूतद्वयोपसंहारवद्दा
१०१ कुशोपसंहारस्यावश्यकत्वात् तथा च स्थिरसुखमासनमित्यपि युक्तं भवति अत्र तूलसं
पूर्णसितवस्त्रावगुंठितमासनं यतिव्यतिरिक्तविषयं ज्ञेयं तस्य धर्मशास्त्रे तूलसितवस्त्रयोर्निषि
धात् ॥ तथा हि व्याख्याशिष्या दिवास्वापो मठपुस्तकसंग्रहः तूलं तूलपटी चैव यतीनां पतन
नाय षट् एतेन पत्रासनादीनि षडंगान्येवोक्तानि तत्रापि यमनियमयोरुपसंहारो दर्शितः तः त॰ यु
यः सकलव्रतसाधारणत्वात्केषुचिदेव ग्रंथेषु तद्विशेषप्रतिपादनमित्यवधेयं अयं चा व
सनविधिर्न नाडीशुद्धिमात्रपरः किंतु सांगयोगाभ्यासार्थोऽपि द्रष्टव्यः ॥ तत्रापि विशेषयोगा
निसमभ्यसेदिति नारदीयवचनात् नासाग्रशशभृद्बिंबमिति अमृतमेवादिति द्रष्टव्यं

१०१

मप्तमस्पर्शोपसंहेत्यादिवर्गस्य चतुर्थं ह इति बीजं पूरयेद्वायुमिति अमृतमिश्रितमिति
द्रष्टव्ये एतेन नाडीशुद्धिसाधनं पूरको दर्शितः अत्र केचित्ततोग्निमित्यादिना पिंगलया पु
नरित्यंतेन रेचको दर्शितः पूर्वं च दित्यनेन साग्र इत्यस्यापि परामर्शस्तथा च चंद्राग्निध्या
नसहितौ पूरकरेचकावेवात्र नाडीशुद्धिसाधनत्वेनोपदिष्टौ न तु कुंभकोपि अत एवापूर्य
रेचयेत्पश्चाद्दक्षेनाकृष्य वर्त्मना इति योगसारे ॥ सोंकारेण द्वितीयेन मध्यमेपशोभितं
ळं त्रिपंचवारान्वापूर्य मं उ ॥ चं इवर्त्मना ततो विरेचयेन्नाडीजालशनो ज्ञात वेद सइ तिकु
क्षीशयोगपरायणं नाडीशुद्धिसाधनत्वेन पूरकरेचकमात्रं श्रुतमित्याहुः तत्र ॥ तथा
मति पूरकानंतर्यस्य ततोग्निमिति ततः शब्देनवलाभात्पश्चात्पिंगलया पुनरित्यत्र प
श्चात्संदं पुनरुक्तं स्याद्रेचकांगभूतध्यानस्य ध्यायान्नित्यनेनैवलाभान्न ध्यायेदितिपुनर्ध्या

नश्रवणंचमंदफलंस्यात्ध्यायन्विरेचयेदितिलिंगेनध्यानविशिष्टरेचनविधानाद्ध्यायेदिति
विधिश्रवणमत्यंतमनर्थकंस्यात्तस्मादेवंव्याख्येयंसर्वपदप्रधानभूतविधिप्रत्ययस्यान्य
थानेतुमशक्यत्वात्ध्यायेदितिलिङ्गा ध्यानंसविषयाभावताविधीयतेनत्रध्यानंनचित्तसंत
तिमात्रंकिंतुकुंभकसहितंपूर्वोत्तरग्रंथैकवाक्यताबलात्तथाहिनपूरकेइदंध्यानंसंभवति
पूरयेदित्यनेनपूरकसमाप्तिरुक्तासर्वेषामाख्यातानांसमाप्तिःशब्दार्थइतिन्यायात्॥ त
थानंतोग्निंध्यायेदित्यनेनपूरकसमाप्त्यनंतरमेवध्यानंविहितंनापिरेचकेइदंसंभवति।
ध्यायेत्पश्चाद्विरेचयेदितिपूर्वन्यायेनध्यानसमाप्त्यनंतरमेवरेचकविधानात्तस्माद्रेचका
त्पूर्वंपूर्वरेकात्र,नंतरमितिपूर्वोत्तरपरामर्शाद्वाक्यप्रमाणबलेनध्यायेदित्यनेनकुंभकाः
ख्यनिरोधसहितंध्यानमेवफलसाधनंविधीयतइत्येववसिष्ठवाक्यार्थःअतःकुंभकरहितयो १०२

रेचकपूरकयोर्नाडीशुद्धिसामर्थ्यमस्तीत्ययुक्त...मुक्तंकालिकापुराणेनाडीशुद्धिप्रकरणे॥
सोम्येनाकर्षयेद्वायुंनाभावुत्क्षिप्यधारयेत्॥विधार्यशक्तितोभूयआग्नेयेकिंचिदुत्सृजेत्॥एवं
संशोधयेद्वायुंमारंगुल्फादिषुस्थितं॥सदासर्वगताद्वायोर्नाडीशोधनमिष्यते॥इतितथान्येष्व
पिबहुग्रंथेषुनाडीशुद्धिप्रकरणेस्पष्टएवकुंभकउपदिष्टइतिग्रंथांतरसंवादबलेनपूर्वो
२ .त्तरग्रंथैकवाक्यतयाकुंभकसहितंध्यानमेवात्रविधीयतइत्येवयुक्तंनत्वेवंव्याख्यानेरेचकां
गभूतरेचनादिध्यानालाभस्ततोग्निमित्यादेस्तुपूर्ववद्ध्यायेदित्यनेनजनितान्वयःस्यनिष्कां
क्षत्वादिवाच्यंध्यायेत्विरेचयेदितिसाकांक्षपदानुरोधेनअग्नेःसुषुम्णाधिष्ठातृत्वस्यपिंग
लायाश्चसूर्यदैवतत्वस्यसर्वयोगशास्त्रेषुप्रसिद्धत्वात्सूर्यपदमत्राहरणीयंततश्चाग्निरू
पेणाहितंसूर्यंध्यायन्विरेचयेदितिवाक्यार्थःसंपद्यतेअतएवसूर्यस्याग्निरूपध्यानविवक्षये

ववर्त्मनाकृत्स्नवर्त्मनइतिनाड्यालेशस्तोजानवेदसइतियोगसारनकुलीशयोगपरायणयोः
सूर्यएवाग्निपदस्यप्रयुक्तत्वात्तथाचामृतसिद्धौयौवैवह्निःसवैसूर्योयःसूर्यःसहुताशनःए
तावेककरौदृष्टौसूक्ष्म:भेदेनभेदिनौ॥एवंचमंदंपिंगलयापुनरित्यत्रपुनःपदमपिसफलंपुन
र्ध्यायन्नित्येवमन्वयसामंजस्यात्॥अन्यथापूर्वंरेचकानंतर्यस्यानुक्तत्वात्॥पुनरेचयं
दितिपुनःशब्दानन्वयःस्यात्इदमात्रालोचनेप्यंनासाग्रेशशभृद्बिंबमित्यत्रनासाग्रपदं
भ्रूमध्यंलक्षयतिभ्रूमध्यस्यचंद्राधिष्ठानत्वेनसर्वयोगशास्त्रेषुप्रसिद्धत्वादतस्तत्स्थानं
स्यतत्त्वेनैवोचितत्वात्पूर्ववद्ध्यायेदित्यत्रद्वादशमात्रापरिमितकालस्यैवपरामर्शोनत्वन्य
स्यदेहमध्यइतित्वध्याहर्त्तव्यं।यंकुंभकेतत्रैववायोर्द्धारणात्ततश्चायमर्थःस्त्रवत्पीयूषधा
रांवंबीजयुक्तंचंद्रमंडलंभ्रूमध्येनत्राभ्यामालोक्यामृतमिश्रितंवायुंद्वादशमात्रकंपूरये

तत तोदेहमध्येबीजयुतंस्फुरज्ज्वाव[illegible]लोक[illegible]तंत्रिकोणमग्निमंडलंध्यायेत्द्वादश
मात्रकंवायुंसुषुम्णयांधारयेत्ततोत्सृदिनाभौवावन्हिरूपंसूर्यंध्यायेत्द्वादशमात्रकं
वायुंपिंगलयाविरेचयेदितिपुनर्ध्यानादिपूर्वकंपिंगलयापूर्यत्सृदिनिरुद्ध्येडयावि
रेचयेत्योगभास्करेतुइडयापूरयेद्वायुंधारयेत्तुसुषुम्णया॥रेचयेत्पिंगलानाड्याप्राणा
यामक्रमःस्मृतः॥एवंचयाचत्राडीशुद्धिसूचकानिचिन्हानिभवंतितावत्मानर्मध्यान्हसं
ध्याकालषट्कृत्वआचरेत्ततःशुद्धनाडीगणोयोगीप्राणायामेसमर्थःस्यात्तदेतदुक्तंया
वदेतानिसंपश्येत्तावदेवंसमाचरेत॥इतिस्कंदपुराणेशुद्धिमेतिपदासर्वेनाडीचक्रंमलाकु
लंतदैवजायतेयोगीक्षमःप्राणनिबंधनेदृढासनोयथाशक्तिप्राणंचंद्रेणपूरयेत्तदेरेचयेप
णा दथसूर्येणप्राणायामेनमुच्यतेस्रवत्पीयूषधाराढ्यध्यायंश्चंद्रमसंस्थितिप्राणा॥यामेनयोगीदः ज॰

सुखमाप्नोतितत्क्षणात्॥रविणाप्राणमाकृष्यपूरयेदोदरींदरीम्॥कुंभयित्वाशनैःपश्चाद्यो
गीचंद्रेणरेचयेत्॥ज्वलज्ज्वलनपुंजाभंशीलपलुल्लगंतदि॥अनेनप्राणायामेनयोगींद्रःसुख
भाग्भवेत्॥इतिमासत्रयाभ्यासादुभयायामसेवनात्॥शुद्धनाडीगणोयोगीसिद्धप्राणोभि
धीयते॥यथेष्टंधारणंवायोरनलस्यप्रदीपनं॥नादाभिव्यक्तिरारोग्यंभवेन्नाडीविशोधनात्॥इ
तिहठयोगे॥प्राणंचेदिडयापिबेन्नियमितंभूयोन्ययारेचयेत्पीत्वापिंगलयासमीरणम
योबद्ध्वात्यजेद्वामया॥सूर्याचंद्रमसोरनेनविधिनाबिंबद्वयंध्यायतांशुद्धानाडिगणाभवं
तियमिनांमासत्रयादूर्द्धतः॥यदानाडीविशुद्धिःस्यात्तदाचिंतानिराकृता॥कायस्यकृशतांकां
तिस्तदाजायेतनिश्चितं॥प्रातर्मध्यंदिनेसायमर्द्धरात्रेचकुंभका न्॥शनैरशीतिपर्यंतंच
तुर्वारंसमभ्यसेत्॥कनीयांसिभवेत्स्वेदःकंपोभवतिमध्यमे॥उत्तिष्टत्युत्तमेप्राणरोधेपद्मासन

स्थितेजलेनश्रमजातेनगात्रमर्द्दनमाचरेत्॥लघुतांदृढतांचापितेनगात्रस्यजायते॥शास्त्रा
तरे॥प्राणायामान्तरःषष्टिकुर्यादेवमहर्मुखे॥चत्वारिंशच्चमध्याह्नेसंध्यायांविंशतिर्भवेत्
॥अर्द्धरात्रेविंशतिःस्यादेवंप्राणविनिग्रहः॥इतिरत्नाकरेपः॥तस्मिन्पीठेसमास्तीर्णेत्वासनेनिस्त
रंगकं॥तत्रोपविश्यमेधावीपद्मासनसमन्वितः॥ऋजुकायःप्रांजलिश्चप्रणमेदिष्टदेवतां॥
ततोदक्षिणहस्तस्यअंगुष्ठेनैवपिंगलां॥निरुध्यपूरयेद्वायुंमिडयातुशनैःपा॥थाशक्त्यानिर शनैः॥
रोधेनततःकुर्याच्चकुंभकं॥ततस्त्यजेत्पिंगलयाशनैरेवनवेगतः॥पुनःपिंगलयापूर्यपूरयेदुदरंश
नैः॥धारयित्वायथाशक्तिरेचयेदिडयाशनैः॥यस्यजत्तयापूर्यधारयेदनिरोधतः॥प्रकुर्वीत्ते शक्त्येति
शक्त्याविंशतिकुंभकान्॥कुंभकंसहितंनामसर्वनिग्रहवर्जितं॥एवंमध्याह्नसमयेकुर्याद्विंश
तिकुंभकान्॥ततसायंप्रकुर्वीततथाविंशतिकुंभकान्॥कुर्याद्रेचकपूराभ्यांसहितंप्रतिवासरंस

हितोरेचपूराभ्यांतस्मात्सहितकुंभकः कुर्यादेवंचतुर्वारमनालस्यो दिने एवंमासत्रयंकुर्यान्ना
डीशुद्धिस्ततोभवेत् यदानाडीविशुद्धिःस्यात्तदाचिन्हानियोगिनःजायंतेतानिदेहेवैतन्मेनिग
दतःशृणुशरीरलघुतादीप्तिर्जठराग्निविवर्द्धनं कृशत्वंचशरीरस्यतदाजायेतनिश्चितमिति॥
योगभास्करेनासिकारंध्रयुग्मेनसूत्रमाकृष्यघर्षणंजीराधिकसिताभक्षउल्के दग्धजलान्नपः॥
नाडीशुद्धौमुनिप्रोक्ताउपायाएवमादयः भ्यस्यात्तभोजनंवापार्वधश्चैवेतिमेमतिः याज्ञवल्क्यः॥
नप्राणे नाप्यपानेनवेगैर्वा मुंसमुत्सृजेत् येन शत्रून् करस्थांश्च श्वासयोगेनचालयेत्॥
शनैर्नसापुटेवायुमुत्सृजेन्नतुवेगतः नकंपयेच्छरीरंतुसयोगोपरमोमत इतिस्कंदपुराणे
अथवायासनेयं शान्सुखमस्यापजापतेस्वस्तिकादौतदध्यस्ययोगंयुंजीतयोगवित् ऊरु
स्थोत्तानचरणाः सव्येन्यस्योत्तरंकरं उत्तानं किंचिदुन्नम्यवक्त्रंविष्टभ्यचोरसा निमीलिता १०५

क्षःसत्वस्थोरदैर्दंतान संस्पृशन् तालुस्थाचलजिह्वश्चसंवृतास्यः सुनिश्चलः सुनियम्येंद्रिय
ग्रामंनातिनीचोछ्रितासनः मध्यमंचोत्तमंचायप्राणायाममुपक्रमेत् त्रपाणामपिलघुमध्यो
त्तमानांप्राणायामानांप्राणायामानांलक्षणंवक्ष्यतेक्रमेणसेव्यमानोसौनपतेपन्नचेष्ठ
तिप्राणायामेनयुक्तेनसर्वव्याधिक्षयोभवेत्॥अयुक्ताभ्यासयोगेनसर्वव्याधिसमुद्भवः॥
हिक्काश्वासश्चकासश्चशिरःकर्णाक्षिवेदनाःभवंतिविविधारोगाःपवनस्यव्यतिक्रमात् पु
क्रंत्यजेद्वायुंयुक्तंयुक्तंचपूरयेत् युक्तंयुक्तंचबध्नीयादिति सिध्यतियोगवित् इत्यत्रिरुद्धश्चा
पापेरोमकूपेषुनिःसरेत् देहंविदारयत्येषकुष्ठादिजनयत्यपि ततःमत्स्यापितव्यासोक्रमे
णारण्यहस्तिवत् वन्योगजोगजारिर्वाक्रमेणमृदुतामियात् करोतिशास्त्रनिर्देशंनचतं
परिलंघयेत् तयाप्राणोहृदिस्थोपयोगिनाक्रमयोगतः गृहीतःसेव्यमानस्तु विश्रंभतु

पगच्छति॥ यावद्देहे स्थितः प्राणो जीवितं तावदुच्यते॥ निर्गते तत्र मरणं ततः प्राणं निरोधये
 त्॥ यावद्बद्धो मरुद्देहे यावद्बद्धो निरञ्जनं यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः कालसाध्यमतो
ब्रह्मा प्राणायामपरः सदा योगिनः सिद्धिमापन्नाः सम्यक् प्राणनियन्त्रणादिति वासिष्ठे राम उवाच ।
ब्रह्मञ्जीवन्ति चिरं कालं कथं जीवन्ति योगिनः एतन्मे संशयं छिन्धि सर्वब्रह्मविदां वर वसिष्ठ उवाच ॥
प्राणानां स्पंदनात्स्पंदः स्तरंति नेदृषत्समाः पतः स्थिता धारणायां तत्र नश्यंति योगिनः सबा
ह्याभ्यंतरस्पंदश्छिन्नजो वातजोथवा नयस्य विघ्ने तस्य हृदस्थो विकृतिक्षयो सबाह्याभ्यंतरेशां
तेस्पंदे पवने चेतसोः धातवः संस्थितिं देहे न त्यजंति कदाचन असमं वहति प्राणे नाड्यो यां
ति विसंस्थितिं असम्यक् संस्थिते भूपे यथा वर्णाश्रमक्रम इति मार्कंडेयपुराणे शृणुष्व च
महीपाल प्राणायामस्य लक्षणं युंजतश्च सदा योगं या घोरव्याहितमासनं पद्म॥ मस्त्रस

नं वापि तथा स्वस्तिकमासनं आस्थाय योगं युंजीत कृत्वा घं प्रणवं त्द दिसमः समासनो भूत्वा सं
हृत्य चरणावुभौ संहृतास्यस्तथैवोरू सम्यक् विष्टभ्य चाग्रतः पार्ष्णिभ्यां लिंगवृषणावस्पृश
न्प्रयतः स्थितः किंचिदुन्नामित शिरा दंतैर्दंतान संस्पृशन् संपश्यन्नासिकाग्रं स्वं दिशश्चा
नवलोकयन् रक्ष्यो योगी यताहारः प्राणायामपरायणः जितां जितां शनैर्भूमिमारोहेद्यथा गृहं॥ रो
दोषान्व्याधिं तथा मोहमक्रांता भूमिरेव वै विवर्द्धयति नारोहेत्तस्माद्भूमिमनिर्जितां॥ उपाय
श्चात्र कथितो योगिभिः परमर्षिभिः येन व्याध्यादयो दोषा न जायंते कदाचन॥ यथा तोया
 र्थिनस्तोयं पयं त्रनालादिभिः पूर्षानैः आपिबेयुरूयावाप्सु पिबेद्योगी जितश्रमं मरुत्वं सेव्यमा
नस्तु सिंह शार्दूलकुंजरात् यथा यांति तथा प्राणो वश्यो भवति योगिनः विश्वासतां पयेच्छा
तो नागं न पतिहस्तिपः तथैव योगी स्वच्छंदं प्राणं नयति साधितं यथा हि साधितः सिंहो मृ

गानहंतिनमानवात्तंतद्वन्निरुद्धः पवनः किल्बिषंनन्नृणांनुतं तस्माद्युक्तः सदा योगी प्राणाया
मपरो भवेदिति याज्ञवल्क्यः तस्मात्त्वं चवरारोहे नित्यंकर्मसमाचरसंध्याकालेषुवानित्यं प्राण
संयमनंकुरु प्राणायामपराः सर्वे प्राणामायपरायणाः प्राणायामेन . शुद्धापेनेयांतिपरमांग
तिं ।। प्राणायामाहृतेनान्यत्तारकंनरकारिषु ।। संसारार्णवमग्नानां तारकः प्राणसंयमइति
ति अथप्राणायामनिरूपणंतत्र भगवान्पतंजलिः तस्मिन्श्वासप्रश्वासयोर्गतिविछेदः प्राणा
यामइतितत्रभाष्यकृतः सत्यासनेबाह्यस्यवायोराचमनंश्वासः कोष्ठ्यस्यवायोर्निःसार
णंप्रश्वासः तयोर्गतीविछेदउभयाभावः प्राणायामइति अत्रवाचस्पतिव्याख्या रेचक
पूरककुंभकेष्वस्ति श्वासप्रश्वासयोर्गतिविछेदः प्राणायामसामान्यलक्षणमेतत्तथाहि
।। यत्रबाह्योवायुराचम्यांतर्धार्यते पूरकेतत्रास्ति श्वासप्रश्वासयोर्गतिविछेद इति यत्राप्यको

ष्ठ्योर्वायुर्विरेच्यतेवहिर्धार्यते रेचके तत्रास्ति श्वासप्रश्वासयोर्गतिविछेदः ।। एवंकुंभके
षुभयाभावइति भोजदेवस्तु तस्मिन्नासनस्थैर्ये सति तन्निमित्तकप्राणायामलक्षणयो
गांगविशेषोनुष्ठेयोभवति कीदृशः श्वासप्रश्वासयोस्त्रिधा रेचनपूरणाक्षेपद्वारेणवाह
स्याभ्यंतरेषुस्थानेषु नासाग्रेहृदयेनाभौ च गतेः प्रवाहस्य विछेदोधारणं प्राणायामइ
त्युच्यते स्कंदपुराणे षट्त्रिंशदंगुलहंसः प्रयाणंकुरुतेवहिः सव्यापसव्यमार्गेणतेनप्रा
णोभिधीयते प्राणोदेहगतोवायुरायामस्तन्निबंधनमिति ।। आदित्यपुराणे अंतश्च
राणांवायूनांवाह्याभ्यंतररोधनं प्राणायाम इति प्रोक्तो द्विविधः सचकथ्यते द्विविधः
सगर्भोविगर्भश्चेति याज्ञवल्क्यः प्राणापानसमायोगः प्राणायामइतीरितः प्राणायामस्त्रिधा
प्रोक्तः पूरककुंभकरेचकैः पूरकलक्षणं बाह्याद्वा पूरणंवायोनुदरे पूरको हि सः कालिकापुरा

यो॰ चिं॰ णे पूरकः पूरणात्प्रोक्तः देवलः निःश्वासाध्मानं पूरणमिति स्कंदपुराणे बाह्येन वायुना
देहं दृतिवत्परिपूरयेत् परिपूर्णस्तथा तिष्ठेत्पूरणात्पूरकः स्मृतः याज्ञवल्क्यः बाह्ये स्थितं
१०८ नासपुटेन वायुमाकृष्य तेनैव शनैः समंतात् नाडीश्च सर्वाः परिपूरयेद्यः स पूरको नाम महा त
निरोधः देवलः तेनैव वर्त्मना तस्य कोष्ठस्यांतः प्रवेशनं पूरणात्पूरकः प्रोक्त इति तेन नासा
पुटं मुखब्रह्मरंध्रलक्षणेन वायुसंहितायां ।। नासिकापुटमंगुल्यापीड्यैकमपरेण तु बाह्ये
न मरुता देहं दृतिवत्परिपूरयेत् ।। नासापुटेनापरेण पूरणात्पूरकः स्मृतः कुंभकलक्षणं ।।
याज्ञवल्क्यः संपूर्य कुंभवद्वायोर्धारणं कुंभको भवेत् स्कंदपुराणे न मुंचति न गृह्णाति वायु
मंतर्बहिः स्थितं आपूर्य कुंभवत्तिष्ठेदचलः स तु कुंभकः योगियाज्ञवल्क्यः न रेचको नैव
च पूरकोऽयं नासाग्रवर्तीस्थित एव वायुः सुनिश्चलं धार्यते क्रमेण कुंभाख्यमेतत्प्रव १०८

दंति तज्ज्ञाः रेचकं पूरकं मुक्त्वा यत्सुखं वायुधारणं प्राणायामोऽयमित्युक्तः स वै केवलकुंभकः
त आरेच्यापूर्य यः कुर्यात्स वै सहितकुंभकः अन्यान्यपि कुंभकविशेषास्ते वक्ष्यंते रेचकलक्षणं या
ज्ञवल्क्यः बहिर्यद्रेचनं वायोरुदराद्रेचकः स्मृतः तथा निःक्रम्य नासाविवरादशेषं प्राणं ब
हिः शून्यमिवानिलेन निरुच्छ्वसंस्तिष्ठति चोर्ध्ववायुः स रेचको नाम महानिरोधः कालिकापु
राणे भानुदैवतयासुंवे द्वापुं सर्वांगसंयुतं व्याहृतिप्रणवाद्येन यत्तद्रेचकसंज्ञितं स्कं
दपुराणे नासिकापुटमंगुल्या पीडयित्वापरेण तु उदराद्रेचयेद्वायुं रेचनाद्रेचकः स्मृतः दे
वलः अजस्रनिश्वासो रेचकः अजस्रोऽखंडो निश्वासो निःसारणं यद्वायोर्ब्रह्मरंध्रेण नासा
स्येन च वा बहिः निःसारणमौदर्यस्य रेचनात्स्यात्स रेचकः जैगीषव्यो योगशास्त्रे रेचकस्तु
द्विनाडीपोः कोष्ठस्य परिकीर्तितः लघुमध्यमोत्तमभेदेन प्राणायामत्रैविध्यं कथ्यते नारदीय

यो·चिं· पुराणे॥ मात्राभेदे॥ कृतैस्तस्तः कनीयान्मध्यमोज्येष्ठः प्राणायामः प्रकीर्तितः एकद्वित्रिगुणो विप्र
मात्राभेदेन संस्थितः॥ मार्कंडेयपुराणे लघुर्द्वादशमात्रास्तु द्विगुणः स तु मध्यमः॥ त्रिगुणाभि
१०१ स स्तु मात्राभिस्तु रीयः उदाहृतः प्रथमेन जयेत्स्वेदं द्वितीयेन तु वेपथुं॥ विषादं हि तृतीयेन जयेद्दोषान
नुक्रमात्॥ नंदिपुराणे॥ कनीयसस्तु मात्राभिः स्थितो द्वादशभिर्यमः॥ मध्यमो द्विगुणैस्तु मात्रा
भिः परिकीर्तितः॥ त्रिगुणाभिः स्मृतो ज्येष्ठो ज्येष्ठः स्वेयं समानयेत्॥ केवलः स पुनरेकद्वित्रिभिरुद्घाते
र्मृदुर्मध्यस्तीक्ष्णो भवति॥ स्कंदपुराणे॥ कनीयांस्तु सकृदुद्घातो द्वादशमात्रकः॥ मध्यमस्तु
द्विरुद्घातश्चतुर्विंशतिमात्रकः॥ उत्तमस्तु त्रिरुद्घातः षट्त्रिंशन्मात्रकः स्मृतः॥ स्वेदकंपाभिघाता
नां जनकश्चोत्तमो मतः॥ एभिश्चिन्हैश्चिन्हितव्यः सिद्धः प्राणोऽत्र योगिना॥ वायुसंहितायां कन्प
सादिक्रमवशात्प्राणापाननिरोधनं॥ तच्चतुर्द्धा परिदिष्टं स्यान्मात्रागुणविभागतः॥ कनीसक य: १०१

दुद्घातः स च द्वादशमात्रकः॥ मध्यमस्तु द्विरुद्घातश्चतुर्विंशतिमात्रकाः॥ उत्तरस्त्रिरुद्घातः ष
ट्त्रिंशन्मात्रकः स्मृतः॥ स्वेदकंपादिजनकः प्राणायामस्तदुत्तरः॥ आनंदोद्भवरोमांचनेत्रोदं
तांगमोटनं॥ जल्पभ्रमणमूर्च्छाद्यं जायते चात्र योगिनः॥ लिंगपुराणे॥ प्राणायामस्य मानं तु मा
त्राद्वादशकं स्मृतं॥ नीचो द्वादशमात्रस्तु सकृदुद्घात ईरितः॥ मध्यमस्तु द्विरुद्घातश्चतुर्विंशति
मात्रकः॥ मुख्यस्तु यस्त्रिरुद्घातः षट्त्रिंशन्मात्र उच्यते॥ प्रस्वेदकंपनोत्थानजनकश्च यथाक्रमं॥
आनंदो जायते चात्र निद्रा घूर्मस्तथैव च॥ रोमांचो ध्वनिसंवित्तिरंगमोटनकंपनं॥ भ्रमणस्वे
दजल्पाद्यसंविन्मूर्छा जपघदानदो नमोत्तमः प्रोक्तः प्राणायामः सुशोभनः॥ क्रमेश्चितांदोल
नं ध्वनिसंवित्तिरांतरनादाभिव्यक्तिः॥ वसिष्ठपागे प्रस्वेदं जनयेयस्तु प्राणायामेषु सोऽधमः॥
मध्यमः कंपनात्प्रोक्त उत्थानाच्चोत्तमो भवेत्॥ मात्रालक्षणं तु यथा ब्रह्मवैवर्ते॥ निमेषोन्मे

यो॰ विं॰ षणंमात्राद्विवलिप्त्वक्षरंनथा॥ नंदिपुराणेत्वरितंलघुभिर्वर्णैर्मात्राद्वादशभिःस्मृतेतिस्कं
११० दपुराणेजानुंप्रदक्षिणीकृत्यनद्रुतंनविलंवितंकरोतिछोटिकांयावत्सामात्रेतिचगीयत
त्री इतिदत्तात्रेयःअंगुलीर्मोक्षितास्तिस्त्रोजां[illegible]श्च परिमार्जयेत्प्रदध्याच्छोटिकामेकांमा
त्रासंस्थाययेत्तमितिनया॥ द्वादशछोगः कनीयान्द्विगुणोमध्यमः स्मृतःत्रिगुणोत्तममा
त्रः स्यान्मात्राभेदः प्रकीर्तितः याज्ञवल्क्यः अंगुलिमोक्षत्रितयंजानुपरिमार्जनंचापि॥
तालत्रयमपितज्ज्ञामात्रासंज्ञांप्रशंसंतिगोदोहंवत्सपानंवाइषुक्षेपमथापिवाघंटा
मात्तनितंचापिअतिमात्राप्युदात्ततांदेशकालानुसारेणसदासेव्याःशनैः इतिउद्धात शनैः
लक्षणंचयथाशास्त्रांतरैःप्राणेनोत्सर्पमानेनअपानःपीड्यतेप्रदागत्वाचोर्ध्वंनिवर्तेत
एतदुद्धातलक्षणं। अथपूरककुंभकरेचकेषुध्यानजपविशेषःप्रदर्श्यते। व्यासःनाभिपद्म
११०

स्थितंध्यायेत्कंरक्तंपूरकेणतुनीलोत्पलाभंहृत्पद्मेकुंभकेनजनार्दनं॥ ललाटस्थशिवंश्वेतं
रेचकेनविचिंतयेत्शुद्धस्फटिकसंकाशंनिर्मलंपापनाशनं बृहस्पतिःरक्तंप्रजापतिंध्याये
द्विष्णुंनीलोत्पलप्रभंशंकरंत्र्यंबकंश्वेतंध्यायन्मुच्येत्तवंधनात्याज्ञवल्क्यःकुंभकेनहृदि
स्थानेध्यायेत्तुकमलासनं॥ ब्रह्माणंरक्तगौरांगंचतुर्वक्त्रंपितामहंनीलोत्पलदलप्रख्यामं
नाभिमध्येप्रतिष्ठितंचतुर्भुजंमहात्मानंपूरकेनविचिंतयेत्रेचकेनेश्वरंविं[illegible]ल्ललाटस्थं घ
महेश्वरंशुद्धस्फटिकसंकाशंनिर्मलंपापनाशनं॥ पूरकेविष्णुसायुज्यंकुंभकेब्रह्मणोंतिकं॥
रेचकेनतृतीयेनप्राप्नुयादीश्वरंपदं॥ पद्मनिरोधसंयोगाद्देवतात्रयचिंतनं॥ अग्नेर्वायोर
पांयोगात्तदाप्नुयात्तयेत्रिभिःनिरोधान्जायतेवायुर्वायोरग्निश्चजायतेअग्नेरापोभिजायं
तेतैतोंतःशोध्यतेत्रिभिःप्राणायामइतिप्रोक्तःपूरकुंभकरेचकैःवर्णत्रयात्मकाह्येतेपूर

यो·चिं·

१११

कुंभकरेचकाः॥ एवँ णवः प्रोक्तः प्राणायामश्च तन्मयः॥ इडया वायुमारोप्य पूरयित्वोदरं
स्थितः॥ शनैः षोडशमात्राभिरकारं तत्र संस्मरन्॥ धारयेत्पूरितं पश्चात्प्राणं वाह्यानिला
न्वितं शनैः पिंगलया गार्गि द्वात्रिंशन्मात्रया पुनः॥ मकारमूर्तिमत्रापि संस्मरन्सुस
माहितः॥ प्राणायामो भवेदेष पुनश्चैवं समभ्यसेत्॥ प्रस्वेदजनको यस्तु प्राणायामेषु सोऽध
मः॥ कंपनान्मध्यमः प्रोक्त उत्थानाच्चोत्तमः स्मृतः॥ पूर्वं पूर्वं प्रकुर्वीत यावदुत्तमसंभवः॥ संभ
वत्युत्तमे गार्गि प्राणायामे सुखी भवेत्॥ प्राणी जयति तेनैव रेहस्यांतस्तनोधिकं [illegible]
[illegible] देहश्चोत्तिष्ठते तेन कृतासनपरिग्रहः॥ निश्वासोच्छ्वासकौ तस्य न विद्येते कृता
वनेदेहयद्यपितौ स्यातां स्वाभाविकगुणावुभौ तथापि नश्यतस्तो च प्राणायामोत्तमे
न हि तयोर्नाशे समर्थः स्यात्कृतं केवलकुंभकं सहितं केवलं वाथ कुंभकं नित्यमभ्यसेत्॥ या

१११

वत्केवलसिद्धिः स्यात्तावत्सहितमभ्यसेत्॥ केवले कुंभके सिद्धे रेचपूरणवर्जिते॥ न तस्य दुर्लभं
किंचित्त्रिषु लोकेषु विद्यते॥ मनोजवत्वं लभते पलितादि च नश्यति॥ मुक्तेरयं महामार्गो मका
राख्योंतरात्मकः॥ नादं चोत्पादयत्येष कुंभकः प्राणसंयमः॥ प्राणसंयमनं नाम देहे प्राणा
स्य धारणं॥ एष प्राणजयोपायः सर्वमृत्यूपघातकः॥ हठयोगे कुंभकात्कुंडलीबोधः॥ कुंडली
बोधतो भवेत्॥ अनर्गलः सुषुम्णा नो हठसिद्धिश्च जायते॥ वायुसंहितायां॥ रेचकादित्रयमि
दं न द्रुतं न विलंबितं॥ उद्घातक्रमयोगेन मन्यसे योगसाधनं॥ रेचकादित्रयाभ्यासो नाडीशो
धनपूर्वकं॥ स्वेच्छोत्क्रमणपर्यंतं प्रोक्तो योगानुमार्गिणे॥ स द्विविधः प्राणायामः सगर्भविगर्भभे
दात्॥ तथा हि नारदीयपुराणे॥ सगर्भयोगर्भयोगमतिवेदगमानुपंत्रितः॥ प्राणायामोस्य म
प्यनंतस्यादौ युक्तिरुच्यते॥ अगर्भश्च विगर्भश्च द्विविधः संप्रकीर्तितः॥ अस्य प्रापास्यस्य

यो॰ चिं॰ कयोर्मथनमिव मथने प्राणायामो नवनीतात्मज्ञानस्थानीयत्वात् तयोर्लक्षणं य
११२ था लिंगपुराणे सगर्भोगर्भइत्युक्तः सजयो विजयः क्रमात् वायुसंहितायां जपध्यानं वि
नागर्भः सगर्भस्तत्समन्वितः अगर्भो हु मं संयुक्तः प्राणायामः शताधिकः जपो मनसा प्र
संख्यानं ।। नंदिपुराणे जाप्येन तु जपं कुर्यात् विलंबितमद्रुतं मनसैव प्रसंख्यानं प्राणा
यमविधौ सदा जाप्ये तगायत्र्यादिमंत्रेण स्कंदपुराणे ध्येयं पदं क्षेश्रेण्यां वर्णाद्वर्णपदा २
त्पदं शब्दार्थचिंतनाभ्यासः स उक्तो मानसो जपः ।। नंदिपुराणे ।। मंत्रांशं देवता ध्यानात्स
ज्वालः परिकीर्तितः मंत्रावचनविद्धस्तु प्रशांतः परिकीर्तितः मंत्र ॐकारस्तु उक्तः सर्वमं
त्रविजित्वरः सर्वदेवतसंदोह आधारः सर्वयोगिनां यस्योदरे मंत्रजातं सर्वमेव प्रतिष्ठितं स एव
व योगिनां योगश्चिंतामणिसंमो हि सः स तु मात्रात्रयपुतो अ उ मा इति ताः स्मृताः अस्मि

११२

न्मात्रात्रये सर्वं भावाभावं प्रतिष्ठितं ब्रह्मविष्णुमहेशानां क्रमान्मात्रात्रयं स्मृतं स्कंदे मा शंक
रश्चोक्ता भूर्भुवः स्वश्च कीर्तिताः त्रयोग्नयस्तु ताः प्रोक्ता मात्राः प्रणवसंयुताः तस्य मात्रात्र
य ध्यानात्प्राणायामः स धूमकः कलांशं देवताध्यानात्सज्वालः परिकीर्तितः मात्रा धूमां
शनिर्वस्त्र योगनाडीसमाश्रयात् प्रशांत उक्तः शास्त्रेषु सर्वभावविनिर्गतः एते भेदाः सग
र्भस्य इह सगर्भस्य प्राणायामस्य त्रयो भेदाः प्रदृश्यंते सधूमः सज्वालः अशांत इति त्रमात्रा
त्रय ध्यानात्स धूमकः मात्रारूपाणां प्रणवांशानां तद्देवतानां च ध्यानात्सज्वालः मंत्रा
वचनविद्धस्तु प्रशांतः मंत्रस्यावचनं मनस्यालोचनं तेन विद्धो युक्तः अनेनायं मंत्रवा
च्यार्थध्यानरहितोपीत्युक्तं भवति कला मात्रा धूमांशोस्यादिमात्रा तद्देश ध्यानरहितः प्र
शांतः अत्रांशशब्देन मात्रावाच्या देवता गृह्यंते मात्रा धूमदेवता ज्वाला रूपनिर्गतवस्तु

समाश्रयात्तयोगनाडीसमाश्रयाच्चप्रशांतइतियोगनाडीसुषुम्णा तेदवंप्रणवगर्भः प्राणाया
मोदर्शितः मार्कंडेयपुराणे ॐमित्युच्चारणात्सर्वगहीनंसम्ग्वेत्तइत्येतदक्षरंब्रह्मपरमोंका
रसंज्ञितंप्रणवोधनुःशरश्चात्माब्रह्मणोत्स्यायुधान्वितः अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभ
वेत् याज्ञवल्क्यः सिद्धानानां च सर्वेषांवेदवेदांतयोस्तथा अन्येषामपिशास्त्राणांनिष्ठा ॐ
कारउच्यते प्रणवाद्याःस्मृतावेदाःप्रणवेपर्यवस्थिताः वाङ्मयंप्रणवंतच तस्मात्प्रणवम
भ्यसेत् तयाप्रणवेनसुसंयुक्ताव्याहृतिभिश्चसंयुताः गायत्रीवीजपेनूतिस्रः प्राणसं
यमनेद्विजः अनेनगायत्रीगर्भः प्राणायामोदर्शितः अस्यलक्षणमाह मनुः सव्याहृतिंस
प्रणवांगायत्रींशिरसासहत्रिःपठेदायतप्राणःप्राणायामःसउच्यते॥ व्याहृतयो भूरा
द्याःसप्तैवख्याताःसप्तव्याहृतयःप्रोक्ताःप्राणायामेतुनित्यशः भूर्भुवःस्वर्महर्जनस्त

पःसत्यंतथैवचेतियोगियाज्ञवचनात्॥ शिरश्चात्र ॐ आपोज्योतिरित्यादिर्यजुर्वेदोमंत्रः
तथाचव्यासः ॐ आपोज्योतिरित्येषभूरादिपुनवस्त्वपिप्रवेणे योगमाह याज्ञवल्क्यः भूर्भुवः
स्वर्महर्जनस्तपःसत्यंतथैवच प्रत्योंकारसमायुक्तास्तत्तस्तत्सवितुःपरं ॐ आपोज्योतिरि
त्येतच्छिरःपश्चात्प्रयोजयेत् त्रिरावर्तनयोगाद्धिप्राणायामस्तुशब्दितइति ॐकारोप्य
त्रमंत्रोद्दिष्टव्यःतथाचयमः ॐकारपूर्विकाःसप्तजपेतुव्याहृतीस्तथा शिरसासहगा
यत्रीप्राणायामःपरंतपः जपेदित्यत्रमनसेतिद्रष्टव्यंतथाचसंवर्तेप्रण वेनतुसंयुक्ता
या व्याहृतीःसप्तनित्यशः सावित्रींशिरसासार्द्धंमनसात्रिःपठेत्द्विजः याज्ञवल्क्यः ब्राह्मणाःश्रु
तिसंपन्नाःस्वधर्मनिरताःसदा सवैदिकंजयेन्मंत्रंलौकिकंनकदाचन नैकेचिभूतहितार्थाया
यजप्तुमिच्छंतिवैदिकं द्विजवत्क्षत्रियस्योक्तःप्राणसंयमनेजपः वैश्यानांधर्मयुक्ता

नास्त्री शूद्राणां न तपस्विनां प्राणसंयमने गार्गि मंत्रः प्रणववर्जितः नमोंतः शिवमंत्रो वा वैष्णवो वे
ष्यते तु धैः यद्वा समभ्यसेच्छूद्रो लोकिकं विधिपूर्वकं न वैदिकं जपेच्छूद्रः स्त्रियश्च न कदाचनेति
तदेवं सगर्भागर्भभेदो निरूपितः स्कंदपुराणे॥ रेचकः शून्यकश्चैव पूरकः कुंभकस्तथा प्रा
णागमनसभ्यासः प्राणायामश्चतुर्विधस्तत्र रेचितादयो लक्षिताः केचिद्दक्ष्यंते च शून्य
कलक्षणं कालिकापुराणे ततः सर्वं निराभासं मध्ये ज्ञानं विचिंतयेत् वायोस्तस्यं रोधयेद्वा
पुं शून्यकं न द्विनिर्दिशेच्च॥ तत इति भानुदेवत्वपानाप्तौ व्याहृति प्रणवाद्येन रेचकं
कृत्वं निजैगीषव्ययोगशास्त्रे आयामैः पंचभिः खिन्नो रेचकाद्यैर्यथाक्रमं रेचकः पूरकः कुं
भउत्कर्षो ह्यपकर्षकः स्वित्रीयो गोसिद्धिमाप्नोतीति संबंधः पद्मपुराणे॥ प्राणः प्रायाम
यो वायुर्वायुरात्मा निगद्यते तेनस्यायामः समुद्दिष्टः षट्प्रकारः सुयोक्तृभिः वायोरपि नि

रोधेन युक्तः समभिधीयते षट्प्रकारकत्वं च रेचक पूरकौ द्वौ सहितः केवलश्चेति कुंभकौ द्वौ द्वा
वुत्कर्षापकर्षकौ॥ रेचलः कुंभः सप्तविधो ज्ञेयो रेचितादि प्रभेदतः रेचितः पूरितः शांतः प्रत्या
हारांतरोधरः समश्चेति विनिर्दिष्टः कुंभकः सप्तभेदतः तथा रेचितादेः सप्तविधस्यापि लक्ष
णं चाह रेचितस्य बहिः स्तंभो वायो रेचितेकुंभकः पूरितस्यांदरे रोधः प्रोक्त पूरितकुंभकः का
यस्यांतर्बहिर्व्याप्तिर्यास्या शांतकुंभकः स्थानेयो रंतरे रोधः प्रत्याहाराख्यकुंभकः आ
पूर्यापक्रमात्कूर्द्ध मूर्द्धरोधात्ददादिपुर उनरः कुंभकः सत्यादधो धामूर्द्धतो ध घरः रेचनोपू
रणान्यत्का मनसा मनुतो धृतिः स्थानाभ्यादिप्रदेशेपु समः कुंभः प्रकीर्तितः कायस्यांतिरेचक
पूरकौ विहायशरीरस्यांतर्बहिश्च मनसा वायोर्द्धारणाद्व्याप्तिरित्यर्थः स्थानयोरित्यत्र
वीप्सा द्रष्टव्या पादतलगुल्फनाभिहृदुरः कंठघंटिका भ्रूमध्यललाटब्रह्मरंध्राणि स्थाना

निएतेषुस्थानेषुद्वयोर्द्वयोरंतरेमध्येवायोर्द्धारणांप्रत्याहाराख्यकुंभकः हृदादिस्थानेषुमूर्द्ध
तोत्हृदयपर्यंतंस्वेतापूरणेद्वतिस्थानभेदात्समशांतयोर्भेदः रेचकादिचतुर्विधप्राणाया
 मलक्षणमाहभगवान्पतंजलिः बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिःपरिदृष्टोदीर्घ
सूक्ष्मःबाह्याभ्यंतरविषयापेक्षीचतुर्थ इति अस्यार्थः बाह्यवृत्तिःश्वासोरेचकः अंतर्वृत्तिःप्र
श्वासःपूरकः अंतस्तंभवृत्तिःकुंभकःरेचनेपूरणंविहायसकृद्बलवद्विधारकमपलावरू
द्वेतस्मिन्जलमिवनिश्चलतयाप्राणावस्थाप्यत इति कुंभकःसयथातप्तेन्यस्तमुपलेजलं
सर्वतःपरिशुष्यत्संकोचमापद्यतेतथाशरीरेसूक्ष्मस्तभ्यत इति स्तंभवृत्तिःत्रिविधोयंप्राणा
यामोदेशेनसंख्ययाचोपलक्षितोदीर्घसूक्ष्मसंज्ञोभवतिदेशेननासाद्वादशांतादेकाले
नसंख्ययाचोपलक्षितोयथाषट्त्रिंशन्मात्रकःसंख्ययाचोपलक्षितएतावद्भारंक

नएतावद्भिःश्वासप्रश्वासैःप्रथमउद्घातोभवतीत्येतज्ज्ञानोपसंख्योपग्रहणमुपात्तंउ
द्घातश्चनाभिमूलात्प्रेरितस्यवायोःशिरस्यभिहननंसरवल्वयंदिवसक्षमासादिक्रमे
णाभ्यस्तोदीर्घदेशकालव्यापितयैवदीर्घोलक्ष्यतयाचसूक्ष्मोदीर्घसूक्ष्मशब्दाभि
धेयोभवतिद्वितीयार्थस्तुबाह्योविषयोद्वादशांतादिःआभ्यंतरोविषयोहृदयनाभिच
क्रादिःतौद्वौविषयावाक्षिप्यपर्यालोच्यवःस्तंभरूपोगतिविच्छेदःसचतुर्थःप्राणायाम इ
तिततीयस्मात्कुंभकादयमस्यविशेषोवाह्याभ्यंतरविषयौपर्यालोच्यैवसहसातत्प्रोपल
५ मतिततौलवघुगपत्स्तंभवत्याभिःपाद्यतेअयंत्वालोचनसापेक्षंबहुप्रयत्नपूर्वमभ्यस्यमान
स्तांतामवस्थामापन्नस्ततद्वस्थाविजयानुक्रमेणभवतीतिचतुर्विधस्यापिप्राणायाम
स्यफलमाहभगवान्पतंजलिः ततःक्षीयतेप्रकाशावरणंधारणासुयोग्यताचमनस इति तस्त

यो·चिं· स्मात्प्राणायामात्मकाशस्य चित्तसत्वगतसार्वज्ञरूपस्य सदावरणं क्लेशरूपं क्षीयते विन
श्यतितया च मनसो धारणासु वक्ष्यमाणलक्षणासु योग्यता भवति प्राणायामैः क्षीणदोष
११६ मनो यत्र यत्र धार्यते तत्र तत्र स्थिरीभवतीति सूत्रार्थः स्कंदपुराणे श्लोका युक्ति व[...]शालाहि
ष्यते च यथा दारुतो वानलो लभ्यो वायुर्वा स्यात् तथा च ख्यः प्राणायामो स्य मथनं तस्माद्दो
युक्तिरुच्यते तथा समस्तेंद्रियवृत्तिश्च प्राणो वायुः प्रकीर्तितः तज्जयादिंद्रियाण्येवं निर्जिता
वृत्ति नि भवंति हि वृत्तिमतो यस्माद्भेदः परिकीर्तितः तस्माद्वा नेजयादेव वृत्तिमान्निर्जितो भवेत्
ज्ञानवैराग्ययोश्चाभ्यां प्राणायामकषाहतान् इंद्रियाश्वान्विनिर्जित्य सर्वमेव जितो भवेत् इंद्रि
याण्येव तत्सर्वं यत्स्वर्गनरकावुभौ निगृहीतविशिष्टानि स्वर्गाय नरकाय च शरीररथमित्याहु
रिंद्रियाण्यस्य वाजिनः सारथिः पुरुषः प्रोक्तः प्राणायामः कषास्मृतः ज्ञानविज्ञानरश्मिभ्यां

११६

स्थूलः

मायम्य विधृतं मनः शनैर्निश्चलतां याति प्राणायामकषाहतं योगे सूर्यभेदनमुज्जायी तथा १
सीत्कार शीतली भस्त्रिका भ्रमरी मूर्छा सहितं चाष्टकुंभकाः तत्र सहितलक्षणं पूर्वमेवोक्तं भ्र १
मरी वेगोद्घोषं पूरकं भृंगनादं भृंगीनादं रेचकं मंदं मंदं योगींद्राणां नित्यमभ्यासयोगाच्चित्ते जाय
ता काचिदानंदलीला मूर्छा पूरकांते गाढतरं बंधो जालंधरः शनैः रेचयेत् मूर्छनाख्या यं च
मनो मूर्छा सुखप्रदा सीत्कां कुर्यात्तथा वक्त्रे घ्राणे नैव विसर्जयेत् एवमभ्यासयोगेन १
कामदेवो द्वितीयकः योगिनी चक्रसंसेव्यः सृष्टिसंहारकारकः न क्षुधा न तृषा निद्रा नै १
वालस्यं न जायते भवेत्स्वछंददेहस्तु सर्वोपद्रववर्जितः अनेन विधिना यस्तु योगींद्रो
भूमिमंडले रसना तालुमूले यः प्राणं सततं पिबेत् अब्दार्धेन भवेत्तस्य सर्वरोगपरि वृ
क्षयः योगवीजे सूर्यभेदनं आसने सुखदे योगी बद्ध्वा चासनं ततः दक्षनाड्या समाकृ

यो·चिं· ष्यवहिस्थंपवनंशनैः॥ आकेशाग्रंनखाग्रंचशिरोधोवधिकुंभकंततःशनैःसव्यनाड्यारेचयेत्प
११७ वनंसुधीः॥ कपालशोधनंवातदोषघ्नंकृमिदोषहृत्॥ पुनःपुनरिदंकुर्यात्सूर्यभेदनमुत्तमं॥ उज्जा
यीमुखंसंयम्यनाडीभ्यामाकृष्यपवनंशनैः॥ यथालगतित्कंठाद्धृदयावधिसस्वनः॥ पूर्व
वत्कुंभयेत्प्राणंरेचयेदिडयाततः॥ श्लेष्मदोषहरंकंठेदेहानलविवर्द्धनं॥ नाडीजलोदरंधा
तुगतदोषविनाशनं॥ गच्छतस्तिष्ठतःकार्यमुज्जायाख्यंचकुंभकं॥ भस्त्रिकाऊर्वोरुपरिसंर
स्थाप्यउभेपादतलेतथा॥ पद्मासनंभवेत्सम्यक्सर्वपापप्रणाशनं॥ सम्यक्पद्मासनंबद्ध्वास
मग्रीवोदरःसुधीः॥ मुखंसंयम्ययत्नेनप्राणंघ्राणेनरेचयेत्॥ यथालगतित्कंठेकपालाव
६ धिपूरयेत्॥ वेगेनपूरयेत्सम्यक्हृत्पद्मावधिमारुतं॥ पुनर्विरेचयेत्तद्वत्पूरयित्वापुनःपुनः॥
यथैवलोहकाराणांभस्त्रावेगेनचाल्यते॥ तथैवस्वशरीरस्थश्चाल्यतेपवनोधिया॥ यथाश्र

११७

मोभवेद्देहेतथावेगेनपूरयेत्॥ यथोदरंभवेत्पूर्णंपवनेनतथालघु॥ धारयन्नासिकामध्ये
तर्जनीभ्यांविनादृढं॥ कुंभकंपूर्ववत्कृत्वारेचयेदिडयाततः॥ वा॥ तपित्तश्लेष्महरंशरीराग्नि
विवर्द्धनं॥ कुंडली॥ बोधनंकुर्यात्पापघ्नंसुखदंशुभं॥ ब्रह्मनाडीमुखेसंस्थकपाटार्गल॥ नाशनं॥
सम्यक्गात्रसमुद्भूतंग्रंथित्रयविभेदनं॥ विशेषेणैवकर्तव्यंभस्त्राख्यंकुंभकंत्विदं॥ शी
तलीजिह्वयावायुमारोप्यपूर्ववत्कुंभकादनुशनैस्तु॥ घ्राणरंध्राभ्यांरेचयेदनिलंसुधीः॥
गुल्मप्लीहोदरंचापिवातपित्तंक्षुधांतृषां॥ विषाणिशीतलीनामकुंभकीविनिहंतिच॥
पं याज्ञवल्क्यः॥ किंचप्राणजयोपायांतेवक्ष्यामितत्वतः॥ वाह्यात्प्राणंसमाकृष्यपूरयित्वोद
रंस्थितः॥ नाभिमध्यंचनासाग्रेपादांगुष्ठेचयत्नतः॥ धारयेन्मनसाप्राणंसंध्याकालेषुवाः
सदा॥ सर्वरोगविनिर्मुक्तोजीवेद्योगीगतक्लमः॥ नासाग्रधारणंगार्गिवायोर्विजयकार

योगचिं. रंध्रेसर्वरोगविनाशःस्यात्नाभिमध्येचधारणात्शरीरंलघुतांयातिपादांगुष्टेचधारणात्रस
११८ नांवायुमारोप्यपः पिबेत्सततंनरःश्रमदाहौतस्यनस्तोनश्यंतिव्याधयस्तथा॥संध्ययोर
र्कास्तकालेवावायुमाकृष्यपःपिबेत्त्रिमासात्तस्यकल्याणिजायतेवाक्सरस्वतीषण्मासा
भ्यासयोगेनमहारोगैःप्रमुच्यतेआत्मन्यात्मानमारोप्यकुंडलिन्यांतुधारयेत्क्षयरोगा
द्यस्तस्यनश्यंतीत्यपरेविदुःजिह्वायांवायुमानीयजिह्वामूलेनिरोधयेत्यःपिबेदमृतं
विद्वान्सकलंभद्रमश्नुतेआत्मन्यात्मानमिडयासमानीयांतरेभ्रुवोःपिबेद्यस्त्रिदशाहारंव्या
धिभिःसोपिमुच्यतेनाडीभ्यांवायुमारोप्यनाभौवातुंदपार्श्वयोःघटिकांवाहयेद्यस्तुर
व्याधिभिःसोपिमुच्यतेमासमेकंतुसंध्यायांजिह्वायांरोप्यमारुतंपिबेद्यस्त्रिदशा
हारंधारयेत्तुंदमध्यमेगुल्माष्ठीलाप्लीहाचान्येत्रिदोषजनितास्तथातुंदमध्यगतारोगाः
११८

वि सर्वेनश्यंतिकिल्बिषाःज्वराःसर्वेविनश्यंतिविषाणिविविधानिचबहुनोतेनकिंगोपि
लितादिनश्यंतित्रिपुरंसारसमुच्चयेराजदंतयुगलांतमस्पृशन्संनिधायरसनांतदंति
केकाकचंचुपुटमारुतंपिबेत्प्राणसंयमनमेतदुत्तमंद्विकचंचुसमीरणंशनैर्धयतःसं
रिक्रुष्यसंततंश्रमदाहगदोदरामयज्वरगुल्याःप्रशमंप्रयांतिचउभयोरपिसंध्ययोर्मुहू
र्तेपिकधातुर्यतस्त्रिमासमात्रंसरसंद्विकचंचुगंधवाहंभुविसारस्वतसिद्धिरुत्तमा
स्यात्॥विषमुग्रमुदग्रवीर्यभाजांप्रविनाशंसमुपैतिपन्नगानांकिमुवृश्चिककीटलूतिका
नामिहकाकोलमुखानिलस्यपानात्॥द्विकचंचुसमीरणंनरःसततंसंधःयरिप्येकसंध्य
योःकुरुतेनिजकुंडलीमुखेक्षयरोगंसविमुच्यजीवतिद्विकचंचुसमीरपानरोपःपिवती
त हार्नाशमववौतेंद्रःभवतिध्रुवमेवतस्यवर्षात्श्रवणंदर्शनमप्यतीवदूरात्बहुभिःकथितेन

मूर्छ्ना: किमेभिर्द्विकचंचुवातुसमीरणस्यपानात्तं॥ जरसा सह नाशमात्मुमानित्रवलंम्मृत्यु
कृतंभयंनराणां॥ जिह्वांञ्च त्वानाकुलस्तालुमूलेदंतैर्दृत्तानूगाढमापीड्यपित्वाममंदममंदं
११८ श्री मःपिवेद्दुधवाहसौधैःपूरैःसाकमंतःस्मृतं मिश्रैःप ड्भिर्मासैरत्ररोगैरशेषैः॥ पापायेतो मुच्य
त्तेसाधकेंद्रः॥ अब्दादेकांविस्त्रतांमृत्युदृतीजिव्हाभूमौरीर्घकालंसजीवेतत्तेवर्षत्रयाभ्या
सवशाद्दतीतमनागतंवेत्यलिनीलकेशः॥ विषनरेद्देहेक्रमतेतदीयेदृष्टेपिघोरैरपिप
न्नगेंद्रैः॥ नक्रत्रिमंस्थावरजंगमंवाविषंकिमन्यैरपिकालकूटैः॥ गुणाष्टकंकालवशाहुपैर
त्यमहीतलेक्रीडतिभैरवोवा पामुंडाधारदंडांतरकुहरगतताहारनीहारगौरीसौधी विव
धारांनभोमोद्भह कुहरविधोःसंस्त्रवंती वहंतींतस्यावज्राख्यनाड्याःखगमुदरदरी
मध्यगंयोविदध्यात्तस्यब्रह्मांडभांडप्रलयमवनंस्याद्दूनंमृत्युमृत्यो॥ मूर्छागतोहर ११८

५

तिरोगमशेष्यमद्धावद्धःकरोतिगगनेगमनंनराणां॥ वातोमतोवितनुतेमरतोसमस्त
मभ्यासतःसुलभमेवसमीरणस्य॥ शास्त्रांतरेशिववाक्यैरसस्यमन सश्चैवचंचलत्वं
समासतःरसोवद्धोमनोवद्धंकिंनसिध्यतिभूतलेमूर्छितोहरतेव्याधिंमृतोजीवयतिस्वयं।
वद्धःखेचरतांधत्तेमनोवायुश्चभैरविकिंचितुएतानेवप्राणायामान्योगिनांप्रमादा
ज्ञातविविधरोगेषुचिकित्सात्वेनोपवर्णयंतितदैसंगतंनयाध्यात्तःनचव्याकुलचेमनः तत्
नचितार्तःनाचरेद्देहवाधायांदौर्मनस्यादिसंभवद्’ ,त्यादिवहुभिर्वाक्यैरोगदशा
यांयोगाभ्यासस्यनिषिद्धत्वाद्दर्शितंचविस्तरेणपूर्वमेवअनुभवविरुद्धत्वाच्चपत्रेरोगना
शात्मकफलश्रवणंतत्तुसर्वांगसाधारणंनद्वित्रिप्राणायाममात्रस्यतथाहिसर्वज्ञंतुपु
ष्टथिव्यांवीजवत्सूक्ष्मरूपेणसर्वेरोगाव्याधयोज्वराघाश्चयेरोगास्तिष्ठंतितेकेचिद्दास

यो॰ चिं॰ नैः केचित्प्राणायामैः केचित्प्रत्याहारैः केचिद्धारणाभिर्न्नश्यंतीति सर्वयोगशास्त्रेषु स्पष्टमेवोप
१२० लभ्येत दर्शितं चास्माभिरपि पूर्वं तत्तत्प्रकरणे देवाज्ञातव्याधिरोगादिसर्वविघ्नानां निवारकं
परमेश्वराराधनमेवेति वक्ष्यते अन्ये च प्राणजयोपायाः प्रसंगात्प्रथमपरिच्छेद एव निरूपिताः
अपानादिजये विशेषो योगसागरे रेचकादिक्रमाज्जयो मान स्थान नियोगतः रेचकाभ्या स
सबाहुल्येनेत्यर्थः कालिकापुराणे अपानं कटिदेशे तु पृष्ठभागे विनिर्दिशेत् सदा तत्रैव
संधार्य एष वायुजयक्रमः समानस्थान संरोधाद्धृदयतोऽशनकैरियात् अत्रापि रेचकपू
रकाभ्यां स्थाननिरोधस्य विकल्पनात् [redacted] नाभौ मध्यरये दायुं शरीरं व्याप्य धारयेत् समा
नं जायते तदंतः प्रज्वलन्य दिपपस्य निष्कंपमानस तोयोगं ज्वलेत् वेद परिस्तुतः मोहयेद्व्योम रणम्
कूपे स्कन्त मेव व्यापकं मुनिः योगसारे नासाकर्षणयोगेन हृदमादिक्रमाद यं उत्कृष्यमाणो १२०

र॰ द्वी॰ वश्यलं तु द्वौ प्रयात्स लंघ्रः पादतलं पार्ष्णे हुत्यागत्य क्रिमागतः उक्तस्यानानुसंगे प्रातिश्रीघ्रंस न
म वश्यतां प्रयत्ना साम्ने संस्थाप्य हृत्कंठताल्वभ्रूमध्यमूर्द्धसु सक्रमात् दुर्द्धानुद्धेति गत्वा गत्वा रेचक
पूरककुंभकविषयप्रत्ययः [redacted]: कालिकापुराणे मूर्द्धान्वितेन चाकर्षन् कु
र्वन्नु च तरंस्वनं धारयन् जायते नूनमुदानं वायुदैवतं व्यानं तु योगसारे सर्वक्षेत्रे कुंभका
भ्यासात्संकोचप्रभृतेः क्रमात् जागृ आसियोगे न तु योव्यानद नैरितः सर्वेत्रं शरीरं कालिका
पुराणे पूरकुंभकस्येव रेचकस्य निगद्यते तेन साधितयेत् सूक्ष्मं योगी नित्यं पेक्षमात्तत प्रा या
णादिवायुजयोपायविशेषाः पूर्वोक्तस्थानवर्णबीजाद्यनुसंधानसहितापूर्वानुष्ठेयान निरपेक्षा
इति द्रष्टव्यं अथ युगपत्समस्तवायुजयोपायाः लक्ष्मीयोगार्णवे पूर्वेणावर्णबीजादिसंमेलत्वा मा
नाद्धृदयांबुजं एकीकृत्य तत्र सर्वहीच युगपत् जयेत् एकीकृत्य तत्पंकमले चित्र वर्णबद्धिस
प

हितं सकलवायुगोलकं मनसा विचिंत्य ततस्तं ब्रह्मरंध्रपर्यंतमंतरस्थानानि क्रमेण नीत्वा ब्रह्म-
रंध्रादर्वांतरस्थानोल्लंघनेन पादांगुष्ठाग्रं प्रावरावर्तनाद भ्यासाद्युगपत्तु येदित्यर्थः योगसारे ॥ प्रा-
णवृत्तिमपानेन संयोज्यो त्कृष्य तं हृदि व्यानमानीय तत्रैव मुदानेन सहैकतां नीत्वा न पेदुरोमध्ये
मध्यकंठतलं मुखं नासाग्रं नेत्रभ्रूमध्यललाटतलमूर्द्धगं कृत्वा कुर्या । ततः सर्वब्रह्मरायंध्रा व
यापि वा इत्युक्तः सर्ववायूनां शनकैर्युगपत्प्ये समानीतानुक्तो पिलभ्यत्वं तत्प्रतिबंधनात् ॥ का-
लिकापुराणे वायुं नीत्वा च नाभौ तु आग्नेयात्किंचिदुत्स जेत्तज येत्सु वनितेन वायून भ्या-
सतो मुनिः तयां ध्यात्वा यद्वारयेद्वायुं धारणानुक्रमेण तु यत्नेन योगविच्छ पूर्ववृत्तु स्तंद्वाविवर्जि-
तः ॥ एवमभ्यासयोगेन सूक्ष्मं ज्योतिः प्रपश्यति । अंघ्र्यं गुष्ठाग्रतन्मूलपार्ष्णिगुल्फानुजा-
नुयुपायूपस्थितयाबत्तो नाभिहृत्कंठवक्षसि जिह्वाघ्राणाक्षिके संधौ समं मूर्द्धनि संस्थि-

---

तं वितय न्य रमं धार्य स्यानुजिस्तेन तन्मयः ॥ याज्ञवल्क्यगीतायां योगिनस्त्वपरे ह्यत्र वदं-
ति समचेतसः ॥ प्राणायामपराः पूतास्त्वपूरकवर्जिताः ॥ दक्षिणेन तु गुल्फेन सीवनीं यो-
उये च्छिरां अधस्तादुभयोः सूक्ष्मां सव्योपरि च दक्षिणं जंघोर्वोरंतरं गार्गि निश्छिद्रं वंधये
दृढं ॥ समग्रीवशिरः स्कंधः समपृष्ठः समोदरः नेत्राभ्यां दक्षिणं गुल्फं लोकयंस्तु परिस्थि-
तं धारयं न्मनसा सार्द्धं व्याहरन्प्रणवाक्षरं आसनेन त्वधीरास्ते द्विजो रहसि नित्यशः ॥ क्षत्रि-
यश्च वरारोहे व्याहरन्प्रणवाक्षरं ॥ आसनेन त्वधीरास्तो ह्यस्य वजितेंद्रियः वैश्याः शूद्राः स्त्रि-
यश्चात्र योगाभ्यासरता नराः ॥ शैवं वा वैष्णवं वापि संस्मरन्मन्त्रमेव वा आसने तेसं धीयते दीपं ह-
स्तेव लोकयन् ॥ आयुर्विघातकृत्प्राणस्त्वनेनाग्निकुलं गतः ॥ धर्मध्वजजयो यावन्नास्य धीरेव
मभ्यसेत् धारणां कुर्वत स्तस्य शक्तिस्थाने प्रभंजनं ॥ देहस्थः स्तुवुनां यातिजठराग्नेश्च दीपनं ह

हृचिन्हस्ततस्तस्मिन्मनसारोप्यमानुतं॥ मंत्रमुच्चारयन्दीर्घेनाभिमध्येनिरोधयेत्॥ यावन्मनोल
यस्तस्मिन्नाभौसवित्मंडले॥ नावत्समभ्यसेद्योगी॥ नियतीतियैतो॥ निपतासनः एतेननाभिमध्य
स्थधारणेनेवमानुतंकुंडलीपातिवन्हिश्चरह स्पत्रनसंशयः संतप्तावन्दिनातेनवायु ना
चालितास्वयं॥ प्रसार्यफणमङ्गोगंप्रबोधंयातिसा तदा॥ प्रवक्ष्येसंचचत्रिणिब्रह्मरंध्रेसुषुम्णायां
प्रयातिप्राणसंज्ञकः॥ संप्राप्तेमारुतेतस्मिन्सुषुम्णायांवरानने॥ मंत्रमुच्चार्यमनसात्हन्मध्ये
धारयेत्सुधीः हृदयात्कंठकूपेचभ्रुवोर्मध्येच धारयेत्॥ तस्मादारोप्यमनसा वन्हिंप्राणमतन्द्रि न्र
धीः धारयेद्व्योम्निविप्रेंद्रेव्योमांहरत्प्रणवाक्षरं॥ वायुनापूरितेव्योम्नि संयोगोपांगेकलेवरे॥ तदा
त्माराजतेतस्ययथाव्योम्नि किर्तनः शरीरंविसिसृक्षुश्चेत्तदेवंसम्यगाचरेत्॥ एकाक्षरं
परंब्रह्मध्यायन्प्रणवमीश्वरं संनिधमनसामूर्ध्निब्रह्मरंध्रंसवायुनाप्राणमुन्मोचयेत्प्रश्वा

१२०

---

५९ ज्वलतिविप्रेंद्रे स्वकुलेरहमध्यमे॥ प्रातःकालेप्रदोषेच निशीथेचसमाहितः॥ मुहूर्तमभ्यसेदेवंयावत्पंचनखद्वयं॥ ततःस्वात्मनि
न्महाप्राणेखमध्यमेरहातीतेजगत्प्राणेशान्तेनित्येध्रुवेपदे आकाशेपरमानंदेस्वात्मानंयोज
येत्सुधीः अत्रैवासौभवेद्गार्गिनपुनर्जन्मभाग्भवेत्॥ तथागार्ग्युवाचभगवन्सर्वशास्त्रज्ञस
गी र्वभूतहितेरत नमोयंमोक्षाययोभवताभाषितस्फुवैयमाद्यष्टांगसहितोयोगोहिबहुविस्त
सर्व रःतरस्तद्विस्मृतंसर्वंकृतवं संनिधौयोगंम मोपदिश्याथसांगंसंक्षेपरूपतः त्रातुमर्हसिसं
वृत्तजन्मसंसारसागरात्॥ इत्युक्तोब्रह्मवादिन्याब्रह्मर्षिणस्तदा आलोक्यकृपयादृष्ट्यास्मि विहासि
तपूर्वमथाब्रवीत्॥ उत्तिष्ठोत्तिष्ठकिंशेषेभूमौगार्गिवराननेवक्ष्यामितेसमासेनयोगंसं
प्रतितंशृणु॥ याज्ञवल्क्यउवाच॥ सव्येनगुल्फेनगुदंनिपीड्यसव्येतरेणैवनिपीड्यसंधिं॥
सव्येतरेण्यस्यकरंसदास्मिन्नशिखांसमालोक्यपावकस्य आपुर्विधातक्तस्त्राण्योनि
रुद्ध्वास्वासतेनवैयातिगार्गितदापा नात्कुलंयन्नेहः शनैःशनैस्ततोप्रत्याहारमयकू॥

यो·चिं· संभवंतिसदानस्य जितोयेनसमीरणः॥ शरीरलघुतादीप्तिर्वह्नेर्जठरवर्तिनः॥ नादाभिव्यक्तिरि
त्येतच्चिह्नान्यादौ भवंति हि॥ स्वल्पमूत्रपुरीषंस्यात्षण्मासाद्वत्सरात्तथा॥ आसनेवाहनेष
१२३ त श्चान्नगंतव्यंत्रिवत्सरात्॥ ततोनिलेवायुसखेनसार्द्धंधियासमारोप्यनिरोधतन्येतैंध्यायं
त्सदाचक्रिणमप्रबुद्धंनाभौसदाकुंडलिनंनिविष्टं॥ द्वारंसमावेष्ट्यमुखेनमध्यमन्याःस्वभो
गेनशिरास्तथैवं॥ स्वपुच्छमास्येननिगृह्यसम्यक्कृत्वास्वसंयम्यमनुद्धुणानां॥ प्रबुद्धनागेंद्र
वदुच्छ्रसंतोससम्प्रबुद्धाप्रभयाज्वलंती॥ नाभौसदातिष्ठतिकुंडलीसातिर्यक्षुदेवेषुतथा
नरेषु॥ वायुनाचितनवह्निशिखाभिःकंदमध्यगतनाडिषुसंस्थां॥ कुंडलींदहतियस्त्वहि॰
रूपांसंस्मरन्नरवरस्त्वकसएव॥ संतप्तावह्निनात्रवायुनाचप्रचालिता॥ प्रसार्यफणभृद्भोगं
प्रबोधंयातिसाततः॥ बोधंगतेचक्रिणिनाभिमध्ये प्राणास्तुसंभूयकलेवरेस्मिन्॥ चरंतिसर्वेस १२३

हवह्निनैवयथापवेतंतुगतिस्तथैव॥ मित्येवचक्रिणःस्यान्नंसदाध्यानपरायणः॥ ततोतथ
वा दयानंतुनाभेरूर्द्ध्वमनुस्मरन्॥ वायुर्यदोपुसखेनसार्द्धंनाभिंव्यतिक्रम्यगतःशरीरे॥ रोगाः
प्रणश्यंतिबलाभिवृद्धिःकांतिस्तदानींभवतिप्रकृष्टा॥ ब्रह्मरंध्रमुखमत्रवायवःपाव
केनसहयांतिखमध्येकेनचेदिहवदामितवाहंवीक्षणाद्धृदिसुदीपशिखाभ्यांनिरो॰
धितःस्याद्धरितेनवायुमर्ध्येयदावायुसखेनसार्द्धंसहस्रपत्रस्यमुखंप्रविश्यकुर्यात्सु
नस्तूर्द्धमुखंद्विजेंद्रैः प्रबुद्धहृद्यांभोजेगार्ग्येस्मिन्ब्रह्मणःपुरे॥ बालार्कश्रेणिवद्भात्यविवि
रराजसमीरयाः॥ त्वन्मध्यात्तुसुषुम्णायांसंस्थितोहुतभुक्तदा॥ सजलांबुदमालासुवि॰
घु द्युल्लेखेवराजते॥ प्रबुद्धहृत्पद्मसुसंस्थितेस्मोप्राणेचतस्मिन्विनिवेशितेच॥ चिन्हानिबाह्या
नितथांतराणिदीप्तानिदृश्यानिभवंतितस्य॥ वायुमुन्नयनेस्कसवह्निंव्याहरन्प्रण
म

वमत्रसविंदुं॥ बालचंद्रसदृशेनललाटेबालचंद्रमवलोकयबुद्ध्या॥ सवन्हिंवायुमारोप्यभ्रु
वोर्मध्येधियानदां ध्यायेदनन्यधीःपश्चाद्दंतराःत्मानमात्मनिमध्यमेपित्हृदयेचललाटस्था
पुवज्ज्वलतिलिंगमदृश्यंअस्तिगार्गिपरमार्थमिदंत्वंपश्यपश्यमनसानुचिरूपंललाट
मध्येत्हृदयांबुजेचयःपश्यतिज्ञानमपीप्रभ्रांतुशक्तिंसदादीयवदुज्ज्वलंतीसंपश्यतिब्र
ग ह्मविदेकहृष्सां॥ मनोलयेंदायातिभ्रूमध्येयोगिनांनणां॥ जिह्वामूलेमतस्त्रावाभ्रूमध्ये
चात्मदर्शनेंकंपनंचतथामूर्द्धामिनसैवात्मदर्शनेंदेवोंनानिरम्याणिनक्षत्राणिच घ
चंद्रमाःऋषयःसिद्धगंधर्वाःप्रकाशंयांतियोगिनांभ्रुवोरंतरेविष्णुपदेनिविष्टमनोलयं
यावदियात्सबुद्धैतावत्समभ्यस्यपुनःस्वमध्येतेजःसदासंस्मरपूर्णरूपंसमीरणेविष्णुप
वि देनिविष्टेंशुद्धबुद्धेतवन्वात्मनिष्ठेंआनंदमत्यमृतमस्तिसत्यंत्वंगार्गिपश्याघविशुद्धबुद्ध्या॥

एवंसमभ्यस्यसुदीर्घकालंयमादिभिर्युक्तनुर्मितांशी॥ आत्मानमासाद्यगुहाप्रविष्टंमुतिंब्र घ
त जेब्रह्मपुरेसुनस्त्वंभूतानियस्मात्प्रभवंतिसर्गेये नैवजीवंतिचरोणिजानातियस्मिन्विलयं चरा
प्रयांतितद्ब्रह्मविद्धीतिवदंतिसर्वेंत्हृत्पंकजव्योम्निपरेकरूपंसत्यंसदानंदमयंसुसूक्ष्मंतद्ब्र
प ह्मविन्दावेंतगुहायामितिश्रुतेश्चापिसमानयंति॥ अणोरणीयान्महतोमहीयानात्मागु
हायांनिहितोस्यजंतोः॥ तमक्रतुंपश्यसिशुद्धबुद्ध्याप्रयाणकालेपिविदीनशोकाप्रभंजनं
मूर्द्धिगतंसवन्हिंधियासमासाद्यगुरूपदेशात॥ मूर्द्धानमुद्धिं पुनःस्वमध्येप्राणांस्त्यजो घ
कारमनुस्मरत्वंदृढयापरिशरीरविसर्गेत्वानुमिच्छसिसरवेनवक्ष्ये॥ व्याहरन्नेणवमुत्तमम्
द्धीभेदनंकुनुसत्यात्मनिकायमितिगीतायांसर्वद्वाराणिसंयम्यमनोत्हृदिनिरुध्यचेत्यादिषु
तोचशतंचैकाचत्हृदयस्यनाड्यस्तासांमूर्धानमभिनिःसृतैकातयोर्ध्वमापन्नमतत्वमेतिवि

यो·चिं· षुद्दः स्याउत्क्रमणेनभवंतिजीवन्मुक्तस्तपाचिरकालंस्थातुमिछाचेछरीरंरक्षणीयं॥योगिनातया
१२५ चदत्तात्रेयः जीवन्मुक्तःसदेहोहंविचरामिजगत्त्रयं॥इतिचज्ञापनेवांछायोगिनस्तंत्रिवोधमेश
रीरंनत्यजेदेवकाल ःकस्यापिकुत्रचित् अतःशरीररक्षार्थेयत्नःकार्यस्तयोगिनां॥योगिनास
नि ततंयत्नादरिष्टानां ॑वारणं॥ कर्त्तव्यंयेनकालोसार्वे .त्तोननिहंतितं॥ अरिष्टानितुव तो
क्ष्यंते ज्ञात्वाकालं ॑तुसम्पक्व लपस्थानंसमाश्रितः॥युंजीतयोगंकालोस्ययथासोजाय
तेऽफलं॥वद्धसिद्धासनोदेहंपूरयेत्प्राणवायुना॥ह्रत्वादृढंस्थिरंवुध्यादशद्वाराणिरोध
येत्॥बंधयेत्खेचरीमुद्रांग्रीवायांचजलंधरं॥अपानेमूलबंधंचउड्डियानंतथोदरे॥उत्था
प्यभुजंगीशक्तिंमूलाधारांवुजस्थितां॥सुषुम्णांतर्गतांपंचचक्राणांभेदिनींशिवां॥जीवंत्व
दाश्रयंनीत्वायांतीवुद्धिमतीनुगां॥सहस्रदलपद्मस्यशिवेलीनांसुधामये॥ततःसुधा १२५

प्ला येत्॥
कृऐम्ऋतममनंतेनमृत्स्नः॥ सिंचंतीसकलंदेहं[redacted]वयंतीविचिंतेत्तपासाद्वैततोयोगीशिवेनैका
क्यतांव्रजेत्॥परानंदमयोभूत्वाविहृतिमपिसंत्यजेत्॥ततोलक्ष्यमनाभासमहंभावविव
सदा र्जितं॥सर्वामकल्पताहीनंकालोनिहंतिनं॥सएवकालःसशिवःसर्वत्रापि॥किंचनंकःकेनह न
न्यतेतत्रम्रियतेनापिकश्चनं॥ततोव्यतीतिसमपेकालस्यभ्रांतिरूपिणः॥योगीसुप्तोत्थि
तद्वत्प्रवोधेप्रतिवोधितः॥एवंसिद्धोभवेद्योगीवंचयित्वाविधानतः॥कालंकल्पितसंसारंपा
नुपेणाद्भुतेनहि॥ततस्त्रिभुवनेयोगीविचरत्येकएवसः॥परफन्संसारवैचित्र्यंस्वेछयोनि
रहंकृतिरिति॥अथप्राणादिवायुजयेचिन्हान्युपलक्षयेत्॥स्कंदपुराणे॥प्राणेतुनिर्जितेस
म्यक्तचिन्हान्युपलक्षयेत्॥विण्मूत्रश्लेष्मदोषाणांस्वल्पभावःप्रजापते॥वहुभोजनसामर्थ्य
चिरादुछ्वसनंतथा॥आरोग्यंशीघ्रगामित्वमुत्साहस्वरसौष्ठवं॥वलवर्णप्रसादश्चसर्वदोषक्ष

यो॰चिं॰ यस्तथा॥ एवमादीनि चिन्हानि सत्वस्थः स्यैव जायते॥ वायुसंहितायां प्राणे तु विजिते सम्यक् त
च्चिन्हान्युपलक्षयेत् लघुत्वं शीघ्रगामित्वमुत्साहस्वरसौष्ठवं सर्वरोगक्षयश्चैव बलं तेजः सु
१२६ प॰ रूपता॥ धृतिर्मेधायुवत्वं च स्थिरता च पुमर्थतो दत्तात्रेयः ततोधिकतराभ्यासाद्बलमुत्प
त द्यते भृशं येन भूचरसिद्धिः स्यात् भूचराणां जयापहा व्याघ्रो लुलायो वन्यो गवयो गज
एव वा सिंहो वा योगिना तेन म्रियंते हस्ततालना तूनं कुलीशा योगपरायणे॥ प्राणस्य नि
यमे स्यातां दीर्घश्वासमनुज्जयो॥ विण्मूत्रस्याल्पता भावो रुजां नाशो पानं निर्जयेत् तु
भुक्षाक्षयो वन्हेरौदर्यस्याति पाटवं क्षतभग्नावरोहश्च समानस्य जये मतः जयादुदान्त
द स्योत्क्रांतिरं तिश्च जलादितः व्यानस्यारिव लनुद्भाशः शीतोष्मासंगनि स्त्वचि॥ समस्त
फलमेवैतन्मंतव्यं युगपज्जयेरचकाभ्यासत्तोशेषकल्पनानां च संक्षयः इति प्रायाः॥ १२६

वायूनां रेचकादेः फलं स्मृतं कालिकापुराणे वा पू॰ ब्रह्मत्योक्तं॥ एतेर्जिते निर्जयेद्धीमान् स्तत्वमु
र्व्यादिसंज्ञितं सर्वज्ञो जायते नूनं तेजिते योगविन्मुनिः कामान्कामीत्ववाप्नोति गुरुत्वं जाय
ते महत् यदापानं जये द्धीमानल्पविण्मूत्रसंभवः पातालादौ भवेत्प्राप्तिर्ल्लोलिया योगिनो
ध्रुवं क्षतस्य रोहणं साम्यं जठरे च विभावसोः बहुभोजी भवेन्नूनं भवेत्सत्वात्मको मुनिः॥
३॥ सत्वात्मको दैकत्वं तदैकत्वाद्यतन्मयः शस्त्रेण छिद्यते नैव न वापः क्लेदयंति हि व्याध
षंनैव योर्यर्विक्रमते व्यानशासनात्॥ योगभास्करे यावदंतः स्फुरेन्नाडी दीपावच्छितं चलीयते॥
॥ तावद्दुर्स्थं न योगी स्यान्न तत्त्वाद्रूढयोगवान्॥ आरूढयोगश्च भवेदृशा द्वादशाद्वत्सरात्॥
तथा नाडीशुद्धानंतरमुक्तं एवमुत्पन्नयोगीस्याच्छृणुष्वारूढयोगिनं॥ उत्पन्नयोगिनो दे
हः पुष्टोपि कृशतां व्रजेत्॥ आरूढयोगिनो देहः कृशोपि स्थूलतां व्रजेत्॥ उत्पन्नयोगिनश्चिर

 त्वबलादेकत्र नीयते आरूढयोगिनश्चित्तं तत्कदाचिच्चलं भवेत् उत्पन्नयोगी निर्विघ्न आरूढ
 स्तु सदा सुखी॥ उत्पन्नयोगी मंदाग्निरारूढस्तु महाशनः भक्षितान्यस्य जीर्यंते फलपुष्पद
लान्यपि स्थानत्रयात्परं प्राप्ते वायो बिंदुर्जीर्यते सिद्धस्य त्रीणि चिन्हानि दाता भोक्ता प्र
वंचकः इति॥ योगबीजे गुरुप्रसादान्मरुद्देवसाधितस्तेनैव चित्तं पवनेन साधितं स ए
व योगी स जितेंद्रियः सुखी मूढा न जानंति कुत र्कवादिनः चित्तं प्रनष्टं यदि भासते तेन
त्र प्रतीतो मरुतोपि नाशनः न वा यदि स्यान्न तु तस्य शास्त्रं नात्मप्रतीतिर्न गुरुर्न मोक्षः॥
जलौकारुधिरं यद्वद्बलादाकर्षति क्षिकवं ब्रह्मनाडी तथा धातून्संततनाभ्यासयोगतः अ
नेनाभ्यासयोगेन नित्यमासनबंधतः चित्तं विलीनतामेति बिंदुर्नो याति सर्वथा रे
चकं पूरकं त्यक्त्वा वायुनास्थीयते चिरं नानानादाः प्रवर्तंते संस्रवेच्चंद्रमंडलं॥ नश्यं

ति क्षुत्पिपासाद्या दोषाः सर्वे तथा सततं स्वरूपे सच्चिदानंदे स्थितिमाप्नोति केवले इति मार्कं
डेयपुराणे अलौल्यमारोग्यमनिष्ठुरत्वं गंधः शुभो मूत्रपुरीषमल्पं कांतिः प्रसादः स्वर
सौम्यता च योगप्रवृत्तेः प्रथमं हि चिन्हं अनुरागी जनो याति परोक्षे गुणकीर्तनं न बिभ्यंति च
सत्वानि सिद्धेर्लक्षणमुत्तमं॥ शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न विद्यते न भीतिमेति र
चान्येभ्यस्तस्य सिद्धिरुपस्थिता तथा वै योगयुक्तस्य योगिनो नियतात्मनः सर्वे दोषाः
प्रणश्यंति सुस्थश्चैवोपजायते वीक्षते च परं ब्रह्म लोके प्रांतांश्च गुणान्पृथक् व्योमादिप
रमाणूंश्च तथात्मानमकल्मषं श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयं धृतिः प्राप्ति
स्तथा संवित्प्रसादश्च महीपते स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात् कर्मणामि
ष्टदुष्टानां जायते फलसंक्षयः चेतसोऽल्पकषायत्वाद्यत्र सा धृतिरुच्यते ऐहिकामु

यो·विं· ष्मिकान्कामांल्लोभमोहादिकांश्च यान् निनुद्यास्तेसदा योगी प्राप्तिः सा सार्वकामिकी अतीता
नागतानर्थान् विप्रकृष्टतिरोहितान् विजानाति दूरसूर्यर्क्षग्रहाणां ज्ञानसंपदा ॥ तुल्यस्वभाव
१२८ वतां राजन् योगी प्राप्नोति चेप्सदा तदा संविदितिरव्याता प्राणायामस्य सास्थितिः यांति प्रसादं ये
नास्य मनवायवः इंद्रियाणींद्रियार्थाश्च सप्रसाद इतीरितः वसिष्ठः संध्ययोरुभयोर्नित्यं गायत्र्याप्र
णवेनवा प्राणसंयमतं कुर्याद्ब्राह्मणो वेदपारगः नित्यमेवं प्रकुर्वीत प्राणायामांस्तु षोडश अपिभ्रू
णहनं मासात् पुनंत्यहरहः कृताः क्रतुत्रयात् पुनंत्येतान् मांतरं कृतादध्वात् वत्सराद्धस्त विद्वान् सं
नस्यात् तस्मान्नित्यमभ्यसेत् योगाभ्यासरताश्चैवं स्वधर्मनिरताश्च ये प्राणसंयमनेनैव
वसर्वे मुक्ता भवंति हि स्कंदपुराणे प्राणायामनि नूपणानंतरमुक्तं ब्रह्मचारी जितक्रोधो जि
तलोभो विमत्सरि अदमित्यं सदाभ्यासो योगी निगीयते हठप्रदीपिकायां आसनं कुंभकं चित्र १२८
न योगीति

+ संकल्पो जायते त ५

त्रं मुद्राख्यं करणं तथा अथ नादानुसंधानमभ्यासानुक्रमेण च ब्रह्मचारी मिताहारी त्यागी यो
द्वि गपरायणः अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा वपुः कृशत्वं वदने प्रसन्नता नादस्फुटत्वं नयः
जप नेसुयुनिर्मले अरोगिता विंदुजयोग्निदीपनं नाडीविशुद्धिर्हठशुद्धिलक्षणं ईश्वरप्रोक्तं आरंभ
श्च घटश्चैव तथा परिचयोपि च निष्पत्तिः सर्वयोगेषु योगावस्था भवंति ताः तथा हि यदा ना
डीविशुद्धि स्याद्योगिनस्तत्त्वदर्शिनः तदा विध्वस्तत्वदर्शिनः तदा विध्वस्तपापस्य भवेदा
रंभसंभवः चिन्हानि योगिनो देहे दृश्यंते नाडिशुद्धितः कथ्यंते मम भक्तायतानि संक्षेपतो
मया समकायः सुगंधिश्च सुकांतिः सरसाधरः प्रौढवन्हिः सुभोगी च सुखी सर्वांगसुंद
रः संपूर्णहृदयो योगी सर्वोत्साही बलान्वितः ततोयथेष्टशक्तिः स्याद्योगिनो वायुधारणे ॥
यथेष्टधारणाद्वायोः कुंभकः सिध्यति ध्रुवं केवलकुंभके सिद्धे किं तस्यादिह

यो॰ चिं॰ योगिनः स्वेदः संजायते देहे योगिनः प्रथमो धमः॥ द्वितीयो जायते कंपो दर्दुरो मध्यमो मतः॥
यदा संजायते स्वेदो मर्दनं कारयेत्सुखं अन्यथा विग्रहे धातुर्नष्टो भवति योगिनः॥ ततोधिकत
१२९ राभ्यासाद्भूसुतः साधकोधिपः योगोप ग्रासनस्थोपि भुवमुत्सृज्य वर्तते वायुसिद्धिस्तदा ज्ञेया
कु संसारध्वांतनाशिनी तावत्कालं तु र्बीत योगोक्त नियमग्रहं॥ स्वल्पनिद्रा पुरीषं च स्तोकं मूत्रं
च जायते॥ अरोगित्वमदीनत्वं योगिनस्तत्वदर्शिनः॥ स्वेदलाला कृमिश्चैव सर्वथैव न जायते॥ कफ
पित्तानिलाश्चैव साधकस्य कलेवरे॥ तस्मिन्काले योगिनस्तु भोज्ये पुनि यम ग्रहः॥ अत्यल्पं बहुवा
भुक्त्वा योगी न व्यथते तदा॥ तथा रहस्युपाविष्टः साधकः संयतेंद्रियः प्रणवं प्रजपेद्दीर्घं विघ्ना
नां नाशहेतवे॥ प्राणायामेन योगींद्रः सर्वैश्वर्याष्टकानि च॥ पापपुण्योदधिं तीर्त्वा त्रैले।वेत्र रामा॰
रतां व्रजेत्॥ अथ तत्सिद्धौ॥ वायुः सिद्धो यदा देहे संवित्तिर्जायते तदा॥ संवित्तेः क्रमयः सर्वाः संभ १२९

वंति च योगिनां॥ यदा तु सिध्यते ऋद्धिस्तदा सिद्धिरदूरतः॥ सिद्धरूपो हि यो वायुर्मध्यमापथ
संगतः॥ तदानंदमयं चित्तमेकरूपं मनोमयं॥ यदानंदमयं चित्तं बाह्यक्लेशविवर्जितं॥ भवदुःखा
निसंतत्य समाधिर्जायते तदा॥ यदा समाधिसंपन्नं सहजानंदसंभृतं चित्तं स्यात्तदा सिद्धं सर्व
दुःखभयापहं॥ यत्करोति यदा योगी सर्वं भवति तत्क्षणात्॥ योगिनः सिद्धकायस्य जानीयाल्लक्ष
णं ध्रुवं॥ कायस्पृहादिकं पश्च परमेश्वरनईक्षणं श्रवणं दू॥ तत्तत्सिद्धं वायुं वायुलक्षणं॥ जीव वै
न्मुक्तिस्तदा तेया सर्वाभीष्टफलप्रदा॥ जीवन्मुक्तिगतो योगी महामुक्तिपदं व्रजेत्॥ स्वेच्छासमा
न्तो धिसंपर्के योगींद्रो हि भवेत्तदा॥ तदा महासमाधिश्च धर्ममेघसमाह्वयः॥ तदानंदमयो योगी सर्व
ज्ञः सर्वदर्शनः संपूज्यस्त्रिषु लोकेषु अव्याहतज्ञश्च सर्वदा॥ अव्याहतगतिः प्राज्ञो व्याहतानंदसं
भृतः सर्वैश्वर्यगुणोपेतः सर्वसिद्धिसमन्वितः अवध्यः सर्वभूतानां योगींद्रो दोषवर्जितः॥ तस्मात्स दो

र्वमेषायोगीसर्वभूतमयोहिसः॥ संतुष्टस्तारयेल्लोकान्क्रुद्धःसर्वविनाशकः॥ज्ञातसिद्धिर्यदायोगीतदा
नैवभयंकरः॥एवंवर्षसहस्राणिल क्षाणिचशतानिच॥पर्वताग्रेगुहावासमानंदाःसिद्धयोगिन
 इतिईश्वरप्रोक्ते॥ततोभ्यासक्रमेणैवघटादित्रितयंभवेत्॥येनस्यात्सकलासिद्धिर्योगिनःप्रेप्सि
ताध्रुवं॥वाक्सिद्धिःकामचारित्वंदूरदृष्टिस्तथैवच॥दूरश्रुतिःसूक्ष्मदृष्टिःपरदेहेप्रवेशनं॥विण्मूत्रले
पनेस्वर्णमदृश्यकरणंतथा॥भवंत्येतानिमहतांखेचरत्वंचयोगिनां॥यदाभवेद्घटावस्थापवना
भ्यासिनांपरा॥तदासंसारचक्रेस्मिंस्तन्नास्तियन्नसाधयेत्॥दृढासनोभवेद्योगीज्ञानीदेवसमस्त
था॥आसनेषुदृढीभूतेवायुर्मध्येविशत्यसौ॥किंचिद्वायुप्रवेशेनयोगिनोज्ञानसंभवः॥संजातेज्ञान
संभारेयोगीदेवसमोभवेत्॥दोषदुःखक्षुधानिद्राजरामृत्युविवर्जितः॥सृष्टिसंहारकर्त्तासौयो
गीश्वरसमोभवेत्॥अस्तुवामास्तुवासिद्धिरत्रैवारव्यं(ज्ञि)तंसुखं॥प्राणापानोनादबिंदूजीवात्मप

रमात्मनो॥मिलित्वाघटतेयस्मात्तस्माद्धिघटउच्यते॥याममात्रंयदाधर्तुंसमर्थःस्यात्तदाद्भुतः॥प्रत्या
यघ हारस्तदैवस्यान्नांतराभवतिध्रुवं॥यं यं जानातियोगीन्द्रस्तत्तदात्मनिभावयेत्॥यैरिंद्रियैर्विधानं
द्रि तुतदिंद्रियजयोभवेत्॥याममात्रंयदापूर्णंभवेदभ्यासयोगतः॥एकवारंप्रकुर्वीततदायोगीतुकुंभकं॥
दंडाष्टकंयदावायुर्योगिनोनिश्चलोभवेत्॥असामर्थ्यात्ततोगुह्यात्तिष्ठेद्वातृणवत्सुधीः॥ततःपरिचया
वस्थायोगिनोभ्यासतोभवेत्॥यदावायुश्चंद्रसूर्यौत्यक्त्वातिष्ठतिनिश्चलः॥वायोःपरिचितेवायुः
सुषुम्णाव्योम्निसंचरेत्॥क्रियाशक्तिंगृहीत्वातुचक्रान्भित्वातुनिश्चितं॥तदापरिचयावस्थाभवे
दभ्यासयोगतः॥त्रिकूटंकर्मणोयोगीतदापश्यतिनिश्चितं॥ततःस्वकर्मकूटानिप्रणवेनविनाश्य
कायः[illegible] च॥योगीस्वकर्मभोगार्थंव्यूहंसमाचरेत्॥अस्मिन्कालेमहायोगीपंचधाधारणांचरेत्॥येनभूवरसिद्धिः गं
स्यात्ततोभूतभयापहा॥आधारेघटिकाःपंचनाभिस्थानेतथैवच॥तदूर्ध्वेघटिकाःपंचनाभिभ्रूमध्यगेत

यो॰चि॰ याभूमध्याद्देत्तयापंचघटिकाधारयेद्बुधः॥ तदासुवादिनानष्टो योगी ज्ञेन भवेत्खलु॥ मेधावी पंचभू
१२१ तानां धारणां यः समभ्यसेत्॥ शतब्रह्मगतेनापि मृत्युस्तस्य न विद्यते॥ ततोभ्यासक्रमेणैव निष्प
त्तिर्योगिनां भवेत्॥ अनादिकर्मबीजानि येन छित्वा मतं भवेत्॥ यदा निष्पत्तिसंपन्नः समाधिः स्वेच्छ
या भवेत्॥ जीवन्मुक्तस्य मासात्तु भवेद्धीरस्य योगिनः॥ गृहीत्वा चेतना वा युक्त्रियाए किंचवे भगवान्
धा सर्वांश्चक्रान्विभिद्य ज्ञानयज्ञो विलीयते त्रिकूटं कर्मणां इत्यादेरयमर्थः॥ कानिचित्कर्माणि
प केवलस्वर्गभोग्यानि कानिचित्तु नरकवीच्यादिनरकैकभोग्यानि कानिचिन्मर्त्यलोकोपभो
स्ठे ग्यानीतीदं कर्मणां त्रिकूटत्वात् तद्भोगार्थं स्वै[illegible]र्यानुभवाय च योगी कायव्यूहं स भावरेत् तत्सम्भि रा॰म॰
यापयापाते जले साक्षात्कृततत्त्वस्य योगिनो युगपत्कर्मफलोपभोगाय प्राणिमात्राष्टैश्वर्यानुभवा
य च युगपन्निर्मितेषु चिंतानिमित्तकारणस्मितामात्रात्संभवंति अग्नेरिव स्फुलिंगाः॥ ते याच चि १२१

तानां योगाभ्यासकालीनमलभंजेकस्वित्तप्रयोज्यत्वात् तदनुसारित्वं तेषां च जन्मादिसिद्धिप्रभव
चित्तविलक्षणत्वहेतुकर्मवासनारहितत्वं चोक्तं योगिनः स्वफलत्यागानुसंधानकृतत्वादन्यकर्मवि गा
लक्षणमरणलक्षकर्माक्कर्मणश्च फलत्यागानुसंधानेनानुष्ठानात्फलानारंभं सहस्रजन्मा मा
न्तरितप्राचीनज्ञानवासनायामपि तत च्छरीरग्रहणे आनुभूतस्मृत्यादिकफलोत्पादनेन आनंत
यो र्यं वासनानामनादित्वं अनादित्वेपि क्रमेणानुभवरागविपाकमलत्वात् ज्ञानयोगाभ्यासो वाँदग्धक विद्याय
ल्पत्वेन निर्मलत्वात्कर्मणां सुत्पत्त्वं नतु भोगे नैव कर्मक्षयश्चेत्तर्हि प्रायश्चित्तमिति या य
दः क श्रुतिस्मृतीतिहासपुराणादि कर्मप्रमाणं स्यादिति चेत् न कर्मवैचित्र्यात्॥ तथाहि संचितानां स
र्वप्राणिनां कर्माणि कानिचित्कृच्छ्रचांद्रायणादिदेहांतप्रायश्चित्तनाश्यानि कानिचित्तु ज्ञा
नध्यानयोगादिनाश्यानि कानिचित्तु भोगैकनाश्यानि तत्र यानि भोगैकनाश्यानि तद्भोगार्थं यो

गिनाकायव्यूहः कर्तव्य एव यच्च नाभुक्तं क्षीयते कर्मेत्यादिवाक्यं तत्र योगेकृतात्प्रारब्धकर्मवि
षयं भक्तुमप्राप्यप्रतिनानोप्राणि नानाभोगं विना कर्मक्षोभनतस्तेन तद्विषयं वाक्यं॥ अन्यथामाय
श्चितप्रतिपादकालेन वा भवंति॥ तथा चामृतसिद्धौ॥ व्याधिता दुर्बलाहृद्धानिःसत्वागृहवासिनः॥
मंदोत्साहा मंदवीर्या ज्ञातव्या मंदवोत्तराः॥ द्वादशभिर्वत्सरैरधिकारिभेदेन बहुकालेनाल्पकालेन वा
द्वै॥ भवंति॥ तथा चामृतसिद्धौ वर्षै रेषामेकावस्थाप्रसिध्यतिनीतिप्रोढाः समाभ्यासाः सवीर्याः समबु
द्धयः॥ मध्यस्थायोगमार्गेषु तथा मध्यमयोगतः॥ मध्योत्साहा मध्यरागा ज्ञातव्या मध्यविक्रमाः॥ अ
ष्टाभिस्तु वर्षैरेषामेकावस्था प्रसिद्ध्यति॥ वीर्यवंतोदयावंतः क्षमावंतो महाशयाः॥ स्वस्थानेसंस्थि
ताः स्वस्था भवेयुः स्थिरबुद्धयः॥ साक्षराश्च सदाभ्यासाः सदा सत्कारसंयुताः॥ ज्ञातव्याः पुण्यकर्मा
णो ह्यधिमात्राधियोगिनः॥ एकावस्थाधिमात्राणां षड्भिर्वर्षैः प्रसिद्ध्यति॥ महाबला महाकाया महा १३२

वीर्या महागुणाः॥ महामोहोक्तिताः शांता महाकारुणिका नराः॥ सर्वशास्त्रकृताभ्यासाः सर्वलक्षणभू णं
षिताः॥ सर्वतत्त्वदृशाकाराः सर्वव्याधिविवर्जिताः॥ वरयौवनसंपन्ना निर्विकारा नरोत्तमाः॥ निर्मलाश्च
निरातंका निर्विघ्नाश्च निराकुलाः॥ जन्मांतरकृताभ्यासा गोत्रवंतो महाशयाः॥ तारयंति च सत्त्वा
नि तरां तिस्वयमेव च॥ अधिमात्रतराः सत्वा ज्ञातव्याः सर्वलक्षणाः॥ त्रिभिः संवत्सरैरेषामवस्थै
काप्रसिद्ध्यति॥ अवस्थाभिश्चतसृभिर्योगः संपूर्णतां व्रजेत्॥ योगशास्त्रे॥ द्वाराणां नवकं निरु
ध्य मरुतं पीत्वा दृढं धारितं नीत्वाकाशमपानवह्निसहितं शक्त्या समुच्चालितं॥ आत्मध्यानयु
(पनादि तं त्वनेन बिंबस्य भूद्वि स्थितं यावत्तिष्ठति तावदेव मनुतां संगेन संभूयते॥ नाभौ संयम्य चितं प
वनगतिमधः संनिरुध्य प्रयत्नादाकुंच्यापानमूलं हुतवहसशिखं तं तु नत्सूक्ष्मरूपं तत्रोत्था स्वं
हृत्सरोजे तदनु च गलके तालुनि ब्रह्मरंध्रे भित्वा शून्याति शून्यं प्रविशति गगनं यत्र देवो महेशः

यो॰वि॰ वासिष्ठे पर्युष्ठकापरारव्यस्य जीवस्य प्राणनात्मकं॥ विद्धि कुंडलिनी मंतरामोदस्येव मंजरी॥ भूतां च
१२३ फूत्करकाभ्यासादापूर्य स्थीयते समंततः दैतिभेरवंस्पे पर्यकायस्य पीनता तथा॥ यदा पूरकपूर्णांतरा
यतमाणमाः चुतेनीयते संविदे वोर्ध्वसोदं धर्मश्च संक्रमं सर्पवत्वरितैवोर्ध्वयाति दंडोपमा गतानां ना
डीः सर्वाः सपादाय देहलङ्कालतोपमाः॥ तदा समस्तमेवेदमाश्वावपति देहकंनीरंध्रयवनापू
त्य र्णाभस्त्रेवार्धगतेन रेचकाभ्यासविलासेन योगेन व्योमगामितां योगिन आप्नुवंत्युच्चैः ईनांइद्दररा
मिवंवहिर्नाडीप्रवाहेन शक्तिः कुंडलिनी यदा सहिरूर्ध्वकपाटस्य द्वादशांगुलमूर्ध्नि रेचकेन
प्रयोगेन नाडीगतनिरोधिना मुहूर्तंस्थिति ~~[illegible]~~ माप्नोति तदा व्योमगदर्शनं विद्धि त.
नाद्गसंस्थेन बुद्धिनत्रैणरक्तैर्दृश्यते व्योमगाः सिद्धाः स्वप्नवत्सार्थदा अधिमुखाद्बहिर्द्वादे रुम·
शांते रेचकाभ्यासयुक्तिनः प्राणे चिरं स्थितिं नीते प्रविश्य परापुरे॥ सर्वथात्मनि तिष्ठेत्स्वेच्छकौ १२३

चेद्दिगमाममोौ॥ तज्ज्ञेतोर्ह्रीयते व्याधिरंतर्मीनुतरो ध्रुतः॥ राज्यादिमोक्षपर्यंताः समस्ता एव संपदः॥
देहानित्वविधेयित्वसाध्याः सर्वस्यैव वै॥ अथ प्रत्याहारनिरूपणं तत्र प्रत्याहारस्वरूपफलं
चाह भगवान्पतंजलिः स्वस्वविषयसंयोगे चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहारः ततः परमा
वश्यतेंद्रियाणामिति सूत्राभ्यां एतदर्थस्तु इंद्रियाणि स्वस्वविषयेभ्यः प्रतीपमाहियंतेऽस्मि ते
न्निति प्रत्याहारः सकथं निष्पाद्यत इत्यत आह चक्षुरादीनामिंद्रियाणां विषयो रूपादिस्तेन संयो
गस्तदाभिमुख्येन वर्तनं तदेकभावस्तदाभिमुख्यं परित्यज्य स्वरूपमात्रेवस्थानं तस्मिन्स
ति चित्तमात्रानुकारीणि भवंति ततश्चित्तमनुवर्तमानानि मधुकरराजमिव मक्षिकाः सर्वा
णींद्रियाणि प्रयांति अतश्चित्तनिरोधेन तानि प्रत्याहृतानि भवंतीति तन [illegible] वमभ्यस्यमाने प्र
त्याहारे तथा वश्यानि आयत्तानि संपद्यंते यथा बाह्याभिमुखं नीयमानान्यपि न यांतीत्यर्थः शि

यो·चिं· वगीतायां॥इंद्रियाणां विचरतां विषयेषु स्वभावतः॥निग्रहः प्रोच्यते सद्भिः प्रत्याहारः स उच्यते॥

१३४ योगशास्त्रे॥चंद्रामृतमयां धारां प्रत्याहरति भास्करः॥यत्प्रत्याहरणं तस्याः प्रत्याहारः स उ

च्यते॥यथा तृतीयकालस्थो रविः प्रत्याहरे[illegible]त्प्रभां॥तृतीयांशस्थितो योगी विकारं मानसं त यो

चि था॥याज्ञवल्क्यः॥इंद्रियाणां चरतां विषयेषु स्वभावतः॥बलादाहरणं तेषां प्रत्याहारः स

उच्यते॥यद्यत्पश्यति तत्सर्वं पश्येदात्मवदात्मनि प्रत्याहारः स च प्रोक्तो योगविद्भिर्महात्मभिः॥

कर्माणि यानि नित्यानि विहितानि शरीरिणां॥तेषामात्मन्यनुष्ठानं मनसा यद्बहिर्विना॥प्रत्या

हारो भवेत्सोपि योगसाधनमुत्तमं॥प्रत्याहारे प्रशस्तं तत्सेवितं योगिभिः सदा॥अष्टादशासु य

द्वायोर्मर्मस्थानेषु धारणं॥स्थानात्स्थानात्समाकृष्य प्रत्याहारो निगद्यते॥अश्विनौ तु तथा

प्रोक्तौ गार्गि देवभिषग्वरौ॥मर्मस्थानानि सिद्ध्यर्थं शरीरे योगमोक्षयोः॥तानि सर्वाणि वक्ष्या

१३५

२ मि यथा क्रमशः शृणु सुव्रते॥पादांगुष्ठे च गुल्फे च जंघामध्ये तथैव च॥चितेर्मूले च जान्वोश्च मध्ये चो

रुद्वयस्य च॥पायुमूलं ततः पश्चान्मध्ये देहं च मेढ्रकं॥नाभिश्च हृदयं गार्गि कंठकूपस्तथै

व च॥तालुमूलं च नासाया मूलं चाक्ष्णोश्च मंडले॥भ्रुवोर्मध्यं ललाटं च मूर्द्धा च मुनिसत्तमे॥मर्म

पृ·५५॥ स्थानानि चैतानि मानं तेषु पृथक् शृणु॥पादात्मानं च गुल्फस्य सार्द्धांगुलचतुष्टयं॥गुल्फाज्जंघा

स्य मध्यं तु वि[illegible]ज्ञेयं तु दशांगुलं॥जंघामध्याच्चितेर्मूलं यत्तदेकादशांगुलं॥चितिमूला

द्वरारोहे जानुः स्याद्द्व्यंगुलद्वयं॥जान्वोर्नवांगुलं प्राहुरूर्वोर्मध्यं मुनीश्वराः॥ऊरुमध्यात्तथा गार्गि प

गार्गि पायुमूलं नवांगुलं॥देहमध्यं तथा पायुमूलात्सार्धांगुलिद्वयं॥देहमध्यात्तथा मेढ्रं त

द्वत्सार्धांगुलिद्वयं॥मेढ्रान्नाभिश्च विज्ञेया गार्गि सार्द्धदशांगुलं॥चतुर्दशांगुलं नाभेर्हृन्म

ध्यं तु द्विजोत्तमे॥षडंगुलं तु हृन्मध्यात्कंठकूपस्तथैव च॥कंठकूपात्तु जिह्वाया मूलं स्याच्चतु

यो·चिं· रंगुलं॥ नासामूलं तु जिह्वायामूलात्तु चतुरंगुलं नेत्रस्थानं तु तन्मूलादर्धांगुलमितीष्यते॥ त
स्मादर्धांगुलं चैव भ्रुयोरंतरमात्मनः॥ ललाटाख्यं भ्रुवोर्मध्यादूर्द्ध्वं स्यादंगुलत्रयं॥ ललाटा
१३५. द्व्योमसंज्ञं तदंगुलत्रयमेव च॥ स्थानेष्वेतेषु मनसा वायुमारोप्य धारयेत्॥ स्थानात्स्थानात्समा
ष्य ५८ कृष्य प्रत्याहारमकुर्वतः सर्वे रोगा विनश्यंति योगाः सिध्यंति तस्य वै वदंति योगिनः केचिद्योगे
षु कुशला नराः॥ प्रत्याहारं वरारोहे शृणु त्वं तद्वदाम्यहं॥ संपूर्य कुंभवद्वायुमगुष्ठान्मूर्द्धिम
ध्यतः धारयेदनिलं बुद्ध्या प्राणायामप्रणोदितं॥ व्योमरंध्रात्समाकृष्य ललाटे धारयेत्पुनः॥ ष्य
ललाटाद्वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् भ्रुवोर्मध्यात्समाकृष्य नेत्रमध्ये निरोधये
त् नेत्रमध्यात्समाकृष्य नासामूले निरोधयेत्॥ नासामूलात्तु जिह्वायामूले प्राणं निरोध
८ येत्॥ जिह्वामूलात्समाकृष्य कंठकूपे नियोजयेत्॥ कंठकूपात्तु हृन्मध्यान्नाभिमध्यतः ना १३५
ष्येहन्म

भिमध्यात्पुनर्मेढ्रे मेढ्रादाराजालये ततः देहमध्याद्गुदाग्रे गुदादूरुमूलके॥ ऊरुमू
लात्तयोर्मध्ये तस्माज्जान्वोर्निरोधयेत्॥ चितिमूलं ततस्तस्माज्जंघयोर्मध्यमेत्तथा॥ जं
वायुं घातः समाकृष्य गुल्फे निरोधयेत्॥ तस्मादंगुष्ठयोरग्रे पादयोस्तन्निरोधयेत्॥
स्थानात्स्थानं समाकृष्य यस्त्वेवं धारयेद्धिया॥ सर्वपापविशुद्धात्मा जीवेदाचंद्रतारकं॥
एतत्तु योगसिद्ध्यर्थमगस्त्येनापि कीर्तितं॥ प्रत्याहारेषु सर्वेषु प्रशस्तमिति योगिभिः॥
नाडीभ्यां वायुमारोप्य कुंडल्याः पार्श्वयोर्नरः धारयेद्योगयुक्तोपि भवरोगाद्विमुच्यते॥ पू
र्ववद्वायुमारोप्य हृदयेऽब्धौ निधारयेत्॥ सोपि याति वरारोहे परमात्मपदं नरः॥ व्याधयः
किं पुनस्तस्य वात्याभ्यंतरवर्तिनः॥ नासाभ्यां वायुमारोप्य पूरयित्वोदरं स्थितः भ्रुवोर्मध्या
दृशोः पश्चात्समारोप्य समाहितः धारयेत्क्षणमात्रं यः सोपि याति परां गतिं॥ किं पुनर्बहु

नोक्तेननित्यकर्मसमाचर॥आत्मनःप्राणमारोप्य भ्रुवोर्मध्यात्सुषुम्णया॥यावन्मनोल
यस्तस्मिंस्तावत्संयमनंकुरु॥दत्तात्रेयस्तु॥इंद्रियाणींद्रियार्थेभ्यःप्रत्याहरतिस्फुटं॥यो

गीकुंभकमास्थायप्रत्याहारःसउच्यते॥यंयंपश्यतिचक्षुर्भ्यांतंतमात्मनिभावयेत्॥यंयं
शृणोतिकर्णाभ्यांतंतमात्मनिभावयेत्॥जिह्वयायद्रसयतितत्तदात्मनिभावयेत्॥त्वचा
यत्स्पृशतियोगीतत्तदात्मनिभावयेत्॥एवंज्ञानेंद्रियाणांयत्तत्तदात्मनिभावयेत्॥यामभी
तंप्रतिदिनंयोगीयत्नादतंद्रितः॥तदाविचित्रसामर्थ्यंयोगिनोजायतेध्रुवं॥दूरश्रुतिर्दूर
२ दृष्टिःक्षणंदूरगतिस्तथा॥वाक्सिद्धिःकामचारित्वमदृश्यकरणंतथेति॰॥ ॥ ॥इति
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचंद्रसदानंदसरस्वतीशिष्यशिवानंदसरस्वतीवि
चिंता रचितेयोगचिंतामणौतृतीयःपरिच्छेदः॥ ॥ ॥ ॰ ॥अथधारणानिरूप्यते॰तत्रलक्ष

णमाहपतंजलिः॥देशबंधश्चित्तस्यधारणेतिसूत्रेण॥अस्यार्थः॥देशेआध्यात्मिकेनाभिके
नाभिचक्रहृदयपंकजमुखभ्रूमध्यमूर्धादिस्थानेवा॰॥स्वनासाद्ये॥चित्तस्यबंधोविषयांतरप
रिहारेणचित्तस्यस्थापनसाधारणेत्युच्यतेअयंभावः॥मैत्र्यादिपरिवासितांतःकरणेन
यमनियमवताजितासनपरिहृतप्राणविक्षेपेणप्रत्याहृतेंद्रियग्रामेणऋजुकायेनजित
द्वंद्वेनयोगिनानिर्बाधेप्रदेशेसंप्रोज्ज्ञातसमाधेरभ्यासायनासाग्रादौचेतःस्थिरीकर्तव्य
मिति॥यथोक्तंविष्णुपुराणे॥प्राणायामेनपवनंप्रत्याहारेणचेंद्रियंवशीकृत्यततःकुर
र्याच्चित्तवृत्तिंशुभाश्रयेशिवगीतायां॥हृत्पुंडरीकेनासाग्रेमूर्ध्निसर्वत्रसंभवे॥एवमादिषुदेशा
२ शेषुधारणाचित्तबंधनं॥स्कंदपुराणे॥आसनेनसमायुक्तःप्राणायामेनसंयुतः॥प्रत्या
हारेणसंपन्नोधारणांचसमभ्यसेत्॥हृदयेपंचभूतानांधारणंपृथक्पृथक्॥मनसोनिश्चल १५८

यो·चिं· त्तेनधारणासाविधीयते॥हरितालनिभांभूमिंसलकारांसवेधसांचतुष्कोणांहृदिध्यायेदेषा
१३७ स्यात्क्षितिधारणा॥कंठेवुतत्त्वमर्द्धेंदुनिभंविष्णुसमन्वितंवकारबीजंकुंदाभंध्यायन्नंबुजयेत्क्षिति॥
तालुस्थमिंद्रगोपाभंत्रिकोणंरेफसंयुतं॥रुद्रेणाधिष्ठितंसम्यग्ध्यात्वावह्निंजयेदिति॥वायु
तत्त्वंभ्रुवोर्मध्येरंजनांजनसंनिभं॥यंबीजमीश्वरदैवत्यंध्यायंवायुंजयेदिति॥आकाशंचवि
शुद्धवारिसदृशंपद्मस्थं ब्रह्मस्थितंतंनाथेनसदाशिवेनसहितंशांतंहकाराक्षरं॥प्राणांतत्र
विनीयपंचघटिकाश्चित्तान्वितंधारयेदेषामोक्षकपाटपाटनपटुःप्रोक्तानभोधारणा॥स्तंभ
नीद्रावणीचैवदहनीभ्रामणीतथा॥शमनीचभवंत्येताभूतानांपंचधारणाइतियाज्ञवल्क्यः एम्·
प्रमादिगुणयुक्तस्यमनसःस्थितिरात्मनि॥धारणेत्युच्यतेसद्भिःशास्त्रतात्पर्यवेदिभिः॥स्व ११७
स्मिन्ब्रह्मपुरेगार्गियदिदंदहरंपांबुजंतस्मिन्नेवांतरेकाशेपद्मात्याकाशधारणे एषाच

धारणेत्युक्तायोगशास्त्रविशारदैः॥चित्तकैर्योगशास्त्रज्ञैर्विद्वद्भिश्चसुशंकितैः॥धारणाःपंच
सा धाप्रोक्ताश्चसर्वाःस्थक्रमपक्॥भूमिरापस्तथातेजोवायुराकाशमेवच॥एतेषुपंचदेवानां
धारणंपंचधेष्यते॥पादादिजानुपर्यंतंपृथिवीस्थानमुच्यते॥आजानोःपायुपर्यंतमपां
स्थानंप्रकीर्तितं॥आपाय्वोर्हृदयांतंयद्वन्हिस्थानंतदुच्यते॥हन्मध्यात्तुभ्रुवोर्मध्यंयावद्वा दु
युकुलं· स्मृतं॥आभ्रूमध्यात्तुमूर्द्धांतमाकाशमितिचोच्यते॥पृथिव्यांधारयेद्गार्गिब्रह्माणं
परमेष्ठिनं॥विष्णुमस्वनिलेशुद्धमीश्वरंवायुमंडले॥सदाशिवंतथाव्योम्निधारयेत्सुसमा
हितः॥पृथिव्यांवायुमारोप्यलकारेणसमन्वितं॥ध्यायंश्चतुर्मुखाकारंब्रह्माणंसृष्टिका
रणं॥धारयेत्पंचघटिकाःपृथिवीजयमाप्नुयात्॥वारुणेवायुमारोप्यवकारेणसमन्वितं॥स्म
रन्नारायणंदेवं चतुर्बाहुंशुचिस्मितं॥शुद्धस्फटिकसंकाशंपीतवाससमच्युतं॥धारये

२ तुक्तचित्तः स तमानंमुयोजयरमेश्वरेण॥अस्मिन्नर्थैवदंत्यस्येयोगि का१ नो ब्रह्मविद्वरः॥ श्रणवेणतुकार्याणिस्वेस्वेसंहृत्य कारणे

यो·चिं· स्पंचघटिकाः सर्वरोगैः प्रमुच्यते॥वन्हावविलमारोप्य रेफाक्षरसमन्वितं॥त्र्यक्षंवरप्रदं देवंतरु रू

णादित्यसंनिभं॥भस्मोद्धूलितसर्वांगंसुप्रसन्नमनुस्मरन्॥धारयेद्घटिकाः पंचवन्हिनासौनद

१३८ ह्यते॥मारुतंमरुतांस्थानेवर्णदिवसमन्विते॥धारयेत्पंचघटिकावायुवद्व्योमगोभवेत्॥आ

काशेशुद्धामुमाएप्प हकारोपरिशंकरं बिंदुरूपंमहादेवंव्योमाकारंसदाशिवं॥शुद्धस्फटिकसंका

शंवांशंबालेंदुचंद्रशेखरं॥पंचवक्त्रयुतंशांतंदशबाहुंत्रिलोचनं॥सर्वायुधोद्यतकरंसर्वाभर

णभूषितं॥उमार्द्धदेहंवरदंसर्वकारणकारणं॥मनसाचिंतयत्पस्स मुहूर्त्तमं [illegible] धारयेत्॥ पि

स एवमुक्त इत्युक्तस्त्रांत्रिकैरथ शिक्षितैः॥एतदुक्तंभवस्यत्रगागिब्रह्मविदांवरे॥ब्रह्मादिका

र्यरूपाणिस्वेस्वेसंहृत्य कारणे॥तस्मिन्सदाशिवेप्राणंक्षिप्त्वा निजकारणे॥प्रणवस्यतुना

दांतेपरमानंदविग्रहं॥ [illegible] तंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं॥चेतसासंप्रपश्यंति संततः संसारभे १३८ रणे॥२

षजं॥त्वंतस्मात्प्राण [illegible] वैनैवमाणायामैस्त्रिभिस्त्रिभिः॥ब्रह्मादिकार्यरूपाणिस्वेस्वेसंहृत्य सका

रणे विशुद्धचेतसापश्यनांदांते परमेश्वरं॥अस्मिन्नर्थे वदंत्यन्ये योगिनोब्रह्मविद्वराः॥नियम्प

णवारारोहेयोगेषुपरितिष्ठिताः॥शरीरंतावदेवंहियंचभूतात्मकं खलु॥भवेत्तत्र वरारोहे वातपि

त्तकफात्मकं॥वातात्मकानांसर्वेषांयोगेषुनियतात्मनां॥प्राणसंयमनेनैवशोषंयातिक

लेवरं॥पित्तात्मकाम चिरात्र शुष्यतिकलेवरं॥कफात्मकानांकार्यंतुसंपूर्णमचिराद्भ

वेत्॥धारणांकुर्वतस्त्वग्नौसर्वेनश्यंतिवातजाः॥पार्थिवांशेजलांशेच धारणांकुर्वतःसदा॥

पि नश्यंतिश्लेष्मजारोगावातश्चौ चिरात्तथा॥व्योमांशेमारुतांशेचधारणांकुर्वतः सदात्रिदो

षजनितारोगा विनश्यंतिनसंशयः॥अस्मिन्नर्थेतथाप्रूतामश्विनौच भिषग्वरौ॥प्राणसं

यमनेनैवत्रिदोषशमनं नणं॥दत्तात्रेयः भष्यानयोनिनर्थान्वेज्ञात्वा रहस्यपत्ननः॥पंचधारणं [illegible] नां

त

यो·चिं· कुर्यात्तत्तेभूतभयापहं ॥ नाभेरधोगुदस्योर्द्ध्वं घटिकाः पंच धारयेत् । वायुं ततो भवेत्पृथ्वी धारणे
चेभ्दयापहं ॥ पृथिवीसंभवो मृत्युर्न भवेत्तस्य योगिनः ॥ नाभिस्थाने ततो वायुं धारयेत्पंच नाडिकाः ॥
१३९ र्ध्व ततो जलाभ्दयं नास्ति जले मृत्युर्न योगिनः ॥ नाभ्यूर्ध्वं मंडले वायुं धारयेत्पंच नाडिकाः आग्नेयी धा
रणा पियं न मृत्युस्तस्य वन्हिनाऽनिर्दग्धतशरीरं च प्रविष्टं चाग्निसंस्तरे ॥ नाभि भ्रूमध्ययोर्मध्ये तु प्रादेशांत्र
यसंमिते धारयेत्पंच घटिका वायुं सैषा च वायवी ॥ धारणेनैव वायोस्तु भयं भवति योगिनः भ्रूम
ध्यादुपरिष्टात्तु धारयेत्पंच नाडिकाः ॥ वायुं योऽत्र यत्नेन सेयमाकाशधारणा आकाशधार
णां कुर्वन्मृत्युं तु यतिशाश्वतं ॥ एवं च धारणाः पंच कुर्याद्योगी विचक्षणः ततो दृढशरीरस्य मृत्यु त
य स्तस्य न विद्यते ॥ एवं पंचविधा भूतधारणाः समभ्यसेत् ब्रह्मणः प्रलयेनापि तस्य मृत्युर्न विद्यते ॥
मार्कंडेयपुराणे ॥ योगयुक्तः सदा योगी लघ्वाहारो जितेंद्रियः सूक्ष्मास्तु धारणाः सप्त भूराद्या मू

१३९

र्द्धि धारयेत् धरित्रीं धारयन्योगी तत्सौक्ष्म्यं प्रतिपद्यते आत्मानं मन्यते चोर्वीं तं द्गंधं च जहाति सः ॥ त
थैवाप्सु रसं सूक्ष्मं तद्वद्रूपं च तेजसि ॥ स्पर्शं वायौ तथा तद्वद्विभ्रतस्य धारणं ॥ व्योम्नः सूक्ष्मां प्र
वृत्तिं च शब्दं तद्वज्जहाति च ॥ मनसा सर्वभूतानां मनस्याविशते यदा मानसी धारणां बिभ्रन्म
नः सौक्ष्म्यं च जायते ॥ तद्वद्बुद्धिमशेषाणां सत्त्वानामेत्य योगवित् ॥ परित्यजति मंप्राप्य बुद्धि
सौक्ष्म्यमनुत्तमं ॥ परित्यजेत्ति सूक्ष्माणि सप्तैतानि योगवित् । सम्यग्विज्ञाय योऽलर्क तस्य
स्यावृत्तिर्न विद्यते ॥ एतासां धारणानां तु सप्तानां सौक्ष्म्यमात्मवान् ॥ दृष्ट्वा दृष्ट्वा ततः सिद्धिं
त्यक्त्वा त्यक्त्वा परां व्रजेत् यस्मिन्यस्मिंश्च कुरुते भूतेऽणां महीपते ॥ तस्मिंस्तस्मिन्समासक्तिं च
संप्राप्य स विनश्यति ॥ तस्माद्विदित्वा सूक्ष्माणि संसक्तानि परस्परं । परित्यजति यो देही
स परं प्राप्नुयात्पदं ॥ एतान्येव तु संधाय सप्त सूक्ष्माणि पार्थिव ॥ भूरादीनां विरागोऽत्र सद्भावज्ञ

स्यमुक्तये॥गंधादिषुसमासक्तमित्येतदखिलंजगत्॥पुनराकृतयेभूयसचल्पामरमानुषं॥स
त्येनाधारणायोगीसमतीत्यपरीछति॥तस्मिंस्तस्मिंल्लयंसूक्ष्मेमातिभूतेनरेश्वरदेवानामसु-
राणांचगंधर्वोरगरक्षसांदेहेषुलयमायातिसंगंनाप्रोतिचक्वचित्॥तथाप्रात्याभ्यांतदयेवा
त्रैततीयाचतथोरसि॥कंठेमुखेनासिकायेनेत्रभ्रूमध्यमूर्द्धसु॥किंचितस्मात्परस्मिन्साधार
णापरमात्मतः॥दशैता धारणाःप्राप्यप्रोत्यक्षरसाम्यता॥अथध्यानं॥तल्लक्षणमाहप
तंजलिः॥तत्रप्रत्ययैकतानताध्यानमिति॥तत्रयद्धारणायामालंबनीकृतंवस्तुतस्मिन्नत्प
यैकतानताप्रभ्यामस्यचित्तवृत्तेर्विजातीयप्रत्ययतिरस्कारेणसजातीयप्रत्ययप्रवाहीक
रणंयतध्यानमित्युच्यते॥शिवगीतायां॥दशावस्थितिमालंब्यबुद्धेर्यावृत्तिसंततिः॥वृत्त्यं
तरैरसंस्पृष्टाघ्यानंसूरयोविदुः॥विष्णुपुराणे॥तद्रूपप्रत्ययैकाग्रसंततिर्यान्यनिःस्पृहा॥ १४०

तध्यानंप्रथमैःषड्भिरंगैर्निःपाद्यतेनृप॥स्कंदपुराणे॥ध्यैचिंतायांस्मृतोधातुश्चिंतातत्त्वेसुनिश्च
लायातद्ध्यानमितिप्रोक्तंसगुणंनिर्गुणंद्विधासगुणंसर्वभेदेननिर्गुणंकेवलंमतं॥समंत्रंसगुणं
विद्धिनिर्गुणंमंत्रवर्जितं॥शब्दादीनीचतन्मात्रायावत्कर्णादिषुस्थिताः॥तावदेवस्मृतंध्यानंस्यात्स
माधिरतःपरं॥नाश्वमेधेनत ॥त्पुण्यंनचवैराजसूयतः॥यत्पु पण्यमैनलभेद्योगीस्थिरासनः॥ कध्याने
मार्कंडेयपुराणे॥त्यक्तसंगोजितक्रोधालघ्वाहारोजितेंद्रियः॥पिधायबुद्ध्याद्वाराणिमनोध्यानेनिवे ढा
शयेत्॥शून्येष्वायप्रकाशेषुगुहासुचवनेषुच॥नित्ययुक्तःसदायोगीध्यानंसम्यगुपक्रमेत्॥
॥वेदाःश्रेष्ठाःसर्वयज्ञक्रियासुयज्ञाज्जप्यंज्ञानमाहुश्चजप्यात्॥ज्ञानाद्ध्यानंसर्वरागव्यपेतं
तस्मिन्सिद्धेशाश्वतस्यापलब्धिः॥समाहितोब्रह्मपरोऽप्रमादीशुचिस्तथैकांतरतिर्जितेंद्रियः॥स
म प्राप्नुयाद्योगमिमंमहात्माविमुक्तिमाप्नोतितपश्चयोगतः॥याज्ञवल्क्यः॥ध्यानंततःप्रवक्ष्यामिशृणु

गागिविरानेने।।ध्यानमेवहिजंतूनांकारणंवंधमोक्षयोः।।ध्यानमात्म स्वरूपस्यवेदनंमनसाखलु।।सगुणंनिर्गुणंतच्चसगुणंवहुविस्तृरं।।पंचोत्तमानितेघाहुवैदिकानिहितानमा।श्रो
१४१ पिमुख्यतमान्येषुमेकमेवहिनिर्गुणं।।मर्मस्थानानिनाडीनांसंस्थानंचपृथक्पृथक्।।वायूनांस्थानकर्माणिज्ञात्वाकुर्वात्मवेदनं।।एकंज्योतिर्मयंशुद्धंसर्वगंव्योमवद्दृढं।।अत्यंतममलंनित्यंत्याद्यंतध्यांतवर्जितं।।स्थूलंसूक्ष्ममनाकाशमसंस्पर्शमचाक्षुषं।।नरसंनचगंधायमप्रमेयमनौपमं।।आनंदमजरंनित्यंसदसत्सर्वकारणं।।सर्वाधारंजगद्रूपममूर्त
मर्वांगं मजमव्ययं।।अदृश्यंदृश्यमध्यस्थंसर्वतोमुखं।।सर्वदृक्सर्वतःपादंसर्वस्पृक्सर्वतःशिरः।।ब्रह्मब्रह्ममयोहंस्यामितितत्त्वस्यवेदनं।।तदेतन्निर्गुणंध्यानमितियोगविदोविदुः।।अथवापरमात्मानमरमानंदविग्रहं।।गुरूपदेशाद्वित्तायंपुरुषंकृष्णपिंगलं।।ब्रह्मब्रह्मपुरेचास्मिन्देहरा

ज्यरवमध्यमे।।चेतसासंप्रपश्यंतिसंतेःसंसारभेषजं।।हृत्स्थं ष्टदलोपेतेकंदमध्यात्स ४ ध्या १
मुत्थिते।।द्वादशांगुलनालेस्मिंश्चतुरंगुलवन्मुखे।।प्राणायामैर्विकसितेकेसरान्वितक
र्णिके।।इष्टदेवंसमालोक्यमनसासर्वकामदं।।सोहमात्मेतिविज्ञानंसगुणंध्यानमुच्यते।।
हृत्सरोरुहमध्यस्मिन्प्रकृत्याद्यात्मकर्णिके।।अष्टैश्वर्यदलोपेतेविद्याकेसरसंयुते।।ज्ञानना
लेवृहत्कंदेप्राणायामप्रबोधिते।।विश्वार्चिषंमहावह्निंज्वलंतंविश्वतोमुखं।।वैश्वानरंजगद्यो।
निंशिखातन्विनमीश्वरं।।प्रतपंतंस्वकंदेहमापादतलमस्तकं।।निर्वातदीपवत्तस्मिन्दीपि
तंहव्यवाहनं।।दृष्ट्वातस्यशिखामध्येपरमात्मानमव्ययं।।नीलतोयदमध्यस्थविद्युल्ले
खेवभास्वरं।। [illegible]

यो॰वे॰ नीवारशूकवद्रूपंदीपाभंसर्वकारणं॥ ज्ञात्वावैश्वानरंदेवंसोहमात्मेतियामतिः॥ सगुणे
ध्यान ष्वुत्तमंध्यानंयोगविदोविदुः॥ वैश्वानरत्वंसंप्राप्यमुक्तिंतेनैवगच्छति॥ अथवामंडलेपश्येदादि
१४२ त्यस्यमहाद्युतेः॥ आत्मानंजगतोहेतुंपुरुषंहेमरूपिणं॥ हिरण्यश्मश्रुकेशंचहिरण्मयनखंहरिं॥ श्म
व रूपपेशलंदृश्यंसृष्टिस्थित्यंतकारिणं॥ पद्मासनस्थितंसौम्यंप्रबुद्धाब्जनिभाननं॥ पद्मोद
दलौष्ठाभंसर्वलोकाभयप्रदं॥ जानंतंसर्वदासर्वंनंदयंतंचधार्मिकान्॥ भासयंतंजगत्स
ले र्वंदृष्टालोकैकसाक्षिणं॥ सोहमस्मीतियाबुद्धिःसाचध्यानेप्रशस्यते॥ एषएवतुमोक्षस्यमहा
मार्गस्तपोधने॥ ध्यानेनानेनसौरेणमुक्तिंयास्यंतिसूरयः॥ भ्रुवोर्मध्येतंरात्मानंभारूपंस
र्वकारणं॥ स्थाणुवन्मूर्द्धपर्यंतमध्यदेहात्समुत्थितं॥ जगत्कारणमव्यक्तंज्वलंतममितौज
सं॥ मनसालोकसोहंस्यामित्येतद्ध्यानमुत्तमं॥ अथवाबद्धपर्यंकःशिथिलीकृतविग्रहः॥ १४२

शिवएवस्वयंभूत्वानासाग्रारोपितेक्षणः॥ निर्विकारंशिवंशांतंपरमात्मानमव्ययं॥ भारू
पममृतंध्यायेद्भ्रुवोर्मध्येवरानने॥ सोहमेवेतियाबुद्धिःसाचध्यानेप्रशस्यते॥ अथ
वाष्टदलोपेतेसकर्णिककेसरान्विते॥ उन्निद्रहृदयांभोजे सोममंडलमध्यमे॥ स्वात्मान
मर्भकाकारंभोक्तृरूपमीश्वरं॥ सुधारसंविमुंचद्भिःशशिरश्मिभिरावृतं॥ षोडशच्छदसं
युक्तंशिरःपद्मादधोमुखात्॥ निर्गतामृतधाराभिःसहस्राभिःसमंततः॥ प्लावितंपुरुषंतत्र
चिंतयित्वासमाहितः॥ तेनामृतरसेनैवसांगोपांगकलेवरं॥ अहमेवपरंब्रह्मपरमात्माहम
व्ययः॥ एवंपश्येदनंतत्रसगुणंध्यानमुच्यते॥ एवंध्यानामृतंकुर्वन्षण्मासान्मृत्युजिन्नरः॥ व
त्सरान्मुक्तएवस्याज्जीवन्नेवनसंशयः॥ जीवन्मुक्तस्यनक्वापिदुःखवाप्तिःकथंचन॥ विपुनर्जी
त्यमुक्तस्यमुक्तिरेवहिदुर्लभा॥ श्रुतिश्च॥ हृत्पुंडरीकंविरजंविशुद्धंविचिन्त्यमध्येविशदंविशो

कं॥अचिंत्यमव्यक्तमनंतरूपंशिवंप्रशांतममृतंब्रह्मयोनिं॥तथादिमध्यांतविहीनमेकंविभुं
चिदानंदमरूपमद्भुतं॥उमासहायंपरमेश्वरंप्रभुंत्रिलोचनंनीलकंठंप्रशांतं॥ध्यात्वामुनि
र्गच्छतिभूतयोनिंसमस्तसाक्षिंतमसःपरस्तात्॥ततस्तंपश्यतेनिष्कलंध्यायमानः॥दृश्यतेत्व
ग्र्यायाबुद्ध्यासूक्ष्मदर्शिभिः॥मनसैवतस्वात्मप्यमित्यादिकाः॥दत्तात्रेयः॥समभ्यसेत्तताध्यानंघ
टिकाःषष्टिमेवच॥वायुंनिरुध्ययंकाचिद्देवता   सिद्धिदायिनी॥सगुणंध्यानमेतत्स्याद
णिमादिगुणप्रदं॥निर्गुणंखमिवध्यात्वामोक्षमार्गंप्रपद्यते॥योगियाज्ञवल्क्यः॥ध्यानेनस
दृशंनास्तिशोधनंपापकर्मणां॥श्वपाकेष्वपिभुंजानोध्यायीनैवतुलिप्यते॥ध्यानमेवपरं
ब्रह्म ध्यानमेवपरंतपः॥ध्यानमेवपरंशौचंनाध्यानंपरमंपदं॥सर्वपापप्रसक्तोपिध्यायं
न्निमिषमच्युतं॥तदात्तपस्वीभवतिपंक्तिपावनपावनः॥महाभारते॥सर्वाधारविहीनोपि

युक्तोवासर्वपातकैः॥सर्वंनुदतितत्पापंभावयंश्शिवमात्मना॥शास्त्रांतरे॥पातकेषुचस
र्वेषुपातकेषुमहत्सुच॥प्रविश्यरजनीपादंब्रह्मध्यानंसमाचरेत्॥वासिष्ठे॥आत्मपू
जाप्रकरणेध्यानस्वरूप कथनानंतरमीश्वरउवाच॥ध्यानस्यहारएवात्माध्यानमस्य
मदार्चनं॥विनातेनेतरेणायमात्मालभ्यतएवनो॥ध्यानेनानेनसुमतेनिमेषांस्त्रयोदशमू
ढोपिपूजयित्वेशंगोप्रदानफलंलभेत्॥पूजयित्वानिमेषाणांशतमेकमितिप्रभुं॥अश्वमे
धस्ययज्ञस्यफलंप्राप्नोतिमानवः॥पूजयित्वास्वमात्मानंघटिकार्द्धमितिप्रभुं॥अश्वमेध
सहस्रस्यफलमाप्नोतिमानवः॥ध्यानवल्युपहारेणस्वयमात्मानमात्मना॥घटिकांपूजय
घस्कराजसूयंलभेतसः॥मध्याह्नपूजनादिस्यंराजसूयैकलक्षभाक्॥दिवसंपूजयित्वैनंपर
धाम्निवसेन्नरः॥एषोसौपरमोयोगइयंसापरमाक्रिया॥आत्मगीतायां॥साक्षात्कृतमश

कोऽपि चिंतयेन्मामशंकितः कालेनानुभवारूढो भवेत्सफलितो ध्रुवं॥ यथागाधनिधिर्लब्धो भेनापायः
खननं विना॥ मल्लाभेऽपि तथा स्वात्मचिंतां मुक्त्वा न चापरः॥ देहं स्युपलमाहं त्वबुद्धिकुद्दालका
त्पुनः खात्वा मनोभुवं भूयो गृह्णीयान्मां निधिं पुमान्॥ शास्त्रांतरे च॥ अनुभूतेरभावेऽपि ब्रह्मास्मी
त्येव चिंत्यतां॥ अप्यसत्प्राप्यर्थते ध्यानान्नित्याप्तं ब्रह्म किं पुनः॥ अनात्मबुद्धिशैथिल्यफलं ध्या
नाद्दिने दिने॥ पश्यन्नपि न चेद्ध्यायेत्कोऽपरोऽस्मात्पशुर्वद॥ उपेक्षातन्नीर्थे यात्रान्यादीनेव
कुर्वतां॥ पिंडं समुत्सृज्य करं लेढीति न्याय आपतेत्॥ अथ समाधिः तत्र पतंजलिः तदेवार्थमा
त्रनिर्भासं स्वरूपशून्यमिव समाधिः ध्यानालंबनीकृतं वस्तु तदेव यदार्थमात्रनिर्भासं स्व
स्वरूपेणैव निःसंदिग्धं सर्वात्मना परिपूर्णरूपं भ तदेव सर्वविषयविहितत्वात्स्वरूपशू
न्यमिव नायं भासते सभावनाविशेषः समाधिरित्युच्यते॥ समाधिद्वयसामान्यलक्ष १४४

णमेतत्॥ विशेषलक्षणं प्रथमपरिच्छेद एव विस्तरेणोक्तं द्रष्टव्यं॥ अन्ये तु सम्यगाधीयत ए
काग्रीक्रियते विक्षेपान्परित्यज्य यत्र मनः स समाधिरित्याहुः॥ याज्ञवल्क्यः समाधिमधुना वक्ष्ये
भवपाशविनाशनं॥ भवपाशनिबद्धस्य यथा वच्छ्रोतुमर्हसि॥ समाधिः समतावस्था जीवात्म
परमात्मनोः॥ ब्रह्मण्येव स्थितिर्या सा समाधिः प्रत्यगात्मनः॥ ध्यायेद्यथा यथात्मानं स्यात्समा
धिस्तथा तथा॥ ध्यात्वैवात्मनि संस्थाप्य नान्यथात्मा यतो भवेत्॥ एवमेव हि सर्वत्र यत्र
यत्रास्तु योऽनरः॥ तदात्मा सोऽपि तत्रैव तदेव हि समाप्नुयात्॥ सरित्पतौ निविष्टांबु यथाऽभि
न्नं लयं व्रजेत्॥ तथात्माभिन्न एवात्र समाधिं सम्यगाप्नुयात्॥ कूर्मपुराणे॥ एकाकारः समाधिः
स्याद्देशालंबनवर्जितः॥ प्रत्ययो ह्यर्थमात्रेण योगसाधनमुत्तमं॥ विष्णुपुराणे तस्यैव क
ल्पनाहीनं स्वरूपग्रहणाय यत्नं मनसा ध्याननिःपाद्यं समाधिः सोऽभिधीयते॥ तच्च ध्या

नसंप्रज्ञातमाध्योर्भेदः शंकनीयः बहुप्रयत्नसाध्येपि ध्यानेभवत्प्रत्ययांतरसंचारः संप्रज्ञातसमाधौतु
सर्वथैवनास्त्येवप्रत्ययांतरावकाशइतितयोर्भेदः सुरेश्वराचार्याः ब्रह्मविष्णुशिवादीनां चिंताध्यानंप्र
१४५ चक्षते ध्यानादस्पंदनं कुर्दः समाधिरभिधीयते॥शैवधर्मे॥समोस्तुसमावस्थाजीवात्मपरमात्म धि
नोः निस्तरंयपदप्राप्तिः परमानंदरूपिणी॥निःश्वासोछ्वासयुक्तोवानिःस्पंदोस्पंदनोचनः॥शि
स वध्यायीसुलीनश्चससमाधिस्थउच्यते॥नशृणोतियदाकिंचिन्नपश्यतिनजिघ्रति॥नचस्पर्शंवि
जानातिससमाधिस्थउच्यतेइति॥स्कंदपुराणे॥यत्समत्वंद्वयोरत्रजीवात्मपरमात्मनोः सनष्टसर्व
संकल्पः समाधिरभिधीयते॥नात्मानंनपरंवेत्तिनशीतंनोष्णमेवच॥समाधियुक्तोयोगींद्रोनसु
खेतरं॥कल्प्यतेनैवकालेनलिप्यतेनैवकर्मणा॥भिद्यतेनैवशस्त्राद्यैर्योगीयुक्तः समाधिना॥यथा
जलेजलंक्षिप्तंजलमेवतुतद्भवेत्॥क्षीरेक्षीरंतथायोगीतत्रतन्मयतांव्रजेदिति॥दत्तात्रेयः निर्गु १४५

णध्यानसंपन्नः समाधिंचततोभ्यसेत्॥दिनद्वादशकेनैवसमाधिंसमवाप्नुयात्॥वायुंनि
रुध्यमेधावीजीवन्मुक्तोभवेद्ध्रुवं॥समाधिः समतावस्थाजीवात्मपरमात्मनोः॥यदिस्वदेहमुत्स्र
ष्टुमिच्छेच्चेदुत्सृजेत्स्वयं॥परब्रह्मणिलीयेततस्यत्कार्कर्मशुभाशुभं॥अथनोचेत्समुत्स्रष्टुंस्व
शरीरंयदिप्रियं॥सर्वलोकेषुविचरेदणिमादिगुणान्वितइति॥एवंचोक्तरीत्यासांगमनुति
ष्ठतोयोगिनः सात्विकराजसतामसाअंतरायाभवंतिसर्वेपितेतुशइतिमत्वायोगिनाहेया
एव॥तथाचदत्तात्रेयः प्रथमाभ्यासकालेहिविघ्नाःस्युर्विविधामुने॥आलस्यंप्रथमोविघ्नो
द्वितीयस्तुप्रकथ्यते॥पूर्वोक्तधूर्तगोष्ठीचतृतीयोमंत्रसाधनं॥चतुर्थोधातुवादःस्यादिति
योगविदोविदुः॥कंदर्पस्ययथारूपंतथातस्यैवयोगिनः तद्रूपवशगानार्यः कांक्षंतेतस्यसंग
मं॥एवंहिबहवोविघ्नाःमहात्मना समामुने॥स्थिरस्यास्यप्रजायंतेता ज्ञात्वासंत्यजेत्सु

यो॰ चिं॰ धीरिति॥मार्कंडेपुराणे॥उपसर्गाः प्रवर्त्तंते दृष्टेह्यात्मनि योगिनः ये तांस्ते संप्रवक्ष्यामि समा
न से ननिबोध मे॥काम्याः क्रियास्तथा कामान्मानुष्यानभिकांक्षति॥स्त्रियो दानफलं विद्यां मायां
१४६ कुप्यं धनं वसु॥देवत्वममरेशत्वं रसायनवयःक्रियां॥मेरुप्रपतनं यज्ञं जलाग्न्यावेशनं तथा
श्राद्धानां सर्वदानानां फलानि नियमांस्तथा॥तथोपवासात्पूर्ताच्च देवताभ्यर्चनादपि॥तेभ्यस्ते
भ्यश्च कर्मभ्य उपसृष्टोभिवांछति॥चित्तमित्थं प्रवर्त्तंतं यत्नाद्योगी निवर्त्तयेत्॥ब्रह्मसंगि मनः
कुर्वन्नुपसर्गैः प्रमुच्यते॥उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः॥योगिनः संप्रवर्त्तंते सत्त्वराज
सतामसाः॥प्रातिभः श्रावणो दैवो भ्रमावर्त्तौ तथापरौ॥पंचैते योगिनां योगविघ्नाय कटुकोद
याः॥वेदार्थाः काव्यशास्त्रार्था विद्याशिल्पान्यशेषतः॥उपसर्गं तमप्याहुर्दैवं बुधोत्तमद्विजाः
भ्राम्यते यन्निरालंबं मनो दोषेण योगिनः समस्ताचारविभ्रंशाद्भ्रमः स परिकीर्तितः॥आवर्त्त इ
+प्रतिभातीयरस्यति प्रातिभः सनुयोगिनः॥शब्दार्थानखिलान्वेत्ति शृणुयाद्दूरतोपि च॥योजनानां स
१४६

वनोयस्य ज्ञानावर्त्तोयदाकुलः॥चित्तं नाशयते यत्र उपसर्गः स उच्यते॥ऐतैर्नाशितयोगास्तु सक
लादेवयोनयः॥उपसर्गैर्महाघोरैरावर्त्तंते पुनः पुनः॥प्रावर्त्यकेवलं शुद्धं योगी तस्मान्मनो
मयं॥चिंतयेत्परमं ब्रह्म कृत्वा तत्प्रवणं मन इति॥येचव्याध्यकर्मण्यता योगफलवत्व
संशयप्रमादालस्यविषयवैमुख्याभावभ्रांतिसमाधिभूम्यलाभचित्ताप्रतिष्ठादयो विघ्ना त
च्चित्तविक्षेपशब्दितास्तेपि ब्रह्मानुसंधानेनैव निवर्त्तंते तदुक्तं पातंजले॥ईश्वरप्रणि
धानाद्वेत्यादिना योगनिरूपणानंतरं॥तस्य वाचकः प्रणवस्तज्जपस्तदर्थभावनं॥ततः प्र
त्यक्चेतनाधिगमोंतरायाभावश्चेति सूत्रैः॥न च तदर्थभावनस्यापि संप्रमरूपत्वेन तत्रापि वि
घ्नावकाशः सर्वपापतूलानलरूपे भगवद्भजने विघ्नावकाशाभावात्॥तथा च विष्णुपुराणे॥
यथाग्निरुद्धतशिखः कक्षं दहति सानिलः तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम्
ष्णु

योचिं० ती निं॥ तथा प्राप्युक्तानां विघ्नपारव्यविघ्नानां सर्वेषामपि विक्षेपसहजन्मनां च दुः [redacted]

१४७ [redacted] खदौर्मनस्यांगमेजयत्वश्वासनिद्रादीनां निरासाय यथाभिमतध्यानमेव तनुपादितेत्यतदु

क्तं तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः इति सूत्रेण वाचस्पतिना ब्रह्मतन्मात्रे दोषाः संनिद्रादीनां नि

रासाय यथा नित्साख्याधिदेहेन वः मनागपि न लुप्यंति चित्तमेकसमाहितं अधीकृत तदा

काशः कामक्रोधविकारजाः चिंतां न परिहिंसंति चित्तमेकसमाहितं वेदुरर्थौ दुरारंभा दुर्गुणा

उदम्रताः दुःक्रमास्तेन तत्त्वं निर्विघ्नमेकसमाहितं परिस्फुरति पस्पां तन्निर्लसत्संस्पनमत्कृतिः

स्वभस्मांड मिवारवंड दिगोशपः पालयंति तस्य हनदेवाश्च नाभून्पारैशतत आत्मा त्स्पेषां सम

वतीत्यादिका इति॥ किंच मोक्षादर्वाजायमानाः सिद्धयस्ता अपि विघ्नरूपा एवमंतव्याः

सिद्धासक्तमनसो योगिनो मोक्षो दुर्लभो यतः तथा च स्कंदपुराणे॥ अंतरायाभवंती

+तंदृति॥ आदित्यपुराणे॥ सम्यक्दर्शनसंपन्नो नाभिभूयेत कर्मभिः। योगवियोगयुक्तास्मापरां निर्वाणमृच्छति॥ श्रुतिस्मृत्युपर १४७

ह्योगिनो योगहानिदाः॥ श्रूयते दूरगा वार्ता दूरस्थं दृश्यते पुनः॥ योजनानां शतं या

तं शक्तिः स्यान्निमिषार्द्धतः॥ अचिंतिता निशास्त्राणि कंठपाठी भवंति हि॥ धारणाशक्ति

रस्युग्रा महाभारो लघुर्भवेत्॥ क्षणं कृशः क्षणं स्थूलः क्षणमल्पः [redacted] क्षणं म

हान्॥ परकायं प्रविशति तिरश्चो वेत्ति भाषितं॥ दिव्यं गंधं तनोधत्ते दिव्यां वाणीं प्रवक्ति

च॥ प्रार्थ्यते दिव्यकन्याभिर्दिव्यं प्रार्थयते वपुः॥ इत्याद्यो तंरायाः स्युर्योगसंसिद्धिसत्व

काः॥ मध्ये भिरंतरायैर्न्नक्षिप्यते स्य हि मानसं॥ तदाग्रे तन मान्यो ति परं ब्रह्मादिदुर्ल

भं॥ न यत्नाप्यविवर्तेत यत्नात्पनचशो चति॥ तच्च मन्यते पङ्गेनयोगेन कल्मशोन्द्रवेति॥

योगभास्करे॥ जितेंद्रियस्य दांतस्य जितश्वासस्य योगिनः॥ हरो धारयतश्चित्तमुत्पत्ति

ष्ठंति सिद्धयः॥ अणिमाद्या हि वद्यस्त धारणाभिरुपासिता॥ त्यजेद्यर्थतया सर्वा यतस्ता

यो॰ चिं॰ विघ्नकारिकः॥ सिद्ध्यादिवासनाबद्धस्तन्नद्रोगेषुसंगतः॥ भ्रश्यतेप्रायशः स्थानात्प्रकृतावेति
१४८ सैत्वंसात्विकींधृतिमालंब्ययोगीसत्वेनसुस्थिरः॥ निर्गुणंमनसाध्यायन्नुपसर्गैःप्रमुच्यते॥ एवं
योगमुपासीत शक्रादिष्वपिनिःस्पृहः॥ सिद्ध्यादिवासनात्यागीजीवन्मुक्तोभवेन्मुनिः॥ वि
स्तरस्यभियानोक्ताः सन्तिविघ्नाद्यनेकशः॥ ध्यानेनहरिहरयोर्वीरणीयाहियोगिना॥ इति
सर्वशास्त्रसिद्धांतः॥ एवंचपरमेश्वरानुग्रहीतस्यनिर्विघ्नंसांगयोगमातिष्ठतोयोगिनोवि
सा श्वासार्थंपरीक्षार्थंचक्रमेणामोक्षावांतरफलंसिद्धयोप्याविर्भवंति॥ पंचप्रकारालोके
सिद्धयोभवंति॥ तथाचपतंजलिः जन्मौषधिमंत्रतपःसमाधिजाःसिद्धयइति॥ यक्षा
दीनांप्राकाशगमानलक्षणाकपिलादीनांजन्मसमनंतरमेवोपजायमानज्ञानादि
लक्षणाजन्मसिद्धिः पातालादौरसायनाद्युपयोगलक्षणौषधसिद्धिःकेषांचित् आ १४९

काशगमनादिफलामंत्रसिद्धिः विश्वामित्रादीनांतपःसिद्धिः॥ याज्ञवल्क्यादियोगिनांसमाधि
सिद्धिः तत्रजन्मादीसिद्धीनांसर्वासामपिजन्मांतराभ्यस्तसमाधिसिद्धिरेवहेतुः मंत्रादि
कंतुनिमित्तमात्रमेवेत्यवधेयं॥ यथानंदीश्वरादीनामिंजात्यादिपरिणामोयःसप्रकृ व
त्यापूरात यच्चात्याएवहिप्रकृतयोस्मिन्जन्मनिस्थूलभूतात्मदेहेंद्रियल क्षणानि
कार्याणिजात्यंत रादिद्वारेणपूरयंति॥ क्रियमाणंधर्मादिप्रकृतीनामापूरणेनप्रयोजकं
तुतत्आवरणभूताधर्मक्षयोभवतियथाकृषीवलस्यसेतुभेदमात्रेव्यापारोजलनिःसरणंतु
स्वतएवेत्यतोनपूर्वोक्तजन्मांतराभ्यस्तसमाधिकारणमंगप्रसंगः॥ तथाचपतंजलिराह॥ जा
त्यंतरपरिणामःप्रकृत्यापूरात्निमित्तमप्रयोजकंप्रकृतीनांमेआवरणभेदस्तुततःक्षेत्रिक
वदितिसूत्राभ्यांयोगभास्करे॥ जन्मौषधितपोमंत्रैर्यावत्यरइहसिद्धयः॥ योगेनाभीताःस

यो०चिं० वानन्दिर्वियोगगर्तिंव्रजेत॥ योगवीर्तैरभ्यासस्यपालैरविकष्यमानितवायुना॥ अदैरोगाः प्र
पश्यंत्नेपश्चाज्जाघ्रंशरीरजैस्ततःसमसीभूत्वांवद्दीवर्षस्यनारतं॥ धातुरसंग्रसेद्वन्हिःपवने
१४९ न नसमंततंत्र नानादाःप्रवर्ततेमाईवंस्पालकलेवरे॥ जित्वाएथ्वादिकंजाड्यंखेचरःप्रसरेन्न
रः॥ सर्वज्ञोसौभवेत्कामरूपःपवनवेगवान्॥ क्रीडतित्रिषुलोकेषुजायंतेसिद्धयोखिलाःक
र्पूरेलीयमानेकिंकाठिन्यंतत्रविद्यते॥ अहंकारजयेतद्वद्देहेकठिनताकुतः॥ सर्वज्ञःसर्वकर्ता
यो चस्वतंत्रोविश्वरूपवान्॥ जीवन्मुक्तोमहायोगीजायतेनात्रसंशयः॥ देव्युवाच॥ यत्किंचित्क
ल्पनाजातंतत्त्वनीक्षायशंकरं॥ सिद्धयःकिंकरिष्यंतिनिर्विकल्पेचिदात्मनि॥ एतंमेसंशयं
नाथछेत्तुमर्हसिपावनं ईश्वरउवाच॥ सत्यमेतत्त्वयोक्तंतेवदामिप्पणुसुंदरि॥ द्विविधाः
सिद्धयोलोकेकल्पिताकल्पिताःशिवैरसौषधिक्रियाकालमंत्रयंत्रादिसाधनात्॥ सिद्ध्यं १४९

ति सिद्धयोयास्ताककल्पितास्ताःप्रकीर्तिताः॥ अनित्याअल्पवीर्यास्ताःसिद्धयःसाध्याःसिद्धयः
साधनेनविनाप्येवंजायंतेस्वतएवहि॥ स्वात्मयोगैकनिष्ठेतुस्वातंत्र्यादीश्वरत्वतःप्रभूताः
सिद्धयोयास्ताःकल्पनारहिताःस्मृताः॥ शुद्धानित्यामहावीर्याइच्छारूपाःस्वयोगताः॥ चिरका
लात्मजायंतेवासनारहितेषुच॥ तासुभाव्योमहायोगःपरमात्मपदेव्यये॥ विनासर्वसदी
यो त्पिर्योगसिद्धस्यलक्षणं॥ यथाकाशीसमुद्दिश्यगच्छन्निप्रथिकैःपथिनानातीर्थानिदृश्यं
तेतथामोक्षेतुसिद्धयः॥ स्वयमेवप्रजायंतेलाभालाभविवर्जिते॥ सिद्धिभिर्लक्षयेत्सि
ॐ द्धंजीवन्मुक्तिंतथैवच॥ अलौकिकगुणास्तुकदाचिद्दृश्यते भु वः इत्येतत्कथितंदेवि
योगसिद्धस्यलक्षणं॥ सिद्धिभिःपरिहीनंतनरं बद्धंतुलक्षयेत्॥ अजरामरपिंडोयोजीव
न्मुक्तःसएवहि॥ अलौकिकगुणास्तुकदाचिद्दृश्यतेभुवःइत्येतत्कथितंदेविसिद्धि

यो॰चि॰ ~~इत्यमवस्थानं सिद्धिनिः पास्सीनतां परं ...~~ लपहिय
१५० श्वकुक्कुटकीटाद्याश्मृतिं संप्राप्नुवंति वै तेषां किं पिंडपातेन मुक्तिर्भवति सुंदरि नवाहि श्रा
णआयाति पिंडस्यं पतनं कुतः पिंडपातेन या मुक्तिः सा मुक्तिर्न तु कथ्यते देहो ब्रह्मत्वमा
पासिजलत्वं तां सैधवंपृथाअमनस्कायदा पातितदा मुक्तः स उच्यते मानसोल्हासे चित्तेनि
श्चलतां प्राप्ते प्राणे मध्येलयं गते चिन्हान्येतानि जायंते एवं भूतजयात्यथकमलम् ... त्र त
कफाल्पत्वमारोग्यं पल्वुतानतोः सुमेधः स्वर्णवर्णत्वं प्रथमं योगलक्षणं॥ कंटकात्रे
त थसंगत्वं जलपंकेप्यमज्जनं क्षुत्तृषादिसहिष्णुत्वं द्वितीयं योगलक्षणं वह्न्यन्नपानभोक्तृ।
त्वमातपादिसहिष्णुता दर्शनं श्रवणं दूरात् तोगलक्षणं मडुकुल्पवनं भूमो मनुथसंग
त्वंजलपंकेप्यमज्जनं क्षुत्तृषादिसहिष्णुत्वं द्वितीयं योगलक्षणं वह्न्यन्नपानभोक्तृत्वंमतपादिस राम॰
१५०

हिष्णुता॥ दर्शनं श्रवणं दूरात् तृतीयं योगलक्षणं॥ मंडूकप्लवनं भूमे आकाशगमनं चेति चतुर्थं यो
गलक्षणं त्रैलोक्यज्ञानं त्रिकालविषयमैश्वर्यमणिमादिकं अनंतशक्तिमत्वं च पंचमं योगलक्षणं॥ त
थाणिमादिलक्षणं॥ अणिमा महिमा चैव लघिमा गरिमा तथा॥ प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चा
ष्टसिद्धयः॥ अनंतमणुप्राप्तिः स्वात्मत्वेन प्रवेशनं॥ अणिमासंज्ञमैश्वर्यं प्रोक्तस्य परमात्मनः
दृत्रि ब्रह्मांडादिशिवांतायाः ... शतत्वसंहृतेः वहिश्चव्याप्यवृत्तित्वमैश्वर्यं महिमाह्वयं॥ महामेर
उसमानस्यसमुद्धरणकर्मणि॥ अत्यल्पतूलतुल्यत्वं लघिमानं विदुर्बुधाः॥ परमाणुसमानस्य
स्यसमुद्धरणकर्मणि॥ गौरवे मेरुतुल्यत्वं गरिमाणं विदुर्बुधाः॥ पातालवासिनः पुंसो ब्रह्मलो
कावलोकनं॥ प्राप्तिर्नामिमहैश्वर्यासुदुः प्रापमयोगिनां॥ आकाशगमनादीनामन्यासांा
सिद्धिसंपदां॥ स्वेच्छामात्रेण संसिद्धिः प्राकाम्यमभिधीयते॥ स्वशरीरप्रकाशेन सर्वार्था

नांप्रकाशनंप्राकाम्यमिदमैश्वर्यमितिकेचित्प्रचक्षते॥स्वेछयायंत्रेणलोकानांसृष्टिस्थित्यंतकर्तृ
ता॥सूर्यादीनांनियोक्तृत्वमीशित्वमभिधीयते॥सलोकपालाःसर्वेपिलोकाश्चवशवर्तिनः॥

तदैश्वर्यंवशित्वाख्यंसप्तमं शिवयोगिनांसर्वात्मभावसाम्रा ज्यनिरंतरितचेतसां॥परिपक्व
समाधीनांकिंकिंनाम्पनसिध्यति॥यस्त्वेवंब्राह्मणोवेत्तितस्यदेवावशेस्थिताःकिंपुनःक्ष्मापतिव्याघ्र
व्यालस्त्रीपुरुषादयः॥अर्वाचीनेस्यल्लोकेमुंवेत्फलेस्वर्गादिसंभवैस्वर्गादिराज्यंसाम्राज्यंमनुते
नहिपंडितः॥तदेवतस्यसाम्राज्यंयत्तुसाम्राज्यमात्मनिपुत्रपौत्रगृहक्षेत्रधनधान्यसमृद्धयः॥
नि अर्वाचीनोसिध्यंतिस्वर्गपातालभूमिषु॥पाकेप्रवर्तमानेवशीतादिपरिहारवत्॥प्रासंगिक्या
श्चसिध्यंतियोगाभ्यासेनसर्वदा॥ऐश्वर्यमीश्वरत्वंतस्यनास्तिपृथक्स्थितिः॥पुरुषेधावमानेपिछायातमनुधावति॥अनंतशक्तिरैश्वर्यनिस्पंदश्चाणिमादयःस्वस्यैश्वरत्वेसंदिग्ध

सिध्यंतिस्वायमेवहि॥पुष्पमानयतांगंधोविनेछामनुभूयते॥पूर्णाहंभावयुक्तेनपरिछिन्ना
विभूतयः॥यदीयैश्वर्यविप्रुद्भिर्ब्रह्मविष्णुशिवादयः॥ऐश्वर्यवंतोभासंतेस एकात्मासदाशिवः॥
सर्वात्मभावनावंतंसेवंतेसर्वसिद्धयः॥तस्मादात्मनिसाम्राज्यंकुर्यान्नियतमानसइति॥त
यस्वंदेपिसमाध्यभ्यासनिरूपणपूर्वकंतदभ्यासक्रमेणैवसिद्धिक्रमश्चोक्तः॥तथाहिविश्वात्म
वि भावतावंतसेवंतेसनेसर्वविविक्तदेशेसुखसंनिविष्टः समासनेकिंचिदुपेत्ययश्चतिवाहुप्रमा
णंस्थिरदृक्कृश्यांगश्चिंताविहीनोभ्यसनंकुरुष्व॥सुखासनेसमासीनस्तत्वाभ्यासंसमा
चरेत्॥सदाभ्यासेनतत्कुर्यात्परतत्वप्रकाशने॥ब्रह्मांडपंचभूतस्थंपंचभूतमयीतनुःस
र्वेभूतमयंचेतित्यक्त्वानास्तीतिभावयेत्॥नकिंचिन्मनसाध्यायेत्सर्वचिंताविवर्जितः॥स
वाह्याभ्यंतरेयोगीजायंतेतत्वसं सुखः॥तत्वस्यसंमुखेजातेत्वमनस्कंप्रजायते॥अ

मनस्येतुसंजातेचितादिविलयोभवेत्॥चितादिविलयेजातेपवनस्यलयोभवेत्॥मनःपवन
योत्रीणद्विंपार्थेविमुंचति।इंद्रियार्थोयदामुक्तोवाद्यज्ञानंनजायते।वाह्यज्ञानेविनष्टेचतत
सर्वसमोभवेत्॥यदासर्वसमोजातोभवेद्व्यापारवर्जितः परेब्रह्मणिसंवद्धोयोगीप्राप्तलयस्तदा
॥सदाभ्यासरतानांचयःपरोजायतेलयः तस्यार्थयिष्यामिलर्णमुक्तचेतसः॥सुखंदुःखंन
जानातिशीतोष्णेनचविंदति।विचारचेद्रियार्थानांनवेत्तिहिलयंगतः॥तंचजीवन्मुक्तोवापिन
पश्यतिनमीलति॥नि जीवःकाष्ठवत्तिष्ठेल्लयस्थश्चाभिधीयते॥निर्वातस्थापितोदीपोभा
सतेनिश्चलोयथा॥जगद्व्यापारनिर्मुक्तस्तथायोगीलयंगतः यथावातैर्विनिर्मुक्तंनिश्चलं
निर्मलंसरः शब्दादिविषये स्त्यक्तोलयस्थोदृश्यतेतथा।प्रक्षिप्तंलवणंतोयेक्रमाघद्वद्विली
यते॥मनोप्यभ्यासयोगेनतद्वत्तणिलीयते॥लवणंतोयसंपर्कोद्यथातोयमयंभवेत्॥म

नोपिब्रह्मसंस्पर्शात्तथाब्रह्ममयंभवेत्॥यथाक्षारोदयेनेनप्राप्यतेलवणंध्रुवं॥ब्रह्मानंमय द
त्वेननिर्वाणंमनसस्तथा॥घृतात्स्पर्थग्विरहितघृतेलीनंघृतंयथा॥तत्वेलीनस्तथायोगीपृथ्य
कै गभावंनविंदति॥निमेषश्वासपलैर्नाडीभिःप्रहरैर्दिनैःमासैःसंवत्सरैःकालैर्लयस्थोयत्परंव्र
श्व जेत्॥श्वासोछ्वासात्मकःप्राणःषड्भिःप्राणैःपलंस्मृतं॥पलैःषष्टिभिरेवस्याद्घटिकाॅलसंमिता॥ ल
योगीनिमेषमात्रेणलयेनलयतेध्रुवं॥स्पर्शनंपरतत्वस्याप्युत्थानंचपुनःपुनःब्रमर्शा
तिःप्रजायेतमुहूर्त्तनिद्रावमूर्छना॥निमेषषट्कमात्रेणलयेनांतःस्थायोगिनःश्वासद्वयलम्बे
नापिकूर्मवातादिवायवःनिवर्त्ततेचधातूनांवर्धकुतिधातुगं॥श्वासत्रयलयेनापितेनप्राणा
दिवायवःश्वासप्रवाहसंवंधात्स्वस्वस्थानेवहंतिते॥चतुःश्वासे[illegible]येनापिसत्पधातुगतास्ता
ःसम्पशायुचिप्रंकुर्वतिधातूनांसमवायकल येनपलमात्रेणचासनस्थोनरिवघते॥स्व

यो॰ चिं॰ ल्पश्वासी भवेद्योगी स्वल्पोन्मेषयुतस्तथा ॥ पलद्वयलयेनापि द्वनाड्याश्चलनं भवेत् ॥ अ-
नाहतः स विज्ञेयो न तत्रैव न्यसेन्मनः ॥ चतुःपलप्रमाणेन लयेनानुभवो भवेत् ॥ अकस्मान्नियत
१५३ त्वेव शब्दः कर्णे शुभाशुभः ॥ पलाष्टकलयेनापि कामस्तस्य निवर्तते ॥ तथापि नैव जायेत कामि
न्यालिंगितस्यच ॥ कलापादलयेनापि सुषुम्णामार्गवाहिनी ॥ कला पश्चिममार्गे पानस्याभा
वेवन छति ॥ घटिकार्द्धलयेनापि शक्तिः संचलति ध्रुवं ॥ ऊर्द्ध्वपश्चिममार्गेन वा तरोधेन जाग्र
ती कलामात्रलयेनापि शक्तिः संचलति ध्रुवं ॥ कलाद्वयलयेनापि शक्तेः संचलनं न च ॥ क्ष
पाद्युत्पद्यते तस्य मनसः कंपनं सहजं ॥ चतुःकलालयेनापि नीद्राभावो निवर्तते ॥ त्रुटि
स्फुलिंगवद्योगी तेजोबिंबं प्रपश्यति ॥ दिनपादलयेनापि स्वल्पाहारो भवेन्नरः ॥ स्वल्पमूत्र
पुरीषत्वं लघुता स्निग्धता तनोः ॥ वासरार्द्धलयेनापि स्वात्मज्योतिः प्रकाशते ॥ सूर्योग्नि १५३

मिरिवोद्दीप्यो योगी विश्वे प्रकाशते ॥ दिनमात्रं लयेनापि स्वात्मतत्त्वं प्रकाशते ॥ इंद्रियज्ञान
विस्फारो ब्रह्मांड्यं प्रवर्तते ॥ अहोरात्रलयेनापि योगी स्वात्मनि संस्थितः ॥ चित्तवृत्तिनिरो
जै धेन ग्रज्ञानाति दूरतः ॥ अहोरात्रद्वयेनापि लयेनांतश्च योगींद्री दूरादपि न संशयः ॥ दूरदर्श
नविज्ञानं स्वभावेनैव वर्त्तते ॥ अहोरात्रत्रयेणापि लयानंद समुत्थितः ॥ दूरादपि रसं वेत्ति यो
गी संकल्पवर्जितः ॥ अहोरात्रचतुष्केन लय. . . . भावप्रभावतः स्पर्शं जानाति योगींद्रो दू
रादपि न संशयः ॥ पंचरात्रलयेनापि तस्याशुत्पद्यते ध्रुवं ॥ दूरश्रवणविज्ञानं दूरादाश्चर्यका
रणं ॥ एतत्पंचेंद्रियज्ञानं महत्त्वानुभवात्मकं ॥ जानंत्यनेन योगींद्राः सकलं विश्ववर्जनं ॥
ण षड्रात्रैः लयेनापि महाबुद्धिप्ररोहति ॥ यायातकर्मजातं च विश्वज्ञानं प्रवर्तते ॥ सप्त
रात्रलयेनापि परेलीनस्य योगिनः ॥ आब्रह्म विश्ववेत्तृत्वं श्रुतित्वं प्रवर्तते ॥ अष्टरात्रलये

नापिभवेद्योगीनिरामयः॥क्षुत्पिपासादिभावैश्चसहजस्थैर्नपीड्यते॥नवरात्रलयेनापिनिर्वा
दःस्वात्मवर्तितः॥वाचांसिद्धिर्भवेत्तस्यशापानुग्रहकारिणी॥दशरात्रलयेनापियोगींद्रःस्वा
 त्मधिष्ठितः॥पातिकौसुगुप्तानिमहीचित्राणिपश्यति॥ततश्चैकादशाहेनलयस्थांस्यजवोद
यात्॥मनसासहितस्यापिगंतुमिछतिविग्रहः॥द्वादशाहलयेनापिभूचरत्वंहिसिद्ध्यति
निमिषार्द्धप्रमाणेनपर्यटत्येवभूतलं॥ततस्त्रयोदशाहेनलयेनापिमहा ना॥योगींद्रः दु
खेचरींसिद्धिंलभतेचिंतनादपि॥चतुर्द्दशदिनांतंचलयस्थोयदितिष्ठति॥अणिमाख्या
स्यसिद्धिःस्याद् णुत्वंप्राप्यतेयया॥आत्मनैवात्मनालीनोयोगीषोडशवासरं॥लभते
कृ महिमासिद्धिस्समहीरूपधृग्यया॥अष्टादशदिनांतेंलयस्थोयदितिष्ठति॥गरिमाख्यांल त
भेत्सिद्धिंययाभूभारधृग्भवेत्॥यस्यविंशद्वासरांतोलयस्तिष्ठतिनिश्चलः॥लघिमाख्याभ

ग्रै तो
वेत्सिद्धिर्ययाणुत्वस्यभारधृक्॥द्वाविंशतिदिनानिस्यात्सल योलयंगतः॥प्राप्तिसिद्धि
र्भवेत्तस्यप्राप्यतेयाजगत्स्थितं॥यस्यत्रिंशलुपगतोयोगीचतुर्विंशंतिवासरान्॥तया
प्राकाम्यसिद्धिःस्यादीप्सितंलभतेयया॥यस्यैवास्तंगतंचित्तंषड्विंशतिदिनानिवै॥लभ
तेजगदीशित्वंयेनविश्वगुरुर्भवेत्॥अष्टाविंशत्यहर्यस्यलयस्तिष्ठेत्स्थिरासने॥वयशि
त्वसिद्धिमाप्तिःस्याद्ययावैवश्यकृज्जगत्॥गंतुमिछंतियेकेचित्परब्रह्मपदेलयं॥भवंतिसिद्ध
ले यःसर्वास्तेषांविध्वंसकारिकाः॥मासमेकंलयोयस्यग्रस्तेष्ठेदखंडितः॥नजीर्णिस्योगी ना
द्रोपावन्मोक्षंसगच्छति॥त्रिमासलयेनापिपृथ्वीतत्वंसगच्छति॥पृथ्वीतत्वेतुसंसिद्धेयो
गींद्रोवज्रसंनिभः॥सार्द्धसंवत्सरेणापिलयस्थस्यापियोगिनः॥तोयतत्वस्यसिद्धिः
स्यात्तोयतत्वमयोभवेत्॥संवत्सरत्रयेणापिलयस्थस्यापियोगिनः॥तेजस्तत्वस्यसिद्धिः

यो॰ चिं॰ स्यात् ब्रह्मस्तत्वमयो भवेत्।।षड्भिः संवत्सरैर्योगिवस्वंडलयसंस्थितः।।वायुतत्वस्यसिद्धिसा
छक्तितत्वमयो हि सः ब्रह्मांडसकलंयस्यात्यापिस्थमिवमौक्तिकं।।आत्मकायस्वरूपंचनिधा
१५५ याथयथास्थितं।।कायस्थो दृश्यते लोके तत्वचर्यां समाचरेत्।।तत्वचर्यां करोत्येवशक्तितत्व
भ क्षयोवेत्।दूत्यंक्रमविवृद्धेन लयाभ्यासेनयोगिनः।।भुंजंते परमानंदं भुशुंडादिमहात्मव
त्।।ब्रह्मविष्णुमहेशानां प्रलयेष्वपि योगिनः भुंजते परमानंदं भुशुंडादिमहात्मवत्।।अत्र
योगांगनिरूपणानंतरं सिद्धिक्रममाह भगवान्पतंजलिः।।वैशेषिकनये द्रव्यगुणकर्म
णामर्थसंज्ञावत् धारणाध्यानसमाधीनामेव विषयाणां व्यवहारलाघवाय संयाम इति
संज्ञां कृत्वा तस्य संयमस्य फलमुपयोगं च सूत्राभ्यां प्रादर्शयत्।।तज्जयात्प्रज्ञा
लोकः तस्य भूमिषु [illegible] योगपूर्ति।।एतदर्थस्तु तस्य संयमस्य जयादभ्यासेन सात्म्या १५५

यादनात्मज्ञाया ज्ञातव्यविवेकरूपाया आलोकः प्रसरो भवति।।प्रज्ञांज्ञातं ए नभिभूतत्वे
सति निर्मलस्य वाहे वस्थालक्षणा ओको प्रवर्तीत्यर्थः तस्य संयमस्य भूमिषु स्थूल सू
क्ष्मालंबनभेदेनास्थितासु चित्तवृत्तिषु विनियोगः कार्यः अधरामधरां जित्त भूमिं जितां
कृत्वोत्तरस्यामुत्तरस्यां चित्तभूमौ संयमः कार्यः नह्यसात्मीकृताधरभूमिउत्तरभूमौ संय
मं कुर्वाणः फलभाग्भवति।।यथोक्तस्य संयमस्य विषयपरिशुद्धिं कर्तुं परिणामत्रयं सू
त्रेणादर्शयत् व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधलक्षणचित्तान्वयो
निरोधपरिणामः व्युत्थानं क्षिप्तमूढविक्षिप्ताख्या भूमित्रयं।।निरोधः प्रकृतसत्व
स्यागत्त स्याचेत्यसः परिणामः ताभ्यां व्युत्थाननिरोधाभ्यां जनितौ यौ संस्कारौ तयो
र्यथाक्रममभि भवोन्यग्मू तयाकार्यांतरकरणासामर्थ्येनावस्थानं।।प्रादुर्भाव

द्वैताद्वैतविलक्षणवाद के इस सिद्धान्त में समरसता ही अद्वय है, जिसकी अनुभूति गुरु द्वारा शक्तिपातजन्य स्वविश्रान्ति के अनन्तर ही सम्भव है। व्यष्टिपिण्ड को समष्टिपिण्ड से एकीकृत कर क्रमशः शक्ति और परमपद में विलीन करना पड़ता है। प्रकाशात्मा शिव की विमर्शशक्ति ही शिव की प्रकाशिका बन जाती है। परमपद के साथ सामरस्य स्थिति और इसी के व्युत्थान का अभाव है—आत्यन्तिक निरुत्थान दशा अर्थात् शब्दब्रह्म से अतीत स्थिति। यही है शवारूढ़ा, चिद्रूपा, जगत्व्यामोहिनी, महामाया, महाकाली का नृत्य शिव के वक्षःस्थल पर।

——:o:——

सन्दर्भग्रन्थसूची

१. अपरोक्षानुभूति—आदिशङ्कराचार्य, सम्पादक – पं० मनोहरलाल शर्मा, प्रकाशक – श्री मनोहरलाल शर्मा, १९२, चित्तरंजन एवेन्यू—कलकत्ता-७, सम्वत्—२०२१

२. अमरौघ-प्रबोध – श्रीमद्गोरक्षनाथ विरचित सिद्धसिद्धान्तपद्धति ऐण्ड अदर वर्क्स ऑव दि नाथयोगीज़
सम्पादिका—डॉ० कल्याणी मल्लिक, पूना ओरियन्टल बुक हाउस, पूना, १९५४

३. अष्टोत्तरशतोपनिषत्सु, योग-उपनिषदः—श्री उपनिषद्ब्रह्मयोगिविरचित-व्याख्यायुताः, आ० महादेवशास्त्रिणा संपादिताः, अड्यार—पुस्तकालयार्थे प्रकटीकृताश्च, १९२०

४. ईशादिदशोपनिषदः—शाङ्करभाष्यसमेतम्, प्रकाशक — मोतीलाल बनारसीदास, दिल्ली, १९६४

५. ईशादि नौ उपनिषद्—गीता प्रेस, गोरखपुर, सं० २०१०

६. एक सौ आठ उपनिषद्—सम्पादक – पं० श्री रामजी शर्मा आचार्य, प्रकाशक—संस्कृति-संस्थान, ख्वाज़ा कुतुब, वेद नगर, बरेली—१९७८

७. उपनिषत्सङ्ग्रहः—सम्पादक—पं० जगदीश लाल शास्त्री
प्रकाशक—मोतीलाल बनारसीदास, दिल्ली—१९८०

८. ऋग्वेद – म० म० श्री दामोदर सातवलेकर, प्रकाशक – वसन्त श्रीपाद सातवलेकर, स्वाध्याय-मण्डल, भारत मुद्रणालय, किल्ला पारडी (जि० वरसाड), गुजरात राज्य, सन्-१९७८

९. कठोपनिषद्—ईशादि नौ उपनिषद्, गीता प्रेस, गोरखपुर, सं० २०१०

१०. कल्याणाङ्क—सन्त वाणी अङ्क, गीता प्रेस, गोरखपुर, सन्-१९५५

११. कल्याणाङ्क – श्री हरिभक्तिविलास, गीता प्रेस, गोरखपुर, १९५८

१२. काश्मीर शैव दर्शनः मूल सिद्धान्त—डॉ० कैलाशपति मिश्र—अर्द्धनारीश्वर प्रकाशन, वाराणसी-१९८२

१३. गणकारिका – आचार्य-भासर्वज्ञविरचित, सम्पादक– श्रीचिमनलाल, ओरियन्टल इन्स्टीट्यूट, बड़ौदा-१९६६

१४. गोरक्षनाथ (नाथ-संप्रदाय के परिप्रेक्ष्य में) – डॉ० नागेन्द्रनाथ उपाध्याय, नागरी प्रचारिणी सभा, वाराणसी, सम्वत्-२०३३

१५. गोरक्षपद्धति—अनुवादक – पं० महीधर शर्मा, प्रकाशक—खेमराज श्रीकृष्णदास 'श्री वेंकटेश्वर' स्टीम प्रेस, ७वीं खेतवाड़ी, बम्बई, सम्वत्-२०२४

१६. गोरक्षसिद्धान्तसंग्रह—सम्पादक—श्री जनार्दनशास्त्री पाण्डेय, सरस्वती भवन ग्रन्थमाला (११०), वाराणसी, संस्कृत विश्वविद्यालय, वाराणसी, सन्—१९७३

१७. गोरक्ष-संहिता प्रथम भाग—सरस्वती भवन ग्रन्थमाला (११०) प्रधान सम्पादक –डॉ० भागीरथ प्रसाद त्रिपाठी, सम्पादक—श्री जनार्दन पाण्डेय, प्रकाशक—सम्पूर्णानन्द संस्कृत विश्वविद्यालय, १९७६

१८. गोरक्ष संहिता द्वितीय भाग—प्रधान सम्पादक– डॉ० भागीरथ प्रसाद त्रिपाठी, सम्पादक—श्री जनार्दन पाण्डेय, वही, १९७७

१९. गोरक्ष-वचन-संग्रह –प्रकाशक—महंत अवेद्यनाथ, दिग्विजयनाथ न्यास, गोरखनाथ मन्दिर, गोरखपुर

२०. गोरख-दर्शन—लेखक, श्री अक्षय कुमार बनर्जी, सम्पादक—डॉ० भगवती प्रसाद सिंह, प्रकाशक - महंत अवेद्यनाथ दिग्विजयनाथ न्यास, गोरखनाथ मन्दिर, गोरखपुर, सम्वत्-२०२८

२१. घेरण्ड-संहिता –सम्पादक-श्री श्रीशचन्द्र वसु, अड्यार, मद्रास-१९३३

२२. चक्रकौमुदी – श्री बदरीनाथ विरचित, सम्पादक –श्री जीवेश्वर झा, गङ्गानाथ झा, केन्द्रीय संस्कृत विद्यापीठ, इलाहाबाद-१९७९

२३. चरक-संहिता—सम्पादक—श्री जयदेव विद्यालङ्कार, प्रकाशक—मोतीलाल बनारसीदास, बनारस, सं०, १९९३

२४. चैतन्य सम्प्रदाय : सिद्धान्त और साहित्य—डॉ० नरेश चन्द्र बंसल, प्रकाशक—विनोद पुस्तक मन्दिर, आगरा—१९८०

२५. छान्दोग्योपनिषद्—आर्य पुस्तकालय, अनारकली, लाहौर

२६ छान्दोग्योपनिषद्—गीता प्रेस, गोरखपुर, सं०—२०२३

२७. जीवन लक्ष्य और साधना—लेखक, श्री रामावतार प्रसाद विशारद, प्रकाशक—श्री रामावतार प्रसाद विशारद, डी० ३८।४, हौज़ कटोरा, वाराणसी

२८. ज्ञानसङ्कलिनीतन्त्रम्—योगतन्त्र ग्रन्थ माला (४) तन्त्रसंग्रह भाग २ सम्पादक—डॉ० गोपीनाथ कविराज, सं०—२०२६

२९. तत्त्व प्रकाशिका – ब्रह्मसूत्रभाष्य पर श्री जयतीर्थयति कृत टीका, सम्पादन—पूर्णप्रज्ञा रिसर्च इन्स्टिट्यूट—१९६७

३०. तत्त्वार्थदीपनिबन्ध (शास्त्रार्थप्रकरण)—श्रीमद्वल्लभाचार्यकृत [प्रकाश संस्कृतटीका तथा अभिनव स्नेह प्रपूरणी हिन्दी व्याख्या सहित, व्याख्याकार—श्री केदारनाथ मिश्र, प्रकाशक—भारतीय विद्या प्रकाशन, वाराणसी, १९७१

३१. तन्त्र और आगमशास्त्रों का दिग्दर्शन—श्री गोपीनाथ कविराज, अनुवादक—पं० हंसकुमार तिवारी, प्रकाशक, बिहार-राष्ट्रभाषा परिषद्, पटना, १९७७

३२. तन्त्र और संत—डॉ० राममूर्ति त्रिपाठी, साहित्य भवन (प्रा०) लिमिटेड, इलाहाबाद-३ । १९७५

३३. तान्त्रिक वाङ्मय में शाक्त दृष्टि—महामहोपाध्याय श्री गोपीनाथ कविराज, प्रकाशक—बिहार राष्ट्रभाषा परिषद्, पटना-१९६३

३४. तान्त्रिक साधना और सिद्धान्त—म० म० गोपीनाथ कविराज, बिहार-राष्ट्रभाषा परिषद्, पटना ४ । १९७९

३५. तैत्तिरीयोपनिषद्–शाङ्करभाष्य सहित, गीता प्रेस, गोरखपुर, सं० २०१९

३६. तोडलतन्त्रम्—योगतन्त्र ग्रन्थमाला (४), तन्त्रसंग्रह-भाग (२), सम्पादक—डॉ० गोपीनाथ कविराज, वाराणसी, सं० २०२६

३७. दत्तात्रेय योगशास्त्र—सम्पादक एवं व्याख्याकार—डॉ० ब्रह्ममित्र अवस्थी, स्वामी केशवानन्द योगसंस्थान-८।३, रूपनगर, दिल्ली-७, सन्—१९८२

३८. दशश्लोकी--श्री निम्बार्क वेदान्त, प्रकाशक—श्री निम्बार्क पीठ, १२ महाजनी टोला, इलाहाबाद-३, सं०-२०२०

३९. द्वैत वेदान्त का तात्त्विक अनुशीलन—डा० कृष्णकान्त चतुर्वेदी, प्रकाशक—विद्या प्रकाशन मन्दिर, १६८१, दरियागंज, दिल्ली-६। सन् १९७१

४०. नाथ-सम्प्रदाय—श्री हजारीप्रसाद द्विवेदी, नैवेद्य निकेतन, वाराणसी-५, सन् १९६६

४१. निर्वाण तन्त्र—सम्पादक - पं० रमादत्त शुक्ल, प्रकाशक—पं० देवीदत्त शुक्ल स्मारक कल्याण मन्दिर, प्रकाशन, प्रयाग-६

४२. पातञ्जल योगदर्शन—व्यास भाष्य, भोजवृत्ति सहित, अनुवादक—श्री स्वामी विज्ञानाश्रम, प्रकाशक—श्री मदनलाल लक्ष्मी निवास, चंडक, अजमेर नगर, सम्वत्-२०१८

४३. पातञ्जल योगदर्शन—श्रीमद् हरिहरानन्द आरण्य कृत बंगला-भाष्यानुवाद और टीका का मूल सहित हिन्दी रूपान्तर। सम्पादक—श्री भगीरथ मिश्र, श्रीहरिकृष्ण अवस्थी, श्री ब्रजकिशोर मिश्र, प्रकाशक—लखनऊ विश्वविद्यालय, लखनऊ

४४. प्रत्यभिज्ञाहृदयम्—(क्षेमराजकृत), सम्पादक—श्री विशालप्रसाद त्रिपाठी, नेशनल पब्लिशिंग हाउस, दिल्ली, १९६९

४५. ब्रह्मसूत्रभाष्यम्—श्री जयतीर्थकृत-तत्त्व प्रकाशिका टीका, श्री राघवेन्द्र-यतिकृत भावदीपा टिप्पणी, सम्पादक—आर० एस० पंचमुखी, प्रकाशक—राघवेन्द्र तीर्थ प्रतिष्ठान, कर्नाटक हिस्टोरिकल रिसर्च सोसाइटी धरवाद (Dharwad), १९८०

४६. ब्रह्मसूत्रशाङ्करभाष्य—श्री स्वामी सत्यानन्द सरस्वती विरचित भाषानुवाद तथा सत्यानन्दी-दीपिका सहित, प्रकाशन स्थान--गोविन्द-मठ, टेढ़ीनीम, वाराणसी, सम्वत्-२०३५

४७. ब्रह्मसूत्रसिद्धान्तमुक्तावलिः—श्रीवनमालिविरचिता, प्रकाशित स्थान—आनन्दाश्रम मुद्रणालय, सन्-१९४२

४८. भारतीय दर्शन और मुक्ति मीमांसा—डॉ० किशोरदास स्वामी, प्रकाशक, महालक्ष्मी ग्लास वर्क्स प्रा० लि०, बम्बई, पुस्तक प्राप्ति स्थान—श्री साधुबेला उदासीन आश्रम, १८ ए० बी० देसाई रोड, बम्बई—१९८०

४९ भारतीय दर्शन—पं० बलदेव उपाध्याय, शारदा मन्दिर, वाराणसी, सप्तम संस्करण-१९६६

५० भारतीय संस्कृति और साधना—प्रथम खण्ड—महामहोपाध्याय पं० गोपीनाथ कविराज, बिहार-राष्ट्र-भाषा परिषद्, पटना, द्वितीय संस्करण-१९७७

५१ भारतीय संस्कृति और साधना—महामहोपाध्याय डॉ० गोपीनाथ कविराज, द्वितीय खण्ड, द्वितीय संस्करण, बिहार-राष्ट्रभाषा परिषद्, पटना-१९७९

५२. महार्थमञ्जरी—योगतन्त्र ग्रन्थमाला भाग (५) सम्पादक—पं० श्री व्रजवल्लभ द्विवेदी, वाराणसी, ख्रिस्ताब्दे-१९७२

५३. माण्डूक्योपनिषद्—ईशादिदशोपनिषदः- मोतीलाल बनारसीदास, दिल्ली-१९६४

५४. मुण्डकोपनिषद्—वही

५५. मायातन्त्रम्—तन्त्र संग्रह चतुर्थ भाग, सम्पादक—श्री व्रजवल्लभ द्विवेदी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, १९८१

५६. याज्ञवल्क्यस्मृतिः—निर्णयसागर, बम्बई ।

५७. योगमार्तण्ड—सम्पादिका—डॉ० कल्याणी मल्लिक, पूना, सन् १९५४

५८. योगसारसंग्रह—श्रीविज्ञानभिक्षु प्रणीत, सम्पादिका—डॉ० पवन कुमारी, प्रकाशक—ईस्टर्न बुक लिंकर्स, न्यू चन्द्रावल रोड, जवाहर नगर, दिल्ली-७, सन् १९८१

५९. लुप्तागम संग्रह—भाग १, सं०--श्री गोपीनाथ कविराज, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी सन्—१९७०। भाग-२ सं० पं० वज्रवल्लभ द्विवेदी, वही, सन्-१९८३

६०. वल्लभ वेदान्त पर एक दृष्टि—(प्रस्थान रत्नाकर पर आधारित), लेखिका—स्नेहलता, प्रकाशक, श्री गुरु मन्दिर, सी-५५, शिवाजी पार्क, नई दिल्ली-११००२६, सन्-१९८०

६१. वल्लभ सम्प्रदाय और उसके सिद्धान्त— डॉ० (श्रीमती) राधारानी सुखबाल, प्रकाशक—पं० रामप्रताप शास्त्री, चैरिटेबल ट्रस्ट, ३४, रामप्रताप शास्त्री, मार्ग, ब्यावर (राजस्थान)—१९८०

६२. वाक्यपदीयम् - श्रीभर्तृहरि विरचित, सम्पादक—श्री रामगोविन्द शुक्ल, प्रकाशक—चौखम्बा संस्कृत संस्थान, गोपाल मन्दिर लेन, वाराणसी, सम्वत्-२०३७

६३. वाचस्पत्यम् —(बृहद् संस्कृताभिधानम्) चौखम्बा संस्कृत सीरीज़ ऑफिस, वाराणसी-१ श्री तारानाथ भट्टाचार्य १९६२

६४. विष्णु पुराण—गीता प्रेस, गोरखपुर, सं०-१९९३

६५. वेदान्त पारिजात सौरभ—ब्रह्मसूत्रनिम्बार्कभाष्यम्— पं० ढुण्ढि-राजशास्त्रिणा संशोधितम्, प्रकाशक-चौखम्बा संस्कृत सीरीज़ ऑफिस, बनारस-१९३२

६६. वेदान्त पारिजात सौरभ—ब्रह्मसूत्र-श्री निम्बार्क वेदान्त, प्रकाशक— श्री निम्बार्क पीठ, १२ महाजनी टोला, इलाहाबाद-३, सम्वत् २०२०

६७. शाक्त दर्शनम्—पं० श्री चक्रेश्वर भट्टाचार्य दत्तै, गोहाटी-१९७०

६८. शारदातिलकम्—प्रकाशक—श्री जयकृष्णदास, हरिदास गुप्त, चौखम्बा-संस्कृत-सीरीज़ ऑफिस, बनारस सिटी— १९३४

६९. शिव पुराण—सम्पादक—श्रीराम शर्मा आचार्य, प्रकाशक—संस्कृति संस्थान, ख्वाजा कुतुब (वेदनगर), बरेली—१९६८

७०. शिवमहापुराण की दार्शनिक समालोचना—डॉ० रमाशंकर त्रिपाठी, प्रकाशक—हरिशङ्कर त्रिपाठी, अस्सी, वाराणसी, सन्-१९७५

७१. शिवयोगदीपिका—सदाशिव योगीश्वर विरचित, आनन्दाश्रम संस्कृत ग्रन्थावलिः, ग्रन्थाङ्कः-१३९ द्वितीयावृत्तिः

७२. शिव-संहिता—सम्पादक, डॉ० चमनलाल गौतम, प्रकाशक—संस्कृति संस्थान, ख्वाजा कुतुब (वेदनगर), बरेली (उ० प्र०), १९८२

७३. शिव-संहिता—सम्पादक—श्री रायबहादुर, श्री चन्द्र वसु, प्रकाशक— श्री सत्गुरु प्रकाशन, एस० एस० पी०, सन्-१९८१

७४. शिवस्वरोदय—अनुवादक पं० हरेकृष्ण शास्त्री, प्रकाशक—ठाकुरदास एण्ड सन्स, राजा दरवाजा, वाराणसी, सन् १९८०

७५. शैव-सिद्धान्त दर्शन—डॉ० कैलाशपति मिश्र, प्रकाशक—स्वामी राम-नरेश, अर्द्धनारीश्वर प्रकाशन २७, दीनदयाल नगर कालोनी नवाब गंज, वाराणसी-१०, सन् १९८२

७६. श्रीतन्त्रसार— सम्पादक, पं० मुकुन्दराम शास्त्री, काश्मीर संस्कृत ग्रन्थावलि, ग्रन्थाङ्क १७, सन् १९१८

७७. श्री निम्बार्क वेदान्त— आचार्य ललित कृष्ण गोस्वामी, प्रकाशक— श्री निम्बार्क पीठ, १२ महाजनी टोला, इलाहाबाद-३, सम्वत्-२०२०

७८. श्रीमदणुभाष्यम् - पाठकोपाह्वश्रीधरशर्मविरचितया, बालबोधिन्याख्य-टीकया समेतम्, भण्डारकर-प्राच्यविद्या-संशोधनमन्दिराधिकृतैः प्रकाशितम् सन् १९२६

७९. श्रीमद्देवीभागवत—सम्पादक, पं० रामतेजपाण्डेय, पण्डित पुस्तकालय, राजा दरवाजा, बनारस २०१२

८०. श्रीमद्भगवद्गीता—गीताप्रेस, गोरखपुर, सं०-२०२९

८१. श्रीमद्भागवत भक्त मनोरञ्जनी—श्री भगवत् प्रसादाचार्य विरचिता, सम्पादक—श्रीकृष्णशङ्कर शास्त्री, वि० सं०-२०२५

८२. श्री शिवदृष्टिः—श्री सोमानन्दनाथरचिता, श्रीमदुत्पलदेवकृतवृत्त्युपेता, सम्पादक—पं० मधुसूदन शास्त्री, काश्मीर संस्कृत ग्रन्थावलि—काश्मीर, सन्-१९३४

८३. श्रीशैवसिद्धान्त परिभाषा—श्री कविराजशेखर सूर्यभट्टारक विरचिता, प्रकाशक—तलकाडु आगमिक कृष्णदीक्षित 'श्रीमनोन्मनीकृपा' बेंगलोर, १९५८

८४. षट्चक्रनिरूपण और पादुकापञ्चम—तृतीय संस्करण, सम्पादक—श्री तारानाथ विद्यारत्न, प्रकाशक - बी० घोष, आगमानुसन्धान समिति कलकत्ता-१९४१

८५. षट्चक्रनिरूपण—सम्पादक, श्री स्वामी हंसस्वरूप, प्रकाशक—विज्ञान मन्दिर (विज्ञान प्रेस), ऋषिकेश (देहरादून) उ० प्र०, सन्-१९८०

८६. षडाम्नायतन्त्रम्—तन्त्रसंग्रह चतुर्थभाग, सम्पादक—श्री व्रजवल्लभ द्विवेदी, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, सन्-१९८१

८७. सरल-राजयोग—स्वामी विवेकानन्द, अनुवादक—श्री पृथ्वीनाथ शास्त्री, प्रकाशक—श्री राम कृष्ण आश्रम, मध्य प्रदेश

८८. सर्वदर्शन-सङ्ग्रह—श्रीमन्माधवाचार्य, सम्पादक—डॉ० उमाशंकर शर्मा ऋषि, चौखम्बा विद्याभवन, वाराणसी—१९६४

८९. सिद्धसिद्धान्तपद्धति—गोरक्षनाथ, प्रकाशक—श्री १०८ पूर्णनाथ जी, संस्कृत टीकाकार—श्री पं० द्रव्येश झा शास्त्री । भाषाकार—पं० योगिभीष्मनाथ जी, संशोधक—पं० ज्ञानिराम शास्त्री वि० सं०—१९९६

९०. सिद्धसिद्धान्तपद्धति—सम्पादक, श्री रामलाल श्रीवास्तव, गोरखनाथ मन्दिर, गोरखपुर, सं० २०३८
९१. सौन्दर्यलहरी (श्री शंकराचार्य विरचिता, श्रीलक्ष्मीधर व्याख्यासमलङ्कृता, भावोपनिषद्, श्रीभास्करराजभाष्य सहिता देवीपञ्चस्तरी च), सम्पादक—पं० एन० एन० गणपति, मैसूर-१९५३
९२. संस्कृत-हिन्दी कोश—वामन शिवराम आप्टे, मोतीलाल बनारसीदास, दिल्ली-७, सन् १९६९
९३. हठयोग एक ऐतिहासिक परिप्रेक्ष्य एवं हठयोगप्रदीपिका—सुरेन्द्र कुमार शर्मा, प्रकाशक—ईस्टर्न बुक लिंकर्स, ५८२५, न्यू चन्द्रावल, जवाहर नगर, दिल्ली, सन् १९८५

योग-उपनिषद्

९४. अद्वयतारकोपनिषद्—उपनिषत्-संग्रह—सम्पादक प्रो० जगदीशलाल शास्त्री, मोतीलाल बनारसीदास, दिल्ली, सन् १९८०
९५. अमृतनादोपनिषद्—वही।
९६. अवधूतोपनिषद्—वही
९७. क्षुरिकोपनिषद्—वही
९८. गर्भोपनिषद्—वही
९९. जाबालदर्शनोपनिषद्—वही
१००. तेजोबिन्दूपनिषद्—योग-उपनिषदः—सम्पादक, अ० महादेव शास्त्री, अड्यार पुस्तकालय मद्रास, १९२०
१०१. त्रिशिखिब्राह्मणोपनिषद्—वही
१०२. दर्शनोपनिषद्—वही
१०३. ध्यानबिन्दूपनिषद्—वही
१०४. नादबिन्दूपनिषद्—वही
१०५. पाशुपतब्राह्मणोपनिषद्—वही
१०६. ब्रह्मविद्योपनिषद्—वही
१०७. ब्रह्मोपनिषद्—उपनिषत्-संग्रह, सम्पादक, प्रो० जगदीशलाल शास्त्री, मोतीलाल बनारसीदास—दिल्ली, सन् १९८०
१०८. मण्डलब्राह्मणोपनिषद्—वही
१०९. योगकुण्डल्युपनिषद्—योग-उपनिषदः, अड्यार, १९२०
११०. योगचूडामण्युपनिषद्—वही
१११. योगतत्त्वोपनिषद्—वही

११२. योगराजोपनिषद्—उपनिषत्-संग्रह, मोतीलाल बनारसी दास-दिल्ली, सन् १९८०

११३. योगशिखोपनिषद्—योग-उपनिषदः, सम्पादक अ० महादेव शास्त्री, अड्यार, मद्रास-१९२०

११४. वराहोपनिषद्—वही

११५. शाण्डिल्योपनिषद्—वही

११६. हंसोपनिषद्—वही

117. Bhāskarī—Vol. I, A Commentary on the Iśvarapratyabhijñāvimarśini of Abhinava Gupta—Edited by K. A. Subramnia Iyer and Dr. K. C. Pandey, Allahabad—1983.

118. Haṭha-Yoga Pradipikā of Sh. Svātmārāma Svāmin, English Translation by Yogi Śrīnivāsa Iyangār, The Theosophical Publishing House, Adyar Madras, India. Third Edition – 1949.

119. Kāmakalāvilās of Puṇyā Nanda with Comm. Edited with Notes of Māhāmahopādhyaya Paṇdit Mukunda Rāma Shāstrī. Kashmir Series of Texts and Studies No. XII—1918.

120. Kāmakalāvilās by Puṇyānanda Natha with the Commentary of Natanānanda-Natha, Translated with commentary by Arthur Avalon (Sir John Woodroffe), Ganesh & Co. (Madras) Private Ltd. Madras-17, 1961

121. Parā Prāveshikā of Kṣhēmarāja—Edited with notes by Mahāmahopādhyaya Paṇdit Mukunda Rāma Shārtrī, Kashmir Series of Texts and Studīes. No.—XU. 1918.

122. Pāśupata Sūtram : with Pañchārtha-Bhāṣya of Kauṇḍinya, Translated with an Introduction on the History of Śaivīsm in India. Sh. Haripada chakraborti. (1970) Academic Publishers – II Panchanan Ghosh Lane Calcutta.

123. Pāśupata Sūtras : with Pañchārtha-Bhāṣya of Kauṇḍinya, Edited by Sh. R. Anantha Krishna Shastri, Published

by—The Oriental Manuscripts Library of the University of Travancore. Trivandrum—1940.

124. Philosophy of Gorakhnath with Gorakshavachan Sangraha by Sh. Akshaya Kumar Benerjea, Published by—Mahant Dig Vijai Nath Trust, Gorakhnath Temple, Gorakhpur—1962.

125. Ṣaṭtriṁśattattva-Sandoha (A Text of Trika Philosophy of Kashmir) with the Commentary of Rājānaka Ānanda Kavi, Translated into English with explanatory notes and Introduction by—Dr. Debabrata Sen Sharma, B.N. Chakravarty, University, Kurukshetra—1977.

126. Siddhānta Bindu—A Commentary on the Daśaślokī of Śaṁkarācārya : Edited with an Original Commentary by Mahāmahopādhyaya Vasudev Shastri Abhyankar, 1928. Second Edition by MM. K. V. Abhyankar, Bhandarkar Oriental Research Institute, Poona-4, 1962.

127. Siddha-Siddhānta-Paddhati and other works of the Nāth Yogīs—by Smt. Kalyani Mallik. Poona Oriental book House, 330 A, Sadashiv Peth, Poona—First impression, 1954.

128. Sīva Svarodaya—Text with English Translation by Sh. Ram Kumar Rai—Prachya Prakashan, Varanasi. 1980.

129. Tantrā Loka of Abhinava Gupta with Comm. by Rājānaka Jayaratha—Edited with Notes by Pandit Madhusudan Kaul Shastri, Kashmir Series of Texts and Studies. No. XXIX—1921.

130. The Bṛhadāraṇyaka Upniṣad : with the Commentary of Śankarācārya, Translated by Swāmī Mādhavānanda. Published by Swami Yogeshwarananda Advaita Ashrama, Mayavati Almora, Himalayas—1950.

131 The Shiva Sūtra Vimarshinī being The Sūtras of Vasu Gupta with the Commentary called Vimarshinī by Kshemarāja—Kashmir Series of Texts and Studies Vol. I—1911,

132. The Siddhānta Ratna with Comm. of Baladeva Vidyābhūṣaṇa, Edited with Introduction Etc. by Sh. Gopinath Kaviraj –1927, Benares Saraswati Bhavana Texts No.(10).

133. The Spanda Sandoha of Kṣhēmarāja—Edited with Notes by Māhāmahopādhyaya Paṇdit Mukunda Rāma Shāstrī. Published under Sir Pratāp Singh Sāhib Bahādur—Jammu and Kashmir State—1917.

134. The Tantrā Loka of Abhinava Gupta : with Comm. by Rājānaka Jayaratha, Edited with notes by Mahāmahopādhyāya Pandit Mukunda Rām Shāstrī.
Printed at the Indian Press—1918.

135. Vedānta Darśanam—Vision of Vedānta—Sh. R. Karunakaran.
Sri Śankara Sanskrit Vidyapeetham, Edakkadom, Quilon, S. India—1980.

अनुक्रमणिका

त

म

य

———

द्वितीय-पुष्प

श्रीः

सिद्धसिद्धान्तसंग्रहः

श्रीगणपतिचरणारविन्दाभ्यां नमः ।

यत् पादाब्जरजःस्पर्शादरजस्कं मनो भवेत् ।
स एव गुरुनाथो मे कृपासिन्धुः प्रसीदताम् ॥१॥

अर्था ये सिद्धसिद्धान्तपद्धतौ सुनिरूपिताः ।
संग्रहं तनुते तेषां कश्चिच्छ्रीकृष्णपुष्टये ॥२॥

पिण्डसम्भवविचारसंविदाधारतत्पररसैक्यभूमयः ।
तीक्ष्णधीभिरवधूत इत्ययं दर्शितः खलु निरूप्य संग्रहः॥३॥

कार्य्यकारणकर्तृत्वं यदा नास्ति कुलाकुलम् ।
अव्यक्तं परमं तत्वं स्वयं नाम तदा भवेत् ॥४॥

तस्यावस्थामात्रधर्माधर्मिणीति प्रसिद्धिभाक् ।
निजा शक्तिरभूत् तस्या औन्मुख्याद्भा परोत्थिता ॥५॥

ततः स्पन्दनमात्रा स्यादपरेति स्मृता ततः ।
सूक्ष्माहन्तार्धार्धमात्रा चिच्छिलाकुण्डलिन्यतः ॥६॥

निराकृतित्वान्नित्यत्वान्निरन्तरतया तथा ।
निष्पन्दत्वान्निरुत्थत्वान्निजाः पञ्च गुणाः स्मृताः ॥७॥

अस्तित्वमप्रमेयत्वमभिन्नत्वमनन्तता ।
अव्यक्ततेति पञ्च स्युः परायां सम्मता गुणाः ॥८॥

स्फुरत्ता स्फारतायुक्ता स्फुटता स्फोटता तथा ।
स्फूर्तिरेवं पञ्च गुणा अपरायामपि स्मृताः ॥९॥

निरन्तरत्वं नैरंश्यं नैश्चल्यं निश्चयत्वकम् ।
निर्विकल्पत्वमेव स्यात् सूक्ष्माया गुणपञ्चकम् ॥१०॥

पूर्णत्वं प्रतिविम्बत्वं तथा प्रकृतिरूपता ।
प्रत्यङ्मुखत्वमौच्चल्यं पञ्चैते भोगिनां गुणाः ॥११॥

शक्तिपञ्चकसम्भूतपञ्चविंशतिसंश्रयात् ।
परपिण्डसमुत्पत्तिः सिद्धान्तज्ञैः समीरिता ॥१२॥

उक्तं च—

निजा पराऽपरा सूक्ष्मा कुण्डली तासु पञ्चधा ।
शक्तिचक्रक्रमेणैव जातः पिण्डः परः शिवे ॥१३॥

तत्तोऽस्तितापूर्वमर्चिर्मात्रं स्यादपरं परम् ।
तत्स्वसंवेदनाभासमुत्पन्नं परमं पदम् ॥१४॥

स्वेच्छामात्रं ततः शून्यं सत्तामात्रं निरञ्जनम् ।
तस्मात्ततः स्वसाक्षाद्भूः परमात्मपदं मतम् ॥१५॥

अकलत्वासंशयत्वानुमतत्वान्यपारता ।
अमरत्वमिति प्रोक्ता गुणाः पञ्चापरे पदे ॥१६॥

निःकलत्वमलोलत्वमसंख्येयाक्षयत्वके ।
अभिन्नतेति पञ्चोक्ता गुणाः स्युः परमे पदे ॥१७॥

नीलता पूर्णता मूर्छा उन्मनी लयतेत्यमी ।
शून्ये पञ्च गुणाः प्रोक्ताः सिद्धसिद्धान्तवेदिभिः ॥१८॥

सहजत्वं सामरस्यं सत्यत्वं सावधानता ।
स्वर्गगत्वमिति प्रोक्ता गुणाः पञ्च निरञ्जने ॥१९॥

अभयत्वमभेद्यत्वमच्छेद्यत्वमनाश्यता ।
अशोष्यत्वमिति प्रोक्ता गुणाः पञ्च परात्मनि ॥२०॥

तत्त्वपञ्चकमाख्यातमाद्यपिण्डस्य पण्डितैः ।
एवं तथा गुणाः प्रोक्ताः पञ्चविंशतिसंख्यकाः ॥२१॥

सगुणैः समवेतैस्तैरादिपिण्डः समुद्भवेत् ।
आदेस्तु परमानन्दः प्रबोधः स्यात्ततस्ततः ॥२२॥

भवेच्चिदुदयस्तस्मात् प्रकाशः सोऽहमित्यतः ।
उदयः स्यात्तथोल्लासोऽवभासोऽथ विकाशनम् ॥२३॥

प्रभेति स्युर्गुणाः पञ्च प्रबोधस्य प्रकीर्त्तिताः ।
निष्पन्दहर्षावुन्मादः स्पन्दो नित्यसुखं तथा ॥२४॥

इति पञ्च गुणाः प्रोक्ताः परमानन्दसंज्ञके ।
सद्भावोऽत्र विचारश्च कर्तृत्वं ज्ञातृता तथा ॥२५॥

स्वातन्त्र्यमिति पञ्चैव गुणाश्चिदुदयस्य च ।
निर्विकारत्वनैष्कल्ये सद्बोधः समता तथा ॥२६॥

विश्रान्तिरेवं संप्रोक्तं प्रकाशगुणपञ्चकम् ।
अहन्ता खण्डितैश्वर्यं स्वानुभूतिः समर्थता ॥२७॥

सर्वज्ञतेति पञ्चोक्ताः सोऽहम्भावगुणा इमे ।
इत्याद्यपिण्डः संपृक्तः तत्त्वपञ्चकगैर्गुणैः ॥२८॥

पञ्चविंशतिसंख्याकैरिमैरेव समुत्थितः ।
आद्यादभून्महाकाशं ततो जातो महानिलः ॥२९॥

तस्मात्तेजो महत्तस्मान्महत् कं तन् महा धरा ।
अवकाशं तथा छिद्रमस्पृश्यत्वं तथा रवः ॥३०॥

नीलवर्ण इति प्रोक्ता गुणाः पञ्च महाम्बरे ।
सञ्चारश्चालनं स्पन्दः शोषणं धूम्रवर्णता ॥३१॥

इमे पञ्च गुणाः प्रोक्ता महावायौ मनीषिभिः ।
दाहकत्वं पावकत्वं सूक्ष्मत्वं रूपभासिता ॥३२॥

रक्तवर्णत्वमेवं स्युः गुणाः पञ्च महानिले ।
प्रवाहाप्यायनरसद्रवाश्च श्वेतवर्णता ।
इमे पञ्च गुणाः प्रोक्ता महावारिणि पण्डितैः ॥३३॥

स्थूलत्वनानाकृतिते काठिन्यं गन्धपीतते ।
इति पञ्च गुणाः प्रोक्ता महामह्यां मर्हाषभिः ॥३४॥

इति साकारपिण्डस्य तत्त्वपञ्चकमिष्यते ।
पञ्चविंशतिसंख्याका गुणास्तैर्मिलितैः शिवः ॥३५॥

शिवाद्भैरव एतस्माच्छ्रीकण्ठोऽतः सदाशिवः ।
ईश्वरोऽस्माद्रुद्र आसीत्ततो विष्णुस्ततो विधिः ॥३६॥

महासाकारपिण्डस्य सूर्त्यष्टकमिदं स्मृतम् ।
ब्रह्मणः प्राक्कृतं दृष्ट्वा नरनार्य्यात्मपिण्डकम् ॥३७॥

पञ्चपञ्चात्मकं तच्च शरीरमिदमुच्यते ।
अस्थित्वङ्मांसलोमानि नाड्यः पृथ्व्यंशका इमे ॥३८॥

लालामूत्रे असृक्स्वेदौ शुक्रमित्यंशका अपाम् ।
क्षुधातृषालस्यनिद्राकान्तयोंऽशा विभावसोः ॥३९॥

धावनं चलनं रोधः प्रसाराकुञ्चने तथा ।
वाय्वंशा उदिता एते पञ्च सिद्धान्तवेदिभिः ॥४०॥

रागद्वेषौ भयं लज्जा मोह एवं नभोगुणाः ॥
इति प्राकृतपिण्डे स्युः पञ्चभूतानि तद्गुणाः ॥४१॥

मनो बुद्धिरहङ्कारश्चित्तं चैतन्यमित्यथ ।
सिद्धसिद्धान्तगैरुक्तमन्तःकरणपञ्चकम् ॥४२॥

संकल्पश्च विकल्पश्च जडता मूर्छना तथा ।
मननं चेति संप्रोक्ता गुणाः स्युः पञ्च मानसाः ॥४३॥

विवेकवैराग्यपरा प्रशान्तिक्षमा गुणा बुद्धिगता भवन्ति ।
मानो ममत्वं सुखदुःखमोहा गुणा इमेहंकृतिवर्तिनःस्युः॥४४॥

मतिर्धृतिः संस्मृतिरुत्कृतिश्च स्वीकार इत्थं खलु पञ्च चैताः ।
चैतन्यनिष्ठास्तु विमर्षहर्षौ धैर्यं गुणाश्चिन्तननिःस्पृहत्वे ॥४५॥

अन्तःकरणधर्मा ये त एते संप्रदर्शिताः ।
सत्त्वं रजस्तमः कालो जीवश्च कुलपञ्चकम् ॥४६॥

दया धर्मः क्रिया भक्तिः श्रद्धेत्थं सत्त्वगा गुणाः ।
दानं भोगश्च शृङ्गारः स्वार्थादाने रजोगुणाः ॥४७॥

मोहप्रमादौ निद्रा च हिंसाक्रौर्ये तमोगुणाः ।
विवादः कलहः शोको बन्धो वञ्चनमेव च ॥४८॥

एवं पञ्च गुणाः प्रोक्ताः कालस्य मुनिपुङ्गवैः ।
जाग्रत्स्वप्नसुषुप्तितुर्य्यकतुरीयाऽतीतसंज्ञा गुणाः ॥४९॥

जीवस्था इह कीर्तिता इति भवेज्जीवेऽपि तत्पञ्चकम् ।
इच्छा कर्म विमोहिनी प्रकृतियुक् वाक् चेति पञ्चाऽपि ते ॥५०॥

व्यक्ताख्याधरशक्तिपञ्चकगुणाः सन्तीति सिद्धान्तवाक् ।
उन्मेषो वासना वीप्सा चिन्ता चेष्टैच्छिका गुणाः ॥५१॥

स्मृत्युद्यमोद्वेगकार्य्यनिश्चयकारिणी क्रिया ॥
मदमात्सर्यकपटकर्त्तव्यासत्यसंज्ञकाः ॥५२॥

प्राकृता मायिका आशा तृष्णा काङ्क्षा स्पृहा मृषा ।
परास्ति पश्यन्त्यथ मध्यमा च वैखर्य्यपीष्टाक्षरमातृका च ।
एते गुणा वाचि भवन्ति पञ्च प्रपञ्चनिर्मुक्तजनोपदिष्टाः ॥५३॥

पञ्चविंशतिरेते स्युर्व्यक्तिशक्तिगुणा इह ।
कालकर्माग्निचन्द्रार्काः प्रत्यक्षकृतिहेतवः ॥५४॥

इति प्रीतिलीलातुरत्वाभिलाषा
गुणाः पञ्च कामे वसन्तीत्यणन्ति ।
शुभं चाशुभं कीर्त्यकीर्त्ती तथेच्छा-
गताः कर्मणि ब्रह्मनिष्ठास्तथा ते ॥५५॥

उल्लोलकल्लोलसमुच्चलत्वप्रोन्मादवत्यूर्मिविशेषवत्यः ।
विलेपयन्ती लहरीविलोला विलेलिहासप्रसरा प्रवृत्तिः ॥५६॥

स्रवन्तिका नामवती प्रवाहा सौम्या प्रसन्नेति कलाः सुधांशोः ।
उदीरिता षोडश तस्य चान्या न वृत्तिसंज्ञामृतनाम तस्याः ॥५७॥

तपिनी ग्रासिनी क्रूरा कुञ्चनी शोषणी तथा ।
बोधिनी घस्मरार्काषिण्यर्थसन्तुष्टिवर्द्धिनी ॥५८॥

ऊर्मिरेखाकिरणिनी प्रभावत्यंशुमालिनः ।
इमा कला द्वादश स्युरन्याप्यस्ति प्रकाशिका ॥५९॥

वीजिनी दीपिका ज्वाला विस्फुलिङ्गा प्रचण्डिका ।
पाचिका रौद्रिका दाहा रोचिनी शोषिणीति ताः ॥६०॥

फला दश भवन्त्यग्नेर्ज्योतिर्निजकला परा ।
इति प्रत्यक्षकारिणो गुणाः स्युः सिद्धसम्मताः ॥६१॥

द्वाराणि द्वादशोक्तानि नाडीनां यानि तान्यथ ।
दर्श्यन्ते सिद्धसिद्धान्तनिर्णीतानि यथामतम् ॥६२॥

इडापिङ्गले नासिकारन्ध्रगे द्वे
सुषुम्णा भवेत्तालुमूलेजरन्ध्रम् ।
समे तावधीकृत्य गान्धारिकाख्या
तथा हस्तिजिह्वा श्रवोयुग्मके स्यात् ॥६३॥

भवेच्छङ्खिनी लिङ्गवक्त्रादिदण्डा-
ध्वनापद्मजद्वारमाप्ताथ पूषा ।
तथालम्बुषा चक्षुषोः सन्तगास्या-
ग्रगा स्यात्पयस्विन्यपाने कुहूश्च ॥६४॥

दश नाड्यो दशद्वारवर्त्तिन्य इति कीर्त्तिताः ।
द्वासप्ततिसहस्राणि नाड्योऽन्या रोमकूपगाः ॥६५॥

हृदि प्राणो गुदेऽपानो नाभिगामी समानकः ।
उदानः कण्ठनिलयो व्यानस्तालुसमाश्रयः ॥६६॥

सर्वाङ्गव्यापको नागः कूर्मोऽक्षिणि कृकलो नसि ।
देवदत्तो मुखाग्रस्थः कण्ठाधः स्याद्धनञ्जयः ॥६७॥

आहाराकाङ्क्षकः पूर्वो द्वितीयः स्तम्भकुम्भकः ।
तृतीये दीपनं पाकस्तुर्ये नाड़ीविशोधनम् ॥६८॥

आप्यायनं रुचिश्चैव पञ्चमेऽशनजल्पने ।
मोडनोच्चाटने षष्ठे मेषोन्मेषौ च सप्तमे ॥७६॥

क्षुदुद्गारावष्टमे स्तां जृम्भणं नवमे भवेत् ।
दशमे नादघोषौ तु स्युरेते दश वायवः ॥७०॥

अवलोकनपिण्डस्य समुत्पत्तिरितीरिता ।
नरनारीरूपमाहुरिदमेव मुनीश्वराः ॥७१॥

गर्भपिण्डसमुत्पत्तिमथ वक्ष्यामि सम्मताम् ।
ऋतौ स्त्रीतरयोर्योगे जीवो बिन्दुरजाश्रयात् ॥७२॥

पूर्वस्मिन् कलिलं ततो रविदिनैः स्याद् बुद्बुदाभं ततः ।
पक्षाद्गोलकसन्निभं कठिनताभाङ्मासमात्राद्भवेत् ॥
तद्द्वन्द्वेन शिरस्त्रिभिः करपदाद्यं स्याच्चतुर्भिः श्रुती ।
नेत्रे घ्राणगुदास्यमेढ्रकमथो पृष्ठोदरं पञ्चभिः ॥७३॥

षड्भिर्गात्ररुहाणि सप्तभिरथो स्याच्चेतनालक्षणा-
न्यष्टाभिर्यदि जायते सुविरहस्तत्तत्त्वलाभस्ततः ॥
मासेज्ञो दशमेऽथ योनिसमयाच्छुक्राधिकत्वे पुमान् ।
शुक्रस्याधिकतान्वये तु वनिता साम्ये तयोः क्लीबकः ॥७४॥

अन्योन्यचित्तप्रतिकूलभावात्
स्त्रीपुंसयोर्वामनकुब्जखञ्जाः ।
अन्धादयोङ्गाविनिपीडना स्या-
द्रेतोविभावात्सुतयुग्मता च ॥७५॥

शुक्रं सार्द्धपलत्रयं निगदितं रक्तं पलाविंशतिः ।
तस्यार्द्धं खलु मेदसोरविपला मज्जा शतं मांसकम् ॥

पित्तं रावणवक्त्रसम्मितपलं षष्ट्युत्तरा स्याच्छत-
त्र्यस्थामथ सन्धयस्तदुपमाः सार्द्धत्रिकोटयः कचाः ॥७६॥

मज्जास्थिमेदांसि सशुक्रकाणि
भवन्ति वीर्य्याज्जनकस्य पुत्रे ।
मांसासृजी गात्ररुहाणि वातः
पित्तं कफस्तद्द्वययोगतः स्यात् ॥७७॥

दशधातुमयो देह इत्थं भवति निश्चितः ।
गर्भपिण्डोत्पत्तिरेवं सिद्धसिद्धान्तसम्मता ॥७८॥

इति सिद्धसिद्धान्तसङ्ग्रहे षड्विधपिण्डोत्पत्तिः प्रथमोपदेशः ॥

द्वितीयोपदेशः

नव चक्राणि देहेस्मिन् भवन्तीति विनिश्चितम् ।
तेषां विभागो ज्ञातव्य आधारादिक्रमादथ ॥१॥

ब्रह्मचक्रं त्रिधावर्तं भगमण्डलकाकृति ।
आधारे तदधः कन्दे ध्यायेच्छक्तिं हुताशभाम् ॥२॥

कामरूपाभिधं पीठं सर्वकामप्रदायि तत् ।
तदत्र भवतीत्युक्तं सिद्धसिद्धान्तवेदिभिः ॥३॥

स्वाधिष्ठानाभिधं चक्रं द्वितीयं यच्चतुर्दलम् ।
पद्मं तत्र प्रवालाभं लिङ्गं ध्यायेत् पराङ्मुखम् ॥४॥

तत्रैवोड्यानपीठं स्याज्जगदाकर्षसिद्धिदम् ।
भवतीति महासिद्धाः सिद्धान्तं चक्रिरे पुरा ॥५॥

तृतीये नाभिचक्रे तु पञ्चावर्तादिसन्निभे ।
ध्यायेत् कुण्डलिकाकारे बालार्कद्युतिकुण्डलीम् ॥६॥

तुर्यं हृदयचक्रं यत्तत्राष्टदलवारिजे ।
लिङ्गं ध्यायेत् कर्णिकान्तर्ज्योतिर्मत्परमोज्ज्वलम् ॥७॥

सैव हंसकला ख्याता सर्वेन्द्रियवशङ्करी ।
योगिभिर्विधिवद् ज्ञाता सर्वलोकान् वशं नयेत् ॥८॥

पञ्चमं कण्ठचक्रं तु चतुरङ्गुलबिन्दुभम् ।
तद्वामदक्षचन्द्रार्कनाडचोर्ध्यायेत् सुषुम्णिकाम् ॥९॥

अनाहतकला सैव विख्याता योगिनां मते ।
अनाहतमहासिद्धिविश्राणनधुरन्धरा ॥१०॥

तालुचक्रं षष्ठमत्र सुधाधाराप्रवाहभृत् ।
घण्टिका राजदन्तान्तर्ध्यायेत् शून्यं मनोलये ॥११॥

नवमं ब्रह्मचक्रं यत्सहस्रदलवारिजम् ।
ध्यायेद्गोक्षीरभं तत्र हंसं तत्तन्मयो भवेत् ॥१२॥

नवचक्रविचारोऽयं कथितः परमार्थदः ।
अथाहं षोडशाधारान् वक्ष्यामि कृपया गुरोः ॥१३॥

पादाङ्गुष्ठात्परं ध्यायेत्तेजस्वत्प्रथमं यदि ।
दृष्टिः स्थैर्यं समायाति नैरन्तर्य्येण निर्मला ॥१४॥

मूलसूत्रं समालम्ब्य स्थातव्यं पादपार्ष्णिना ।
यदा तदानीमाधारो द्वितीयोऽग्निप्रदीपनः ॥१५॥

विकाससङ्कोचनतो गुदमाकुञ्चयेद्यदा ।
तृतीयाधार उक्तस्तदपानस्थैर्य्यकारकः ॥१६॥

सङ्कोचनेन मणिकस्य परत्र तुर्य्ये
दण्डाध्वनैव चरमेण निवेश्य चित्तम् ।
वज्रोदरे सगतिबन्धनभेदिदर्प्यां
भृङ्गस्य चेद्हृदिदरे (?)खलु बिन्दुबन्धः ॥१७॥

एषा वज्रोलिका प्रोक्ता सिद्धसिद्धान्तवेदिभिः ।
ज्ञानादेव भवेदस्याः सिद्धमार्गः प्रकाशितः ॥१८॥

नाड्याधारे पञ्चमे तु सन्निवेश्य मनोनिलम् ।
जारणं भवति क्षिप्रं योगिनां मलमूत्रयोः ॥१९॥

नाभ्याधारे तथा षष्ठे प्रणवोच्चारणक्रियाम् ।
कृत्वैकाग्रेण मनसा नादोदयमुपैत्यलम् ॥२०॥

सप्तमे हृदयाधारे प्राणवायुं निरोधयेत् ।
यदा तदैवाम्बुरुहं विकासमधिगच्छति ॥२१॥

कण्ठाधारेऽष्टमे कण्ठं चिबुकेन निपीडयेत् ।
इडापिङ्गलयोर्वायुस्थैर्य्यंभावस्तदा भवेत् ॥२२॥

नवमे घण्टिकाधारे जिह्वां सङ्घट्टयेत् क्रमात् ।
सुधाकलापरिस्रावस्तदा स्यादमरत्वदः ॥२३॥

जिह्वां चालनदोहाभ्यां दीर्घीकृत्य निवेशयेत् ।
दशमाधारताल्वन्तः काष्ठा भवति सा परा ॥२४॥

एकादशे रसाधारे जिह्वाग्रमथनात्स्फुटम् ।
परमानन्दसन्दोहकारिणी कविता भवेत् ॥२५॥

द्वादशोर्द्धरदाधारे जिह्वाग्रं ग्रन्थयेद् दृढम् ।
व्याधयः क्षणमात्रेण परिक्षीणा भवन्त्यलम् ॥२६॥

त्रयोदशो नासिकाख्य आधारो यः प्रकीर्तितः ।
तदग्रं लक्षयेन्नित्यं मनो भवति सुस्थिरम् ॥२७॥

कपाटाकारमाहुर्यन्नासामूलं चतुर्दशम् ।
तत्र दृष्टिनिबन्धेन षण्मासाज्ज्योतिरीक्षणम् ॥२८॥

भ्रुवाधारं पञ्चदशं पश्येच्चेदूर्ध्वचक्षुषा।
पुरोऽवलोकयेच्छ्रीमान् किरणाकारमुज्ज्वलम् ॥२९॥

षोडशं नयनाधारमूर्द्धभागे प्रचालयेत् ।
अङ्गुल्या चेदपाङ्गे स्वे ज्योतिःपुञ्जं प्रपश्यति ॥३०॥

सदा कृन्तनमेवाऽथ लोकयेन्निर्मलाशयः ।
इत्युक्ताः षोडशाऽऽधारा लक्ष्यत्रयमथोच्यते ॥३१॥

मूलकन्दाद्दण्डलग्नां ब्रह्मनाडीं सितप्रभाम् ।
ब्रह्मरन्ध्रावधि ध्यायेत् तन्मध्ये विद्युदुज्ज्वलाम् ॥३२॥

मूर्ति तां लक्षयेन्नित्यं बिसतन्तुतनीयसीम् ।
सर्वसिद्धिप्रदाने सा कल्पवल्लीयते सताम् ॥३३॥

ललाटोर्ध्वेऽथवा ताराकारं गुह्याटमण्डलम् ।
लक्षयेद्वालिकुहरे रक्तं मधुकराकृतिम् ॥३४॥

तर्जनीमुखनिरुद्धकर्णको योऽथवा भवति पूरुषोत्तमः ।
मूर्द्धमध्यगतसिंहहाटके तस्य नाद उदयेत घुंध्विति ॥३५॥

चक्षुर्मध्ये पुत्तलीसन्निभं वा
नीलज्योतीरूपमुद्यत् प्रकाशम् ॥
नैरन्तर्य्याल्लक्षयेदेतदुक्तं
प्राज्ञैरन्तर्लक्ष्यमल्लब्धचित्तैः ॥३६॥

एकाङ्गुलचतुर्मार्गे नासाग्राद्बहिरम्बरम् ।
श्यामलज्योतिरुपमं नैरन्तर्य्येण लक्षयेत् ॥३७॥

नासाग्रतो बहिर्व्यापि सततं द्वादशाङ्गुले ।
लक्षयेद्धरितालाभं पुरः पार्थिवमण्डलम् ॥३८॥

वायुतत्त्वं धूम्रवर्णं नासाग्रात् षोडशाङ्गुलम् ।
लक्षयेत्तन्मुखं वा खं स्थिरदृग्गोकुलेक्षणे ॥३९॥

इति सिद्धसिद्धान्तसङ्ग्रहे निर्मलीकरणम् ॥

ऊर्द्धदृष्टयान्तरालम्बे लक्षयेत्सिद्धवर्त्मगः ।
ज्योतिर्मयूखा दृश्यन्ते तदाऽकस्मादितस्ततः ॥४०॥

अथवा यत्र कुत्रापि व्योमैव परिलक्षयेत् ।
आलम्बते स्थिरत्वं दृक् योगिनोऽभ्यासतः सदा ॥४१॥

द्वादशाङ्गुलमारभ्याष्टादशाङ्गुलकावधि ।
शिरस्यूर्द्धेऽथवा पश्येज्ज्योतिःपुञ्जं विमुक्तिदम् ॥४२॥

दृष्टयग्रे तप्तभर्माभां लक्षयेद्वा वसुन्धराम् ।
दृष्टिः स्थिरत्वमेतीति बहिर्लक्ष्यमनेकधा ॥४३॥

सितं पीतं रक्तं हरितमथवा श्यामलनिभं
प्रदीपाकारं वाधिगततुलनं धूमशिखया ।
स्फुरज्ज्योतीरूपं हिमकिरणबिम्बाकृति तथा
दिनेशाकारं वा नवयवकमीक्षेत मनसा ॥४४॥

मध्यलक्ष्यमिदं प्रोक्तमिति लक्ष्यत्रयोरिता ।
सिद्धसिद्धान्तविज्ञातं व्योमपञ्चकमुच्यते ॥४५॥

बाह्याभ्यन्तरदेशमुज्ज्वलतमं शून्यं खमालोकयेत्
ध्वान्ताकारधरं परं खमथवा कल्पान्तकालाग्निभम् ।
आहोस्विद् गमनं महत्पदमुत प्रद्योतरूपं नभ-
स्तत्त्वाद्यं दिनरत्नकोटिरुचि वा सूर्य्याम्बरं सन्ततम् ॥४६॥

व्योमपञ्चकविलोकनात् पुमान् जायते कुलिशतुल्यविग्रहः ।
इत्यवेत्य विमलेन चेतसा व्योमपञ्चकमिदं प्रपञ्चितम् ॥४७॥

नवाङ्गं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम् ।
समानं यो न जानाति स योगी नामधारकः ॥४८॥

इति प्राचीनोक्तिः ॥

योगाङ्गानि भवन्त्यष्टौ यमो नियम आसनम् ।
प्राणायामस्तथा प्रत्याहारः स्यादथ धारणा ॥४९॥

ध्यानं समाधिरेतेषां पृथगर्थानथ ब्रुवे ।
द्वन्द्वदुःखादिसहनं यम इत्यभिधीयते ॥५०॥

वृत्तीनां मानसीनां हि यैः स्यान्नियमनं स्फुटम् ।
नियमास्ते प्रकीर्त्यन्ते सन्तोषप्रमुखा बुधैः ॥५१॥

स्वस्वरूपे सदासन्नभाव आसनमुच्यते ।
सुखस्वस्थाम्बुजादीनां भेदात्तद् बहुधा मतम् ॥५२॥

प्राणानां स्थैर्यहेतुर्यः स प्राणायाम इष्यते ।
निःश्वासतारे चक्राद्यैः सम्पुटीकरणं यथा ॥५३॥

चेतोवृत्तितरङ्गाणां विषयेभ्यो निवर्तनम् ।
प्रत्याहारः स उत्पन्नो विकारग्रासकारकः ॥५४॥

उत्पन्नोत्पन्नवृत्तीनां निर्विकारे हि धारणम् ।
धारणेति समाख्याता नियम्यैकाऽवधारणा ॥५५॥

परमात्माऽस्ति निर्द्वन्द्वः स्वात्मारामोऽत्र यद्भवेत् ।
यत्तत्स्वरूपमित्यन्तर्वृत्तिर्ध्यानमिति स्मृतम् ॥५६॥

सर्वतत्त्वसमावस्था समाधिरिति कीर्तितः ।
निरुद्यमत्वानायासावेकशीलैकभावते ॥५७॥

निर्विकल्पत्वमेते ते सन्ति भेदाः समाधिजाः ।
अष्टाङ्गयोग इत्येष निरूपित इह स्फुटम् ॥५८॥

इति सिद्धसिद्धान्तसङ्ग्रहे पिण्डविचारे द्वितीयोपदेशः ॥

——:०:— —

अथ तृतीयोपदेशः

पिण्डसम्वित्तिरधुना कथ्यते योगिसम्मता ।
यस्याः समाश्रयाद् भाति तत्त्वज्ञानमदूरतः ॥१॥

ब्रह्माण्डवर्त्ति यत्किञ्चित्तत्पिण्डेऽप्यस्ति सर्वथा ।
इति निश्चय एवात्र पिण्डसम्वित्तिरुच्यते ॥२॥

कूर्मः पादतलेऽङ्गुष्ठतले पातालमुच्यते ।
तलातलं पुरोऽङ्गुष्ठात्पादपृष्ठे महातलम् ॥३॥

गुल्फे रसातलं प्रोक्तं जङ्घायां सुतलं मतम् ।
वितलं जानुदेशे स्यादतलं मूल इष्यते ॥४॥

ऊद्र्ध्वः स्वभावो यः पिण्डे स स्यात्कालाग्निरुद्रकः ।
पातालपदवाच्यानां सत्त्वानामधिदेवता ॥५॥

भूरादिलोकत्रितयं गुह्ये लिङ्गाग्रमूलयोः ।
तत्राधिदेवता शक्रः पिण्डेऽस्थत(?)विनायकः ॥६॥

वण्डाग्रे दण्डकुहरे महर्लोको जनस्तथा ।
तपो दण्डतले सत्यं मूले योमान(?)एतदीट् ॥७॥

अनेकव्यापकः पिण्डे धर्मोऽयमहसो(?)च्युतः ।
स्वर्लोकभूतकुक्षेः स देवतात्वेन सम्मतः ॥८॥

हृदये रुद्रलोकोऽस्ति रुद्रस्तत्राधिदेवता ।
उग्रः स्वभावो यः पिण्डे तत्स्वरूपः स सम्मतः ॥९॥

वक्षसीश्वरलोकोऽस्ति तत्राधीश्वर ईश्वरः ।
पिण्डे तृप्तिस्वरूपेण तिष्ठतीति मतं सताम् ॥१०॥

कण्ठं सदाशिवनिवासमुदाहरन्ति
तत्राधिनायकतया स सदाशिवोऽस्ति ।
पिण्डे जितेन्द्रियगणैरनुभूयमानः
सौम्यस्वभाव इति यः प्रथितप्रतिष्ठः ॥११॥

श्रीकण्ठलोकः खलु कण्ठमध्ये श्रीकण्ठ एवात्र भवेदधीशः ।
सनातनत्वात्मकतां दधानः पिण्डान्तरे वाविकृताधिवासः ॥

लम्बिकामूलके भैरवोऽधीश्वर-
स्तत्र यत्कीर्त्तितस्तस्य लोको बुधैः ।
प्राणिनां सर्वदा सर्वकार्य्योद्यमो
भैरवाख्याधरः पिण्डमध्ये मतः ॥१३॥

तालुद्वारे शैवलोकः प्रसिद्धः
तत्राधीशः स्याच्छिवो विश्वबन्द्यः ।
विद्वद्वर्य्यैर्योगशान्तिः प्रतीता
तद्रूपोऽसौ पिण्डमध्ये विभाति ॥१४॥

तालोरभ्यन्तरे भाति सिद्धलोकोऽत्र देवता ।
महासिद्धः प्रबोधात्मा पिण्डमध्येऽनुभूयते ॥१५॥

ललाटेऽनादिलोकोऽस्ति तत्रानादिरधीश्वरः ।
पराहन्तास्वरूपेण पिण्डमध्येऽवतिष्ठते ॥१६॥

शृङ्गाटे कुललोकोऽस्ति तत्र देवः कुलेश्वरः ।
पिण्डमध्ये सदानन्दस्वरूपेणावतिष्ठते ॥१७॥

ब्रह्मरन्ध्रे परब्रह्मलोकस्तत्राधिदेवता ।
परब्रह्माभिधा पिण्डे परिपूर्णस्वरूपतः ॥१८॥

परापरस्य लोकोऽस्ति तत्र देवः परेश्वरः ।
अस्तित्वरूपतः सोऽयं पिण्डमध्येऽनुभूयते ॥१९॥

त्रिकूटे शक्तिलोकोऽस्ति परा शक्तिस्तु देवता ।
सर्वकर्तृत्वसामर्थ्यपरावस्थात्मता तनौ ॥२०॥

पिण्डे सप्ततलानि स्युर्लोकाश्चात्रैकविंशतिः ।
वृत्ते विप्रो नृपः शौर्य्ये उद्यमे विड् भयेङ्घ्रिजः ॥२१॥

स्युर्जम्बूशाल्मलीप्लक्षकुशक्रौञ्चकगोमयाः ।
श्वेतोमज्जास्थिनाडीषु मांसे त्वचि कचे नखे ॥२२॥

मूत्रं शुक्रं कफो मेदो वसा प्रस्वेदरेतसी ।
क्षारेक्षुदधिसर्पींषि मधुवारिपयांसि च ॥२३॥

नवसु द्वारदेशेषु नवखण्डान्यकीर्त्तयन् ।
अथ शैलादिकान् ब्रूमो यथाभागमवस्थितान् ॥२४॥

मेरुदण्डे मेरुरस्ति कैलासो ब्रह्मशङ्कके ।
पृष्ठे हिमाद्रिर्मलयो वामेंऽशे मन्दरः परः ॥२५॥

विन्ध्याद्रिर्दक्षिणे कर्णे वामे मैनाकपर्वतः ।
श्रीपर्वतो ललाटे स्यादेवमष्टौ कुलाचलाः ॥२६॥

चतुःषष्टिर्मता वर्णा योगिन्यः सकलास्तथा ।
हस्ताङ्गुलिषु राजन्ते सर्व एवोपपर्वताः ॥२७॥

गङ्गा सरयूर्यमुना चन्द्रभागा सरस्वती ।
वितस्ता शतरुद्रा च नर्मदैरावती शिराः ॥२८॥

द्वासप्ततिसहस्राणि नद्यो याः परिकीर्तिताः ।
अन्या नद्युपनद्याद्यास्ता ज्ञेयास्तत्त्वदर्शिभिः ॥२९॥

नक्षत्रराशिग्रहतारकाणि तथा तिथीनां वलयेऽत्र कोष्ठाः ।
द्वासप्ततिर्ये विलसन्ति तेषु निवासमाहुः श्रुतितत्त्वविज्ञाः
॥३०॥

अनेकतारानेत्रान्तस्तेजःपुञ्जे कृताश्रयाः ।
त्रयस्त्रिंशत्कोटिदेवा रोमकूपसमाश्रयाः ॥३१॥

अनेकमुनिसङ्घाताः कक्षरोमकृताश्रयाः
पीठोपपीठा येऽनेके श्मश्रुस्थाने वसन्ति हि ॥३२॥

भूतप्रेतपिशाचराक्षसगणा दैत्यास्तथा दानवाः
सर्वे कीकससन्धिसङ्गतिकराः सन्तीति सिद्धोदितम् ।

नागा अक्षितनूरुहेषु सकला ये तूपनागा मताः
तेषामस्ति निवासभूमिरुदरप्रोद्भूतरोमोद्गमे ॥३३॥

नानाविधेष्ववयवेषु वसन्ति चान्ये
गन्धर्वकिन्नरगणाप्सरसोऽथ यक्षाः ।
याः स्युः परा इह सदा खलु देवताश्च
वाच्येषु रश्मिविततेषु समुल्लसन्ति ॥३४॥

खेचर्य्यो मातरश्चान्या डाकिन्याद्युग्रदेवताः ।
वायुवेगे वसन्त्यत्र जलदा अश्रुपातगाः ॥३५॥

मर्मस्थानेष्वनेकेषां तीर्थानामस्ति संश्रयः ।
मतिप्रकाशेष्वावासः सिद्धानामपि कीर्तितः ॥३६॥

सूर्य्यचन्द्रमसोर्वासो नेत्रद्वय उदीरितः ।
लतागुल्मतृणादीनां जङ्घारोमसु संश्रयः ॥३७॥

कृमिकीटपतङ्गाद्याः पुरीषे कृतसंश्रयाः ।
यत्सुखं स भवेत्स्वर्गो यद्दुःखं नरकं हि तत् ॥३८॥

निर्विकल्पो भवेन्मोक्षो निद्रादौ जागरोत्तरम् ।
स्वस्वरूपदर्शेत्युक्तं पिण्डसंवित्तिहेतवे ॥३९॥

अखण्डपरिपूर्णात्मा विश्वरूपो महेश्वरः ।
घटे घटे चित्प्रकाशस्तिष्ठतीति प्रबुध्यताम् ॥४०॥

॥ इति पिण्डसंवित्तिस्तृतीयोपदेशः ॥

अथ चतुर्थोपदेशः

पिण्डाधारमथो वक्ष्ये यज्ज्ञानादात्मतत्त्ववित् ।
पिण्डाधारो भवेच्छक्तिः चित्प्रबुद्धाऽपरम्परा ॥१॥

कार्यकारणकर्तृणामुत्था(?)वस्थाकरं स्फुटम् ।
कर्त्तुं शक्नोति यत्तस्माच्छक्तिरित्यभिधीयते ॥२॥

नानासूत्रस्वरूपेण पटे तन्तुर्यथाश्रयः ।
तद्वदाधारतां सेति देहे नानांशुभिर्जडे ॥३॥

अत्यन्तस्वप्रकाशैकवेद्याभावैकसाङ्ख्यभूः ।
प्रत्यक्षसाक्षिणी या तां भावयेदपरम्पराम् ॥४॥

सहजेनात्मलीना सा यदा सञ्जायते तदा ।
निरुत्थानदशेत्युक्ता शिवसंज्ञापि तत्र हि ॥५॥

कुलाकुलस्वरूपाऽसौ सामरस्यस्वभूमिका ।
सत्ताहन्ता परा भासा स्फुरत्ता च कुलाकुलम् ॥६॥

परस्परनिराभासभासि सम्यक् प्रकाशिका ।
पराभासैकमेवास्तीत्येका सत्ता निरुच्यते ॥७॥

अनादिनिधना मेयस्वभावांशुसुखाऽस्म्यहम् ।
इत्यहन्ताज्ञानदशा स्फुरणात्मा स्फुरन्तिका ॥८॥

शुद्धबुद्धस्वरूपस्य कलयत्यात्मवित्पदम् ॥
यतस्ततः कलेत्युक्ता कुलपञ्चकमस्त्यदः ॥९॥

वर्णगोत्रादिराहित्यादेकमेवाकुलं मतम् ।
उमामहेशसम्वादादर्थोऽयमवगम्यताम् ॥१०॥

तथा च—

अनन्यत्वादखण्डत्वादद्वयत्वादनाशनात् ।
निर्धर्मत्वादनङ्गत्वादकुलं स्यान्निरन्तरम् ॥११॥

कुलस्य सामरस्येति सृष्टिहेतुः प्रकाशभूः ।
सा चापरम्परा शक्तिराज्ञेशस्यापरं कुलम् ॥१२॥

प्रपञ्चस्य समस्तस्य जाग्रद्रूपप्रवर्त्तनात् ।
एकैव कर्त्तुं यच्छक्ता तस्मादाज्ञेचरीह सा ॥१३॥

उक्तं ललितस्वच्छन्देन—

अकुलं कुलमाधत्ते कुलाद्व्यवहृतिर्भवेत् ।
अतः कुलाकुलस्थित्यानीश ईशोपि शङ्क्यते ॥१४॥

अलुप्तशक्तिमान्नित्यस्सर्वाकारतया स्वयम् ।
प्रस्फुरन्तं पुनः स्वेन स्वयमेकं प्रपश्यति ॥१५॥

शिवोऽपि शक्तिरहितः कर्त्तुं शक्तो न किञ्चन ।
शिवः स्वशक्तिसहितो ह्यभासाद्भासको भवेत् ॥१६॥

शक्तितत्त्वानन्दनित्यशक्तिमान् परमेश्वरः ।
सम्विद्रूपोऽस्ति विषय इति सिद्धिमतं सताम् ॥१७॥

परम्परास्वरूपा सा पिण्डाधारतया श्रुता ।
भवेत्कुण्डलिनी यद्वत् पिण्डसंसिद्धिकारिणी ॥१८॥

बुद्धाऽबुद्धा द्विधा प्रोक्ता द्वितीया चेतनात्मिका ।
नानाचित्रक्रियोद्योगप्रपञ्चमयविग्रहा ॥१९॥

सर्पकुण्डलिनीभावाल्लोके कुण्डलिनी मता ।
पूर्वास्तविकृतेः पुंसो निवृत्युद्यमरूपिणी ॥२०॥

ऊद्र्ध्वगामित्वमेतस्यामूर्ध्वाकुञ्चनतो भवेत् ।
तदप्याकुञ्चनं मूलाधारबन्धेन सिद्ध्यति ॥२१॥

चिदचिद्रूपमेतद्यज्जगद्भवति सन्ततम् ।
मूलाधारकसंवित्तिप्रसरत्वेन तन्मतम् ॥२२॥

मूलाधारादिसकलचक्रेषु नव शक्तयः ।
नाथेन यदपि प्रोक्तास्तथाप्येकास्ति तत्र सा ॥२३॥

शक्तिप्रसरसङ्कोचौ जगतः सृष्टिसंहृती ।
भवतो नात्र सन्देहस्तस्मात्तन्मूलमुच्यते ॥२४॥

मलाधारे प्रबुद्धे तु सिद्धिर्भवति योगिनाम् ।
नियतोपाधिजीवात्मा वृथा भ्रान्तिरपि स्वयम् ॥२५॥

मध्ये स्वरूपतापन्नो यया सा मध्यकुण्डली ।
सूक्ष्मासूक्ष्मस्वरूपेण द्विविधा सा प्रतीयते ॥२६॥

निश्चला निश्चलग्राह्या स्थूलान्या ध्यानरूपिणी ।
अर्थान्तरपरिभ्रान्तिहेतुः सर्वस्वरूपिणी ॥२७॥

सर्वत्रास्तीति साकारा मध्यशक्तिः प्रकीर्तिता ।
सैव प्रसरसङ्कोचात्पर्य्यावृत्तिमुपागता ॥२८॥

नित्यानन्दतया लोला सूक्ष्माख्या तिमिराकृतिः ।
बुद्धेति सिद्धास्तामाहुः प्रसिद्धाः सिद्धवर्त्मनि ॥२९॥

तत्त्वसारेऽयमेवार्थो निरूपणपदे कृतः ।
यथा—
सृष्टिस्तु कुण्डली ख्याता सर्वभावगता हि सा ॥३०॥

बहुधा स्थूलरूपा च लोकानां प्रत्ययात्मिका ।
अपरा सर्वगा सूक्ष्मा व्याप्तिव्यापकवर्ज्जिता ॥३१॥

तस्या भेदं न जानाति मोहितः प्रत्ययेन तु ।
ततः सूक्ष्मा परा संविन्मध्यशक्तिर्महेश्वरी ॥३२॥
स्वस्वरूपदशायां सा बोधनीया गुरुश्रिता ।
प्रबोधनात्पिण्डसिद्धिस्तस्या भवति योगिनाम् ॥३३॥

ऊर्ध्वशक्तिनिपातोऽथ मुमुक्षूणां कृतेष्यते ।
सर्वतत्त्वोद्‍र्ध्ववृत्तित्वान्निर्नाम परमं पदम् ॥३४॥

तत्त्वसम्वेदसाक्षाद्भूः पिशुनोक्तोद्‍र्ध्वशक्तिका ।

निपातः स्वरवरूपे नित्यथा(?) निरसनं मतम् ॥३५॥
निरुत्थाने स्वस्वरूपाखण्डैव प्रतिभाति सा ॥३६॥

उक्तञ्च—
शिवस्याभ्यन्तरे शक्तिः शक्तेरभ्यन्तरे शिवः ।
अन्तरं नैव पश्यामि चन्द्रचन्द्रिकयोरिव ॥३७॥

नानाशक्तिस्वरूपेण सर्वपिण्डाश्रयत्वतः ।
पिण्डाधार इतीष्टाख्या सिद्धान्त इति धीमताम् ॥३८॥

अत्र सङ्ग्रहश्लोकः—
सत्त्वे सत्त्वे सकलरचनासंविदेका विभाति
तत्त्वे तत्त्वे परमरचना संविदेका विभाति ।
ग्रासे ग्रासे बहलतरला लम्पटा संविदेका
भासे भासे भजति भवता बृंहिता संविदेका ॥३९॥

इति सिद्धसिद्धान्तसंग्रहे चतुर्थोपदेशः ।

——:o:——

अथ पञ्चमोपदेशः

समरसकरणं वदाम्यथाहं परमपदाखिलपिण्डयोरिदानीम् ।
यदनुभवबलेन योगनिष्ठा इतरपदेषु गतस्पृहा भवन्ति ॥१॥

परपिण्डसुखं स्वपिण्डकान्तं प्रथमोक्तक्रमतो विधाय चित्ते ।
परमेण पदेन तस्य कुर्य्याद्रससाम्यं मतिमान् गुरूक्तिदृष्ट्या ॥२॥

परमं पदमात्मवेद्यमेकं निखिलात्यन्तविभासिमात्रमुक्तम् ।
अयमर्थ उदाहृतोऽस्ति दृष्टो जठराख्याधरसंहितानिबन्धे ॥३॥

यथा—

यत्र बुद्धिर्मनो नास्ति सत्ता संवित्परा कला ।
ऊहापोहौ न तर्कश्च वाचा तत्र करोति किम् ॥४॥

वाङ्मात्राद् गुरुणा सम्यक् कथं तत्पदमीर्य्यते ।
तस्मादुक्तं शिवेनैव स्वसम्वेद्यं परं पदम् ॥५॥

नानाविचारचातुर्य्यचर्वाधिक्याद्धनाश्रयात् ।
निरुपाधितयोपाधिशून्यत्वात्तत्स्ववेद्यता ॥६॥

पारम्पर्य्याप्तसन्मार्गदर्शने यस्य योग्यता ।
स गुरुर्भवति श्रीमानात्मविश्रामकारणम् ॥७॥

तेन सन्दर्शिते मार्गे स्वसंवेद्यस्य दर्शनम् ।
भवतीति गुरुं देवभावेन परिचिन्तयेत् ॥८॥

तद्दृक्सरोजकरुणार्द्रकटाक्षपातात्
स्वात्मैकवेद्यकतया मुनिभिः स्वपिण्डम् ।

सर्वं स्वसिद्धिफलवर्गमपास्य लब्ध-
नैरुत्थ्यतः समरसं क्रियते कृतार्थैः ॥९॥

सिद्धान्तमेतमनुशास्य निरुत्थितिश्री-
लाभाभ्युपायकथने कुरुतेऽथ यत्नम्।
स्वस्वाशयप्रलयकर्ममुखानुसन्धे-
रावेशतो भवति कश्चन तत्र नैजः ॥१०॥

निजावेशान्निबिडतमनैरुत्थ्यविधिव-
न्महानन्दावस्था स्फुरति वितता कापि सततम्।
ततः संविन्नित्यामलसुखचमत्कारगमक-
प्रकाशप्रोद्बोधो यदनुभवतो भेदविरहः ॥११॥

साक्षात्तयास्य कलनात् स्फुरति प्रकामं
चैतन्यभासकमभिन्नमपारमङ्कं।
पुंसः पदं परमनाम समभ्युदेति
यस्यानुभूतिबलतो निजपिण्डवित्तिः ॥१२॥

विज्ञाय पिण्डमथ सम्यगिति प्रकारा-
दारात्पदे परमनाम नितं (?) विधाय।
ऐक्यं विधाय निजरश्मिपरावृतात्मा-
श्वभ्याससून्मिषिरुदेति ततो द्वितीया ॥१३॥

तदुन्मेषप्रत्याहरणभवमाहुः समरस-
क्रियाभूतं यस्मान्निजकिरणपुञ्जं निजतया।
प्रपश्यन्तस्तस्मान्निखिलमनुसन्धाय मुनयः
स्वरूपेऽङ्गीकृत्य स्वतःफलसिद्ध्यै व्यवसिताः ॥१४॥

मुनीनां पिण्डसंसिद्धौ सिद्धयः सन्ति सन्निधौ।
एतमर्थं विनिश्चित्य कश्चिच्छ्लोकेन चोक्तवान् ॥१५॥

यस्मिन् ज्ञाते जगत्सर्वं प्रसिद्धं भाति लीलया।
सिद्धयः स्वयमायान्ति तस्माज्ज्ञेयं परं पदम् ॥१६॥

सहजं संयमयुतं सोपायं साद्वयं क्रमात्।
ज्ञानं संसाधयेत्तच्च स्वविश्रान्तिरितीरितम् ॥१७॥

विश्वातीतः परेशानो विश्वरूपेण तिष्ठति।
इत्येकं सहजं त्वन्यद्विश्वस्यात्मनि दर्शनम् ॥१८॥

प्रस्फुरद्रूपवृत्तीनां कृत्वा संयममात्मनि ।
यद्धारणं तदेवात्र ससंयममिति स्मृतम् ॥१९॥
प्रकाशमयमात्मानं स्वयमेव स्वरूपतः ।
एकीकृत्य सदा लौल्यात्स्थित्तिः सोपायशब्दभाक् ॥२०॥
अजातिमत्त्वदृक् प्राज्ञैः सा द्वितीयमिति स्मृतम् ।
चत्वार एते भावाः स्युः परमोदयहेतवः ॥२१॥
तथा च परमो योगी सुतृप्तो निर्विकल्पकः ।
सदा निरुत्थापनया तिष्ठतीति प्रसिद्ध्यति ॥२२॥
परमस्य पदस्याप्तौ साधनं केनचित्पुरा ।
यत्र श्लोकाष्टके प्रोक्तं तदिदं दृश्यतामिह ॥२३॥
सहजं स्वात्मसंवित्तिः संयमः सर्वनिग्रहः ।
सोपायं स्वस्वविश्रान्तिरद्वैतं परमं पदम् ॥२४॥
ज्ञात्वैवं सद्गुरोर्वक्त्रान्नान्यथा शास्त्रकोटिभिः ।
न कर्तृत्वान्न विज्ञानान्न बलाद्वेदपाठनात् ॥२५॥
न ज्ञानान्न च वैलक्ष्यात्कर्त्रभ्यासान्न वासनात् ।
न वैराग्यान्न नैराश्याद् घटनात्प्राणधारणात् ॥२६॥
न मुद्राधारणाद्वा स्यान्न मौनवचनाश्रयात् ।
औदासीन्यान्न निर्वाणान्न कायक्लेशमोचनात् ॥२७॥
न दास्यान्न च सन्देशान्न नानाव्रतधारणात् ।
न षड्दर्शनवेषादिधारणान्न च मुण्डनात् ॥२८॥
अनन्तोपाययत्नेभ्यः प्राप्यते परमं पदम् ।
गुरुदृक्पातमात्राणां हठानां सत्यवादिनाम् ॥२९॥
कथनाद् दृष्टिपाताद्वा सान्निध्याद्वावलोकनात् ।
प्रसादात्सद्गुरोः सम्यक् प्राप्यते परमं पदम् ॥३०॥
अन्वयव्यतिरेकाभ्यां सार्द्धश्लोकद्वयोक्तितः ॥
श्रीगुरोर्लक्षणं प्राह यज्ज्ञानान्मुच्यते भयात् ॥३१॥

सम्यगानन्दजननं सद्गुरुः सोऽभिधीयते ॥
निमिषार्द्धं तदर्द्धं वा यद्वाक्यस्यावलोकनात् ।
आत्मानं स्थिरमाप्नोति तस्मै श्रीगुरवे नमः ॥३२॥

नानाविकल्पविश्रान्तिं कथनात्कुरुते तु यः ।
सद्गुरुः स तु विज्ञेयो न तु मिथ्याविकल्पकः ॥३३॥

परपदमधिगन्तुमुत्सुकानां
यदमलदृक्करुणाकटाक्षमाला ।
जयति दृढतराधिरोहणश्रीः
परमनिधिः स ममास्ति देशिकेन्द्रः ॥३४॥

सम्यक्चैतन्यविश्रान्तेरुपदेशस्तु सम्मतम् ।
यथा स्यात्सामरस्याख्यं तत्परं परमं पदम् ॥३५॥

यत्कारुण्यविलोकनादपि भवेच्चिद्विश्रमः पारदः
तस्मिन् श्रीकरुणासुधारसनिधौ चेतोऽस्तु मग्नं गुरौ ।
नान्यस्मिन्बहुवादतर्कमकरोच्छालातिभीतिप्रदे
दुर्भेदभ्रमधारकेऽतिकठिने क्षारोदधौ लौकिके ॥३६॥

उपदेशो निगरणपदवाच्यतयोच्यते ।
तत् करोति यतस्तस्माद् गुरुरित्यभिधीयते ॥३७॥

गुरुदोषगुणनिरूपणपुरःसरं गुरुसेवाफलं
विंशतिश्लोकैः कश्चिदाह—

ज्ञानहीनो गुरुस्त्याज्यो मिथ्यावादी विकल्पकः ।
स्वविश्रांतिं न जानाति परेषां स करोति किम् ॥३८॥

शिलायाः किं परं पारं शिलासङ्घातप्रतार्यते ।
स्वयं तीर्णो भवेद्योऽसौ स परं तारयत्यलम् ॥३९॥

विकल्पजागराद् घोराच्चिन्ताकाले न दुस्तरात् ।
प्रपञ्चवासनावर्त्तात्कलाजालसमाकुलात् ॥४०॥

वासनालहरीवेगात्स्वस्थस्तारयितुं क्षमः ।
स्वस्थैर्येणोपदेशेन लोनो(?)त्थानेन तत्क्षणात् ॥४१॥

परानन्दमयो भूत्वा निश्चयः स्थिरतां व्रजेत् ।
कुलानि कोटिकोटीनां तारयत्येव तत्क्षणात् ॥४२॥

धारयत्येव दृक्पातात्कथनाद्वावलोकनात् ।
तारणेच्छुर्वरं दत्ते स्वस्वरूपे स्थिरो भव ॥४३॥

अतोऽसौ मुच्यते शिष्यो जन्मसंसारबन्धनात् ।
अतस्तं सद्गुरुं साक्षात् त्रिकालमभिवादयेत् ॥४४॥

सर्वाङ्गप्रणिपातेन शिक्षां कृत्वा गुरुर्भवेत् ।
किमत्र बहुनोक्तेन शास्त्रकोटिशतेन च ॥४५॥

लब्धविश्रामवित्तानां योगिनां दृढचेतसाम् ।
स्वस्वमध्यनिमग्नानां निरुत्थानां विशेषतः ॥४६॥

निमिषार्द्धात् स्फुटं भाति दुर्लभं परमं पदम् ।
तस्मिन्पिण्डे भवेल्लीनं सहसा नात्र संशयः ॥४७॥

लीने पिण्डे भवेद्योगी सर्वज्ञः सिद्धिपारगः ।
इच्छावेगी स्वयं कर्त्ता लीलयैवाजरामरः ॥४८॥

अवध्यो देवदैत्यानां क्रीडते भैरवो यथा ।
इत्येवं निश्चयो योऽसौ क्रमादाप्नोति लीलया ॥४९॥

असाध्याः सिद्धयः सर्वाः सत्यमीश्वरभाषितम् ।
प्रथमे रोगनिर्मुक्तः सर्वलोकप्रियो भवेत् ॥५०॥

काङ्क्षते दर्शनं तस्य स्वात्मा गूढस्य नित्यशः ।
द्वितीये वत्सरे काव्यं कुरुते तत्त्वभाषया ॥५१॥

प्रजायते दिव्ययोगी दूरश्रावी न संशयः ।
वाक्सिद्धिः पञ्चमे वर्षे परकायप्रवेशनम् ॥५२॥

षड्भिर्न छिद्यते शस्त्रैर्वज्रपातैर्न भिद्यते ।
वायुवेगो क्षितित्यागी दूरदर्शी च सप्तमे ॥५३॥

महासिद्ध्यष्टकं सम्यगष्टमे वत्सरे भवेत् ।
नवमे वज्रकायः स्यात् खेचरो दिक्चरो भवेत् ॥५४॥

दशमे पवनाद्वेगी यत्रेच्छा तत्र गच्छति ।
सम्यगेकादशे वर्षे सर्वज्ञः सिद्धिभाग् भवेत् ॥५५॥

द्वादशे शिवतुल्योऽसौ कर्त्ता हर्त्ता स्वयं भवेत् ।
त्रैलोक्ये पूज्यते सिद्धः सत्यं भैरवभाषितम् ॥५६॥

एवं द्वादशवर्षे तु सिद्धयोगी महाबलः ।
जायते सद्गुरोः पादप्रसादान्नात्र संशयः ॥५७॥

अनुबुभूषति योनिजविश्रमं स गुरुपादसरोरुहमाश्रयेत् ।
तदनुसंसरणात्परमं पदं समरसीकरणं च न दूरतः ॥५८॥

अनन्यभावेन निरुत्थितिश्रीलाभेन चाञ्चल्यविधूननेन ।
अवस्थितिः श्रीकरुणासुधाब्धिगुरुप्रसादाद्भवतीति सत्यम् ॥५९॥

इति सिद्धसिद्धान्तसङ्ग्रहे पिण्डपरमपदयोः समरसकरणं
नाम पञ्चमोपदेशः ।

अथ षष्ठोपदेशः

निरूप्य सर्वं विषयमधिकारी निरूप्यते ।
अवधूतो भवेत्सोऽत्र तल्लक्षणमिदं यथा ॥१॥

प्रकृतिजन्यविकारविधूननं कलयितुं भजतीह समर्थताम् ।
यदवधूततया तदुदीर्यते रचितसंसृतिपारगतिर्जनः ॥२॥

लक्षणान्तरमप्याह कश्चित् –
केशपाशतरङ्गाणां व्रजं येन विकुण्ठितम् ।
सर्वावस्थाविनिर्मुक्तः सोऽवधूतोऽभिधीयते ॥३॥

सकलोच्चं स्थिरं पीनं संवेद्यं वासनोक्तितम् (?) ।
कौपीनकं कटौ यस्य सोऽवधूतोऽभिधीयते ॥४॥

कस्य भावमयैः सूत्रैः स्वीकारस्थैर्यतां गतैः ।
कन्था विरचिता येन सोऽवधूतोऽभिधीयते ॥५॥

मुक्तिद्वारे मतिर्यो वै प्राप्तकोषप्रकाशकः ।
मायाविकारानापन्नः स सात्त्विक उदाहृतः ॥६॥
क्षपणं चित्तवृत्तीनां रागद्वेषविलुण्ठनम् ।
कुरुते व्योममग्नो यस्तस्मात् क्षपणको भवेत् ॥७॥

भ्रान्तिकौरं जनं कृत्वा यो रक्तविवरे सदा ।
प्रबुद्धो यः स्वयं बुद्धः सद्यः सोऽत्राभिधीयते ॥८॥

प्रसरं भासते शक्तिः सङ्कोचं भासते शिवः ।
तयोः संयोगकर्त्ता यः स भवेद्योगयोगराट् ॥९॥

विश्वातीतं यदा विश्वमेकमेवावभासते ।
संयोगेन यदा यस्य सिद्धयोगी भवेत्तु सः ॥१०॥

सर्वासां निजवृत्तीनां विसृतिं भजते तु यः ।
स भवेत्सिद्धसिद्धान्ते सिद्धयोगी महाबलः ॥११॥

उदासीनवदासीनः स्वस्थोऽन्तर्निजभासकः ।
महानन्दमयो धीरः स भवेत्सिद्धयोगिराट् ॥१२॥

परिपूर्णः प्रसन्नात्मा सर्वासर्वप्रदोऽपरः ।
निरुत्थो निर्भरानन्दः स भवेत् सिद्धयोगिराट् ॥१३॥

गतेन शोकेन भयेन वीप्साप्राप्तेन हर्षं न करोति योगी ।
आनन्दपूर्णो निजबोधलीनो न बाधते कालपथो न नित्यम् ॥१४॥

एतेषामुपदेशानां सूचितानां पृथक् पृथक् ।
जायते तत्र विश्रान्तिः सा विश्रान्तिश्च जायते ॥१५॥

यो गङ्गापदपद्मभक्तिविमलः शाण्डिल्यगोत्रोद्भवः
चञ्चच्छारदचन्द्रिकासहचरीं कीर्त्तिन्नयन्विष्टपे ।
शौर्य्यौदार्यमुखैर्गुणैरविरलैरालम्ब्यमानोऽनिशं
स श्रीकृष्णविभुः स्मरारिनगरे ग्रन्थं मुदाचीकरत् ॥१६॥

कृष्णराजाज्ञया काश्यां सिद्धसिद्धान्तसङ्ग्रहः ।
कृतो यो बलभद्रेण श्रीकृष्णस्तेन तुष्यतु ॥१७॥

इति सिद्धसिद्धान्तसङ्ग्रहेऽवधूतादिलक्षणः षष्ठोपदेशः ।

अथ सप्तमोपदेशः

चार्वाकाश्चतुराः स्वतर्कनिपुणा देहात्मवादे रताः
सर्वे सन्धिरताः सदैव परताधानाश्रिताः सात्त्विकाः ।
कर्त्तारं प्रभजन्ति चैव यमनाः पापे रता निर्दया-
स्तेषामैहिकमल्पमेव हि सुखं सत्यं न मोक्षः परम् ॥१॥

सीहट्टे मस्तकान्ते त्रिकुटपुटबिले ब्रह्मरन्ध्रे ललाटे
भ्रूनेत्रे नासिकाग्रे श्रवणपथवरे घण्टिकाराजदण्डे ।
कण्ठे हृन्नाभिमूले त्रिकमकुहरे ह्युड्डियानेऽथ शूले
ये त्वेवं स्थानमग्नाः परमपदमहो नास्ति तेषां निरुत्थम् ॥२॥

आदौ पूरककुम्भरेचकविधौ नाडीपथं शोधितं
कृत्वा हृत्कमलोदरे च सहसा चित्तं समं मूर्छितम् ।
तस्मादव्ययमक्षयं परकलं चोङ्कारदीपं शुभं
ये पश्यन्ति समाहिताः पदमहो नास्ति तेषां निरुत्थम् ॥३॥

गोहाटे दीप्तिपुञ्जं प्रलयशिखिनिभं सिन्धुजालन्धरे च
शृङ्गाटे ज्योतिरेकं तडिदिव तरलं ब्रह्मनाड्यन्तराले ।
कालान्ते विद्युदाभं तदुपरि शिखरे कोटिमार्त्तण्डचण्डे
ये नित्यं संशयन्ते परमपदमहो नास्ति तेषां निरुत्थम् ॥४॥

लिङ्गाच्चण्डाकुलान्ते मनपवनगमे(?) ब्रह्मग्रन्थ्यादिभेदे
कृत्वा बिन्दुं नयन्ते भ्रमरपदमहाशङ्खमम्भोदरोधे ।
नेत्रान्तर्नादघोषं गगनगुणमयं वज्रदण्डी क्रमेण
ये कुर्वन्तीह कष्टात्परमपदमहो नास्ति तेषां निरुत्थम् ॥५॥

सम्यक्चालनदोहनेन सततं दीर्घीकृतां लम्बिकां
ताल्वभ्यन्तरर्दाशतान्तदशमद्वारोदरे शङ्खिनीम् ।
प्राप्तां मध्यमसम्पुटे (?) पुटां सप्तादशीं कोटरां
पीत्वा षड्विधपानकाष्ठभजनं वाञ्छन्ति ये मोहिताः ॥६॥

गुह्यात्पश्चिमपूर्वमार्गमुभयं रुद्धानिलं मध्यमं
नीत्वा ध्यानसमाधिलक्ष्यकरणैर्नानासमाध्यासनैः ।
प्राणापानगमागमेन सततं हंसोदरे संघटा-
घेनास्यैव नयन्ति ये भवजले मज्जन्त्यहो दुःखिताः ॥७॥

शक्त्याकुञ्चनमग्निदीपकरणं चाधारसम्पीडनात्
ज्ञात्वा कुण्डलिनीप्रबोधनमनो नादादिना मूर्द्धनि ।
नीत्वा पूर्णगिरिं निपातनमनः कुर्वन्ति ये स्वाश्रये
खण्डज्ञानरतास्तु ते निजपदं तेषां ह्यदूरं परम् ॥८॥

बन्धं भेदं च मुद्रां गलबिलचिबुकं मध्यमार्गं सुषुम्णां
चन्द्रार्के सामरस्यं शमदमनियमैर्नादबिन्दुं कलान्ते ।
ये नित्यं कलयन्ते तदनु च मनसामुन्मनो योगयुक्तं
तेषां लोकामयन्ते निजसुखविमुखाः कर्मदुःखौघभाजः ॥९॥

अष्टाङ्गं योगमार्गं कुलपुरुषमतं षण्मुखीचक्रभेद-
मूर्ध्वाधो बाह्यमध्ये रविकिरणनिभं सर्वतो व्याप्तिसारम् ।
दृष्टचग्रे वीक्षयन्ते तरलजलसमं नीलवर्णं तमो वा
एवं ये भावयन्ते विमलमतयस्तेऽपि हा कष्टभाजः ॥१०॥

आदौ सारणशङ्खसारणमतः कृत्वा महासारणं
सम्पूर्णं प्रतिसारणं विधिबलाद्दृष्टिस्तथा निर्मला ।
आज्ञालो हठयोगयोगकलया सद्दीप्तसन्तूलिकां
ये कुर्वन्ति च कारयन्ति च सदा भ्राम्यन्ति बाधन्ति च ॥११॥

शङ्खक्षालनमन्तरं रसनया ताल्वोष्ठलीलासमं
वीते तूल्लुठनं कवाटममरीपानं त्रिधा खर्परी ।
वीर्यंद्रावितमात्मजं विकलये ग्रासं च लेपञ्च वा
कुर्वे तीर्थजले स्यात् (?) तेन हि फलं तेषां तु सिद्धान्तजम् ॥१२॥

घण्टाकालहमर्द्दलं त्वथ महाभेरीनिनादं यथा
सम्यङ् नादमनाहतं ध्वनियुतं शृण्वन्ति ये तादृशम् ।
पिण्डे सिद्धिपरं निरन्तरतया ब्रह्माण्डमध्येऽथ वा
तेषां सिद्धमतेस्कतेः(?) समुदितं सत्यं परं लभ्यते ॥१३॥

वैराग्यामृतपल्लवेन सलिलं कन्दं फलं मूलकं
भुक्त्वा यो वनवास एव रमते चाऽनेकदेशान्तरे ।
स्थित्वा सादितनिश्चयेन मनसा रात्रौ दिने वीक्ष्यते
स त्यक्त्वाखिलभावमेकममलं प्राप्नोत्यहो स्वं पदम् ॥१४॥

इति श्रीसिद्धसिद्धान्तसङ्ग्रहे सप्तमोपदेशः समाप्तिमगमत् ।

शुद्धिपत्रम्

पृष्ठ	पंक्ति	अशुद्धम्	शुद्धम्
१	४	पुष्टये	तुष्टये
,,	७	कार्य्यंकारणकर्तृत्वं	कार्य्यकारणकर्तृत्वं
,,	१२	अर्धामात्रा	अर्धमात्रा
,,	१६	अव्थक्तता	अव्यक्तता
२	३	निरन्तरत्बं	निरन्तरत्वं
,,	१७	अक्षयत्वके	अक्षयत्वेक
,,	२२	स्वर्गगत्वम्	सर्वगत्वम्
४	१६	नथा	तथा
,,	२३	ल्युः	स्युः
,,	२५	ममत्दं	ममत्वं
,,	,,	वर्तिनः	वर्त्तिनः
५	२	हर्षौं	हर्षौं
,,	२१	काल	काम
,,	२२	इति	रति
६	१	समुच्लत्व	समुच्चलत्व
,,	११	फला	कला
,,	१५	द्व	द्वे
८	२	अस्थाम्	अस्थ्नाम्
१०	२५	निरोघयेत्	निरोधयेत्
१२	६	नावाग्रतो	नासाग्रतो
,,	१३	ऊर्द्ध	ऊर्द्ध्व
१५	१	यीगि	योगि
,,	१३	वण्डाग्रे	दण्डाग्रे
,,	१८	स्वमावो	स्वभावो
१६	४	स्वनाव	स्वभाव

१६	६	सनातनत्ब	सनातनत्व
,,	,,	अविकृत	अधिकृत
,,	१०	घरः	धरः
,,	१७	अस्त्ति	अस्ति
,,	२२	परिपूणं	परिपूर्ण
,,	२६	सर्वकर्तृत्द	सर्वकर्तृत्व
२०	२	निर्धमंत्वाद्	निर्धर्मत्वाद्
२१	१	चक्रषु	चक्रेषु
,,	५	मलाधारे	मूलाधारे
२५	४	स्थित्तिः	स्थितिः
३१	१२	तेपां	तेषां
३२	१२	ह्यदूरं	हि दूरं
,,	२३	आज्ञालो	आज्ञाली

श्लोकानुक्रमणी

—o—

THE

PRINCESS OF WALES

SARASVATI BHAVANA TEXTS

No. 13

THE

SIDDHA SIDDHĀNTA SANGRAHA

GOVERNMENT SANSKRIT LIBRARY,

BENARES.

1925

THE

PRINCESS OF WALES

SARASVATI BHAVANA TEXTS

EDITED BY

GOPĪ NĀTHA KAVIRĀJA

No. 13

THE

SIDDHA SIDDHĀNTA SANGRAHA

Printed by

JAI KRISHNA DASS GUPTA,

at the VIDYA VILAS PRESS,

Gopal Mandir Lane,

Benares City.

1925

बलभद्रविरचितः

सिद्धसिद्धान्तसंग्रहः

THE

SIDDHA SIDDHĀNTA SANGRAHA

OF

Balabhadra

WITH INTRODUCTION

BY

GOPĪ NĀTH KAVIRĀJ, M. A.,

OFFG. PRINCIPAL, GOVERNMENT SANSKRIT COLLEGE,

BENARES.

1925

INTRODUCTION

The text of Siddhasiddhānta Saṅgraha published for the first time in the following pages represents a summary of the Siddhasiddhānta paddhati, attributed to Nityanātha. It is a work on Yoga and contains a brief exposition of some of the most important doctrines associated with the name of Gorakṣanātha.

As the doctrines of this sect are not known to any but the members of its esoteric circle I may be excused for attempting a brief analysis of the contents of this work here. But those who wish to have a detailed account are referred to my forthcoming tract on "Studies in Nathism." The book is divided into seven sections (उपदेशाः), which treat of the following topics—

Section I—Origin of six-fold body (पिण्डोत्पत्ति).
Section II–Discussion of body (पिण्ड विचार).
Section III–Knowledge of body (पिण्डसंवित्ति).
Section IV–The Foundation (आधार) of body.
महेश्वरोऽपि सन् भक्ताऽनुग्रहार्थं निजशक्तिबलेन नानाविध विग्रहं गृहीत्वा पर्यटन्नटवों भक्तिपरीक्षणाय भक्तभवने भिक्षुकपरिपाटीमिमामुररीकृत्य याचकतास्वभावं स्वभक्तात्परिहृत्य स्वस्मिन् परिदधत् धूलिधूसरितं स्वबालकं विरजीकृत्य स्वहस्तावेव मलिनयन् जनक इव सकललोकानुकम्पातिशायिनीं निजकरुणां कलयन्नात्म चरित्रं विचित्रचित्रमभिनयति, अत्र पक्षे परस्वत्वनिवृत्तिपूर्वक स्वस्वत्वोत्पत्यनुकूलव्यापाररूपो याचनार्थः, यथा बलिं याचते वसुधामित्यत्र, अथवा स्वीकारानुकूलव्यापारोऽपि याचना यथा अविनीतं विनयं याचते, ततश्च स्वशिष्यान् योगविज्ञानकर्मादिकल्याणैकतान नानाविधोगायसाद्गुण्यादेशं स्वीकारयतीत्यर्थेन नाथ इति आचार्याऽपर पर्यायः ।

किंच अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पञ्चक्लेशाः, शुक्लमशुक्लम शुक्लाऽशुक्लमिति त्रिविधंकर्म । एतद् विपाको जात्यायुर्भोगरूपः । तत्तद्दुःख सुखाद्यनुभवजवासनाराशिः ।

एतेषां संसारबन्धनानामुपतापकः स्वेन सह सम्बन्धस्य विच्छेदको नाथपदार्थः, अपरञ्च १ अणिमा, अणुभावः, येन शिला-

मन्तः प्रविशति, २ लघिमा लघुत्वं येन तरुणकिरणमवलम्ब्य रवि लोकं प्रयाति, ३ गरिमा गुरुत्वं येन गुरुर्भवति, ४ महिमा महत्वं यतो महान् भवति, ५ प्राप्तिः यतः पाणिपल्लवेन शशिनमपि स्पृशति, ६ प्राकाम्यम्, इच्छाविघातविरहो येनेलायामुन्मज्जति निमज्जति च यथा पाथसि, ७ वशित्वं येन भूतभौतिकं सकलं स्ववश्यं भवति, ८ ईशित्वं सकलोत्पत्तिस्थितिलयेशो भवति, एतदष्टविधैश्वर्यसम्पन्नो नाथपदाभिधेयः, इतरश्च स्वीकीयाशीर्वचसा श्रद्धालुलोकान्-स्वस्वाभीष्ट फल प्रदानेन सन्तोषयतीत्यर्थकोनाथः "अयमत्र निर्गलितोर्थ" आदित्वकथनेनास्य जनको नान्यः । अयंच निखिलविरंचि प्रपञ्चप्रवर्तको नाथपदाभिधेय एव सच्चिदानन्द इति, 'सकारणं कारणाधिपाधिपो नचास्य कश्चिज्जनिता नचाधिप' इति श्रुतिशिरसा प्रमीयते । ननुकथमद्वितीयो निरञ्जनो विचित्रमिमं विश्वप्रपञ्च मनन्तभेदभिन्नं विरचयितुं प्रभविष्णुरित्याशङ्कामपनोदयितुमाह शक्तिसहितमिति शक्तिभिर्वक्ष्यमाणपंचावयवात्मकपंचशक्तिभिः सहितंसमन्वितम्, साहित्यञ्च विश्वरचनात्मकैककार्यकारित्वम्, अत्र मायापदं विहाय शक्तिपदं प्रयुज्य स्वाभिमतशक्तेर्मायापद शक्तिपदयोः पर्यायतां मन्वानस्य विवर्तवादिनो मते स्वीकृततुच्छत्वं नाङ्गीकरोति, किन्तु चिदभिन्नापि नित्यसंश्लिष्टावयववत् कार्यगत भेदकारकतया भिन्नत्वेन निचनार्हा अतएव व्यवहारे सर्वैरेव अस्य शक्तिरित्येव निगद्यते नतु अयंपुरुषः शक्तिरिति । अतएव वेदेऽपि 'पराऽस्य शक्तिर्विविधैव श्रूयते, इति मंत्रे षष्ठया भेदः प्रदर्शितः, ननु अस्तु भेदो व्यवहारे परमार्थदशायान्तु अभेद एव तदा को विशेषो वेदान्तिमतादिति चेच्छृणु रहस्यं सावधानमनसा संकोचविकाशशालिचिद्रूपशक्तिवादिनां मते चिद्रूपत्वमेव विशेषः शिवोपि कूटस्थ चिद्रूपः तथाच संकोचविकाशशालित्वेन भेदेपि चित्त्वेनाभेदः अतएव विदेहकैवल्यमाप्तवतोऽद्वैतमनुभवतो योगबलेन भेदाभेदोभयानुभवोभवत्येवेति योगिनां दृष्टिचरो न शक्यो विकल्पबलेन निरसितुमित्यतो भवदीयाऽद्वैतात् मदीयाऽद्वैतो विलक्षण एवेत्यादि विस्तरेण प्रतिपादयिष्यते परस्तात् । शक्तिस्वरूपे यत्किञ्चिद् विवदमानोऽपि वेदान्ती तत्सद्भावन्तु न निरस्यतीत्यतो मदनुयायितया

चिरंजीव्यस्तु, एवमत्र कुतर्कप्रपञ्चपाशाऽवसिता नैयायिका न क्वापि पदार्थे स्वरूपातिरिक्ताशक्तिरस्ति; प्रतिबन्धकाभावविशिष्टं वस्तुस्वरूपमेव तत्तत्कार्यं प्रति कारणम्. यथा वह्निस्वरूपमेव प्रतिबन्धकमण्यभावसहितं सद् दाहं जनयति, अतोयत्र चन्द्रकान्तमणि सहितोवह्निस्तत्र न दाहः। नच सत्यपि चन्द्रकान्तमणौ उत्तेजकसद्भावे कथं दाह इति वाच्यम, उत्तेजकाभावविशिष्टमण्य भावस्य हेतुत्वेन तत्र विशेषणाऽभावप्रयुक्तविशिष्टाभावस्य सद्भावात् तथाहि उत्तेजकाभावो विशेषणं मणिर्विशेष्य: यत्र केवलोऽनल स्तत्रोत्तेजकाभावरूपविशेषणस्य सद्भावेऽपि विशेष्यभूतमणेर-भावाद्दाहः, यत्रोत्तेजक: चन्द्रकान्तश्च तत्र विशेषणाऽभावात् यत्र च उत्तेजकसहितो वह्नि स्तत्रोभयाऽभावात् विशिष्टाभावः, अनेनैव सर्वत्र कार्यनिर्वाहे अनन्तशक्तितत्प्रागभावध्वंसादिकल्पने गौरवात्, स्वरूपसहकारिसमवधानातिरिक्तां शक्तिमेव न जानीम इत्याहुः, अत्राभिदध्महे-परपक्षप्रतिक्षेपात् प्रथमं स्वपक्षस्थापनस्यैवाऽभ्यर्हितता इति प्रथमत: शक्तिसद्भावेऽविकलप्रमाणाभ्युपन्यस्य पराभिमतं व्युदसिष्यते 'न तस्य कार्यं करणञ्च दृश्यते न तत्समश्चाभ्यधिकश्च दृश्यते।

परास्य शक्ति र्विविधैवश्रूयते।
स्वभाविकी ज्ञानबलक्रियाच।
ते ध्यानयोगानुगता अपश्न्॥
देवात्मशक्तिं स्वगुणैर्निरूढाम्॥ श्वे० ३०

इत्यादि प्रमाणराजवेदः, स्वरूपातिरिक्तामेव शक्तिं ब्रूते, अन्यथा अस्य शक्ति रित्यत्र षष्ठी नोपपद्येत, विविधैवेति कथनेन एकैव प्रकृतिरिति सांख्योक्तमपि पराणुद्यते, स्वाभाविकीतिपदेन नित्यसिद्धत्वोक्त्या वेदान्तिकल्पिततुच्छत्वमपि निरसितम्। अतोऽनाद्यनन्तचिद्रूपा चिदाश्रिता समस्तसंसारप्रसर्विनी सकल वस्त्वन्तर्हिता जगज्जन्मादिनियन्त्री जगदम्बा विविधभेदान् जनयतीति सिद्धम, ध्यानयोगमन्तरायं न दृष्टिपथे पथिकायत इति स्पष्ट

मेवोपदिशति ते ध्यानयोगेतिपदेन परमेश्वरसाक्षात्कारे योग एव गरीयान् मार्गो नान्य इति निगदमेव व्याख्यायते, एतेन शारीरकग्रन्थादिभिरयं ग्रन्थो गतार्थ इत्यपि शंका दूरोत्सारिता, शक्तिभेदतत्तत्कार्यभेदतत्प्रापकयोगविधिभेदानां तत्राऽनुक्तेः। अतएव शक्तिपदार्थे योगिजनप्रत्यक्षमपि प्रमाणतयोपस्थापयितुं शक्यते। तदुक्तं विष्णुपुराणे। शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः। यतोऽतोब्रह्मणस्तासु सर्गाद्या भावशक्तयः॥ सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य इति स्मृतिरपि तामेवानुवदति नचैतानि वचनानि सहकारिमात्रबोधनानि कार्यकारणादिरूपसहकारिनिरसनपूर्वकं तस्या व्यवस्थापनात्

किंच व्रीहीन् प्रोक्षतीति वेदेन व्रीहीणां प्रोक्षणसंस्कारो विधीयते यदि नाम यज्ञे तण्डुलसम्पादनमेव तेषां प्रयोजनं तदा प्रोक्षणं विनापि तत्सिद्धेः तद्विधानं वैयर्थ्यमीयात्। अतः संस्कारकर्मणा व्रीहिषु स्वर्गप्रदपुण्यजननसामर्थ्यापरपर्य्यायशक्तिराविष्क्रियते इत्यवश्यं कल्पनीयम्, अन्यथा लक्षणादिजघन्यवृत्त्याऽर्थान्तरकल्पने वेदस्य व्यवस्थापकत्वमेव भज्येत, अनुमानमपि-एनां साधयति तथाहि-प्रथमं प्रत्यक्षवस्तुनि शक्तिमनुमाय तद्दृष्टान्तबलेन अदृश्येष्वप्यनुमास्यते, अक्षिलक्ष्यीभूतवह्निः , द्विष्ठस्थितिस्थापकेतरातीन्द्रियाऽयुतसिद्धभावसम्बन्धी , गुणाश्रयत्वात् घटवत्। द्व्यणुकगतरूपमादायाऽर्थान्तरवारणाय प्रत्यक्षेति पक्षविशेषणम्, एवञ्च प्रत्यक्षं द्व्यणुकादिकमेव पक्षः, तत्र द्व्यणुकगतरूपविरहादेव न तेनार्थान्तरं सिद्धसाधनंवा। साध्यदले द्विष्ठेतरनिवेशात् वह्नौ इन्धनादृष्टवदात्मवाय्वाकाशसंयोगं स्थितिस्थापकेतरनिवेशात् न्यायशास्त्रोक्तसंस्कारविशेषस्थितिस्थापकम् अतीन्द्रियविशेषणेन स्थूलरूपादिगुणम्, अयुतसिद्धपददानेन परमाणुञ्चादाय भावत्वकथनेन प्रतिवन्धकाभावमादाय च नार्थान्तरसिद्धसाधने समवायीत्यनिवेश्य सम्बन्धिपदनिवेशेन समवायमनङ्गीकुर्वतां मते नाऽप्रसिद्धविशेषणता घटे नैयायिकमते गुरुत्वमादाय स्वमते शक्तिमादाया ऽपि साध्यप्रसिद्धिः, तथाचोभयमतप्रसिद्धदृष्टान्तभूतघटे व्याप्तिग्रहस्य निर्बाधतया पक्षीभूते वह्नौ विवक्षितशक्तिसिद्धिः।

नचात्र नैयायिका गुरुत्वमादाय साध्यं विधातुमीशते। गुरुणी द्वे रसवतीत्यादिना जलेतरस्मिन् तेजःस्वरूपाऽनले तैस्तदनङ्गीकारात्, अन्यस्य च तादृशस्य विरहेण गलेपादुकान्यायेन शक्तिजनन्याः पदपद्मावलम्बादृते नान्यच् शरणं व्रजेलिमम्। ननु प्रभाकराः कर्मणोऽप्रत्यक्षत्वं मन्वते तथाच तेषां मते अतीन्द्रियं कर्म गृहीत्वाऽर्थान्तरता स्यादितितु देवानांप्रियं प्रत्येव परं शोभते। चक्षुषा सहक्रियायां संयुक्त समवाय (तादात्म्य) स्य प्रत्यक्षकारणस्य सम्बन्धस्य विद्यमानत्वे प्रत्यक्षं न भवतीति प्रमाणशून्यं वचनं साहसमात्रमेव, अन्यथा घटपटादावपि प्रत्यक्षताऽपलप्येत, अतएव लोके भवद्गमनं पश्यामि गच्छन्तं पचमानं च देवदत्तं साक्षात्करोमीति प्रतीति र्विश्वजनीना। व्याकरणमहाभाष्ये 'क्रिया नामेयमत्यन्ताऽपरदृष्टा' इत्यनेन क्रियाया अप्रत्यक्षतोपपादिता तस्याऽयमभिसन्धिः—शाब्दिकमते धात्वर्थो व्यापारकलापः क्रिया इति पारिभाषिकं तल्लक्षणम्, आद्यव्यापारमारभ्य चरमव्यापारपर्यन्तो यः समुदायः स एव धातुवाच्यः, तस्य च कश्चिद् व्यापारात्मकाऽवयवो नष्टो भावी वा कश्चन विद्यमानः, अतस्तादृशसमुदायस्य युगपत् पिण्डीकृत्य द्रष्टुमशक्यता। एकदा सर्वेषामवयवानां सहाऽवस्थानाऽसम्भवेन वस्तुतः समुदायस्यैवाऽभावात् तस्मात् कल्पित एव समुदायो धातुवाच्यतया क्रियापदेन परिभाषित इति योगिराजश्रीभर्तृपादाः—"बुद्ध्याप्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते" इत्यनेन स्पष्टमेव जगदुः। अतएव क्रिया नामेत्यस्याऽग्रे पूर्वापरीभूताऽवयवा न शक्या पिण्डीभूता निदर्शयितुम्, इति कण्ठत एवोपरितनाशयं स्पष्टयाञ्चक्रु र्भगवन्तो भाष्यकाराः, तथाच व्यापारात्मिकाया लौकिक्याः क्रियायाः प्रत्यक्षत्वे न तेषां विप्रतिपत्तिलेशः। अतो लौकिकपरीक्षकानुभवविरुद्धं केवलवैतण्डिकप्रभाकरोहितं कर्मणोऽतीन्द्रियत्वं गगनकुसुमायमानं कथमर्थान्तरतामावहेत कर्मणामिति कलयन्तु कल्पनाकल्पवासिनः सुधियः। नन्वस्तु वह्नौ शक्तिः चिदानन्दघने निरञ्जने श्रीमदाद्रिनाथे किमायातमनयाऽनुमया निभालयोन्मील्य

त्रिणीनविज्ञाननयनं तद् यदायातं विमतः शक्तिसहितो भावरूपकारणत्वात् वह्निवत् इत्यनेन सर्वत्र तत्सद्भावसिद्धिः, प्रपञ्चरचनाचणेन विरञ्चिनाप्यशक्यनिरसना, एवंदाहादिकार्यान्यथानुपपत्तिरपि शक्तिसद्भावे, मानम्,

अन्यथा चन्द्रकान्तमणिसमवधानेपि वह्निस्वरूपस्य पूर्ववत्सद्भावेन सहकारिकारणान्तराऽनपेक्षत्वे तत एव दाहेन पूर्ववद् भवितव्यमेव । ननु प्रतिबन्धकाभावस्य कार्यमात्रं प्रति कारणत्वेन तमादायैवान्यथोपपत्तिः । तथाहि-दाहस्य प्रतिबन्धकश्चन्द्रकान्तोऽतस्तस्य विद्यमानत्वे प्रतिबन्धकाऽभावरूपसहकारिविरहादेव न दाह इति चेच्छृणु, रहस्यम्-अभावस्य क्वापि जनकतानास्ति, इतरथा शशशृङ्गादप्युत्पद्येत नाम कार्यम्, अभावत्वाऽविशेषात् को निवारयितुमीष्टे तथा सति अभावाद्भावोत्पत्तिवादिनां सौगतानामपि दत्तावसरता प्रसज्येत, नच काचन क्वचन लौकिकी युक्तिरपि चेटी अभावस्य कारणतां कलयति । श्रुतिरपि भगवती 'कथमसतः सज्जायेत' इति शून्यस्य, कारणतामाक्षिपति, किंच इतरेतराश्रयदोषदूषितत्वेन, न, प्रतिबन्धकाभावस्य, कारणकोटौ, समावेशः, समुत्प्रेक्ष्यः प्रेक्षावताम् । तथाहि-कारणसमुदायस्वरूपसामग्रीत्वज्ञानं समुदायान्तर्भूतप्रतिबन्धकाभावज्ञानंविनानस्यात्, प्रतिबन्धकाभावघटक प्रतिबन्धकत्व-ज्ञानं-च प्रतिबन्धाभिसामग्रोति लक्षणाऽनुसारेण-सामग्र्यभावसम्पादकत्वरूपप्रतिबन्धकत्वघटकसामग्रीत्वबोधादृते न सम्भवति, अतः सामग्रीत्वप्रतिबन्धकत्व बोधयोः परस्परापेक्षत्वं, वज्रलेपायितं नच वाच्यम् यथावह्निस्वरूपस्याऽन्वयव्यतिरेकाभ्यामेवकारणता निश्चीयते तथैव प्रतिबन्धकाभावस्यापिप्रतिबन्धकत्वज्ञानमन्तरापि ताभ्यामेव लोके पक्षस्थले- दाहतदभावावलोक्य-निर्णेया तदा कान्योन्याश्रयता-इतिप्रत्येकं- मण्याद्यभावस्य-प्रत्यक्षेण कारणताग्रहे-मण्यभावानामनन्तत्वेनाऽनुगतस्वरूपप्रतिबन्धकरूपोपसंग्राहकधर्म- विना—पुरुषायुषेणापि-साक्षात्कृत्य -निश्चेतुमशक्यतया—प्रतिबन्धकत्वात्मकसंग्राहकधर्मस्याऽवश्यज्ञेयतया सामग्रीत्वज्ञाने प्रतिबन्धकत्वज्ञानसापेक्षत्वेनाऽन्योन्याश्रयस्य तादवस्थ्यात्. ननु कार्यौदासीन्यमेव-प्रतिबन्ध स्तत्प्रयोजकःप्रतिबन्धकस्तदा प्रतिबन्धकपदार्थाङ्गतया, सामग्रीत्वस्याप्रवेशेन, नाऽन्योन्याश्रय, इति चेन्मैवं-चन्द्रकान्तसहिते एवाऽनले कार्यौदासीन्यं नतुतद्रहिते इत्यत्र किं बीजमिति जिज्ञासायां मौनमवलम्बमानः स्वभाव एव शरणमित्युत्तरं प्रब्रुवाणो वा भवान्नूनं तार्किककुलादपसार्य देवानांप्रिय संघे एव संस्थाप्येत, अतो महत्ते बुद्धिकौशलम्, एकं संधित्सतोऽपरं प्रच्यवते मम तु सर्वत्रोत्साहजननी शक्तिरेवेति राद्धान्तः, अतएव यस्य

ह्रासोन्मुखा शक्तिर्भवति तस्यालस्यं प्रसमेधितुमुपक्रमते तन्निरासाय शक्त्युत्तम्भकौषधाद्युपचार: प्रयुज्यते वृद्धभिषग्वरै:, तस्या अत्यन्तोच्छेदे जीवनादेवाऽपैतिमृतइतिव्यवह्नियते, क्वचिच्च यन्त्रादिना यावत् कालं शक्तिस्तिरोधीयते तावत्कालं स्वरूपस्य सद्भावेऽपि कार्यकरणाक्षम ताऽऽयाति मृतवदेव व्यवह्रियते यन्त्रादिनि:सारणे पुनरपि साऽऽविर्भवति पूर्ववदेव कार्यं कर्तुमुद्युङ्क्ते, तस्माच्चन्द्रकान्तमणिवह्नौ शक्तिं तिरोधाप्य औदासीन्यं सम्पादयति, न तु स्वरूपं विना स्वत एव समुन्मिपति, अत औदासीन्यस्य प्रयोजक: प्रतिबन्धको न तु साक्षादुत्पादक:, अभा वस्य कार्यत्वाभावात् तथा च भावस्यैव कारणता कार्यता नत्वभावस्य कारणता कार्यता वा इति सार्वलौकिको दार्शनिकदृष्टिपथिकपरिरक्षित: पन्था: नावगाहित उत्पथगामितार्किकवरै: ? अत एव सांख्ययोगयोर्मते ऽभावो नातिरिक्त: पदार्थ: कार्यकारणोभयबहिर्भूतस्य तस्य संकलने केवल बुद्धिकन्थाकदर्थनात् फलान्तरस्य कस्याप्युत्प्रेक्षयितुमशक्यत्वात्, मीमांस का अपि भावान्तरमभावोहि कयाचित्तु व्यपेक्षया अर्थात् घट एव पटापेक्षया अभावो व्यवह्रियते न तु अभावो नाम कश्चित् पदार्थ:. लोकेऽपि दण्डचक्रचीवरादिभावभूत एव भावभूतघटादिं प्रति कारणं कुलालादिगतेच्छाप्रयत्नादिभावविघटनद्वारा कार्याभावप्रयोजको राजा ज्ञादि: प्रतिबन्धक:,तदभावश्च कार्यविरोधकनिरासार्थमेवाऽपेक्ष्यते न तु कार्योत्पत्तौ, अत उत्पत्तौ यानि अपेक्ष्यन्ते तानि कारणानि विरोधि निरासार्थं यदपेक्ष्यते तत्प्रयोजकमिति द्वैविध्यम्, अत एव लोके इदमस्य कारणम्. इदञ्च प्रतिबन्धकम्, इतिद्विविधं व्यवह्नियते, दण्ड विरहदशायां घट: प्रतिबद्धोजात इति न केन चित्कथ्यते, तत्कस्य हेतो: कारणाऽभावस्य प्रतिबन्धकत्वाऽनङ्गीकारात्, अन्यथा सकलकारणं प्रतिबन्धकाभावस्वरूपमेव भवेत् यदि च दाहस्य जनने किमपि वैकल्य मविदधानो मणि: प्रतिबन्धक 'उत्पत्तौ च किञ्चनोपकारमनाचरतस्तद भावस्य कारणता चोरीक्रियते तदा किमपराद्धं खपुष्पेण यत्तस्य प्रतिबन्धकता कारणता वा नाङ्गीकृता, तन्नूनं ते चेतसि द्वेषदोष प्रकोपावधीरिता विवेकशक्तिर्यत आसकलात् स्थितसत्ताकामपि भगवतीं शक्तिमपह्नोतुमुद्यतोऽसि, अत: संत्यज्य विग्रहाग्रहं, युक्त्यैकशरणो भवान् भवदूहितयैव युक्त्या व्यवस्थाप्यमानाया. शक्ते: कथं नाम

सद्भावं नोररीकरोति वयं तु बाह्यलौकिकप्रमाणमनपेक्षमाणाः परं केवलमृतंभरां प्रज्ञामवलम्बमानाः स्वानुभवैकशरणा योगनयनविहीनैर्नरैरगम्यां निजां शक्तिं तद्भेदांश्च साक्षात्कृत्य लवमपि नेह सन्दिह्यामहे इत्याशयवन्तो भगवन्त आचार्यपादा विशिंषन्ति स्म 'शक्तियुक्तमित्यनेन' आदिनाथम्, अत्र शिष्टविवेकस्त्वग्रे वक्ष्यते, नन्वस्तु नाम स्वेमहिम्नि निरतिशयाऽखण्डानन्दकन्दमनुभवन् शक्ति सहितः शिवः किमस्माकं साधकानां प्रयोजनम्, औदासीन्यपथ पथिकेन तेनेति संशीतिमुच्छेत्तुमाह जगद्गुरुमिति जगतां निखिल प्राणिनां गुरुः, अज्ञाननिवारको ज्ञानप्रद इति यावत् गुरुशब्दार्थमाह— अद्वयतारकोपनिषदि ।

गुशब्दस्त्वन्धकारः स्यात् , रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥
तस्य माहात्म्यमपि तत्रैव ब्रूते
गुरुरेव परं ब्रह्म गुरुरेव परागतिः ।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥
गुरुरेव पराकाष्ठा गुरुरेव परंधनम् ।
यस्मात्तदुपदेष्टाऽसौ तस्माद् गुरुतरोगुरुः ॥

ज्ञानवत्त्वे सति, अज्ञानविनाशकत्वं गुरोर्लक्षणम् , अत्र विशेषणाऽनुपादाने दीपकादावतिव्याप्तिः स्यात्, तद्वारणाय तदुपादानम्, नच कालिकसम्बन्धेन विषयतासम्बन्धेन वा दीपकादौ ज्ञान सद्भावादतिप्रसङ्गस्तदवस्थ एवेति वाच्यम् समवायसम्बन्धेन विवक्षायामदोषात्, यत्तु समवायमनङ्गीकुर्वतां मतेऽप्रसिद्धविशेषणता स्यादिति चेन्न तादात्म्यसमवायान्यतरसम्बन्धेन ज्ञानवत्त्वमिति निवेशे सकलारिष्टविनाशात् । विशेष्यानुपादाने, उदासीनपुरुषेऽति व्याप्तिरतस्तन्निरसितुं तदुपादानम् नचवाच्यम् सकलधर्मातीते ब्रह्मणि कथमुक्तलक्षणमिति, शक्तियुक्तमिति विशेषणेनैवास्य दोषस्य शक्तिमत्त्वाङ्गीकारेण पराहतत्वात्, व्यवहारकाले कल्पितताद्दश

धर्मस्वीकारे बाधकाभावेन लक्षणसंगमनाच्च, मुक्तिदशायान्तु लक्षण करणस्यैव प्रयोजनविरहतया, असंगमनेपि क्षतिविरहः, अथवा ज्ञान वत्त्वविशिष्टाज्ञानविनाशकत्वात्यन्ताभावाऽनधिकरणत्वमिति निकृष्ट-लक्षणे दोषगन्धोऽपि न प्रसरति ॥ तथाहि-यथा गन्धवत्त्वलक्षणस्य उत्पत्तिकालाऽवच्छेदेन पृथिव्यां गन्धाभावेना व्याप्तिपरिहाराय नैया यिका गन्धात्यन्ताभावानधिकरणत्वलक्षणं स्वीकृत्य कदाचिदपि तस्यां गन्धसद्भावे तदत्यन्ताभावाऽधिकरणत्वस्याभावेनानधिकरणत्वघटि तोक्तलक्षणस्य समन्वयं विधायाऽव्याप्तिं वारयन्ति, तथैवाऽस्माकमपि व्यवहारकाले कल्पितोक्तधर्मस्वीकारे तदत्यन्ताभावस्यानधिकरणत्वे न लक्षणसमन्वयो न विरोधलेशमप्यावहति इति सुधियः कलयन्तु अत्रेदमवधेयम् यत्किञ्चिज्ज्ञानप्रदानेन एकमप्यज्ञानं यो निरस्यति सोऽपि गुरुः, अतएवापेक्षिकगुरुत्वं सर्वेषां किन्त्वध्यात्मविद्याप्रकाशक महामंत्रोपदेशको मंत्रगुरुः । तदर्थदार्ढ्यकारकोऽध्यात्मशास्त्रोपदेष्टो पाध्यायगुरुश्च परमोत्कृष्टः, सो हि मानवजन्मलक्ष्यमोक्षमधिरोहयति विच्छेद्याऽविद्यातिमिरबन्धम् । निरतिशयगुरुत्वं चादिनाथे परमेश्वरे एव तस्य सर्ववित्त्वेन निखिलविषयकाऽज्ञाननिरासकत्वात्, अतएवोक्तं योगसूत्रे—

'पूर्वेषामपि गुरुः कालेनाऽनवच्छेदात्' १ पा २६

इति एतेन संसारपाशावसितान् निखिलान् ब्रह्माण्डभाण्डोदरवर्तिनः स्वोपदेशामृतेन मोचयिष्यामीति संकल्प्य गुरुपदमध्यासीनः श्रीमदादि-नाथः सकलैर्नमस्य इति व्यज्यते । ननु तस्य प्रयोजनवत्त्वेऽनाप्त-कामतयाऽस्मदादिवद् ईशत्वमेव भज्येत । प्रयोजनाऽभावे च कथं प्रवृत्ति रिति शङ्का तु व्यासपादैरेव योगसूत्रभाष्ये तस्य स्वप्रयोजनाभावेपि भूतानुग्रह एव प्रयोजनमित्यनेन दूरोत्सारिता । अयमाशयः—परम-कारुणिको हि भगवान् स्वप्रयोजनविरहेऽपि प्राणिनां बन्धविमोचनेन नित्यनिरतिशयानन्दप्रापणमेव प्रयोजनं मन्वानो भक्तानुपदेष्टुं समु-ज्जृम्भते । यदि सर्वज्ञः सर्वसामर्थ्यवान् तदा युगपदेव कथन्न विमो-चयति नानाविधशोकोपप्लुतान् निखिलान् जीवानिति प्रष्टारं प्रति ब्रूवे-

प्रश्नपटुर्भवान् ममोपरि कथं कथमिति प्रश्नशरं निरस्यन् वैतण्डिकतया प्रचोदने, ऋते मतिकर्दमात् नान्यां काञ्चन विवेकपद्धति-मध्यास्य निश्चितिफलं विचिनुयात्। अतः समाश्रयतु विचारपद्धतिम् तदैव नूनं गहनतरमिमं पारयिष्यति विवेकम्। तथाहि, आदौ स्वानुभवेन स्वस्वरूपं विनिश्चित्य संसारसद्भावं निर्णयति तत्र द्विविधं वस्तु एकं चिरस्थायि स्वस्वरूपम्। अपरञ्चागन्तुकं शोकमोहादि विच्छिद्य विच्छिद्य वर्तमानम् दृष्टैव तद्द्वयं सन्दिग्धे यत् कुत आयातं कदापर्यन्तं स्थास्यति किञ्चास्य निदानं तदुपशमस्य च कः प्रतीकारः कोऽप्यस्य संचालको न वा इत्यादि, तत्र विहितविचारः स्वस्वरूपस्य तत्रागन्तुकदुःखसुखादिनिदानस्य चाऽनादितामुपश्रुत्य तत्संचालकतया सर्वज्ञं सर्वशक्तिसम्पन्नं कञ्चनाधिकृत्य पृच्छति तदुत्तरे सरलसरणिरियं यत् स्वतो निरपेक्षोपि सन् प्राणिकृत कर्माण्यपेक्ष्य विचित्रचित्रमिव संसारं विरच्य तदध्यक्षतामनुभवति, इदमेवानुवदति श्रुतिः—कर्माध्यक्षः कर्मणोऽधिवासः, इति तदा सूक्ष्म-तमस्यापि कर्मणः फलेन यथा समयं प्राणिनः संयोजयन् कथंन सर्वज्ञतां वहेत, कस्याप्यवसरविपर्यासं चिकीर्षतः प्रतिरोधमाचरन् कथंन सर्वशक्तिमत्तां प्राप्नुयात्। अतोऽध्यक्षपदमध्यारूढो जानन्नपि प्राणिनां दुःखबहुलं, कर्तुमकर्तुमन्यथाकर्तुं शक्तोऽपि सन् कर्मानुरूपमेव करोति अध्यक्षेण कर्तव्यस्यस्वतो निरपेक्षत्वस्य निर्वाहाय, अन्यथा स्वस्य निरपेक्षत्वभङ्गेनाऽध्यक्षत्वं भज्येत। तत्रेदमेव कारुणिकत्वं यत्प्राणि-कृतस्य स्वल्पस्यापि प्रयत्नस्य फलव्यतिरेकतां व्यर्थतां वा न विदधाति तस्माद् युगपदनुद्धरन्नपि, उचितकारितया कारुणिकः प्रशस्यतरश्चेति सिद्धम्, लोकेऽपि समुचितकारी एवाध्यक्षः सर्वजनप्रशस्यो दयालुश्च निगद्यते, इति दिक्।

[नमस्कृत्येति] परनिष्ठोत्कृष्टत्वप्रकारकबोधानुकूलव्यापारो नमस्कारस्तथाच परमाचार्यो भवान् मत उत्कृष्ट इत्याकारस्याऽऽदिनाथ-गतस्य बोधस्य जनकं मानसिकस्मरणात्मकव्यापारं कृत्वा इत्यर्थः।

[अहम्] भक्तजनोपकाराय कृतावतारः **[गोरक्षनाथः]** गाः इन्द्रियाणि पृथ्वीं वाणीं च योगमत्रानुष्ठानेन तदुपदेशेन च रक्षति

स चासौ नाथः शिवरूपः (सिद्धानां) ऋतंभराप्रज्ञामध्यारूढानां सिद्धान्तः (सिद्धः) निश्चितो न तु केनचित् प्रमाणेन साधनीयः **[अन्तः]** चरमो यदनु कापि कक्षा केनापि प्रमाणेन केनचिदपि विचारकेण नानेतुं शक्या, यत् पश्चात् न कोऽप्यन्यः निर्णय इति यावत्, तस्य **[पद्धतिम्]** सरणिं **[वक्ष्ये]** व्याख्यास्ये ।

ननु एतदुपदेशजफलस्य शिष्यगतत्वेन परगामिक्रियाफलत्वात् कथमात्मनेपदमिति न शंक्यम, स्वशिष्यान् स्वाभिन्नान् मत्वैतद्गत-फलं ममैवेति मन्यमानः स्वशिष्येषु करुणातिशयं दर्शयन् आत्मने पदमभिदधावित्याशयात् । अत्र सिद्धपदेनेदं व्यज्यते यदत्रत्याः सिद्धान्ता योगजप्रत्यक्षात्मिकया ऋतंभरप्रज्ञया प्रमिता न केवलानुमानेन अतोऽनुमानेनाप्रमिता अपि विषया इहोच्यन्ते । यथा पंचपंचगुणा-त्मकपञ्चविधशक्त्यादयः,

तावताऽस्य ग्रन्थस्य स्वतः प्रामाण्यं प्रस्थानान्तरैरगतार्थत्वञ्च ध्वनितम् । किंच प्रमाणाधीना प्रमेयसिद्धिः, तथा च प्रमाणान्यनुपन्यस्य प्रमेयमात्रवर्णने न्यूनता स्यादिति विवादोऽपि दूरोत्सारितः । प्रमाणराजऋतंभरप्रज्ञासमुल्लेखेन प्रमाणान्तरे निरपेक्षत्वात्, यदि-चेत्तदनुकूलतयाऽनुमानमपि उपन्यस्येत न तदपि वारयामः । ननु सर्वासां स्मृतीनामागममूलकत्वे प्रामाण्य मस्यापि स्मृतित्वेनागम मूलकत्वं मन्तव्यम् । अन्यथा वेदाननुयायिनामनादेयता स्यादिति प्रच्छकाः प्रष्टव्याः कथमस्य वेदमूलविरहितत्वमवधारितं वा वेदविरुद्धत्वम्, वेदेऽपि **"सदेव सौम्येदमग्र आसीत् तदैक्षत तत्तेजोऽसृजत, आत्मन आकाशः संजातः,,** तत्वमसीत्यादिनाऽद्वितीय ब्रह्मतः सृष्टिप्रतिपादनं तत्र द्वितीयसहायमन्तरा सृष्ट्यनुपपत्त्या अनाद्यविद्यात्मक माया सहायेति केचिद् वर्णयन्ति, अत्र तु,अनेकावस्था विशिष्टा चिद्रूपशक्तिरेव विद्यास्वरूपिणी सृष्टिकर्त्री तस्या-एवाऽवस्था भेदेन निजादि संज्ञा इति, 'तेध्यान योगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निरूढामितिवेदमार्गेण समाधिना प्रत्यक्षीकृत्य वर्णितम्, वेदे सूक्ष्मरूपेणवर्णनम् अत्र तु तस्यैव विस्तरेण

वर्णने महानुपकारोऽकारि वेदस्य, वस्तुतो वेद-तात्पर्यमत्रैवोद्घाटितम्, स्मृत्यन्तरेऽविद्यान्युपवर्णनं केवल-तर्कबलेनाऽभ्युपगमवादेन वा अतस्तादृशव्याख्यानस्य दुर्बलत्वम्, अत्र समाधिबलेन व्याख्यानस्यास्य प्रबलत्वमिति बालेनापि सुज्ञेयम्, अत्रैव वेदतात्पर्योट्टङ्कनेनोभयोस्तात्पर्यभेदाभावात् विरोधस्य च गन्धोऽपि नाऽऽयातीति स्पष्टतरं मर्मविदाम्। आगमोक्तार्थ रक्षाऽपि योगनिकषकृतपरीक्षणेनैवेति विदांकुर्वन्तु विचक्षणाः।

भा० टी० मंगल

यस्य निःश्वसितम् वेदा
यतो जातं जगत्त्रयम्।
तं भवानीयुतं देवम्
प्रणमामि सदाशिवम् ॥१॥

* अथ हिन्दी टीका *

श्री जगदम्बा भवानी सहित जगन्नियन्ता श्री आदि नाथ महेश्वर को प्रणाम कर मैं गोरक्षनाथ, श्रीमत्स्येन्द्रनाथ तथा ज्वालेन्द्रनाथादि समस्त सिद्धों के सिद्धान्तभूत तात्पर्य का निरूपण करने वाली इस "सिद्ध सिद्धान्त पद्धति" को वनाता हूँ।

शंका—श्री गोरक्षनाथ जी तो साक्षात् शिवरूप हैं, इसलिये अपने आपको प्रणाम करना परम असंगत है। श्री गोरक्षनाथ जी शिवरूप हैं ऐसा महाकाल योग शास्त्र में भी कहा है। देखिये

"अहमेवास्मि गोरक्षो मद्रूपं तन्निबोधत।
योगमार्गप्रचाराय मया रूपमिदं धृतम् ॥

अर्थ—श्री गोरक्षनाथ जी के अद्भुत योग बल को देखकर चकित हुए देवताओं ने श्री महादेव के पास जाकर विनय पूर्वक पूछा कि हे प्रभो ? आप के समान शक्ति शाली गोरक्षनाथ नामक यह सिद्ध कौन है, जिसकी समस्त संसार में प्रसिद्धि हो रही है।

यह सुन श्री महादेव ने कहा हे देवताओ ? मैं ही गोरक्षनाथ हूं, लोगों के कल्याण के लिये योग मार्ग का प्रचार करूं इस लिये मैंने ही यह दूसरा रूप धारण किया है । अतः सिद्धराज श्री गोरक्षनाथ को मेरा ही स्वरूप समझो । इसी कारण श्री गोरक्षनाथ जी को बाल और वृद्ध सभी पुरुष शिव स्वरूप मानते हैं, इतना ही नहीं अपितु योग सम्प्रदाय में योगी भी श्री गोरक्षनाथ जी को "शम्भुयति" ऐसा कहते हैं। और "ॐ शिवगोरक्ष" इस पंचाक्षर मंत्र का योगी लोग अपने शिष्यों के लिये उपदेश देते हैं , तथा "खड़े हुए सो सिद्ध भये बैठे सो पाषाण, भेष में आये श्री शम्भुयति गुरु गोरखनाथ निर्वाण ॥ इत्यादि कहावतें भी प्राचीन समय से योगियों में प्रसिद्ध हैं। इससे यही सिद्धहोता है कि साक्षात् शिव ही गोरक्षनाथ हैं।

उत्तर—श्री गोरक्षनाथ जी शिव स्वरूप हैं यह कथन सत्य है किन्तु योग मार्ग का प्रचार करने के लिये रूपान्तर धारण करके अपने आपको ही दूसरे रूप से प्रणाम किया है। इसलिये यहां पर 'अपने आपको ही प्रणाम किया' ऐसा दोष नहीं आता ।

शंका—मंगलाचरण का मुख्य प्रयोजन विघ्नों के नाश पूर्वक निर्विघ्न ग्रन्थ समाप्ति है, परन्तु योगसिद्ध श्रीगोरक्षनाथ जी के विषय में तो स्वप्न में भी विघ्नों की सम्भावना नहीं होसकती, कारण सिद्धों के तो दर्शन मात्र से ही अन्य पुरुषों के भी पाप नष्ट हो जाते हैं अपनों का तो कहना ही क्या है। फिर श्रीनाथ जी ने नमस्कारात्मक मगल क्यों किया।

उत्तर—"यद्यदाचरति श्रेष्ठ स्तत्तदेवेतरोजनः" इस प्राचीनरीति के अनुसार योगाचार्य श्री गोरक्षनाथ जी ने भी अनादिकाल से

प्रचलित प्रणामादि शिष्टाचार को शिष्यशिक्षार्थ दिखलाते हुए आचार्यत्व की मर्यादा का परिपालन मात्र किया है । पाठकगण ? गोरक्ष शब्द का अर्थ नीचे लिखा जाता है ।

देखिये—गो पद से गौ-पृथिवी-स्वर्ग-इन्द्रीय-वेद तथा वेदप्रतिपादित धर्म, इन सबका संग्रह होता है । और इन की रक्षा करने वाले का नाम 'गोरक्ष' है। कहा भी है कि—

'स्थापयित्वाच यो धर्मान् सज्जनानभिरक्षति ।
स्वात्म स्वरूप बोधेन गोरक्षोऽसौ निगद्यते ॥

अर्थ—प्रवृत्ति और निवृत्ति रूप धर्मों के स्थापक सज्जन साधु महात्मा और गोब्राह्मण आदि की रक्षा करने वाले तथा अन्त में आत्म स्वरूप का बोध कराने वाले एवं संसार सागर से पार कर मोक्ष देने वाले को गोरक्ष कहते हैं ।

नाथ शब्द के चार अर्थ हैं- याचक, उपतापक, ईश्वर, और आशीर्वाददाता, यह चारों अर्थ नाथ जी में अच्छी प्रकार घटते हैं, नीचे देखिये—

याचक— नाथ जी स्वयं महेश्वर होते हुए भी लोक कल्याणार्थ लीलामय शरीर को धारण कर श्रद्धालु तथा आस्तिक भक्तों की भक्ति से प्रेरित होकर उनके घरों पर 'जय अलख निरंजन' कहकर भिक्षा मांगते हुए याचक के रूप में दिखाई पड़ते हैं । अर्थात् भिक्षुक के बहाने अपने धार्मिक भक्तों में आतिथ्य सत्कार की भावना को जगाकर उनकी समस्त कामनाओं को सफल करते हुए उनके हृदय से याचक भाव को समूल नष्ट कर देते हैं । जैसे पिता धूली धूसर अपने प्रिय पुत्र को धूली में से उठाकर अपने दयार्द्र हाथ से उस के शरीर से समस्त धूली को झाड़ देता है और अपने हाथ के मैला होने की कुछ भी परवाह नहीं करता इसी प्रकार नाथ जी भी अपने प्रिय श्रद्धालू भक्तों के याचकत्वरूप मलिन

भाव को स्वयं धारण करके उन की इष्ट कामनाओं को पूरण कर अन्त में मोक्षरूप परमपद को देते हैं।

उपतापक—अविद्यादि पांच क्लेशों को दूर करने वाले को नाथ कहते हैं। अविद्यादि पंच क्लेश योग दर्शन में निम्न लिखित प्रकार से कहे हैं—

अविद्या—अविद्या नाम अज्ञान का है अर्थात् वस्तु के सच्चे स्वरूप को न जानना ही अविद्या है।

अस्मिता—आत्मा और बुद्धि के परस्पर एकीभाव अर्थात् एक होजाने को अस्मिता नामक क्लेश कहते हैं।

राग—पूर्वकाल में सुख का अनुभव करने वाले पुरुष को जब अनुभूत सुख का स्मरण होता है तब उस सुख को प्राप्त करने की इच्छा से सुख और उस के साधनों में जो तृष्णा वा लोभ होता है उसी को राग नाम का क्लेश कहते हैं।

द्वेष—दुःख का अनुभव किये हुए पुरुष को जब अनुभूत दुःख का स्मरण होता है तब उस दुःख और दुःख के साधनों में जो द्वेष होता है वही द्वेष नाम का क्लेश है।

अभिनिवेश—भूमण्डल के समस्त प्राणियों को सदा ही यह इच्छा बनी रहती है कि मैं हमेशा ही रहूँ मेरा नाश कभी न हो यह अभिनिवेश नाम का क्लेश है। इन उपर्युक्त पांच क्लेशों को जिस ने निज योगबल से समूल नष्ट कर दिया हो वही नाथ कहा जा सकता है।

ईश्वर—अणिमादि अष्ट सिद्धि सम्पन्न ईश्वर भी नाथ शब्द का अर्थ है।

आशीर्वाद दाता—अनेक दीन दुःखियों तथा भक्त जनों का अपने शुभाशीर्वाद से कल्याण करने वाले को आशीर्वाद देनेवाला कहते हैं यह अर्थ भी नाथ शब्द का होता है और श्री नाथ जी में तो यह अर्थ मुख्यरूप से घटता है।

शंका—यद्यपि इस ग्रन्थ का निर्माण नाथ जी ने किया है, इस लिये यह ग्रन्थ अत्यन्त आदरणीय और उपादेय है, तथापि प्रमाण के बिना ज्ञेय वस्तु की सिद्धि होना असम्भव है; प्रमाण के निरूपण बिना इस ग्रन्थ में न्यूनता दोष है।

उत्तर—'सिद्ध सिद्धान्त पद्धति' इस पद के कहने से ही उपर्युक्त शंका का निराकरण हो जाता है क्योंकि सिद्धसिद्धान्त पद्धति इतना समस्त पद अतिगम्भीर आशय का द्योतक है।

सिद्ध—इस पद से त्रिकाल दर्शी योगिराजों का बोध होता है।

सिद्धान्त—उन सिद्धों की दिव्य योग दृष्टि के द्वारा अच्छी प्रकार से निश्चित पदार्थ का नाम यहां सिद्धान्त है।

पद्धति—सिद्धयोगिराजों की दिव्य योग दृष्टि से निश्चित पदार्थ को बतलाने के मार्ग का नाम पद्धति है। अर्थात् महासिद्ध योगिराजों की ऋतंभरा प्रज्ञा के द्वारा अच्छी प्रकार से निर्णीत और विश्वस्त पदार्थ को बताने के लिये यह ग्रन्थ मार्ग स्वरूप है। अतः महासिद्ध योगिराजों का सर्वप्रमाण शिरोमणि ऋतंभरा नाम का योगज धर्म ही यहां प्रमाण है। इस ग्रन्थ में मुख्यतया प्रतिपाद्य समरस करण ही विषय है, समरसकरण का व्याख्यान पंचम उपदेश में स्वयं श्री गोरक्षनाथ जी करेंगे। अतः पाठक वहीं देखें।

आदिनाथ— आदि शब्द का अर्थ कारण है, और नाथ शब्द का अर्थ पहले कहा जा चुका है। आदिनाथ शब्द से श्री महेश्वर

का ही बोध होता है, क्योंकि यह सिद्धों का सांकेतिक शब्द है। सिद्ध सम्प्रदाय में हठयोगादि विद्याओं के आदि परम आचार्य श्री आदि नाथ शिवजी हैं। पीछे श्री महेश्वर की कृपा से यह विद्या श्रीमत्स्येन्द्र नाथ और ज्वालेन्द्रनाथ (जलन्धरनाथ) आदि सिद्धों में आई। वह सर्वेश्वर आदिनाथ सब के कारण हैं परन्तु उनका कोई कारण नहीं है और न उन पर किसी का प्रभुत्व ही है।

वह शिव संसार का कारण कैसे हो सकता है ? क्योंकि वह असंग है, संसार के रचने की कोई सामग्री उसके पास नही है। इस शंका को दूर करने के लिये "शक्ति युक्त" यह विशेषण दिया गया है, जब परमेश्वर अपनी अचिन्त्य और अनन्त शक्ति से परिपूर्ण है, तो वह सत्य संकल्प होने के कारण चराचर समस्त विश्व को लीला पूर्वक ही क्षण भर में रच सकता है। परमेश्वर भी यदि शक्ति रहित है तो वह कुछ नहीं कर सकता, ऐसा श्री नाथ जी ने कहा है नीचे देखिए—"शिवोऽपि शक्तिरहितः कर्तुं शक्तो न किंचन" यहां पर यह जान लेना जरूरी है कि शक्ति और शक्ति वाले का नित्य अभेद सम्बन्ध है। जैसे हाथ पैर आदि अङ्ग समुदाय अंगी (शरीर) से भिन्न नहीं रह सकता उसी प्रकार शरीर भी अपने अवयव हस्त पदादिकों से अलग नहीं रहता। यदि ये दोनों भिन्न २ रहें तो इनका स्वरूप ही बनना असम्भव हो जाय। इसी प्रकार शक्ति और शक्तिमान् का भी नित्य सम्बन्ध है। इसलिये शिव से उसकी शक्ति कभी भी अलग नहीं हो सकती। इसी कारण श्रीगोरक्षनाथ जी ने मंगल श्लोक में 'शक्तियुक्त' ऐसा विशेषण दिया है शक्ति क्या पदार्थ है नीचे इसी का उल्लेख किया जाता है—

जैसे गहरे तेज का पुंज चन्द्रमा और उसके चारो तरफ फैला हुआ मन्द प्रकाश चांदनी कहलाती है। उसी प्रकार शुद्ध बुद्ध असंग नित्य और चित् शिव कहलाते हैं, और संकोच विकाश वाली चित्स्वरूप शक्ति कहलाती है। अर्थात् चांद और उसकी चांदनी की तरह क्रमशः शिव और उसकी शक्ति समझनी चाहिये।

शंका—शक्ति को चिद्रूप कहना महा असंगत है, क्योंकि शक्ति-माया-प्रकृति-तुच्छ-अविद्या-तम इत्यादि पर्याय शब्द हैं। ये सब जड़ रूप माया के बोधक हैं। और माया की ज्ञान से निवृत्ति होती है। ऐसा श्रुति में भी कहा है।

तम आसीत्, भूयश्चान्ते विश्वमाया निवृत्तिः

इत्यादि। इस प्रकरण के देखने से तो तम-माया-अविद्या इत्यादि नामों से बोधित जो जड़ रूप माया है, उसी का पर्याय यह शक्ति शब्द है और वह भी जड़ रूप है। जड़ रूप शक्ति को चिद् रूप कहना तो आकाश पुष्प के सदृश है तथा वेदादि प्रमाणों से भी विरुद्ध है?

उत्तर—महेश्वर की वह निज शक्ति चिद् रूप है, इसकी पुष्टि तो स्पष्ट रूप से पहले ही 'चन्द्र चन्द्रिका दृष्टान्त से हो चुकी है और आगे भी ग्रन्थकार श्री गोरक्षनाथ जी मूल में स्वयं व्यक्त करेंगे। जब महेश्वर स्वयं चिद् रूप हैं तो उससे अभिन्न शक्ति को जड़ कहना स्वयं अपनी बुद्धि की ही जड़ता को प्रसिद्ध करना है।

वास्तव में चिद् रूप शक्ति का ज्ञान तो महा सिद्ध योगिराजों की ऋतंभरा प्रज्ञा से ही गम्य है, लौकिक प्रमाणों की वहां गति नहीं है। इस सिद्धान्त का अनुमोदन समस्त श्रुति और स्मृतियों में भी किया गया है और अन्तिम पंचम अवस्था को प्राप्त हुई जो चिद् रूप महा कुंडलिनी शक्ति है, उसी के मध्य में छिपी हुई जड़रूपा महामाया है। जिसको सांख्य और पातञ्जल मतानुयायी जड़ रूप प्रकृति और प्रधान कहते हैं। और वेदान्ती उसको जड़ रूप माया, तम और अविद्या कहते हैं, यह जड़ात्मिका त्रिगुण माया असंग शिव की चिद् रूप शक्ति से अधिष्ठित होकर सकल ब्रह्माण्ड को उत्पन्न करती है। इसी उपर्युक्त भाव का वेद भी स्पष्ट रूप से प्रतिपादन करते हैं—

ते ध्यानयोगानुगता अपश्यन्

देवात्म शक्तिं स्वगुणैर्निगूढाम् ।
न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञान बल क्रिया च ॥

इत्यादि ।

जगद्गुरुम्—श्री आदिनाथ जी जगत् अर्थात् समस्त विश्व के गुरु हैं । कारण यह है कि सकल विद्याओं का विस्तार श्रीआदिनाथ महेश्वर से हुआ है और तो क्या जगन्नियन्ता ब्रह्मा, विष्णु आदि देवताओं को भी सब से पहले श्री महेश्वर ने ही उपदेश दिया था। इसके उपरान्त यह वेदादि विद्या सिद्धों, ऋषियों और मुनियों के द्वारा जगत् में फैली, अतः श्री आदिनाथ जी ही उपर्युक्त परम्परा के द्वारा सब जगत के गुरु अर्थात् उपदेष्टा हैं । इसी लिये योगाचार्य श्री गोरक्षनाथ जी ने "जगद्गुरु" ऐसा मंगल श्लोक में विशेषण दिया है ।

गुरु शब्द में दो वर्ण हैं 'गु' और 'रु' इनका भी अलग अलग अर्थ पाठकों के लिये दिखाते हैं—

सर्व प्राणियों के अन्तःकरण में स्थित अज्ञान का नाम 'गु' है उस अज्ञान को समूल नाश करना "रु" का अर्थ है अर्थात् अज्ञाननिवारक और ज्ञान का उपदेश देने वाला सर्वोत्कृष्ट गुरु है ।

इस मूल मंगल श्लोक का सारभूत भाव यह है कि जिस श्री आदिनाथ महेश्वर की महिमा यथार्थ रूप से वेदों में गाई गई है, उसी जगद्गुरु श्री आदिनाथ ने "गोरक्ष रूप से प्रकट होकर योगसम्प्रदाय में अपने सिद्धान्तों के प्रचारार्थ और लोक कल्याण के लिये इस "सिद्ध सिद्धान्त पद्धति" नामक ग्रन्थ को प्रकाशित किया ।

मू०—नास्ति सत्यविचारेऽस्मिन्नुत्पत्तिश्चाण्डपिण्डयोः।
तथापि लोकवृत्त्यर्थं वक्ष्ये सत्सम्प्रदायतः ॥२॥

सं० टी० नास्तीति

[अस्मिन्] विवेक मार्गे [सत्य विचारे] सत्यश्चासौ विचारः, तस्मिन् सति यथार्थविचारणायां सत्यां [अण्डपिण्डयोः] अण्ड पदेन ब्रह्माण्डः गृह्यते पिण्डपदेन, अस्मदादि व्यष्टि शरीरम्। तथाच भूत भौतिक निखिलविरञ्चिप्रपञ्चस्य [उत्पत्तिः] जन्म [नास्ति] प्रमाणेन न सिद्ध्यति, तथा च अजातवादपक्ष एव महतां माननीयः, उत्तमाधिकारिणां कृते च तस्यैवोपदेशः। अतएव अस्यैव वादस्याभ्यर्हितत्त्वं परैरपि विस्तरेण व्युत्पादितं स्वस्वग्रन्थे। न च तदीयमेव मतमत्र स्वग्रन्थेऽनुद्यते इति वाच्यम्—तदीय ग्रन्थेभ्योऽस्य प्राचीनत्वेन, तदीयानुवादकत्वस्या संभवेन एतदनुवादकत्वस्यैव तत्कल्पने लाभाभावात्, अन्यथा वेदस्यापि अनुवादकत्वं कथं न स्यात् [illegible] वेदादपि गरीयान् भवेत्, यदि च समस्तजन प्रसिद्धं वेदस्य प्राचीनत्वं ते निर्गलतुण्डं तोडयति, तदा एतद् ग्रन्थ कर्त्तुराचार्यपादस्य अवतारकः श्रीदत्तात्रेयसमकालीनत्वं स्वीकुर्वद्भिः [illegible] चपेटा न प्रदीयेतेति का प्रत्याशा, इत्यलं तैः सहनिरर्गलप्रलापेन, ये हि खमपि मुष्टिना जिघृक्षन्ति। वस्तुतस्तु सिद्धान्तस्यानादितया तत्प्रवर्त्तका एव तत्तदाचार्याः, तत्र केचित् पूर्वम् अपरे परं स्व स्व समये ह्यसतोऽशस्य विस्तरेणव्याख्यानं चक्रुः शेषस्य च सूक्ष्मेण न तावता कस्यापि वैमत्यम्। यन्मतं मानवकपोल कल्पितम् तत्तदाधुनिकोत्प्रेक्षिततया हेयमेव। अथाजातवादसिद्धि प्रकारः। तथाहि उत्पत्तेः प्राग् घटः स्वोपादाने वर्त्तमानो न वेति विप्रतिपत्ता आद्यकोटिः सांख्यानां द्वितीयकोटिर्नैयायिकानाम्। तत्र प्रथम पक्षे दोषः। यदि सन्नेव घटो मृदि तदा तदुत्पत्त्यर्थं दण्डचक्रादीनां व्यापारो व्यर्थ एव।

न च आविर्भावार्थमेव तस्य साफल्यम्, यथावटधानायां सूक्ष्मरूपेण विद्यमान एव वटः क्षितिसलिलपवनादिना प्राकाश्यं नियते, रूपान्तरेणाच्छादितस्य वस्तुनः आवरणापनयद्वारा कारक व्यापारतः प्रकटकरणमेवाविर्भावः । अयमेव परिणामवाद इति वाच्यम्—दण्ड व्यापारात्प्रागाविर्भावो विद्यमानो नवेति विकल्पे विद्यमानत्वे तस्याप्याविर्भावः इत्येवं कल्पने ऽनवस्थापातात्, न वा पक्षावलम्बने असत्या अपि आविर्भावक्रियाया उत्पत्तिस्वीकारे । अन्ते रण्डा विवाहः स्यादादावेव कुतोनहीति न्यायेन असत एव घटस्योत्पत्तिस्वीकारे बाधकाभावाच्च, वटधानादृष्टान्तस्य च साध्यकोटिनिक्षिप्ततया उभयसम्मतत्वाभावेन दृष्टान्तस्यैवासं- प्रतिपन्नत्वात् ।

तथा च असन्नेव घट उत्पत्तिमान् अदृष्टत्वे सति दृष्टिगोचर- त्वात्, आविर्भाववत् सन् घटः, नोत्पद्यते सत्वात् आत्मवत् । इत्यनुमाने निर्बाधप्रसरे ।

अतएव नैयायिकाः असद्वादमेवावलम्बन्ते, किन्तु निपुणतर- विवेचने तदपि निःसारतरम् । तथाहि यदि, उत्पत्तेः प्रागसतो घटस्य कारण कलापेन सम्बन्धविरहेऽपि समुत्पत्तिः,, तदा गगनकुसुमस्यापि कथं नोत्पत्ति रिति प्रश्ने तद्व्यवस्थायै प्रागभाव एव कारणं भवति न तु तदरिक्तोऽभावः, इत्यादि नियमस्य यस्य कस्यचिद्वलम्बने प्रागभावस्या त्यन्ताभावादितः येन वैलक्षण्यं तेनैव रूपेण तत्र कार्यस्य सद्भावापत्तौ सद्वादपादावलम्बनस्यैव शरणीकर्त्तव्यत्वपातः कष्टतरं लज्जास्पदं तेषाम्, तथा च असन् घटः नोत्पद्यते, असत्वात्, शशश्रृङ्गवत्, इत्यनु- मानानुचरचपेटाबारकः कः । इत्थं तयोर्विवादं विलोक्य धीराः महान्त उभयतो विनिसृत्य स्वतः सिद्धे सदात्मनि शिवे भार मवलम्ब्य कृतार्थतां मन्वते । यदा कथं संसृतेः प्रतीतिः किञ्चास्य निदानमिति केनचित् बहुकृत्वः पृष्टस्तदा विवर्त रूपेणेयं प्रतीतिरिति–पराभिमत्यो- त्तरं ब्रूते नतु तात्पर्येण, अतः परमविरक्तोत्तमाधिकारिणां स्वदृष्ट्या अजातिवादः । उपदेशसमये विवर्त्तवाद इति स्वरसतः प्रतीयते ।

ननु वेदान्तिमतादस्य को भेदः ।अन्यथा तेनैव गतार्थतया नास्य प्रस्थानान्तरत्वम् इति चेत्—शृणु रहस्यम्, तत्र चिन्मात्रस्यैवाधिष्ठानत्व मुररीकृत्य प्रपञ्च वर्णनम्। अत्र तु कूटस्थचित् शिवः तस्य संकोच विकाशावस्था शक्तिः सा चिद्रूपा न तु जडात्मिका उभौ अधिष्ठान कोटौ समावेश्य प्रपञ्चवर्णनमिति भेदोऽनुपदं विवेचिष्यते स्वयमेव ग्रन्थकृत्पादैः, किञ्च व्यवहारदशामवलम्ब्य सृष्टिवर्णनप्रक्रियाऽपि सुसूक्ष्मतमे त्वनुपद स्फुटीभविष्यति किञ्च उपनिषदा सह समानार्थत्वे प्रामाण्य मेवास्य प्रमाणान्तरेण विरोधाभावात् । अथवा सत्यस्य शक्तिसहितस्य सदाशिवस्य **[सत्य विचारे]** विवेके सति यतः कस्याप्यन्यस्य पार्थक्येन सत्ताविरहतया **[अण्डपिण्डयोः उत्पत्तिः]** असतः सद्भावात्मकं जन्म **[नास्तिः]** किन्तु शक्तिसहितः श्रीसदाशिवः सूक्ष्मरूपेण स्वात्मनि स्थितानेव पदार्थान् परिणामरूपेण सृष्टिसमये विकाशयति, प्रलये सङ्कोचयति, अतः अवस्थाया आगमापायित्वेऽपि नासद्वादपक्षः, अतएव—

"नासतो विद्यते भावो नाभावोविद्यते सतः"

इति सद्वादपक्षस्यैवाभ्यर्हितत्वं स्वीकृतं गीतायां भगवतापि एवं च अवस्थाया आगन्तुकतया पदार्थकोटौ न गणना। अवस्थावतां सदासद्भावेन पदार्थत्वं व्यवह्रियते, अतः पदार्थो नासन् इति सिद्धान्ते न कोऽपि बाधः । यदप्यनुमानमुपन्यस्तम् असन्नेव घट उत्पत्तिमान् इत्यादि तदपि उत्पत्तेः प्राग् घटस्यैव शशशृङ्गायमानतया आश्रयासिद्धिः, पश्चाच्चोत्पन्नत्वेनोत्पत्तिसाधने सिद्धिसाधनम् । हेतु रस्तु, साध्यं मास्त्वित्यनुयोगे विपक्षबाधकतर्काभावः पटावृत घटस्यावरणापनयने व्यभिचारः। इत्यादि दोषग्राहनिकरकवलग्रस्तम् द्वितीयानुमाने उत्पत्तिपदार्थस्यैवाद्यावधि, अनिर्णीतत्त्वेन साध्या प्रसिद्धिः, तस्मात्परिणाम पक्षएवाचार्य्यसम्मतः । नच साङ्ख्येन गतार्थता, तैः शक्तेः अचिद्रूपत्वेन, आत्मनश्च शक्तिशून्यचिद्रूपा-

सङ्कृत्वेन स्वीकारे सदा शक्तिसम्बद्धचिद्रूपसदाशिवस्यावर्णनात् । एवञ्च परिणामपक्षएवाचार्य्याभिमतः, अनयोः कतरत् युक्ततर मिति स्वयमेव सुधियो विवेचयन्तु ॥ लक्ष्यसिद्धिस्तूभयोः समैव । तथापि **लोकबुद्ध्यर्थं** लोके व्यापारसाफल्यप्रदर्शनार्थं मन्द बुद्धि मनुसृत्य **वक्ष्ये सत्** इति, मूले असत इतिच्छेदः, असत् सम्प्रदायतः । असद्वादरूपेणाप्युत्पत्तिं वक्ष्ये इत्यन्वयः—मन्दानाम् ऋजुरीत्या बोधायैवाऽसद्वादपक्षो नतु स्वच्छः, वलक्षपक्षश्च सत्सम्प्रदाय एवाचार्य्यपाद स्वरस कबलीकृत इति ध्वनि रिति दिक् ॥

हिन्दी टीका

नास्तीति--

यद्यपि यथार्थ विचार करने पर ब्रह्माण्ड और अस्मदादि शरीर वर्ग की उत्पत्ति किसी भी प्रमाण से सिद्ध नहीं हो सकती, क्योंकि कूटस्थ, असंग, चित आदिनाथ की सत्ता से पृथक् जगत् की सत्ता नहीं है और इससे अजातिवाद सिद्ध होता है । तथापि लोक में व्यवहार के लिये सत्कार्यवाद की रीति से अंड और पिंड की उत्पत्ति को आगे कही प्रणाली के द्वारा कहूँगा । इससे परिणामवाद सिद्ध हुआ । अर्थात् श्लोक के पूर्वार्ध से अजातिवाद और उत्तरार्ध से परिणामवाद निकलता है । परिणामवाद का दूसरा नाम सत्कार्यवाद भी है। तथा अजातिवाद का ही रूपान्तर विवर्तवाद है । अजातिवाद शब्द का अर्थ उत्पत्ति प्रमाण सिद्ध नहीं, किन्तु माया का विलासरूप पदार्थ स्वप्न के पदार्थ की तरह झूठा है । इस प्रकार से जहां उत्पत्ति का निषेध होता है उसी को अजातिवाद कहते हैं । अंड पिण्ड की उत्पत्ति प्रमाणों के द्वारा क्यों नहीं सिद्ध होती, इसका उत्तर यह है, कि नाथ तत्त्व की सत्ता से पृथक् भूत भौतिक जगत् की सत्ता ही नहीं, जिसका प्रमाणों से निरूपण किया जाय, किन्तु अविद्या का स्वभाव है कि कुछ का कुछ दिखला देना, जैसे स्वप्न में अनेक हाथी, घोड़े, रथ

पर्वत, सागर, आकाश, पाताल, देव, मनुष्य, पशु, पक्षी इत्यादि विचित्र भूत भौतिक दृश्यमान प्रपंच केवल अविद्या के प्रभाव से दिखाई देता है, क्योंकि जिसका आदि अन्त नहीं वह वर्तमान में भी नहीं के बराबर है। स्वप्न के जगत् से व्यवहारिक जगत का फर्क केवल इतना ही है, कि स्वप्न का भ्रम नींद टूट जाने पर बाधित होजाता है, और जाग्रत् प्रपंच चिरकाल में ब्रह्मज्ञान से बाधित होता है, अर्थात् श्री आदिनाथ जी की कृपा का फल रूप जो तत्त्व ज्ञान है उसके बिना जन्म मरण रूप दारुण दुःखमय संसार का उच्छेद नहीं होता। आत्म साक्षात्कार से ही इसकी निवृति होती है। क्योंकि ज्ञान सूर्य के उदय होजाने पर अन्धकार रूप अविद्या नहीं रह सकती देखने में भी आता हैं कि जहां अविद्या का प्रभाव नहीं है वहां संसार का भी भान नहीं होता जैसे समाधि अवस्था में आत्म ज्योति के अतिरिक्त अन्य वस्तु का भान नहीं होता और तो क्या, अहंभाव भी नहीं रहता केवल कूटस्थ सच्चिदानन्द स्वयं ज्योति आत्मा का ही भान होता है। इससे साफ मालूम होता है कि जहां तक जितनी अधिक अविद्या की गति है वहां उतना ही अधिक मोह, माया, राग, द्वेष, काम, क्रोध, लोभ, अहंकार आदि का पसारा है। केवल एक अखण्ड आत्मा ही सच्चा है। यह उपर्युक्त अजातिवाद की शैली है। इसी रीति को लेकर आचार्य उत्तम अधिकारी के लिये उपदेश किया करते हैं क्योंकि इस प्रणाली से उत्तम अधिकारी को शीघ्र आत्मबोध हो जाता है। अत एव आचार्य से सुशिक्षित शिष्य आत्मा से भिन्न सबको मिथ्या जानकर सांसारिक विषयों में राग द्वेषादि न करता हुआ निरन्तर आत्म चिन्तन में लगा रहता है। इससे यह सिद्ध हुवा कि यह अजाति वाद प्राचीन सिद्धों का माना हुवा सर्वोच्च आदरणीय सिद्धान्त है। इस अजातिवाद की प्रणाली से ही मत्स्येन्द्रनाथादि सिद्धों ने असंख्य उत्तमाधिकारियों को ब्रह्मज्ञान के उपदेश द्वारा मोक्ष धाम को पहुँचा कर कृतार्थ किया। श्री मत्स्येन्द्रनाथ और जलन्धर नाथादि सिद्धों से लेकर श्री गोरक्षनाथ और दत्तात्रेय आदि सिद्धों ने इस सिद्धान्त को माना है। इसी मत का श्री व्यास जी ने पुराणों तथा वेदान्त दर्शन में

अनुवाद किया है। इसके उपरान्त सिद्ध विचारनाथ भर्तृहरि ने भी स्वनिर्मित वाक्यपदीय आदि बहुत से ग्रन्थों में अजातिवाद का जो रूपान्तर विवर्त है उसी का वर्णन किया है। नीचे देखिये—

"अनादि निधनं ब्रह्म" इत्यादि

वाक्यपदीय के मंगलाचरण श्लोक में ही विवर्त पद का प्रयोग करने से सिद्ध विचारनाथ भर्तृहरि जी का भी विवर्तवाद अत्यन्त अभिप्रेत सिद्धान्त है। इसके बाद वेदान्त भाष्य कर्ताओं ने अपने ग्रन्थों में इसी सिद्धान्त को अपनाकर समर्थन किया है। वास्तव में वस्तु का स्वरूप तो जैसा का तैसा ही रहता है, पर अविद्या के बल से वह वस्तु विपरीत आकार में दिखाई देती है जैसे रज्जु, आदि का विवर्त सर्प होता है। जहां पर रज्जु मन्द अन्धकार में पड़ी हुई है उस समय उसका ठीक ज्ञान न होकर लम्बायमान कुछ है इस प्रकार सामान्य अंश का ज्ञान और विशेष अंश का अज्ञान होने से उसी समय पूर्व दृष्ट सर्प विषयक संस्कारों का उद्बोध होता है। उस उद्बुद्ध संस्कार और अविद्या के बल से तत्काल वह रज्जु सर्प रूप दिखाई देने लगती है। इसी प्रकार यह संसार ब्रह्म का विवर्त है ब्रह्म तो अपने स्वरूप में जैसा का तैसा अखण्ड ही है परन्तु पूर्व २ देखे गये संसार विषयक संस्कार और अविद्या के बल से शुद्ध चित् कुटस्थ, असङ्ग आदि नाथ ही मिथ्या संसार रूप से लोगों को प्रतीयमान होरहे हैं। परन्तु जब तक परमनाथतत्व का ज्ञान नहीं होता तब तक रागद्वेष, शीतोष्ण और सुखदुःखादि का द्वन्द रूप संसार बना ही रहता है। केवल स्वानुभववेद्य आदिनाथ के विशेष ज्ञान से ही इस मिथ्या जगत् की निवृत्ति होती है।

उत्तमाधिकारी के लिये अजातिवाद का उपदेश देकर मध्यम अधिकारी के लिये परिणामवाद की रीति को कहते हैं। पूर्वोक्त प्रकार से यद्यपि अण्ड पिण्ड की उत्पत्ति प्रमाण सिद्ध नहीं है तथापि लोक व्यवहार के लिये सत्कार्यवाद की रीति से सब के लिये हितकारी अण्ड पिण्ड की उत्पत्ति कहता हूँ क्योंकि अण्ड पिण्ड के ज्ञान पूर्वक आत्मज्ञान सबको सुगमता से होगा।

दूसरे आकार में बदल जाने को परिणाम कहते हैं, जैसे दूध का दही परिणाम होता है। इसी प्रकार प्रकृति का परिणाम रूप यह संसार है। जैसी त्रिगुण स्वरूप जड़ माया है वैसा ही उसका कार्यभूत शीतोष्ण सुख, दुःख, इच्छा, द्वेष, काम, क्रोध, लोभ, मोहात्मक संसार है, इस संसार में शुभाशुभ कर्म रूपी पाश में बंधा हुआ यह प्राणी जन्म मरणादि दुःखों की परम्परा को पराधीन होकर सहन करता है, अतः जन्म मरणरूप अगाध संसार सागर से पार होने के लिये तत्वज्ञानी महात्मा की शरण में पहुँच कर आत्मा का विचार करे।

यद्यपि नैयायिक कार्य को उत्पत्ति से पहले असत् कहते हैं, और कारक व्यापार द्वारा उत्पत्ति के बाद सत् कहते हैं, जैसे सृष्टि से पहले महाप्रलय में ये पृथिवी आदि समस्त भूत भौतिक कार्य असत् थे। किन्तु केवल परमाणु आदि नित्य पदार्थ ही विद्यमान थे पीछे सृष्टि के आरम्भ काल में उन परमाणुओं के संयोग द्वारा द्वयणुक, त्र्यणुक इत्यादि क्रम से जब समस्त कार्य उत्पन्न हुआ तब पीछे वह सत्स्वरूप हुआ। इसी का नाम आरम्भवाद है। तथापि यह मत आचार्य को रूचिकर न होने से दूसरे श्लोक के पूर्वार्ध में इसका खंडन किया गया है। आरम्भवाद के खंडन में प्रधान युक्ति नीचे दी जाती है—

यदि कारण में अविद्यमान कार्य कारक के व्यापार से उत्तपन्न हो जाय तो शशश्रृंग आकाशपुष्प आदि भी उत्पन्न हो जायेंगे और तैल आदि कार्य की अभिव्यक्ति करने के लिये नियत रूप से उत्पत्ति से तिल आदि कारण का भी ग्रहण नहीं करना चाहिये। क्योंकि उत्पति से पहले यदि तैल असत् है तो बालु से भी कारक व्यापार द्वारा तेल की उत्पत्ती हो जानी चाहिए। और कार्य असत्स्वरूप हो तो उसका सम्बन्ध भी कारण के साथ कभी नहीं हो सकता, कारण कि दोनों सम्बन्धियों के विद्यमान होने पर ही सम्बन्ध होता है, अतः यह आरम्भवाद समस्त युक्ति और प्रमाणों से विरुद्ध है। वेद ने भी सत्कार्य वाद का ही समर्थन किया है। देखिए-

"सदेवसौम्येदमग्रआसीत्" । "तथा गीता में भी—"नासतोविद्यतेभावः" इत्यादि ।

मू०—सा पिण्डोत्पत्त्यादिः सिद्धमते सम्यक् प्रसिद्धा पिण्डोत्पत्तिः १ पिण्डविचारः २ पिण्डसंवित्तिः ३ पिण्डाधारः ४ पिण्डपदसमरसभावः ५ श्री नित्यावधूतः ६

संस्कृत टीका

[पिण्डोत्पत्त्यादिः] पिण्डोत्पत्तिः, आदिर्यस्याम् **[सा]** पद्धतिः **[सिद्धमते]** सिद्धानां ऋतम्भरप्रज्ञामधिष्ठितानाम् "मते" अनुभवे **[सम्यक्]** संशयविभ्रमानाक्रान्ततया **[प्रसिद्धा]** विषयीभूता इत्यर्थः । अयंभावः, ये हि सिद्धास्तेषां स्वानुभवगोचरीभूता एवैते पदार्थाः—अतस्तेषां सन्देहलेशोऽपि नोदेति ये च केवलतार्किकाः पदे पदे सन्दिहानास्तर्कैस्तत्त्वं विनिश्चेतुमिच्छन्ति ते भ्राम्यन्ति भ्रमन्तु नाम तेषां नात्राधिकारः, तर्कागम्य पदार्थस्यात्र वर्णनेन समान विषयत्वाभावात् । अनेन समरसकरणद्वारा परमपुरुषार्थसिद्धिःफलम्, तत्प्रेप्सुरधिकारी समरसकरणादयो विषयाः प्रतिपाद्यप्रतिपादकाभावः सम्बन्ध इति प्रेक्षावत्प्रवृत्त्युपयोग्यनुबन्धचतुष्टयंप्रदर्शितम् समरस पदार्थ स्त्वग्रे वक्ष्यते । अनुबन्धत्वञ्च प्रवृत्तिजनक ज्ञानत्वम् । प्रवृत्तिजनकज्ञानन्तु, अयं मां प्रेरयतीति ज्ञानानन्तर प्रवृतिदर्शनात्, भावनाज्ञानमेवेति भाट्टाः, इदं मम कार्यमिति ज्ञानादेव प्रवृत्तिर्लोकानामतः कार्यत्वज्ञानमेवेति प्राभाकाराः, इदं मत्कृतिसाध्यं मदिष्टसाधनं बलवदनर्था जनकञ्चेति ज्ञानत्रयादेव प्रवृत्तिर्नत्वेकैकज्ञानात् तथाहि प्रथमज्ञानमात्रात् जलताडने द्वितीयज्ञानमात्रात् चन्द्रानयने तृतीयास्वीकारे मधु, विष सम्पृक्तान्न भोजने प्रवृत्तिरापद्येत, अतोज्ञान-त्रयमेवेति नैयायिकाः इष्टसाधनत्वज्ञानमेवेति शाब्दिकोदयनाचार्य्य-वेदान्तिनः, इत्येवमस्तु परस्परं स्वरूपवर्णने वैमत्यं किन्तूक्त ज्ञानविषयता

अधिकारि विषयप्रयोजनसम्बन्धेषु सकलैः सम्मता इति। चतुर्ष्वपि अनुबन्धत्वं निर्विवादमिति दिक् । प्रस्थानेऽस्मिन् षडुपदेशाः सन्ति तत्र प्रत्येकं वर्णनीयविषयानां प्रथमतः समासेन नामानि निर्दिशति पिण्डोत्पत्यादिरिति संक्षेपविस्तराभ्यां हि व्याख्यानं झटिति श्रोतुश्चित्ते समाविशति स्पष्टत्वात् प्रतिपद वर्णनं नापेक्ष्यते पिण्डपदेन शरीरेन्द्रियादीनां ग्रहणंज्ञेयम्

अथ हिन्दी टीका

इस ग्रन्थ में निम्न लिखित छः उपदेश हैं, और यह ग्रन्थ सिद्धों के मत में अत्यन्त आदरणीय है, अतः इसको प्रकाशित करता हूं।

१ विशेष रूप से पिण्ड की उत्पत्ति तथा गौण रूप से अन्य विषय का भी निरूपण करने वाले प्रकरण को इस पद्धति का प्रथम उपदेश कहते हैं।

२ पिंड के विचार को अच्छी प्रकार बताने वाला इस पद्धति का द्वितीय उपदेश है।

३ विशेष रूप से पिण्ड के ज्ञान का निरूपण करने वाला इस पद्धति का तृतीय उपदेश है।

४ शरीरस्थ चक्र तथा आधारादि का प्रधान रूप से वर्णन करने वाला भाग इस ग्रन्थ का चौथा उपदेश है।

५ पिण्डपद की सिद्धि के लिये समरस भाव को कहने वाला इसका पंचम उपदेश है। पिण्डपद समरस भाव का अर्थ पंचम उपदेश में स्वयं योगाचार्य श्री गोरक्षनाथ जी मूल ग्रन्थ में समझायेंगे।

६ कार्यसिद्ध और परम पूज्य अवधूत योगियों के लक्षण का वर्णन करने वाला इसका छठा उपदेश है।

ग्रन्थ के पढ़ने में लोगों की प्रवृत्ति तब होती है जब उसका विषय तथा प्रयोजन का ज्ञान होजाय, अतः इस ग्रन्थ में प्रवृत्ति के लिये

शक्ति सहित आदिनाथ रूप विषय और उसके ज्ञान द्वारा धर्म, अर्थ, काम, मोक्ष इन चारों पदार्थों की प्राप्तिरूप प्रयोजन आचार्य ने दिखाया है।

मू०—यदा नास्ति स्वयंकर्ता कारणं न कुलाकुलम्।
अव्यक्तञ्च परं ब्रह्म अनामा विद्यते तदा ॥४॥

संस्कृत टीका

[यदा] दृश्यमानसृष्ट्युत्पत्तेःपूर्वसृष्टेरासन्नसमये आसन्नत्व-बोधनायैव अस्तीत्यत्र वर्तमानसामीप्ये लट् **[स्वयं]** ब्रह्म **[कर्ता नास्ति]** कर्तृत्वरहितः आसीत् यद्यपि तस्यासंगतया-कर्तृत्वराहित्यम्-सदैव तथापि सृष्टि समये कृत्या आध्यासिक सम्बन्ध सद्भावः, इतरथा तत्कर्तृत्वमेव न संघटेत किन्तु तस्यापि तत्समये अभाव इति ध्वनितम् **[न कुला कुलम्]** कुलेन भूतभौतिक सृष्टिसमूहेन आकुलं, व्याप्तम् कारणम् उपादान सामग्री सहितं नासीत् भूतभौतिक कार्यं तदुपादानं प्रबुद्धशक्तिरूपं च नासीत् इति ध्वन्यते प्रलीनं सूक्ष्मतया आसीत् इतितु न विस्मर्त्तव्यं सद्वादिभिः। अथवा कुलाकुलमिति स्वतन्त्रम् विशेषणम् ब्रह्मणि। तथा च कुलं सर्वेषां कारणस्वरूपयोग्यम् "अकुलम्" कुलं कारणं न विद्यते यस्येति बहुव्रीहिः स्वस्य कारणं नान्यत् इति यावत् मूलतत्त्वमिदमितिध्वनितम् अथवा कुलं शाक्तक्रमः, अकुलं योगक्रमश्च नासीदित्यर्थस्तान्त्रिकः **[अव्यक्तम्]** रूपरहितम् **[अनाम]** नाम रहितं तदा द्वैताभावे व्यवहाराभावात् ब्रह्मसंज्ञाऽपि नासीत् **[परम्]** अपरिच्छिन्नम् सजातीयविजातीयस्वगतभेदत्रय-शून्यम् अतएव **[ब्रह्म]** व्यापकम् **[आविद्यते]** स्वप्रकाशरूपः भाव-पदार्थः कश्चित् आसीत् नतु शून्यरूप इति शून्यवादबौद्धमतं

निरसितम् वेदेऽपि सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्-इत्युपवर्णितम्। असदेवसोम्येदमिति पूर्वपक्षमुपदर्श्य कथमसतः संजायेतेत्यादिना ज्ञिप्यान्ते सदेव सौम्य इत्येव निर्द्धारितम्-अयं भावः अभावात् भावोत्पत्तिस्वीकारे शशशृङ्गादपि शस्य मुत्पद्येत तथा च सर्वत्रैव-कार्यकारणभावव्यवस्थोच्छेदे कार्य्यार्थिनां कारण विशेषोपादान नियमस्याना श्वास एव स्यात् इत्यादि युक्त्या शून्यवाद बौद्धमतखण्डन प्रकारो ब्रह्ममीमांसादौ विस्तरेण प्रपञ्चितः विस्तारभयान्नेह वितन्यते विशेष जिज्ञासुभिस्तत एवावगन्तव्यम् अतः भावादेवभाव इतिवादएव गरीयानिति। इदमत्र निर्गलितम् तदा सर्वेषां सूक्ष्मरूपेणावस्थानेऽपि ब्रह्मणः स्वानुभवात् पार्थक्येनानुभवविषयत्वाभावात किञ्चिदपि नासीत् ब्रह्मतुस्वसाक्षिकतया आसीत् यथा समाधिमाधाय स्थितः कश्चित् द्वैतजातमपश्यन्नपि स्वसाक्षितया स्वात्मानं न निषेधति नाहमिति अहमाकारवृत्ति विरहतयाहमस्मीति बोधविरहेऽपि स्वरूपमनुभूयत एव। अतएव उत्थानसमये संजाताहंकारविशेषणेन विशिष्य तमेव स्मरति अहमासमिति। यदि स्वरूपानुभवो नासीत् तदा नाहमासम् इत्यपि स्मर्त्तव्यम् न च कदापि तथा स्मरति तस्मात् सिद्धं सर्वेषाम भावेऽपि स्वस्वरूपानुभवो न जातु व्यभिचरतीति दिक्।

हिन्दी टीका

सृष्टि की उत्पत्ति से पहले आदिनाथ कर्तृत्व धर्म सहित नहीं था, क्योंकि जब कर्म की ही सत्ता नहीं तो कर्ता किसका कहलावे। इसी लिये उस महाप्रलय में वह किसी का कारण भी नहीं होसकता, क्योंकि किसी कार्य के प्रति ही कारण में कारणता आती है, जब उस अव्यक्त अवस्था में कोई कार्य ही नहीं था, तो उस समय किसी का कारण भी कैसे कहला सकता है। तथा उस महाप्रलय में कुल और अकुल का व्यवहार भी नहीं था। यहां कुल पद से शक्तिक्रम और अकुल से योगक्रम जानना, कुल अर्थात् सृष्टी अवस्था विशिष्ट चेतन की उपासना. इसी का तान्त्रिक नाम 'श्रीकुल' है।

तथा प्रलयावस्थाविशिष्ट चेतन की उपासना भी कुल कहलाती है, इसका तान्त्रिक संकेत 'कालीकुल' है । इन दोनों श्रीकुल और कालीकुल का व्यवहार कुलपद से होता है। इन दोनों में जब किसी एक की सिद्धि होजाती है तब वह अधिकारी 'अकुल' पद को प्राप्त होता है, उसीका 'पूर्णाभिषेकी' ऐसा तांत्रिक नाम है, अर्थात् कुलावस्था में निष्काम कर्म में निष्ठा रहती है, और अकुलावस्था में परिपक्व योग में निष्ठा होजाती है । अतः निष्काम कर्म निष्ठा का नाम 'शक्तिक्रम' जानना, उसी का दूसरा नाम कुल है और परिपक्व योग निष्ठा का नाम 'योगक्रम' है। उसी का दूसरा नाम 'अकुल' भी है। कुल पद बोधित शक्तिक्रम में पूज्य पूजक भाव रहता है, और अकुल पद वाच्य योग क्रम में योज्य योजक भाव रहता है, जब उस महा प्रलय में कुल और अकुल इन दोनों का भी विलय होजाता है तब उस अखण्ड कूटस्थ असङ्ग चित्स्वरूप श्री आदिनाथ में कुलाकुल का व्यवहार भी नही रहता । अथवा शुद्ध अखंड ब्रह्म में कुल (व्यक्तावस्था) और अकुल (अव्यक्तावस्था) इन दोनों का भी महाप्रलय में अभाव रहता है। अतः उस समय वह परमेश्वर कुलाकुल भाव से भी रहित है।

और उस समय परब्रह्म में कारणता भीनहीं थी। कुलाकुल शब्द के प्रथम अर्थ के पक्ष में 'अव्यक्त' इस मूल पद से ब्रह्म में कारणता का निषेध जानना और तृतीय पक्ष में अव्यक्त यह पद ब्रह्म का विशेषण जानना।

शंका—इससे तब तो बौद्ध मत से अभिमत शून्यता का ही परिचय हुआ ।

उत्तर—अव्यक्त उस समय नाम रूप से रहित तथा सजातीय विजातीय स्वगत तीन भेदों से शून्य केवल एक परब्रह्म था । उससे अतिरिक्त कुछ नहीं था। ऐसा सिद्ध योगिराजों का सिद्धान्त है ।

इसी भाव को स्पष्ट करते हुये पूज्यपाद योगाचार्य्य श्रीमत्स्येन्द्रनाथ जी ने वर्णन किया है कि—

न ब्रह्मा विष्णु रुद्रौ न सुरपतिसुरा नै व पृथ्वी न चापो ।
नैवाग्निर्नापि वायु र्न च गगन तलं नो दिशो नैव कालः ॥
नो वेदा नैव यज्ञा नच रवि शशिनौ नो विधि र्नैव कल्पाः ।
स्व ज्योतिः सत्यमेकं जयति तव पदं सच्चिदानन्द मूर्ते ॥

–अनामेति स्वयमनादिसिद्धम् एकमेवानादि निधनं सिद्धसिद्धान्तप्रसिद्धं तस्येच्छामात्र धर्मा धर्मिणी निजा शक्तिः प्रसिद्धा ॥५॥

संस्कृत टीका

अनामेतिः–

अस्मिन् ग्रन्थे गद्यप्रधानात्मकता क्वचिच्च पद्येनापि वर्णनं पद्यते इयं शैली वेदस्य ब्राह्मणभागेऽपि प्राप्यते । इमामेव शैलीं मनुसृत्य वाचस्पति प्रभृतयोऽपि गद्येन व्याख्याने प्रस्तुते क्वचिदादौ क्वचिदन्ते श्लोकरूपेणोपब्रबन्धुरिति प्राचीन ग्रन्थावलोकनतत्पराणां ना विदितम् । गद्येन व्याख्यानं प्रस्तुवन् तमेव कूटस्थं स्मारयति **[अनामेत्यादि]** अतः पुनरुक्तदोषोद्भावकमुखं शैल्दनवबोध पङ्क कलङ्केन मलिनीकृतम् ॥

[स्वयमनादि सिद्धम्] स्वस्य कारणं नान्यदित्यर्थः **[एकम्]** सजातीय द्वितीयरहितम् **[एवेत्यनेन विजातीय भेद शून्यम्** **[अनादि निधनम्]** प्रागभावध्वंसाभावाप्रतियोगि । अन्योन्याभाव निषेधेनात्यन्ताभावोऽपि निरस्तः । तथा च निखिलाभावप्रतियोगितान-वच्छेदकभावत्वविशिष्टः शिव एव कूटस्थः सर्वेषां मूलकारणम् **[सिद्धसिद्धान्त प्रसिद्धम्]** सिद्धसम्मतम् ॥ ननु भावत्व धर्मं शक्ति चादाय भेद इति चेन्न धर्मधर्मिणोः शक्तिशक्तिमतोश्च

तादात्म्यमिति सिद्धान्तेनादोषात् तस्य संकोचविकाशावस्था शक्तिः सापि चिद्रूपा शिवेन सह नित्य संसृष्टा नतु सांख्यमतवत् जडा वा वेदान्तिमतवद् अनिर्वचनीया विनाशशीला अत एव स्वयमेवाग्रे वक्ष्यते[**अन्तरं नैव जानीयात् चन्द्र चन्द्रिकयोरिव शैवागमे प्युक्तम्[न शिवेन विना शक्ति र्न शक्ति रहितः शिवः]** इति अस्याः सृष्टिसम्पादने या या ऽवस्थोपजायते तस्याः प्रत्येकं पृथङ् नामनिर्देशेन पञ्चविधत्व मुपपादयति निजेत्यादि । अत्र सर्वत्रैव पञ्चप्रकारतयैवोपवर्णने किं प्रयोजन मिति ब्रुवन्तं प्रतिब्रुवीत । पञ्चभूतात्मिकैव सृष्टि रितिसकलै रेव दार्शनिकैरङ्गी कृतम् तान् प्रत्यपि प्रष्टव्यं यत् कुत एतत् भूत द्वयात्मकमेव कथं नेति । यदि चते समादधते ।

सृष्टौ पञ्चानामपि स्वरूपाणि फलानि च पृथक् पृथगुपलभ्य समेषां सद्भावो ऽकामेनापि बलादङ्गीकरणीय इति तदा तैरेव भवत् प्रश्नस्याप्युत्तरं प्रत्तम् । किन्तु स्थूलदर्शित्वान्नावधारयसि । किञ्च तैरपि भवत्स्थुलदृष्टिमनुसरद्भिरपलप्य सत् सम्प्रदायपद्धतिं यथेच्छं प्रातिकूल्येनोपवर्णिताः पदार्थाः स्व स्व दर्शने । अतोऽद्धा विप्रलब्धोऽसि तैर्यत एवं भाषसे, सूक्ष्मदृष्ट्या तु सर्वत्रैव पञ्चविधत्वम् ऋते कूटस्थात् । अतस्तामेव वास्तविकीं स्थितिमादाय निरूप्यते पञ्चविधत्वम् । न तु श्रोतृबुद्धिप्ररोचनाय स्वेच्छया व्युत्क्रम्य कृता व्याख्या । किञ्च कार्ये पञ्चविधत्वं दृष्ट्वा कारणेऽपि तदनुमातव्यमिति सरलसरणिः । विमतं कारणं पञ्चविधम्, पञ्चविधकार्योपादानत्वात् । यन्नैवं तन्नैव घटवदिति सामान्यतो व्याप्तिग्रहः । अनन्तरं पक्षधर्मताविशेषबलाद् विशेषसाध्यसिद्धिः ।

ननु वेदे न क्वापीत्थमभिहितमिति चेत् शृणु । पाङ्क्तं वा इदं सर्वम् । पाङ्क्तेनैव पांक्तं स्पृणोति इति तै०७ अनुवाके तस्यार्थः सर्वो हि संसारः पंचावयवात्मको ऽतः "पंचपदा पङ्क्तिः

इति पङ्क्तिश्छन्दसः लक्षणानुसारेण पञ्चावयवात्मकं पङ्क्तिच्छन्दोदृष्ट्या उपास्यः, तदुपासनेन पंचावयवात्मकं प्रजापतिं

प्राप्नोतीत्यर्थः । अनेन स्पष्टमेवोक्तम् यत् कार्यरूपसंसारस्य कारण-रूपप्रजापतेश्च पञ्चावयवात्मकत्वमस्तीति—

भगवद्व्यासपादेनापि गरुड़पुराणे पंच पंच प्रकारेणैव संसृति स्वरूपवर्णनंकृतम् इत्यलम् प्रसंगागतेन प्रकृतमनुसरामः **[तस्य]** पूर्वोक्त लक्षणलक्षितस्य महेश्वरस्य या नित्यसंसृष्टा अनपायिनी चिदात्मिका शक्तिः, निखिलप्राणिनां सुखदुःखान्यतरात्मक भोगप्रद यावत्कर्मोपरमे सति महाप्रलये प्रसुप्ता सती पृथग् व्यवहाराभावभाजिनी एकत्वमापन्नासीत सैवेदानीम् प्राणिनां भोगप्रदकर्मवशात् सृष्ट्युत्पादनाय इच्छाधर्मविशिष्टा संजाता तदा निजा शक्तिरियमिति व्यवह्रितिमापद्यते अनयैव भक्तोद्धारकत्वं शिवस्य अन्यथा असंगत्वात् अद्वितीयत्वाच्च तन्नोपपद्येत अस्या एव अनुग्रह शक्ति शब्देनापि कथ्यते निगमे यया भक्तान् मोचयति निगडबन्धनात् । श्रीमदादिनाथेच्छां बिना जीवस्य स्वप्रयत्न मात्रेण मोक्षलाभम्

प्रत्याशा सिकताभ्यस्तैलनिष्पीड़नाशयैव समा वन्ध्यातः सुतो-त्पत्ति प्रयासवच्चेतिशैवराद्धान्त रहस्यम् -ऋते शिवादियं नान्यत्र कुत्रापि जीवे गच्छति किन्तु सर्वदा तदनुगामिनी सत्येव तिष्ठति अतोस्या निजेति नाम नानर्थकम् । महा प्रलय समये ऽस्मिन् निखिलसंसार संसारिणां सूक्ष्मरूपतां सम्पाद्य स्वकुक्षौ समाविश्य चिद्रूपा महाशक्ति रन्तर्मुखासती शिवेनाभेदमनुभवन्ती सृष्टिमकुर्वाणा शिवाश्रिता तिष्ठति इयमेव श्मशानवासिनी महाकाली महाबिन्दुश्च व्यवह्रियते-तदधिष्ठानम् आदिनाथः श्मशानवासी महाकालशब्देन बोध्यते अयमेव अर्द्धाङ्गीगौरीश्वरः अयं हि त्रैकालिकबाधविधुरतया पारमार्थिकः शक्तिमिमामादाय नाद्वैतभंगः किञ्चास्या अविनाशित्वेऽपि न मोक्षा-नुपपत्तिः न वा केनापि दर्शनान्तरेण विरोध इत्यादि विस्तरेणाग्रे विवेचिष्यते प्रविपदार्थस्तु, इच्छैवेति, इच्छामात्रम् मयूरव्यंसकादित्वात् मात्र शब्देन नित्य समासः स धर्मो यस्या इति बहुव्रीहिसमासे टापि **[इच्छामात्रधर्मा]** ननु धर्मादनिच् केवलादित्यनिच् कथं नेति चेन्न समासान्त विधिरनित्य इति परिभाषाबलात् अथवा इच्छा मात्र

श्चासौधर्म इतिकर्मधारये ततो मत्वर्थीयेऽचि साधु, अतएवधर्मिणीति भूमि निन्दा प्रशंसासु नित्ययोगेति शायने "इति प्राचीनोक्ति बलेन प्रशस्तो धर्मोऽस्याः सा, प्राशस्त्यमस्या विषयबाध वैयूर्थ्यं या तु लौकिकीच्छा सा कदाचित् काचित् विफलापि भवति इय तु न जातु वैफल्यमनुभवति । इच्छा धर्मे, एतद् वैलक्षण्यबोधनान्न पुनरुक्ति दोषः ।

हिंदी टीका

उपरोक्त पद्य में कहे हुये अनाम पद का स्वयं श्री नाथ जी गद्य के द्वारा व्याख्यान करते हैं—यदि वास्तव में बिचार किया जाय तो वह परमेश्वर नाम रूप से भी रहित है और वह स्वय ज्योति अनादि सिद्ध है। उसका न कोई पिता न माता न बन्धु न पुत्र कलत्रादि और न कोई उसका कारण है वह केवल एक ही है। भाव यह है कि सजातीय विजातीय तथा स्वगत इस रीति से तीन प्रकार का भेद लोक में ही देखने में आता है जैसे आम आदि वृक्ष का जामुन-नीम, आदि अन्य वृक्षों से जो भेद है वह सजायीय भेद कहलाता है। यद्यपि यहां वृक्षत्व रूप जातिकृत भेद नहीं तथापि आमत्व आदि अवान्तर जातिकृतभेद अवश्य है। और वृक्ष में विजातीय भेद पत्थर आदि से तथा स्वगत भेद शाखा पत्र आदि से जानना । इस प्रकार उस पर ब्रह्म में तीनो ही प्रकार का भेद नहीं है, क्योंकि वह एक है, इसी लिये उसका सजातीय दूसरा नहीं है।

तथा एव शब्द का प्रयोग करने से सिद्धहुआ कि वह ब्रह्म स्वगत भेद से भी रहित है। और स्वयं आदि पदों से यह भाव निकलता है कि उस ब्रह्म का विजातीय भी कोई नहीं है इतना । ही नहीं अपितु वह ब्रह्म उत्पत्ति और मरण से रहित है अर्थात् न उसकी स्वतः उत्पत्ति होती है और न उसकी मृत्यु होती है। वस्तुतः वह परमेश्वर ही अपनी चिद्रूप शक्तिद्वारा सबकी उत्पत्ति और संहार करता है। यह परम रहस्य सिद्धों के सिद्धान्त में प्रसिद्ध है। ५

सकल लोक के कल्याणार्थ इच्छा मात्र धर्म को धारण करने वाली और जीवों के सुख दुःख आदि भोगों के निमित सृष्टि और प्रलय में संकोच विकाश धर्म वाली उस श्री आदिनाथ की चिद्रूप से प्रसिद्ध निजा नाम की शक्ति थी। सृष्टि के आरम्भ काल में जाग्रत हुई। इसी निजा शक्ति का धर्म इच्छा है उसी को परमेश्वर का सत्य संकल्प जानना। इसी के बल से परमेश्वर क्षणमात्र में असम्भव वस्तु का भी निर्माण करसकता हैं। अतएव इसी का दूसरा नाम निग्रहानुग्रह शक्ति भी है। क्योंकि प्राणियों के कर्मानुसार भोग देना निग्रह शक्ति का कार्य है और मोक्ष देना अनुग्रह शक्ति का काम है। यह शक्ति महेश्वर को छोड़कर अन्यत्र नहीं रहती इस लिये इसका निजा नाम सार्थक है। ॥५॥

मू० तस्योन्मुखत्वमात्रेण पराशक्तिरुत्थिता ॥६॥

सं० टी०—तस्येति तस्य, निजशक्तिसम्पन्नस्य आदिनाथस्य (उन्मुखत्वमात्रेण) उत्साहगुणेन (पराशक्तिरुत्थिता) सब जननी समुद्गता इत्यर्थः भावः। तस्या एवशक्तेः यदा सृष्टिरचनायै किञ्चिदुच्छून्नता जाता सैवोत्साहः शिवस्य यथा ऽस्माकं कार्यारम्भे मानसोल्लासे समुत्साह इति निगद्यते तथैव शिवस्य शक्तिरेव मनः तस्या उद्रेक एव तस्योत्साहः उन्मूखत्वा पर पर्यायो निरुच्यते ऽतः तदवस्थाविशिष्टा सैव शक्तिः पराशक्तिः प्रबुद्धेति व्यवह्रियते अत्रोत्थिता शब्देन ध्वन्यते यत्पूर्वमपि इयमासीदेव नतुनवीनेय जाता एतावानेव विशेषः, यत् पूर्वविरलावस्था सुप्ता सीत् साम्प्रतं घनीभूततया प्रबुद्धेति ॥ अनयैव सृष्टि कर्तृत्वम् इयमेव निग्रहशक्तिशब्देन क्वचित् प्रदर्श्यते यदि शक्तावुच्छून्नत्वस्वभावो न विद्येत तदा निष्प्रपञ्चा संगस्यास्य कथं प्रपञ्च वर्धकता घटेत। इयमपि शिवं विहाय नान्यत्र गच्छति। अतएव परा इति सार्थिका संज्ञा। क्वचिदुभयोः इच्छा शक्तित्व मेकीकृत्य एकनैवेच्छाशक्ति शब्देन प्रतिपादनम् तस्या एवोपासनाकाले ध्यानाय स्त्रीरूपेण गौरीति नाम्ना निर्देशः तथा चोक्तम् स्वेनैव गोरक्षसंहितायाम्। इच्छा क्रिया तथाज्ञानं गौरी ब्राह्मी तु

वैष्णवी, त्रिधाशक्ति स्थिता यत्र तत्परं ज्योतिरोमिति, अनेन स्पष्टमेवोक्तम् एकैव मूलशक्तिः । तत्सहित आदिनाथश्चैक एव शक्त्यवस्थाभेद प्रयुक्त तत्तदवस्था विशिष्टः सन् गौरीपतिः सरस्वतीशः लक्ष्मीरमणश्च निगद्यते नास्ति तेषु भेदलेशः किन्तु पासनायां भेदमाधाय चिन्तने अवस्थासु पूर्वस्या अभ्यर्हितत्वेन मर्यादयो गौरीरमण एव वरीयानिति समस्तशैवाननसम्मुल्लासावसरः । नाथानुयायिनान्तु कथैव का स्वादिनाथं कूटस्थमुपसृण्वताम् । तथा च शैवागमे क्वचित् समासेन इच्छा क्रिया ज्ञानात्मकशक्तित्रय वर्णनम् क्वचिच्च व्यासेन पञ्चभेदनिर्वचनम् अतो न परस्पर विरोधस्तयोः, उपसंहार न्यायात् ॥२॥

भा० टी०-पूर्वोक्त निजा नाम की शक्ति सहित श्री आदिनाथ जी के उत्साह मात्र से ज्ञान प्रधान जगत् जननी सर्वोत्कृष्ट परा नाम की शक्ति जाग्रत् हुई । तात्पर्य यह है कि जैसे हम लोगों का जब कोई कार्य आरम्भ होता है उस समय कार्य सम्पादन के लिये मैं इसे करूं इस रीति से जो मन में उल्लास होता है उसी का नाम उत्साह है । पराशक्ति का मुख्य धर्म ज्ञान है अतः इसका ज्ञानशक्ति भी दूसरा नाम है । इसी ज्ञान प्रधान पराशक्ति के प्रभाव से महेश्वर को परमाणु से लेकर सूक्ष्म से सूक्ष्म सकल पदार्थों के स्वरूप का हस्तामलक की तरह प्रत्यक्ष ज्ञान होता है । यहां उत्थित अर्थात् जाग्रत आदि शब्दों से सर्वत्र यह भाव निकलता है कि शक्ति स्वकार्यारम्भ से प्रथम निज कारण में सोई हुई थी और वही शक्ति सृष्टि के आरम्भ में सकल प्राणियों के कर्म से प्रेरित होकर जाग्रत् होती है अन्तर केवल इतना है कि महाप्रलय में वह शक्ति अतिसूक्ष्म रूप से रहती है और जब प्राणियों के कर्मानुसार सृष्टि का समय आता है तब उस शक्ति के जाग्रत होने से प्रबुद्धावस्था अर्थात् स्थूलावस्था होजाती है । यहां पर शक्ति को ही महेश्वर का मनः स्थानीय साधन जानना और उस शक्ति का बढ़ना ही उन्मुखत्व का पर्याय शब्द है और पूर्व अवस्था विशिष्ट परमेश्वर की ही वह

'परा शक्ति' कहलाती है। यह पराशक्ति भी परमेश्वर को छोड़कर अन्यत्र नहींजाती।

मू०—तस्य स्पन्दन मात्रेण अपराशक्ति रुत्थिता ॥७॥

सं० टी०[तस्य] पूर्वावस्थस्य**[स्पन्दनमात्रेण]** अत्र प्रकृत्यादिभ्य इत्यनेन अभेदे तृतीया तथा च केवल स्पन्दनरूपा क्रिया रूपेति यावत् **[अपरा शक्तिः उत्थिता]** पूर्व वदर्थः इयं हि पृथगपि भवति अतएवास्या नामापरा। एतद्विशिष्टः सृष्टिसमये ब्रह्मेति व्यवह्रियते-अनयैव तस्य सृष्टि कर्तृत्वम् इदमत्रावधेम् उत्तरस्याविर्भावे पूर्वस्य विनाशो जात इति न भ्रमितव्यम् पूर्वस्य तदवस्थस्य यथावद् विद्यमानत्व एव उत्तरावस्थाऽपरो विशेषः सञ्जातः। अन्यथा एकस्यै व स्वरूपस्य सद्भावे सृष्टिरेव न सम्भवेत् तथा च सर्वतः प्रथमं अनयैवादिनाथस्य अनन्तब्रह्माण्डकर्तृत्वम् पश्चात् प्रत्येक ब्रह्माण्डे एकैकं ब्राह्मणं विरचय्य तस्मै तस्मै इमां शक्तिं प्रदाय स्वयं स्वस्थाभविष्यन्ति ततः प्रभृति ते एव ब्रह्माणः प्रत्येक ब्रह्माण्डे सृष्टिं रचयिष्यति। अतएवोक्तम् इयमन्यत्रापि गच्छति। ७

भा० टी० आदिनाथ से अधिष्ठित जो परा शक्ति है उसके कुछ चलने मात्र से उसमें सोई हुई 'अपरा' नाम की शक्ति जाग्रत हुई, यह शक्ति क्रिया प्रधान है, और महेश्वर से अलग भी हो सकती है। इसी कारण इसका नाम अपरा शक्ति है। इस शक्ति विशिष्ट को हिरण्यगर्भ, ब्रह्म इत्यादि नामों से कहते हैं। इसी शक्ति के द्वारा परमेश्वर जगत् की रचना करने में समर्थ होता है। यहां पिछली शक्ति के जाग्रत होने पर पूर्व शक्ति का नाश नहीं होता। किन्तु पूर्व २ अवस्था विशिष्ट आदि नाथ के रहते हुए ही उत्तर २ शक्ति का प्रादुर्भाव होता है। क्योंकि एक अवस्था विशिष्ट होने से तो सृष्टि का होना ही असम्भव है। इससे यह सिद्ध हुआ कि वह परमेश्वर समस्त सूक्ष्म सृष्टि के कार्य को समाप्त करके बाद में इसी क्रिया प्रधान शक्ति के द्वारा

अनन्त ब्रह्माण्ड और असंख्य ब्रह्माओं की रचना करता है। तथा प्रत्येक ब्रह्माण्ड में एक २ ब्रह्मा को अध्यक्ष रूप से नियुक्त करता है। और उन सब ब्रह्माओं को भी इस क्रिया प्रधान शक्ति से सम्पन्न बनाकर अपने अपने ब्रह्माण्ड में स्थूल सृष्टि का कार्यभार देकर स्वयं स्वस्थ होजाता है। बाद में ये सब ब्रह्मा अपने २ ब्रह्माण्ड में स्थूल जगत् की रचना के धन्धे में लग जाते हैं। ७

मू०—ततोऽहंतार्थ मात्रेण सूक्ष्मशक्तिरुत्पन्ना ८

सं० टी०—तत इति [ततः] पूर्वावस्थोदयानन्तरम। अहन्तार्थ मात्रेण सूक्ष्मशक्तिरुत्पन्ना। अभेदे एव तृतीया तथा च अहंता, अहं भावश्चासौ अर्थः, प्रयोजनं तद्रूपा कर्मधारयेण अहंभवरूपैव न तु तज् जनिका इत्यर्थः फलितः। अथवा बहुव्रीहिः तदा अहमाकार साधनीभूता विमर्शापरपर्य्यायाशक्ति रुत्पन्ना प्रबुद्धा इति सिद्धान्ताभिमन्तॄणां दृष्ट्या, उत्पत्ति पदमभिहितम् इति तु वक्ष्येऽसत्संप्रदायेऽत्रैवोक्तं मया मात्रपदेन तदानीम् अयमिति प्रथमपुरुषव्यवहार कारणस्येदमाकारस्य वृत्तिविशेषस्य। त्वमिति मध्यमपुरुषव्यवहृते निदानस्य त्वमाकारस्य च व्यावृत्तिः प्रतिपाद्यते अर्थात् निखिल संसार द्वैतजातस्य तदानीं तद्गर्भप्रविष्टतया पार्थक्येनाननुभूयमानतया भेदकाभावात् अहमित्याकारक एव विमर्शशक्ते वृत्तिविशेषः प्रादुरासीत् स एव सूक्ष्माशक्तिः सर्वसृष्टिसामग्री अत्रैव सूक्ष्मतया निहिता। अनन्तरं प्राणिभोगप्रदकर्मसंक्षोभवशेन बहिर्निः सरिष्यति विरंचि प्रपञ्चो यथा प्रावृषि मृद्भावापन्नाः भेकाः मृदः निःसृत्य भकभकायन्ते। इयमेव शुद्धा विद्या ज्ञानशक्तिरिति च निगद्यते अनयैव पालकत्वम॥ इयमपि अन्यत्र गच्छतीति पूर्ववज्ज्ञेयम। अयमत्र विशेषो यत्, एतच्छक्तिसमन्वितो विष्णु र्विराट् इति निगद्यते इदमेवं स्वरूपं सच्चिदानन्दकन्दो भगवान् श्रीकृष्णचन्द्रः स्वभक्तमर्जुनं प्रदर्शयांचकार यत्प्रतिपादितम् श्रीव्यास पादेन भगवद्गीतायाम। वेदेऽपि तदैक्षत बहुस्याम प्रजायेय, सोऽकामयत बहुस्याम् प्रजायेय, इत्यादा अहमाकारेणैवाभिलापः।

ननु इयं शुद्धा विद्या इत्यत्र किं मूलमिति चेत् शृणु। अहम् ब्रह्मास्मीत्यादि महावाक्यजज्ञानस्यैव विद्यात्वं सर्वत्र प्रतिपादितम् उपपद्यते चापीदमेव यथा परमेश्वरस्य अहमाकारेणैवनिखिलसंसारस्य भाने न भेदप्रयुक्तदोषादिमालिन्य प्रसङ्गः तथैव तं विना भेदप्रयुक्तदोष-मालिन्यनिरासस्य न कोऽप्यन्यः प्रतिकारो भवितुमर्हः। भेदभाने अशुद्धत्वम् तस्मिंश्च सति कथमन्यत्र शक्यम् शुद्धविद्यात्वं वक्तु मतः सैव शुद्ध विद्या।

अतएव विद्यया मोक्षप्रेप्सवः तदधिष्ठातारं ब्रह्मविष्णुरुद्र समष्टीभूतमादिनाथं महाकालं महाकालीरूपनिजशक्ति सहितम् वा महाकाल सहित महाकालीं समुपासते वस्तुतस्तु एतासां शक्तीनाम विनाभावतया सर्वत्र सर्वासां सद्भावः, ताभिः रुद्रो ब्रह्माविष्णुर्वा सर्वं कर्तुमकर्तुमन्यथाकर्त्तुं समर्थः। भेद व्यवहारस्तु तत्तद्गुण बाहुल्याभिप्रायेण वस्तुतस्तु एक एव तत्तत्कार्यावसरे तत्तत्स्वरूपं प्राधान्यं तत्तत्संज्ञया प्रख्यायते, इत्थमभेदभावनयैव स्वीयध्येयस्वरूपो पासनेन निजध्येयरूपं, साक्षात्कृत्य अन्यदपि रूपं साक्षात्करोत्येव तेनैव बलेनेति निः कण्टकः पन्थाः। अनयैव जगत्कर्तृत्वं शिवस्य। अयमेव शब्दार्थौ भयात्मक सृष्टिकारणं बिन्दुरूपं शब्दब्रह्मेति व्यवह्रियते—इममेव मनसि निधायाह श्री भर्तृहरि योगीन्द्रः वाक्य पदीय अनादि निधनं ब्रह्म शब्दतत्त्व इत्यादि। अस्यार्थो विस्तृतरहस्य पिपासूना मत्कृततद्दीय टीकायां द्रष्टव्यः।

हिन्दी टीका—उसके बाद आदिनाथ से अधिष्ठित अपरा शक्ति के अहंकार के अभिमान मात्र से सूक्ष्मा नाम की शक्ति और प्रकट हुई। इसी शक्ति के बल से परमेश्वर को सर्वप्रथम मैं ऐसा अभिमान होता है। उस सृष्टि के आरम्भ समय में अन्य की अभिव्यक्ति न रहने से केवल एक परमेश्वर का ही अहंकार था। और उस अहंकार को कुक्षि में समस्त चराचर जगत् सूक्ष्म रूप से विलीन था। इसी लिये उस समय अयम् (यह) इस प्रकार प्रथम पुरुष का और त्वम् (तू) इस मध्यम पुरुष का व्यवहार नहीं था,

किन्तु अहम् (मैं) यही व्यवहार था। अतएव अहं यह उत्तम पुरुष कहा जाता है इसी का दूसरा नाम विमर्श शक्ति भी है। और यही शुद्ध विद्या (ब्रह्म विद्या कहलाती है, क्योंकि इसमें किसी द्वैत प्रपंच का भान नही रहता, और साधारण जनों की अहं बुद्धिद्वैत विशिष्ट रहने से अविद्या कहलाती हैं। इसी लिये यह बन्धन का हेतु होती है, और शुद्ध विद्या मोक्ष का हेतु होती है। इसी शुद्ध विद्या ने हिमालय की पुत्री उमा का रूप धारण कर इन्द्रादि देवताओं को दर्शन दिया। यह कथा केनोपनिषद् में प्रसिद्ध है। अतएव उपनिषदों में भी 'अहं ब्रह्मास्मि' इत्यादि महावाक्यों से उत्पन्न होने वाली अभेदभावना को ही ब्रह्म विद्या, महाविद्या, शुद्धविद्या राजविद्या इत्यादि नामों से कहते हैं। ८

मू० ततो वेदनशीला कुण्डलिनी शक्तिरुद्गता। ६

सं० टी०—ततो वेदनेति [ततः] अनन्तरम् [वेदनशीला] विद्यते अनयेति करणसाधनेन ज्ञानसाधनीभूत शब्दा वेदनपदार्थाः। विद्यन्ते ये ते वेदना इति कर्म व्युत्पत्त्या ऽर्थभूताः घटपटादिस्वरूपाः वेदनपदार्थाः भावसाधनेन चिद्रूपोऽर्थः। तथाच परिणामरूपेण शब्दार्थोभयकारणरूपा। स्वयमचिदंशबीजवासनान्तर्निहित सत्वसमाविष्टा चित् [कुण्डलिनी शक्तिरुद्गता] तन्नाम्नीशक्ति रुदिता। अयमत्र संग्रहेण सूक्ष्मतमसारतरोऽर्थः ॥ उपभोगप्रदयावत्कर्मोपरमे विरञ्चिप्रपञ्चे प्रचलितानवरतव्यापारजनितश्रमनितान्तश्रान्ता खिल निज सन्तान प्राणिनिकराय स्वास्थ्यं प्रदातुं निखिल ब्रह्माण्डं स्वोदरभाण्डे प्रविलाप्य जगदम्बा निजा शक्तिर्महामाया प्रकाशमात्र स्वरूपमाधाय सच्चिदानन्दघनशिवेना त्यन्ताभिन्ना भूत्वा तिष्ठति अयमत्र महाप्रलयकालः। तस्मिन् समये सकल कार्य्य करण दक्षोपि शिवः, अशक्तः सन् किमपि कृत्यं कर्त्तुमलं न भवति। इयमेव विश्रमणावस्थाशिवस्य यथा व्यष्टौ प्रत्यहं जीवानां सुषुप्त्यवस्था इदमत्र वैलक्षण्यं यज् जीवस्य सुषुप्तौ प्रकाशात्मकान्तःकरणस्य तमोरूपात्मकाविद्यायां लीनतया ऽन्धकारस्यैवानुभवः, निज ज्ञाना

नन्दस्यानाविर्भावेऽपि द्वैतप्रपञ्चविरचितशोकसमुहाननुभवनिमित्तक सुखानुभवश्च भवति। अतएव तदनन्तरं प्रबोधे सुखमस्वाप्सम् नाहं किञ्चिदवेदिषम् मूढोहमासमित्यादि स्मृतिर्जायते ऽन्यथा विनानुभवं स्मृतेरभाव एव भवेत् लोके कालान्तरेऽनुभूतस्यैव समयान्तरे स्मृति नियमात्, तदानीन्तु तमोऽपि नासीत् प्रकाशमात्रातिरिक्तस्य सर्वस्यैव विरहो ऽतएव तदनन्तरं सृष्टिसिसृक्षासमये, अज्ञोहमासमिति न परामर्शः शिवस्य द्वैतप्रपञ्चानुभवविरहितत्वेनोभयोः साम्यादुप मानोपमेयभावो वेद्यः। इयमेवावस्था आचार्य्यपादैः सूचिता प्रारम्भे अनामेत्यादिना, वेदेऽपि सदेव सोम्येदमग्र आसीत् एकमेवा द्वितीयम् इत्यादि। एतत्कालिकमहाशक्तिस्वरूपवर्णनं राजतन्त्रे ऽपि कृतम्। अचिन्त्या मिताकार शक्तिस्वरूपा प्रतिव्यक्त्यधिष्ठान सत्तैकमूर्त्तिः। गुणातीत निर्द्वन्द्व बोधैक गम्या त्वमेका परब्रह्म रूपेण सिद्धा। अस्मिन् समये विश्वाधारनिजमहाशक्तेः प्रसुप्ततया ज्ञानघनोऽपि शिवः सत्सम्प्रदायमतेन तत्रैव निखिलपदार्थस्य सूक्ष्म रूप सद्भावेऽपि नैव वेत्ति नवा किञ्चिदपि करोति। अतः स्पष्टतः सिद्धं यत् शक्ति रहितः शिवो न किञ्चदपि वेदितुं वा विधातुं पारयति। अयमेव महानुभव आचार्य्यपादेन मादृग्भ्यः शिक्षयितु मुद्गारि "शिवोऽपि शक्ति रहितः शक्तः कर्तुं न किञ्चन" इति एतदेवानुमोदितमन्यैः "शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि। लोकेऽप्यनुभूयते कोऽपि श्रान्तो विश्रान्त्यै एकान्ते सुखशय्यामध्यासीनः तत्र तदाय शक्तिःप्रसुप्ता सती तदभिन्ना भूत्। अतो महालस्येन व्याप्तः शान्ति सुखमनुभवति तदानीमन्येन केनचन पृष्टो जानन्नपि अज्ञइव न किञ्चिद्वेत्ति नवा किञ्चित्करोतीति सार्वजनीनोऽनुभवोजागर्ति इयं निजाऽपि न व्यवह्रियते यतो साऽपि कूटस्था शिवोऽपिकूटस्थः। अनया एतर्हि किमपि न करोति किन्तु सर्वेषां शून्यतया शिवः श्मशान वासी महाकाल शब्देन शक्तिश्च महागौरी महाकाली शब्देन व्यव ह्रियते। उमाकात्यायनी गौरी काली हैमवतीश्वरीत्यमरः। इयंभक्ता नुग्रहायानरतीति देवराजाय स्वभक्ताय सर्वतः प्रथमं दर्शनं ददाविति

केनोपनिषदि ३ खं० स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीमिति सोऽपि व्यवहार इदानीमेव स्वीयलक्ष्य परिचयाय साधकाः कुर्वन्ति न तदानीमासीत्। अतएव केनचित् विन्दुशब्देन व्यवहारोऽकारि तन्त्रे परब्रह्म पदेन वेदान्ते, अन्येऽपि तत्त्वज्ञाः साधका एतत्स्वरूपमेवलक्ष्यी कृत्य स्वस्वाभीष्ट शब्देन व्यवहरन्ति व्यवहरन्तु। आचार्यकरुणा कटाक्षप्रदर्शित मार्गे वस्तुतोऽन्वर्थतासंघटनात् महाकालशब्देन शिवशब्देन च व्यवहार एव समुचितः सफलश्च। कालयति, क्षेपयति अन्त्यभावंनयतीतिकालः। तस्यापि अन्त्यभावप्रापकः महाकालः शेते जगदस्मिन्निति शिवः। एतत्स्वरूपप्राप्तिरेव मोक्षः। अयं हि स्वभोगार्थं न किमपि करोति आप्तकामत्वात् प्राणिनांकर्मानुसारफलदानार्थं व तटस्थः सन्, सकलं कृत्यं करोति वहुरूपमपि धारयति महारूपमपिदेवमनुष्य विग्रहं वराहरूपं वा स्त्रीरूपं पुरूपं सर्वशक्तिमतोऽस्य कृते किन्तत् विचित्रं यन्न चित्रयेत। वेदोऽप्याह त्वंस्त्री, त्वम्पुमान्, त्वं कुमार उत वाकुमारी त्वं जीर्णो दण्डे न वञ्चसि इत्यादि श्वे ३ किन्तु मन्दो बालः तत्वज्ञभाषां श्रुत्वा हसत्येव दोहि स्वनगरं हीत्वा नगरान्तरं जानात्येव नहि तम्प्रति देशान्तरीयमहानगरस्थ नाना पदार्थ वर्णनं हास्यायैव नूनं तथा स्वभुवनं विहाय यो लोकान्तरं स्वीकरोत्येवमहि तम्प्रति, अनन्त शक्तिमतः गुणानां गानम् खपुष्पायमाणमेव तावता तत्वज्ञा न जातूदासते स्वकृत्यं मत्वा वर्णयन्त्येव सम्भवेत्कदाचिद् ईश्वरानुग्रहेण तस्यापि तोषः। अवतार वादे इयमत्र सुरगुरुणाप्यशक्यनिरसना युक्तिः। भक्ताः स्वभावनानुसारेण ऽल्पमपि फल मनल्पं मन्यमानाः प्रार्थयन्ते यदिचात्र सर्वज्ञः स्वभावनानुसारेण सर्वोत्कृष्टं मोक्षमेव फलं कर्मोद्देश्य विपरीतं वितरेत् तदा सर्वेषां विनैव ज्ञानं कथन्नैक पदे मोक्षं विदधाति तथासति नेदानीं विश्वमिदं नयनपथ मधिगच्छेत् किञ्च कस्मै चिन् मोक्षं परस्मैनेति स्वेच्छया विदधद् रागादि दोष वत्तये श्वरत्वादेव प्रच्यवेते त्यपरञ्च गण्डोपरिस्फोटसमंदूषणं यदुनभिलषितं वितरणे, उन्मत्ततापत्तिः। रसालफलं प्रलिप्सवे द्राक्षाफल प्रदानवत।

दरिद्रजनवच्च याचकभावनाननुरूपवितरणे सर्वशक्तिमत्त्वभंग प्रसंगो वज्रलेपायितः।

अत ईश्वर सिद्धि लोभाद् भक्त संकल्पानुकूलमेव फलं ददातीति स्वीकरणीयम्। तथाच भक्ता यद्यत् संकल्पयन्ते तत्तत् सम्पादयितुं नटवत् नृत्यतीति किमिति चित्रं सर्वज्ञस्य सर्वशक्तिमतश्च-कृत इति। एवमेव मुक्ताअपि योगिनः स्वप्रयोजनाभावेऽपि अनया शक्त्या स्वभक्तानां संकल्पसिद्धयेऽवतरन्ति। पुनरुपदिश्य योगधर्मान् स्वमहिम्न्यवतिष्ठन्ते यथा आचार्यपादा इति विशेषजिज्ञासुनाऽस्यचरित्रवर्णने द्रष्टव्यम्। यदान्तर्निहित प्राणिकर्मवासना संक्षोभवशान्महाशक्तौ संसार सिसृक्षा जायते तयैवेच्छया शिवोऽपि संसारं सिसृक्षुः, तदेयम् निजा १ व्यवह्रियतेऽनन्तरं निविडा भूत्वा शिवस्यसाम्मुख्यमाधत्ते सापरा २ तत्रशिवस्य प्रतिबिम्बो जायते शिवे च तस्याः प्रतिविम्वः तदा शिवशक्त्योः सम्पुटीभावः। इदमेव स्पन्दनम् इयमपराशक्तिः ३ अत्रात्मदर्शनं यथा स्वमुखदर्शनेच्छा जायते तदा आदर्शमानीय स्वसन्निधौ संस्थाप्य तत्र प्रतिविम्वे सति स्वमुखम्पश्यति। अनन्तरं विमर्शशक्तिश्चतुर्थी ४। अहमाकारानुभवकारणम् सूक्ष्माशक्तिरायाति अहमनुभवविशिष्टः शिवो वासनारूपेण शक्तिकुक्षिनिक्षिप्तानखिलान् संसारान्स्वाभिन्न-तयैवानुभवति, अत इयं शुद्धाविद्या व्यवह्रियते। एतस्या वलेनैव दुःखा-नुभवस्यात्यन्तविरहः। अस्या जगत्कारणत्वेऽपि ईदृश्या एवावस्थायाः सद्भावे सृष्टिरेवासम्भविनी, अतोऽस्या अवस्थान्तरः परिणामः। शब्दार्थोभयरूपाकुण्डलिनी शक्तिः ५ समष्टौ ब्रह्माण्डस्य व्यष्टौ पिण्डाण्ड-स्य च जननी, इयमेव विन्दुपदेन व्यवह्रियते, अचिदंशसत्वनिविष्टा चिद्रूपा तत्राप्यर्थसृष्टेः पूर्वमेव शब्दसृष्टिर्भवति श्रुतिरप्याह भूरिति व्याहरन् भूमिमसृजतेत्यादि, अतः प्रभवः प्रत्यक्षानुमानाभ्याम्। वेद शब्देभ्य एवादौ निर्ममे समहेश्वर इत्यादि स्मृतिः। लोकेऽपि प्रथमं शब्द एव बुद्धौ निपतति पश्चात्तदनुकूलमर्थं विरचयन्दृष्टः। अर्थोऽविद्यमानं-शब्दं नोपस्थापयितुमलम्। शब्दस्त्वविद्यमानमप्यर्थं समुपस्थापयति अतएव योगसूत्रे शब्दज्ञानानुपातीवस्तुशून्यो विकल्प इति। शब्द वशात्

वाह्यसत्ताविहीनोऽपि बौद्धोऽर्थोऽव्यवहृतिगोचरतामुपैतीत्यतो विपर्ययातिरिक्त इति सिद्धान्तितम्। तेन परावागित्यपि सैव यत एतस्या एव परिणामः। अर्थात् वहिर्मुखावस्था विद्या, शब्दसृष्टौ पश्यन्ती मध्यमा वैखरी रूपा अर्थसृष्टौ जाग्रत् स्वप्न सुषुप्त्यवस्थारूपा वा इच्छा क्रिया ज्ञानरूपा गौरी ब्राह्मी वैष्णवीरूपा रौद्री ज्येष्ठा वामारूपा वा त्रिकोणरूपचक्रं जायते तदेव शक्तिचक्रम्, शक्तिचक्रक्रमेणैवेत्यत्र वक्ष्यन्ते आचार्यपादा विस्तरेण ॥ अस्या एव ज्ञाने समुत्थापनेच मोक्षोऽणिमादिसिद्धिश्च पद्यते, अस्याः सर्वत्र सद्भावेऽपि सास्नादिमति गोत्ववत् लिङ्ग गुदयोरन्तराले गुह्यदेशे मूलाधारे विशेषेणाभिव्यक्तिः सर्वेषान्तदेवोक्तम् स्वेनैव "हठयोगप्रदीपे कन्दोर्ध्वकुण्डलिनीशक्तिः सुप्ता मोक्षाय योगिनाम्। बन्धायच मूढानां यस्तांवेत्ति सयोगवित्। इयं न सर्वजनवेद्या नाड़ीरन्ध्रस्य सम्वृततया तत्र बुद्धेर्वा मनसो योगाभावेन निश्चयस्य विकल्पस्य वा विषयो न भवितुमर्हः किन्तु योगक्रियया निर्विकल्पकसमाधिप्रज्ञावेद्या, यदेयं चिद्रूपा प्रयत्न पवन प्रेरितेन संस्कारीभूता नाभिदेशं गच्छति तत्र सैव पश्यन्ती संज्ञां लभते तदा मनसः संयोगेन विकल्पविषयो भवति ततोप्युदूर्ध्वं गच्छन्ती हृद्देशे पदरूपा सती तत्रबौद्धार्थेन तादात्म्यापन्ना भूत्वा ऽर्थ बोधंजनयन्ती तत्र बुद्ध्या संयोगेच निश्चितिगोचरीजायते, ततोप्युदूर्ध्व म्प्रयान्ती मुर्द्धानमाहत्य परावृत्य तत्तत्स्थानेषु वाय्वभिघातेन वखरी पदवाक्य रूपमाधाय परश्रवणविजयो भवतीति शिक्षायामुक्तम् आत्माबुद्ध्या समेत्यर्थान्मनोयुङ्क्ते विवक्षया, मनःकायाग्नि माहन्ति सप्रेरयति मारुत मिति, अवशिष्टन्तत्स्वरूपवर्णने व्याख्यास्यते। एतावानर्थ एतावत्प्रघट्टकस्येतिदिक्।

भा० टी० उसके अनन्तर वेदन शीला तत्त्वज्ञान की साधन भूत चित् स्वरूप परावाक् शब्द ब्रह्मस्वरूप सर्वत्र व्यापक सकल चराचर जगत् की जननी 'महाकुण्डलिनी" शक्ति प्रबुद्ध हुई। वही कुण्डलिनी आत्म विमूढ पुरुषों के बन्धन का हेतु होती है, और जो योगाभ्यास द्वारा इसको जाग्रत् कर लेते हैं उनके लिये सकल सिद्धियों

को देती हुई मोक्षद्वार के कपाट खोल देती है। इसी भाव को स्पष्टरूप से आगे चलकर कुण्डलिनी प्रकरण में कहेंगे। इस कुण्डलिनी शक्ति में दो अंश हैं। चिदंश, और जडांश। जब जडांश की प्रधानता होती है और चिदंश गौण होता है, तब उस चित् अंश का दृश्य होकर वह जड़ांश अपने परिणाम द्वारा शब्द सृष्टि का तथा सकल भूत भौतिक ब्रह्माण्ड आदि अर्थ सृष्टि का कारण होती है। इसी कुण्डलिनी महा शक्ति का जो अचिदंश है उसी को अनिर्वचनीय माया भी कहते हैं, तथा कितने ही उसको प्रकृति और प्रधान पद से कहते हैं।

अर्थ सृष्टि और शब्द सृष्टि इन दोनों में भी पहले शब्द सृष्टि होती है। सब से पहले श्रीमहेश्वर आदिनाथ जी की कृपा से हिरण्यगर्भ ब्रह्मा की बुद्धि में सकल विद्याओं के भंडार 'वेद' स्वतः अभिव्यक्त हुए, फिर ब्रह्मा जी ने उन वेदों में जो जो शब्द देखा उसी के अनुसार समस्त जगत की रचना की। इसी भाव को श्रुति कहती है—

"भूरिति व्याहरन् स भूमिमसृजत"

स्मृति में भी कहा है—

"अनादि निधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥

यद्यपि शुद्ध ब्रह्म से सृष्टि होना असम्भव है तथापि यहां सन्देह का अवकाश नहीं है क्योंकि शुद्ध ब्रह्म में भी परम्परा से निजा शक्ति द्वारा बीज रूप से यह समस्त विश्व विलीन था, उसी विलीन जगत का सृष्टि के आरम्भ में प्रादुर्भाव हुआ, तथा ब्रह्मगत असंगत्व की हानि भी नहीं होसकती अज्ञान के बल से रस्सी में देखा सर्प रस्सी की कुछ भी हानि नहीं कर सकता। वास्तव में ब्रह्म तो जैसा का वैसा ही है, परन्तु अज्ञानी को संसार रूप से भासमान दिखाई

देता है। यह उपर्युक्त प्रक्रिया वेद में भी सूक्ष्म रूप वर्णित है उसीका यहां स्फुट रूप से व्याख्यान किया गया है।

देखिए वेद में—

"सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयम्" ६

मू०—नित्यता १ निरञ्जनता २ निष्पन्दता ३ निराभासता ४ निरुत्थानता ५ इतिपञ्चगुणा निजाशक्तिः १०

टी० मूलशक्तेः पञ्चावस्थाः। अवस्थैव गुणो धर्मो वा व्यवहर्तुं युज्यते तदाश्रितत्वात्, तथाच साऽपि समष्टिरूपिणी पञ्चगुणा, अतः तस्याः प्रत्येकावस्थास्वपि पञ्चगुणकत्वस्य सामञ्जस्यम्, तयोरभेदात् तत्र के के गुणा इति जिज्ञासां शमयति तन्नामोल्लेखेन भगवान्मूलकारः, निजशक्तौ पञ्चगुणाः सन्ति प्रथमः **[नित्यता]** ध्वंसप्रागभाव रहितत्वम्, इदानीं नास्ति किन्तु भविष्यतीति प्रतीतिसाक्षिकः प्रागभावः, इदानीं नास्ति किन्त्वासीदिति प्रतीतिसाक्षिकोध्वंसश्चेत्युभयं निजशक्तौ न जातु केनापि प्रेक्षावता व्यवहर्त्तुं शक्यते तस्याः परिणामेऽपि सेयमिति बुद्धिविघाताभावात्, यथा मृदो घटावस्थायामपि मृन्नेतिबुद्ध्यभावः। द्वितीयः। **[निरञ्जनता]** रागद्वेषादि दोषनिकरोऽञ्जनंतद्रहितत्वम् तृतीयः **[निष्पन्दता]** चलनरहितत्वम् व्यापकत्वात् अथवा तत्त्वान्तरदशाशून्यत्वम् नित्यत्वात् वयमुत्वश्यामः स्पन्दनं पूर्वदेशं विहायान्तरदेशसंयोगानुकूल व्यापारः तदभावो निष्पन्दता। इयं हि परमशिवं कूटस्थं विहाय नान्य माश्रयते, अतःस्पन्दन शून्यत्वमस्याः स्वभावसिद्धोधर्म इति। चतुर्थः **[निराभासता]** आभासः प्रतिबिम्बः तद्विरहत्वम् अस्यां न शिवस्य प्रतिबिम्बोभवति स्वतोभेदभानाभावे तदानीमुपाधिरभावात् पञ्चमः **[निरुत्थानता]** उत्थानं संसाररूपेण परिणामः, तद्विधुरत्वम्, तदानीं सृष्ट्यभावात्, ननु द्वयोश्चिद्रूपत्वेपि-

चन्द्रचन्द्रिकयोरिव आश्रयाश्रितत्वस्वीकारेण शिवो जगतो विवर्तोपादानम् शक्तिश्च परिणामोपादानम् इति विशेषो बलादङ्गीकार्यः। अन्यथा सर्वसाम्ये शक्तिरेव न सिद्ध्येत् एकत्वापत्तेः, तथा च सांख्ये या प्रकृतिः वेदान्ते च माया सैव भवतां शक्तिनामान्तरेण व्यवह्रियते तदा तन्मतात्को विशेषोऽत्रेतिचेन्न जगदुपादानभूता सांख्यीया प्रकृतिः मदीयचिद्रूप शक्तौ प्रलये लीयते सृष्टौ ततएवाविर्भवतीति स्वीकारेण तस्याः स्वातन्त्र्यभंगः केवलजडत्वभंगश्च शक्तिः चिज्जडोभयात्मिका। तत्र चिदंशः प्रधानमाविर्भावतिरोभवरहितो जडंशस्त्व प्रधानम् आविर्भावतिरोभाववती प्रकृतिपदवाच्या मायापदाभिधेया च भवतीति महान्विशेषः शक्तिः स्वीयजडांशप्रकृति रूपेण जगतः परिणामोपादानम् इति शिवशक्तयोर्भेदः। एतेनसर्वसाम्ये निर्भेदैकत्वमापद्यतेति परास्तम्। तस्याधिष्टानत्वेनास्या अधिश्रितत्वेन भेदाच्च। इदमेवोक्तम् तेध्यान योगानुगतेति पूर्वोक्तश्रुतौ देवात्मशक्तिं स्वगुणैर्निगूढाम् इतिपदेन। देवस्य शिवस्यात्मभूता शक्तिः। अत्र त्मपदस्वारस्येन चितोदेवस्य चिद्रूपैव शक्तिः सा स्वगुणैः सत्वरजस्तमोभिः प्रलयकाले साम्येन सूक्ष्मरूपैः निगूढाम्, अन्तर्हितनामाच्छन्नां सृष्टौ वैषम्येण कार्यात्मक स्थूलरूपै राच्छादितामिति भंगमकृत्वैव स्वारसिकोऽर्थः सहृदयैराकलनीयः। अत्रस्वपदेन जडप्रकृतौ चिद्रूपपराशक्तेरात्मीयत्वबोधनेन तदंशत्वं सूचयति। एवञ्चोभयात्मिका शक्ति रिति स्पष्टम्। अतो जडांशस्यागमापायित्वेऽपि चिद्रूपाया निजशक्तेर्नित्यत्वम् युक्त मुक्तं भगवता योगिराजेन मूले। ननु वेदान्ते चिद्रूप शक्तिं ब्रह्मण्यन्तर्भाव्य जडोपादानभूतमायाया अनिर्वाच्यत्वमाविथषत तथाहि न सत् सर्वथाऽवाध्यत्वाभावात् नाप्य सद् असत्वेनाप्रतीयमानत्वाभावात् शशश्रृङ्गवत् 'नाप्युभयरूपम् अवाध्यत्वरूपसत्वस्य तद्विपरीतवाध्यत्वरूपासत्वस्यचोभयोरेकत्र क्वाप्य दर्शनेन च परस्पर विरोधात्, अतोऽनिर्वाच्यत्वम्, अयञ्चालंकार एवेति। अस्यास्तत्त्वज्ञानेनात्यन्तोच्छेदे मोक्षोभवतीति **[भूयश्चान्ते विश्वमाया निवृत्ति रिति श्रुत्या]** प्रमीयते, एवञ्च कथं शक्तेर्नित्यत्वम्प्रतिष्ठाप्यतेऽन्यथा तथापि मोक्षदशायां संसारादविशेषः प्रसज्येत इतिचेच्छृणु रहस्यम्। निवृत्तिपदार्थः स्थूलावस्था-

विरहविशिष्ट सूक्ष्मरूपेणावस्थितिः कार्यस्य, यथा घटावस्थाविरहविशिष्ट मृद्रूपम् न तु निरन्वयविनाशः सद्वादिमते प्रमाणपद्धति मध्यास्त इति बौद्धमतखण्डनावसरे वेदान्तिभिरपि बहुशः समुद्घुष्यते। तदिह कथं विस्मृतमिति त एव प्रष्टव्याः। वयन्तु ब्रूमो ऽचिद्रूपा परा शक्तिरेव भोगप्रदसञ्चितकर्मभिः क्षुभिता जडांशतः संसाररूपेण परिणमति तत्र शिवस्य मायायां प्रतिविम्वः। अवच्छेदोऽत्रेश्वरः। अन्तः करणेषुप्रतिविम्वा अवच्छिन्ना वा जीवाः। प्रथमः प्रेरयिता ऽन्तर्यामी, द्वितीयाभोक्तारो जीवाः, पञ्चभूताद्यात्मकपरिणामश्चभोग्यम् इतित्रिविधव्यवहारः सृष्टौ तदाह **[भोक्ता भोग्यं प्रेरितारञ्च मत्वा। जीवेशा वा भासेन करोति माया चाविद्याच स्वयमेवभवतीति]** अनया जीवेश्वरकर्तृत्वम् शक्ताविति स्पष्ठमेवोक्तम्। तत्वज्ञानेन शुद्ध विद्यया यदा कर्मणां वीजभावः प्रदह्यति तदा सहकारि कारणविरहात् संसारं न रचयति। अचिदंशस्य चिद्रूपे लयात् केवल चिद्रूपा तिष्ठति सैव शक्तिरन्तर्मुखा व्यपदिश्यत इयमेव मोक्षावस्था संसाराद्विशेषः. शक्तेश्चदग्धवीजवदत्यन्तोच्छेदोऽपि न भवतीत्युभयं सिद्धम् शक्ति र्नित्या मोक्षश्चेति महत्कौशलमायातम् येहि परमेश्वर स्वरूप प्राप्तिरेव मोक्ष इति स्वीकुर्वन्ति ब्राह्मण जैमिनिरिति तेषांमते सत्यका-मत्वादिधर्माणां तत्रापि विद्यमानतया तत्कारणशक्तेरपिसद्भावेन मोक्षेऽपि शक्ते र्विनाशाभावान्नानित्यत्वम् किंचपादोऽस्य सर्वा भूतानि त्रिपाद-स्यामृतं दिवी तिमन्त्रेण सृष्टेरेकदेशतया तत्रत्यशक्ते र्विनाशेऽपि मोक्षे ब्रह्मसमव्याप्तशक्ते स्त्रिदेशे विद्यामानतया न नित्यत्वस्वीकारे काचित् क्षतिः। किञ्च येहि, अविद्या तत्कार्याविषयकसत्वोपहित शुद्ध चिद्विषयिण्या विद्यावृत्ते रविद्याविनाशकत्वं स्वीकृत्य स्वस्या अपि स्वया विनाशं वदन्ति। एतन्मते शुद्धब्रह्मरूपावस्थानं मोक्षः। तत्रविचारणीयम् एकस्यैव विनाश्यविनाशकभावो न क्वापि लोके दृष्टचरः। एवं चेय मुत्प्रेक्षा स्वशिष्यान् जडभक्तान् प्रत्येव परं शोभते यत्तु कतकरजो दृष्टान्ततया समुपन्यस्यते तदपि न प्रेक्षावतां, मनःसंतोषमा-धातुमलं तथा हि कतकं न स्वस्य विनाशकमपि तु सलिलमनाविलं विदधत् स्वयन्तदधस्तिष्ठति न जातु विनश्यतीति प्रत्यक्षं क्षणेनैव

परीक्षणीयम् ? ननु विद्यावृत्ते विनाशकारणमन्यदेव भवत्विति चेद् बद किं तत्। वृत्यन्तरं तत्सजातीय मिति चेत् तस्याप्यन्यद्विना शकं तस्याप्यन्यदिति निरवधिकवृत्तिस्वीकारेऽनवस्था प्रसङ्गादन्ते कस्याअपि नित्यत्वमवश्यमङ्गीकरणीयम् ततोवरं यदादावेव तदभ्यु- पेयम् अविद्याध्वंस एव विद्यावृत्तेर्विनाशकइत्यपि न युक्ततरम् अभावस्य कारणत्वानभ्युपगमात् अन्यथाऽभावकारणवादिनां सौगातनां साम्राज्ये गगनसुमनात् प्रसृमरममन्दमामोदं ब्रुवाणोऽशक्यनिरसनः स्यात् न च भावं प्रत्यभावस्य कारणत्वानभ्युपगमेऽप्यभाव प्रत्यभावस्य कारणत्व- स्वीकारे कात्ततिरिति वाच्यम् विद्यावृत्त ध्वंसस्य ब्रह्मरूपत्वपक्षे जन्य- त्वस्यैव विरहात् तदतिरेकोररीकरणे तस्यापि ध्वंसस्यध्वंस इत्यादि निरवधिक स्वीकारेऽनवस्था च ध्वंसस्यानन्तत्व मनंगीकारपराहतं क्रियारूपत्वात्, अभावस्वरूपस्वीकारे तत्र जन्यत्वमेव वाधग्रस्तम् किञ्च निरन्वयविनाशः सद्वादिमते निषिद्ध इत्यपि पूर्वोक्तं न विस्मतव्यं यदि च सुन्दोपसुन्द न्यायेनाविद्याया विनाशिका- विद्या तस्याश्च विनाशिकाऽविद्येति व्यवस्थाप्येत तदा प्रमया अवि- द्यया प्रमात्मकविद्याया वाधकथनं विरुद्धम्। तस्मात् कारणविरहात् शक्तेर्न सर्वात्मना समुच्छेदः, अतो नित्यत्वं सुष्ठूक्तं योगिराजपादेन। न च शक्ते र्नित्यत्वे द्वैतापत्तिः तथा च भवतापि कथमद्वैतं स्थाप्येत इति वाच्यमेकैव सत्ता पर्याप्त्या शिवशक्त्यो र्न पृथगित्यङ्गीकारे सत्तापर्याप्त्यधिकरणनिष्ठ सत्तापर्याप्त्यधिकरण प्रतियोगिकभेदशून्यत्वरूपस्याद्वैतस्य भवन्मत- वदक्षतेः, अन्यथा भवन्मतेऽपि संसारमादाय कथं न द्वैतम् यदि च संसारस्य पृथक् सत्ताभावान्नद्वैतं तदा ममापि सैवगतिः सत्तामादाय न विवदनीयम् तस्याः स्वरूपानतिरेकत्वस्योभयमतसम्मतत्वात्, अतिरिक्त स्वीकर्तृणां मतेऽनवस्थाभिया सत्तायां सत्तान्तराभावे उक्त- लक्षणाभावाच्च किञ्चैतन्मते द्वैताद्वैत विवर्जितमिति वक्ष्यमाणत्वात्, अद्वैतमपि भवद्भाषयैव ब्रूमहे नतु तत्स्थापनाग्रहोऽस्माकमितिदिक् ॥१०

भा० टी०—पूज्यपाद श्री गोरक्षनाथ जी ने प्रथम पांच शक्तियों का निरूपण किया। अब उन शक्तिओं के जो स्वाभाविक पांच २

गुण हैं उनके क्रम से निरूपण करते हैं । उनमें भी सबसे पहले क्रम प्राप्त महेश्वर की मुख्य निजा शक्ति के गुणों का वर्णन किया जाता है ।

नित्यता १—भूत भविष्यत वर्तमान इन तीनों कालों में नाश न होना । अर्थात् सदा रहना ।

निरञ्जनता २—निर्दोषता । यहां पर रागद्वेष काम-क्रोध लोभ मोह आदि दोषों का नाम अञ्जन जानना और इस अञ्जन (दोष) का न होना ही निर्दोषपन है ।

निष्पन्दता ३—चलन आदि क्रिया का नहोना । अर्थात् स्थिर स्वभाव का नाम निष्पन्दता है ।

निराभासता ४—आभास नाम प्रतिविम्ब का है उससे रहित का नाम ही निराभासता है । क्योंकि जहां दो वस्तुओं का भेद रहता है वहां विम्ब प्रतिविम्ब भाव होता है जैसे दर्पण में मुख का और जल में चन्द्र सूर्यादि का । यहां शिव के साथ इस शक्ति का भेद भान न रहने से प्रतिविम्ब का अभाव कहा गया है । अतः प्रति-विम्बाभाव रूप निराभासता नाम का निजा शक्ति का चौथा गुण है ।

निरुत्थानता ५—संसार रूप से परिणाम का न होना । इस निजा शक्ति में सृष्टि का भान नहीं रहता । ये पूर्वोक्त पांचगुण निजाशक्ति में सदा रहते हैं । १०

मू०—अस्तिता १ अप्रमेयता २ अभिन्नता ३ अन-न्तता ४ अव्यक्तता ५ इति पञ्चगुणा पराशक्तिः ॥११॥

सं० टी०—सृष्ट्यादौ यस्यां प्रतिविम्बः शिवस्य सा पराशक्ति-रित्युक्तमधस्मात्. इतः पूर्वं शक्ते रन्तर्लीनतया ऽस्तित्वव्यवहारोनासीत् अस्याः अस्तीति व्यवहारविषयता जाता ऽत उच्यतेऽस्तिता

अस्तीति विभक्तिप्रतिरूपकमव्ययं ततस्तलि रूप मेतेना ऽस्तीति तिङन्तात् कथं तल् इति शङ्कापि निरस्ता, नन्वेवं यदा शिवेन शक्तिरस्तीति ज्ञानं तदा तस्या परिच्छेदोऽपि ज्ञातोभवेति तित्प्रति पत्तौ द्वितीय कोटि मवलम्बते **[अप्रमेयता]** परिच्छेद शून्यत्वम्, एतेन शक्तिः, अनित्या परिच्छिन्नत्वात् इत्यनुमानमपि स्वरूपासिद्ध्या आभासीकृतम् नन्वस्तु दैशिक परिच्छेदविरहः, वस्तु कृत भेदावभासेन भवितव्यम्, तदा तन्निषेधति, अभिन्नता ऽनन्ततेति पदद्वयेन **[अभिन्नता]** मत्तो भिन्न इत्याकारक स्वप्रतियोगिक भेदस्याभाव इत्यर्थः। अस्तु तर्हि जगत् प्रतियोगिक भेदः, अत आह **[अनन्तता]** तदानीं जगतोऽभावेन तत्प्रतियोगिकस्यापि भेदस्याभाव इत्यथः, नन्वेवं तर्हि जनिष्यमाणजगतोऽसत्वे ऽसद्वादमतापत्तिरत आह **[अव्यक्तता]** कार्य्याणां सूक्ष्मावस्थाविशिष्टता यत्कार्यं यस्मिन्कारणे सूक्ष्मावस्थयाऽवतिष्ठते, तत्कार्यं प्रति तत्कारणम् अव्यक्तमिति कथ्यते यथा घटस्य अव्यक्तम् मृद्रूपम् इति सांख्यादि दर्शनाभिज्ञै र्नाविदितमतो नासद्वादः ॥११॥

भा० टी०—अस्तिता १ विद्यमानता, 'है' इत्यादि पद से व्यवहार होने की योग्यता।

अप्रेमयता २—व्यापकता, जिसका अत्यन्ताभाव किसी देश में न हो वह धर्मी व्यापक कहलाता है। जैसे आकाश। अतः इस पराशक्ति में व्यापकता गुण का कथन करने से यह सूचित होता है कि इसका अत्यन्ताभाव कहीं नहीं है।

अभिन्नता ३—एकता, भाव यह है कि दो वस्तुओं का परस्पर अन्योन्याभाव होता है इसी का दूसरा नाम भेद है जैसे कि यह घट पट नहीं और यह पट घटस्वरूप नहीं। इस प्रकार पराशक्ति में जगत् का भेद नहीं है क्योंकि पराशक्ति के प्रादुर्भाव के समय जगत् का अस्तित्व ही नही था। अतः जगत् का भेद शक्ति में वा शक्ति का भेद जगत में होना असम्भव है। यही उपरोक्त भाव अभिन्नता पद से प्रकट किया गया है।

अनन्तता ४—अविनाशिता, ध्वंस और प्रागभाव का न होना तात्पर्य यह है कि जिस वस्तु का उत्पत्ति के बाद ध्वंस होता है और उत्पति के पहले प्रागभाव रहता है वह घट पटादि वस्तु अन्त सत्तावाली कहलाती है और जिसका ध्वंस और प्रागभाव ये दोनों ही न हों वह वस्तु अनन्त कहलाती है। परमेश्वर की पराशक्ति नित्य और व्यापक होने से प्रागभाव और विनाश रूप ध्वंस से रहित है। अतः अनन्तता रूप चौथा गुण पराशक्ति का जानना।

अव्यक्तता ५—कार्य की सूक्ष्म अवस्था, जैसे दूध में घी सूक्ष्म रूप से रहता है घृतकार्य के प्रति दूध अव्यक्त कारण कहलाता है तथा तेल के प्रति तिल और सरसों आदि अव्यक्त अर्थात् सूक्ष्म कारण कहलाते हैं इसी प्रकार जगत् कार्य के प्रति पराशक्ति अव्यक्त कारण कहलाती है क्योंकि अपनी उत्पत्ति के पूर्व यह जगत् उसी अव्यक्त पराशक्ति में लीन था इसीलिये पराशक्ति का स्वाभाविक अव्यक्तता रूप पंचम गुण जानना। ११

मू० स्फुरता स्फुटता स्फारता स्फोटता स्फूर्तितेति पञ्चगुणाऽपरा शक्तिः ॥१२॥

सं०टी०—क्रियारूपेति पूर्वमुक्तं तत्र **[स्फुरता]** संचलनम् **[स्फुटता]** विकाशता, प्रकाशः शिवस्याहमित्यनुभवविषयतया ज्वलनमिति यावत् **[स्फारता]** संचालनम् ण्यन्तस्फुरधातोः, चिस्फुरोर्णौ वित्यात्वे अचि निष्पन्नात स्फारशब्दात्तलि रूपम् **[स्फोटता]** विकासकता यथा सूर्य्यः कमलं विकासयति तथेदं जगत्। अथवा बोधकता व्याकरणे स्फोटशब्देन क्वचिच् शब्दब्रह्मपदेन **[शब्द ब्रह्मेति तं प्राहुः सर्वागमविशारदाः]** इतिव्याजह्रुः।वाक्यपदीये ऽनादिनिधनेत्यादि यत प्रतिपाद्यते तस्यात्रैवान्तर्भावः कृतोनाथपादेनेति बोध्यम् [स्फूर्तिता] उत्साह उच्छूनता, क्रियात्वरतेतियावत्। १२

भा० टी० [स्फुरता] १ चलन आदि क्रिया।

[स्फुटता] २ खिलना जैसे पुष्प गुल्मादि खिलते हैं।

[स्फारता] ३ अपने शासन में चलाना जैसे राजा अपने मंत्री द्वारा प्रजा को अपने शासन में चलाता है, और सारथी घोड़ों के द्वारा रथ को चलाता है।

[स्फोटता] ४ खिलाना जैसे सूर्य कमलों को खिलाता है,।

[स्फूर्त्तिता] ५ गमनादि क्रिया की शीघ्रता, जैसे जल्दी चलना, जल्दी खाना इत्यादि। ये उपरोक्त स्फुटता आदि स्वाभाविक पाँच गुण अपरा शक्ति में रहते हैं। १२

मू० निरंशता निरन्तरता निश्चलता निश्चयता निर्विकल्पतेति पञ्चगुणा, सूक्ष्माशक्तिः ॥१३॥

सं० टी०—अहमाकारानुभवकारणं विमर्श शक्तिरित्युक्त मधस्तात्-तस्या धर्मान्नाह-निरंशतेति तदानीमहमहमित्येकरूप एवानुभव आसीन्नतु त्वं वायंत्रेति खण्डव्यवहारः। अत आह "निरंशता" अंशो नाम, अवयव इदमादिपदवाच्यः, तद्रहितत्वं निरंशत्वम् "निरन्तरन्तरता" अन्तरा व्यवधानम् तद्द्विविधं भवति कालकृतं देशकृतञ्च तत्र संकोचे कारणाभाद् द्विविधस्यापि व्यव धानस्य विरहो निरन्तरत्वम्-एतेन किञ्चित् क्षणमहमित्यनुभूय मध्ये विश्रम्य पुनरनुभवइति व्याबृत्तः, अतएव निश्चलत्वम्, चलनं स्वरूपात् प्रच्युतिः। तद्रहितत्वं, [निश्चयता] विद्यारूपता एतेन संशय विभ्रम विपर्य्ययात्मकत्वम् व्यावृत्तम् [निर्विकल्पता] एकरूपता विशेषणरहितेति यावत् ॥१३॥

भा० टी०—यह सूक्ष्म शक्ति विद्या रूप विमर्श शक्ति है यह भाव पहले दिखला चुके हैं। उस सूक्ष्म शक्ति के पांच गुणों का यहां वर्णन किया जाता है —

(निरंशता) १ अवयव विभाग का अभाव, अर्थात् अयं (यह) प्रथम पुरुष, तथा त्वम् (तूं) यह मध्यम पुरुष, ये दोनों भिन्न अंश कहलाते हैं, सृष्टि के आदि में इन दोनों का व्यवहार नहीं था किन्तु केवल अहम् (मैं) यही अखण्ड व्यवहार था।

(निरन्तरता) २ दो वस्तुओं के बीच में अन्य का व्यवधान

न रहना। भाव यह है कि- लोक में व्यवधान का व्यवहार दो प्रकार से होता है कालकृत और देशकृत, कालकृत जैसे प्रतिपद् और तृतीया के बीच में द्वितीया का, तथा वसंत और वर्षा के मध्य में ग्रीष्म ऋतु का व्यवधान होता है। देशकृत व्यवधान जैसे हरिद्वार और ज्वालापुर के बीच में "श्री पूर्णनाथ संस्कृत कालेज योगाश्रम। परन्तु सूक्ष्म शक्ति में किसी प्रकार का व्यवधान नहीं है।

(निश्चलता) ३ जिस में चंचलता दोष न हो अर्थात् स्व स्वरूप विचलित न होना ही निश्चलता कहलाती है!

(निश्चयता) ४ निश्चयरूपता, सारांश यह है कि संशय भ्रम विपरीत ज्ञान आदि दोषों से रहित यथार्थ ज्ञान का होना ही निश्चयता कही जाती है।

(निर्विकल्पता) ५ एक रूपता अर्थात् विशेषण विशेष्य भाव का न रहना जैसे 'नील घट, यहां नील विशेषण और घट विशेष्य है अत एव इन दोनों का विशेषणविशेष्यभावसम्बन्ध कहलाता है, पर इस सूक्ष्मा शक्ति में उपर्युक्त सम्बन्ध नहीं रहता। यद्यपि विशेष्यभूत शक्ति तो है भी तथापि विशेषण के न रहने से केवल शक्ति में विशेषणविशेष्यभाव का संकलन नहीं हो सकता। उपर्युक्त पांचगुण सूक्ष्मा शक्ति के जानना। १३॥

मू०-पूर्णता प्रतिबिम्बता प्रबलता प्रोच्चलता प्रत्यङ्मुखतेति पञ्चगुणा कुण्डलिनी शक्तिः, ॥१४॥

सं० टी०-इयं शब्दार्थोभयकारणरूपेति पूर्वं निगदितम्, तदुपयोगिगुणान् वर्णयति। इयं शब्दसृष्ट्यपेक्षया परावागुच्यते, अर्थसृष्ट्यपेक्षया प्रकृतिरिति कथ्यते क्वचिद्बिन्दुः [पूर्णता] व्यापकता अनेन परिच्छिन्नतया केनचिदुत्प्रेक्षितम् अनित्यत्वम् दूरोत्सारितम्, किंच संसार प्रति व्यापकत्वेनोपादान कारणत्वम् समुचितम्, लोकेऽपि घट शरावादयः स्वोपादानमृदादे र्व्याप्या दृश्यन्ते—एतेन परमाणुभ्य, ए वसृष्टिः।

यथासूक्ष्मतमवटधानादितो महावटवृक्षादयो जायन्ते । इति स्थूलदृष्ट्या व्यवस्थापयन्त स्तार्किकवराका अपि तुच्छीकृताः । सूक्ष्मदृष्ट्या विवेचने वटधानादयोऽपि सूक्ष्मैः स्वावयवैः समस्तान्वृक्षान् व्याप्नुवन्त्येव, अन्यथा तूपादानमनाश्रित्य वृक्षस्थिति रेवासम्भविनी न जातु लोके मृत्तिकामनाश्रित्य अधस्थितां वा मृत्तिकामनवलम्ब्य मृत्तिकावयवरहितः केवलो घटो वियति दोलायमानो दृष्टिचरः । यदि भवन्मतमहावेशनिविष्टा विचित्रमिदं चित्रं प्रदर्शयेयुस्तदा स्युर्लोके श्रद्धेय वचनाः,वयन्तु पश्यामः, उन्मत्तप्रलाप एव यन्न स्वोपादानावयवदेशाद् भिन्न देशेऽपि कार्यस्थितिः कार्य्यञ्चमहदिति । किञ्च समवायिकारण देश एव कार्य्य देश इति वृद्धनैयायिक मतरक्षालोभेनापि स्वोपादानावयवानुस्यूतान्येव कार्य्याणीति मन्तव्यम् । तथाच परिणामवादस्यैव परमाणु वादपदेन कथने न नो हानिः । अतः सुष्ठु कथितम् व्यापकत्वमिति **प्रतिविम्वता** २ पश्यन्तीमध्यमादिवर्णपदात्मकशब्दरूपेण महत्तत्वा हंकाराद्यर्थरूपेण च परिणामस्वभाव एव प्रतिविम्वता । अथवा निखिपदार्थाना मंकुरभावेन प्रतिविम्वनम् । **प्रवलता** ३ उच्चावचनानाविधप्रपञ्चरचनाचातुर्य्यात्मकोत्कृष्टसामर्थ्यम् **प्रोच्चलता** ४ वर्धमानता स्थूलादिरूपेण परिणमनशीलत्वम् उर्द्ध्वचलनम् वा । **प्रत्यङ्मुखता** ५ सृष्ट्युन्मुखत्वं वहिर्मुखा सती स्वान्तरस्थितान् अर्थान् वहिर्निःसारयति तदा संसारः समुत्पद्यते । सृष्टि सम्पादनोपयोगि निखिलसामग्री परिपूर्णतेति निगलितः १४

भा० टी०—अब पांचवी कुण्डलनी शक्ति के स्वाभाविक पांच गुणों का वर्णन करते हैं ।

१-(पूर्णता) सर्वत्र विद्यमानता अर्थात् व्यापकता, यह कुण्डलिनी शक्ति का प्रथम गुण है । जो इस कुण्डलिनी शक्ति को परिच्छिन्न मान कर अनित्य कहते हैं उन के मत का खण्डन व्यापकता गुण कहने से होजाता है और उचित भी यही है क्यों कि इतने लम्बे चौड़े संसार का जिस व्यापक कुण्डलिनी से विस्तार होता है उस को छोटा कहना स्वयं अपनी बुद्धि छोटे पन को ही प्रकाशित करना है अत एव जो नैयायिक परमाणुओं से जगत् की उत्पत्ति कहते हैं उनके

मत का भी व्यापकता गुण कहने से खण्डन होगया क्योंकि परिच्छिन्न परमाणुओं से जगत् की उत्पत्ति होना सर्वथा असम्भव है किन्तु यह कुण्डलिनी शक्ति ही परा पश्यन्ती आदि शब्दसृष्टि का तथा महत्तत्व अहंकार पंच तन्मात्रा पंचभूत और एकादशइन्द्रिय इत्यादि अर्थ सृष्टि का कारण होती है।

२-(प्रतिविम्बता) इस कुण्डलिनी का शब्द और अर्थ रूप से परिणाम होना ही प्रतिविम्बता कहा गया है। अथवा प्रतिविम्बता रूप कुण्डलिनी शक्ति का खास गुण है क्यों कि जब योगी योगाभ्यास के द्वारा कुण्डलिनी शक्ति का उत्थान करता है और जिस समय वह उत्थान परिपक्व होजाता है तब जैसा कुण्डिनी का तेजमय स्वरूप है उसी तरह का उस योगी के समस्त शरीर में कुण्डलिनी शक्ति का प्रतिविम्ब पड़ने लगता है। इसी कारण योगी के शरीर में चारों तरफ से अग्नी की चिनगारियां सी नजर आने लगती हैं तब योगी का शरीर तेजपुंज से व्याप्त हो जाता है। यही कुण्डलिनी का प्रतिविम्बतारूप दूसरा गुण जानना।

३-(प्रबलता) उत्कृष्टसामर्थ्य अर्थात् छोटा, बड़ा ऊंचा नीचा नानाप्रकार के रचनात्मक चमत्कार का चातुर्य इस कुण्डलिनी महाशक्ति में भरा हुआ है। वही इस का तीसरा गुण है।

४-(प्रोच्चलता) स्थूलादि आकार से परिणाम होना। या ऊपर को उछलना जैसे योगाभ्यासी के निरन्तर अभ्यास से जब कुण्डलिनी शक्ति जग जाती है तब विशेष रूप से प्राण सहित कुण्डलिनी शक्ति की ऊर्ध्वगति देखने में आती है। इसे चौथा गुण जानना।

५—(प्रत्यङ्मुखता) सृष्टि रचने के लिये तत्पर होजाना। इसको कुण्डलिनी शक्ति में पांचवा गुण जानना ॥१४॥

मू०—'एवं शक्तितत्त्वे पंच पंच गुण योगात् पर-पिण्डोत्पत्तिः। १५

सं० टी० एवमिति प्रथमं व्यष्टिसृष्ट्युपयोगिनीं समष्टिसृष्टिमाह

[एवम्] पूर्वोक्त प्रकारेण [शक्तितत्त्वे] तत्संघाते सति [पञ्च पञ्चगुणयोगात्] पञ्चविंशतिगुणानां समवायेन [परपिण्डोत्पत्तिः] परपिण्डस्य निग्रहानुग्रहसंहारस्थितिसृष्टिगुणकस्य सदाशिवस्य [उत्पत्तिः] आविर्भावो भवतीति ज्ञेयम्। अयमेव सांख्यप्रकृतिविलक्षणकेवलसत्त्वोपहितपुरुषविशेष ईश्वरो योगसूत्रोक्तः। सत्त्वस्यापि चैतन्यमिति विशेषोऽत्रवेद्यः ॥१५॥

भा० टी०—पूर्वोक्त प्रकार से शक्तितत्व में ऊपर लिखे हुये पांच शक्तियों के स्वरूप विद्यमान होने पर एक एक शक्ति में पांच २ गुण होने से सब गुणों को मिलाकर पच्चीस गुण होते हैं। उन पच्चीस गुणों का समुदाय रूप जो परपिण्ड है उसकी उत्पत्ति हुई। तात्पर्य यह है कि जैसे हम लोगों का यह स्थूल शरीर पंचभूतों का समुदाय पिण्ड कहलाता है वैसे ही उन शक्तियों का समुदाय पर अर्थात् श्रेष्ठ पिण्ड कहलाता है।

और जैसे इस भौतिक पिण्ड का अधिष्ठाता यह जीव कहा जाता है वैसेही उस पर पिण्ड का अधिष्ठाता सगुण परमेश्वर कहलाता है। इसी शक्ति सहित परमेश्वर का इस ग्रन्थ में अनादिपिण्ड पद से व्यवहार किया जाता है इसी को वेदान्ती माया शवलित ब्रह्म कहते हैं। इसी को महर्षि पतञ्जलि ने योगसूत्र में "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुष विशेष ईश्वरः" ऐसा कहा है।

अर्थ—अविद्यादि पंचक्लेश, तथा शुभाशुभ त्रिविध कर्म, जाति, आयु, भोगरूप त्रिविध कर्मों का फल, और सकल बासना, इन सब से निर्लेप पुरुष विशेष को ईश्वर कहते हैं? "निरतिशय सर्वज्ञबीजम्"

उस परमेश्वर में सर्वज्ञता का कारण सर्व श्रेष्ठ सत्त्व रूप उपाधि है। इसी के बल से उस असङ्गचिद् रूप परमेश्वर में सर्वज्ञता है, अन्यथा असङ्ग चेतन में सर्वज्ञता धर्म का रहना ही असम्भव है। इस योग सूत्र प्रतिपादित सत्त्व उपाधि में निरतिशय विशेषण देने से स्पष्ट प्रतीत होता है कि जगत् की उपादान भूत सांख्योक्त त्रिगुण स्वभाव वाली प्रकृति के सत्त्व से यह सत्त्व विलक्षण है। क्योंकि

सांख्य शास्त्र में कही हुई प्रकृति में तीनों गुणों का साहचर्य कहा है, इसीलिये सांख्यवादियों के मत में रजो गुण और तमोगुण का विच्छेद होने पर केवल सत्त्वगुण नहीं रह सकता। तब निरतिशय सत्व कैसे कहला सकता है। उस सत्त्व में निरतिशय सत्त्व तभी हो सकता है, जब रजोगुण और तमोगुण का लेशमात्र भी सम्पर्क न हो। अतएव सांख्योक्त सत्त्व से योगोक्त सत्त्व विलक्षण है। और योगाचार्य श्रीनाथजी ने उस निरतिशय सत्त्व को चिद्रूप माना है। इसीलिये उसको सत्त्व न कहकर शक्तिपद से कहा है।

यहां उत्पत्ति पद का अर्थ आविर्भाव है, क्योंकि सद्वाद में असत् की उत्पत्ति नहीं होती ॥१५॥

मू०—उक्तञ्च- निजा पराऽपरा सूक्ष्मा कुण्डलिन्यासु पञ्चधा। शक्तिचक्रक्रमेणोत्थो जातः पिण्डः परः शिवः। १६

सं० टी० गद्येनोक्तम् पद्येनोपसंहरति, उक्तञ्चेति मयेति शेषः, अस्यार्थस्तूपर्य्येवोक्तः। अवशिष्टः किञ्चिदिहोच्यते शक्तेर्बिन्दुरूपिण्याः मूलप्रकृतेर्महामायायाः, चक्रः। त्रिकोणात्मगोलकरूपः। तन्मध्ये बिन्दुःकारणशिवरूपः तस्य शक्ते र्विकाशकाले युगपत् त्रिरूपता भवति त्रिरूपता, त्वित्थं तथाहि इच्छाशक्तिज्ञानशक्तिक्रियाशक्तत्र्यात्मकः, सत्वरजस्तमोरूपात्मकः, रुद्रविष्णुब्रह्मात्मकः। गौरीलक्ष्मीसरस्वतीरूपः। आधिदैविकाध्यात्मिकाधिभौतिकस्वरूपः, इतिपञ्चात्मकः, अतएवाद्यशक्तेः पञ्चत्रिकोणात्मकः श्रीयन्त्रः तस्य **क्रमेण** अपेक्षाबुद्ध्या, अयम्भावः सर्वासां शक्तीनां समवायापेक्षया तदधिष्ठाता एकः सदा शिवः **परः** व्यापकः, **उत्थः** आविर्भूतः प्रत्येक शक्तेरधिष्ठात्रपेक्षया पञ्चदेवा आविर्भूताः। तेऽपि परा अस्मदपेक्षया कथ्यन्ते। मूले कुण्डलिनी, आसु, इति छेदः।१६।

भा० टी०–निजा-परा-अपरा-सूक्ष्मा, कुण्डलिनी, ये पूर्वोक्त पांच शक्तियां हैं। इनमें शक्ति चक्र क्रम द्वारा सदाशिव पांच प्रकार से आविर्भूत हुआ, भाव यह है कि पूर्वोक्त पांच शक्तियों के अध्यक्ष

रूप से सदाशिव श्री आदिनाथ जी प्रकट हुए। यहां पूर्वापर ग्रन्थ की समालोचना से गूढ़ भाव यह निकलता है कि एक एक शक्ति के विकाश से एक एक पिण्ड का प्रादुर्भाव हुआ इस क्रम से पांच पिण्ड। और फिर उन पांच पिण्डों के अधिष्ठाता रूप पांच देव हुए जिनके नाम और गुण आगे चलकर वर्णन करेंगे। यहां शक्ति चक्र क्रम का अभिप्राय है शक्ति चक्र त्रिकोण. उसके मध्य में विन्दु रहता है, विन्दु का अर्थ अविकृत कारण परमनाथ ब्रह्म जानना। जब उस सदा शिव की शक्ति का विकाश होता है तब वह शक्ति एक साथ तीन आकारों को धारण करती है, वे तीन आकार नीचे देखिये इच्छा, ज्ञान, क्रिया। रुद्र, विष्णु, ब्रह्मा। गौरी लक्ष्मी, सरस्वती। सत्व, रज, तम। आधिदैविक, आध्यात्मिक, आधिभौतिक। इत्यादि रूप से शक्ति चक्रक्रम जानना ॥१६॥

मू०—अपरम्परं परमपदं शून्यं निरञ्जनं परमात्मेति १७

सं० टी०— तानेव व्यष्टिरूपान् पञ्चदेवान् प्रदर्शयति अपरम्परमित्यादि निजाशक्त्यधिष्ठाता सदाशिवः। स्वस्यनास्त्यन्यत् कारणमिति कारणपरम्पराशून्यतया अपरम्परपदेन व्यवह्रियते १ पराशक्त्यधिष्ठाता परमेश्वरो मुमुक्षुभिः प्राप्यते ऽतः परमपदशब्देन निगद्यते। अपराशक्त्यधिष्ठाता रुद्रः प्रलयकर्ता भेदाभावात् शून्यपदेन निगद्यते। सूक्ष्माशक्त्यधिष्ठाता ज्ञानशक्तिविशिष्टः विष्णू रागादि रूपाञ्जन रहिततया निरञ्जनपदेनोच्यते। कुण्डलिनीशक्तिसाक्षि जगत्कर्तृत्वेन ब्रह्मा सर्वेषां प्रत्यगात्मतया परमात्मपदेनात्र व्यवह्रियते। अन्यत्र क्वचिदागमे विन्द्वात्मकमायासहित शम्भोः सदाशिवो जातः, तस्मादीशः, तस्माद्रुद्रः, ततो विष्णुः, ततो ब्रह्मा, एते यथा संख्यमनुग्रह निग्रह प्रलय स्थिति सृष्टि कर्त्तारः पंच देवाः, उत्तरोत्तरं समुत्पन्नाः शम्भुस्तु पञ्चात्मकः सदैकरूप इत्याहुः—अत्र तु पूर्वं पञ्च शक्त्युत्पत्तिं प्रदर्श्य तस्या एकैकस्या अधिष्ठातृतया पञ्च देवान् अन्वर्थ नाम्ना निर्दिश्य, अनन्तरं तेष्वेकैकस्माद्देवादेकैको विशेषगुणः सृष्ट्युप-

योगी समुत्पन्नस्तदेवं प्रदर्शयति ॥१७॥

भा० टी० अब एक २ शक्ति के अभिमानी पाँच देवताओं का नाम निर्देश किया जाता है।

अपरंपद (सदाशिव) परमपद (ईश्वर) शून्य (रुद्र) निरञ्जन (विष्णु) परमात्मा (ब्रह्मा) १७

मू०—अपरम्परात् स्फुरतामात्रमुत्पन्नं परमपदाद् भावनामात्रमुत्पन्नं शून्यात्स्वसत्तामात्रमुत्पन्नं निरञ्जनात् स्वसाक्षात्कारमात्रमुत्पन्नं परमात्मनः परमात्मोत्पन्नः ॥१८॥

सं० टी०—(स्फुरता) उत्साहः क्रिया सामान्यं (भावना) ईक्षणमन्वालोचनमिति यावत् (सत्तामात्रं) महत्तत्वं (बुद्धितत्त्वम्) (साक्षात्कारमात्रम्) अहंकारमात्रं (परमात्मा) बीजावस्थापन्नपिण्डविशेषः गुणसमवायः सृष्ट्युत्पादनोपयोगीत्यभिप्रायेणात्रोक्तम् एकैकस्य पञ्च पञ्च गुणानाह ॥१८॥

भा० टी० इन पूर्वोक्त पांच देवताओं से आगे होने वाली सृष्टि के उपयोगी पदार्थों की उत्पत्ति का निरूपण किया जाता है—

अपरंपरनामक देव से उत्साह मात्र उत्पन्न हुआ। परमपददेव से समालोचनात्मक ज्ञान उत्पन्न हुआ। निरंजन से स्वसाक्षात्कारमात्र अर्थात् अहंकार उत्पन्न हुआ।

परमात्मा नामक पंचम देव से संसार की बीजावस्थापन्न समष्टि पिण्ड उत्पन्न हुआ। क्योंकि अस्मदादि व्यष्टि पिण्डों की अपेक्षा वह पिण्ड उत्कृष्ट है। इसी लिये उस पिण्ड को मूल में परमात्मा कहा है। १८

मू०—अकलंकत्व मनुपमत्व मपारत्व ममूर्तत्व मनुदयत्व मिति पंच गुणमपरंपरम् ॥१९॥

सं० टी०—अकलंकत्वमिति दोषशून्यत्वं १ सजातीयद्वितीय रहितत्वम् २ अन्तविरहितत्वम् ३ परिच्छेदविधुरत्वम् ४ उत्पत्तिरहितत्वम् ५ भावरूपदोषस्य प्रथमेन व्यावृत्तिः, इतरैश्चतुर्भिः यथाक्रमेण अन्योन्याभावध्वंसाभावात्यन्ताभावप्रागभावानां निवृत्तिरिति तत्वम् ।१९।

भा० टी० अब पूर्वोक्त पांच देव में से प्रत्येक के पांच पांच गुणों का वर्णन करते है ।

१—अकलङ्कत्व रागादि दोषों का नाम कलंक है उन का अभाव ही अकलङ्कत्व नामक अपरंपर देव का प्रथम गुण है ।

२—अनुपमत्व इस अपरंपरदेव का सजातीय कोई दूसरा नहीं है जिस की उपमा दी जाय इसी लिये इस देव का अनुपमत्वरूप दूसरा गुण जानना ।

३-अपारत्व सीमावाली वस्तु का अन्त होता है पर इस अपरंपरदेव का पार नहीं है अतः अपारत्व इसका तीसरा गुण है ।

४--अमूर्तित्व परिच्छेद रहित सारांश यह है कि जो परिमित वस्तु होती है वह मूर्ति कहलाती है इस अपरंपरदेव का किसी परिमाण से परिच्छेद नहीं है इसीलिये अमूर्तित्व यह चौथा गुण है ।

५--अनुदयत्व जिसका प्रागभाव होता है उसी की उत्पत्ति कही जाती है किन्तु अपरंपरदेव की सदाव्यापकस्थिति होने से उसका प्रागभाव नहीं है । अतः अनुदयत्व नामक पंचमगुण इसमें सदैव रहता है ।।१९।।

मू० निष्कलत्व मणुतरत्व मचलत्व मसंख्यत्व मनाधारत्व मिति पंच-गुणं परमपदम् । २०

भा० टी०—निष्कलत्वम् कला, अवयः, तच्छून्यत्वम् (अणुतरत्वम्) सूक्ष्मत्वम् नतु तार्किकसम्मतपरमाणुत्वम् । अस्य व्यापकत्वात, अत एवाह (अचलत्वम्) ; स्पन्दनक्रियाशून्यत्व (असंख्यत्वम्) संख्या द्वित्वादि घटकादि तद्रहितत्वम् । (अनाधारत्वम्)

अनाश्रितत्वम् व्यापकत्वात् नहि व्यापकं क्वचिदाश्रीयते, यथाकाशः। २०

सं० टीका—अब परंपद देव के पांच गुणों का वर्णन किया जाता है।

१-निष्कलत्व कला शब्द का अर्थ अवयव जानना। अवयव का अभाव रूप निष्कलत्व गुण परमपददेव का होता है।

२-अणुतरत्व सूक्ष्मता यहां नैयायिकों की तरह परमाणु रूप अणुतरत्व का अर्थ नहीं है क्योंकि परमपददेव व्यापक है उसको अणु कहना भी अनुचित है किन्तु अणुतरत्व का आकाश की तरह अति सूक्ष्म अर्थ जानना। यह परमपददेव का दूसरा गुण है।

३-अचलत्व छोटी वस्तु में चलनादि क्रिया होती है व्यापक में क्रिया कहना असंगत है इसलिये व्यापक परमपददेव की चलनादि क्रिया का अभाव रूप अचलत्व तीसरा गुण है।

४-असंख्यत्व द्वित्वादि संख्या शून्यत्व रूप असंख्यत्व परमपददेव का चौथा गुण है।

५-अनाधारत्व किसी के आश्रित न रहना। भाव यह है कि व्यापक वस्तु स्वप्रतिष्ठित होती है जैसे न्याय के मत से आकाश यह परमपददेव भी व्यापक स्वप्रतिष्ठित है। इसलिये यह अनाधारत्व रूप पंचमगुण उक्तदेव का जानना।

मू०—लीनता पूर्णोन्मनी लोलता मूर्छेति पञ्च गुणं शून्यम् ॥२१॥

सं० टी० कार्याणामव्यक्तावस्था लीनता। कार्यं प्रति व्यापकता पूर्णता। सृष्ट्यै वैषम्ययोग्यता उन्मनी, सहजावस्था वा कार्याय तरलावस्था लोलता। संपिण्डीभावो मूर्छता ॥२१॥

भाषा टीका—अब शून्य देव के पांच गुणों को व्याख्यान करते है।

१—(लीनता) कारण में कार्यों का प्रलय होना ही लीनता रूप प्रथम गुण शून्यदेव अर्थात् रुद्र का जानना।

२—(पूर्णता) सर्वत्र सदाविद्यमानता रूप दूसरा गुण शून्यदेव में रहता है।

३—(उन्मनी) सहजावस्था सदैव स्वरूपानुभव में निमग्न रहना ही उन्मनी का अर्थ है यह तीसरा गुण शून्यदेव में स्वाभाविक हैं।

४-(लोलता) चंचलता। भाव यह है कि संहार आदि कार्य संपादन करने के लिये चंचलता का नाम लोलता हैं यह शून्यदेव रुद्र का चौथा गुण है।

५—(मूर्च्छता) महाप्रलय में सकल संसार एकभाव को प्राप्त होता हुवा शुन्यदेव में मूर्च्छित हो जाता है इसी लिये मूर्च्छता यह पंचमगुण पूर्वोक्त शून्यदेव में जानना ॥२१॥

सत्यत्वं सहजत्वं समरसत्वं सावधानत्वं
सर्वगतत्वमिति पंचगुणं निरञ्जनम् ॥२२॥

सं० टी०—सहजत्वम् स्वरूपप्रतिष्टत्वम् नन्वेवं कार्यस्य बिनाशे तस्यापि विनाशः स्यादत आह सत्यत्वम् एकव्यक्तविनाशेऽपि व्यक्त्यन्त रे ऽनुस्यूततया नित्यत्वम् यथा घटध्वंसेऽपि कपालशर्करादौ मृद्बुद्धे विनाशाभाववत् "समरसत्वम्" एकरूपेण सर्वत्रविद्यमानत्वम् सावधानत्वम् भ्रमप्रमादरहितत्वम् सर्वगतत्वम् स्वकार्ये सर्वत्र विद्यमानत्वम्।

भा० टी०—अब क्रमप्राप्त निरञ्जन (विष्णु देव के पांच गुणों का वर्णन किया जाता है।

१—(सत्यत्व) जिस वस्तु का तीनों काल में बाध न हो वही वस्तु सत्य कहलाती हैं इस निरंजन देव का भी बाध तीनों कालों में नहीं हो सकता। अतः सत्यत्व यह उस का प्रथम गुण है।

२—(सहजत्व (अपने स्वरूपानुभव में मग्न रहना ही सहजावस्था है यही सहजत्वरूप निरंजन देव का दूसरा गुण है।

३—(समरसत्व) जिस के स्वरूप में किसी प्रकार की विषमता नहीं यह निरंजनदेव का तीसरा गुण है।
४—(सावधानत्व) समाहितात्मा। भ्रम और प्रमादादि दोषों से रहित का नाम सावधान है। निरंजन देव भी प्रमादादि दोषों से शून्य है सावधानत्व यह चौथा गुण उक्तदेव में स्वाभाविक है।

५—(सर्वगतत्व) सूत्रात्मा रूप से सर्वत्र विद्यमान रहना यही सर्वगतत्व रूप पंचम गुण निरंजनदेव का है।

मू० अक्षयत्व मभेद्यत्व मच्छेद्यत्व मविनाशित्व मदाह्यत्व मिति पंचगुणः परमात्मा। इत्यनादि पिण्डस्य पंचतत्वं पंचविंशति गुणाः ॥२३॥

सं० टी०—शक्तेः परिणामेऽप्यस्य तद्भावः प्रथमेन उपाधेरनेकत्वेऽपि स्वस्यैकत्वम् द्वितीयेन, अनवयवत्वं-तृतीयेन नित्यत्वं चतुर्थेन, आन्तरिकचिन्तादिदुर्गुणाभावः पंचमेन व्याकृतः, एतेषां समष्टि : पंच विंशति गुण समुदायः पंचतत्त्वात्मक एक एव देवः परपिण्डः सदाशिव इत्युच्यते ॥२३॥

भा० टी० अब परमात्मा (ब्रह्म) देव के पाँच गुणों का वर्णन किया जाता है।

१—(अक्षयत्व संसार रूप उपाधि के क्षय होने पर भी परमात्मदेव के स्वरूप का क्षय नहीं होता। अतः अक्षयत्वरूप प्रथम गुण परमात्मा का जानना।

२—(अभेद्यत्व) अनेकउपाधियों के भेद रहने पर भी वास्तव में परमात्मा के स्वरूप में भेद नहीं हो सकता। अतः अभेद्यत्वरूप दूसरा गुण जानना।

३—(अछेद्यत्व) परमात्मा निरवयव है इस लिये अवयवके छेदन से इसका उच्छेद नहीं होता। अतः अछेद्यत्व रूप तीसरा गुण परमात्मदेव का जानना।

४—(अविनाशित्व) अवयव विनाश को छोड़ कर स्वतः भी इस परमात्मदेव के स्वरुप का विनाश न होने से अविनाशित्व रूप चौथा गुण जानना।

५—(अदाह्यत्व) आध्यात्मिक आधिदैविक आधिभौतिक इन त्रिविध ताप रूपी दुखों से समस्त चराचर विश्व व्याप्त है। अतः इन त्रिविध दुखों की परम्परा से दग्ध होता रहता है किन्तु परमात्मदेव आन्तरिक तापादि दुःखों से रहित है अतः अदाह्यत्व रूप पंचम गुण जानना। ऊपर लिखे ये पांच गुण परमात्म देव में सदैव रहते हैं।

मू०-उक्तञ्च। अपरंपरं, परमपदं शून्यं निरञ्जन परमात्मानौ, पंचभिरेतैः सगुणै रनाद्यपिण्डः समुत्पन्नः २४

सं० टी०—अयमत्र निष्कर्षः। महाप्रलये निखिलं जगत् महा मायायां लीनं सापि चिद्रूपा सती चिद्रूपशिवेना भिन्नतयाऽभिन्नः आदिनाथो निर्गुणस्तदा सम्वृत्तः। ततः सृष्टिसमये सर्वतः प्रथमं पञ्चपंचगुणात्मकपंचशक्तीनामाविर्भावः। तत्र एकैकया सहित चेतनस्यैकैकदेवत्वेन पंचदेवा आविर्भूताः सर्वासां एकत्रीकरणे तत्समष्टिसहित श्चेतनः, अनाद्यपिण्डः सगुणपरमेश्वरः सदाशिव इत्यादि रूपेण प्रसिद्धोस्ति तस्यैव पंचावयवा अपरम्परेत्यादि, एकैकोऽप्य वयवः सकलकार्यसम्पादनपटुः। समुदायस्त्वेको ऽतएव पञ्चा- नन नामप्रसिद्धिः—श्लोके सगुणैरिति सहयोगे तृतीया पूर्वं पिण्डाभावा दयमेव प्रथमः पिण्डः साकारः। अथवा नास्ति, आद्यो यस्मादि त्यनाद्य इतः पूर्व—आद्यकारणं यस्य स इति नित्यपिण्डत्वं सूचितम् ॥२४॥

भाषा टीका—पूर्वोक्त रीति से पांच शक्तियों के समुदाय अनादि पिण्ड के अपरंपर आदि पांच देव रूप पांच तत्त्व हैं और वेही पांच अङ्ग होते हैं उन अङ्ग भूत पंच देवों में भी प्रत्येक में पांच ५ गुण रहते हैं उन सब को जोड़ देने से पच्चीस गुण होते हैं इसी अभिप्राय को श्री नाथ जी गद्य में वर्णन कर के अपरंपरमित्यादि पद्यद्वारा उपसंहार करते हैं।

यहां सारांश यह है कि महाप्रलय में यह समस्त जगत् महा शक्ति में विलीन होता है और वह चिद्रूपा महाशक्ति भी चिद्रूप परमेश्वर से अभिन्न रहती है। उस समय निर्गुण आदि

नाथ अर्थात् परमनाथ तत्त्व था उस के उपरान्त जब सृष्टि रचने का समय आता है तब सब से पहले अपने पांच २ गुणों से युक्त पांच महा शक्तियों का प्रादुर्भाव होता है और उन पाच शक्तियों में एक एक शक्ति युक्त एक २ देव रूप से सब को मिला कर पांच देव का आविर्भाव हुआ। इन सब शक्तियों के सहित जो चेतन है उसी का नाम "अनाद्यपिण्ड है और वही सगुण परमेश्वर सदाशिव इत्यादि नाम से भी प्रख्यात है, उसी सर्वेश्वर के अपरंपर, परमपद शून्य, निरञ्जन, परमात्मा ये पाँच देवता अवयव रूप हैं। इन देवों की सामर्थ्य भी जीव बुद्धी से अगम्य है। अतः 'अनाद्य" पिण्ड का अङ्ग भूत एक २ देवता भी संसार विषयक रचना पालन संहारादि कार्य सम्पादन में समर्थ है यह सब मिला कर समष्टि देव के अङ्ग स्वरूप हैं। इसी लिये उस समष्टि देव का पंचानन (पंचमुख) हर नाम भी प्रसिद्ध है। इस से पहले कोई अन्य पिण्ड नही था, इस कारण यह अनाद्य पिण्ड कहलाया। २४॥

मू०—अनाद्यात् परमानन्दः परमानन्दात् प्रबोधः प्रबोधाच्चिद्उदय श्चिदुदयात्प्रकाशः प्रकाशात् सोहम्भावः ॥२५॥

सं० टी० एतस्मात् अनाद्यपिण्डाख्यपरमेश्वरादाद्य पिण्डाख्यस्य महातत्त्वस्य पंचभूत बीजस्योत्पत्तिं व्याख्यास्यमानाः प्रथमतः तस्य पंचावयवान् पंचपंचगुणकान् क्रमेण दर्शयन्ति। अनाद्यादित्यादि ॥२५॥

भाषा टीका—अब अनाद्यपिण्ड परमेश्वर से आद्यपिण्ड पुरुष की उत्पत्ति का वर्णन किया जायगा। इस आद्यपिण्ड पुरुष के भी पांच २ गुणों से युक्त परमानन्दादि पंच देवों को अंग स्वरूप जानना। उन पाचों देवों के नाम निर्देश पूर्वक उत्पत्ति का क्रम निम्नलिखित प्रकार से जानना।

अनादि पिण्ड परमेश्वर से परमानन्द देव उत्पन्न हुआ, तथा

परमानन्द से प्रबोध, प्रबोध से चिदुदय, चिदुदय से चित्प्रकाश, चित्प्रकाश से सोहंभाव उत्पन्न हुआ । २५॥

मू०—स्पन्दो हर्ष उत्साहो निष्पन्दो नित्यसुखत्वमिति पञ्चगुणः परमानन्दः ॥२६॥

सं० टी०—अत्र आद्य पिण्डस्य पंचावयवान् परमानन्देत्यादि नाम्ना निर्दिश्य तेषु प्रत्येकं पंच पंच गुणानाह स्पन्द इत्यादि। यद्यत्कार्य सम्पादिका या या शक्तिः सा सा तत्तत्पदेनोल्लिखिता शक्तिरेव पुरुषस्य गुण इति सिद्धान्तात् तथा च **[स्पन्दः]** चलन शक्तिः **[हर्षः]** वैषयिकानन्दशक्तिः **[उत्साहः]** कृतिशक्तिः **[निष्पन्दः]** परिणाम शक्तिः **[नित्यसुखत्वम्]** स्वरूपसुखानुभवशक्तिः । एताभिः पञ्चशक्तिभिः सहितः, चेतनः परमानन्दः, आद्य पिण्डस्यैकोऽवयवः ।एवं सर्वत्र शक्ति रूहनीया ॥२६॥

भाषा टीका—अब परमानन्दादि देवों के पांच पांच गुणों का निरूपण करते हैं ।

१—(स्पन्द) चलनादि क्रिया को स्पन्द कहते हैं ।

२—(हर्ष) आनन्द या खुशी हर्ष का अर्थ है ।

३—(उत्साह) प्रयत्न की शक्ति अर्थात् हिम्मत ।

४—(निष्पन्द) नानारूप धारण करना अथवा स्थिरता ।

५—(नित्य सुखत्व) सदैव आत्म स्वरूप में नित्य सुख का अनुभव ।

ये पांच गुण परमानन्द देव में रहते हैं । २६॥

मूल—उदय उल्लासोऽवभासो विकासः प्रभा इति पंच गुणः प्रबोधः ॥२७॥

संस्कृत टीका—(उदयः) उत्पत्तिः (उल्लासः) उच्छूनता (अवभासः) 'प्रतीतिः' (विकाशः)कार्योद्गमनम् (प्रभा)स्वरूपप्रकाशः, एतत्पञ्च शक्ति सहितः प्रबोधो द्वितीयावयवः ॥२७॥

भाषा टीका—अत्र प्रबोध के गुणों का वर्णन किया जाता है।

१–(उदय) उत्पत्ति अर्थात् पैदा होना।

२–(उल्लास) चित की प्रफुल्लता।

३–(अवभास) ज्ञान।

४–(विकाश) खिलना जैसे पुष्पादि खिलते हैं।

५–(प्रभा) तेज अर्थात् स्वरूप प्रकाश।

ये पांच गुण प्रबोध देव में रहने हैं ॥२७॥

मूल–सद्भावो विचारः कर्त्तृत्वं ज्ञातृत्वं स्वतन्त्रत्व मिति पंचगुणश्चिदुदयः ॥२८॥

संस्कृत टीका—सद्भावः सत्ता (विचारः) विवेकः। कर्तृत्व ज्ञातृत्व स्वातन्त्र्य शक्ति सहित श्चिदुदय स्तृतीयावयवः ॥२८॥

भाषा टीका—अब चिदुदय के पांच गुणों का वर्णन करते हैं।

१–(सद्भाव) सदा रहना।

२–(विचार) नित्य अनित्य वस्तु का विवेक।

२–(कर्तृत्व) कर्तापन अर्थात् करने का स्वभाव।

४–(ज्ञातृत्व) जानने का स्वभाव।

५–(स्वतन्त्रत्व) दूसरे के अधीन न रहना।

ये उपरोक्त पांच गुण चिदुदय देव में रहते हैं। २८

मूल–निर्विकारत्वं निष्कलत्वं निर्विकल्पत्वं समता विभ्रान्ति रिति पञ्च गुणः प्रकाशः ॥२९॥

संस्कृत टीका—निर्विकारत्वं कार्यगतदोषासङ्गित्वशक्तिः, निःकलत्वं कार्यसम्बन्धि भेदरहितत्वम् निर्विकल्पत्वं संशयरहितत्वम् समता, एकरूपेण सर्वत्रानुगतत्वम् विभ्रान्तिः, विगता भ्रान्तिरिति विग्रहे विपर्य्ययादि दोषशून्यत्वम् एतत्पञ्चशक्तियुक्तः प्रकाशश्चतुर्थावयवः।२९

भाषा टीका—१–(निर्विकारत्व) उत्पत्ति, बृद्धि इत्यादि वि-

कारों का अभाव।

२-(निष्कलत्व) अवयव आदि का न होना।

३-(निर्विकल्पत्व) संशय रूप विकल्प का न होना।

४-(समता) सर्वत्र एक रूप से रहना।

५-(विश्रान्ति) विषयों से उपराम अर्थात् हट जाना।

ऊपर के ये पांच गुण चित्प्रकाश देव में रहते हैं ॥२९॥

मूल—अहन्ताऽखण्डैश्वर्यं स्वात्मता विश्वानुभव सामर्थ्यं सर्वज्ञत्वमिति पञ्चगुणः सोऽहम्भावः। इत्याद्य पिण्डस्य पंचतत्वं पञ्च विंशति गुणाः। परमानन्दः प्रबोधश्चिदुदय श्चित्प्रकाशः सोहम्भावइत्यन्त आद्यपिण्डो महातत्त्व युक्तः समुत्थितः ॥३०॥

संस्कृत टीका—अहंता समष्टि रूपत्वात् सर्वत्राहंभावः। अतएवाऽखण्डैश्वर्यं सर्वोपरिशासन शक्तिः किं द्वेष दृष्ट्या नेत्याह (स्वात्मता) अत्र स्वपदमात्मीयबोधक मन्यथा आत्मपदेन पौनरुक्त्यं स्यात् स्वस्व, आत्मा, आत्मीय इति यावत् तस्यभावः, तथा च सर्वत्र आत्मीयत्वेन द्वेषस्या सम्भव एवेति बोध्यम्। अतएव विश्वानुभवसामर्थ्यम् सकल साक्षात्कार शक्तिः। सिंहावलोकन न्यायेन शक्तिपदस्य प्रत्येकं योजनाय अन्त्यान्ते शक्तिपर्य्यायसामर्थ्यपदमुपन्यस्तम्। सर्वज्ञत्वमतीतानागत विषयक ज्ञान शक्तिः, एतत्पंचशक्तिविशिष्टः सोहंभावः पञ्चमावयवः। एतेषां समवाय आद्यपिण्डः! अयमेव पञ्च विंशति गुणात्मक महाततत्व गुण योगात् महत्तत्वपदेन निगद्यते हिरण्यगर्भशब्देन वा सवै शरीरी प्रथमः सवै पुरुष उच्यते इति स्मृतिः। हिरण्य गर्भः समवर्त्तताग्रे भूतस्य जातःपतिरेक आसीदिति श्रुतिः ॥३०॥

भाषा टीका—१-(अहन्ता) सर्वत्र अहंभाव, अर्थात् मैं ही सब जगह व्यापक रूप से हूं।

२-(अखण्डैश्वर्य) अणिमादिक अष्टविध ऐश्वर्य।

३-(स्वात्मता) सर्वत्र आत्म बुद्धि, अर्थात् सब प्राणियों को अपने समान देखना।

४-(विश्वानुभव सामर्थ्य) सूक्ष्म और स्थूल सकल पदार्थों के प्रत्यक्ष करने की योग्यता।

५—(सर्वज्ञत्व) सर्वज्ञता अर्थात् सब कालिकक ज्ञान शक्ति।

ये पूर्वोक्त पांच गुण सोऽहंभाव देव में जानना।

इस प्रकार आद्य पिण्ड के परमानन्द आदि पांच देवता ही पांच अङ्ग हैं, और प्रत्येक अङ्ग में पांच पांच गुण होने से सबको मिला कर पच्चीस गुण होते हैं। इन पांच देवों का समुदाय महत्तत्व रूप आद्यपिण्ड उत्पन्न हुआ। इसी को शास्त्रान्तर में हिरण्यगर्भ नाम से कहा है।

मूल—आद्यान्महाकाशो महाकाशान्महावायुर्महावायोर्महातेजो महातेजसो महासलिलम् महासलिलान्महापृथ्वी ॥३१॥

संस्कृत टीका—एते पञ्च भूताः कार्यभूताः। महापदादानेन कारणभूताः शब्दतन्मात्र स्पर्शतन्मात्र रूपतन्मात्र रसतन्मात्र गन्धतन्मात्र रूपा अपि संगृहीता द्रष्टव्याः। तेषां प्रत्येक मेकैकस्य पञ्च पञ्चगुणान् प्रदर्शयन्ति ॥३१॥

भाषा टीका—अब क्रम से आकाश आदि पंच महाभूतों की उत्पत्ति क्रम का निरूपण किया जाता है।

पांच महा भूतों का कारण आद्यपिण्ड सूत्रात्मा है उस से महा आकाश उत्पन्न हुआ। एवं महा आकाश से महावायु प्रकट हुआ। तथा महावायु से महातेज और महा तेज से स्थूल जल, स्थूल जल से स्थूल पृथिवी उत्पन्न हुई। ३१॥

मूल—अवकाशोऽच्छिद्रमस्पृशत्वं नीलवर्णत्वं शब्दत्व मिति पञ्च गुण आकाशः।

सं० टी०—[अवकाश] सर्वेषां मूर्तपदार्थानां समावेशो यथावस्थैव

... त यत्रावकाश आकाशेन न प्रदीयेत । अन्यथा परस्परं प्रतिघाते चलन विहरणादि न सिद्ध्येत । **[अच्छिद्रम्]** छिद्रपदार्थः शून्यं तच्छिद्रम् । एतेनावरणाभाव एवाकाशो न तु भाव पदार्थइति सुगत समयो निरस्तो वेदितव्यः । तथाहि वहुजन समाकुले स्थले क तिष्ठेयमिति केन चित् पृष्टोऽपरो ब्रूते यत्रावरणाभावस्तत्र तिष्ठेति वाक्ये यत्रेत्याधारभूतः कश्चन पदार्थो बोध्यतेऽभाव पदेन चाधेयभूत स्तथा चा धाराधेययोः कुण्डवदरवल् लोके भेदो दृष्टः । ततश्चाभावाद् भिन्नो य आधेयभूतः स एवाकाशो ऽभाव भिन्नत्वाद् भावभूतः । किञ्च शब्दादि गुणाधारतयापि भाव पदार्थो मन्तव्यः । न जातु गुणाधिकरणता क्वचिदपि खपुष्पादौ दृष्टा । वेदे तु पदे पदे प्रतिपादितम् । एतस्मादाकाशः संजातः । उत्पत्तिमत्त्वाद् भावभूत इत्यनुमाऽपि । नन्वेवं भावभूतश्चेत् तं पावकः कथं न दहति वृष्टिधारा वा कुतो ना द्रयती त्यत आह **[अस्पृशत्वम्]** न स्पृशति सज्जत इति, अस्पृशः तस्यभाव, तत्त्वं संगरहितत्वम् । अयमाशयः । यथा पार्थिवत्वाविशेषेऽपि घटादौ लोहलेख्यत्वं भवति मण्यादौ नेत्यत्रा वयवसंहननस्वभाव एव तथैवा स्यापि सावयवत्वोत्पत्तिमत्त्वगुणवत्त्वादेः साम्येऽपि तृणादीनां दाह्यता नत्व.काशस्य विलक्षणावयवसंहतत्वात् । किं च कार्य संहार शक्तिः स्वोपादानकारणे नतु कार्येऽतएवानलेन सलिलस्यावनेश्च दाहो भवति नतु वायोस्तदुपादानत्वात् । अतएवाकाशस्य सर्वभूतोपादानतया नान्यभूतसंहार्य्यता महाप्रलये तु भवति प्रकृतिसंहार्य्यतेति युक्ति मुत्पश्यामः । नीलवर्णम् नीलरूपम् विरलावयवोहि नीलः । ननु सर्वस्य नीरूपत्वं प्रतिष्ठापितम् कुतोऽत्र नीलरूपं व्यवस्थाप्यत इति चेत्सत्यम् अन्यै लौकिक प्रमाणैः परीक्ष्यते । अत्र तु धर्ममेघ समाधिना प्रमाण राजेन । अतो नास्ति विरोधः । सूक्ष्मरूपेण सद्भावात् नापामरं निरीक्ष्यते समाधौतुसूक्ष्मदृष्ट्युन्मेषेण निरीक्ष्यते योगिभिः । तदातज्ज्ञानं भ्रमं मत्वा समाधावपि भ्रमो ना पसरतीति विपरीत प्रत्ययो योगिभिर्नाधेय इत्युपदेशाय वस्तुतो विद्यमानमेव सूक्ष्मरूपं तत्र व्यज्यते स्वदृष्टेरति विशदतया यन्निरीक्ष्यते तत्सत्यमेव न भ्रमो मन्तव्य इति । यथा परमाणो र प्रत्यक्षत्वम् प्रतिष्ठापितम् लौकिक दृष्ट्या तत्तथ्यमेव

किन्तु यन्त्र विशेषेण परमाणुरपि निरीक्ष्यते न तावतोभयोर्विरोधः । भिन्न प्रकारेण प्रतिपादनात् । उपादाने सूक्ष्मावस्थया विद्यमान एव गुणः स्वकार्येऽभिव्यज्यत इति शरणैः सकलैरेव सद्वादावलम्बिदार्शनिकै रङ्गीकृततया पृथिव्यामभि व्यक्तं नीलं परम्परया नीलरूपवदुपादानत्वात् घटोपादान कपालोपादान मृद्वत् । अन्यथा प्रकृतेः सर्वोपादानता भज्येतेति विपक्षवाधक स्तर्कः । ननु अन्येऽपि गुणाः कथं न तत्र प्रतिपाद्यन्ते इति नोत्प्रेक्षितव्यम् समाधिनापि तेषां तत्र भानाभावात् । अस्य च भानात् यो यत्र भास्यन्ते स तस्य गुण इति निगलितनीत्या लौकिक प्रमाणै र्ये यत्र भास्यन्ते ते तस्य गुणा इति रीत्या आकाशस्य नीलरूप वत्वं व्यवस्थापितम् इति कानुपपत्तिः को वा विरोधगन्धोपीति विविच्यताम् विवेका नुषक्त चेतोभि र्विमर्शिचद्वरै र्निर्मत्सरैः । असद्वादावलम्बिमतमादाय विप्रतिपत्ता असद्वाद एव तावद् श्रुतिस्मृति युक्त्यासकलप्रमाणप्रतिषिद्ध इति दण्डनिपातेन परिहरणीयः । श्रुति स्मृत्यादयोऽपि सद्वाद प्रदर्शनेन मदीयानुमानेऽनुकूला एव न प्रतिकूलतामाचरन्तीति वेद्यम् [शब्दत्वम्] शब्दो ऽस्त्यस्मन्निति मतुपि गुण वचनेभ्यो मतुपो लुगिष्ट इति लुकि ततोभावे त्वप्रत्यये शब्द इति फलितम् प्रकृति जन्य बोधे प्रकारस्य भावपदार्थत्वात् एते पञ्च गुणा आकाशे सन्तीति केचित्तु विशेषरूपाभाव एव एवञ्चाकाशे कस्यापि विशेषरूपस्य मानाभावे नील वर्णो यमिति व्यवहारो दृष्टश्च लोके अकृष्णोऽपि देवदत्तः पटोवा उज्ज्वलश्वेताभावेऽपि नीलोयमिति व्यवह्रियते । अत एवोपासनाकाण्डे रूपरहितस्यापि परमेश्वरस्य नीलरूपवत्वेनोपासते यथा च नैयायिका तेजोभाव एव तम इति निगदन्तीत्याहुः ॥३२॥

भाषा टीका—अब आकाश के पाँच गुणों का निरूपण करते हैं

१—(अवकाश) पोल, अर्थात् सर्वमूर्त पदार्थों का आश्रय।
२—(अछिद्र) छिद्रशून्य अर्थात् जिस में छेद न हो।
३—(अस्पृशत्व) स्पर्श से रहित याने जो छुवा न जा सके।
४—(नीलवर्णत्व) नीलरूप।

५—(शब्दत्व) ध्वनि अर्थात आवाज
ये पूर्वोक्त अवकाशादि पांच गुण आकाश के जानना।

मू०--सञ्चारः संचालनं स्पर्शनं शोषणं धूम्रवर्णत्व-मिति पञ्चगुणो महावायु ॥३३॥

सं० टी०--[सञ्चारः] चलन : क्रिया, संयोगानुकूलव्यापार इति पंचसु भूतेषु सर्वतः प्रथमं वायावेव गमनक्रिया ऽभिव्यज्यतेऽतः, तस्यैवासाधारणो गुणो मन्तव्यः। नन्वेवंतेजस उर्द्ध गमनं जलस्य निम्नचलन मित्यादि कथं दृश्यते इत्यत आह [संचालनम्] अन्येषु चलन जनिका प्रेरणा संयोगानुकूलव्यापारानुकूलव्यापार इतियावत्। एतदुक्तं भवति स्वतश्चलनं तत्रैव ततसम्बधादेवा ऽन्यत्रापि तदुत्पद्यते ऽत एव मृतशरीरे ऽन्तःप्रेरक वायु विरहान् न चलनादि जायते जीवच् शरीरे तत्सत्वे तद् भवतीति तद्भावाभावानुविधायित्वात् सिद्धं तन्निमित्तकं चलनम्। अतएव चेन्द्रियादि निग्रहाय प्राण एवावरोध्यते प्राणायामेन योगिभिः। तस्मिन्नवरुद्धे ऽवरुद्धान्येव भवन्तीतरेन्द्रियाणीति प्रत्यक्षतरम् बटुतरयोगिनामपि। अधिभूतसृष्टिष्वपि दीयताम् दृष्टिः यद्ययम् प्रवहादिवायुर्न प्रवहेत तदा कुकुमुदकमलिनीपतितारागोलचक्र भ्रमणनिमित्तक निखिलरात्रिंदिवादिव्यवहार स्तत्क्षणं प्रलुप्येतेति स्वयन्निरीक्ष्योत्प्रेक्ष्यताम् वा शिक्ष्यताम् ज्योतिषादिशास्त्रतः। [स्पर्शनं] स्पर्श गुणः। अत्र शीतोष्णादिविशेषरूपेणानवभासात् सामान्ये नाभिहितमतो ऽनुष्णाशीत स्पर्श इतिफलति। एतस्यैव विशेषा यथा शीतादि जलादिभूतेषु। [शोषणम्] अन्येषां जलादीनां तदीय गुणानां वा स्वावयवेषु संहरणंवा प्रसारणंशोषणपदार्थः। अतएव श्री गंगा गतशैत्य पावनत्वादि तत्तटेऽपि कुसुमकाननपरिसरवर्त्तिनामपि बहुलामोद श्चेत्यादि बहुतरमुन्नेयम्। [धुम्रवर्णत्वम्] कृष्णलोहितरूपम् अत्रापि यद्वक्तव्यम् तत् पूर्वोक्तमेव। एते पञ्चगुणा महावायौ सन्ति।

भाषा टीका—अब वायु के पांच गुणों का वर्णन किया जाता है।

१—(संचार) चलना।

५—(संचालन) चलाना

३—(स्पर्शन) स्पर्शन अर्थात् छूना।

४—(शोषण) सुखाना

५—(धूम्रवर्णत्व) धूमे जैसा रूप।

ये उपरोक्त पांच गुण महावायु में रहते हैं। ३३ ॥

मू०— दाहकत्वं पाचकत्वमुष्णत्वं प्रकाशत्वं रक्तवर्णत्वमिति पञ्च गुणं महातेजः ॥३४॥

सं० टी०—दाहकत्वम् स्वकार्यभूतयोर्जल पृथिव्योः संहारकत्वम् अत्र दाहो द्विविधः क्वचित् गुणस्यैव यथोष्णजले केवलशैत्यगुणस्यैव न जलस्य क्वचिच्च स्वीयगुणाधिक्ये गुणिनोऽपि जलस्य तृणादेश्च [पाचकत्वम्] रूपरसान्तरसम्पादकत्वम् शरीरे ऽशिताम्रादे रसान्तर परिवर्तनं जठरानलतेजः सम्बन्धात् घटादौ श्यामरूपस्य नाशे रक्त-स्योत्पत्तिः, आम्रादिफले आमलस्य हरितरूपस्य च नाशः, माधुर्यस्य रक्त पीतादिरूपस्य चोत्पत्ति स्तज्जनक व्यापारः, विलक्षणसंयोगाख्यः पाचकत्वम् तेजोनिष्ठम्। [उष्णत्वं] उष्णगुणः, अतएवा अन्यमपि उष्णा-यति योहि स्वयं धनी स एवान्यं धनयितुमलम् [प्रकाशत्वम्] प्रकाशगुणः तमो विनाशकः [रक्तवर्णत्वम्] रक्तरूपम् भगवती श्रुति रप्याह यद्रोहितम् रूपम् तत्तेजसः। एते पञ्च गुणाः तेजसि सन्ति ॥३४॥

भाषा टीका—अब तेज गुणों का वर्णन करते हैं।

१—(दाहकत्व) जलाना।

२—(पाचकत्व) पकाना।

३—(उष्णत्व) उष्णता अर्थात् गर्मी।

४—(प्रकाशत्व) प्रकाश याने उजाला।

५—(रक्त वर्णत्व) लाल रंग।

इन पूर्वोक्त पांच गुणों से युक्त महा तेज हैं। ३४ ॥

मू०—प्रवाह आप्यायनं द्रवो रसः श्वेतवर्णत्वम् इति पञ्च गुणं सलिलम् ॥३५॥

सं० टी०—[प्रवाहः] प्रवहति नीचैर्गच्छतीति। अतएव नदी वहतीति प्रयोगः किञ्च तृणादीनां स्ववेगेन देशान्तरं प्रापयतीति प्रापणार्थक वहधातोर्घञिरूपम्। [आप्यायनं] वर्धनम् अतएव जलसंयोगात् बीजमुच्छूनं भवति जलेन विक्लेदिता स्तण्डुला ओदना भवन्ति जल सेकादेव तृणगुल्म शाल्यादयो बर्धन्त इत्यादि सार्वजनीनम् द्रवः, आद्यस्यन्दना साधारण कारण गुणो द्रवत्वम् [रस.] मधुर एव स्वाभाविकः पृथिव्याद्युपाधिवशादाम्लादिकम्। [श्वेत वर्णत्वम्] श्वेतरूपमिति सर्वजनीनम् य-च्छुक्ल तद्पामिति श्रुतिरूपदिशति। एते पञ्च गुणा जले सन्ति ॥३५॥

भाषा टीका—[**प्रवाह**] वेग। [**आप्यायन**] बढना या तरङ्गों के द्वारा ऊपर को उमड़ना। [**द्रव**] पिघलना। [**रस**] मीठा स्वाद। **श्वेतवर्णत्व** श्वेतरूप। ये उपरोक्त पांच गुण जल के जानना। ३५।

मू०—**स्थूलता नानाकारता काठिन्यं गन्धः पीतवर्णत्वमिति पंचगुणा महापृथ्वी। इति महासाकार पिण्डस्य पंचतत्त्वंपंचविंशतिगुणाः ॥३६॥**

सं० टी०—[स्थूलता] अधिकगुणासंघातः। नानाकारता। आकारो नाम अवयव सन्निवेशः सच पृथिव्यां नाना यथा घटपटगोमहिषीमातङ्गाद्यनन्तरूपा अवयवसन्निवेशाः सार्वपथीना न शक्या अपह्नोतुम् क्षीण विज्ञानादिभिरिति बोधयितुमुपन्यस्तम्। 'काठिन्यं' निबिडावयव संयोग विशेषो यथोपलादौ "गन्धः" स द्विविधः सुरभि रसुरभिश्चेति 'पीतवर्णत्वम्' पीतरूपम् यद्यपि पृथिव्यां सर्वाणिरूपाणिपूर्वभूतगुणानामुत्तरोत्तरेऽनुवर्त्तनात् तथापि यथा रक्तादयः पूर्वत्रोपलभ्यन्ते नैवं पीतम् इदं त्व त्रैवेत्यत आह पीतवर्णत्वम् इति। एते पंच गुणाः पृथिव्यां सन्ति। एतेषां समुदाय एव चिदचित्संवलितो महासाकारपंचतत्त्वात्मकः पंचविंशतिगुणाविशिष्टः पञ्चानन शिवः श्रुतौ वैश्वानर विराडादि शब्दै र्व्यवह्रियते ॥३६॥

भाषा टीका– अब पृथ्वी के पांच गुणों का वर्णन करते हैं। **[स्थूलता]** मोटापन। **[नानाकारता]** पर्वत, तरु, लता आदि रूप से तथा सम विषम मरुस्थल आदि भेद से पृथ्वी के अनेक आकार देखने में आते हैं। यही नाना आकारता पृथ्वी का दूसरा गुण है।

काठिन्य] कठिनता अर्थात् कड़ापन **[गन्ध]** महक। यहां सुगन्ध और दुर्गन्ध। इन दोनों का गन्धपद से ग्रहण जानना **[पीतवर्णत्व]** पीलावर्ण। यद्यपि पृथ्वी में और भी चित्र विचित्र रंग देखने में आते हैं तब पीला रूप पृथ्वी का विशेष गुण क्यों कहा तथापि जैसे तेज आदि में लाल रंग आदि की प्रतीति होती है वैसे पीला रंग पृथ्वी से अन्यत्र नहीं देखने में आता केवल पृथ्वी में ही अभिव्यक्त होता है। अतः पीले वर्ण को ही पृथ्वी का गुण कहा है। ये पूर्वोक्त पांच गुण महापृथ्वी में रहते हैं।

भाषा टीका—इन पांच महाभूतों का समष्टिरूप महा-साकार पिण्ड होता है और उस समष्टि पिण्ड के आकाश आदि पांच भूत ही पांच तत्त्व रूप पांच अंग हैं। तथा एक भूत में पांच गुण होने से पच्चीसगुण साकार पिण्ड के जानना। ३६ ॥

मूल–स एव शिवः शिवाद् भैरवो भैरवाच् श्रीकण्ठः श्रीकण्ठात् सदाशिवः सदाशिवादीश्वर ईश्वराद्रुद्रो रुद्राद्विष्णु विष्णो ब्रह्मेति महासाकार पिण्डस्य मूर्त्यष्टकम् ॥३७॥

सं० टी०–"स एव" पूर्वोक्त पिण्ड एव शिवस्ततो भैरवोजातः सोऽपि तावद्गुण विशिष्टो न तु न्यून इत्येकस्यैव शिवस्य मूर्त्यष्टक कथनेन व्यज्यते शिवो भैरवः श्री कण्ठः सदाशिव ईश्वरो रुद्रो विष्णु ब्रह्मेत्यष्टौ मूर्त्तयः संजाता एते हि समष्टिभूता देवा अनन्त ब्रह्माण्डान् रचयन्ति यथासमयं प्राणिकर्मानुरूपं रक्षन्ति नियमयन्ति संहरन्ति तारयन्ति च ततः ब्रह्माण्ड प्रतीशास्ते सर्वे मुमुक्षुभिर्बुभुक्षु

भिश्च स्वस्वाभिष्ट सिद्ध्यै पूजनीया इति प्राग्ऽनुजिघृक्षयोपदिशन्त्या-चार्याः ॥३७॥

भाषा टीका—अब साकार आठ देवों के उत्पत्ति क्रम का निरूपण किया जाता है। जो पूर्वोक्त विवृत आठ पिण्ड हैं वहां पच्चीस गुण स्वरूप चित अचित् रूप से महासाकार पिण्ड रूप में प्रकट हुआ और वही साकार पिण्ड पंचानन शिव कहलाता है। उस साकार शिव जी से भैरव प्रकट हुआ। भैरव से श्री कण्ठ श्री कण्ठ से सदाशिव सदाशिव से ईश्वर ईश्वर से रुद्र रुद्र से विष्णु और विष्णु से ब्रह्मा जी पैदा हुये। इस प्रकार महा साकार विष्णु की आठ मूर्तियों का विभाग जानना। आधिदैविक आधिभौतिक आध्यात्मिक इस प्रकार तीन भेदों से त्रिविध सृष्टि प्रधान है। क्यों कि अधिष्ठाता अन्तर्यामी देव के द्वारा ही चराचर सकलविश्व का संचालन होता है और देवोपासना द्वारा ही चार प्रकार के पुरुषार्थ की सिद्धि होती है। इस लिये इस ग्रन्थ में सब से पहले देव सृष्टि का निरूपण किया गया है। ३७ ॥

मू०—तद् ब्रह्मणः सकाशादवलोकनेन नरनारी रूप प्रकृतिपिण्डः समुत्पन्न स्तत्र पंच पंचात्मकं शरीरम् ॥३८॥

संस्कृत टीका—[तस्मात् ब्रह्मणः] परमेष्ठिनः सकाशादवलोकनेन, संकल्पेन स्त्री सम्पुटितः पुरुषः। [प्रकृति पिण्डः] व्यक्ति सृष्टेः कारणभूतो मनुप्रजापतिः शतरूपासहितः संजातः, ततः प्रभृति जरायु-जादिभौतिकसृष्टिर्भवति। तदपि शरीरं पंचभूतात्मकं प्रत्येकभूतस्य पञ्च पञ्च गुणात्मकं तस्मिंस्तस्मिन् शरीर एकैकभूतस्य यानि यानि कार्याणि तानि प्रदर्शयन्ति, अस्थिमांसेत्यादि मनुष्यानधिकृत्य प्रवृत्त मिदं शास्त्रम् अतो मनुष्य शरीरेषु पंचानामपि भूतानां विद्यमानत्वे-ऽपि पृथिव्यंशस्याधिक्येन पार्थिवत्वम् तस्मात् प्रथमम् पृथिवीकार्या-ण्यारभ्याकाशगुणकथनेन समापितम् ॥३८॥

भाषा टीका—इस के उपरान्त देव मनुष्यादि सृष्टि के क्रम से

प्रेरित हुये ब्रह्मा जी के संकल्प द्वारा और उसी परमपितामहब्रह्मा जी से नरनारी रूप प्रकृतिपिण्ड अर्थात् शतरूपा सहित मनुप्रजापति उत्पन्न हुआ। उस के बाद उनसे जरायुज अण्डज स्वेदज आदि समस्त भौतिक पिण्डों की उत्पत्ति हुई। और वही प्रकृति पिण्ड पांच भूतों के पांच पांच गुणों से युक्त होने से पांचभौतिक शरीर कहलाता है और यह भौतिक शरीर भी पंचभूतात्मक है। वहाँ पर शरीरगत पाँच भूतों के गुणों का वर्णन विपरीत क्रमद्वारा किया जायगा अर्थात् पृथ्वीसे लेकर आकाश पर्यन्त इस का आशय यह है कि मनुष्यों का अधिकार करके यह शास्त्र प्रवृत्त हुआ है और मनुष्यों के शरीर में पाँच भूतों के विद्यमान होने पर भी पृथ्वी अंश का आधिक्य है। इसी लिये यह पार्थिव शरीर कहलाता है। अतः इस शरीर में सब से पहले पृथ्वी के गुणों का वर्णन किया जायगा। बाद में जल से ले कर आकाश पर्यन्त के गुणों का वर्णन करेंगे। ३८ ॥

मू०--अस्थि मांसत्वङ्नाड़ीरोमाणीति पंच गुणा भूमिः ॥३९॥

संस्कृत टीका--शरीरेऽस्मिन् भुक्ताभोगचितानाम् अस्थि मांस त्वङ्रोमेति पञ्चानाम् काठिन्यमुपलभ्य काठिन्यगुणविशिष्ट पृथिव्युपादानकत्वं सुनिरूपितम् भवति तथाच यद् यस्य कार्य्यम् तत्-तस्यगुण इति न्यायेन पृथिवी गुणत्व मुक्तम् ॥३९।

भाषा टीका--अब यहाँ से पृथ्वी के पाँच गुणों का वर्णन किया जाता है

[**अस्थि**] हड्डी। [**मांस**] मांस। [**त्वक्**] त्वचा अर्थात् खाल। [**नाड़ी**] नाड़ी। [**रोम**] लोम अर्थात बाल। ये पाँच गुण पृथ्वी के पार्थिव शरीर में रहते हैं। ३९ ॥

मूल--लाला मुत्रं शुक्रं शोणितं स्वेद इति पंचगुणा आपः ॥४०॥

संस्कृत टीका—एवं लाला मूत्र शोणित प्रस्वेदेषुद्रवत्वोपलब्ध्या जलोपादानत्वाज् जलीयगुणत्वमुक्तम् ॥४०॥

भाषा टीका—[**लाला**] लार। [**मूत्र**] पेशाब। [**शुक्र**] वीर्य। [**शोणित**] रुधिर। [**स्वेद**] पसीना। शरीरगत ये पाँच गुण जल के हैं। ४०॥

मूल--**क्षुधा तृषा निद्रा कान्तिरालस्यमिति पञ्च गुणं तेजः ॥४१॥**

संस्कृत टीका—क्षुधातृषा निद्रा कान्त्यालस्येषु च दाहकत्व पाचकत्वोपलब्ध्या तैजसत्वेन तेजोगुणत्वम् अत्र कान्ति लावण्यं शुक्ल कृष्ण साधारणो गुणः। न नु, आलस्यम् निद्राच कथं तेजो गुण इति चेत् शृणु तैजसंहि पित्तं यदा प्रवर्धमानं तत्तन्नाडीरन्ध्रान् विरलतया व्याप्नुते तदा ऽलस्यं जनयति यदा च परिपूर्णतया ऽश्नुते तदा मनसः संचरितुमवकाशाभावात् निद्रां जनयतीति प्रत्यक्षम् ॥४१॥

भाषा टीका—[**क्षुधा**] भूख [**तृषा**] प्यास। [**निद्रा**] नींद [**कान्ति**] प्रभा [**आलस्य**] काम में अरुचि शरीर में ये पाँच गुण तेज के जानना।

यद्यपि आलस्य और निद्रा में तमो गुण प्रधान होने से इन को तेज का गुण नहीं कहना चाहिये ऐसा अचानक सन्देह होता है क्योंकि आग जलने आदि तेज कार्यों में अक्सर चंचलता और तरलता देखने में आती है तथापि यहां सन्देह न करना चाहिये क्यों कि जब शरीर में तेज का कार्य पित्त बढा हुआ नाड़ियों के छिद्रों में विरल रूप से व्याप्त होता है तब वह आलस्य को उत्पन्न करता है इसीलिये श्री योगाचार्य जी ने तमोगुण प्रधान आलस्य को तेज का गुण कहा है। इसी प्रकार जिस की जठराग्नि अच्छी तरह से बढी हुई है वह पुरुष जब पेट को भरने के लिए खूब खाता है उस समय पेट की गर्मी की अधिकता से पित्त ज्यादा मात्रा में बढकर समस्त नाड़ियों के छिद्रों में पूर्ण रूप से व्याप्त होता है तब मन को नाड़ियों में इधर उधर घूमने

का अवकाश न मिलने से निद्रा उत्पन्न होती है इसी लिये श्री नाथ जी ने निद्रा को भी तेज का गुण माना है ॥ ४१ ॥

मू०--धावनं भ्रमणं प्रसारण माकुञ्चनं निरोधन मिति पंचगुणो वायुः ॥४२॥

सं० टी०—तथैव धावन भ्रमण प्रसारणा कुञ्चन निरोधेषु वायु जन्यत्वेन वायु गुणत्वम् । उत्कट कोटिक शीघ्र गमनं धावनम् अनियत दिक् देशगमनम् भ्रमणं कचित् प्लवनमिति पाठः, तस्य मण्डुकगति वदुत्प्लवनमर्थः । प्रसारणम् सर्वदिक्संयोगानुकूलव्यापारः । आकुञ्चनम् स्वाभिमुखसंयोगानुकूलव्यापारः । निरोधनम् नियतदेश संयोगानुकूल व्यापार इत्यर्थः ॥४२॥

भाषा टीका—अब शरीर में वायु के पांच गुणों का वर्णन किया जाता है ।

धावन दौड़ना । **भ्रमण** घूमना या **प्लवन** तैरना । **प्रसारण** फैलाना **आकुञ्चन** खेंचना या समेटना । **निरोध** प्रतिबंध, अर्थात् रोकना । ये उपरोक्त पांच गुण शरीरस्थ वायु के जानना । ४२

रागो द्वेषो भयं लज्जा मोह इति पंच गुण आकाशः। इति पंच विंशति गुणानां भूतानां पिण्डः ॥४३॥

सं० टी०--एवम् राग द्वेष भय लज्जा मोहेषु सूक्ष्मत्व हृदयाकाश संचारित्वयोरुपलब्ध्या हृदयाकाशाश्रितान्तःकरणाश्रितत्वेन चाकाश कार्यत्वम् साक्षात् परम्परयाच निश्चितयाकाशगुणत्वमुक्तम् अन्यत सर्वं सुगमम् पूर्वोक्तपंचविंशतिगुणात्मकभूतानां समुदायो भौतिक शरीरमिदम् ॥४३॥

भाषा टीका—अब शरीर गत आकाश के पांच गुणों का वर्णन करते हैं । **राग** धन पुत्र स्त्री इत्यादि भोग्य विषयों में आसक्ति का नाम राग है । **द्वेष** अप्रीति, वैर अर्थात् आत्म प्रतिकूल पदार्थों में प्रेम का न होना । राग और द्वेष ये दोनों कल्याण के बाधक हैं

अतः ये सब के लिये त्याज्य हैं, इसी भाव को लेकर श्रीनाथ जी ने विवेक मार्तण्ड में कहा है—

रागद्वेषौ यदि स्यातां तपसा किं प्रयोजनम् ।
तावेव यदि न स्यातां तपसा किं प्रयोजनम् ॥

भय डर । **लज्जा** शर्म । **मोह** अज्ञान अर्थात् वस्तु के सच्चे स्वरूप को न जानना । ये उपरोक्त पांच गुण आकाश के जानना !

शंका—ये राग द्वेषादि तो अन्तःकरण के धर्म हैं फिर आकाश के गुण क्यों कहे ?

उत्तर—जैसे शरीरस्थ हड्डी आदि पृथ्वी के कार्य होने से उसी के गुण कहे गये हैं, वैसे ही ये रागादि भी शरीरस्थ हृदयाकाश का आश्रय लेकर संचार करते हैं या हृदयाकाश में रहने वाले अन्तःकरण के आश्रित होकर ये रागादि रहते हैं । तथा हृदयाकाश का भूताकाश से भेद नहीं हैं जैसे मठाकाश का महाकाश से । अतः साक्षात् वा परम्परा से आकाश कार्य्य होने से आकाश के गुण कहे गये हैं । इस प्रकार एक एक भूत के पांच पांच गुणों का शरीर में निरूपण किया है, उन पांच भूतों के पांच २ गुणों से याने भूत समुदाय के पच्चीस गुणों से ही यह प्रकृति पिण्डरूप पंचभौतिक देह उत्पन्न होता है ।

मू०—मनो बुद्धि रहंकार श्चित्तं चैतन्यमित्यन्तः करण पंचकम् ॥४४॥

संस्कृत टीका—स्थूल शरीरं प्रदर्श्य तदभ्यन्तरे प्रविश्य तत्संचालकः सूक्ष्म शरीरापरपर्य्यायः आमोक्षं पर्यवस्थायी लिङ्गात्मा प्रदर्श्यते । सोऽपि पंच पंचात्मकः अतस्तत्र प्रथमं पञ्चवैध्यमाह मन इत्यादि, अत्रेदं बोध्यम् यथा सामूहिकरूपेण एकमेव स्थूलं शरीरं सर्वावयवानुविद्धं विभजने पार्थक्येन पञ्च पञ्चात्मकं प्रदर्शितम् तथैवेदमपि सर्वतोऽनुविद्धम् एकमेव द्रव्यं किन्तु तस्यापि विभजनेऽवयवशः पञ्चविधत्वं तत्रापि पञ्चपञ्चकार्याणि वृत्तिभेदेन विभज्य

पञ्चपञ्चात्मकं सुष्ठु व्यवस्थापयिष्यते ॥४४॥

भा० टी०—अब अन्तःकरण का वर्णन करते हैं यद्यपि अवयवी केवल एकही अन्तःकरण है तथापि अवयवों के द्वारा उसी के मन बुद्धि आदि पांच भेद जानना। अब उन ही मन बुद्धि आदि के पांच पांच गुणों का निरूपण किया जायगा—

मन, बुद्धि, अहंकार, चित्त, चैतन्य, इस प्रकार से पांच प्रकार का अन्तःकरण है, ये भेद पूर्वोक्त अन्तःकरण की वृत्ति के जानना ।४४

मू०—संकल्पो विकल्पो मूर्च्छा जड़ता मनन मिति पंच गुणं मनः ॥४५॥

सं० टी०—तत्र प्रत्येकमवयवानां वृत्तिभेदेन पञ्चपञ्चगुणानाहुः। **[संकल्प इत्यादि] संकल्प** इदं मे भूयादित्याशा **विकल्पः** स्थाणुर्वा पुरुष इत्याद्याकारक एकधर्मिकविरुद्धकोटिक धर्मद्वयावगाहि ज्ञानं संशयः **[मूर्च्छा]** मोहः, अतद्वति तत्प्रकारकोबोधः। यदवच्छेदेन तत् सम्बन्धाभावः, तदवच्छेदेन तत्सम्बन्धविषयकज्ञानमिति यावत्. यथा शुक्तौ "इदं रजतम्" **[जडता]** अविवेकता **[मननम्]** तर्कः। व्याप्यारोपेण व्यापकारोपः, यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादित्याकारक इति पंचगुणा मनसः ॥४५॥

भा० टी०—अब शरीरगत मन के पांच गुणों का वर्णन किया जाता है।

संकल्प—यह वस्तु मुझे मिल जाय इस प्रकार की आशा का नाम संकल्प है।

विकल्प—सन्देह, अर्थात् यह मनुष्य है या कुछ और है इस प्रकार के संशयात्मक ज्ञान को विकल्प कहते हैं।

मूर्छा—मूढता, अथवा मन की अचेत अवस्था को भी मूर्छा कहते हैं।

जड़ता—मन्दता अर्थात् ग्राहिणी बुद्धि का अभाव।

मननम्— तर्क पूर्वक विचार का नाम मनन है। ये उपरोक्त पांच गुण मन में रहते हैं-। ४५

मूल—विवेको वैराग्यं शान्तिः सन्तोषः क्षमेति पञ्चगुणा बुद्धिः॥४६॥

संस्कृत टीका--**[विवेकः]** निश्चयः। यदवच्छेदेन तत्सम्बन्ध स्तदवच्छेदेन तत्सम्बन्ध ज्ञानम् । **[वैराग्यम्]** प्राप्तेष्वपि भोगेष्वलबुद्धिः, यदाह दृष्टानुश्रविकविषयवितृष्णस्यव शीकारसंज्ञा । तत्परं पुरुषख्यातेर्गुणवैतृष्ण्य मिति भगवान् पतञ्जलिः । **[शान्तिः]** विक्षेपाभावः । **[सन्तोषः]** यादृच्छिकोपपन्नेषु कृतार्थता **[क्षमा]** सत्यप्यपराधे प्रसहसनमिति पंच-गुणा बुद्धौ ॥४६॥

भाषा टीका—अब बुद्धि के पांच गुणों का निरूपण करते हैं।

विवेक-वस्तु के स्वरूप का यथार्थ निश्चय विवेक कहलाता है।

वैराग्य-इस लोक और स्वर्गलोक के विषयों से चित्त के उपराम अर्थात् हट जाने को वैराग्य कहते हैं।

शान्ति-चित्त में चाञ्चल्यादि दोषों का न रहना शान्ति कहा जाता है।

सन्तोष-शरीर निर्वाह के लिये जैसी जितनी जो वस्तु मिल जाय उसी से सन्तुष्ट होजाने का नाम सन्तोष है।

क्षमा-दण्ड देने की शक्ति रहते हुए भी दूसरे के अपराध को सहन करने का नाम क्षमा है। ये ऊपर के पांच गुण बुद्धि में रहते हैं।

मूल—अभिमानं मदीयं मम सुखं मम दुःखं ममेद-मिति पंचगुणोऽहङ्कारः।

संस्कृत टीका—**[अभिमानम्]** अहमेव नान्यो मत्सम इति

[मदीयम्] शरीरेन्द्रियाद्याध्यात्मिकेषु सम्बन्धज्ञानम् [मम सुखम्] सुख विषयकरागः [मम दुःखम्] दुःख विषयक द्वेषः [ममेदम्] बाह्यवस्तुषु सम्बन्धज्ञानम् अवस्था भेदात् परस्परं भेदमादाय पंचविधत्वमुपवर्णितम्, अतो न पुनरुक्तता ॥४७॥

भाषा टीका–अब अहंकार के पांच गुणों का वर्णन करते हैं।

अभिमान-मैं ही अमुक कार्य करने में समर्थ हूं, दूसरा नहीं इस प्रकार के भाव का नाम अभिमान है।

मदीय-मेरा अर्थात् शरीर और इन्द्रिय आदि आध्यात्मिक वस्तुओं में 'ये मेरे हैं' इस प्रकार के सम्बन्ध को मदीय कहते हैं।

मम सुख-सुख के साथ सम्बन्ध, अर्थात सुख।

मम दुःख दुःख के साथ सम्बन्ध, अर्थात् मेरा दुःख।

ममेदम्-पुत्र कलत्रादि बाह्य वस्तुओं में 'ये सब मेरे हैं' इस प्रकार के सम्बन्ध को मम इदम् कहते हैं। उपर्युक्त ये पांच गुण अहंकार के हैं।

मूल–मतिः धृतिः स्मृतिः स्त्यागः स्वीकार इति पञ्चगुणं चित्तम् ॥४८॥

सं० टी०–मतिः इच्छा **धृतिः** उत्साहः येन शरीरेन्द्रियाणामवसाद प्राप्तौ–उत्तम्भनम् **स्मृतिः** संस्कारमात्रजन्यं ज्ञानं प्रत्यभिज्ञायाः सएवायमित्यस्य संस्कारेन्द्रियोभयजन्यत्वेन मात्रपदनिवेशबलान्नातिव्याप्तिः **त्यागः**, दानम् स्वीकार साहचर्यादतएव पूर्वोक्त वैराग्येन न पुनरुक्त मुद्भावनीयम् **स्वीकारः**, ग्रहणं दानानुकूलो ग्रहणानुकूलश्च व्यापारः चित्ते वर्तते, एते पञ्च चित्ते तिष्ठन्ति ॥४८॥

भाषा टीका–अब नीचे चित्त के पाँच गुणों का वर्णन करते हैं। **मति** इच्छा। यहां मति पद का बुद्धि अर्थ नहीं है।

क्यों कि बुद्धि के गुणों का तो पहले वर्णन हो चुका है। **धृति** धैर्य। अर्थात् धीरज। **स्मृति** संस्कारमात्र से उत्पन्न होनेवाले ज्ञान का नाम स्मृति है। **त्याग** दान। उत्तम देश कालादि सत्पात्र को देना। विवेक मार्तण्ड में श्रीनाथ जी ने भी दान देने का महत्त्व दिखाया है "न सन्तोषसमं सौख्यं न दानेन समोनिधिः" **स्वीकार** लेना। इस प्रकार ये पांच गुण चित्त के जानना। ४८॥

मूल—विमर्शः शीलनं धैर्यं चिन्तनं निस्पृहत्व-मिति पञ्चगुणं चैतन्यमेवमन्तः करणगुणाः ॥४९॥

संस्कृत टीका—विमर्शः प्रमाणैर्वस्तु परीक्षणम् विचारः **शीलनम्** भूयोऽभ्यासः, **धैर्यम्**-शरीरस्थापकव्यापारो नतु प्रवर्धकत्वम्। अयमाशयः, उत्साहेन शरीरादौ स्फुर्ति भवतियेन स्वकार्यावि प्रवर्तते। धैर्येण तु न प्रवर्तते न निवर्तते स्थितिमात्रं भवत्यनयोर्विशेषः अतो नोत्साहेन पौनरुक्त्यम्। **चिन्तनम्** विषयाभिध्यानम् **निस्पृहत्वम्** उदासीनत्वम इष्टानिष्टोभयज्ञानशून्यता। एते गुणाश्चैतन्यं। एते सर्वे पंचविंशत्यात्मका गुणा अन्तःकरणस्यैव। इति सूक्ष्म शरीरवर्णनम् ॥४९॥

भाषा टीका—विमर्श विचार **शीलन** बारंबार अभ्यास **धैर्य** धीरता। अर्थात् महाविपत्ति आने पर भी विचलित न होना। **चिन्तन** ध्यान **निस्पृहत्व** संसार के भोगों में आसक्त न होना। येपाँच गुण चैतन्य (अन्तः करण) के जानना। इस प्रकार पूर्वोक्त रीति से एक ही अन्तः करण के वृत्तिभेद के द्वारा मन बुद्धि आदि रूप से पाँच विभाग कर प्रत्येक में पाँच पाँच गुणों की निरूपण प्रणाली से २५ गुणों का निरूपण समाप्त हुआ। ४९॥

मूल—सत्वंरजस्तमः कालो जीव, इति कुल पञ्चकम् ॥५०॥

संस्कृत टीका—एषां प्राधान्येन सृष्टेः सञ्चालकतया कारण-त्वम्। अतः कुलपञ्चकशब्देन व्यवह्रियते योग तन्त्रे ॥५०॥

भाषा टीका— सत्व, रज, तम ये तीन गुण तथा काल और जीव ये कुलपञ्चक कहलाते हैं। भाव मन बुद्धि और इन्द्रिय आदि के संचालन में इन को प्रधानता रहती है। इस लिये ये पाँच कुल यानी प्रधान कहे गये हैं। ५० ॥

मूल—दया धर्मः क्रियाभक्तिः श्रद्धेति पंच गुणं सत्त्वम् ॥५१॥

संस्कृत टीका—तत्र प्रत्येकं पञ्च गुणान् विभजते **दया** प्राणिनामनुग्रहः, **धर्मः**- सुख जनकोऽदृष्टविशेषः **क्रिया**- धर्मजनकर्मा अराधनमननादि कर्म **भक्तिः**परमेश्वर तदङ्गदेव तातमंत्रतदुक्तवाक्य तन्नियमितुमर्यादाविषयिणी प्रीतिः **श्रद्धा** पूर्वोक्तविषयकास्तिक्य बुद्धि रेते पञ्च गुणाः सत्वस्य ॥५१॥

भाषाटीका- अब सत्व गुण के कार्य रूप पाँच गुणों का निरूपण करते हैं। **दया** प्राणियों पर कृपा करने का नाम दया है। **धर्म** सुखविशेषको उत्पन्न करने वाला श्रेष्ठ कर्म। **क्रिया** देवताविषक ध्यान और उपासनादि कर्म को क्रिया कहते हैं। **श्रद्धा** इस लोक से अतिरिक्त परलोकआदि भी हैं ऐसी बुद्धि का नाम श्रद्धा है। **भक्ति** ईश्वर में अनन्य भाव से प्रेम होना भक्ति कहलाती है। ५१ ॥

मूल—दानं भोगः श्रृङ्गारो वस्तु ग्रहणं स्वार्थ संग्रहणमिति पंचगुणंरजः ॥५२॥

संस्कृत टीका—**दानम्** फलमुद्दिश्य, देशकालपात्राद्यविचारेण द्रव्यविनियोगः। **भोगः**, सुख दुःखान्यतरसाक्षात्कारः**श्रृङ्गारः**, भोगाय नित्यशरीरपरिमार्जनम् नतु मोक्षाय संस्कारबुद्धया, **वस्तु**-

ग्रहणम् उपयोगमनन्वालोच्य सर्वत्र स्वामित्वसम्पादनम् **स्वार्थसंग्रहणम्** स्वभोग जनकसंचयः, एते गुणा रजसः ॥५२॥

भाषा टीका—अब रजोगुण के कार्यभूत पांच गुणों का वर्णन करते हैं। **दान** भावीफल की आशा से शुभ देश और शुभ समय में सत्पात्र का विचार न करके यथा शक्ति धन अन्न और वस्त्रादि देना। **भोग** सुन्दर रूप रस सुगन्ध और स्त्री आदि विषयों में रमण करने का नाम भोग है। **शृङ्गार** अनेक चित्र विचित्र रङ्ग विरङ्गे और चमकीले वस्त्र भूषणादिकों से शरीर को सजाने का नाम शृङ्गार है। **वस्तुग्रहण** अपने भोग के लिये उपयोगी चीजों का लेना **स्वार्थग्रहण** दूसरे की हानि का ध्यान न करके सिर्फ अपने भोग के लिये ही वस्तु के ग्रहण को स्वार्थ ग्रहण कहते हैं ॥५२॥

मूल–विवादः कलहः शोको वधो वञ्चनमिति पंचगुणं तमः ॥ ५३ ॥

संस्कृत टीका-विवादः-व्यर्थकथनं **कलहः**-अन्यायेन विरोधः **शोकः**, अशक्येपि शक्यबुद्ध्यापरिदेवनम् **वधः**-हिंसा **वञ्चनम्** इष्टविघाताय प्रतारणम् अत इष्टजनकाध्ययनादि सत्कर्मणि बालानां प्रतारणं न तामसम्। एते पञ्चगुणा स्तमसः ॥५३॥

भाषा टीका— अब तमोगुण के कार्यभूत पंच गुणों का निरूपण करते हैं **विवाद** विना प्रयोजन बोलना **कलह** आपस में विरोध। **शोक**—संताप। **वध** मारना **वंचन**-ठगना। ५३ ॥

मूल–कलना कल्पना भ्रान्तिः प्रमादोनर्थ इति पंच गुणः कालः ॥५४॥

संस्कृत टीका–कलना निखिल चराचरवस्तूनामायुः परिगणननिमित्तता। अलएव हिरण्यगर्भस्यापि द्विपरार्धपरिमितमायुरन्येषां

कथैव का **कल्पना** सकल रचना हेतुता। अतएव कश्चित वसन्ते जायते। अपरो हेमन्त इत्यादि नियमः। **भ्रान्तिः,** भ्रमधातोर्ण्यन्तात् क्तिच्। परिवर्तननिमित्तता। यथा बाल्याद् यौवनं ततो वार्धक्यं नवीनता पुराणतेत्यादि परिणामो भवति वस्तूनाम्। भ्रमहेतुता वा यया प्राचीं प्रतीचीं मन्यते। **प्रमादः** अनवधानताजनकव्यापारः। अत्रापि मद्धातोर्ण्यन्ताद्च्। अतएव प्राणिनः समय विशेषे स्वस्वकृत्येऽनवधाना भवन्ति तद्दीयनिमित्तकारणता कालस्येति यावत्। **अनर्थः** अनिष्टजनकव्यापारः। अनेनैव प्रेरितः कदाचिदनिष्टमपि चिन्तयति सम्पादयन्ति च एते गुणाः कालस्य ॥५४॥

भाषा टीका—अब काल के पाँच गुणों का वर्णन करते हैं। **कलना** एक दो इत्यादि संख्या की गणना **कल्पना** अनेक वस्तु रचना की सामर्थ्य। **भ्रान्ति**-किसी वस्तु विषयक विपरीत ज्ञान। **प्रमाद**—असावधानी। **अनर्थ**-अनिष्ट कार्यों में प्रवृत्त होना। ५४

मू०—जाग्रत् स्वप्नः सुषुप्ति स्तुरीया तुर्यातीतमिति पंचगुणोजीवः ॥५५॥

संस्कृत टीका—जाग्रत् स्थूलशरीराभिमानपूर्वक विषयेन्द्रिय सन्निकर्षजन्यज्ञानावस्था **स्वप्नः,** बाह्येन्द्रियव्यापाररहितत्वे सति संस्कारजन्यमानसज्ञानावस्था **सुषुप्तिः,** आत्माविद्यास्वरूपसुखैतत्त्रयातिरिक्त यावद् विषयकज्ञानाभावावस्था। **तुरीया** अविद्यारहितत्वेसति द्वैतभानाभावे च सति मानसवृत्तिः, **तुर्य्यातीतम्** मानसनिखिलवृत्ति विरहपूर्वकस्वरूपमात्र सद्भावः, एते पंचगुणा जीवस्य ॥५५॥

भाषा टीका—अब जीव की जाग्रत् आदि पांच अवस्थाओं का वर्णन करते हैं। **जाग्रत्**-इन्द्रियजन्यज्ञान की अवस्था का नाम जाग्रत् है। **स्वप्न** बाह्य इन्द्रियों के शान्त होने पर वासना द्वारा

मनके अन्दर अनेक वस्तुओं का ज्ञान होना स्वप्नावस्था कहलाती है। **सुषुप्ति**-जिसमें बाह्य इन्द्रिय तथा मन इन दोनों के द्वारा ज्ञान न हो ऐसी गाढ़ निद्रा का नाम सुषुप्ति है। **तुर्या** अपने आत्म स्वरूप विषयक एकाग्र चित्तवृत्ति। अर्थात् जिस समय अविद्या का भी भान न हो तथा द्वैतप्रपंच की भी प्रतीति न होती हो अपितु केवल आत्म विषयक मानसिक वृत्ति का प्रवाह जिस अवस्था में हो उसीको जीव की तुर्यावस्था कहते हैं। **तुर्य्यातीत**-निर्विकल्प समाधि। इस अवस्था में समस्त अन्तः करण की वृत्तियों का निरोध होजाता है।५५

मूल-इच्छा क्रिया माया प्रकृति र्वागिति व्यक्ति पंचकम् ॥५६॥

संस्कृत टीका-तत्रैव सूक्ष्मशरीरे ये प्रधानगुणा यै र्व्यवहारः सम्पद्यते तेषां पृथक् कृत्य व्यज्यते व्यवहारादिना ज्ञाप्यते या सा व्यक्ति रथवा व्यज्यते संभोगविषयो ययेति तत्पञ्चकम् विभज्यते। जीवस्योप भोगसाधनं तत्पञ्चकमिति भावः ॥५६॥

भा० टी०-अब व्यक्ति पंचक का निरूपण किया जाता है। इच्छा, क्रिया, माया, प्रकृति, वाक् इन पांचों को व्यक्ति पञ्चक कहते हैं।५६

मूल-उन्मादो वासना वाञ्छा चिन्ता चेष्टेति पंच गुणेच्छा ॥५७॥

सं० टी०-उन्माद उन्मत्तता इच्छाभंगे सति जायते अत-स्तेन परपुरुषवर्तिनी च्छा ऽनुमीयते, कार्येण कारणानुमानस्य सकल लोकतन्त्रप्रसिद्धत्वम्। वाऽनेनाप्यनर्थमनुभवति **वासना** प्रवृत्तिजनक व्यापारो वास्यते स्थाप्यते शरीरादि कर्तव्यम्प्रति अनयेति व्युत्पत्तेः। **वाञ्छा** धनाभिलाषा तस्या एवावस्था विशेषः, पुरुषस्य चैतन्यमिवि-वत्भेदेऽपि गुणगुणिभावः, **चिन्ता**-इष्टविषयान्वेषणं यद्विषयकेच्छा

तद्विषयक चिन्ता जायत इति **चेष्टा** कायव्यापार एव इच्छायाः ॥५७॥

भाषा टीका-अब इच्छा के कार्यभूत पांच गुणों का निरूपण करते हैं। **उन्माद**-उन्मत्तपन अर्थात पागलपना। **वासना**-पूर्व कर्मों के द्वारा उपार्जित संस्कार अर्थात् जिसके द्वारा स्वकर्तव्य में शरीरादि लगाया जाय उसको वासना कहते हैं। **वांच्छा** धनादि वस्तु विशेष को चाहने का नाम वांच्छा है। **चिंता**-इष्टवस्तु विषयक खोज। अर्थात् यह वस्तु मुझको किस प्रकार प्राप्त होसकती है इस प्रकार मन में ध्यान करना ही चिन्ता कहलाती है **चेष्टा** शरीर के व्यापार को चेष्टा कहते हैं। ५७॥

मूल-स्मरणम् उद्योगः कार्यं निश्चयः स्वकुलाचार इति पंचगुणा क्रिया ॥५८॥

सं० टी०-स्मरणम् स्मृतिजनकमानसव्यापारो ध्यानादि, स्मर्यतेऽनेनेति व्युत्पत्तेः, **उद्योगः**-साधनविषयकव्यापारो यथा घटं चिकीर्षोर्दण्डभ्रामणम् **कार्यं** साक्षाद्घटजनको दण्डादेर्व्यापारः **निश्चय** निश्चित्तिजनकेन्द्रियव्यापारः, यथा घटावलोकनाय नयनोन्मीलनम्। **स्वकुलाचारः**-वंशपरम्परागतमर्यादापालनम्। अध्ययनाध्यापनयजनप्रजापालन कृषि वाणिज्य गो गुरुजन मज्जनादि सेवनादयः। एते क्रियायाः ॥५८॥

भाषा टीका-अब क्रिया के पांच गुणों का निरूपण करते हैं **स्मरण** संसार से उत्पन्न और स्मृति ज्ञान का उत्पादक जो मन का व्यापार है उसी को स्मरण कहते हैं। **उद्योग** कार्य्यविषयक व्यापार **कार्य** घट पटादि को उत्पन्न करने वाले साक्षात् व्यापार को कार्य कहते हैं। **निश्चय** निश्चयात्मक ज्ञान को उत्पन्न करनेवाली इन्द्रियों की क्रिया का नाम निश्चय है। **स्वकुलाचार** अपनी कुल परम्परागत मर्यादा का पालन करना ॥५८॥

मूल-मदो, मात्सर्य्यं, दम्भः, कृत्रिमत्वमसत्यमिति पंचगुणा माया ॥५६॥

संस्कृत टीका-मदः, अभिमानोऽहं धनसम्पन्नः कोऽन्यो हि मत्सम इत्यादि **मात्सर्य्यम्** मत्सरता परोन्नतिमवलोक्य कथमयमुन्नतोभवति केनाप्युपायेन पातनीय इत्थं प्रद्वेषः, **दम्भः** अल्पं विदधाति, वहुलंमन्यता, **कृत्रिमत्वम्** अन्तरन्यद्, वहिरन्यथा प्रकाशनम्, **असत्यम्** मिथ्याभिभाषणमेते गुणा मायायाः ॥५६॥

भाषा टीका-अब माया के कार्य भूत पांच गुणों का वर्णन करते हैं। **मद** अभिमान। अर्थात् मैं धनाढ्य हूँ मेरे समान कौन धनी है मैं शरीर से भी वलिष्ठ और जवान हूं इस प्रकार के अविवेक का नाम मद है। **मात्सर्य्य** दूसरे की उन्नति को न सहना। **दम्भ** कार्य तो वहुत कम करे पर दूसरे के सामने यह कहे कि मैंने अमुक काय वडे अच्छे ढङ्ग से तथा पूर्ण रूप से किया है। इसी प्रकार के व्यवहार का नाम दम्भ है। **कृत्रिमत्व** बनावटीपन **असत्य** झूठ बोलना ॥ ५६ ॥

मू०-आशा तृष्णा स्पृहा काङ्क्षा मिथ्येति पंच गुणा प्रकृतिः ॥६०॥

संस्कृत टीका-आशा भविष्यद्विषयाभिलाषः, **तृष्णा** सर्व विषयाभिलाषः, **स्पृहा** ममैवभूयादित्यभिलाषा **कांक्षा** तिष्ठतु मा व्यनंक्षीरिति सामान्येच्छा **मिथ्या** असंभाव्यस्याभिलाषो यथाहं चक्रवर्ती भूयासम् एते पञ्च प्रकृतेर्गुणाः ॥६०॥

भाषा टीका- अब प्रकृति (अंतः करण स्वभाव) के कार्यभूत पाँच गुणों का वर्णन करते हैं। **आशा** आगामी वस्तु की इच्छा को आशा कहते हैं। **तृष्णा** अपने पास निर्वाह लायक सब वस्तु होते

हुये भी भोग साधनों में जो अधिक अभिलाषा होती है उसी को तृष्णा कहते हैं। **स्पृहा** यह वस्तु मुझे मिलजाय इस प्रकार की इच्छा का नाम स्पृहा है। **कांक्षा** यह वस्तु मेरे पास सदा ही बनी रहे इस प्रकार की सामान्य अभिलाषा का नाम कांक्षा है। **मिथ्या** न होने वाली वस्तु का चाहना या कहना मिथ्या कहलाता है। ६० ॥

मूल—परा पश्यन्ती मध्मा वैखरी मातृकेति पंचगुणा वाक्। इति व्यक्ति पंचविंशति गुणाः ॥६१॥

संस्कृत टीका—परापश्यन्तीत्यादेरयमर्थः। वक्त्रा प्रथमं स्वबुद्धावर्थं निश्चित्य परं बुबोधयिषति तत्रेच्छा मनश्चंचलयति तेन जठरानलस्याभिघातो जायते तेन च वायुरुत्पद्यते स एव वायुः सर्वतः प्रथमं मूलाधारस्थबिन्दुरूप नित्य चेतनरूपं शब्दब्रह्माऽपरपर्याय्यं संयुक्तं तेन तत्र स्थिता परावाक् प्रवर्धमाना उद्र्ध्वमाक्रमति सा यदा नाभिदेशमागच्छति तदा वर्णरूपमाधत्ते सा पश्यन्ती व्यवह्रियते। अत्र मनसः सम्बन्धोऽस्ति, अतः समाधिना संस्कृतमनसा प्रत्यक्षीक्रियते योगिनां सविकल्पज्ञानविषयः पूर्वा तु मनसः सम्बन्धाभावाद् योगिभिरपि सविकल्पयितुं न शक्या किन्तु समाधिना निर्विकल्पज्ञानविषयः। ततो वर्धमाना हृदयदेशमागता पदरूपम् प्रपद्यमाना मध्यमेति व्यवह्रियतेऽनयैवार्थबोधः, इयमेव स्फोट शब्देन वैयाकरणनये प्रसिद्ध्यति। अत्र बुद्धेः सम्बन्धान्निश्चयज्ञानविषयो मानसजपसमये कर्ण पिधाने सति सूक्ष्मरूपेण श्रूयते। ततः कण्ठदेशमागता वाक्यरूपा वैखरी ततो मूर्धानमाहत्य परावृत्य तत्तत्स्थानेषु प्राप्याभिव्यक्ता परश्रवण विषयः। अकारादि वर्णा नासिकासम्बन्धादर्धेन्दुसंयुक्ता मातृकाः। शिक्षादौ मातृका वैखर्योरेकत्वंकृत्वा चतुर्विधोपदेशोऽत्रतु स्थानकृतभेदस्य जागरूकत्वे तत्परित्यागे मानाभावाद् वैखरी मातृका चेति भेदमादाय पंचविधत्वमिति बोध्यम्। तदाह परावाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता। हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥६१॥

भाषा टीका—अब वाक् (वाणी) के पांच गुणों का वर्णन करते हैं। **परा** यह वाणी मूलाधार चक्रमें रहती है और वह निर्विकल्प

समाधि के द्वारा जानी जाती है । वहां मन की गति नहीं है । **पश्यन्ती**-वही पराबाक् नाभि प्रदेश में आकर जब स्थूल वर्ण रूप को धारण करती है तब उसका नाम पश्यन्ती होजाता है। इसके साथ मनका भी सम्बन्ध रहता है । इसी लिये योगी इसको सविकल्प समाधि से जान लेता है। **मध्यमा**-इसके उपरान्त वही वाणी हृदय में और भी स्थूल होती हुई जब आकारादि वर्णसमुदाय पदरूप को धारण करतीहै तब उस का नाम मध्यमा होता है । **वैखरी**-वही वाणी जब मस्तक से लौट कण्ठ और तालु आदि स्थानों में आकर टकराती है तब उससे प्रकट होने वाले शब्द को वैखरी कहते हैं। **मात्रिका**-अकरादि वर्णों में शिव रूप मकार के अनुस्वार होने से अं आं इं ईं इत्यादि बीजमन्त्र रूप जो वर्णमाला है उसीका नाम मात्रिका वाक् है। इस प्रकार व्यक्ति रूप पंच शक्तियों का निरूपण किया गया है और प्रत्येक व्यक्ति में पांच पांच गुणों का निरूपण करने से उन व्यक्तियों के पच्चीस गुणों का भी वर्णन कर दिया। ६१।

मूल-कर्म काम श्चन्द्रः सूर्योऽग्निरिति प्रत्यक्षकरण-पञ्चकम् ॥६२॥

संस्कृत टीका-संसारे जीवानामुपभोगे, उपभोगप्रधानसाधनीभूतपिण्डसम्पादने च विशेषसाधनपदार्थान् पिण्डीकृत्य प्रदशयति कर्मेत्यादि। एते कर्मादयः पंच **प्रत्यक्षकरण पंचकम्** प्रत्यक्षाणि च तानि करणानि तेषां पंचकमित्यर्थः प्रत्यक्षानि, असाधारणानीत्यर्थः साधारणकारणानीश्वरादयोऽपि न प्रत्याख्यायेरन्निति प्रत्यक्ष पदादानेन ध्वनितम्। शुभाशुभ कर्मानुरूप एव कामोभवति। तद्बलेन च्या ऽग्निषोमात्मक पिण्ड ग्रहणम्। ततश्चोपभोग इति क्रमः सकलपरीक्षक प्रत्यक्षचरोऽप्रत्याख्येयः। ननु कर्म वासनाद्वारा शरीरग्रहणहेतु रूपभोग साधनञ्चास्तु सकल सम्मतत्त्वाच्चन्द्रादयः कथं तद्धेतुरिति चेत्, ऋणुरहस्यम्। रसोहि सोमरूपोभोग्यः, अग्निश्च शोषको भोक्ता च

कथ्यते तत्र यदि रसमात्राऽत्यन्तं समेधेत तदा ऽग्नि नाशाज्जठराग्नि-नाशाज्जगद् भ्रंशः, यथा मात्राधिकभोजनाज्जठराग्निमान्द्येन क्रमशःकायो विशीर्णतामुपैति । यथा च जलाधिक्ये भुवनविप्लवः। तथाऽग्नेरेवाधिक्ये सोमविरहादपि न स्थिति जगतः स्यात्, यथा च प्रचण्डांशुनितान्तवृद्धौ सकल वनस्पत्यादीनां विनाशः । अत उभयोः समरसतया समवस्थाने सुचारुतया जगतः स्थितिरिति सकलदार्शनिकदृष्टि परीक्षितः पन्थास्तथ्यमुपदिशति-अग्निषोमात्मकं जगदिति- अत्रायं सूक्ष्मतमो विवेको यत् सोमतोऽग्नेः किञ्चिदाधिक्यं सुस्थितिकरम् । इतीश्वरीयनीति मनुसृत्य, भोजनमात्रादीषदूनमेव भोक्तव्यमिति वृद्धवैद्यानामुपदेशः । सूर्यस्य द्वादश कलाः संसारस्थितिकारिण्य एका स्वकीया तस्या सांसारिककार्येऽनुपयोगात् तां त्यक्त्वोपवर्णिताः क्वचित्तन्त्रे द्वादशैव कलाः सूर्यस्य ॥ एवमेवाग्नि चन्द्रयोरपि ज्ञेयम् कलापदार्थः चित्समाविष्टसत्त्वात्मिका शक्तिरिति तान्त्रिकसंकेतः । एवमग्ने र्दशकलाः संसारस्थापिका एका स्वकीया, उभयोः संमेलने द्वाविंशतिकलाः, उभयोः संक्षिप्त संज्ञाऽग्निर्भोक्ताचेति षोडशकलाश्चन्द्रस्य सोमपदेन भोग्यपदेन च गृह्यन्ते। सोमतोऽग्नेः कलाषट्काधिक्येन प्राधान्यात् जगतः सुस्थितिरतो भूतभौतिकोत्पत्ति स्थित्यादिद्वारा जीवानामुपभोगे ऽसाधारणसाधनमेतत् त्रयमिति सुनिरूपितं भवति । किञ्च सूर्याग्निरूपं पितुः शुक्रम् सोमरूपञ्च मातृरजः, उभयोः संयोगे पिण्डोत्पत्ति रित्यग्रे मूले निरूपयिष्यते । अत्रेदं बोध्यम् अग्निषोमयोः सर्वत्राविविक्ततया समवस्थानेऽपि क्वचित् कस्यचित् प्राधान्यात् भूयसा व्यपदेशन्यायेन तत्तन्नाम्ना निर्देशो नविरुद्ध इति। तदुक्तं च "अग्नि-षोमात्मको देहो बिन्दुर्यदुभयात्मकः" शा०ति० अस्यार्थः अयं देहोऽग्नि षोमात्मकः। कुत इत्यपेक्षायां हेतुमाह, यतः, बिन्दुः पिण्ड हेतुः, उभयात्मकः, अग्निरूपं शुक्रं सोमरूपं रक्तं तदात्मकस्तदुत्पन्न इत्यर्थः। अन्ये त्वाहुः) "कलाषोडशकश्चन्द्रः स्याद् द्वादशकलोरविः" कलादश युतोवह्निः कलाश्चत्रिंशदंशभुक् । सप्तत्रिंशद् भवन्तीह गर्भाधानस्य हेतवे ॥ अग्नि षोमात्मकं तेन गीयते स चराचरमिति। एवं च चन्द्रसूर्याग्नयः पिण्ड-

स्योपादानंकारणं कर्म कामश्चानिमित्तकारणमितिविवेक इतिदिक् ॥६२॥

भा० टी०—इस संसार में जीव को सुख दुःख का उपभोग जिन प्रधान साधनों द्वारा होता है उन साधनों का निरूपण करते हैं। कर्म, काम, चन्द्रमा, सूर्य, अग्नि ये पांच इस शरीर प्राप्ति के प्रधान कारण हैं और ईश्वर काल आदि साधारण कारण हैं उनका भी ग्रहण जानना अर्थात् शुभ अशुभ कर्मों की अनुकूल वासनाद्वारा शरीर प्राप्ति होती है यह प्रसिद्ध है। अतः विन्दु रूप शरीर का निमित्त कारण कर्म और वासना है। यह संसार में अग्निषोमात्मक कहलाता है। कारण सोमरस भोग्य और अग्निशोषक और भोक्ता है इन दोनों के मेल से संसार की स्थिति है केवल एक के रहने पर नहीं जैसे भोज्य पदार्थ जठराग्नि के रहने पर भी शान्त होजाने से शरीर की स्थिति असम्भव होजाती है उसी प्रकार केवल अग्नि से भी स्थिति नहीं रह सकती। इस लिये दोनों के समीकरण से जगत की स्थिति रहती है। इन में अग्नि का कुछ अधिक अंश रहने से उस की प्रधानता है। दूसरे तेजों में तो सूर्य और अग्नि दोनों ही को एक तत्त्व होने से अग्नि नाम रखा गया है अतः अग्नि षोमात्मक जगत को दूसरे तन्त्र में कहा गया है किन्तु इस ग्रन्थ में स्वरूप भेद होने से सूर्य और अग्नि दो पृथक नामों से कहा गया है सूर्य की बारह कला और अग्नि की दश कला भोक्ता हैं औरसोम की सोलहकलाँ भोग्य हैं इन्ही दोनों के मिलाने से सकल संसार बनता है। यह शरीर माता के रज और पिता के वीर्य से बनता है इन में रज सोम है। वीर्य अग्नि और सूर्यरूप है। अतः इस शरीर का उपादान कारण अग्नि और सूर्य हुये यद्यपि सोम और अग्नि ये दोनों सर्वत्र ही रहते हैं तथापि जिसका अंश जहाँ अधिक है उस का धर्मा पद से व्यवहार होता है। कला शब्द का अर्थ चित् से मिली हुई शक्ति सत्त्व रूप जानना। ६२॥

मू०—शुभमशुभंयशोऽपकीर्तिरदृष्टफलसाधनमिति पंचगुणं कर्म ॥६३॥

संस्कृत टीका—शुभम् शिष्टजनाविगर्हितसौशिल्यादि

अशुभम् निन्दितमौद्धत्यादि **यशः** कीर्तिः, **अपकीर्तिः**, अयशः **अदृष्टफलसाधनम्** अदृष्टं चर्मचक्षुरिन्द्रियजन्यज्ञानाविषयः यत् फलम्, धर्मस्वर्गान्तः करणशुद्ध्यादि तस्य साधनम्, श्रुतिस्मृति प्रतिपादितम्. कर्म, एते कर्मणः ॥६३॥

भाषा टीका–अब कर्म जन्य पाँच गुणों का वर्णन करते हैं **शुभ** स्वर्गादि जनक पुण्य कर्म। **अशुभ** नरकादिहेतुलोकनिन्दित कर्म। **यश** कीर्ति। **अपकीर्ति** लोकनिन्दा। **अदृष्टफलसाधन** धर्म और अधर्म का साधन शास्त्रीय कर्म। ६३ ॥

मूल–रतिः प्रीतिः क्रीडा कामना ऽऽतुरते ति पंचगुणः कामः ॥६४॥

संस्कृत टीका–रतिः स्त्रीविषयानुरागः क्रीडा तु कन्दुकादि बाह्यसाधनापेक्षा। सुखविषयानुरागः प्रीतिः साधनविषयानुरागः कामना। आतुरता, इष्ट प्राप्तौ त्वरा।एतेकामस्य ॥६४॥

भाषा टीका–अब काम के कार्य्यभूत पांच गुणों का निरूपण करते हैं। **रति** स्त्री में जो प्रेम है उसी का नाम रति है। **प्रीति** सुख साधन विषयक प्रेम को प्रीति कहते। हैं**क्रीड़ा** खेलना **कामना** सुख विषयक वासना। **आतुरता** यह चीज मुझे वहुत जल्दी मिल जाय इस प्रकार चित्त की व्याकुलताका नाम आतुरता है ॥६४॥

मूल–उल्लोला, कल्लोलिनी, उच्चलन्ती, उन्मादिनी, तरंगिणी शोषिणी, लम्पटा, प्रवृत्तिः, लहरी, लोला, लेलिहाना प्रसरन्ती, प्रवाहा, सौम्या, प्रसन्नता, प्लवन्ती। एवं चन्द्रस्य षोडश कला सप्तदशी कला निवृत्तिः सा ऽमृतकला॥६५॥

सं० टी०–अत्रत्यस्य रहस्यं परस्तादुपपादितं कार्यभेदात् कलानां भेदः। तथा च चन्द्रस्य षोडशधाकार्य्यकारित्वेन षोडशधा कलाः

संसाररचनाचतुराः, एका निजा सदास्थायिनी महाप्रलयेऽपि न विना शमुपैति सद्वादमते निरन्वयविनाशास्वीकारात् सा सप्तदशी निवृत्तिः। तासां चन्द्रमण्डलस्य सोमरसात्मकतया सोमप्रधानजलानुगत स्वभाव विशेषानुकूलनामान्याह, उल्लोलेत्यादि, उल्लोलयति स्वसम्बन्धेन भोक्तारमग्निं प्रोच्चलयति हुतघृतवद् या सा प्रथमा भोगकालेऽल्पशोऽनेकरूपधारणशीला ऽनलोपरिपच्यमानजलोद्गतोदबिन्दुवत् २ अधिकाऽनलत्वरितसँतापे स्थालीस्थजलोत्सरणवदूर्ध्वगमनशीला ३ कामोल्लासप्रवर्धनेनोन्मादनशीला ४ तरंगवद्विकारकारिणी ५ विकारशोषणशीला यथौषधरसो रुजां जरयति ६ भोगायौत्सुक्यसम्पादिनी वनितावत् ७ प्रवर्त्ततेऽनयेति व्युत्पत्त्या समुत्साह सम्पादन द्वारा सर्वेषां व्यापारे साधनीभूता ८ उच्छलनशीला ९ चंचल शीला १० आश्लेषणव्यापारवती ११ प्रसरणशीला १२ वेगवती १३ सौन्दर्य्यसम्पादिनी १४ प्रसादवती १५ सँचारशीला १६ एता षोडशकलाः। अत्र यन्नामपदस्य योऽर्थस्तदेव कार्यं तस्या इति न सँकोचनीयम्। स्वरूपैकदेशमादायापि नाम करणं यथा पद्मावत्याविशालाचीति नाम। अत एवैतासां कलानां नामान्तरेण निर्देशस्तन्त्रान्तरे पद्यते ॥६५॥

भाषा टीका—अब चन्द्रमा की सत्रह कलाओं का वर्णन करते हैं। कला शब्द का अर्थ पहले कहा जा चुका है। **उल्लोला** तरल अर्थात् चँचल। **कल्लोलिनी** बड़े आकार वाली तरँग **उच्चलन्ती** ऊपर को चलने वाली। **उन्मादिनी** स्त्री पुरुष को कामोन्मत्त करने वाली। **तरङ्गिणी** तरङ्गों के आकार वाली। **शोषिणी** जल और रस को सुखाने वाली। **लम्पटा** पृथ्वी आदि में अबाध रूप से फैलने वाली। **प्रवृत्ति** प्राणियोंके हर्षको उत्पन्न करनेवाली अथवा लोक की प्रवृत्ति को करने वाली। **लहरी** टेढ़ीगति से लहराने वाली। **लोला** चँचल रूप वाली। **लेलिहाना** रसादि को चाटने वाली। **प्रसरन्ती** फैलने वाली। **प्रवाहा** चन्द्रकान्ता आदि मणियों में जल की बून्दों को बहाने वाली **सौम्या** समस्त फल फूल और औ-

षधी वनस्पति आदि में सोमरस बरसाने वाली **पूसन्ना**। सब वस्तुओं को निर्मल करने वाली या स्वयं निर्मल रूप वाली। **प्रवन्ती** उछल कर चलने वाली। इस प्रकार चन्द्रमा की सोलह कला होती हैं और सत्रहवीं निज अमृत कला है।

मूल-तापिनी, ग्रासिका, उग्रा, आकुञ्चनी शोषिणी प्रबोधनी, स्मरा, आकर्षिणी, तुष्टि, वर्द्धिनी, उर्मीरेखा किरणवती, प्रभावतीति द्वादशकला सूर्यस्य त्रयोदशी स्वप्रकाशता निजकला ॥६६॥

सं० टी०—एवं सूर्य्यस्यापि द्वादशकला द्वादशराशिकलाः किञ्च द्वादशविधकार्यकारिण्यः शक्तयस्तापनम्। तमसोग्रसनम्। कुमुदिनीनां संकोचनम्। जलस्यापि शोषणम्। कमलादेः प्रबोधनम्। सर्वेषां स्मृति जननम्। भौमरसाकर्षणम्। सन्तोषदानम्। आयुःपरिगणनम्। किरणविस्तारः। प्रकाशकरञ्चेति तत्तत्कार्य कारिण्यःशक्तयः। सर्वत्रान्वयिनी कला स्वप्रकाशताख्या नित्या त्रयोदशी ॥६६॥

भा० टी०-अब सूर्य की कलाओं का निरूपण करते हैं। **तपिनी**-तपानेवाली। **ग्रासिका**-अन्धकार का नाश करने वाली। **उग्रा**-अपने तेज से कुमुदिनी आदि को संकुचित करने वाली। **आकुञ्चनी**-अपनी तरफ समेटने वाली। **शोषिणी**-जलादि को सुखाने वाली। **प्रबोधिनी**-कमलादि को खिलाने वाली। **स्मरा** स्मरण रूप ज्ञान को उत्पन्न करने वाली। **आकर्षिणी**-भूमिस्थ जलादि को अपनी तरफ खेंचने वाली। **तुष्टि वर्धिनी**-सकल प्राणिओं के संतोष को बढ़ाने वाली। **उर्मीरेखा**-प्राणियों की आयु को मापने वाली। **किरणवती**-किरणों का विस्तार करने वाली। **प्रभावती** प्रकाश करने वाली। ये बारह कला सूर्य की हैं और स्वप्रकाशता नाम की तेरहवीं सूर्य की निज कला है। ६६॥

मूल-दीपिका, रजिका, ज्वालिनी, विस्फुलिगिनी, प्रचण्डा पाचिका, रौद्री, दाह्निका, रागिणी, शिखावती, इत्यग्नेर्दशकला एकादशी कला ज्योति रिति प्रत्यक्ष करण गुण कला समूहः ॥६७॥

सं० टी०—एवमेवाग्नेः संसारोपकारिदशकला स्तासां नामान्याह दीपिकेत्यादि अन्यस्मिन् घटादौ रागोत्पादनत्वेन रजिका. स्वतोरागवत्वेन रागिणीतथैव परितः प्रभाकारित्वेन ज्वालिनी, उद्ध्वप्रभासम्पादनत्वेन शिखावतीति विशेषोबोध्यः । अन्याक्षराथस्तु सुगम एव । एते पंच-भूतात्मसाकारशिवस्य नेत्रत्रयमुइत्युपदेशेन सँसारस्थिवि शिवाधी-नैवेति ध्वनिरितिदिक् । कर्मोपासनादावेदासां महोपयोग इति तत्प्र करणे द्रष्टव्यम् ॥६७॥

भाषा टीका—अब अग्नि की कलाओं का वर्णन करते हैं। **दीपिका** प्रकाशित करने वाली। **रजिका** सुशोभित करने वाली। **ज्वालिनी** अत्यन्त ज्वाला वाली। **विष्फुलिङ्गिनी** जिस में अग्नि की चिनगारियां उछले उसको विष्फुलिङ्गिनी कला कहते हैं **प्रचण्डा** उग्ररूप धारण करने वाली। **पाचिका** पकाने वाली। **रौद्री** रुद्र रूप करने वाली। **दाह्निका** काष्ठादि इन्धन को जलाने वाली। **रागणी** रक्त वर्ण वाली। **शिखावती** ऊर्ध्वगामी लाट को धारण करने वाली। ये अग्नि की दस कला हैं और ग्यारहवीं ज्योतिरूप निज कला है और इस पूर्वोक्त रीति से प्रत्यक्षकरण और उन के पाच पांच गुणों का निरूपण करने से पचीस गुण और कलाओं के समूह का भी वर्णन करदिया। ६७॥

मूल-अथ नाडीनां दशद्वाराणि। इडापिंगला नासाद्वार योर्वहतः सुषुम्णा नाडी तु ब्रह्मदण्डमार्गेण ब्रह्मरन्ध्र पर्यन्तं वहति सरस्वती मुखद्वारे वहति पूषा-लंबूषा

चक्षुर्द्वारयोर्वहतो गान्धारी हस्ति जिह्विकाच कर्णद्वार योर्वहतः कूहूर्गुदद्वारे वहति शंखिनी लिंगद्वारे वहति एवं दशद्वारेषु वहन्ति ॥६८॥

सं० टीका पिण्डस्थितिर्नाड्यधीना नाडीनामपरिगणितत्त्वेऽपि प्रधाननाड़ीज्ञानं पिण्डशोधने परमोपयोगीत्यतस्ता निरूपयति **अथ नाडीति** नाभेरधः कन्दस्तत एव सर्वनाड्य उत्पद्यन्ते तत्र प्रधाननाड्यो दश तत्रापि सर्वतः प्रधाना सुषुम्णा सा मूलाधारद्वारा मेरुदण्डान्तर्गता सती शिरोदेशे कपालद्वयसन्धिस्थब्रह्मरन्ध्रपर्यन्तं वर्तते तत्रैव सूर्यरश्मिसम्बन्धः सदैव तिष्ठति, उभयोःसम्बन्धात् वैद्युत शक्तिः सम्पद्यते, अत एव मरणसमये यस्य लिङ्गशरीरं सुषुम्णया निःसरति, तस्य ब्रह्मरन्ध्रगमनानन्तरं तदीयवैद्युतसमवन्धात् क्षणेनैव मार्तण्डमण्डलं भित्वा ततः परं वैद्युत लोकेऽभिगमनं भवति। एषोर्चिष मभि संपद्यते 'आदित्यं चन्द्रमसं चन्द्रमसो वैद्युतम्' अन्य मार्गेण निःसरणे तु वैद्युत सम्वन्धाभावेन न मार्त्तण्ड मण्डलं विभिद्य गमनं किन्तु ततोऽध एव चन्द्रमण्डलस्थस्वर्गादौ ततश्च प्रत्यवरोहणम्। न तु ब्रह्मरन्ध्रेण गामिनामिति धूमाद्यर्चिरादि मार्गद्वयं व्यवस्थापितम् श्रुतिस्मृत्योः। द्वे नाड्यौ तत्सम्वद्धवामदक्षिणभागाभ्यां नासिकापर्यन्तं गच्छतः। ते इडा पिंगला च चन्द्रनाडी सूर्यनाडी चेति व्यवह्रियेते। द्वे चक्षुः पर्यन्तं पूषालंबूषे। कर्णपर्यन्तगामिन्यौ गान्धारी हस्तिजिह्विका च मुखपर्यन्तं सरस्वती गुदपर्यन्तं कूहूः, लिङ्गद्वारे शंखिनी ॥६८॥

भाषा टीका—अब नाड़ियों के दश द्वारों तथा नाड़ियों का वर्णन करते हैं लिङ्ग से ऊपर और नाभी से नीचे पक्षी के अंडे के समान समस्त नाड़ियों का उत्पत्ति स्थान मूलकन्द है। उस मूलकन्द से बहत्तर हजार नाड़ियों की उत्पत्ति होती है। फिर यह नाड़ियां नीचे ऊपर और टेढी गति से फैलती है और उन में भी बहत्तर नाड़ियां मुख्य हैं उन में भी प्राणवायु को जिन में संचार होता है ऐसी इड़ा पिङ्गलादि दश नाड़ियाँ ही प्रधान हैं उन में भी सर्व श्रेष्ठ

सुषुम्णा है क्योंकि सुषुम्णा से जिस का प्राण निकलता है उस की ब्रह्मलोक तक गति होती है और अन्त में क्रम मुक्ति द्वारा अमृत रूप मोक्ष को प्राप्त कर लेता है। जिस पुरुष का दूसरी नाड़ियों द्वारा प्राण निकलता है उसको स्वकर्मानुसार केवल स्वर्गादि लोकों की ही प्राप्ति होती है। इड़ा नाम की चन्द्र नाड़ी और पिङ्गला नाम की सूर्यनाड़ी मूलकन्द से प्रकट होकर क्रम से नासिका के वाम और दक्षिण द्वारों से वहती है, इन दोनों के मध्य में सुषुम्णा नाम की ब्रह्मनाड़ी रहती है। वह भी मूलकन्द से निकल कर मूलाधार चक्रों में होती हुई मेरुदण्ड द्वारा तालु मार्ग से ब्रह्मरन्ध्र तक वहती है। इसी मूलकन्द से निकल कर उन उन स्थानों में होती हुई सरस्वती नामकी नाड़ी मुखद्वार में बहती है। पूषा और अलम्बूषा नाम की नाड़ी मूलकन्द से निकल कर उन २ स्थानों में होती हुई क्रम से वाम और दक्षिण कर्ण द्वारों में वहती है। एवं गान्धारी और हस्ति जिह्विका नाम की नाड़ियाँ भी मूल कन्द से निकल कर तत्तत् स्थानों में होती हुई क्रमशः वाम और दक्षिण नेत्र द्वारों में वहती है। इसी तरह कुहू नाम की नाडी मूलकन्द से निकल कर गुदा द्वार में बहती है। उसी प्रकार मूलकन्द से निकल कर शंखिनी नाडी लिङ्ग द्वार में रहती है और वह सुमेरु दण्ड मार्ग से ब्रह्मरन्ध्र तक वहती है। इस पूर्वोक्त रीति से दश नाडियां दश द्वारों में वहती हैं। यहां इति शब्द नाडी वाक्य की समाप्ति का द्योतक है। इन मुख्य दश नाडियों से अतिरिक्त नाड़िया रोम कूपों में वहती हैं। ६८॥

मूल—अथ दशवायवः। हृदये प्राणवायुरुच्छ्वास निःश्वासकारो हकारसकारात्मक श्चास्यैवावस्थाभेदे हठ-योग इति संज्ञा, हकारः कीर्त्तितः सूर्य्यष्ठकारश्चन्द्र उच्यते। सूर्य्याचन्द्रमसोर्योगाद् हठयोगोनिगद्यते' गुदेत्वपान वायू रेचक कुम्भकपूरकश्च नाभौ सामानवायु र्दीपकः पाचकश्च, सर्वाङ्गे व्यानवायुर्ग्रसनवमनजल्प-

कारश्च नागवायुः सर्वाङ्ग व्यापकश्चालकश्च कूर्मवायुः कम्पकश्चतुरुन्मेषकारकश्च कृकल उद्गारकः क्षुत्कारकश्च देवदत्तो मुखविजृम्भकः, धनञ्जयो नादघोषक इति दशवाय्ववलोकनेन पिण्डोत्पत्ति र्नरनारीरूपः ॥६६॥

संस्कृत टीका—दशवायूनां दशस्थानानि तत्तत्कार्याणि च निरूप्यन्ते। दृशेत्यादिना नरनारी रूप इत्यन्तेन। प्राणवायोः, उच्छ्वासः, हकारः, निश्वासः, सकारः तथा च नासिकासम्बन्धादनुस्वारसहितः सन् हंस इति जीव मन्त्रो भवति। किन्त्वयं स्वाभाविकः, अतोनैतेन मोक्ष सिद्धिः किन्तु यदा गुरुणा व्युत्क्रम्य सोऽहमिति परमात्ममंत्रः समुपदिश्यते, तदाध्रुवं मोक्षसिद्धिः, अयमेव मंत्रयोगः, महावाक्यात्मकमहा मंत्रोपदेशः। इयमेव अजपानामगायत्री। तदुक्तं श्रीनाथ पादैः

अजपानामगायत्री योगिनां मोक्षदायिनी ॥

हकारेण वहिर्याति सकारेण विशेत् पुनः हंस हंसेति मन्त्रोयं सर्व र्जीवैश्च जप्यते। गुरुवाक्यात् सुषुम्णायां विपरीतो भवेज्जपः। सोऽहं सोऽहमिति यः स्यान्मन्त्रयोगः स उच्यते अवस्थाभेदेन चास्यैव नामान्तरं हठ योग इति तदुक्तम्। मन्त्रोलयो हठो राजयोगान्ता भूमिकाः क्रमात्। एक एव चतुर्धायं महायोगोऽभिधीयते ॥ **हकार इत्यादि** मूलोक्तपद्यस्यायमर्थः हकारपदवाच्यः सूर्य्यः, उपलक्षणेन तदधिष्ठित पिंगलानाड़ी ग्रहणं तथा ठकारवाच्य श्चन्द्र उपलक्षणतया तदधिष्ठितेड़ानाडीग्रहणं बोध्यम्। उभयोः सुषुम्णायां योगात् पिंगलेडाभ्यां वायुं निष्कृष्य निरन्तर संस्थापनात्, हठयोगः कथ्यते। लययोगोनाम चित्तस्य निर्विषतया विलीनत्वे वायोरपि स्थिरतया लययोगो राजयोगश्च शिवशक्तिसंगमः, मूलाधारे सहस्रारे वा। अत्रायं विवेकः, प्रथमं गुरुपूजनषट्चक्रस्थदेवपूजन ध्यानसंकल्पादि भवति द्वितीये वायु विजयार्थं प्राणायामस्य प्राधान्यम्। तृतीये मनस एव वशीकरणोपाय वैराग्याद्यभ्यस्यते। चतुर्थे च शिवशक्तिसंगमाय कुण्डलिनी प्रबोधनाभ्यास इति विवेकः। प्रातः स्नातोवास्नानाभावेऽपि मनसा अजपयासंकल्पयेत्

संकल्प विधिः। ओमद्यपूर्वेद्युः कृतनिःश्वासोच्छ्वासात्मकं मूलाधार चक्रस्थ सिद्धिसहित गणेशायषट्शतंस्वाधिष्ठानचक्रस्थ सरस्वतीसहितब्रह्मणेषट् सहस्रं मणिपूरचक्रस्थलक्ष्मीसहितविष्णवे षट्सहस्रमनाहतचक्रस्थगौरीसहितशिवाय षट्सहस्रं विशुद्धचक्रस्थ जीवात्मनेसहस्रं कमाज्ञाचक्रस्थविद्यासहितगुरुवेसहस्रं क सहस्रारस्थस्वशक्तिसहितपरमात्मने एकसहस्त्रञ्च समर्पये । अनेन पूर्वकृतं समर्पयेत् । ततोऽद्य प्रातः कालमारभ्य भाविप्रातःकालपर्यन्तं निःश्वासोच्छ्वासात्मक षट्शताधिकैकविंशतिसहस्रसंख्याकमजपागायत्री जपमहं करिष्ये इति ॥ अपानवायुबलेनैव प्राणायामो भवतीति सूचितम् तेन तद्विजदार्थ नाडीशोधनं नेति धोतीत्यादि,उड्डियानादिबन्धः,आसनञ्चेति साधनीय मित्यपि प्रदर्शितम् ॥ अपानवायोः स्थानं गुदः कार्य्यञ्चाह रेचककुम्भकपूरकः कार्य्यकारणयोस्तादात्म्यमादाय मूले समानाधिकरणनिर्देशः । नाभिदेशे समानवायुर्वसति तस्य कार्य्यम् जठराग्निदीपनम्, अत एव भुक्तान्नस्य पाचनम् शरीरस्य सर्वाङ्गेषु व्याननामावायुर्वसति तस्य कार्यम् सकलनाड़ीगत विकारापसरणपूर्वकवर्धनं क्वचिदङ्गे च निश्चलः सन् वर्तते। उदान वायोः स्थानं कण्ठः कार्यञ्चान्नादिग्रसनं वमनं जल्पनं च। नागवायुः सकलाङ्गव्यापकः: कृत्यञ्च चालनं कूर्मवायुःशरीरस्य कम्पनं नेत्रयोरुन्मेष निमेष सम्पादनमेतेन स्थानमपि प्रदर्शितम्, यद्देशे कार्यम्,तद्देशेस्थिति रिति। कृकलस्योद्गारः कार्यम्,क्षुधाकरणञ्च देवदत्तवायोश्च मुखवि-जृम्भणं व्यापारः। धनञ्जयस्य नादघोषणम्, एते दशवायवः ॥

एतेषामवलोकनेन सम्बन्धेन पिण्डस्य शरीरस्योत्पत्तिः-रचना भवतीत्यर्थः; स च पिण्डो नर नारीरूपः, नपुंसकस्याप्युपलक्षणं बोध्यमिति ॥ ६६ ॥

भाषा टीका—अब क्रम से दश गुणों का वर्णन करते हैं। हृदय में प्राण वायु रहता है वह उर्ध्वश्वास और अधोनिःश्वास का संचालन करता है अत वही प्राणवायु हकार सकारात्मक भी है अर्थात् हकार से बाहर निकलता और सकार से भीतर प्रवेश करता है वही हकार सकारात्मक प्राण वायु अनुस्वार सहित होने से हंस मन्त्र भी

कहलाता है यानि जिस समय प्राणवायु बाहर को आता है। उस समय हकार की ध्वनि होती है। अतः उस समय उसी का ध्यान करना चाहिये। जब प्राण वायु भीतर को जाता है। तब सकार की ध्वनि होती है। इस लिये उस समय सकार का ध्यान किया जाता है। इसी हंस मन्त्र के अक्षरों को उलटा देने से "सोऽहम्" बनता है। इसीभाव को लेकर विवेक मार्तण्ड में कहा है

हकारेण बहिर्याति सकारेण विशेत् पुनः
हंस सोऽहमिमं मन्त्रं जीवो जपति सर्वदा ॥

उसी "सोऽहम्" मन्त्र में सकार हकार का लोप करने से ॐ मन्त्र भी बनता है। इस मन्त्र के विधि पूर्वक जपने से जीवात्मा परमात्मा की एकता का साक्षात्कार होजाता है। इस मन्त्र को जीव निरन्तर जपता रहता है। इसी का नाम प्राणविद्या और महाविद्या भी है। देखिये विवेक मार्तण्ड में—

कुण्डलिन्यां समुद्भूता गायत्री प्राणधारणी।
प्राणविद्या महाविद्या यस्तां वेत्ति स योगवित् ॥

अर्थ—मूलाधार में रहने वाली कुण्डलिनी शक्ति में उत्पन्न हुई और जीव की प्राणशक्ति को धारण करने वाली अजपा नाम की गायत्री का नाम ही प्राणविद्या है। क्योंकि प्राणपति के साथ इसका प्रयत्न के बिना ही जप होता रहता है। इसीलिये इसको मत्स्येन्द्रनाथादि योगाचार्य महाविद्या भी कहते हैं। जो योगविद्या विशारद गुरु की बतलाई विधि से इसको जानता है वही माहेश्वरी विद्या के रहस्य को जान सकता है। इसका महत्व श्रीगोरक्षनाथ जी ने स्वयं ही कहा है—

अनया सदृशी विद्या अनया सदृशो जपः।
अनया सदृशं ज्ञानं न भूतञ्च भविष्यति ॥

इस महाविद्या के सदृश न कोई विद्या है और न कोई मन्त्र तथा जप है। इसके समान कोई ज्ञान भी नहीं है। न हुआ है और न होगा। यह विद्या ही सर्वोत्कृष्ट है। यद्यपि इस हंस मन्त्र का जप जीव को स्वभाव सिद्ध है तथापि वह तब तक फल देने वाला नहीं होता

जब तक विधि पूर्वक उसका ज्ञान तथा सँकल्पादि न किया जाय, कहा भी है—

षट् शतानि दिवा रात्रौ सहस्राण्येक विंशतिः।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा ॥
अजपानाम गायत्री योगिनां मोक्ष दायिनी।
अस्याः संकल्प मात्रेण नरः पापैर्विमुच्यते ॥

दिन रात में इक्कीस हजार छः सौ श्वास निकलते हैं अतः यह जीव हमेशा ही इक्कीस हजार छः सौ हंस मन्त्र जपता रहता है इसी को अजपा नाम की गायत्री भी कहते हैं। कारण अन्य मन्त्र वाणी के व्यापार से जपे जाते हैं परन्तु इसका स्वतः ही जप होता रहता है यह गायत्री योगियों को मोक्ष देने वाली है। इस गायत्री के सामान्य सँकल्प मात्र से ही मनुष्य पाप रहित होजाता है। यदि विधि पूर्वक विशेष सँकल्प का अनुष्ठान किया जाय तब तो कहना ही क्या है। इस अजपा गायत्री के संकल्प करने की विधि "गोरक्षोपनिषद्" के अजपा प्रकरण में कही है। देखिये—

षट् शतानि गणेशस्य षट्सहस्रं प्रजापतेः।
षट्सहस्रं गदापाणेः षट्सहस्रं पिनाकिनः ॥
सहस्रमात्मलिङ्गाय सहस्रं गुरुमर्पयेत् ।
परमात्मने सहस्रन्तु संकल्पावधिरेवच ॥

अर्थ—मूलाधार चक्र में चार दल वाला कमल है। उसी में त्रिकोणाकार काम पीठ है, जिसके ध्यान मात्र से सिद्धों को समस्त वस्तुओं की प्राप्ति होती है। वहीं पर अपनी ऋद्धि सिद्धि सहित गणेश जी का निवास है। वहां गणेश जी के लिये छः सौ अजपा रूप श्वासों का अर्पण किया जाता है इसी प्रकार लिङ्ग के मूल में जो स्वाधिष्ठान चक्र है उसमें षड्दल कमल है उसमें हंस वाहन और स्वशक्ति सावित्री सहित ब्रह्मा जी विराजमान हैं। वहां छः हजार अजपारूप श्वास का अर्पण होता है। नाभि में स्थित मणिपूर चक्र दशदल वाला पद्म है और वह अष्ट वलयरूप सर्पाकार नाड़ी से लिपटा हुआ है। वहां

गरुड़ वाहन और स्व शक्ति लक्ष्मी सहित भगवान् विष्णु का निवास है वहाँ भी विष्णु के लिये छः हजार अजपा गायत्री के जपका अर्पण किया जाता है। इसी प्रकार हृदय में अनाहत चक्र है वहां द्वादश दल युक्त ऊपर को मुखवाला कमल है और अष्टदल युक्त नीचे को मुख वाला कमल है वहां वृषभ वाहन और स्वशक्ति भवानी सहित श्री महेश्वर का निवास है। वहां भी महादेव के लिये छः हजार अजपा मन्त्र का अर्पण किया जाता है। एवं कण्ठस्थ विशुद्ध चक्र में सोलह दल वाला पद्म है उसमें जीवका निवास है और उस जीव की प्राण या अज्ञान शक्ति है। वहां स्व शक्ति सहित जीव को एक हजार मन्त्र अर्पण करे। इसके उपरान्त भ्रूकुटियों के मध्य में आज्ञा चक्र है उसमें दो दल वाला कमल हैं, वहाँ ज्ञान शक्ति सहित सदा शिव रहता है। एक हजार मन्त्र गुरुदेव सदा शिव के लिये समर्पित करे। इसी तरह ब्रह्मचक्रस्थ मात्रिका वर्ण सहित जो सहस्र दल पद्म है वहां चित् शक्ति सहित परमात्मा का निवास है। उस सर्वेश्वर के लिये भी एक हजार हंस मन्त्रों को समर्पित करे। अब नीचे संकल्प लिखा जाता है—

"अद्येह पूर्वेद्यु रहोरात्र चरितनासापुटनिःसृतोच्छ्वास निःश्वासात्मक षट्शताधिकैक विंशति सहस्र सख्याकाऽजपागायत्री जपं मूलाधार स्वाधिष्ठान मणिपूराऽनाहत विशुद्धाज्ञाचक्र ब्रह्मरन्ध्र स्थितेभ्यो गणपति ब्रह्म विष्णु रुद्र जीव गुरु परमात्मभ्यः सिद्धि सरस्वती लक्ष्मी गौरी प्राण शक्ति ज्ञानशक्ति चिच्छक्ति समेतेभ्यो यथा सँख्यं षट्शतं षट् सहस्रं षट् सहस्रं षट् सहस्रं सहस्रमेकं सहस्रमेकं सहस्रमेक मजपा गायत्रीजपं प्रत्यकं निवेदयामि, इति निवेद्य पुनरद्य प्रातःकालमारभ्य द्वितीय प्रातःकाज पर्यन्तं नासापुट निःसृतोच्छ्वास निःश्वासात्मकँ षट्शताधिकैक विंशति सँख्याक मजपा गायत्री जप महोरात्रेणाहँ करिष्ये इति यजमानो जप सँकल्पं कृत्वा स्वकृत्यमाचरेत इति।

अथवा चतुर्दल विशिष्ट मूलाधार चक्रस्थाय मूषक वाहनाय सांगोपाङ्ग स हताय स्वशक्ति सिद्धि बुद्धियुताय श्री महागणाधिपतये-ऽजपाजपानां सोऽहमित्येवं रूपाणां षट्शतानि, प्राह्निकं च समर्पयामि नमः प्रीयताम्।

षड्दल विशिष्ट स्वाधिष्ठान चक्रस्थाय हंस वाहनादि साङ्गोपाङ्ग सहिताय स्वशक्ति सावित्री युक्ताय श्री ब्रह्मणेऽजपा जपानां सोऽहमित्येव रूपाणां षट् सहस्राणि, अर्घ्यपाद्यादिकञ्च समर्पयामि नमः प्रीयताम् ।

दशदल विशिष्ट मणिपूर चक्रस्थाय गरुड़वाहनादि साङ्गोपाङ्ग सहिताय स्वशक्ति लक्ष्मीयुक्ताय श्रीमहाविष्णवेऽजपा जपानां सोऽहमित्येवं रूपाणां षट्सहस्राणि पाद्यादिकंच समर्पयामि नमः प्रीयताम् ।

द्वादशदल विशिष्टानाहत चक्रस्थाय वृषभ वाहनादि साङ्गोपाङ्ग सहिताय स्वशक्ति गौरी युक्ताय श्रीमहेश्वरायाऽजपा जपानां सोऽहमित्येव रूपाणां षट् सहस्राणि, अर्घ्यपाद्यादिकं च समर्पयामि नमः प्रीयताम् ।

षोडशदल विशिष्ट विशुद्ध चक्रस्थाय साङ्गोपाङ्ग सहिताय प्राणशक्ति युताय श्री जीवात्मने ऽजपा जपानां सोऽहमित्येवं रूपाणामेक सहस्रं पाद्यादिकं च समर्पयामि नमः प्रीयताम् ।

द्विदल विशिष्टाज्ञाचक्रस्थाय साङ्गोपाङ्ग सहिताय ज्ञानशक्तियुताय सदाशिव स्वरूपाय गुरवेऽजपा जपानां सोऽहमित्येवं रूपाणामेक सहस्रं, पाद्यादिकं च समर्पयामि नमः प्रीयताम् ।

सहस्रदल विशिष्ट ब्रह्मचक्रस्थाय साङ्गोपाङ्ग सहिताय चिच्छक्ति युताय श्री परमात्मने ऽजपा जपानां सोऽहमित्येवं रूपाणामेक सहस्रं, पाद्यादिकं च समर्पयामि नमः प्रीयताम् ।

पुनरद्य प्रातःकालमारभ्य द्वितीय प्रातःकाल पर्यन्तं नासापुट निःसृतोच्छ्वास निःश्वासात्मक षट्शताधिकैक विंशति सहस्रस्याक मजपा गायत्री जप महोरात्रेणाहं करिष्ये, इति यजमानः संकल्पं कृत्वा स्वकृत्यमाचरेत् ।

अथ ध्यानम्—

आधारे लिङ्ग नाभौ प्रकटित हृदये तलुमूले ललाटे।
द्वे पत्रे षोडशारे द्विदश दशदले द्वादशार्धे चतुष्के ॥
वासान्ते वाल मध्ये डफकठ सहिते कण्ठ देशे स्वराणाम् ।
हंसं तत्वार्थ युक्तं सकल दलगतं वर्णरूपं नमामि ॥

भाषा टीका—प्रथम मूलाधार में चतुर्दलयुक्त कमल है। उस की प्रत्येक कर्णिका (पङ्खडी) में व से लेकर सकार पर्यन्त वं शं षं सं बीज रूप ये चार वर्ण विद्यमान हैं। दूसरे लिङ्ग मूलस्थ स्वाधिष्ठान चक्र में षड्दल वाला पद्म है। उसके षड्दलों में क्रम से व से लेकर ल पर्यन्त वँ भँ मँ यँ रँ लँ ये छः मात्रिका बीज वर्ण विराजमान हैं। तीसरे नाभिस्थ मणिपूरचक्र में दशदल वाला पद्म है। उसकी प्रत्येक कणिकाओं में क्रम से डकार से लेकर फ पर्यन्त डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ ये दश मात्रि का बीज वर्ण सुशोभित है। चौथे हृदयकमलस्थ अनाहत चक्र में बारहदल वाला कमल है। उस की प्रत्येक कर्णिका में यथा क्रम क से लेकर ठ पर्यन्त कँ खँ गँ घं ङँ चँ छँ जँ झँ ञ टँ ठँ ये पूर्वोक्त बारह मात्रि का बीज वर्ण विद्यमान है। पाँचवे कण्ठदेशस्थ विशुद्धचक्र में सोलह दल वाला कमल है। उस की प्रत्येक कर्णिका में यथा क्रम से अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐँ ओं औं अँ अः ये सोलह स्वररूप मात्रिका बीजवर्ण शोभायमान हैं एवं छठे भ्रूमध्य आज्ञा चक्र में दो दल वाला पद्म है उसके दोनों दलों में क्रम से ह क्षं ये दो मात्रिका बीजवर्ण रहते है। ऐसे ही ब्रह्मरन्ध्र में सहस्रदल पद्म है इस प्रकार सकल चक्रस्थ पद्म दलों में विराजमान वर्णरूप परमेश्वर को प्रणाम करता हूं। पूर्वोक्त मन्त्रयोग ही जब प्राणायाम द्वारा क्रिया रूप में परिणत हो जाता है तब उसे हठ योग कहते हैं। हकार से सूर्यस्वर और ठकार से चन्द्रस्वर का ग्रहण होता है। चन्द्र और सूर्यस्वर का सुषुम्णानाडी में सम्बन्ध होने से हठ योग कहलाता है अर्थात् इडा और पिङ्गला नाडी के द्वारा सुषुम्णा नाडी में प्राण की एकता करता हुआ जो योगी प्राण की गति को अपने वस में करके परब्रह्म का ध्यान करता है उसी ध्यान की परिपक्व अवस्था का नाम हठयोग है।

गुद मण्डल में अपान वायु रहता है। वही अधो मार्गों से मल मूत्रादि को निकालता है। एवं उसी अपान वायु की सामर्थ्य से पूरक कुम्भक और रेचक प्राणायाम भी होता है क्योंकि प्राणवायु का रोकने वाला अपान वायु है। इसी लिये अपान शक्ति से रुका हुआ प्राण-

वायु बाहर से भीतर को पूरित किया जाता है इसी को पूरकनाम का प्राणायाम कहते हैं। तथा अपान से गृहीत ही प्राणवायु जल कुम्भ की तरह स्थिर रहता है। इसी लिये यह कुम्भक प्राणायाम कहा जाता है। इसी तरह अपानवायु से ग्रहण किया हुआ ही प्राणवायु परिमित मात्रा से बाहर निकाला जाता है। अतः यह रेचक प्राणायाम कहलाता है। यदि अपानवायु से प्राणवायु पकड़ा हुआ न हो तो निराश्रय प्राण-वायु से प्राणायाम होना सर्वथा असम्भव है। इसी आशय से श्री गोरक्षनाथ जी ने पूरकादि प्राणायाम अपान वायु का कार्य कहा है।

नाभि में समानवायु रहता है। वही जठराग्नि को उद्दीप्त करता हुआ पाचन करता है। इसी लिये दीपक और पाचक कहलाता है। तथा खाद्य और पेय वस्तुओं के रस का सब नाड़ियों में समान विभाग करने से समान कहा जाता है। समस्त शरीर के अङ्गों में व्याप्त होकर व्यानवायु रहता है और समस्त नाड़ियों में विद्यमान मलिन मज्जादि का शोषण भी वही करता है तथा शरीर में बल बृद्धि को भी बढ़ाता है और किसी अङ्ग में चंचल तथा किसी में स्थिर रूप से रहता है। कण्ठ में उदान नाम का वायु रहता है, वही वायु खाने पीने की वस्तु को कण्ठ से नीचे उतारता है, तथा वमन भाषण और दूसरे शरीर की प्राप्ति के लिये उत्क्रमण अर्थात् इस शरीर से जीव के निकालने में भी वही मुख्य कारण है। नागवायु सकल शरीर में व्यापक होकर रहता है, वह शरीर को मोटा करता है और शरीर का संचालन भी वही करता है एवं डकार के आने में भी वही कारण है। शरीर को कँपाना आँखों की पलकों को खोलना और मीचना कूर्मनाम के वायु का काम है। शरीरगत कृकल वायु के भी दो काम हैं उद्गार (डकार) लाना और भूख लगाना। देवदत्त नामका वायु मुख का विजृम्भण करता है अर्थात् जंभाई का कारण देवदत्त वायु है। समस्त शरीर व्यापी धनंजय वायु अव्यक्त शब्द को उत्पन्न करता है। इस प्रकार उपरोक्त दश वायुओं के सम्बन्ध से नर नारी रूप पिण्ड (शरीर) की उत्पत्ति होती है। इन दश वायुओं में प्राणादि पाँच वायु मुख्य हैं जो शरीर धारणा दि क्रिया को प्रधान रूप से सम्पादन करते हैं। और नागादि पाँच

वायु अप्रधान हैं क्योंकि प्राणादि पाँच वायुओं के बिना इनकी स्थिति नहीं है. तथा शरीर में सब से पहले पाँच प्राणादि कों का ही वृत्तिलाभ होता है, पीछे नागादि भी प्राणादि के सहायक होने से अपने २ व्यापार को करते हैं ॥६९॥

मूल--अथ गर्भोजो पिण्डोत्पत्ति र्भवति नरनारी संयोगे ऋतुकाले रजोविन्दुसंयोगे जीवः ॥ ७० ॥

सं० टीका--"आसीच्छक्ति स्ततो नादो नादाद्बिन्दुरजायत" विन्दुर्नाम शक्तिविशिष्ट चेतनः स एव व्यष्टिरूपो जीवः समष्टिरूपो रुद्र ब्रह्मरमाधिपात्मक उभयोरभिन्नोपादनः "आदिनाथः" इत एवाह विन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ॥ समवाय इति ख्यातः सर्वागम-विशारदैरिति । तत्सहितशुक्रोपि विन्दुः । माषा न भोक्तव्या इत्यत्र माष-मिश्रिताअपि न भुज्यन्ते यथा । पुरुषस्य शुक्रे जीवो न्तर्हितो पि तत्र भोगो न भवति, अतस्य वृत्तिकत्वात्-वृत्त्य लाभे कारणञ्च तच्छुकसम्वलित शरीरस्य स्वामिना जीवान्तरेणाभिभावितशक्तिकत्वात् ॥ यदा तस्य भोगाय कर्मोद्भवति तदा पृथक् भोगसाधन शरीर निर्माणाय विन्दु पुरुषात् पृथक्कृत्यस्त्रिया गर्भकेन्द्रे (गर्भाशये) रजसा सह संयुनक्ति संयुक्त मेव रजो वीर्य्योभयमेतत्स्थूलशरीरोपादानम् । अत्रेदं बोध्यम्, विन्दौ या शक्तिः सा पंचकर्मेन्द्रिय पञ्चज्ञानेन्द्रिय दशवायु मन बुद्ध्यहङ्कार चित्त चैतन्येति पञ्चविंशतीनां सूक्ष्मावस्था । तत्र वायूनां वृत्तिलाभः सर्वतः प्रथमं बीजनिषेककालादेव भवति । अत एव गर्भे शुक्रो न विपूयते किन्तु वर्धतेऽवयवसन्निवेशश्च सम्पद्यतेऽन्येषां वृत्तिः शरीरे न्द्रियगोलकादि स्थान विशेष प्रादुर्भावानन्तरम् ॥७०॥

भाषा टीका-- ऋतु काल में स्त्री और पुरुष के संगम से निकले हुये रज और विन्दु का स्त्री कीयोनि में मेल होने से जीव के स्थूल शरीर की उत्पत्ति होती है भावार्थ यह है कि विन्दुशब्द का अर्थ शक्ति विशिष्ट चेतन है वही व्यष्टि में जीव और समष्टि में ईश्वर कहलाता है। इन दोनों का मूल कारण परब्रह्म परमेश्वर है। नीचे श्लोक में देखिये।

विन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः
समवाय इति ख्यातः सर्वागमविशारदैः

अर्थ—शिव रूप विन्दु और बीज रूप शक्ति है। इन दोनों का जो परस्पर सम्बन्ध है उसी को शास्त्रवेत्ता नाद कहते हैं। अतः सिद्ध हुआ कि व्यष्टि जीव सहित शुक्र भी विन्दु कहलाता है। हाँ, पुरुष के वीर्य में अन्यजीवात्मा छिपा हुआ है भी, पर उसको उस शरीरमें सुख दुःखादि का व्यापार नहीं हो सकता क्यों कि जिस जीव के कर्म से इस शरीर का निर्माण हुआ है उस शुक्र संयुक्त शरीर के स्वामी की जीवात्मा से शुक्रतिरोहित जीव की शक्ति दबी हुई है किन्तु जब उस शुक्र में छिपि आत्मा के भोगार्थ कर्म का प्रादुर्भाव होता है तब उस जीव भोग के लिये शरीर निर्माण के निमित वह कर्म विन्दु को पुरुष से अलग कर स्त्री के गर्भाशय में सेचन करवाता हुआ उसको रज से मिलादेता है। अतः मिला हुआ रज-वीर्य इस स्थूल शरीर का कारण है। ७० ॥

मू०-प्रथम दिने कललं भवति सप्तरात्रे बुद्बुदाकारं भवति। अर्धमासे गोलाकारं भवति। मासमात्रेण कठिनं मास द्वयेन शिरोभवति। तृतीयमासि हस्तपादादिकं भवति। चतुर्थेमासि चक्षुःकर्णादि नासिका मुखमेढ्रगुदं भवति। पंचमे मासि पृष्ठोदरौ भवतः। षष्ठे मासि नख केशादिकं भवति। सप्तम मासे सर्व चेतन युक्तो भवति। अष्टममासि सर्व लक्षण युक्तो भवति। नवमे मासि सत्यज्ञान युक्तो भवति। दशमे मासि योनि संस्पर्शादज्ञानी बालको भवति ॥७१॥

सं० टी०—तत्र कियत् काले कस्य कस्याङ्गस्यो त्पत्ति रिति

वायु अप्रधान हैं क्योंकि प्राणादि पाँच वायुओं के विना इनकी स्थिति नहीं है. तथा शरीर में सब से पहले पाँच प्राणादि कों का ही वृत्तिलाभ होता है, पीछे नागादि भी प्राणादि के सहायक होने से अपने २ व्यापार को करते हैं ॥६९॥

मूल--अथ गर्भोजो पिण्डोत्पत्ति र्भवति नरनारी संयोगे ऋतुकाले रजोविन्दुसंयोगे जीवः ॥ ७० ॥

सं० टीका–"आसीच्छक्ति स्ततो नादो नादाद्विन्दुरजायत" विन्दुर्नाम शक्ति विशिष्ट चेतनः स एव व्यष्टिरूपो जीवः समष्टिरूपो रुद्र ब्रह्मरमाधिपात्मक उभयोरभिन्नोपादनः "आदिनाथः" इ त एवाह विन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ॥ समवाय इति ख्यातः सर्वागम-विशारदैरिति । तत्सहितशुक्रोपि विन्दुः । माषा न भोक्तव्या इत्यत्र माष-मिश्रिताअपि न भुज्यन्ते यथा । पुरुषस्य शुक्रे जीवो न्तर्हितो पि तत्र भोगो न भवति, अ तश्च वृत्तिकत्वात-वृत्त्य लाभे कारणञ्च तच्छुक्रसम्ब लित शरीरस्य स्वामिना जीवान्तरेणाभिभावितशक्तिकत्वात् ॥ यदा तस्य भोगाय कर्मोद्भवति तदा पृथक् भोगसाधन शरीर निर्माणाय विन्दुं पुरुषात् पृथक्कृत्यस्त्रिया गर्भकेन्द्रे (गर्भाशये, रजसा सह संयुनक्ति संयुक्त मेव रजो वीर्य्योभयमेतत्स्थूलशरीरोपादानम् । अत्रेदं वोध्यम्, विन्दौ या शक्तिः सा पंचकर्मेन्द्रिय पञ्चज्ञानेन्द्रिय दशवायु मन बुद्ध्यहङ्कार चित्त चैतन्येति पञ्चविंशतीनां सूक्ष्मावस्था । तत्र वायूनां वृत्तिलाभः सर्वतः प्रथमं वीजनिषेककालादेव भवति । अत एव गर्भे शुक्रो न विपूयते किन्तु वर्धतेऽवयवसन्निवेशश्च सम्पद्यतेऽन्येषां वृत्तिः शरीरे न्द्रियगोलकादि स्थान विशेष प्रादुर्भावानन्तरम् ॥७०॥

भाषा टीका– ऋतु काल में स्त्री और पुरुष के संगम से निकले हुये रज और विन्दु का स्त्री कीयोनि में मेल होने से जीव के स्थूल शरीर की उत्पत्ति होती है भावार्थ यह है कि विन्दुशब्द का अर्थ शक्ति विशिष्ट चेतन है वही व्यष्टि में जीव और समष्टि में ईश्वर कहलाता है। इन दोनों का मूल कारण परब्रह्म परमेश्वर है। नीचे श्लोक में देखिये।

विन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः
समवाय इति ख्यातः सर्वागमविशारदैः

अर्थ—शिव रूप विन्दु और बीज रूप शक्ति है। इन दोनों का जो परस्पर सम्बन्ध है उसी को शास्त्रवेत्ता नाद कहते हैं। अतः सिद्ध हुआ कि व्यष्टि जीव सहित शुक्र भी विन्दु कहलाता है। हाँ, पुरुष के वीर्य में अन्यजीवात्मा छिपा हुआ है भी, पर उसको उस शरीरमें सुख दुःखादि का व्यापार नहीं हो सकता क्यों कि जिस जीव के कर्म से इस शरीर का निर्माण हुआ है उस शुक्र संयुक्त शरीर के स्वामी की जीवात्मा से शुक्रतिरोहित जीव की शक्ति दबी हुई है किन्तु जब उस शुक्र में छिपि आत्मा के भोगार्थ कर्म का प्रादुर्भाव होता है तब उस जीव भोग के लिये शरीर निर्माण के निमित वह कर्म विन्दु को पुरुष से अलग कर स्त्री के गर्भाशय में सेचन करवाता हुआ उसको रज से मिलादेता है। अतः मिला हुआ रज-वीर्य इस स्थूल शरीर का कारण है। ७० ॥

मू०-प्रथम दिने कललं भवति सप्तरात्रे वुद्वुदाकारं भवति। अर्धमासे गोलाकारं भवति। मासमात्रेण कठिनं मास द्वयेन शिरोभवति। तृतीयमासि हस्तपादादिकं भवति। चतुर्थेमासि चक्षुःकर्णादि नासिका मुखमेढ्रगुदं भवति। पंचमे मासि पृष्ठोदरौ भवतः। षष्ठे मासि नख केशादिकं भवति। सप्तम मासे सर्व चेतन युक्तो भवति। अष्टममासि सर्व लक्षण युक्तो भवति। नवमे मासि सत्यज्ञान युक्तो भवति। दशमे मासि योनि संस्पर्शादज्ञानी वालको भवति ॥७१॥

सं० टी०—तत्र कियत् काले कस्य कस्याङ्गस्योत्पत्ति रिति

वर्णितम्, मूलेऽक्षरार्थस्तु स्पष्टतरः ॥७१॥

भाषा टीका—अब गर्भ की कितने समय में कैसी अवस्था और किस की उत्पत्ति होती है इन सब का प्रकार नीचे देखिये। पहले दिन उस रज वीर्य की कलिल (कुछ गाढापन) अवस्था होती है। फिर सात रोज में वह मिला हुआ रज वीर्य बुल बुले के आकार को धारण करता है और पन्द्रहदिन में गोलाकार हो जाता है। इस के उपरान्त प्रथममास में गोलाकार अवस्था को प्राप्त हुआ माता पिता का रज वीर्य कठिन अवस्था को प्राप्त होता है फिर दो मास में उस गोलाकार पिण्डमें शिर निकलता है। एवं तीसरे महीने में हाथ पैर आदि अङ्गों का प्रादुर्भाव होता है। चौथे मास में आँख कान नाक, मुख, मूत्रेन्द्रिय और गुदा आदि होते हैं। पांचवें महीने में पीठ और पेट उत्पन्न होता है। छठे महीने में नख, केश और रोमादि पैदा होजाते हैं सातवें महीने में माता पिता के रज वीर्य से उत्पन्न हुई और माता के गर्भाशय में स्थित वह बाल मूर्ति सर्वाङ्ग और चेतन युक्त होजाती है। तथा आठवें मास में वह बालशरीर सर्व लक्षण सम्पन्न होजाता है। नवमे मास में उस गर्भस्थ बालक के अन्दर सत्यज्ञान की वृद्धि होजाती है। तात्पर्य यह है कि उस देश और काल की महिमा से वह बालक त्रिकालदर्शी सिद्ध जैसा ज्ञानी होजाता है। इसी कारण पिछले जन्म के दुःखों का स्मरण करता है ॥ अन्त में उस सर्वेश्वर की शरण में हो प्रार्थना करता है कि हे सर्वान्तरयामिन्? दयामयप्रभो? इस दारुणदुःखमय नरक से मेरा उद्धार करो! फिर दशवें महीने में जब योनिद्वार से बाहर निकलता है तब उस योनिद्वार के स्पर्श से उस जीव का सत्य ज्ञान नष्ट होजाता है और केवल अज्ञानी बाल स्वभाव होकर रोने लगता है।

मू०-शुक्राधिकेषु पुरुषो रक्ताधिका कन्यका समं शुक्ररक्ताभ्यां नपुंसकः परस्परं चिन्ताद्याकुलत्वा दन्धः कुब्जो वामनः पंगुरङ्गहीनश्च भवति। परस्परं

रतिकालेऽङ्ग निःपिडनकरणगुणैः शुक्रो द्विस्त्रिवारं पतति, येन द्वितीयो बालको भवति ॥७२॥

सं० टी०—मातृरजः पितुर्वीर्य्यञ्चास्य शरीरस्योपादानं तत्र यस्याधिक्यं तदनुरूपैव तनुः सम्पद्यतेऽतो रजआधिक्ये कन्या वीर्य्याधिक्ये बालकः, तयोः साम्येनपुंसक मिति युक्ति युक्तमुक्तम् । गर्भाधान कालिकमातृपितृभावनापि निमित्तम् । अतस्तस्या वैगुण्ये शरीराङ्ग-वैकल्यस्य न्याय्यतैव यथा कुलालप्रमादाद् घटेकोटिल्यादि । एतेन पित्रोर्भावनोत्कर्षात् पुत्रस्य सुमेधस्त्वमित्यपि प्रमाणितम् । रतिकाले परस्पराङ्गमर्दन व्यापारविशेषात्मक गुणवशात् किञ्चित् २ शुक्र पतने गर्भाशयस्थवायुना विभज्यमाने मत्यैकाधिकसन्तानोत्पत्तिः ॥७२॥

भाषा टीका-स्त्री के गर्भाशय में पुरुष के वीर्य की अधिकता होने से पुरुष शरीर तथा स्त्री के रज की अधिकता से स्त्री शरीर होता है एवं यदि माता पिता का रज और वीर्य समान हो तो नपुंसक का शरीर उत्पन्न होता है ॥ यदि रति काल में स्त्री पुरुष अथवा दोनों आपस में चिन्तायुक्त हों तो उनकी सन्तान अंधी केबड़ी अत्यन्त छोटी और अंग हीन होती है और रति समय में आपस में अङ्गों के मर्दन द्वारा वीर्य के पतन का अवरोध करने से गर्भाशय में जब रुक रुककर दो तीन बार बिन्दु का पात होता है तब एक से अधिक सन्तान पैदा होती है ॥

मू०—सार्धपलत्रयं शुक्रं विंशति पलं रक्तं द्वादश-पलं मेदः, दशपलं मज्जा, शतपलं मांसं दशपलं पित्तं विंशतिपलं श्लेष्मा, तद्द्वालः स्यात् षष्ठ्याधिक शत त्रयम स्थीन्य स्थिमात्रं सन्धयः सार्धत्रय कोटि रोम-कूपाणि पितृ मातृ वीर्यं भवति वात पित्त श्लेष्मधातु त्रयं दशधातुमयं शरीर मिति गर्भोत्थ पिण्डोत्पत्तिः ॥७३

इति महेश्वरावतार श्रीगोरक्षनाथकृत प्रथमोपदेशः ॥

सं० टी०—गर्भस्थ बाल शरीरे कियत् परिमाणं शुक्रादिक मिति जिज्ञासां दिक् प्रदर्शन न्यायेनोपशमयती त्यतोग्रन्थान्तरविरोधस्य नास्त्यवकाशः। अनन्तरमिमांतनुमधिष्ठाय जीवः स्व स्व कर्मानुकूलं फलं सुख दुःखान्यतरात्मकं भुनक्ति। अयमत्र निर्गलितसारः। अनन्त कालात् कर्म प्रेरितो जीवः। नवं नवं विग्रह मुपाददानः जन्मजरामृत्यु चक्र प्रबन्धारूढः संसरति। यदाहि, अनेक जन्मसञ्चित पुण्य पुञ्जपरिपाक वशात् संसारात्परां शान्तिमुपाशिश्रीषतेतदा तदुपायं पर्य्येषमाणो नित्यनिरवयव चेतनात्मकस्य जीवस्या विद्यां विना बन्धो न भवेदिति। आचार्योपदेशेन युक्त्या च तदवस्थाया च तदुच्छेद निदानञ्च विद्यामिकामैवेति विनिश्चित्य तदुपायो योग मार्ग एव समाश्रयणीयो मुमुक्षुभिः योगे च स्थूल शरीर ज्ञानं परमावश्यकम्, तज्ज्ञानं विना तदनुष्टानायोगात् किञ्चोपासनायां कर्मणि लौकिकेऽपि चिकित्सादि कर्मणि च सर्वत्र शरीर परिज्ञानस्यावश्यकम् तज् ज्ञानञ्च तन्निदान ज्ञानमन्तराऽशक्यमेवाधि भौतिक शरीरस्याधिभूतमुपादानकरणम्। अधिदेवश्च निमित्तं तदुभयं शरीर निदानम् अतस्तदुभयज्ञानमपेक्ष्यते तदुभयोरपि अभिन्न निमित्तोपादानम् "आदिनाथः" सोऽपि शक्ति सहितः एव न तु शक्ति रहितोयमेव विशेषः। अत आदिनाथमारभ्य स्थूलशरीर पर्यन्तोपवर्णनमस्मिन्नुपदेशे। आदिनाथः कूटस्थ एकविधः सकल निदानभूतः। तदुद्दृष्ट्याद्वैतमेव ॥७३॥

इति सिद्धसिद्धान्तपद्धतौ सर्वतन्त्रस्वतन्त्र पं० श्री द्रव्येश झा कृत गूढार्थ दीपिकायां प्रथमोपदेशः।

भाषा टीका—अब इस शरीर में कितने परिमाण में कौन कौन वस्तुएँ रहती हैं उन वस्तुओं के सामान्य परिमाण का निरूपण करते हैं। इस शरीर में साढ़े तीन पल वीर्य, बीस पल रक्त, बारह पल मेदा, दशपल मज्जा, सौ पल माँस, दशपल पित्त, बीसपल गर्मी और इतना ही वायु रहता है। यहां यद्यपि वायु और उष्मा में विशेषतः गुरुत्व धर्म नहीं है जिसका पलादि से नाप किया जाय तथापि जिस परिमाण या यन्त्र विशेष से उष्मा और वायु का

माप कर सकते हैं इस योगज धर्मादि प्रमाण वा यन्त्र विशेष से मांप की गई वायु को कह सकते हैं कि यह वायु वा उष्मा बीस पल है जैसे थर्मामैटर से माप की गई गर्मी को कहा जाता है कि इस देवदत्त के अट्ठानवे डिग्री ताप है इसी प्रकार योगाचार्य जी ने ऋतम्भरा योगप्रज्ञा से मांप कर बीस पल वायु और उष्मा के परिमाण का प्रतिपादन किया तथा तीन सौ साठ हड्डियां और उतने ही उनके जोड़ में एवं साढ़े तीन करोड़ रोम तथा रोमकूप हैं। यह सब माता पिता के रज वीर्य का ही परिणाम है यह शरीर वात, पित्त, कफ तथा चर्म रुधिर मांस मेदा अस्थि, मज्जा और शुक्र इन दश धातुओं से बना है॥ इस प्रकार से उत्पन्न होने वाले पिण्ड की उत्पत्ति का वर्णन समाप्त हुआ ॥७३॥

इति सिद्धसिद्धान्तपद्धतौ योगीन्द्र श्री १०८ बोहराधिपति श्री पूर्णनाथ शिष्येण वेदान्ताचार्येण योगि श्री पं० भीष्मनाथेन कृतायां हिन्दी टीकायां प्रथमोपदेशः समाप्तः ॥

अथ पिण्डविचारः कथ्यते

मूल—पिण्डे नव चक्राणि। आधारे ब्रह्मचक्रं त्रिधावर्त्तं भगमण्डलाकारं तत्र मूलकन्द स्तत्र शक्तिं पावकाकारां ध्यायेत् तत्रैव कामरूपपीठं सर्वकामप्रदं भवति ॥१॥

सं०—साकल्येन पिण्डाण्डौ प्रदर्श्य शरीरेऽस्मिन्ननेकेषां सद्भावेऽपि योगेऽत्यावश्यक ज्ञातव्यावयवादीनां स्वरूपाणि तत्र कर्त्तव्य ध्यानादि विशेषांस्तत्फल विशेषांश्च प्रदर्शयितुं द्वितीयोपदेशः प्रस्तूयते। पिण्डेऽस्मिन् स्थूलशरीरे नव चक्राणि सन्ति पृष्ठमध्यसंलग्नो मेरुदण्डस्तदभ्यन्तरे दक्षिणभागे पिंगलाख्या सूर्यनाड़ी। वाम. भागे चेडानाम्नी चन्द्रनाड़ी॥ मध्ये सुषुम्णा नाड़ी॥ इयं तेजोरूपा मूलाधारमारभ्य ब्रह्मरन्ध्रसहस्रार पर्यन्ता॥ तस्य एव तत्तत्स्थानेष्वाकारविशेषः चक्रम् तत्र षट् चक्राणि कचित् वर्णितानि सङ्क्षेपेणोपासनार्थम् वस्तुतः प्राचीन ग्रन्थेषु नवचक्रमयंवपुरित्येव बहुलमुपलभ्यते लिंगादधो गुदादुर्ध्वं मध्ये बिन्दुरूपकुण्डलिनीशक्तेः प्रथमाविर्भावस्थानं मूलाधारः। मूलस्य शरीरकारणस्य बिन्दोराश्रयः॥ वस्तुतः शरीरस्यैवाधारः सा तां विना शरीरस्य स्थितिरेव दुर्लभा किन्तु बालानां बोधाय घटे मृत्तिकेतिवत् मूलस्याधार इति व्युत्पत्तिः प्रदर्श्यते तत्राध्यात्मिकप्राणवायु सहिता चिच्छक्तिः शरीरकारणत्वात् ब्रह्मचक्रम् त्रिधावर्तम् त्रिवलयान्वितम् कचिन् सार्धत्रिवलयान्वितम् इत्युपलभ्यते न तेन विरोधश्च तुच्छसंख्यापूर्त्ति पर्यन्तं त्रिपदेनैव कथ्यते यथाऽमर कोश आदशतः संख्या संख्येय इत्यत्र दशपदेनाऽष्टादश पर्यन्तं गृह्यते (भगमण्डलाकारम्) अधो मुख त्रिकोण यन्त्रम् तत्र त्र्यौपश्लेषिका सप्तमो तथा च तत्समीपे किंचिदुर्ध्वदेशे मूलकन्दः पद्यण्डसरूप एतस्मादेव सर्वानाड्यः प्ररोहन्ते॥ तत्र मूलाधारे वह्निवर्णां शक्तिं ध्यायेत् साधकः। इयमिच्छाशक्ति गौरीरूपा कामेश्वरी तत्र स्थितशिवकामेश्वरसहिता ध्येया न केवलः शिवो न च केवला शक्ति रिति रहस्यम् बहुषु स्थलेषु स्वयमा

चार्यपादैर्व्यवस्थापितम् शक्तिध्याने शिवसाहित्यं शिवध्याने शक्तिसाहित्यमिति प्राधान्यमात्रं विशेषः । तदुक्तम् विद्युद्विलासवपुषः श्रियमाहवन्तीं यान्तीं स्ववासभवनाच्छिवराजधानीम्, सौषुम्णमार्गकमलानि विकाशयन्तीं देवीं भजेद्धृदि परामृतसिक्तगात्राम् एतत् स्थानम् कामपीठम् । शक्तेराविर्भावस्थानम् पीठपदेन व्यवह्रियते कामा च कामश्च तयोरेकशेषे कामौ तयोः पीठम् कामेश्वरी कामेश्वरयोः स्थानमित्यन्वर्थता सूचिता । अत्रोपासकानां सकलकामना सिद्धिर्भवति, इति प्रथमचक्रम् ।

भा० अब पिण्ड (शरीर) के विचार का वर्णन करते हैं । इस पिण्ड में नौ चक्र हैं उन में भी गुदा से दो अंगुल परिमाण ऊपर और लिङ्ग से दो अङ्गुल नीचे चार अङ्गुल परिमाण और चतुर्दलयुक्त मूलाधार है । उसी आधार में तीन बार गोल आकार से चारों ओर लिपटा हुआ त्रिकोण भग मण्डल के सदृश और परब्रह्म की प्राप्ति का हेतु ब्रह्मचक्र है । उसी के समीप कुण्डलाकार मूलकन्द है वहां अग्नि के आकार वाली देदीप्यमान शक्ति का ध्यान करे । वहां ही त्रिकोणात्मक कामरूप पीठ है इस काम पीठ के ध्यान मात्र से सकल इष्ट कामनाओं की सिद्धि होती है इस लिये इस का 'काम पीठ यह नाम सार्थक है ॥ १ ॥

मू०—द्वितीयं स्वाधिष्ठानचक्रं तन्मध्ये पश्चिमाभिमुख लिंगं प्रवालाङ्कुर सदृशं ध्यायेत् तत्रैवोड्डीयान पीठं जगदाकर्षणं भवति ॥२॥

सं० टीका—लिङ्गसमीप देशे सुषुम्णानाड्यां स्वाधिष्ठानं चक्रम् तन्मध्ये, इषद्रक्तवर्णं शिवलिङ्गं चिन्तयेत् अत्रोपासनेनाकर्षणशक्तिः सिद्ध्यति । इति द्वितीय चक्रम् ॥२॥

भा० दूसरा छःदलयुक्त स्वाधिष्ठान चक्र है उस के बीच पीछे की ओर मुख वाला मूंगे के अग्रभाग के सदृश शिव लिङ्ग है वहां रक्तवर्ण उस शिव लिङ्ग का ध्यान करे वहीं पर उड्डीयाण पीठ है वहां ध्यान करने से जगत् के आकर्षण की सामर्थ्य होती है ॥२॥

मू०—तृतीयं नाभिचक्रं पञ्चावर्त्तं सर्पवत् कुण्डलाकारं तन्मध्ये कुण्डलिनी शक्तिं बालार्ककोटिसदृशीं ध्यायेत् सा मध्यमा शक्तिः सर्वसिद्धिप्रदा भवति ॥३॥

सं० टी०—नाभि देश समीपस्थ सुषुम्णायां पञ्चावर्त्त सर्प कुण्डलसदृशीं कुण्डलिनीं कोटिप्रातःकालिकसूर्यप्रभां ध्यायेत् इयं मूलाधारस्थकुण्डलिनीतो भिन्ना तदवस्थाविशेषः। अत स्तत्र त्रिरा वृत्तम् अत्र पंचावृत्तम् इति तृतीयम् ॥३॥

भाषा टीका— तीसरा नाभी चक्र है इसी को मणिपूर चक्र भी कहते है। वह सर्प के सदृश कुण्डलाकार नाड़ी से चारों ओर पाँच बार गोला कार में वेष्टित है उस में प्रातः काल के करोड़ों सूर्यों के सदृश कुण्डलिनी शक्ति का ध्यान करे। इस के ध्यान मात्र से सब सिद्धियों की प्राप्ति होती है और चित्त में सत्त्व गुण का प्रवाह बहने लगता है इसी कुण्डलिनी शक्ति को मध्यमा शक्ति भी कहते है। क्यों कि मूलाधारस्थ सूक्ष्मा कुण्डलिनी शक्ति की ही अवस्था विशेष होने से इस का नाम मध्यमा शक्ति हुआ। ६ ॥

मू०—चतुर्थं हृदयाधारमष्टदलकमलमधोमुखं तन्मध्ये कर्णिकायां लिङ्गाकारं ज्योती रूपां ध्यायेत्। सैव हंसकला सर्वेन्द्रियाणि वश्यानि भवंति ॥४॥

सं० टी०—हृदयसन्निहितसुषुम्णायामनाहत चक्रम् ततो निःसृताऽष्टदलकमलं हृद् शे ऽधोमुखं तदन्तः कर्णिकायां ज्योतीरूपां ध्यायेत् इयं हंसकला श्री शक्तिः। अत्रो पासनेन सर्वेन्द्रियाणि वश्यानि भवंति इति चतुर्थम् ॥४॥

भा०— चौथा हृदय चक्र है उसी को अनाहत चक्र भी कहते हैं वहां अष्टदल वाला अधोमुख कमल हैं उस का जो मुख है उसके मध्य में स्थित कर्णिका में शिव लिङ्ग के आकार वाली ज्योती का ध्यान करे उस ज्योति का नाम ही हंसकला है उस हंस कला रूप ज्योति का ध्यान करने वाले पुरुष की सब इन्द्रियां वश में होजाती हैं। ४ ॥

मू०–पञ्चमं कण्ठ चक्रं चतुरंगुलं तत्र वाम इडा चन्द्रनाड़ी दक्षिणे पिंगला सूर्यनाड़ी तन्मध्ये सुषुम्णां ध्यायेत् सैवानाहतकलाऽनाहतसिद्धिर्भवति ॥५॥

सं० टी०–कण्ठ देशे पञ्चमचक्रम् चतुरङ्गुलपरिमितम् । तत्र वामभागे इडानाम्नी चन्द्रनाड़ी दक्षिणे च पिंगलानाम्नी सूर्य्यनाड़ी मध्ये सुषुम्णा तां ध्यायेत् तत्रभेदेनस्पष्टतयाप्रकाशते, इतः पूर्वंभेदेन स्पष्टता नासीदिति व्यज्यते । इयमनाहतकला अत्रोपासनेन क्वापि जले स्थले पाषाणे वा प्रतिघातो न भवति वा संकल्प शक्तिः सिध्यति ॥५॥

भा०– पांचवां चार अङ्गुलविस्तार वाला कण्ठचक्र है उसमें बांई ओर इड़ा नाम की चन्द्र नाड़ी है और उसी कंठ चक्र के दाहनी ओर पिङ्गला नाम की सूर्यनाड़ी मूलकन्द से प्रकट होकर तत्तत् स्थानों में होती हुई यहाँ आकर निकली है । उन दो नाड़ियों के मध्य में श्वेतवर्ण सुषुम्णा नाम की ब्रह्म नाड़ी का ध्यान करे । उस सुषुम्णा का ही नाम अनाहत कला है इस के ध्यान से अनाहत सिद्धि होती है । अर्थात् जो जो मानसिक संकल्प करता है वह सब सफल होजाते हैं । ५ ॥

मू०–षष्ठं तालुचक्रम् तत्रामृतधाराप्रवाहः घण्टिकालिङ्गमूलरन्ध्रराजदन्तं शंखिनीविवरं दशमद्वारं तत्र शून्यं ध्यायेत्, चित्तलयो भवति ॥६॥

सं० टी०–तालु मूले षष्ठं चक्रं तत्रामृतस्य सहस्रारतः प्रवाहो भवति योहि माँसखण्डस्तन इवमुखोद्घाटने दृश्यते सा घंटिका लिंग सदृशं तस्या मूले छिद्रम् तदेव दशमद्वारं योगतन्त्रे कथ्यते शंखिनी नाड्या विवरं तत्र शून्यस्य ध्यानेन चित्त लीनं भवति दन्तानांराजा इति राजदन्तंतदिवेति राजदन्तम् इवार्थे क मत्र सादृश्यं स्वच्छत्वेन चक्र विशेषणम् ॥६॥

भा०–छटा तालु चक्र है वहां सहस्रदल स्थित चन्द्र मण्डल

सेअमृतबिन्दु निकलता है उस अमृतबिन्दु की धारा का प्रवाह तालु की खास नाडियों में रहता है वहीं पर लिङ्गाकार घण्टिका के मूल से लेकर तालु पर्यन्त राजदन्त नामक बिल है इसी को शंखिनी विवर भी कहते है क्योंकि यहाँ शंखिनी नाडी का सम्बन्ध है यही दशमद्वार का मार्ग है ॥ यहां सून्य अर्थात् निर्गुण का ध्यान करे इस शून्य के ध्यान से चित्त का लय होता है । ६ ॥

मू०–सप्तमं भ्रूचक्रं मध्यममंगुष्ठमात्रं ज्ञाननेत्रं दीपशिखाकारं ध्यायेद् वाचां सिद्धिर्भवति ॥७॥

सं०—सप्तमम् भ्रूचक्रम् । भ्रुवोर्मध्ये वर्तत इति बोधनाय मध्यम मिति विशेषणम् अगुष्ठमात्रम् अंगुष्ठ परिमितम् ज्ञानं नयत्यनेनेति ज्ञान नेत्रम् ज्ञान विकाशस्य केन्द्रम् तत्र दीप शिखाकारं तेजो ध्यायेद नेन वाक् सिद्धिर्भवति ॥७॥

भा०—सातवां दो दल वाला भ्रूचक्र है । इसको आज्ञाचक्र भी कहते हैं । इसी भ्रूचक्र के मध्य में दीप शिखा के आकार वाला अङ्गुष्ठ परिमाण ज्ञान नेत्र है, वहां उसका ध्यान करे । उस ज्ञान नेत्र के ध्यान से वाक्सिद्धि होती है । उस ध्यानी पुरुष की वाणी कभी व्यर्थ नहीं जाती । अर्थात जैसा वचन बोलता है, वह सब सत्य होता है ।

मूल–अष्टमं ब्रह्मरन्ध्रं-निर्वाणचक्रं सूचिका-भ्रभेद्यं, धूमशिखाकारं ध्यायेत् तत्र जालन्धर पीठं मोक्षप्रदं भवति ॥८॥

सं०—अष्टमं निर्वाण नामकं चक्रम् । अत्र ध्यानेन ब्रह्म प्रकाश्यते ऽतो ब्रह्मरन्ध्रमिति द्वितीयं नाम मोक्षश्च भवति । अतः सार्थकं नाम । इदं चक्रं सहस्रारमूले तत्र कियच्छिद्रमिति जिज्ञासायामाह सूचिका भ्रभेद्यं सूचिकाग्रमिवभेद्यं प्रवेश मार्गः, इदं जालन्धर बन्धेनोद्घाट्यते ऽतो जालन्धर पीठं सांकेतिकं वा नाम धूमसदृशं तेजो ध्यायेत् । तत्फलं मोक्षः ॥८॥

भा०—आठवें ब्रह्मरन्ध्र में सूई के अग्र भाग के बराबर धूम की शिखा के आकार वाला निर्वाण चक्र है। वहां उस निर्वाण चक्र का ध्यान करे। उसके ध्यान से मुक्ति होती है। वहीं पर जालन्धर पीठ है ॥८॥

मू०—नवम माकाशचक्रं षोडशदलकमलमूर्ध्वमुखं तन्मध्ये कर्णिकायां त्रिकूटाकारं तदूर्ध्वशक्तिं तां परमशून्यां ध्यायेत् तत्रैव पूर्णगिरि पीठं सर्वेच्छा सिद्धि भवति। इति नवचक्रस्य विचारः ॥९॥

सं० टी०—नवममाकाशनामकंचक्रम्। सहस्रारोपरिभाग ऊर्ध्वमुखं षोडशदलात्मकं कमलं वर्तते तस्य दले (कर्णिकायाम्) त्रिकूटाकारा त्रिकोणाकारा ऊर्ध्वमुखी शक्तिः निराकारतया सच्चिदानन्द रूपेण ध्येया अनेन सत्य संकल्पो भवति। अतएवास्य पूर्णगिरिपीठसंज्ञा संकेतिता। निखिलैः पदार्थैः परिपूर्णं नगोपमम मेयत्वात् उच्छ्रितत्वाच्च स्थानमिदमिति सार्थकं नाम। पूर्वं चक्रे ध्यानेन संसारभयनिवृत्तिर्भवति। द्वितीयेतु सर्वोवशीभूतो भवतीति विशेषः। इति समाप्तः शरीरेऽस्मिन् सारभूत नव चक्राणां विचारः ॥९॥

भा० टीका—नवां आकाश चक्र है वह सहस्र दल कमल के ऊपर मध्य भाग में सोलह दल सहित है और उसका मुख ऊपर को है। उसकी मध्य की डंडी में तीन कोण से ऊँची या त्रिकोणाकार उस षोडशदल कमल से ऊपर परम उत्कृष्ट निराकार शक्ति का ध्यान करे। वहां ध्यान करने से सब इच्छाएँ सिद्ध होती हैं। उसी का नाम पूर्ण गिरि पीठ है। इस पूर्वोक्त रीति से यहां तक नौ चक्रों का विचार समाप्त हुआ ॥९॥

मू०—अथ षोडशाधारः कथ्यते तत्र प्रथमं पादाङ्गुष्ठाधारं तत्राग्रतस्तेजोमयं ध्यायेत्। दृष्टिः स्थिराभवति

सं०—अथ नव चक्र निरूपणानन्तरं योगोपयोगि शरीर निर्मितं

शरीरस्थशक्तीनामाविर्भावार्थं तत्तत् स्थान विशेषां स्तत्र कर्तव्यविशेषा-नानुषंगिक त तत्फलविशेषांश्चोपदिशति । अथ षोडशाधारेत्यादि तत्र प्रथमं स्थानं पादांगुष्ठतलाग्रं तत्र तेजोरूपं ध्यायेत् तत्फलं दृष्टेः स्थैर्यम् ॥१०॥

भाषा टीका—अब क्रम से सोलह आधारों का निरूपण करते हैं उन सोलह आधारों में सब से पहला पादाङ्गुष्ठ आधार है। उसके अग्रभाग में तेजोमय स्वरूप का ध्यान करे॥ उस ध्यान से दृष्टि स्थिर होती है ॥१०॥

मू०—द्वितीयं मूलाधार सूत्रं वाम पार्ष्णिना निःपीडयितव्यम् । तत्राग्नि दीपनं भवति ॥११॥

सं०—द्वितीयं मूलाधारनाडी । तस्या वाम पार्ष्णिना मर्दनेऽग्नि दीपनम् ॥११॥

भा० टी०—दूसरा मूलाधार है उसमें जो सीवन है उसको बायें पैर की एड़ी से दबाकर दृढ़ आसन से बैठे ॥११॥

मू०—तृतीयं गुदाधारं विकाससंकोचनेन निराकुञ्चयेत् । अपानवायुः स्थिरोभवति ॥१२॥

सं० टी०—तृतीयं स्थानं गुदामूलम् तस्य भूयः संकोच विकास करणेऽपान वायोः स्थिरता ॥१२॥

भा० टी० तीसरा गुदाधार है। वहां गुदा के विकाश और संकोच से अपान वायु को ऊपर की ओर खींचे। ऐसा करने से अपानवायु स्थिर होता है और इस क्रिया के करने से कुण्डलिनी को जगाने में भी सहायता मिलती है और गुह्य स्थान के समस्त रोग नष्ट होजाते हैं ॥१२॥

मू०—चतुर्थं मेढ्राधारं लिङ्ग संकोचनेन ब्रह्मग्रन्थि-त्रयं भित्त्वा भ्रमरगुहायां विश्रम्य तत ऊर्ध्वमुखे

बिन्दुस्तम्भनं भवति । एषा वज्रोली प्रसिद्धा ॥१३॥

सं० टी०—चतुर्थं स्थानंलिङ्गम् 'ल' तस्य संकोच करणेन तत्र संयुक्तनाडी त्रयस्य विश्लेषणं भवति । तेन लिङ्ग मध्ये विन्दु (वीर्य्य) गमनमवरुध्यते, तेन आगतमपिपरावर्त्तते भ्रमर गुहायां शिरःपृष्ठेशिखामूला द्धोवीर्य्यस्थाने न ततो बहिर्निः सरति तत ऊर्ध्वमुखे सति विन्दु स्तम्भवनं भवति । एतत्क्रियां विना वस्तुतो वीर्य्यरक्षणं ब्रह्मचर्यं दुर्लभमेवेत्यतो-ऽत्रोक्तम् । विशेषतः सत्क्रियाभिज्ञैरेव शिक्षणीयम् । अस्य सांकेतिकंनाम वज्रोलीति ॥१३॥

भाषा टीका—चौथा लिङ्ग आधार है । वहां लिङ्ग के संकोच द्वारा योनि मुद्रा की सहायता से वीर्य का ऊर्ध्व संचार करता हुआ योगी ब्रह्मा, विष्णु रुद्र इन तीन ग्रन्थियों को भेदन कर मेरुदण्ड के सामने ग्रीवा के उपरि भाग में विद्यमान भ्रमर गुहा में वीर्य की स्थापना करे । तदनन्तर ऊर्ध्वमुख होजाने से वीर्य का स्तम्भन होता है । अर्थात् वीर्य नीचे को नहीं गिरता । यह क्रिया वज्रौली नाम से प्रसिद्ध है जिस योगी की यह क्रिया सिद्ध होजाती है उसका शरीर वज्र जैसा मजबूत और कामदेव के समान सुन्दर होजाता है ॥१३॥

मू०—पञ्चम- मोड्याणाधारयोर्बन्धनान्मलमूत्र संकोचनं भवति ॥१४॥

संस्कृत टीका—पञ्चमं स्थानं नाभेरधः लिङ्गादूर्ध्वमुड्याण नामकं तस्य बन्धनेन मल मूत्रयोः संकोचो (अल्पता) भवति । तदुक्तम् योगिशि०उ० "नाभौ लिंगस्य मध्येतु उड्याणाख्यं च बन्धयेत ॥१४॥

भा० टी०—पञ्चम उड्डियान और मूलाधार के बन्धन से मल मूत्र का क्षय होता है ॥१४॥

मूल—षष्ठे नाभ्याधार ओङ्कारमेकचित्तेनोच्चारिते नादलयो भवति ॥१५॥

संस्कृत टीका-षष्ठं नाभिमूलम् तत्रैकाग्रमनसा प्रणव ध्यानेन नादलयो जायते । नादोनाम मूलाधारस्थबिन्दुरूपपरा

शक्तितः समुद्भूतः प्रकाशात्मसूक्ष्मशब्दः। तदुक्तं यो० शि० ३ मूलाधार गताशक्तिः स्वाधारा विन्दु रूपिणी। तस्यामुत्पद्यते नादः सूक्ष्मबीजादिवांकुरः। तां पश्यन्तीं विदुर्विश्वं यया पश्यन्ति योगिनः। इति तस्य लयः वृत्त्यभावः स्वकारणपरावाग्रूपेण स्थितिः। तत्फलं दूर श्रवणं तदुक्तम् नादेमनो जयं ब्रह्मन् दूरश्रवणकारणम् ॥१४॥

भाषा टीका—छठे नाभि आधार में एकाग्रचित्त से ओंकार का उच्चारण करने पर शब्द का लय होता है ॥१५॥

मू०—सप्तमे हृदयाधारे प्राणं निरोधयेत् कमल विकासो भवति ॥१६॥

सं० टीका—सप्तमं स्थानं हृदयमूलम् तत्र प्राणवायोर्निरोधेन तत्रस्थाष्टदलकमलं विकसितं भवति॥१६॥

भा०—सातवाँ हृदयाधार है। उसमें प्राण का निरोध करे ऐसा करने से हृदय कमल का विकाश होता है ॥१६॥

मू०—अष्टमे कण्ठाधारे कण्ठमूलं चिबुकेन निरोधये, दिडापिंगलयोर्वायुः स्थिरोभवति ॥१७॥

संस्कृत टीका- अष्टम स्थानं कण्ठमूलं तस्य चिबुकेन बन्धनमयमेव जालन्धरः, तदाह कण्ठं संकोचयेत्किंचिद्बन्धो जालन्धरो ह्ययम्। तेनेडापिंगलास्थवायुः स्थिरो भवति तथा च कुम्भक सिद्धिः ॥१७॥

भाषा टीका—आठवें कण्ठ आधार में कण्ठ मूल को ठोडी से निरोध करे। अर्थात् कण्ठ मूल और ठोढ़ी को मिला कर जालन्धर वन्ध करे। इस क्रिया से इड़ा, पिङ्गला नाम की सूर्य और चन्द्र नाड़ी में प्राणवायु स्थिर होता है ॥१७॥

मूल—नवमे घंटिकाधारे जिह्वाग्रं धारयेदमृत कला स्रवति ॥१८॥

संस्कृत टीका—नवमे घण्टिका मूलं तत्र जिह्वाग्रधारणे सहस्रारतः सुधायाः प्रस्रवणं जायते ॥१८॥

भा० टी०—नवाँ घण्टिकाधार है। यहाँ मुख के भीतर तालु में लटकनेवाले काग का नाम घण्टिका है। उस घण्टिकाधार के मूल में जिह्वा के अग्रभाग को लगावे। उस जगह सहस्रदल कमल में स्थित् चन्द्र मण्डल से जो अमृत कला टपकती है उसका पान करे। इसके पान से शरीर रोग रहित होजाता है ॥१८॥

मूल—दशमे ताल्वाधारे ताल्वन्तर्गर्भे लम्बिकां चालनदोहनाभ्यां दीर्घी कृत्वा विपरितेन प्रवेशयेत् काष्ठी भवति ॥१९॥

संस्कृत टीका—दशमं स्थानं घंटिकात ऊर्ध्वं तत्र ताल्वभ्यन्तर स्थित मार्गेण लम्बिकां (जिह्वाम्) चालन दोहन क्रियया दीर्घां विधाय विपरीतरूपेण प्रवेशने खेचरी मुद्रा सम्पद्यते तेन काष्ठ इव निश्चलो भवति। अयमेव जडसमाधिः कथ्यते तदाह कपाल कुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। आचार्य्य मते ऽयमत्र विशेषः प्रतीयते लम्बिकाया एव दोहन चालने विधाय विपरीतां लम्बिकां कृत्वा जिह्वाग्रं धारयेत्। तेनामृतपानं खेचरी फलमपि सिध्यति जडसमाधिरपि भवतीति कलनीयं कोविदैर नुभवचुञ्चुभिः ॥१९॥

भाषा टीका—दशवाँ तालु आधार कागमूल से ऊपर है। उसके भीतर छिद्र में चालन और दोहन क्रिया से जिह्वा को एक बिलस्त लम्बी बढ़ा उलटा कर प्रवेश करे! इससे वह योगी काठ की तरह निश्चल होजाता है ॥१९॥

मूल—एकादशमथ जिह्वाधारं तत्र जिह्वाग्रं धारयेत् सर्व रोग नाशो भवति ॥२०॥

संस्कृत टीका--एकादशं जिह्वामूलम् तत्र जिह्वाग्रधारणे सर्व रोगादिविमुक्तिः फलम् ॥२०॥

भाषा टीका--ग्यारहवाँ जिह्वा आधार है। उस जिह्वामूल मे

जिह्वा के अग्रभाग को लगावे ! इसके परिपक्व अभ्यास से सब रोगों का नाश होजाता है ॥२०॥

मूल—द्वादशं भ्रूमध्याधारं तत्र चन्द्रमण्डलं धारयेत्, शीतलतां याति ॥२१॥

सं० टी०—द्वादशं भ्रूमध्यं तत्र चन्द्र मण्डल ध्यानेन शीतलता लाभः ॥२१॥

भाषा टीका--ग्यारहवाँ भ्रूमध्य आधार है। वहाँ निर्मल और सफेद रूप चन्द्रमडण्ल का ध्यान करें। उस श्वेत चन्द्रमण्डल के ध्यान से ध्यान करने वाले का अङ्ग शीतल हो जाता है ॥२१॥

मू०—त्रयोदशं नासाधारं तस्याग्रं लक्षयेत् मनः स्थिरं भवेत् ॥२२॥

संस्कृत टीका—त्रयोदशं नासिकाग्रं तत्रैकाग्रदृष्टौ मनसश्चाञ्चल्य नाशः ॥२२॥

भाषा टीका--ग्यारहवाँ नाँसिकाधार है। उसके अग्रभाग में दृष्टि लगाकर ध्यान करे। इस ध्यान के दृढ़ अभ्यास से मन अपने चंचल स्वभाव को छोड़कर स्थिर हो जाता है ॥२२॥

मूल—चतुर्दशं नासामूलकं कपाटाधारं तत्र दृष्टिं धारयेत् षण्मासाज्ज्योतिः पुञ्जं पश्यति ॥२३॥

संस्कृत टीकाचतुर्दशं नासिका मूलम् तत्र दृष्टि धारणे षण्मासेन जोतिः पुञ्जदर्शनम् ॥२३॥

भाषा टीका—चौदहवाँ नाँसिकामूल कपाटनाम का आधार है। वहाँ दृष्टि लगाकर ध्यान करे। इससे छः महीनो में देदीप्यमान तेज मण्डल को साफ साफ देखने लगता है ॥२३॥

मू०—पञ्चदशं ललाटाधारं तत्र ज्योतिः पुञ्जं लक्षयेत् तेजस्वी भवति ॥२४॥

सं० टी०—पञ्चदशं ललाटमूलं तत्र ज्योतिः पुञ्जध्यानेन तेजस्वी जायते ॥२४॥

भाषा टीका—पन्द्रहवां ललाट आधार है। उसमें ज्योति मण्डल को लक्ष्य बना कर ध्यान करे। उस ध्यान से योगाभ्यासी पुरुष तेजस्वी होजाता है ॥२४॥

मूल—अवशिष्टे षोडशे ब्रह्मरन्ध्र आकाश चक्रं तत्र श्री गुरुचरणाम्बुजयुग्मं सदावलोकयेदाकाशवत्पूर्णो भवति। इति षोडशाधारः ॥२५॥

सं० टी०—षोडशं ब्रह्मरन्ध्रं तत्र श्रीगुरुस्वरूपचरणपंकजो-पाधिविशिष्टं शक्तिसहितादिनाथं सच्चिदानन्दं निरवच्छिन्नं ध्यायेत्। प्रथमं भेदावभासो भवति दृष्टे सति भेदे विलयंगते साधकोऽपि परिपूर्ण रूपो मुक्तो भवति, इतिषोडशाधारः ॥२५॥

भाषा टीका—अवशिष्ट ब्रह्मरन्ध्र में सोलहवाँ आकाशचक्र है उस चक्र में आदिनाथ रूप श्रीपरम गुरु के चरण कमलों का ध्यान करे इस ध्यान से अभ्यासी आकाश की तरह पूर्ण व्यापक होजाता है। इस पूर्वोक्त रीति से सोलह आधारों का व्याख्यान समाप्त हुआ ॥२५॥

मूल—अथ लक्ष्यत्रयन्तत्रतावदन्तर्लक्ष्यंकथ्यते। मूलकंदाद्दण्डलग्नां ब्रह्मनाडीं श्वेत वर्णां ब्रह्मरन्ध्र पर्यन्तं गतां संस्मरेत् तन्मध्ये कमलतन्तु निभां विद्युत्कोटिप्रभा मूर्ध्वगामिनीं तां मूर्त्ति-म्मनसा ध्यायेत् तत्र सर्व्वसिद्धिधदा भवति ॥२६॥

संस्कृत टीका—राजमार्गेण मनसा स्थिरीकरणोपायोवक्तव्यः, येन सर्व्वमुखतो मनो निरोध्य शक्ति विशेषं सम्पाद्य स्वेष्टं साधयेत् यद्यपि किमप्यालम्बनमादाय मनो निरोधः सुकरः, अतएव पातञ्जल योगसूत्र उपदिष्टम् यथाभिमतध्यानाद्वेति तथाप्युद्भूत शक्तिकं स्थान विशेष

मालम्बनी कृत्य मनो निरोधो झटिति भवति शक्तिविशेषसम्पादनंच भवतीति निरीक्ष्य तत्तत् स्थान विशेषानुपदिशन्तिस्माचार्य्याः। अत एव पातञ्जलेऽप्यालम्बन भेदेन संयमस्य फल भेदान् वर्णयां बभूव। तत्र कृत्स्नालम्बनेभ्यो वरीयसीं सुषुम्णास्थितकुण्डलिनीं शक्तिं पातञ्जलादिष्वनुक्त प्रकारां ध्यातव्यतयोपदिशन्ति। ध्रुवमनेनाल्पायासेनैव निखिलफलमाप्तुं शक्नुयुः सकललोकाः। अहो आचार्य पादानामपारकारुण्यम्, तत्रान्तर्बहिर्मध्य भेदेन ध्येय रूप लक्ष्यस्य त्रैविध्यम् तत्रापि सर्वतः प्रथम मन्तर्लक्षणमाह मूलकंदादिति कन्दोनाम नाभिलिंगान्तराले निखिलनाडीनांप्रभवस्थानम् तदुक्तं गो० प० श्रीगोरक्षनाथे नैव ऊर्ध्वं मेढ्रादधोनाभेः कन्दोयोनिः खगाण्डवत् तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः। तत आरभ्य सहस्रारपर्यन्तं मेरुदण्डे श्वेतवर्णा ब्रह्मप्रपदनी सुषुम्णा वर्त्तते तन्मध्ये कमल तन्तु सहस्रांश कोमलां विद्युत्पुंज निभां कुण्डलिनीं शक्तिं निखिल जनपावनीं महाकाली महालक्ष्मी महा सरस्वती स्वरूपां मनसा ध्यायेत्। अनेन धर्मार्थ काम मोक्ष चतुर्विध पुरुषार्थ सिद्धिर्जायते ॥२६॥

भा० टी०—अब अन्तर, बहिर, मध्य, भेद से तीन प्रकार के लक्ष्य (ध्येय) का वर्णन किया जाता है। उन में भी सब से पहले अन्तर लक्ष्य का वर्णन करते हैं। लिङ्ग से उपर और नाभि से नीचे पक्षी के अण्डे के समान मूलकन्द है, उससे समस्त नाड़ियों का प्रादुर्भाव होता है। उसी मूलकन्द से उत्पन्न हुई और मूलचक्र से होकर सुमेरु दण्ड में लगी हुई ब्रह्मरन्ध्र पर्यन्त जो श्वेत वर्ण ब्रह्मनाड़ी है उसका ध्यान करे, और उसी सुषुम्णा के मध्य में कमल तन्तु के समान करोड़ों बिजलियों की चमक के सदृश प्रकाश वाली मूलाधार में स्थित शिव लिङ्ग को छोड़ कर ऊपर सहस्र दल में विराजमान शिव राजधानी को जाने वाली उस मूर्ति स्वरूप कुण्डलिनी शक्ति का शुद्ध मन से ध्यान करे। इस ध्यान से प्रसन्न हुई कुण्डलिनी शक्ति सब सिद्धियों को देती है ॥२६॥

मूल—अथवा ललाटोर्ध्वे गोल्ललाट मण्डपे स्फुर-

दा कारं लक्षयेदथवा भ्रमर गुहा मध्य आरक्त भ्रमरा कारं लक्षयेदथवा कर्ण द्वयं तर्जनीभ्यां निरोधयेत् ततः शिरोमध्ये धूंधूंकारं नादं शृणोत्य थवा चक्षुर्मध्ये नील ज्योतीरूपं पुतल्याकारं लक्षयेदित्यन्तर्लक्ष्यम् ॥२५॥

संस्कृत टीकारुचीनां बुद्धीनां वा वैचित्र्यादेकेन सुलभस्या-प्युपायस्यैतरेण दौर्लभ्यता विलोक्यते लोक इत्यालोच्य ध्येय विकल्पमाह अथवेत्यादि अतएव एतेष्वेक एव ध्येयो न तु सर्वे तत्रापि प्रथम त्यागे मानाभावात् तदशक्तेनैव द्वितीयमवलम्बनीयमित्यथवा शब्देन स्पष्टं प्रतीयते। गोल्लाटः कपालमध्य स्थितः भागः। भ्रमरोनाम शिखासूत्रादधोभागे संस्थितं वीर्य स्थानम् इति योगि जन प्रसिद्धम्। अन्यत् सकलं निगदव्याख्यातम् मूलम् ॥२७॥

भाषा टीका—अथवा गोल्लाट नामका जो मस्तक का ऊपर का भाग है उसके चल आकार का ध्यान करे, या मेरुदण्ड के सम्मुख ग्रीवा से ऊपर भ्रमर गुफा में चारों ओर से लाल वर्ण भ्रमर के आकार का ध्यान करे। अथवा दोनों कर्ण छिद्रों को हाथों की तर्जनी अङ्गुलियों से रोके उसके बाद शिर में धूं धूं ऐसा शब्द सुनाई देता है अथवा नेत्रों में नीली ज्योति वाली पुतली के आकार का ध्यान करे। इस तरह उपरोक्त प्रकार से अन्तर्लक्ष्य का वर्णन हुआ ॥२७॥

मू० वहिर्लक्ष्यं कथ्यते नासाग्राद्बहिरंगुलद्वय मारक्तं तेजस्तत्त्वं लक्षयेदथवा दशांगुले कल्लोलवदप्त-त्त्वं लक्षयेदथवा नासाग्राद्वा दशांगुले पीत वर्णं पार्थिवतत्त्वं लक्षयेदथवाकाश मुखं दृष्ट्वाऽवलोकयेत् किरणानाकुलितं पश्यति सर्वं निर्मलीकरणमथवो र्ध्वदृष्ट्यन्तरालं लक्षयेज्ज्योतिर्मुखानि पश्यत्य, थवा तदभ्यन्तरं तत्र तत्रा काशं लक्षयेदाकाश-

सदृशचित्तं मुक्तिप्रदं भवत्य थवा दृष्ट्यन्तस्तप्तका-ञ्चन सन्निभां भूमिं लक्ष्येद् दृष्टिःस्थिराभवति। इत्यनेक विध बहिर्लक्ष्यम् ॥२८॥

सं०—यथा जाग्रत् स्वप्नसु सुप्तयः तिस्त्रोऽवस्थाः तथा ध्याना-न्यपि त्रिविधानि भवन्ति स्थूल सूक्ष्मा सूक्ष्मतमानि जाग्रतः सुषुप्तिः तयोः सन्धिः मध्यमम् तत्र प्रथमम् भ्यर्हितत्वात्। सूक्ष्मतयाभिधाय सूक्ष्मरूप-बहिर्लक्ष्यमभियत्ते मध्यमं तु उभयोः संमिश्रणतया अन्ते उपदेक्ष्यते तत्र नासिकातः वहिरंगुलि परिमित देशे तेजो ध्यायेत अत्राप्यथवा शब्देन वैकाल्पिकत्वमेवोच्यते पूर्ववदेवानुसंधेयम्। अथवा दशाङ्गुलोर्ध्वं जल-तत्त्वम् अथवा दशाङ्गुलि परिमितां पीतां पृथ्वीमथवा आकाशं किय-त्कालम्। अत आह यावत् किरणैर्व्याप्तम्। दृष्टिपथं तावदेत अनेन भूतानि निर्मलानि भवन्वि इतरत् सुगममित्यनेक विधम् ॥२८॥

भा० टी०—अब वहिर्लक्ष्य का निरूपण करते हैं। नाँक के अग्रभाग से दो अङ्गुल आगे लाल वर्ण तेजतत्त्व का ध्यान करे। अथवा नासिका से दश अङ्गुल आगे तरङ्ग युक्त श्वेत वर्ण जलतत्त्व का ध्यान करे। वा नासिका के अग्रभाग से बारह अङ्गुल आगे पीतवर्ण पार्थिव-तत्त्व का ध्यान करे। या आकाश के संमुख देखकर स्थिर दृष्टि से आकाश का ध्यान करे। इस प्रकार ध्यान करने से चित्त एकाग्र और निर्मल होता है अथवा ऊपर को मुंह कर जहाँ तक दृष्टि पहुंच सके उसके मध्य भाग को लक्ष्य बना कर ध्यान करे। उस ध्यान के प्रभाव से उस ध्येय मध्य दिशा में ज्योतिः पुञ्ज को देखता है। या जहां तहां दृष्टि स्थिर हो वहाँ सर्वत्र आकाश का ध्यान करे। इस ध्यान की महिमा से चित्त आकाश की तरह निर्मल और व्यापक होजाता है। ऐसा चित्त ही मुक्ति का साधन होता है या जहां दृष्टि का अन्त हो वहां सुवर्ण सदृश पीतवर्ण भूमि का ध्यान करे। ऐसा करने से दृष्टि स्थिर होती है। इस उपर्युक्त रीति से अनेक प्रकार का बहिर्लक्ष्य होता है ॥२८॥

मू०—अथ मध्यमं लक्ष्यं कथ्यते श्वेत वर्णं वा रक्त वर्णं वा कृष्ण वर्णं वाग्निशिखाकारं वा ज्योती रूपं वा विद्युदाकारं वा सूर्य्यमण्डलाकारं वा ऽर्ध-चन्द्राकारं वा यथेष्टं स्वपिण्डमात्रं स्थान वर्जितं मनसा लक्षयेदित्यनेकविधं मध्यमं लक्ष्यम् ॥२६॥

सं०—अथ मध्यमं लक्ष्यं मध्यमत्वं चास्य शरीरे बहिर्वा नियतस्थानरहितत्वमयमाशयः, बहिर्लक्ष्ये बाह्ये नियतं स्थानं दशांगुलादि परिमितं पूर्वमुक्तम्। अन्तर्लक्ष्ये च शरीराभ्यन्तरे कुण्डल्यादि नियतं स्थान मुक्तम अत्र तुस्थानवर्जितमित्युच्यते तेन नियतस्थानरहितत्व मेव मध्यमत्वं न तु रूपाकाररहितत्वमतएव रूपविशेषानाकार विशेषांश्च दर्शयति श्वेत वर्णेत्यादि प्रधानतस्त्रीण्येव रूपाणि वर्णितानि श्वेत रक्त कृष्णानि छा० श्रुतौ। आकारविशेषानुपदिशति, अग्नि शिखाकारमित्यादि। अनेन लक्ष्यत्रयोपदेशेन सर्वेषां समाहितावस्थां विहाय मूर्त्तिपूजनमावश्यकमिति स्पष्टम् प्रतीयते स्वरूपावस्थानन्तु लक्ष्य मेव नतु साधनम् तथा च साधनावस्थायां साधकः सांसारिकोच्चावचनानाविषयभोगेषु ऽभ्यासक्तं मनो नियतस्थानेष्वनिरुध्य नात्मस्वरूपं द्रागवस्थापयितुं शक्नोति। अतो मनो निरोधाय नियतस्थानमवश्यमपेक्ष्यते। अनियत स्थानावलम्बने हि चित्तं विक्षिप्तं भवति ततश्च कुतो मनो निग्रहःकुतो वा परमेश्वर प्रसादस्तदा चात्मस्वरूपासंपादनाशा सिकताभ्य स्तैलनिःसारणसमैव, अतो निःश्रेयसाभ्युदयार्थिभिः शक्ति विशेष शालिषु मूलो क्तस्थानविशेषेषु मनोनिग्रहोविधेयः।तत्र परमेश्वरार्चन भवस्थादौ चक्रते झटिति परमेश्वर प्राप्तिद्वारे ष्टसिद्धि ध्रुव मिति तत्र स्वान्न निर्मित मन्दिरे स्वस्यैवोपकारः, बाह्य मन्दिर निर्माणे तु समेषामापामरमुपकार इत्यहो करुणापरायणता ऽऽचार्य चरणाना मयमेव सुपन्थाः सनातनः परमेश्वरोपदिष्टो वैदिकश्च सिद्धैरनुमोदितत्वात् अन्ये सर्वेऽवैदिका इति कृतबुद्धयोविदांकुर्वन्तु।

भा०टी०—अब मध्य लक्ष्य का निरूपण करते हैं। वह

ध्येय रूप देह श्वेत वर्ण हो रक्त वर्ण हो या काला वर्ण अथवा अग्नि शिखाकार या ज्योतिरूप या बीजली के आकार वाला या सूर्यमण्डल के आकार वाला अथवा आधे चन्द्रमा के समान हो यथा रुचि स्थान विशेष से रहित पिण्ड मात्र को ध्येय बनाकर मन से ध्यान करे। इस रीति से अनेक प्रकार का मध्यलक्ष्य होता है ॥२६॥

मू०—अथ व्योमपञ्चकं लक्षयेदाकाशं पराकाशं महाकाशं तत्त्वाकाशं सूर्याकाशमितिव्योम पञ्चकम्। बाह्या भ्यन्तरेऽत्यन्त निर्मलं निराकार माकाशं लक्षयेदथवा बाह्याभ्यन्तरे ऽत्यन्तांधकारनिभं पराकाशमवलोकयेद थवाभ्यन्तर अभ्यन्तर कालानल संकाशं महाकाश मवलोकयेदथवा बाह्याभ्यन्तरे सूर्यकोटिनिभं सूर्याकाशमवलोकयेत् स्वयं व्योमपञ्चकावलोकनेन व्योम सदृशो भवति ॥३०॥

सं० टी०—सूक्ष्मधियां मनसस्थैर्यायाकाशं लक्ष्यं कर्तव्यम् तेन चित्तमपि निराकारं भवति तत्फलञ्चतत्सदृश भावः। तत्रैकस्याप्या काशस्योपाधिभेदाद् भेदंविधाय पञ्चविधत्वमुपदिशत्याकाश पराकाश मित्यादि। उपाधि भेदञ्च प्रदर्शयति बाह्याभ्यन्तर इत्यादि॥३०

भा० टी०—आत्मा का स्वरूप व्यापक है। अब उस स्वाभाविक व्यापक आत्मा के स्वरूप की अभिव्यक्ति के लिये ध्येय रूप पांच आकाशों का ध्यान करना चाहिये। अतः उनका निरूपण करते हैं। आकाश, पराकाश, महाकाश, तत्त्वाकाश, सूर्याकाश ये पाँच आकाश हैं। शरीर के बाहर और भीतर अत्यन्त निर्मल निराकार आकाश का ध्यान करे। अथवा शरीर के बाहर और भीतर अत्यन्त अन्धकारमय पराकाश का ध्यान करे या बाहर या भीतर तवे के सदृश काले महाकाश का ध्यान करे या बाहर और भीतर निज आत्म तत्त्व स्वरूप तत्त्वाकाश का ध्यान करे अथवा बाहर भीतर करोड़ों सूर्यों के सदृश

सूर्याकाश का ध्यान करे। इस रीति से पांच आकाशों का ध्यान करने वाला अभ्यासी आकाश के सदृश व्यापक होजाता है ॥३०॥

मू०—उक्तं च, नव चक्रं कलाधारं त्रिलक्ष्यं व्योमपञ्चकम्। सम्यगेतन्न जानाति सयोगी नाम धारकः ॥३१॥

सं० टी०—अत्रत्य सकल प्रघट्टकार्थं संक्षिप्यैकेनश्लोकेनानुवदति नव चक्र- मित्यादि। मूलाधारमारभ्य ब्रह्मरन्ध्र पर्यन्तं नव चक्रम् कलापदेन षोडश गृहणम् तेन पादांगुष्ठमारभ्य पूर्वोक्तम् षोडशाधारम् प्रागुक्तं त्रिलक्ष्यमाकाशपञ्चकमेतेषां ज्ञानं परमावश्यकम् योगिना मन्यथा योगि संज्ञैव व्यर्था स्यादित्यनुक्रोशश्चि ॥३१॥

भा० टी०—ब्रह्मचक्र, स्वाधिष्ठान (लिङ्गचक्र) मणिपूर (नाभि चक्र) अनाहत (हृदय) विशुद्ध (कण्ठ) आज्ञा (भ्रू) तालु, निर्वाण, आकाश इन नौ चक्रों को तथा सत्रह कला चन्द्रमा की तेरह कला सूर्य की ग्यारह कला अग्नि की इन इकतालीस कलाओं को एवं पादाङ्गुष्ठ, मूलाधार, गुदाधार, मेढ्र ओड्याण नाभि, हृदय, कण्ठ घण्टिका, तालु, जिह्वा, भ्रूमध्य, नासिका, नासिकामूल, ललाट और ब्रह्मरन्ध्र इन सोलह आधारों को तथा बाहर भीतर और मध्य इन तीन लक्ष्यों को एवं आकाश, पराकाश, महाकाश तत्त्वाकाश, सूर्याकाश इन पाँच आकाशों को जो योगी उपर्युक्त रीति से अच्छी प्रकार नहीं जानता वह केवल नाम मात्र का योगी है ॥३१॥

अथाष्टांग योगःकथ्यते—

मू०—यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि। यमइति उपशमः सर्वेन्द्रियजय आहारनिद्राशीतवातातपजयश्चैवं शनैः शनैः साधयेत ॥३२॥

सं० टी०—अष्टाङ्ग योगस्य प्रथमाङ्गमिन्द्रियाणां स्वविषयेभ्य उपशमः, निवृत्तिः, कर्तव्यः, इति शेषः। तस्य फलमाह सर्वेन्द्रियजय इति ज्ञानेन्द्रियाणि न विषयासंगं विदधति बुभुक्षा पिपासा निद्राशीत वातज बाधा च न भवति। अत्रत्वरा न कार्या ॥३२॥

भा० टी०—अब अष्टाङ्ग योग का वर्णन करते हैं। अङ्गीभूत उस योग के यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा और ध्यान ये आठ अङ्ग हैं। नीचे सब का यथावसर वर्णन करते हैं। **यम**—अपने अपने विषयों से सब इन्द्रियों को हटा कर शान्ति प्राप्त करने को यम कहते हैं ॥३२॥

मू०—नियमइति मनोवृत्तीनांनियमनमि, त्येकान्तवासोनिःसंगतौदासीन्यं यथाप्राप्तिसन्तुष्टि र्वैरस्यं गुरुचरणावरूढत्वमितिनियम लक्षणम् ॥३३॥

सं० टी०—मनो व्यापारस्य निरोध एव नियमो द्वितीयाङ्गस्यैव कः प्रतिकार इति जिज्ञासायामाहैकान्तवास इति अरण्यनग कन्दरादौ वा योगिमण्डले वासो नतु प्राकृतजनेषु केनापि सहसम्बन्धाभिमानोनकर्तव्यस्तेनरागोनभवेत् सत्यपराधे तत्प्रतीकाराय न कश्चित्प्रयत्नोविधेयस्तेनद्वेषोनभवति (वैरस्यम्) स्वादुभक्षणासक्तिः परिहेया ननु नहिकश्चित् क्षणमपिजातु तिष्ठत्यकर्मकृदिति कथंस्थातव्यमिति सन्देहं छिनत्ति गुर्विति श्रीगुरुचरणसेवैवपरमधर्मः, नास्ति तत्त्वं गुरोः परम् जीवनोपायमाह यथाप्राप्तीति नियम लक्षणम् ॥३३॥

भा० टी०—**नियम** मन की समस्त वृत्तियों का नियन्त्रण करना अर्थात् जिन जिन विषयों की ओर मन जाय उन सब विषयों में दोष देखकर मन को रोकना तथा एकान्तवास त्यागी रहना अर्थात् किसी प्रकार के भोग्य विषय में आसक्त न होना, मित्र और शत्रु में भी राग द्वेष न करना तथा शरीर निर्वाह के लिये जैसा भी भोजन वस्त्र मिल जाय उसी में सन्तुष्ट रहना, मधुरादि रसों में प्रेम न करना और निज गुरु के चरणों में दृढ़ भक्ति होना नियम का लक्षण है। विवेक

मार्तण्ड में यद्यपि दश यम और दश नियम कहे हैं, तथापि उनका क्रम से यम और नियम में ही समावेश होजाता है। फर्क केवल इतना ही है कि इस पुस्तक में सूत्र वाक्यों (संक्षेप) से निरूपण किया है और विवेक मार्तण्ड में विस्तार से अलग अलग वर्णन किया है, देखिये—

'अहिंसा सत्यमस्तेय' ब्रह्मचर्यं क्षमा धृतिः।
दयार्जवं मिताहारः शौचं चैव यमा दश॥
तपः सन्तोष आस्तिक्यं दानमीश्वर पूजनम्।
सिद्धान्त वाक्य श्रवणं ह्री मतिश्च जपो हुतम्॥
नियमा दश संप्रोक्ता योग शास्त्र विशारदैः।

हिंसा न करना, सत्य बोलना, चोरी न करना, ब्रह्मचारी रहना, क्षमा, धीरता, दया, सरल स्वभाव, परिमित भोजन, और पवित्रता ये दश यम कहलाते हैं तथा तप, सन्तोष, आस्तिकता, दान, ईश्वर का पूजन, योग सिद्धान्त के बताने वाले वाक्यों का सुनना, जिस काम के करने से लोक में निन्दा हो उस काम से बचना, सत्यासत्य का विचार ॐ आदि मन्त्रो का जप, और हवन, ये दश नियम योग शास्त्र के ज्ञाता मानते हैं ॥३३॥

आसनमिति स्वस्वरूपे समासन्नता स्वस्तिकासनं पद्मासनं सिद्धासन मेतेषां मध्ये यथेष्ट मेकं विधाय सावधानेन स्थातव्यम्, इत्यासन लक्षणम् ॥३४॥

सं० टी०—अथासनं स्व स्वरूपे चिन्मात्रे चेतसः स्थापन मुख्य मिदमेव तदर्थं स्वस्तिकादीनामेकं किमपि स्वसौकर्य्यानुकूलं गुरुतो विज्ञाय कर्तव्यम्। तत्र सावधानतया स्थातव्यमिति स्वलक्ष्यं विहाय नान्यत्र मनो निर्गमनमर्थः। एतेषां लक्षणानि स्वयमेव दर्शितानि सव्य-माकुञ्चितं चरणं दक्षिणो जंघान्तराले दक्षिणं चाकुञ्चितं वामोरु-जंघान्तरे निक्षिपेत्! तत् स्वस्तिकासनम् तदाह ह०यो०

श्लोकः—जानूर्वोरंतरे सम्यक् कृत्वा पादतले उभे।
ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते॥

वामोरू परिदक्षिणञ्च चरणं संस्थाप्य वामं तथा।
दक्षोरूपरिपश्चिमेन विधिना कृत्वा कराभ्यां दृढम् ॥
अंगुष्ठौ हृदये निधाय चिवुकं नासाग्र मालोकये ।
देतद्व्याधिविनाशकारियमिनां पद्मासनं प्रोच्यते ॥
मेढ्रादुपरि विन्यस्य सव्यं गुल्फं तथोपरि।
गुल्फान्तरं च निक्षिप्य सिद्धासनमिदं भवेत् ॥३४॥

भा० टी०—आसन—सदा स्व स्वरूप चेतन मात्र आत्मा में स्थित हो जाने को आसन कहते हैं। इस असली आसन की सिद्धि के लिये ही व्यावहारिक आसनों की भी जरूरत होती है, वे आसन यद्यपि अनन्त हैं, तथापि उनमें स्वस्तिकासन, पद्मासन' सिद्धासन ये तीनों योगसाधन के लिये अत्यन्त उपकारक हैं। इन में से जिसको जो अच्छा लगे उसी का अभ्यास कर सावधानी पूर्वक उसी आसन से बैठे यह आसन का लक्षण है। जिसको और आसनों की जिज्ञासा हो वह "योग सोपान,, नामक पुस्तक में देखले। पाठकों के ज्ञानलिये उपर्युक्त तीनों आसनों के लगाने की विधि लिखी जाती है, नीचे देखें

स्वस्तिकासन—घुटने और जंघाओं के बीच दोनों पैरों के तलुओं को लगाकर सावधानी से बैठना, बस यही स्वस्तिकासन कहा जाता है।

पद्मासन—बाईं जांघ पर दाहिने पैर को अच्छी प्रकार रक्खे फिर इसी तरह दाहिनी जांघ पर बांए पैर को रक्खें, और कमर के पीछे से हाथों को लाकर दाहिने हाथ से दाहिने और बांए हाथ से बांए पैर के अंगूठे को दृढ़ता से पकड़े, और ठोडी को हृदय में लगा कर नाक के अग्रभाग को देखें, यह समस्त रोगों के नाश करने वाला पद्मासन कहलाता है।

सिद्धासन—गुदा और लिङ्ग का मध्यभाग जो योनिस्थान कहलाता है उससे बांए चरण की एडी को मिलाकर दाहिने पैर को दृढ़ता से लिङ्ग इन्द्रिय के ऊपर रक्खे तथा ठोडी को भली प्रकार हृदय में स्थिर कर अचल दृष्टि से भ्रूकुटि के मध्यभाग को देखे यह मोक्ष

कपाट को खोलने वाला सिद्धासन कहा जाता है। उपर्युक्त इन आसनों को गुरु के द्वारा ही सीखे।

मू०--प्राणायाम इति प्राणस्य स्थिरता। रेचक पूरक कुम्भक संघट करणानि चत्वारि प्राणायाम लक्षणानि ॥३५

सं० टी०—प्राणवायोः स्थैर्य्यकरणं प्राणायाम इति कथ्यते। स च चतुर्विधः। रेचकः, कुक्षिस्थवायोर्बहिर्निःसारणम्। पूरकः बाह्य वायोराकृष्य देहाभ्यन्तरे ऽवस्थापनम्। कुम्भक उभयगति निरोधः संघटकरणम् सर्वेषां मेलनम् केवलकुम्भकम्, षोडशाचतुष्षष्टिद्वात्रिंशन्मात्राभिः पूरकादिभवतीतिग्रन्थान्तरं द्रष्टव्यम् ॥३५॥

भा० टी०—प्राणायाम—अब योग के चौथे अङ्ग प्राणायाम का वर्णन करते हैं, प्राणायाम प्राणों की स्थिरता के लिये करना चाहिये। क्योंकि हर समय इडा पिङ्गला नाम की नाडियों में प्राणों की स्थूल गति होती रहती है। किन्तु प्राण की सूक्ष्म अवस्था बनाने तथा सुषुम्णानाड़ी में संचार करने के लिये रेचक, पूरक, कुम्भक और संघट करण अर्थात् वायुओं को योग क्रिया की सहायता से प्राणायाम के द्वारा परस्पर मिलाना ये चार प्राणायाम के प्रकार हैं। पूरक प्राणायाम द्वारा शरीर में भरे हुए प्राणवायु को धीरे २ बाहर निकालने को रेचक और बाहर के वायु से शान्त चित्त होकर मन्द मन्द गति से उदर पूर्ण करने को 'पूरक' तथा उदर में पूरित वायु को कुम्भक (घड़े) की तरह धारण कर निश्चल रखने को 'कुम्भक' प्राणायाम कहते हैं। तथा योग क्रिया के कौशल द्वारा प्राण और अपान वायु को आपस में मिला देने या अकस्मात् प्राणगति का विच्छेद करने को 'संघटकरण' प्राणायाम कहते हैं। यही चार प्रकार के प्राणायाम का लक्षण है।

प्राणायाम की विधि—योगी सब से पहले समतल भूमि में कुशादि आसन बिछाकर ऊपर वस्त्र बिछाए, उस पर बद्ध पद्मासन या सिद्धासन से बैठकर अपने गुरु, शिव तथा योग के आचार्य श्री मत्स्येन्द्रनाथ आदि को प्रणाम कर भ्रूमध्य में दृष्टि लगा प्राणायाम

प्रारम्भ करे। पहले नासिका के दाहिने छिद्र को अङ्गूठे से बन्द कर नाँक के बाँए छिद्र से धीरे धीरे यथा शक्ति वायु कोभीतरभरे, तदनन्तर दूसरे नासिका पुट को भी उसी हाथ की तर्जनी अङ्गुली से बन्द कर यथा शक्ति प्राण को शरीर में धारण करे। पश्चात् अंगूठे को सहज में हटा कर धीरे धीरे वायु को निकाले। इसी प्रकार सूर्य स्वर में वायु को पूर्ण करके युक्ति युक्त और यथा शक्ति धारण कर चन्द्र-स्वर से रेचन करे, अर्थात् निकाले। इसी क्रम से बार बार अभ्यास करे। अर्थात् एक ओंकार के उच्चारण काल को मात्रा कहते हैं। अतः जितनी देर तक बारह ओंकारों का स्वाभाविक उच्चारण हो तब तक पूरक करे, तथा सोलह ओंकारों के उच्चारण काल तक, कुम्भक और दश ओंकारों के उच्चारण तक रेचक होता है। ये तीनों मिल कर साधारण प्राणायाम होता है। यही जब द्विगुण मात्रा में होता है तब मध्यम प्राणायाम कहलाता है। और त्रिगुण होने से उत्तम प्राणायाम कहा जाता है।

कनिष्ट	प्रा०	पू० १२	कु० १६।	रे० १०	॥
मध्यम	प्रा०	पू०। २४	कु० ३२	रे० २०	॥
उत्तम	प्रा०	पू० ३६।	कु० ४८	रे० ३०	॥

प्रथम प्राणायाम से शरीर में पसीना आता है। मध्यम में कम्पन होता है और जब उत्तम प्राणायाम होता है तब उस अभ्यासी का आसन ऊपर ऊठने लगता है और जिस पुरुष के शरीर में कफादि दोषों की अधिकता हो वह पहले नेती धोती आदि षट्कर्म को करे उस के बाद उस को भी सहज में ही प्राणायाम सिद्ध होजाता है इस के उपरान्त केवल कुम्भक का भी अभ्यास करे। प्राणा याम बहुत उत्तम है। इस से मृत्यु को भी जीत सकता है। इसी लिये ब्रह्मादि देवताओं ने भी यथावत इसका सेवन किया है। इस के बराबर न कोई तप न दान न तीर्थ और न यज्ञ है। किन्तु पापरूप इन्धन के लिये तो यह उद्दीप्त अग्निज्वाला के समान है और अनेक काम क्रोध लोभ मोह अहङ्कार आदि दुष्टग्राह से व्याप्त संसार सागर से पार होने के लिये महा सेतु के समान है। ६५।

मू०—प्रत्याहारमिति चैतन्य तुरङ्गाणां प्रत्याहरणं विकारग्रसन उत्पन्नविकारस्यापि निवृत्ति निर्भातीति प्रत्याहार लक्षणम् ॥३६॥

सं० टी०—चैतन्यस्य, आत्मनस्तुरंगा अश्वा इवे न्द्रियाणि वृ० श्रुतावपि युक्तावै हरयो दश वै शतानि। हरिरत्राश्वः, तेनात्म प्रकरण इन्द्रियाणां ग्रहणमिन्द्रियाणि हयानाहुरिति रूप कोपन्यासात् तेषां स्व-स्व विषयेभ्यः प्रत्याहरणं तत्फलम् विकारग्रसने-विषयावलोचनेऽपि विकाराऽप्राप्ति रपिशब्दादुत्पन्नविकारस्यनिवृत्तिश्चेति ॥३६॥

भा० टी० प्रत्याहार—अब योग के प्रत्याहारनामक पञ्चम अङ्ग का निरूपण किया जाता है। देह रूपी रथ, के स्वामी चैतन्य आत्मा की अश्व (घोड़ा) रूप इन्द्रियों की अपने अपने विषयों में प्रवृत्ति स्वभाव से सिद्ध है। उन इन्द्रियों को विषयों से हटा कर आत्मा में लगाना ही प्रत्याहार कहा जाता है। ३६ ॥

मू०—धारणे ति साबाह्याभ्यन्तर एकमेव निजतत्त्व स्वरूपमेवान्तः करणेन साधयेद् यथा यद्यदुत्पद्यते त-त्तन्निराकारे धारयेत् स्वात्मानं निर्वातदीपमिव संधारये दिति धारणालक्षणम् ॥३७॥

सं० टी०—बाह्याभ्यन्तरे सर्वत्रैकमेवात्म तत्त्वं चित्स्वरूपं शुद्धबुद्धमुक्त स्वभावं वर्तत इति मनसा विचिन्तयेद् योगी मनसो व्यापारः समुज्जृम्भते तत्सर्वं निराकारे लीनं कुर्याद् वातरहित दीप निश्चल प्रकाश सम आत्मा चिन्तनीयो वा तत्समंमनःकुर्यात् ॥३७॥

भा० टी० धारणा—अब योगके छटे अङ्ग धारणा को कहते हैं

शरीर से बाहर और भीतर सब जगह एक ही आत्मा व्यापक रूप से विद्यमान है। ऐसी मानसिक भावना करे और जो जैसा जितना भूत भौतिक प्रपञ्च उत्पन्न होता है उस सब को निजआत्म रूप निराकार में ही धारण करे कि यह सब प्रपञ्च समुद्र के तरङ्ग के सदृश ब्रह्म में ही कल्पित है। तथा उस परब्रह्म से अभिन्न आत्मा का वायु रहित दीप के समान निश्चल चित् प्रकाश रूप से ध्यान करे। यह धारणा का लक्षण है।

इस का विशेष प्रकार निम्न लिखि जानना

१—अधिष्ठातृ देवता ब्रह्म और लंबीज से युक्त हरिताल और सुवर्ण जैसा पीत वर्ण कण्ठ में स्थित चतुष्कोणा कार पृथ्वी तत्व विद्यमान है वहा चित्त सहित प्राणों का विलय कर पांच घड़ी पर्यन्त धारणा करे यह पृथ्वी धारणा है। इस धारणा के प्रभाव से पृथ्वि तत्व को स्वाधीन करने से सब वस्तुओं का स्तम्भन करने की सामर्थ्य होती है अर्थात पृथ्वी उस के संकल्पानुसार होती है। और पृथ्वी तत्व से वह नष्ट नहीं हो सकता।

२—अर्ध चन्द्रकार कुन्द पुष्प के सदृश सफेद तथा अमृत रूप व बीज और अधिष्ठातृ विष्णु देवता सहित कण्ठ में जल तत्व विराजमान है। यहां पांच घड़ी तक चित्त सहित प्राण को विलीन कर धारणा (ध्यान) करे यह अति दारुण काल कूट विष को भी जीर्ण करने वाली वारुणी धारणा है। इस के तत्तत् अभ्यास से जल तत्व बश वर्ती हो संकल्पानुकूल कार्य करता है।

३—प्रवाल (मूंगा) जैसा चमकीला रक्त वर्ण तेजो रूप रं बीज और रुद्र के सहित इन्द्र गोप (तीज) समान तालु में स्थित त्रिकोणा कार अग्नि तत्व है। वहां चित्त सहित प्राण को विलीन करता हुआ तन्मय हो धारणा करे। यह वैश्वानरी (अग्नि) धारणा है। यह अग्नि तत्व का जय करती है। इस के अभ्यास से योगी अग्नि तत्व को वश में करलेता है। अग्नि से उसका दाह नहीं होता

और अग्नि उस के संकल्पानुसार होता है।

४ सूक्ष्म कज्जल पुञ्ज के समान गोल यं वायु बीज और अधिष्ठातृ ईश्वर देवता सहित भ्रू के मध्य में वायु तत्त्व है। उस वायु तत्त्व में चित्त सहित प्राण को विलय कर पाँच घड़ी पर्यन्त तन्मय हो ध्यान करे। यह वायवी (वायुकी) धारणा योगी को आकाश में गमन कराती है।

५ ब्रह्मरन्ध्र में ओम् रूपीनाद तथा अधिष्ठातृ सदा शिव और हँ बीज के सहित अत्यन्त निर्मल नील वर्ण जल के समान वर्त्तुलाकार आकाश तत्त्व है। वहां उस तत्त्व में चित सहित प्राणों को विलीन कर स्वयं भी तन्मय हो पाँच घड़ी पर्यन्त धारणा करे। यह मोक्ष कपाट (द्वार) के खोलने में प्रवीण आकाश धारणा कहलाती है। अर्थात् आकश तत्त्व साधक के स्वाधीन होता है और साधक आकाशवत् पूर्ण व्यापक होजाता है। पूर्वोक्त पाँच धारणाओं के साधन से स्तम्भन द्रावण दाह घुमाना और शोषण करने की अद्भुत सामर्थ्य उत्पन्न होती है अर्थात् पृथ्वी की धारणा से सकल चराचर वस्तुओं को स्तम्भन जल धारणा से सब वस्तुओं को द्रवण (पिघलाना), अग्नि धारणा से दाह, वायु धारणा से घुमाने और आकाश धारणा से शोषण करने की सामर्थ्य होती है। जैसे—

स्तम्भनी द्राविणी चैव दाहिनी भ्रामिणी तथा।
शोषणी च भवत्येषा भूतानां पञ्च धारणा त्रि०मा० ॥३७ गो०प०

मू०—अथ ध्यानमिति कश्चन परमाद्वैतस्य भावःसएवात्मेति यथा यद्यत्स्फुरति तत्तत्त्व रूपमेवेति भावयेत् सर्व भूतेषु समदृष्टिश्च इति ध्यान लक्षणम् ॥३८॥

सं० टी०—अखण्ड सच्चिदानन्दो द्वैत रहितः परमात्मा ऽस्ति स एवा स्माक मात्मा किंच यथा येन प्रकारेण घटत्वादि रूपेण यद्यद् घटादयो भासन्ते तत् सर्वं स्वरूपमेवात्मैव केनाऽपि सह भेदो नास्ति

तमि त्थं भावयेद् भावनां कुर्यात् श्रुतिरप्याह नेह नानास्ति किञ्चन आत्मैवेदं सर्वम्, तत्सत्यं स आत्मा तत्त्वमसि । इदं सर्वं यदयमात्मा योहि अन्यां देवता मुपास्ते अन्योसावन्योहमस्मीति न स वेद पशुरेव स देवानामित्यादि भेद निन्दा पूर्वकाभेदभावनाया वरीयस्त्वम्, तेन वास्तविकोऽभेदः प्रतिपाद्यते । ननु कल्पितो ऽन्यथा कल्पित बोधकतया वेदस्या प्रामाण्यं प्रसज्ज्येत किञ्च कल्पित विषय ज्ञानस्यायथार्थतया तेन तत्त्व ज्ञानलभ्य मोक्ष प्राप्त्याशैव दुर्लभा स्यात । अतः सिद्ध मद्वैत मेवतत्त्वं सर्व भूतेषु समदृष्टिः, एकैवात्मा सर्वभूतेषु श्रुतिरपि सर्व भूतेषु चात्मनं सर्व भूतानि चात्मनि । इति ध्यानम् ॥३८॥

भा० टी० **ध्यान**—अब ध्यान को वताते है । जिस का नाम रूप से निर्देश न किया जाय ऐसा जो सर्वान्तर्यामी व्यापक अद्वैत ब्रह्म है । उसी की जो सब जगह व्यापक चिद्र रूप सत्ता है वस यही सब का व्यापकरूप आत्मा है । मुझ तथा उस व्यापक आत्मा में औपाधिक सम्वन्ध को छोड़ कर कुछ भी भेद नहीं है । अतः जो जो वस्तु जैसे प्रतीत हो उस को सब जगह आत्मा रूप जानकर यह भावना करे कि यह भी मेरा ही आत्मा है और ब्रह्मा से लेकर चींटी पर्यन्त सब प्राणियों में समदर्शी हो यह ध्यान का लक्षण है । ३८ ॥

मू०—अथ समाधि लक्षणं सर्वतत्त्वानांसमावस्था निरूद्यमत्वमनयासस्थितिमत्त्वमिति समाधि लक्षणम् । इत्यष्टाङ्ग योगलक्षणम् ॥३६॥

इति श्री शिवावतार योगाचार्य्य श्रीगोरक्षनाथ कृतौ सिद्धसिद्धान्त पद्धतौ पिण्ड विचारोनाम द्वितीयोपदेशः ।

सं० टी०—सर्वतत्त्वानां समावस्था नास्ति तत्वभेदस्थितिर्यस्यामवस्थायाम् किंचिदपि व्यापारोनास्तीति

निरुद्यमपदेन ध्वन्यते । अविद्यात्मकतमो नास्तीति स्वाभाविका यस्या ऽनायास स्थितिपदेन ध्वन्यते । अयमेव राजयोगः। अतएवास्याष्टाङ्गान्यपि तदनुकूलानि पूर्वमुक्तानि। अयमाशयो योगानां राजा राजयोगो राजत्वञ्चाङ्गित्वेनान्येसर्वे गुरुचरणसेवादि कर्मयोग प्राणायामादिहठयोग ध्यानाद्युपासनायोगा अङ्गानीति सुष्ठु सर्वम्मवम् विधाय करणां प्राणिनामुपर्या चार्यचरणैः ॥३६॥

इति श्री गोरक्षनाथ कृतायां सिद्धसिद्धान्तप-द्धतौ सर्वतन्त्र स्वतंत्र पं० श्री द्रव्येश झा निर्मितायां गूढार्थ दीपिकायां पिण्डविचारो नाम द्वितीयोपदेशः ।

भा० टी० समाधि—अब योग के समाधिरूप अन्तिम अङ्ग का निरूपण करते हैं। सब पदार्थों में समान अवस्था अर्थात् सबको आत्मरूप से देखने तथा समाधि समय में अन्य व्यापार आदि के अभाव और जिस अवस्था में अनायास ही अखण्ड आत्म स्वरूप में स्थित हो उसी का नाम उन्मनी अवस्था और सहजावस्था है। यही सामान्य समाधि का लक्षण है। भाव यह है कि संप्रज्ञात और असंप्रज्ञात रूप से समाधि दो प्रकार की होती है। उसीको सविकल्प एवं निर्विकल्प सबीज और निर्बीज समाधि भी कहते हैं। जब तक उस समाधि में ध्याता ध्यान और ध्येयरूप त्रिकुटी का प्रतिभास हो तब तक उसको सम्प्रज्ञात सविकल्प या सबीज समाधि कहते हैं। यह भी धारणा ध्यान की परिपक्व अवस्था होने से सिद्ध होती है तथा जब ध्याता और ध्यान क्रिया का पृथग्भाव न होकर केवल ध्येयाकार वृत्ति हो तब यह निर्विकल्प समाधि होती है। इसी को असम्प्रज्ञात या निर्बीज समाधि भी कहते हैं इसी की परिपक्व अवस्था को शून्य समाधि या जड़ समाधि भी कहते हैं। यह हठयोग की किया और दश मुद्राओं के साधन द्वारा निरन्तर अभ्यास से सिद्ध होती है यह समाधि जब सिद्ध होजाती है तब जाग्रत अवस्था में भी उस योगी की विना

परिश्रम समाधि सी ही लगी रहती है और शरीर में वंशी वीणा आ-दि के अलौकिक शब्दों को सुनने से प्राण और मन भी नाद में विलीन सा ही रहता है और वह समाधि भी नाद के आश्रित होकर रहती है उस समय अनायास समाधि लग जाती है ॥३९॥

इति श्री गोरक्षनाथ कृतौ सिद्धसिद्धान्तपद्धतौ श्री १०८ पूज्यपाद योगीन्द्र श्री पूर्णनाथ शिष्येण वेदान्ता चार्य्येण योगि श्री भीष्मनाथेन कृतायां सार-दीपिकायां हिन्दी टीकायां पिण्ड विचारो नाम द्वितीयो पदेशः समाप्ति मफाणीत् ।

अथ पिण्ड संवित्तिः कथ्यते ।

मू०-पिण्ड मध्ये चराचरं यो जानाति स योगी पिण्ड संवित्तिर्भवति ॥१॥

सं० टी०-विचारस्य फलम् (कार्यम्) ज्ञानम्, अथ पिण्ड विचारानन्तरं तत्फलभूत पिण्डज्ञानोपदेशस्यावसर प्राप्ततया तदुपदिश्यते।

ननु पिण्ड ज्ञानं प्रत्यक्षत एव सिद्धम्, तदुपदेशो व्यर्थ इति चेन्न. सर्वेषां चर्म चक्षुर्भि मांसादि समुदायतया प्रत्यक्षत्वेऽपिदेहेनिखिल ब्रह्माण्डस्थ पदार्थ मात्र सद्भाव इत्यस्याज्ञातत्वेन तदर्थं तदुपदेशस्य परमावश्यकत्वात् तत्फलं निखिल ब्रह्माण्ड परिचयः। ततश्च दीर्घकालनैरन्तर्य्य सत्कारासेवित भावनया पिण्डाण्डयोः समरसं कृत्वाऽजरामरत्व प्राप्तिरित्यनुपदं वक्ष्यते। अतः प्रसिद्ध फल निरूपणेन प्ररोचयति पिण्डेत्यादि अस्मिन्निति शेषः (पिण्डमध्ये) स्व शरीरे यो योगी (चराचरम्) चराश्च, अचराश्च तेषां समाहारं जानाति स एव (पिण्ड संवित्तिः) पिण्डज्ञानी भवति नान्यः, पिण्डस्य संवित्तिर्यस्येति व्यधि करण बहुव्रीहिः ॥१

भा० टी०- अब शरीर रूप पिण्ड के ज्ञान का निरूपण किया जाता है। इस शरीर पिण्ड में ही जो योगी भूत भौतिक जड चेतन सकल चराचर जगत् को जानता है उस का नाम पिण्ड संवित्ति होता है। अर्थात वह योगी व्यष्टि समष्टि रूप दोनों प्रकार के शरीर पिण्डों का तत्ववेत्ता होता है। सारांश यह है कि सृष्टि दो प्रकार की होती है एक व्यष्टि रूप और दूसरी समष्टि रूप। व्यष्टि में अन्तःकरणाभिमानी अस्मदादि जीव है और समष्टि में बिराट हिरण्यगर्भादि हैं। तथा शरीर रूप पिण्डों का भी दोनों सृष्टिओं में प्रादुर्भाव होता है। फर्क केवल इतना है कि समष्टि शरीर व्यापक अधिक शक्तिशाली तथा चिरस्थायी हैं। और वह शरीराभिमानी सर्वेश्वर सत्यसंकल्प होने से अस्मदादि शरीरों का कारण और नियन्ता है। और व्यष्टि पिण्ड क्षणभंगुर तथा विनश्वर है उस का अभिमानी

जीव भी कर्मपाश में बंधा हुआ बार बार पहले शरीर को छोड़ता हुआ दूसरे शरीर को धारण करता है। अतः दुःख बन्धन से जीवों का उद्धार करने की इच्छा से श्री योगाचार्य व्यष्टि समष्टि रूप पिण्ड के अभेद अभिप्राय से समष्टि पिण्ड गत कार्य को भी व्यष्टि शरीर में ही समझाते हैं। जिस से की उक्तपिण्ड के यथार्थ ज्ञान पूर्वक योग ध्यान द्वारा सार्वभौम ऐश्वर्य को प्राप्त करता हुवा यह जीव परम शान्त और अखण्डानन्द श्री आदि नाथ स्वरूप मोक्षधाम को प्राप्त हो।

मू०—कूर्मः पादतले वसति पातालं पादांगुष्ठे तला-तलमंगुष्ठाग्रे महातलं पादपृष्ठे रसातलं गुल्फे सुतलं जंघायां वितलं जान्वो रतल मूर्वोरेवं सप्तपातालं रुद्र-देवाधिपत्ये तिष्ठति पिण्डमध्ये क्रोधरूपोभावः स एव कालाग्निरुद्रः ॥२॥

सं० टी०—भुवनाधारः कूर्मावतार इति प्रसिद्धम् पुराणेषु। अस्या यं गूढाभि सन्धिः ॥ शक्ति सहितस्य शिवस्यैव सृष्ट्यादा ववस्था वि-शेषः कूर्मइवेति, सादृश्यं चात्रयथा कूर्मादंगानि निःसरन्ति तत्रैव च संकुचन्ति तथा तत एव च सर्वे प्राणिनः नि सरन्ति तत्रैव काले संकुचन्ति च सर्वेषामाधारः। वेदोप्याह (सदाधार पृथिव्यां, द्यामुतेमाम् गीतायां गामा विश्य च भूतानि धारयाम्य हमोजसा अतः सुष्ठूक्तम् कूर्मःपाद तले वसति। ननुपादाधारस्तु पृथिवी दृश्यते कथमाह कूर्म इति चेत् शृणु रहस्यम् यदा ब्रह्माण्ड पिण्डयोरभेदो ज्ञायते य एव ब्रह्माण्डः स एव पिण्ड इति तदा कथं ब्रह्माण्डाधारः कूर्मो मदीय पिण्डाधारो नेति निषेद्धुं शक्यम्, इति हृदय संकोचं विहायोदारचेतसा विवेक्तव्यम् तत्रांगुष्ठान्त्य देशमारभ्योरूपर्यन्तं पातालादि सप्तलोक भावना विधेयेति निष्कर्षः। मूलेयत्र यस्य स्थितिः प्रतिपादिता तत्रैवैव ज्ञेया नतु व्युत् क्रमेणान्यत् स्पष्टम्। अस्य सप्तपातालस्याधिपति देवो रुद्रः स एव पिण्डे क्रोध रूपः समष्टौ कालाग्नि रुद्रः प्रलय कारकः॥२॥

भा० टी०—समस्त पृथ्वी का धारण करने वाला कूर्म निज चरण तल में पाताल पैर में तलातल अङ्गुष्ठ के अग्र भाग में महातलपैर के ऊपर पृष्ट भाग में रसातल गट्टों में सुतल पिण्डलियों में वितल घुटनों में अतल जङ्घाओंमें बसता है। अर्थात्समष्टिका व्यष्टि में अभेद्जानकर ध्यान करे इस प्रकार सात पातालों का अधिपति भगवान रुद्रदेव है और इस देह में जो क्रोध रूपी भाव है वही कालाग्नि रुद्र है। १॥

मू०=भूर्लोकं गुह्य स्थाने भुवर्लोकं लिंग स्थाने स्व र्लोकं नाभि स्थाने। एवं लोक त्रय इन्द्रो देवता पिण्ड मध्ये सर्वेन्द्रिय नियामकः स एवेन्द्रः ॥३॥

सं० टी०—लोक त्रयदृष्टिर्गुह्यलिंगनाभिषु। गुह्य लिङ्गादधो गुदा दुर्द्धवमध्ये समष्टि सृष्टौ लोकत्रयस्याधिपति र्य इन्द्रदेवः स एव शरीरे सकलेन्द्रिय वर्गस्य नियामको ध्येयः। अतएवेन्द्रस्येदमिन्द्रियमित्यन्वर्थ संज्ञा प्रसिद्धा लोके शास्त्रे च ॥३॥

भा० टी०—मूलाधार में पृथ्वी लोक लिङ्गमूल में अंतरिक्ष और नाभि स्थान में स्वर्गलोक है इन तीनों लोकों का इन्द्र देवता है और शरीर में जो सब इन्द्रियों का नियंत्रण करता है वही प्रकाशमान इन्द्र देव है ऐसा ध्यान करे।

मू०—दण्डांकुरे महर्लोको दण्ड कुहरे जनोलोको दण्डनाले तपो लोको मूल कमले सत्यलोक एवं लोक चतुष्टये ब्रह्मादि देवता पिण्ड मध्येऽनेक माना भिमान स्वरूपी तिष्ठति ॥४॥

सं० टीका—दण्डाकुरइति मेरुदण्डस्योत्पत्तिस्थानं दण्डांकुरः, ततः ऊर्ध्वं कुहरो मध्यभागो नालः, तेषु यथाक्रमं महर्जन तपोलोका वसन्ति। (मूल कमले) मूलाधारस्थ कमले सत्य लोकः। एवं चतुष्

लोकेषु ब्रह्मादि देवा अनेके नानाभिमान शालिन स्तिष्ठन्ति समष्टि सृष्टौ व्यष्टि सृष्टौ च मेरुदण्डे तेषामाधिपत्यमिति विवेकः सर्वत्र ॥४॥

भा० टी०—मेरु दण्ड के मूल में प्रजापति दक्ष का महर्लोक मेरु दण्ड के छिद्र में जन लोक तथा सुमेरुदण्ड के सूक्ष्म छिद्र के चारों ओर तप लोक और मूलकमल में सत्य लोक है इन चारों लोकों में ब्रह्मादि अधिपति है और वह ब्रह्म इस देह पिण्ड में अनेक मानाभिमान स्वरूप होकर रहता है। ४ ॥

मू०—विष्णु लोकः कुक्षौ तिष्ठति तत्र विष्णुर्देवता पिण्ड मध्येऽनेक व्यापारको भवति। हृदये रुद्र लोक स्तत्र रुद्रोदेवता पिण्ड मध्य उग्र स्वरूपी तिष्ठति। वक्षस्थल ईश्वर लोक स्तत्रेश्वरो देवता पिण्डमध्ये तृप्ति स्वरूपी तिष्ठति। कण्ठ मध्ये नीलकण्ठ लोकस्तत्र नील कण्ठो देवता पिण्डमध्ये नित्यं तिष्ठति। तालुद्वारे शिवलोक स्तत्र शिवोदेवता पिण्ड मध्येऽनुपम स्वरूपी तिष्ठति। लम्बिका मूले भैरवलोकस्तत्र भैरवोदेवता पिण्डमध्ये सर्वोत्तम स्वरूपी तिष्ठति। ललाट मध्येऽनादि लोक स्तत्रानादि देवता पिण्ड मध्य आनन्द पराहंता स्वरूपो तिष्ठति। शृंगाटे कुल लोक स्तत्र कुलेश्वरो देवता पिण्ड मध्य आनन्द स्वरूपी तिष्ठति शंख मध्ये नलिनी स्थाने ऽकुलेश्वरो देवता पिण्ड मध्ये निरभिमानावस्था तिष्ठति। ब्रह्मरन्ध्रे पर ब्रह्मलोक स्तत्र परब्रह्म देवता पिण्ड मध्ये परिपूर्ण दशा तिष्ठति। उर्ध्वकमले परापर लोक स्त त्रपरमेश्वरो देवता पिण्ड मध्ये परापरभावस्तिष्ठति त्रिकूट स्थाने शक्ति लोक स्तत्र

पराशक्ति देवता पिण्ड मध्येऽस्तित्त्वावस्था सर्वासां सर्व कर्त्तृत्वावस्था तिष्ठति। एवं पिण्ड मध्ये सप्त पाताल सहितैक विंशति ब्रह्माण्ड स्थान विचारः ॥५॥

सं० टी०—ब्रह्माण्डे ये विष्णु लोकादयः सन्ति तेषामस्मिन् पिण्डे क्व क्व निवासं मत्वा चिन्तनीयमिति जिज्ञासायां तत्तल्लोक स्थानान्युपदिश्यते तत्र स्थानं देवता तत्कार्यविशेषश्चेति वस्तु त्रयं सर्वत्र प्रदर्शितं यथा विष्णुलोकस्य कुक्षिः (नाभि प्रदेशः) स्थानम् देवता विष्णुः, नाना विध व्यापारः कार्यम्। एवं सर्वत्र ज्ञेयम्। यद्देव लोकस्य यत स्थानम् सैव तस्य देवता तस्य स्वरूपमेव च कार्यमिति शैलीं नीत्वा ग्रन्थः संलापनीयः। हृद्देशो रुद्र लोकस्य स्थानम् उग्रता (अहङ्कारता) कार्यम्। हृदयादुर्द्ध्वं कण्ठादधो वक्षस्थलेन ग्राह्यम् तच्चे शानलोकस्य स्थानं देव ईश्वरः (ईशानः) अयंरुद्राद्भिन्नः, अतः कार्य्यं विशेषमाह तृप्तिः। शृंगाटोनाम चतुष्पथः कण्ठ देशः, शृंगाटकं भवेद्द्वारि कण्टके च चतुष्पथ इति कोशात्। तत् कुल देवतायाःस्थानम् आनन्द दानमेव कार्य्यम्, शंखनाड़ी भ्रुवोरन्तरे तत्रैवनलिनीदलं तत् कुलदेवस्य स्थानम् तस्य निराभिमानतैव कार्य्यम् ब्रह्मरन्ध्रं सहस्रार मध्ये तत् परब्रह्मणः स्थानम् परिपूर्णता कार्यम्। उर्ध्वं कमलं सहस्रारस्यो र्ध्वं दलम् । तत् परापरदेवताया स्थानम् । परापर प्रकाशनं कार्यम् त्रिकूटं सहस्रारोपरित्रिंशिखात्मकत्रिकोणं तत् परशक्तेः स्थानम्। तस्याः कार्यं शरीरादीनां सत्ता कर्तृत्वादि सम्पादनम्। इत्थं सप्त पातालाः, भूरादि सप्तलोकाः, विष्णवादि सप्तदेवाः, तत्समूहो ब्रह्माण्डस्तस्याध्यात्मम् विकल्पने सत्येकविंशति ब्रह्माण्डस्थानानि तेषां 'विचारः' चिन्तन प्रकारः प्रदर्शित इति शेषः। देवगणे पराशक्तेः परि गणने संख्याधिक्येऽपि तस्या विश्व जननीत्वेन ब्रह्माण्डेऽनन्त भाव्यैक विंशति ब्रह्माण्ड स्थान कथनं सम्यक्तरमिति नीलकण्ठादीनां पाठःक्वचिदधिकोत्र ॥५॥

भा० टी०— पेट में विष्णु लोक है वहां इस देह पिण्ड में रक्षण आदि अनेक व्यापारों में तत्पर भगवान् विष्णु देव विराजमान है। हृदय में रुद्र लोक है वहां महा तेजस्वी उग्रस्वरूप भगवान् श्रीरुद्र

देव विराजमान है। वक्षः स्थल (छाती) में ईश्वर लोक है वहां तृप्ति स्वरूप ईश्वर देव विराजमान है। कण्ठ के बीच में नीलकण्ठ लोक है वहां नित्य ही नीलकण्ठ देव रहता है तालु द्वार में शिव लोक है वहां सर्वेष्ट मङ्गल रूप श्री शिव देव विराज मान है। जिह्वा के मूल में भैरव लोक है वहां सर्वोत्तम भैरव देव विराजमान है। ललाट (मस्तक) के बीच अनादि लोक है वहां उत्कृष्ट आनन्द में ही अपने स्वरूप का अभिमान करने वाला अनादि देव विराज मान है इस देह पिण्ड में भ्रुकुटि से कुछ ऊपर मस्तक में कुल लोक है वहां आनन्द स्वरूप कुलेश्वर देव विराजमान है। शंख नाडी के उपर मध्य नलिनी स्थान में अकुलेश लोक है वहां अभिमान अवस्था से रहित अकुलेश्वर नाम का देव विराज मान है। ब्रह्मरन्ध्र में परब्रह्म लोक है वहां परिपूर्ण अवस्था से युक्त पर ब्रह्मदेवता विराजमान है। सहस्र दल युक्त ऊर्ध्वकमल में परापर लोक है वहां सर्वत्र समरूप से व्यापक सदा प्रकाश मान परमेश्वर देव विराजमान है। सहस्र दल के ऊपर त्रिकूट स्थान में शक्ति लोक है वहां शकल ब्रह्माण्डोंकी सूक्ष्म कर्तृत्व अवस्था वाली और निजा अवस्था के सहित पराशक्ति देवता है। इस शरीर में जहां जिस देवता का स्थान निर्दिष्ट है। उस स्थान का वही देवता स्वामी है वहीं पर उस स्थान और गुण विशिष्ट देव का ध्यान करने से उस देव जैसी सामर्थ्य और उन उन लोकों के साक्षात्कार की शक्ति उत्पन्न होती है। अतः योगाभ्यासी अपने देह में ही पूर्वोक्त विधि से उपर्युक्त देव के साक्षात्कार की योग्यता सम्पादनार्थ ध्यान करे। इस उपरोक्त रीति से इस देह पिण्ड में ही सात पातालों के सहित इक्कीस ब्रह्माण्डों का विचार समाप्त किया। ५ ॥

मू०—सदाचार तत्त्वे ब्राह्मणास्तिष्ठन्ति शौर्ये क्षत्रिया व्यवसाये वैश्याः सेवाभावे शूद्राश्चतुष्षष्ठि कलास्वपि चतुष्षष्ठि वर्णाः ॥६॥

सं० टी०—वर्णाश्रमधर्मानुष्ठानेन विशुद्धसत्वाः संसारानित्यत्वं मर्यालोच्य ततो विरक्ता योग एव परमपुरुषार्थसाधन मिति श्रुति

स्मृति गुरुभ्यः श्रुत्वातच्छ्रद्दधाना स्तदनुकूल युक्त्या चतुर्व्यवस्थाप्य योगम-नुष्ठाय सिद्धा मुक्ताश्च भवन्ति नतु वर्णाश्रम धर्मरहिताः पापाचारपरा योगे तत्साधन मार्गे वा श्रद्दधते प्रत्युत तं द्विषन्ति, अतो वर्णाश्रम धर्मा अवश्यमेवानुष्ठेया इत्युपदिश्यते (सदाचार इत्यादि) तत्रेत्थं व्यवस्था संजाते स्वात्मबोधेतु सर्वेषांवर्णानामाश्रमिणां च ध्रुवोमोक्ष इत्यत्र नास्ति कस्य चिद्वैमत्यम् किन्तु विविदिषूणां कथमारुरुक्षेयमिति सन्दिह्य मार्गद्वय मितिनिश्चितम् । तथाहि येतुपूर्वजन्मार्जित पुण्य पुञ्जवशाज्जन्मत एव विरक्ता योग मार्गेच श्रद्दधाना योगसाधनाभ्यासच् चिकीर्षन्ति ते बाल्यादेव गृहान्निर्गत्य योगिकुले ससाध्य साधनं तत्वं विदित्वा मुक्ताभवन्ति येतु न जन्मतो विरक्ताः श्रद्धालवश्च तैरीश्वरानियोगधिया वर्णाश्रमविहितकर्माण्यनुष्ठेयानि तत्रापि योगाअनुष्ठेयाः सति वैराग्ये विहाय कर्माणि योग एव केवल आश्रयणीय इति क्रामकगतिः । तदाह श्रुतिः यदहरेव विरजेत् तदहरेव प्रव्रजेत्, कुर्वन्नेवेह कर्माणीतिच । किन्तु येऽविरक्ताः श्रद्धारहिता वर्णाश्रमधर्ममपि नानुतिष्ठन्ति तेषामधःपाताभ्यागति रिति सिद्धपादैरुपदिश्यते (ब्राह्मणाः) ब्राह्मणजातयः (सदाचार तत्वे) श्रुति स्मृति विहित स्वाश्रमोचित कर्मानुष्ठान पूर्वक योग मार्गे तिष्टन्ति सारिथदित्स्तेषां श्रेयस्करीति ध्वनिः । एवं (क्षत्रियाणाम्) शौर्ये (वैश्यानाम) वाणिज्ये (शूद्राणाम्) सेवा कर्मणि सनातन शास्त्रानुसारेण स्वे स्वे कर्माणि स्थातव्यमिति निष्कर्षः स्व स्व जात्यनुसारकर्म कौशल झटिति भवति तत्र तस्यातिसत्वेति प्रायेणोपलभ्यते सर्वेषाम् । अन्या अपि चतुष्षष्टि जातयश्चतुष्षष्टि कलासु वर्तन्ते । अतः सांसारिक मर्यादा नोच्छिद्यतेत्यानुषङ्गिकोपदेशः ॥६॥

भा० टी०—सदाचार में ब्राह्मण युद्धादि शौर्य में क्षत्रिय वाणिज्यादि व्यवसाय में वैश्य और सेवादि भाव में शूद्र हैं तथा चौंसठ कलाओं में चौंसठ वर्ण तत्पर रहते हैं । अर्थात् गीत वाद्य आदि चौंसठ प्रकार की कलाओं को जानने वाले पुरुष ही चौंसठ प्रकार के वर्णों में गिने जाते हैं । ६ ॥

मूल—अथ सप्त समुद्राः सप्त द्वीपाश्चकथ्यन्ते । मज्जायां जम्बूद्वीपोऽस्थिषु शाक द्वीपः शिरासु सूक्ष्म

द्वीपस्त्वक्षु क्रौंचद्वीपो रोमसु गोमय द्वीपो नखेषु श्वेत द्वीपो मांसे प्लक्षद्वीप एवं सप्त द्वीपा: ॥७॥

भा० टी०—अत्र सर्वत्र दृष्टिः कर्तव्या इत्यर्थोज्ञेयः। यथा बृहदारण्ये प्रारम्भे ऽश्वशरीरे प्रजापति दृष्टिः कर्त्तव्यतया विहिता। तत्रा श्वस्य प्रत्येक मङ्गेषु प्रजापतेः प्रत्येकाङ्गस्य दृष्टि विहिता तेन प्रजापत्युपासना सम्पद्यते तत्फलं प्रजापतिपदप्राप्तिः प्रतिपादिता। एतादृशो पासनानुपदमुपनिषत्सु प्रदर्शितेति विदन्ति वेदान्तिनः। तथैवात्रापि स्वपिण्डस्य प्रत्येक मंगे ब्रह्माण्डस्थ प्रत्येकाङ्ग दृष्टिः कर्त्तव्या। तेन ब्रह्माण्ड पिण्डयोः समरसभावः, अनन्तर मद्वितीय ब्रह्मणा सह समरस भावः तत्फल मजरामरभावो मोक्ष इति विशेषः। अत्र सूक्ष्म द्वीपः कचित् कुश द्वीप संज्ञा, अत्र गोमय नामान्यत्र गोमेधनाम, अत्र श्वेत द्वीपकुत्रचित शाल्मल द्वीप संज्ञा। प्लक्ष द्वीपस्यैव क्वचित् पुष्कर द्वीप इति ॥७॥

भा॰टी॰—अब समष्टि ब्रह्माण्ड में स्थित सात समुद्र और सात द्वीपों का इस व्यष्टि देह में ही वर्णन करते हैं। मज्जा में जम्बूद्वीप, हड्डियों में शाक द्वीप प्रवाहिका नाड़ियों में सूक्ष्म द्वीप त्वचा में क्रौञ्चद्वीप रोमों में गोमय द्वीप नखों में श्वेत द्वीप और मांस में प्लक्ष (पुष्कर) द्वीप है इस प्रकार इस शरीर में सात द्वीपों को जान कर ध्यान करने से इन के साक्षात्कार का सामर्थ्य और इन में स्वच्छन्द गति होती है। ७ ॥

मू॰ मूत्रे क्षारसमुद्रो लालायां क्षीर समुद्रः कफे दधि समुद्रो मेदसि घृत समुद्रो वसायां मधुसमुद्रो रक्त इक्षु समुद्रः शुक्रेऽमृत समुद्र एवं सप्त समुद्राः ॥८॥

सं॰ टी॰-तत्तत्समुद्रदृष्टयोमूत्रादिषु, अत्र मधु समुद्रोऽन्यत्र सुरा समुद्रः प्रतिपादितोऽत्रचामृत समुद्रोऽन्यग्रन्थे स्वादूदक शब्देन न तावता भेदो ज्ञेयः। शब्दभेदेऽप्यर्थैक्यात्। क्षीरवज्जलानि यस्मिन् स क्षीर समुद्रः। तथैव सर्वत्र सादृश्यंज्ञेयमतुत्रैव ॥८॥

भा० टी०-मूत्र में क्षार (खारा) समुद्र लार में क्षीर समुद्र कफ में दधि समुद्र मज्जा में घृत समुद्र चर्बी में मधु समुद्र रक्त में इक्षु समुद्र और शुक्र (वीर्य) में अमृत का समुद्र है। इस रीति से शरीर में सात समुद्रों का वर्णन हुआ। इन का यथोक्तविधि द्वारा ध्यान करने से इन के साक्षात्कार की सामर्थ्य होती है। ८॥

मू०-नव खण्डा नव द्वारेषु वसन्ति। भारतखण्डः कर्पर खण्डः काश्मीर खण्डः श्री खण्ड शंख खण्ड एकपादखण्डो गान्धारखण्डः कैवर्तक खण्डो महामेरु खण्ड एवं नव खण्डाः ॥९॥

सं० टी०-अत्रायं विवेको यावन्तः पदार्था ब्रह्माण्डे वर्तन्ते तावन्त एवास्मिन् पिण्डेऽपि। इयानेव विशेषो यत् पिण्डेऽल्पमात्रा विश्वस्मिन् पूर्णमात्रा। तत्रास्ति कश्चन प्रकारः येन शरीरमिदं विश्वरूपं परिणम्येतेति जिज्ञासवे विश्वोपासनामाह नव खण्डेत्यारभ्य तृतीयो पदेशावधि। उपासकैरेवं चिन्तनीयं यद् विश्वरूपोऽहम् तत्सपरयर्थं स्वाङ्गान्यालम्बनीकृत्य प्रत्येकं मूलोक्तरीत्या वैश्ववस्तुदृष्टिर्विधेया। यथा गुह्य लिङ्ग मुख नासिकाद्वय कर्णद्वय नेत्र द्वयेषु नव द्वारेषु नव खण्डाः सन्ति ते क इति जिज्ञासोपशमनाय नामानि निर्दिश्यन्ते भारतखण्डेत्यादि ॥९॥

भा०टी०-शरीर के नवों द्वारों में नौ खण्ड रहते हैं। उन्हीं का नाम और स्थान निर्देश पूर्वक वर्णन करते हैं। मूलद्वार में भारत खण्ड, उपस्थ (लिङ्गछिद्र) में काश्मीर खण्ड मुख में कर्पर खण्ड श्री खण्ड और शङ्ख खण्ड क्रम से नासिका के दक्षिण खण्ड व वाम खण्ड में एक पादखण्ड (जिसमें १ पाद के आदमी हों) और गान्धार खण्ड क्रमशः वाम और दक्षिण नेत्रों में कैवर्त खण्ड और महा मेरुखण्ड क्रम से वाम और दक्षिण कर्ण छिद्रों में इस प्रकार नौ खण्ड इस शरीर में बसते हैं। ९॥

मू०-मेरु पर्वतो मेरु दण्डे तिष्ठति कैलासो ब्रह्म

कपाटे वसति हिमालयः पृष्ठे मलयो वामकंधरे मन्दरो दक्षिणकंधरे विन्ध्याद्रि दक्षिण कर्णे मैनाको वाम कर्णे श्री पर्वतो ललाट एवमष्ट कुल पर्वता अन्य उपपर्वताः सर्वाङ्गुलिषु वसन्ति ॥१०॥

सं॰ टी॰—एवं मूलोक्त कुलपर्वत दृष्टयो मेरुदण्ड शीर्ष कपाल पृष्ठ वाम स्कन्ध दक्षिण स्कन्ध कर्णद्वय ललाटेषु यथा क्रमं कर्तव्याः। अन्योपपर्वतदृष्टिः सर्वाङ्गुलिषुविधेया ॥१०॥

भा॰ टी॰—अब शरी में आठ कुलपर्वतो का वर्णनकरते हैं। सुमेरु पर्वत शरीर के मेरुदण्ड में कैलाश मस्तक में हिमालय पीठ में मलयाचल बायें कन्धे में मन्दराचल दाहिने कन्धे में विन्ध्याचल दक्षिण कान में और श्री शैल नारक पर्वत ललाट में बसता है। इस प्रकार आठ कुल पर्वतों का वर्णन किया और भी बहुत छोटे बडे पर्वत हाथ पैर की सब अङ्गुलियों में रहते हैं १० ॥

मू॰—पीनसा, यमुना, गंगा, चन्द्रभागा सरस्वती पिपासा शतरुद्रा श्रीरात्रि, नर्मदा॥ एवं नवनद्यो नव नाड़ीषु वसन्ति। अन्या उपनद्यः कुल्योपकुल्या, द्विसप्तति सहस्र नाड़ीषु वसन्ति ॥११॥

सं॰ टी॰—पीनसादि नव नदी दृष्टिः सुषुम्णाति रिक्त पूर्वोक्त पिंगलादि नव नाडीषु विधेया। नद्भिन्नोपनद्यः कुल्योपकुल्याश्च सकल नाडीषु द्रष्टव्याः ॥११॥

भा॰ टी॰—अब पीनसा आदि नदी और उपनदियों का वर्णन करते हैं। पीनसा गंगा यमुना सरस्वती चन्द्र भागा पिपासा (व्यासा) शतरुद्रा (शतलुजा) श्री रात्री और नर्मदा ये नौ नदी नौ नाड़ियों में रहती हैं। अर्थात् गंगा यमुना और सरस्वती ये

तीनों क्रम से इड़ा पिङ्गला और सुषुम्णा में तथा पीनसादि अन्य नदियां अलम्बुषादि नाड़ियों में रहती है और भी बहुत सी छोटी बड़ी बहत्तर हजार नाड़ियों में रहती हैं। ११ ॥

मू०–सप्तविंशति नक्षत्राणि, द्वादशराशयो नव ग्रहाः, पंचदशतिथय एते ऽन्तर्वलये द्विसप्तति सहस्रकोष्ठेषु वसन्ति ॥ अनेक तारा मण्डल मुर्मिपुञ्जे वसति।। त्रयस्त्रिंशत् कोटि देवता बहुरोमकूपेषु वसन्ति। दानव यक्ष राक्षस पिशाच भूत प्रेता अस्थि सन्धिषु वसन्ति। अनेक पीठोपपीठका रोमकूपेषु वसन्ति । अन्ये पर्वता उदर लोमसु वसन्ति। गन्धर्व किंनर किंपुरुषा अप्सरोगणा उदरे वसन्ति। अन्या खेचरी लीला मातरः शक्तय उग्रदेवता वायु वेगे वसन्ति। अनेक मेघा अश्रुपाते वसन्ति। अनन्तसिद्धा मति प्रकाशे वसन्ति। चन्द्रसूर्यौ नेत्र द्वये वसत । अनेक वृक्षलतागुल्मतृणानि जंघारोमकस्थाने वसन्ति । अनेक कृमिकीट पतंगाः पुरीषे वसन्ति ॥१२॥

सं० टी०–अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशिरा, आर्द्रा, पुनर्वसु, पुष्य, अश्लेषा, मघा, पूर्व फल्गुनी, उत्तरफल्गुनी, हस्त चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूल, पूर्वाखाढ़, उत्तराखाढ़, श्रवण, धनिष्टा, शतभिषा, पूर्वभाद्र, उत्तरभाद्र, रेवती। एतानिसप्तविंशति नक्षत्राणि । सार्धद्वय नक्षत्रस्यैको राशिस्तथा च सकल सकलते द्वादश रशयो, भवंति, एतेषु नक्षत्रेषु दिनमणेर्भ्रमणं सम्वत्सरेण समाप्यतेऽतो द्वादशमासात्मको वर्षो भवति। किन्तु कुमुदस्य परिभ्रमणं दिनैकेनैक नक्षत्रे पूर्यतेऽतः सप्तविंशति दिनेष्वेव राशिभोग पूर्त्तिः । अयमेव चन्द्र

मासः । पूर्वस्तु सौरमासः । राशिनामानि मेष, वृष, मिथुन, कर्क, सिंह, कन्या, तुला, वृश्चिक, धनु, मकर, कुम्भ, मीनेति । सूर्य चन्द्र भौम बुध गुरु शुक्र शनि राहु केतवो नवग्रहाः । तिथयस्तु चन्द्रकला दर्शना दर्शन कृताः प्रतिपदादि पञ्चदश तन्नामानि प्रसिद्धानि । एते देहमध्यस्थ मांसरंध्रेषु द्रष्टव्याः । बुभुक्षा च पिपासा च प्राणस्य मनसः स्मृतौ । शोक मोहौ शरीरस्य जरामृत्युरडूर्मय इत्येतेष्वनेक तारा दृष्टिः सम्पाद्या । रोम कूपेषु सकल देवता द्रष्टव्याः । यत्र दैवी शक्तिराविर्भूता सती देवताभिमान मुत्पादयति स पीठस्त्रिकोणादि यन्त्र प्रभृतिः, तत्समीप-स्थोपपीठकः । तद्दृष्टिरपि रोमकूपेष्वेव । एवमेव पर्वतादिष्वपि ज्ञेयं निगद व्याख्यातमन्यन्मूलम् ॥१२

भा० टी०—अश्विनी भरणी आदि सत्ताईस नक्षत्र, मेष, वृषादि बारह राशि सूर्यचन्द्रादि नवग्रह और प्रतिपदादि पन्द्रह तिथियां ये सब शरीरस्थ माँस पेशियों के बहत्तर हजार कोष्ठों में रहते हैं अनेक तारा मण्डल हड्डियों के रचना विशेष या भूख प्यास रूपी ऊर्मिपुञ्ज में रहते हैं । तेतीस करोड़ देवता समस्त रोम छिद्रों में बसते हैं । दानव यक्ष राक्षस पिशाच भूत और प्रेत शरीर की हड्डियों के जोड़ों में रहते हैं । त्रिकोणादि यन्त्र सहित देवताओं के स्थान विशेष को पीठ कहते है । वे ही अनेक पीठ और उपपीठ अर्थात् बडे छोटे उपासना करने योग्य देवी देव स्थान जो रोम छिद्र हैं । उन में विद्यमान हैं । तथा अन्य पर्वत उदर लोमों में रहते हैं । गन्धर्व किन्नर और अप्सराओं के समूह उदर में रहते हैं अन्य अपनी इच्छा से आकाश में गमन करने वाली उग्र देवता रूप लीला मातृ शक्तियां प्राण वायु वेग और अनेक मेघ नेत्रों के आंसुओं में बसते हैं । अनन्त सिद्ध बुद्धि के प्रकाश में रहते हैं वाम दक्षिण दोनों नेत्रों में क्रम से चन्द्र और सूर्य रहते हैं । अनेक वृक्ष लता गुल्म तथा तृण ये जंघा के रोमों में रहते हैं और बहुत से कीट पतङ्गादि विष्ठा में बसते हैं ।१२॥

मूल–यत्सुखं तत्स्वर्ग, यद्दुःखं तन्नरकं, यत् कर्म तद्बन्धनं यन्निर्विकल्पं तन्मुक्तिः स्वरूप दशायां निद्रादौ स्वात्मजागरः शान्तिर्भवति । एवं सर्वा देहेषु विश्वरूप परमेश्वरः परमात्मा ऽखण्ड स्वभावेन घटे घटे चित्स्वरूपी तिष्ठति। एवं पिण्ड संवित्ति र्भवति २ ॥१३॥

इति महेश्वरावतार श्रीगोरक्षनाथ कृतौ सिद्धसिद्धान्तपद्धतौ पिण्ड संवित्तिर्नाम तृतीयोपदेशः ।

सं० टी०–सुखे स्वर्गदृष्टिर्दुःखे च नरकदृष्टिः कर्मणि बन्ध दृष्टि निर्विकल्प स्वरूपज्ञाने मोक्षदृष्टिः । निद्रादि सर्वावस्थासु स्व स्वरूपमात्रानुभवे शान्ति दृष्टिश्चोच्यते । पूर्वोक्त प्रकारेण दृढभावनया सर्वत्र स्वात्मचित् स्वरूपः सम्पद्यत इति फल कथनेनोपसमहारि ॥१३॥

इति सिद्धसिद्धान्तपद्धतौ सर्वतन्त्र कोविद श्रीद्रव्येश झा कृत गूढार्थ दीपिकायां तृतीयोपदेशः समाप्तः ।

भा० टी०– इस शरीर में जो सुख है उसे स्वर्ग और जो दुःख है उसे नरक जानना । जो सकाम कर्म है वही बन्धन है । जो निर्विकल्पता है वही मुक्ति है और वह मुक्ति द्वैतप्रपञ्च की शान्ति से होती है यद्यपि अज्ञानी पुरुषों की दृष्टि से वह शुद्ध मुक्त अवस्था भी निद्रा रूप है तथापि वह वास्तव में अखण्ड आत्म बोध रूप दशा है उस बोध दशा में जागते रहना ही आत्म जागरण कहलाता है इसी को जीवन मुक्ति कहते हैं । इस पूर्वोक्त रीति से सब देहों में माया के बल से अनेक रूप धारी परमात्मा अखण्ड स्वभाव से घट घट में चेतन रूप रहता है । अतः उक्त रीति से व्यष्टि समष्टि रूप पिण्ड को अच्छी प्रकार जानने वाला ही पिण्ड संवित्ति कहलाता

है। यहां पर दूसरा पिण्ड संवित्तिशब्द उपदेश की समाप्ति का द्योतक है। १३ ॥

इति श्रीगोरक्षनाथ कृतौ सिद्धसिद्धान्तपद्धतौ योगीन्द्र श्री १०८ श्रीपूर्णनाथ शिष्येण योगि पं० श्री भीष्मनाथेन वेदान्ताचार्य्येण कृतायां सारदीपिकायां हिन्दी टीकायां पिण्ड संवित्तिर्नाम तृतीयोपदेशः समाप्ति कृतवान्।



* अथ पिण्डाधारः कथ्यते *

मू०—अस्ति काचिदपरंपरा संवित् स्वरूपा सर्व पिण्डाधारत्वेन नित्य प्रबुद्धा निजाशक्तिः प्रसिद्धा कार्य कारणकर्तॄणा मुत्थान दशांकुरोन्मीलनेन कर्त्तारं करोतीत्यनन्तरा वाधार शक्तिरिति कथ्यते। अत्यन्त निज प्रकाशस्वसंवेद्यानुभवैकगम्यमाना शास्त्रलौकिक साक्षात्कारसाक्षिणी सा परा चिद्रूपिणी शक्तिर्गीयते। सैव शक्तिर्यदा सहजेन स्वस्मिन्नुन्मीलिन्यां निरुत्थान दशायां वर्तते तदा शिवः स एव भवति॥१॥

सं०टी०-जीवस्य शिव शक्तिभ्यां सह भेदाभावएवसमरसः स एव मोक्षो लक्ष्यस्तस्य प्राप्त्युपाययोगः पञ्चमे वक्ष्यमाणस्तत्र प्रथमं शिव शक्त्योरेवकथं समरसभावावस्था भवतीति जिज्ञासोपशमनाय चतुर्थोपदेशः। तत्र पूर्वशक्ति स्वरूपं निरुच्य सामरस्यं निर्वक्ष्यते अस्तीत्यादि। (अपरंपरा)नास्ति परंपराक्रमया: स्वजनकंतज्जनकमिति प्रणाली रहिता कूटस्थेतियावत संवित्स्वरूपा) ज्ञानस्वरूपा (नित्य प्रबुद्धा) विनाश रहित प्रकाशरूपा ऽनेन बुद्धे र्वैलक्षण्यं सूचितम् तदीय प्रकाशस्योत्पत्ति विनाश शालित्वात् परमेश्वरस्य (निजा) स्वकीया (शक्तिः) आद्याभवानी (सर्वपिण्डाधारत्वेन) समस्त जगदाधारत्वेन विद्यते सैव सकल शास्त्रेषु प्रसिद्धा साच (कार्यकरण कर्तॄणां) कार्यं, शरीरं करणमिन्द्रियाणि कर्ता,जीवएतेषां त्रयाणामुत्थान दशायाः, आविर्भावावस्थाया अंकुरं पूर्वरूपंतस्यैवोन्मीलनेन विकाश द्वारा (कर्तारम् , ईश्वर देवादिकं(करोति)सृजतीत्यर्थ इयमेव(अनन्तरा)भेदरहितावाभ्यन्तरंगा(आधार शक्तिः) विश्वधारण शक्ति रपि कथ्यते द्वितीया परमेश्वरस्य या शक्तिः परा शब्देन शास्त्रेषु गीयते सापि (अत्यन्त निज प्रकाशा) स्वतश्च

द्रूपा नतु मतान्तरीयमायावज्जडा निजा शक्तितो वैलक्षण्यमाह (स्वसंवेद्या) स्वेन भास्या निजायान्तु स्वेनापि भास्यभासकभावोनासीत्, अत्र तु स्व भास्यतास्ति, अतएव (स्वानुभवैक गम्यमाना) अनेन स्वीकृत्य स्ववेद्यता मन्यवेद्यता निराकृता। नन्वस्तु वुद्धि तत्त्व मत आह (शास्त्रेत्यादि) शास्त्रलोक सकल विषयक वुद्धि वृत्तेः साक्षिणी (चिद्रूपिणी) नतु जड़रूपा वुद्धिवत्। सा पराशक्तिः कथ्यते (यद्वा सैव सहजेन) स्वभावतः अस्याः प्रेरको नास्ति किन्तु स्वतन्त्रतेति ध्वन्यते (निरुत्थान दशायां) प्रजानां प्रलयावस्थायां (स्वस्मिन्) स्वरूपे (उन्मीलिन्याम) स्वस्यायां स्वस्याविर्भावे स्व स्व रूपमवलम्ब्यैव यदा स्वस्या आविर्भाव इ ते यावत (वर्तते) सम्पद्यते तदा विद्यमाना पराशक्तिरेव शिवो भवति। शेते जगदस्मिन्निति व्युत्पत्ति लभ्यार्थ भावः सम्पद्यते तदानीं नासीत् शिव शक्त्योर्भेद इति हृद्यम् ॥१॥

भा० टी०- जीव का शिव और शक्ति के साथ ज्ञानपूर्वक अभेद होना ही समरस रूप मोक्ष कहा जाता है। वही मोक्ष यहां लक्ष्य है, उस मोक्ष की प्राप्ति मुख्य साधन योग है। उस का पंचम उपदेश में वर्णन किया जायगा। शिव और शक्ति का समरस भाव (अभेद) हो सकता है या नहीं इस सन्देह को दूर करने के लिये इस चौथे उपदेश में पहले शक्ति के स्वरूप का निरूपण कर वाद में शिव शक्ति के समरस भाव का और भूत भौतिक सकल पिण्डों को आधार भूत शक्ति का वर्णन किया जाता है। सर्वश्रेष्ठ ज्ञान स्वरूप बुद्धि आदि क अनित्य प्रकाश से भिन्न नित्यप्रकाश रूप और सकल चराचर जगत की आधार भूत परमेश्वर की निजा शक्ति वेदादि शास्त्र और सिद्धों के सिद्धान्त में प्रसिद्ध है। वह शक्ति शरीरादि कार्य तथा उन के पांच सूक्ष्म कारण और जीव इन की जो अच्छी प्रकार से अभिव्यक्ति अवस्था है उस अवस्था रूप अङ्कुर के प्रकाश से सकल विश्व के कर्ता हिरण्य गर्भादि को भी उत्पन्न करती है इस लिये वह चिद्रूप शक्ति शिव की अत्यन्त अन्तरङ्ग है वही शक्ति भूत भौतिक प्रपञ्च की अपेक्षा आधार कहलाती है इसी से वह सब का उपादान कारण है। वह शक्ति केवल स्वप्रकाश स्वरूप है अतः निज अनुभव से ही जानने योग्य

और लोक तथा शास्त्र सम्बन्धी बुद्धि वृत्ति को देखने वाली जो चिद्रूप शक्ति है वही परमेश्वर आदिनाथ की पराशक्ति कही जाती है वही पराशक्ति जब प्रलय काल में स्वभाव से अपने शुद्ध रूप में विकसित होती है तब शिव रूप भी होजाती है। अर्थात् महाप्रलय में विलीन होकर समस्त जगत् जिस में शयन करता है उस को शिव कहते हैं वास्तव में उस समय शिव से शक्ति का किंचित् मात्र भी भेद नहीं रहता। १ ॥

मू०—अतएव कुलाकुलस्वरूपा सामरस्य निज भूमिका निगद्यते ॥२॥

सं० टी०—(अतएव) अस्मिन् समये शिव शक्त्यो र्भेदाभावादेवे यं पराशक्तिः (कुलाकुल स्वरूपा) सकल स्वरूपा (सामरस्य निज भूमिका) तुल्य रस स्वभावावस्था शिवो वा शक्ति रित्यादि विकल्पा नर्हेति यावत् (निगद्यते) योगिभिः शास्त्रेषु प्रतिपाद्यते। एतत्प्राप्त्यै समरस करण युक्तिरग्रेऽभिधास्यते ॥२॥

भा० टी०—यह अर्थ महाप्रलय अवस्था को लेकर किया गया है। इसी तरह मोक्ष दशा में भी घटता है। नीचे देखिये—

पूर्वोक्त चिद्रूप शक्ति ही मोक्ष दशा में जब अपने स्वभाव से आत्म स्वरूप में अभिव्यक्त (प्रकट) होती है तब मुमुक्षु के लिये वही शक्ति कल्याण रूप होजाती है। इसीलिये वह परा शक्ति कुलाकुल रूप शिव शक्ति की अभेदावस्थारूप समरस की प्राप्ति के लिये उपाय आगे चलकर नाथ जी स्वयं कहेंगे। जो योगी उन उपायों का अच्छी तरह अनुष्ठान करता है वह भी इस समरस अवस्था को प्राप्त कर लेता है ॥२॥

मू०—कुलमिति परा सत्ताऽहंता स्फुरता कला स्वरूपेण सैव पञ्चधा विश्वस्याधारत्वेन तिष्ठति ॥३॥

सं० टी०—पूर्वं परा शक्तेः कुलरूपता प्रदर्शिता तत्प्रकारं विवृणो-

तिकुलेत्यादि परा, सत्ता, अहंता, स्फुरता, कलेति पञ्चधाकुल रूपा शक्तिः सैव निखिलस्याश्रयः ॥३॥

भा० टी०—अब पूर्वोक्त कुलाकुल पद में से कुल पद का व्याख्यान करते हैं। कुल का अर्थ यह है परा सत्ता अहन्ता स्फुरता और कला इन पांच प्रकार के निज स्वरूप भेदों से कुल अवस्था को प्राप्त हुई वह शक्ति समस्त विश्व का आधार होकर रहती है। इसी लिये इस शक्ति को कुल अवस्था कहते हैं। ३ ॥

मू०—अतएव परा परा निराभासा वभासकान् (सूर्य्यादीन्, अवभासयति) प्रकाशस्वरूपा या सा परा॥४॥

सं० टी०—तत्र गूढार्थतया पंचसु प्रत्येकं स्वयमेव व्याख्यायते तत्र क्रम प्राप्तं परा पदार्थमाह अत एवेति यतः सा (निराभासा) अन्यैः सूर्यादिभि र्नभास्यते। सातु (अवभास कान्) लौकिक तेजोरूपान् सूर्य्यादीन् (अवभासयति) प्रकाशयति। अतःपरापरा सर्वतः श्रेष्ठा कथ्यते श्रुतिरप्याह न तत्र सूर्योभाति न चन्द्र, तारकं नेमा विद्युतो भांति कुतोयमग्निः। तमेव भान्तमनु भाति सर्वं तस्यभासा सर्वमिदं विभाति ॥४॥

भा० टी०—अब कुलपदार्थ अवयव भूत सत्ता परा आदि पाँच पदार्थों में से परापद के अर्थ का वर्णन करते हैं जिस कारण वह शक्ति पांच प्रकार से समस्त विश्व का आधार है। इसी से वह शक्ति परापर रूप है अर्थात् सकल वस्तुओं में विद्यमान है और वह शक्ति चेतन प्रकाश स्वरूप है। अतः सूर्यादि जड़ प्रकाश उसको प्रकाशित नहीं कर सकते। किन्तु वही शक्ति सूर्यादि विकाश करने वाली वस्तुओं को भी प्रकाशित करती हैं। अतः जो सत्ता द्वारा सबको प्रकाश करने वाली शक्ति है वही परा कहलाती है।

मू०—अनादि संसिद्धं परमाद्वैत परमेक मेवास्ती ति या ऽङ्गीकारं करोति सा सत्ता ॥५॥

सं० टी०—सत्ताया लक्षणमाह (अनादीति) सजातीयविजा-

तीय स्वगत भेद रहितः स्व प्रकाशोऽस्तीति प्रतीयमानतैव सत्ता । अत्रेदं बोध्यमनादि पदेन ध्वंसाभावः । संसिद्धपदेन स्वप्रकाशः । परमा द्वैतपदेन विजातीयभेदशून्यम्, एकपदेन सजातीयत्वनिरासः । एवेत्य-नेन स्वगतभेदराहित्यं च सूचितमिति ॥५॥

भा०टी०—नाश रहित अनादि स्वरूप और स्वतः प्रकाश स्वभाव तथा परम अद्वैत अखण्ड स्वरूप एकशिव ही सर्वत्र व्यापक है । इस प्रकार अस्तित्व को स्वीकार करने वाली शक्ति सत्ता कहलाती है । ५ ॥

मू०—अनादिनिधनोऽप्रमेयः स्वभावकिरणानन्दोऽहम स्मीत्यहं सूचन शीला या सा पराऽहंता ॥६॥

सं० टी०—परस्या अहंताया लक्षणं प्रदर्श्यते । अनादीति । आदि निधन विधुरः (अप्रमेयेति) परिच्छेद रहितः (स्वभाव किरणेति) स्वप्रकाशः, तादृश "आनन्दरूपोऽहमस्मि" इत्याकारक प्रतीति र्या सा सर्वोत्कृष्टा ऽहंता ॥६॥

भा० टी०—अब अहन्ता रूप कुल अवस्था का वर्णन करते हैं । आदि अन्त से रहित और इन्द्रिय आदि प्रत्यक्ष से अगम्यस्वभाव प्रकाश स्वरूप आनन्द मैं हूँ । अर्थात् मेरे में और कूटस्थ चित् असङ्ग आदिनाथ में कुछ भी भेद नहीं । इस प्रकार शिव शक्ति तथा आत्मा परमात्मा आदि के अभेद की प्रकाशक जो शक्ति है वही शक्ति परमअहन्ता कहलाती है । इसी का नाम पराविद्या भी है । ६ ॥

मू०—स्वानुभवचिच्चमत्कारनिरुत्थानदशां प्रस्फुटी करोति या सा स्फुरता ॥७॥

सं० टी०—स्फुरताया लक्षणं निरुच्यते स्वानुभवचिच्चमत्कार स्वरूपमात्र विषयस्य स्वकार्य चिद्रूपज्ञान विलासस्य या निरुत्थानाव-स्था भेदावभास रहितदशा सा ययाऽनुभूयते सा स्फुरता ॥७॥

भा० टी०—मन वाणी से अगम्य अपने अनुभव से जानने योग्य जो आत्म अनुभव है उस अनुभव के अद्भुत चैतन्य चमत्कार

की निरुत्थान दशा को अर्थात् द्वैत अवभास से रहित मुक्ति अवस्था को जो शक्ति स्पष्ट रीति से अभिव्यक्त करती है उसी को स्फुरत्ता नाम की चौथी कुल अवस्था शक्ति कहते हैं। ७ ॥

मू०—नित्यशुद्धबुद्धस्वरूप स्वयंप्रकाशत्वमाकलयतीति या सा पराकलेत्युच्यते ॥८॥

सं० टी०—कलाया व्युत्पत्ति रुपदिश्यते यथा नित्यशुद्धबुद्ध स्वरूपं निखिल भेद रहितं मुक्तरूपमतः स्वयं प्रकाशत्व मन्यानवभास्य प्रकाशरूपमाकलयते संख्यायते सा परा कला कथ्यते ॥८॥

भा० टी०—आत्मा नित्य शुद्ध व्यापक सदा स्वयं प्रकाशमान और अखण्ड रूप उस आत्मा के स्वाभाविक व्यापक रूप को जो शक्ति बोध रूप से प्रकाशित करे वही अवस्था रूप कुल पराकला कहलाती है ॥८॥

मू०—अकुलमिति जातिवर्णगोत्राद्यखिल निमित्तत्वेनैकमेवास्तीतिप्रसिद्धंतथाचोक्तमुमामहेश्वर सम्वादेनिरुत्तरेऽनन्यत्वादखण्डत्वादद्वयत्वादनन्यत्वान्निर्धर्मत्वादनामत्वादकुलस्यनिरुत्तरमिति ॥९॥

सं० टी०-पूर्वोक्तमकुलपदं व्याख्यायते यतोऽस्यामवस्थायां मनुष्यत्व ब्राह्मणत्वादि जाति शुक्लादि वर्ण कुलादि सकल प्राकृत व्यवहार कारण विरहतयैक तत्त्वस्यैव भानं भवत्यतस्तत्राकुलत्वम् अत्रैव महेश्वर सम्वादस्यापि प्रामाण्यमुपदर्श्यते-(अनन्यत्वात्) प्रतियोगितयाऽनुयोगितया च भेद शून्यत्वादन्य पद व्यवहार एव नास्ति। अतएव (अखण्डत्वात्) अन्यत्र व्यावृत्तये स्वयं पद व्यवहार्यता रूपखण्डाभावात्। (अद्वयत्वात्) विजातीयाभावादत एव (अनन्याश्रयत्वात्) विजातीयनिष्ठाधेयतानिरूपिताधिकरणत्वाभावात् (निर्धर्मत्वात्) विजातीय निष्ठाधारता निरूपिताधेयत्वाभावात्। पूर्वेणाधिकरणताया अनेनाधेयतायाश्च निषेध इति निष्कर्षः। जाति गुणक्रिया सम्बन्धान्यतममादायैव शब्दः प्रयुज्यते लोके ऽत्र कस्यचनाभावान् नास्ति किञ्चि

स्पद व्यवहार्यता तदेवोक्तम् अनामत्वादिति इदमेव सर्वं विश्वद्वैत नि. वर्त्तनम् अकुल पदार्थस्य निरुक्तम् निर्वचनम् ॥६॥

भा० टी०—कुलपदार्थ का वर्णन कर अब अकुलपद के अर्थ का निरूपण करते हैं। अकुल का अर्थ गोत्रादि जाति नील पीतादि वर्ण और कश्यपादि वंश इत्यादि सकल व्यवहार का मुख्य कारण शक्ति है। अतः महा प्रलय में समस्त भूत भौतिक को अपने में संहार कर कूटस्थ असङ्ग शिव से मिली हुई तथा निजा आदि नाम से प्रसिद्ध केवल वह शक्ति ही शेष रहती है यह बात वेदादि शास्त्रों में और सिद्धों के सिद्धान्त में प्रसिद्ध है यही सिद्धान्त उमा महेश्वर के संवाद रूप निरुत्तर ग्रन्थ में भी कहा है। सकल भेद रहित होने से वह शक्ति अखण्ड रूप से व्यापक है। अतः वह अद्वितीय कहलाती है और उसका अन्य कोई आश्रय नहीं है तथा उस में भी उस समय अन्य किसी की आश्रयता का व्यवहार नहीं होता है। वह स्व प्रतिष्ठित और नाम रूप से रहित है अर्थात् जाति गुण क्रिया इन का सम्बन्ध न रहने से उस समय उस में किसी भी शब्द के व्यवहार की योग्यता नहीं रहती! अतः वह अकुल पद से कही जाती है ॥६॥

मू०—एवं कुलाकुल रूपासामरस्य प्रकाश भूमिका स्फुटी करण एकैव मर्थायासा ऽपरंपराशक्तिरेवावशिष्यते अपरंपरं निखिलविश्व प्रपञ्चजालं परतत्त्वं सम्पादयत्ये-कीकरोतीत्यपराशक्तिराज्ञावती प्रसिद्धा ॥१०॥

सं० टी०—तद्दशायां प्राकृत यावद् व्यवहार विलोपेऽपि (अपरं परा शक्ति रव शिष्यते) एकैव सावतिष्ठते। तत्र प्रमाणं कि-मिति शंकांदूरीकरोति कुलाकुलेत्यादि कुलाकुलयोः सामरस्यस्य भूमिका या स्फुटी करण मेकमेवार्थः प्रयोजनं यस्याः सा, एनां विना निजनिर-तिशयानन्दानुभवाभावः प्रसज्येत अर्थात् तद्बलेनैव न कुलं ना कुलम् नोभयमपि चेति विलक्षणस्यानुभवस्यावस्था समुद्घाट्यते किञ्च तत्र समस्त विरञ्चि प्रपञ्च पाशं परतत्त्व रूपमेव सम्पद्यते। या, अपरं कुलं

परमकुलमुभे एकं करोत्यतः सा ऽपरंपरा शक्ति ऽर्व्यवह्रियते। इयमेवा ज्ञावती नाम्ना प्रसिद्धास्ति ॥१०॥

भा० टी०—पूर्वोक्त क्रम से कुलाकुल रूप वह शक्ति समरस रूप अभेद के प्रकाश की भूमी के स्फुट करने में पांच प्रकार के कुल अवस्था भेद से तथा सर्वधर्म रहित अखण्डादि रूप अकुलावस्थाभेद से तत्पर रहती है। अतः स्थिति संहार और मोक्ष के देने में समर्थ मुख्य शक्ति ही है। वही शक्ति अपरंपरा निजा आदि नाम से प्रसिद्ध सकल कार्य प्रपञ्च के आधार रूप से महा प्रलय में अवशिष्ट रहती है। अब अपरंपरा पदार्थ का निरूपण करते हैं। भूत भौतिक स्थावर जंगम सकल विश्व प्रपञ्च को परमेश्वर रूप परम तत्त्व में संपादन करती हुई जो शक्ति एक करदेती है इसी से उस शक्ति का अपरंपरा नाम हुआ और वह सर्वेश्वर परम नाथ की आज्ञावती नाम से भी प्रसिद्ध है ॥१०॥

मू०—अकुलं कुलमाधत्ते कुलञ्चाकुलमिच्छति
जलबुद्बुदवन्न्यायादेकाकारः परः शिवः ॥११॥

सं० टी०——अकुल मद्वैतावस्था सृष्टिकाले ऽकुलं द्वैतत्वमाधत्ते सम्पादयति एवमेव कुलंच प्रलय अकुले करोति। अयमभिसन्धिः, कुलेद्वैतमेवानुभूयते अकुले चाद्वैतमेवातो न केवलं सदा कुलं ना कुलञ्च, किन्तु कार्य दर्शनेन द्वयमपि संघटते। अतः समरसो जातः। अत्रैव दृष्टान्तमाह जल बुद्बुदवत यथा कदाचिद् बुद्बुदमेव मन्यते कदाचिच्चजल मेव यदा च तत्त्वतो जल मेव मन्यमानो बुद्बुदमपि प्रातीतिकं मन्यते तदा उभयोः समरसो जात एतादृश एकाकारः शक्त्य भिन्नः शिवः पायात् रक्षतु नः ॥११॥

भा० टी०—शिव से अभिन्न शक्ति ही महाप्रलय में अकुलावस्था युक्त कहलाती है। क्यों कि उस समय नाम रूप से विस्तृत चराचर समस्त जगतका उपसंहार कर परमतत्त्वशिव में स्वयंमिल जाती है। अतः वह अकुल कहलाती है और जब सृष्टि का समय आता है तब वही निजा शक्ति प्राणियों के कर्मों के साथ मिल कर परा अपरा

सूक्ष्मादि भेद से कुल रूप व्यक्त अवस्था को धारण करती हुई सकल विश्व को रचती है तब वह कुल कहलाती है और फिर प्रलय में अकुलावस्था युक्त हो जाती है। तात्पर्य यह है कि न वह द्वैत रूप कुल है और न अद्वैत रूप अकुल है जैसे जलका स्वकार्य की अपेक्षा से फेन तरंग बुलबुला आदि नाम होता है और जल भी कहलाता है परन्तु तत्त्व की दृष्टि से तो वह केवल जल ही है। इसी प्रकार द्वैत और अद्वैत से रहित सर्वाधिष्ठान पर अद्वैत रूप एक शिव ही सच्चा है। इस यथार्थ अभेद को ही समरस कहते हैं ॥११॥

मू०—अतएवैकाकारोनन्तशक्तिमान् निजानन्दतयावस्थितोऽपिनानाकारत्वेनविलसन् स्वप्रतिष्ठां स्वयमेवभजतीति व्यवहारः। अलुप्तशक्तिमान्नित्यंसर्वाकारतयास्फुरन्पुनःस्वेनैवरूपेण एकएवावशिष्यते ॥१२॥

सं० टी०—अतएवद्वैताद्वैतोभयस्य समरसत्वादेव (एकाकारः) तत्त्वत एक एव (अनन्त शक्तिमान्) तादात्म्य सम्बन्धेन शक्ति विशिष्टः (निजानन्दतया) परिपूर्णाखण्डानन्दरूपेण (अवस्थितोऽपि) विद्यमानः सन्नपि (नानाकारत्वेन) मायिकदृष्ट्याघटपटाद्यनन्त भेदेन (विलसन्) विभ्राजमानः (स्वप्रतिष्ठां) स्वाश्रयतां (स्वयमेव भजति) प्राप्नोति, अयं भावो यथेयं पृथिवी व्यवहारेऽस्मदादि पार्थिव शरीराणामाधारः। तदभि प्रायेण पृथिवी पृथिव्या आश्रय, इतिव्यवहारो नानुपपन्न स्तत्त्वतस्त्वभेदे आधाराधेय भाव विरहान् नार्हस्तद् व्यवहार स्तथैव शिव शक्त्योर्भेदं परिकल्प्य, अभिन्नयापि शक्त्या ऽऽधाराधेय भावोपि व्यवहरणीयः तत्त्वतस्तु सोपि न। एक एव शिवो वा शक्ति-र्वेति सिद्धान्तः। (अलुप्तशक्तिमान्) शक्ति रहितः,कदापि न भवतीति राद्धान्तः शक्तेर्नित्यत्वात् न कर्मधारयान्मत्वर्थीय इति न्यायस्य लाघव मूलकत्वेन कचित्तदनादरस्यापि दर्शनम्, यथा व्याकरण भाष्ये ऽसुब्वतः गीतायामनादि मत्परंब्रह्मेत्यादि बहवःप्रयोगा उपलभ्यन्ते (सर्वाकारतया स्फुरन्) सृष्टिदशायां उच्चावच विश्वरूपेण भासमानः (स्वेनैव रूपेणैक एवावशिष्यते) चिद्रूपतस्तु एक एवावशिष्टो विद्यते ॥१२॥

भा० टी०—अतः पूर्वोक्त अभेद रूप समरस की रीति से सबका अधिष्ठान अद्वितीय ब्रह्म ही व्यापक रूप से सर्वत्र विद्यमान है और वही तादात्म्य सम्बन्ध के द्वारा स्वशक्ति से नित्य सम्बद्ध होकर अनन्त शक्तिमान कहलाता है। इसीलिये वह परमेश्वर देव दानव मनुष्य स्थावर जंगम जड चेतन आदि नाना आकार से व्यवहार दृष्टि द्वारा भासमान होने पर भी वास्तव में वह ब्रह्म स्वयं ही स्व स्वरूप प्रतिष्ठा में सदा स्थित रहता है उस का कोई आश्रय नहीं किन्तु वही सब का आधार है। तात्पर्य यह है कि जैसे शरीर और घटादि का पृथ्वी तथा फेन तरङ्गादि का जल कारण है इसीसे स्वकार्य शरीरघटादि और फेन तरङ्गादि का पृथ्वी तथा जल व्यवहारदृष्टिसे आधार कहलाते हैं। परन्तु तात्विक विचारसे तो कार्य और कारण अभेद होनेसे आश्रय आश्रयी भावभी नहीं है इसी प्रकार भेद दृष्टिसे वह शिवशक्तिका आ-धार भले ही भासमान हो यथार्थ में तो आधार आधेय भाव भी नहीं होसकता। क्यों कि शिव और शक्तिका नित्य तादात्म्य सम्बन्ध है जिस की शक्ति कदापि कम न हो वही परमेश्वर नित्य सर्वशक्तिमान है। अतः जड चेतन स्थावर जङ्गमादि समस्त संसार रूप से भी वह समुद्र के फेन तरंगादि के समान व्यावहारिक प्रपञ्चावस्था से भासमान हो रहा है। फिर अन्त में वही परमेश्वर निज व्यापक चिदखण्ड स्वरूप से एक ही अवशेष रहता है ॥१२॥

मू०—अतएवपरमकारणंपरमेश्वरःपरात्परःशिवः स्व स्वरूपतयासर्वतोमुखःसर्वाकारतयास्फुरितुंशक्तो-तीत्यतः शक्तिमान्, शिवोऽपिशक्तिरहितःशक्तःकर्त्तुं न किञ्चन । स्वशक्त्यासहितःसोऽपिसर्वस्याभासको भवेत् ॥१३॥

सं० टी०—(अतएव) सर्व शक्तिमत्त्वादेव (परम कारणम्) सर्वेषां सूक्ष्म स्थूल पदार्थानां निदान भूतः (परमेश्वरः) आदिनाथः (परात्परः शिवः) अस्मदादितः परः श्रेष्ठो हिरण्यगर्भादिदेव स्वतोऽपि

परःश्रेष्ठः शिवः कल्याणरूपो निखिल दुःखोच्छेद हेतुत्वात् (स्वरूपतया) चैतन्य रूपेण (सर्वतोमुखः) व्यापकः (सर्वाकारतया स्फुरितुं शक्नोति) रुद्र विष्ण्वादि निखिलरूपेणावतरितुमर्हः। अतएव शक्तिसहितो यमिति सिद्धयति शक्ति रहिते विविध रूपत्वस्यस्वप्नेप्यसम्भवात्। यदि शिवः शक्ति रहितो भवेत शक्तिवाचकएकारस्य निःसारणे शवोभवति। तदा (किञ्चन) किञ्चिदपि कार्यम् (कर्त्तुं नशक्तः) विधातुं नक्षमः स एव शक्ति सहितः (सर्वस्य) विश्वस्य (अवभासकः) निर्माता ज्ञापकश्च भवेदितिव्यतिरेकान्वयाभ्यां शक्ति सहितस्यैव निदानत्वेनोपासनीयता ॥१४॥

भा० टी०—सर्व शक्ति सम्पन्न होने से ही वह आदिनाथ परमेश्वर स्थूल सूक्ष्म सकल भूत भौतिक पदार्थों का परम आदि कारण है। इतना ही नहीं किन्तु सर्वजीवों से श्रेष्ठ परहिरण्यगर्भादि से भी परम श्रेष्ठ और कल्याण स्वरूपहै। क्योंकि वह अपने भक्तों के स्मरण मात्र से ही उनके समस्त दुःखों का समूलोच्छेद कर भोग और मोक्ष देता है और वही शिव अपने चैतन्य स्वरूप से सर्वान्तर्यामी व्यापक है। अतः भूत भौतिक जडचेतनादि सब आकार धारण करने में समर्थ है। इसीसे वह शिव शक्तिमान् कहलाता है। इस सन्दर्भ से यही भाव निकलता है कि शक्तियुक्त हो महेश्वर सब काम करने में समर्थ है। अकेला नहीं। शक्ति रहित महेश्वर भी कुछ नहीं कर सकता अतः वह शिव भी निज शक्ति सम्पन्न ही समस्त संसार का साक्षी कहलाता है ॥१३॥

मू०—अतएवानन्तशक्तिमान्परमेश्वरःसविश्वरूपी विश्वमयोभवतीति प्रसिद्धं सिद्धानांपरापरस्वरूपा कुण्डलिनी वर्तते। अतस्ते पिण्डसिद्धाः प्रसिद्धाः साकुण्डलिनीप्रबुद्धाप्रबुद्धाचेति द्विधा। अप्रबुद्धेति तत्रपिण्डचेतनरूपा स्वभावेननानाचिन्ताव्यापारोद्यम प्रपञ्चरूपाकुटिलस्वभावाकुण्डलिनीख्यातासैवयोगिनां

तत्तद्विलसितविकाराणांनिवारणोद्यमस्वरूपाकुण्डलि-न्यूर्ध्वगामिनी प्रसिद्धा भवति ॥१४॥

सं० टी०—परापरशक्तिः समष्टितया प्रधानं तस्यामेव सकल कार्य कारिण्योऽवान्तर शक्तयो वर्तन्ते। (अतएव) परंपराशक्ति मत्वादेव (परमेश्वरोऽनन्तशक्तिमान्) कथ्यते लौकिक वैदिकेषु किञ्च स एव (विश्वरूपी) सकलरूपधारणपटुः (विश्वमयः) संसार रूपोभवतीति प्रख्यातम्। सैव परम्पराशक्तिः कुण्डलिनी भूत्वा योगिनांदेहे वर्तते (अतः, कुण्डलिनी बलादेव (पिण्डसिद्धाः) कायसिद्धाः (प्रसिद्धाः) प्रख्याताः, कायसिद्धिर्नाम स्थूल शरीरस्यास्य सदा स्थितिः कदापिनाशो न भवतीति। एतत्प्रक्रिया समरस प्रकरणे वक्ष्यते। ननु कुण्डलिनी प्राणिमात्रदेहेषु वर्तते तत् कुतो योगिनामित्युक्तमत आह सा कुण्डलिनी प्रबुद्धाऽप्रबुद्धेति भेदेन द्विविधा वर्तते। तत्राप्रबुद्धाया सर्वत्र सद्भावेऽपि कायसिद्धिहेतुभूता या प्रबुद्धा सा तु योगिनामेवेत्यत उक्तं योगिनामिति।

सकल साधारणतया प्रथममप्रबुद्धावस्थतेऽप्रबुद्धेतिनाम्ना व्यवह्रियमाणा (तत्र पिण्डेषु) सकलप्राणिनिकरेषु चेतनरूपा (स्वभावेन) परमार्थतो नानाचिन्ता चिन्तातीताऽप्यौपाधिकचिन्तावती (व्यापारोद्यम) प्रपञ्चरूपा निखिल प्राकृत चेष्टा सम्पादिका ऽतएव (कुटिल स्वभावा) तिर्यग्भूपा मूलाधारस्थलिङ्गात्मक मांसखण्डे सार्ध त्रिवलयात्मिका एषाधोमुखी कुण्डलिनी सर्वत्र ख्याता वर्तते। सैव प्रबुद्धा सती योगिनां विग्रहेषु (तत्तद्विलसित विकाराणाम्) प्राकृत नियमेन निखिलरोगाद्युपद्रवाणां (निवारणोद्यम स्वरूपा) विनाशाय व्यापारवती (ऊर्ध्वगामिनी) मूलाधाराद्‌र्ध्वं ब्रह्मरन्ध्र पर्यन्तं संचरण शीला कुण्डलिनी भवतीति प्रसिद्धा ॥१४॥

भा० टी० सकल विश्व का प्रकाशक होनेसे ही सर्वशक्तियुक्त वह सर्वेश्वर अनन्त शक्ति सम्पन्न कहा जाता है। और अपने शक्ति बल से ही निजभक्तों पर कृपा करने के लिये अनेक रूप धारण करने में समर्थ है या सर्व विश्व का अधिष्टान भूत आधार होने से विश्व

व्यापी कहलाता है। इस लिये सकल विश्व रूप भी वही है। अर्थात् उस चेतन से जगत् की सत्ता पृथक नहीं है अपितु वही अन्तर्यामी सब जगह संसार रूप होजाता है। यह सिद्धान्त वेदादि शास्त्र और सिद्धों में भी प्रसिद्ध है। ईश्वर स्वशक्ति सम्पन्न है। अतः त्रिकाल दर्शी और सबकार्य करने में समर्थ भले ही रहे कार्यसिद्ध योगी समर्थ क्यों कहलाते हैं उन के पास तो ईश्वर जैसी शक्ति नहीं हैं, जिससे कि वे भी ईश्वर की तरह सत्य संकल्प हों? इस शंका का समाधान यह है कि परापर स्वरूपा शब्द और अर्थ सृष्टि के उत्पादन में समर्थ चित अचित् रूप कुण्डलिनी सिद्धों के भी इस देह पिण्ड में विद्यमान है। यद्यपि वह सर्वत्र व्यापक है तथापि देह में विशेष रूप से उसकी अभिव्यक्ति होती है। अतः इस देह में ही कुण्डलिनी के उत्थान व ध्यानादि से काया में सिद्ध हुये सकल शक्ति सम्पन्न अनेक सिद्ध प्रसिद्ध हैं वह कुण्डलिनी प्रबुद्ध और अप्रबुद्ध भेद से दो प्रकार की है। अब मूलाधार में रहने वाली अप्रबुद्ध कुण्डलिनी के कार्य को बतलाते हैं। यद्यपि इस देह पिण्ड में वर्तमान कुण्डलिनी स्वभाव से चेतन स्वरूप है तथापि जब तक वह जगाई नही जाती तब तक संसारी पुरुषों के लिये नाना प्रकार की शोक मोहादि चिन्ता और व्यापार आदि का संपादन करती हुई सकल जगत प्रपंच रूप से भी वही बन्धन का हेतु होती है। अतः अविवेकियों को जन्म मरण रूप विपरीत फल देने से विपरीत स्वभाव कुण्डलिनी कहलाती है। अथवा जबतक मूलाधर में टेढ़ीगति और अधोमुखी होकर रहती है तब तक वही जन्म मरण रूप फल देती है। और इस शरीर में जगी हुई वही कुण्डलिनी जब अच्छी तरह सहस्रदल तक संचार करती है तब योगियों के समस्त जन्म मरण दुःख रूप फलों के देने वाले कर्म और मनों के विकारों को दूर करने में समर्थ होती है। यह बात सिद्धों में प्रसिद्ध है ॥१४॥

मू०—ऊर्ध्वमिति सर्वतत्त्वान्यपि स्वस्वरूपमेवेत्यूर्ध्वे वर्तते। अत एव सा विमर्शरूपिणी योगिनः स्व स्वरूपमवगच्छन्तीति सुप्रसिद्धा ॥१५॥

सं० टी०—क ऊर्ध्वपदार्थः कथंच तद्गामित्वं कुण्डलिन्या इति विवियते, ऊर्ध्वमिति स्वपरिणामभूतानि सकलान्याकाशादि तत्त्वानि तानिसर्वाणि (स्वस्वरूपमेव) स्वाभिन्नानि स्वकीय विकृति रूपत्वात्। अयमाशयः कारणभूता कुण्डलिनी कार्यरूपाणि च तत्त्वानि कारणं विना कार्यं नावतिष्ठते। अतः कार्यो परिगमन शीलता कारणस्येति कार्यस्य चोर्द्रकावस्थातः पूर्वस्यो- र्ध्वत्वं परिकल्प्य तस्या ऊर्ध्वगामिनीत्युक्तम् तेन सर्वं प्रति निदानता सूचिता भवतीति। अत एव तस्याः सर्वस्वरूपत्वादेव सर्वः सह तादात्म्य वेदनेनविमर्शरूपिणी क्वचिद् व्यवह्रियते। एतद्बलादेवयोगिनः स्वस्वरूपम्। अवगच्छन्ति जानन्तीत्यर्थः ॥१५॥

भा० टी०—यहाँ 'ऊर्ध्व, पदका भाव यह है कि समस्त आका- शादि भूत भौतिक पदार्थ कुण्डलिनी शक्ति से उत्पन्न होते हैं। अतः कार्यो की कारणों से भिन्न सत्ता नहीं, जैसे मिट्टीका कार्य घटादि मिट्टी स्वरूप ही है। इसी तरह सकल प्रपञ्च भी कुण्डलिनी स्वरूप है। इसी से कुण्डलिनी देवी सर्वकार्यों से ऊपर विराजमान है। अतः इसको वि- मर्शरूप विद्या भी कहते हैं। क्योंकि योगियों के शरीर में जागृत हुई यह कुण्डलिनी उनके शुद्ध व्यापक आत्माके स्वरूप का भी भली प्रकार ज्ञान करादेती है यह बात सिद्ध योगियों में प्रसिद्ध है ॥१५॥

मू०—मध्यशक्तिप्रबोधेन, अधःशक्तिनिकुञ्चनात्।
ऊर्ध्वशक्तिनिपातेन प्राप्यते परमं पदम् ॥१६॥

सं० टी०- मध्य शक्ति र्नाभिदेशस्थ कुण्डलिनी, तस्याः प्रबोधे नजागरणेन, अधः शक्तिमूलाधारस्थ कुण्डलिनी, तस्या निकुंचनादुत्था- पनात्। ऊर्ध्वशक्तिः-सहस्रारस्थशिवशक्तिः, तस्यां निपातेन संयोजनेन परमंपदं मोक्षपदं प्राप्यते लभ्यत इत्यर्थः। अथवा मध्यशक्तिः ज्ञान- स्वरूपा कुण्डलिनी तस्याः 'प्रबोधेन' जागरणेन अधः शक्तिनिकुञ्चनात् अधः शक्ते विषयाभिमुखबुद्धि शक्ते र्निकुञ्चनात् संकोचना- दूर्ध्व शक्ति निपातनेन ऊर्ध्व शक्तेः अहमेव सर्वम् नान्यन्मत्तः किञ्चि दिति विमर्श शक्तेः निपातनेन सम्बन्धेन परंपदं, मोक्षपदं

प्राप्यते लब्धमेवाविद्यापिधानापनयनेन लभ्यत इत्युपचारः । ॥१६॥

भा० टी०—मणिपूर चक्र में स्थित मध्य शक्ति कुण्डलिनी के जगाने से तथा मूलाधारस्थ नीचे की शक्ति के आकर्षण से और ऊपर की शक्ति का पात करने से परपद की प्राप्ति होती है। तात्पर्य यह है कि गुदा से दो अंगुल ऊपर और लिङ्ग से दो अंगुल नीचे चार अंगुल चौड़ा चतुर्दल आधार पद्म है। उस आधार कमल के बीच कर्णिका में सुशोभित त्रिकोणाकार योनि है इसी को काम पीठ भी कहते हैं। इसी योनिमण्डल के मध्य पश्चिममुख महाशिव लिङ्ग है। उस शिवलिङ्ग को साढ़ेतीन चक्र से लपेटकर नीचे को मुंह किये हुये बिजली की प्रभा के समान चमकती हुई सुषुम्णा के रास्ते को रोके हुए महाकुण्डलिनी देवी बिराजमान है। उसका अपानवायु के निकुञ्चन तथा ध्यान से उत्थान किया जाता है अर्थात् वह सुषुम्णाद्वार को छोड़ देती है। तथा नाभिचक्र में आठवार लपेट खाए हुए मध्य कुण्डलिनी विराजमान है। इसका उत्थान जालन्धर उड्डियान मूलबन्ध और हठयोग की क्रियाओं से किया जाता है और प्राण शक्ति को अपान के साथ मिला देना ऊर्ध्वशक्ति पात कहलाता है, या जगी हुई कुण्ड-लिनी को सहस्रदल में पहुँचा देना ऊर्ध्वशक्तिपात कहा जाता है। अर्थात् प्राण अपान की एकता पूर्वक तीनों बन्धों के अच्छी प्रकार सिद्ध हो जाने से कुण्डलिनी देवी सुषुम्णा में प्रवेशकर ऊपर को जाते समय अपूर्व भावना को प्रकट करती हुई क्रम से ब्रह्म, विष्णु, और रुद्र ग्रन्थियों को भेदन कर सब चक्र कमलों को विकाशकर देती है। और जब वह ग्रीवा से ऊपर सहस्रदल में पहुँचती है तब प्राण इन्द्रियाँ और मन का व्यापार भी रुक जाता है और शून्य समाधि हो जाती है उस जगह काल की भी गति नहीं है उसी परम पद को मोक्ष कहते हैं।

मू०—एकैवसामध्योर्ध्वाधःप्रभेदेनत्रिधाभिन्ना शक्तिरभिधीयते ॥१७॥

सं० टी०—वस्तुत एकैव सा कुण्डलिनी मध्योर्ध्वाधो देशानां

भेदात् । (त्रिधा) त्रिप्रकारा (भिन्ना) पृथक् (अभिधीयते) कथ्यते ॥१७॥

भा० टी०—यद्यपि वह कुण्डलिनी शक्ति एक ही है तथापि स्थान और सूक्ष्म स्थूल भेद से तीन प्रकार की कहलाती है, अर्थात् मूलाधारस्थ कुण्डलिनी सूक्ष्म अबोध रूप और सबका कारण कही जाती है तथा नाभिस्थ मध्यमा कुण्डलिनी बोधरूप कहलाती है फिर वही शक्ति जब ऊपर को गमन करती है तब बोध जनक कल्याण कारिणी ऊर्ध्व सृष्टि कही जाती है इस प्रकार एक ही शक्ति मध्य ऊर्ध्व और अधोभेद से भिन्न २ कही जाती है। ॥१७॥

मू०-बाह्येन्द्रियव्यापारनानाचिन्तामया सैवाधः शक्तिरित्युच्यते । अतएव योगिनस्तस्या आकुञ्चनेरता यस्या आकुञ्चनं मूलाधारबन्धनात्सिद्धंस्यात् ॥१८॥

सं० टी०—काधः शक्तिरिति स्वयमेव व्याख्यायते । बाह्येति या बाह्येन्द्रिय व्यापारकृत सांसारिक विषयचिन्तनपरा सा एवाधः शक्तिरितिकथ्यते (अतएव) सांसारिकत्वादेव योगिनः (तस्याः) अधः शक्तेः (आकुञ्चने) संकोचने (रताः) तत्परा भवेयुरितिक्रियाक्षेपः कस्मादेशाद्वा कुञ्चनं विधेयमित्युपदिश्यते (अस्याइति) (अस्याः) अधः शक्तेः (आकुञ्चनम्) संकोचनं (मूलाधारात) मूलाधारदेशात इति पूर्ववर्णितम् ॥ ततएव (सिद्धम्) सम्पन्न स्यात् भवेत। अयम्भावो हठ प्रक्रिययापानवायोरधोदेशादूर्ध्व आकर्षणं प्राणवायोश्चाधो नियमनं खेचरी जालन्धर महाबन्धादिद्वारा कर्तव्यम् तेन मध्यशक्तेः कुण्डलिन्याः प्रबोधोभवति ततश्च ससारोच्छित्तिः परमानन्द प्राप्तिश्च करतले तिष्ठति ॥१८॥

भा० टी०—अब अधः शक्ति का निरूपण करते हैं। बाहर की इन्द्रियों के व्यापार से जो अनेक चिन्ताएँ होती है उनका कारण अधः शक्ति कही जाती है। अर्थात् जब तक उसके यथार्थ स्वरूप को न जानकर योगाभ्यास द्वारा उत्थान न किया जाय तब तक वह संसार के बन्धनो में फँसाये रहती है और नीचे गिरा देती है। अतः यथानाम

तथा गुण के अनुसार अधः शक्ति इसका नाम सार्थक हुआ और जब योग क्रिया द्वारा उसका उत्थान किया जाता है तब वही चेतन ब्रह्म स्वरूप वाली मोक्ष देने में समर्थ होजाती है। इसलिये सिद्ध योगिजन उस मूलाधारस्थ शक्ति के आकुञ्चन में तत्पर रहते हैं और इसका आकुञ्चन मूलाधार आदि के बन्धन से सिद्ध होता है। ॥१८॥

मू०—यस्माच्चराचरं जगदिदं चिदचिदात्मकं प्रभवति तदेवमूलाधारं संवित्प्रसरं प्रसिद्धम्।

सं० टी० —(यस्माच्चराचरं जगदिदं) निखिल स्थावरजंगमात्मक संसारोऽयम् (चिदचिदात्मकम्) जड चेतनरूपं यस्माच् शक्ति तत्वात् (भवति) उत्पद्यते तदेव शक्तितत्वं (मूलाधार संवित् प्रसरम्) ज्ञान प्रसारभूमिः (प्रसिद्धम्) सिद्धेषु शास्त्रेषु च ॥१९॥

भा० टी०—अब पूर्वोक्त मूलाधार पद के अर्थ का निरूपण करते हैं। जिससे पहले पहल भूत भौतिक स्थावर जंगम, जड़, चेतन रूप समस्त जगत का प्रादुर्भाव होता है वही परम कारण मूलाधार नाम से कहा जाता है। यह वर्णन व्यष्टि समष्टि के अभेद को लेकर किया है। मूलाधार कामपीठ के ध्यान और उसी के प्रसरण तथा संकोच पूर्वक कुण्डलिनी उत्थान से ज्ञानकी वृद्धि होती है और त्रिकाल दर्शी बन जाता है। तथा जगत की रचना, स्थिति और संहार की सामर्थ्य होती है। यह बात योगशास्त्र में सर्वत्र प्रसिद्ध है ॥१९॥

मू०—सर्वशक्तिप्रसरसंकोचाभ्यां जगत्सृष्टिः संहृतिश्चभवत्येवनसन्देहस्तस्मात्सामूलमित्युच्यते। अतः प्रायेण सर्वेसिद्धा मूलाधाररताभवन्ति ॥२०॥

सं० टी०—(सर्वशक्त्यां) समष्टिरूपायां (मूलशक्तौ) शक्ति संकोचाभ्याम् शक्तिपदेनोपचारात् तदीय व्यापाररूपविकाश उच्यते तथा च विकाश संकोचाभ्यामुन्मेषनिमेषाभ्यामिति यावत् (जगत्सृष्टिः) जगतः संसारस्य सृष्टिरुत्पत्तिः (संहृतिः) प्रलयश्च भवत्येव न सन्देहः कर्तव्यः। तस्मात् सर्वोपादानक्षमत्वात सा शक्ति

मूलमित्युच्यते श्रुति स्मृतिषु (अत:) मूलाधारत्वादेव (सर्वसिद्धा:) सकलयोगिन: (मूलाधाररता:) मूलाधारस्थशक्तिप्रबोधनेतत्परा भवन्ति ॥२०॥

भा० टी०—जिस मूलशक्ति के बल से ईश्वर जगत् की रचना आदि का कर्ता है वही शक्ति योगियों के मूलाधार में है। उस मूलाधार शक्ति के ध्यानादि से जब वह योगी सर्व समर्थ हो जाता है तब उसी मूलाधार शक्ति के विकाश और संकोच से जगत की उत्पत्ति संहारादि कर सकता है। इसमें सन्देह नहीं। अत: जो सब कार्यों के उत्पादन में समर्थ है उसी को मूल शक्ति कहते हैं। इसी से प्राय: सब सिद्ध मूलाधार शक्ति के ध्यान में तत्पर रहते हैं ॥२०॥

मू०—तरंगित स्वभावं जीवात्मानंवृथाभ्रमन्तमपि स्वप्रकाशमध्येस्वस्वरूपतयासदाधारयितुं समर्था यासाकुण्डलिनीमध्याशक्तिर्गीयतेस्थूलसूक्ष्मरूपेणमहा सिद्धानां प्रतीयत इति निश्चयः ॥२१॥

सं० टी०—(तरंगित स्वभावम्) समुद्रतरंगवत् स्वरूप माचार क्विबन्त तरंगधातोःक्त प्रत्ययेतरंगितशब्द स्ततो वहुब्रीहि: (वृथाभ्रमन्तम्) अविद्यावशान्मोमुह्यमानतया शाश्वतिक मोक्षो पायमपास्य नश्वर सांसारिक विषय लिप्सया तत्पथेषु पर्यटन्तम्, अपि शब्दाद्व्याप्रियमाणं जीवात्मानं (स्वप्रकाशमध्ये) स्वकीयवितत प्रकाशाभ्यन्तरे (स्वस्वरूपतया) स्वीयसत्तया सदाधारयितुं याशक्ति: समर्था सा शक्ति:कुण्डलिनीगीयते। अयम्भाव:। यथा समुद्रो व्यापक स्तस्यतरंगास्तदुपरि संचरन्ति तेषामाधार: समुद्रस्यतत्तद्देशस्तथा समुद्रस्था नीया निजाशक्ति र्व्यापिकैका तस्या स्तरंग स्थानीया विकारभूता जीवशक्तय स्तासामाधारभूत निजाशक्ते स्तत्तदेक देशीया: शक्तय: सैव परमात्मजीवापेक्षया मध्याशक्ति: सैव च कुण्डलिनीपदेन प्रख्यायते सापि महासिद्धानां दृष्ट्या मणिपूरे स्थूल रूपा मूलाधारे सूक्ष्मरूपा च प्रतीयत इति निश्चयो योगिनाम् ॥२१॥

भा० टी०—अब मध्य शक्ति कुण्डलिनी के कार्य का वर्णन करते हैं—वह कुण्डलिनी चिद्रूप होने से जीव का असली स्वरूप है। अतः चंचल स्वरूप तथा व्यर्थ ही विषयरूप मृगतृष्णा में भ्रमण करने वाले जीवात्मा को भी निज शुद्ध व्यापक आत्म प्रकाश में सदा स्थापित करने में जो शक्ति समर्थ है वही मध्य कुण्डलिनी नाम से कही जाती है। तात्पर्य यह है कि जब तक मध्य कुण्डलिनी का उत्थान न किया जाय तबतक कर्म पाश में बंधा हुआ यह जीवात्मा जन्म मरण रूप दुःख परम्परा का अनुभव करता है और वही जीवात्मा जब पूर्वजन्म में किये हुये पुण्यकर्म के प्रभाव से ईश्वर की कृपा का पात्र हो सिद्ध गुरु की दया से मध्य कुण्डलिनी को विधि पूर्वक जानकर जगा देता है तब उसका योग सिद्ध होजाता है उस समय वह शक्ति ही उसको सहजानन्द आत्मस्वरूप में भली प्रकार से प्रविष्ठित करदेती है। अतः जगाई हुई मध्य कुण्डलिनी अत्यन्त कल्याण स्वरूप है। वह कुण्डलिनी स्थूल और सूक्ष्म भेद से दो प्रकार की है। इस दो प्रकार की कुण्डलिनी को महा सिद्ध ही भली भाँति जानते हैं। इसमें कोई सन्देह नहीं ॥२१॥

मू०—स्थूलेति निखिलग्राह्याधारविग्राह्यस्वरूपापि पदार्थान्तरे भ्राम्यमाणा चिद्रूपायावर्तते सा कुण्डलिनी साकारास्थूलापुनस्त्वियमेव स्वप्रसारचातुर्य्यतयावर्तमाना योगिनां परमानन्दतया कुण्डलिनी या निश्चय भूता वर्तते सा सूक्ष्मानिराकारा प्रबुद्धा महासिद्धानां मते प्रसिद्धा ॥२२॥

सं० टी०—स्थूल निरूपणमन्तरा सूक्ष्मनिरूपणं न सम्यग् बुद्धिमधिरोहतीत्यतः प्रथमं स्थूला निरूप्यतेस्वतस्तु सा कुण्डलिनी चिद्रूपा वर्तते (यदाऽर्थान्तरे) यस्मिन्काले रूपादि विषये (भ्राम्यमाणा) संचारिणी भवतीति शेषः। तदेत्याक्षेपः (निखिलग्राह्याणाम्) रूपादि विषयाणाम् (आधारः) उपरक्तासती (ग्राह्यस्वरूपापि) रूपाद्या

कारापि भवति । प्रत्येकं मूलाधारे स्थिता सार्ध त्रिवलयान्विता नाडी रूपा सा स्थूला कुण्डलिनी । इदमत्र बोध्यं यदियमपि साधारणलोक दृष्ट्या सूक्ष्मैव सर्वेषाम गोचरत्वात् किन्तु योगिदृष्ट्या केवल चिद्रूपा पेक्षयास्थूला कथ्यत इति । पुनस्तु पूर्वमपि चिद्रूपैवासीत्-साम्प्रतम् विषय सम्बन्धेन विषय स्वरूपापि पुनः (इयमेव) येव विषयस्वरूपा सैवेयं विषय सम्बन्धं विहाय (स्वप्रसारचातुर्य्यतया) स्वस्वरूपमात्र माश्रितया (वर्तमाना निर्णीता विद्यमाना (योगिनां परानन्द तया) परमानन्द रूपेण (निश्चय भूता) निर्णीता या कुण्डलिनी सा (सूक्ष्मा निकारा, आकार रहिताऽतो न स्थूला (प्रवुद्धा) जागरिता (महासिद्धा नां मते प्रसिद्धा, महासिद्धै र्ज्ञायते नतु साधारण सज्जनै रितिभावः २२

भा० टी०–ऊपर स्थूल सूक्ष्म नाममात्रसे बताई हुई दो प्रकार की कुण्डलिनियों में से पहले स्थूल कुण्डलिनी के स्वरूप को दिखाते हैं। यद्यपि मूलाधारस्थ कुण्डलिनी अति सूक्ष्म है तथापि शब्दात्मक स्थूल जगत को तथा पञ्चभूतात्मक अर्थ सृष्टि को उत्पन्न करने से वह भी स्थूल कहलाती है। अतः कार्य रूप से वह सकल प्राणियों के इन्द्रिय गोचर हुई एवं सब भूत भौतिक वस्तुओं का अधिष्ठान भूत आधार भी वही है। क्योंकि कारण के बिना कार्य की स्थिति रहना सर्वथा असम्भव है। जैसे मिट्टी के बिना घट कार्य नहीं रह सकता। इसीलिये वह कुण्डलिनी सब कार्यों में अनुगत रूप से विद्यमान है। वास्तव में वह चेतन स्वरूप वाणी से अगोचर और सर्वदेवों से वन्दनीय कामपीठ है तो भी जगत की रचना में निरन्वर उद्यत रहती है। इसी से स्थूल जगत की सृष्टि रूप वह कुण्डलिनी साकार स्थूल कहलाती है फिर निज विस्तार कौशल से नाभि स्थान में वर्तमान वही चिद्रूपा कुण्डलिनी पूर्वोक्त विषय सम्बन्ध को छोड़कर अपने चैतन्य स्वरूप से जब सब जगह व्यापक भाव से विद्यमान होती है तब वही प्रवुद्ध कुण्डलिनी योगियों को परम आनन्द दायक व्यापक अखण्ड अपने आत्मा का निश्चय कराती है। अतः वह प्रवुद्ध होने से निराकार व्यापक सूक्ष्म रूप से सर्वत्र रहती है। यह योग निपुण महासिद्धों में प्रसिद्ध है ॥२२॥

मू०—सृष्टिः कुण्डलिनी ख्याता द्विधा भागवती तु सा। एकधा स्थूलरूपा च लोकानां प्रत्यगात्मिका। अपरा सर्वगा सूक्ष्मा व्याप्ति व्यापक वर्जिता। तस्या भेदं न जानाति मोहिता प्रत्ययेन तु २३

सं० टी०—(सृष्टिः) सृज्यते ऽनयेति करण साधनम् तथा च संसार कारिणी शक्तिः। (कुण्डलिनी ख्याता) तन्नाम्नी प्रसिद्धा सर्वत्र सा (द्विधाभागवती) द्विप्रकारा तत्र या (लोकानां प्रत्यगात्मिका) प्रत्येकं प्राणिषु मूलाधारे सार्धत्रिवलय रूपेण विद्यमाना सा स्थूलरूपा व्यवह्रियते। या तु (अपरा) अन्या (सर्वगा) सर्वगामिनी समष्टिरूपा सा सूक्ष्मा वस्तुत स्तस्या अतीन्द्रियत्वेन व्याप्ति व्यापकभावाद्यनिश्चयेन (व्याप्ति व्यापक वर्जिता) तद्रहितातदेवाह (तस्याः) सूक्ष्मायाः(भेदं) स्थिति विशेष को ऽपि न जानाति। अज्ञाने, हेतुमाह (प्रत्ययेन) लौकिक विषयविज्ञानेन (मोहिता) आच्छादिता सो शक्तिः ॥२३॥

भा० टी०—समस्त प्राणियों के मूलाधार में स्थित कुण्डलिनी सबका जीवन निर्वाह करती है। इसी से वह प्रत्येक आत्मा में व्यापक और अति सूक्ष्म है। वही परमेश्वर सम्बन्धी कुण्डलिनी दो प्रकार की कही जाती है। एक स्थूल रूप कहलाती है क्योंकि वह स्थूल जगत् को रचती है अतः स्थूल सृष्टि को रचने से वह सृष्टिकुण्डलिनी नाम से भी प्रसिद्ध है। दूसरी नाभिचक्र में प्रवुद्ध की हुई जब ऊर्ध्वगति वाली होती है तब वही उपाधि सम्बन्ध को छोड़कर अवयव रहित अखण्ड स्वरूप में प्रतिष्ठित होती हुई सर्वत्र व्यापक कहलाती है। वास्तव में तो उस समय वह व्याप्य व्यापक भाव से रहित मन वाणी का भी विषय नहीं होती किन्तु आत्म विमुख विषय लम्पट दुर्बुद्धि पुरुष विपरीत और मिथ्याध्यास से स्त्री पुत्रादि में आसक्त हुये उस कुण्डलिनी के यथार्थ रूप को नहीं जानते। इसी से वे जन्म मरण रूप दुःख परम्परा का अनुभव करते हैं। जो योगी इसके यथार्थ रूप को जानकर नाभिचक्र में प्रवुद्ध कर योगाभ्यास द्वारा ऊपर को संचा-

रित करते हैं। उनके लिये वह मोक्ष का द्वार खोल देती है ॥२३॥

मू०--तस्मात् सूक्ष्मापरा संवित् स्वरूपा मध्या शक्तिः कुण्डलिनी योगिभिर्देहसिद्ध्यर्थं सद्गुरु मुखाज् ज्ञात्वा स्वस्वरूपदशायांप्रबोधनीया ॥२४॥

भा० ०टी--(तस्मात्) पूर्वोक्त कारणात् (संवित स्वरूपा) चिन्मात्र रूपिणी (सूक्ष्मा) विषय रहिता (मध्या शक्तिः) विषय संवलिताथा मूलाधार मणिपूरस्था कुण्डलिनी योगिभिः (स्वस्वरूप दशायां) स्वकीय रूपावस्थायाम् (प्रबोधनीया) उत्थापनीया स्वस्वरूप ज्ञानमन्तरातदुपस्थापनमशक्यमत आह (सद्गुरु मुखात्) शास्त्रज्ञोऽनुष्ठान प्रकारज्ञो ऽनुष्ठान निरतश्च सद्गुरु स्तस्य मुखात् तस्य सदुपदेशतो ज्ञात्वा। ननुतत्प्रबोधनेन किं फल मित्याह देह सिद्ध्यर्थम् प्रबोधे सति मृत्युभयं विहृत्य त्रैलोक्ये यथा कामरूपेण विहरति ततो देहसिद्धिः प्रयोजनम् ॥२४॥

भा० टी०—पूर्वोक्त प्रकार से जगाई हुई सूक्ष्मा शक्ति ही ज्ञान स्वरूप व्यापक कहलाती है और अप्रवुद्ध दशा में परिच्छिन्न नाभि प्रदेश में स्थित होने से वही मध्य कुण्डलिनो शक्ति कही जाती है। काल के ऊपर विजय पाने और मोक्ष के लिये देह सिद्धि के निमित्त गुरुमुख द्वारा जानकर अखण्ड आत्म स्वरूप को अभिव्यक्ति के लिये उस मध्य कुण्डलिनी शक्ति का जगाना योगियों को जरूरी है। क्योंकि उस कुण्डलिनी के न जागने से मोक्ष की प्राप्ति नहीं होती। अत एव "ऊर्ध्वशक्ति निपात" का उपदेश किया जाता है ॥२४॥

मू०-अथ ऊर्ध्व शक्ति निपातः कथ्यते सर्वेषां तत्त्वानामुपरिवर्तमानत्वान्निर्नामिपरमंपद मेवमूर्द्ध्वं प्रसिद्धनतस्याःस्व संवेदननानासाक्षात्कार सूचनशीलाया सोर्ध्वशक्तिरभिधीयते। तस्यानिपात नमिति स्वस्वरूपद्विधाभासनिरासः किन्तु स्वस्वरूपा

खण्डत्वेन भवति । ॥२५॥

सं० टी०—(अथ) शक्ति कथनादनन्तरम् । मूलश्लोक ऊर्ध्व शक्ति निपातः कथ्यते मूलश्लोकस्थतत्पदीय तात्पर्य्यं वर्ण्यते। तत्रोर्ध्वत्वं कथमिति संघटयति (सर्वेषाम्) प्रकृत्यादीनाम्- पदार्थानाम् (उपरिवर्तमानत्वात्) कारणतया कार्य्यतः प्रागपि विद्यमानत्वात् (निर्नाम) नामरहितं (परंपदम्) आदिनाथः (एवमूर्ध्व प्रसिद्धम्, ऊर्ध्वपदेन शास्त्रे लोके च व्यह्रियते (तस्य या स्व संवेदन नानासाक्षात्कार शीला) स्व प्रकाशासती निखिल विषयक प्रत्यक्षकारणस्वभावा (अयमाशयः) अन्यस्य स्वरूपस्य च साक्षात् कारिणी चिद्रूपा कूटस्थ चिद्ब्रह्माश्रिता सैवोर्ध्व शक्ति रभिधीयते) ऊर्ध्व शक्तिपदार्थं प्रदर्श्य तस्य निपातन पदार्थो व्याख्यायते । (स्वस्वरूपद्विधाभास निरासः) स्वस्यस्वरूपस्य द्विधाभासो भेद बुद्धिः (अहं त्वत्तोभिन्नो मत्तस्त्वं भिन्नो वेत्याकारिका । तस्य निरासः परित्यागः किन्तु (स्वस्व रूपा) स्वरूपमात्र साक्षिणी (अखण्डत्वेन भवति) एतावानिति परिच्छेद्बोधः खण्ड स्तद्रहितत्वेन रूपेणभवति । अयमाशयः स्वरूपभान भवति किन्तु । अहं त्व मयञ्चेति पुरुषत्रयस्यभानं नास्तीत्ये तादृश बोध सम्पादनमेव निर्नाम पदार्थः: ॥२५॥

भा० टी०—सब पदार्थों से ऊपर वर्तमान और नाम रूपादि सामान्य और विशेष धर्म से रहित अद्वैत रूप परंपद ही ऊर्ध्व संकेत से प्रसिद्ध है । उस पर ब्रह्म के अखण्ड स्वरूप का तथा स्व स्वरूप का नाना प्रकार से अद्भुत चैतन्य के साक्षात्कार कराने में जो शक्ति तत्पर होती है वह भी ऊर्ध्व शक्ति कहलाती है उस शक्ति के निपातन (ऊर्ध्वनिपात) का अभिप्राय यह है कि अज्ञान अवस्था से युक्तजीव अपनेको भिन्न मान रहाहै कि मैं भिन्न सुख दुःखादिका भोक्ता हूँ और कर्म फल के देने वाला सर्वेश्वर मेरे से अलग है । इस प्रकार द्वैतरूप से आत्म-भेदकी प्रतीति होना ही बन्धन का मुख्य कारण । है प्रबुद्ध और व्यापक कुण्डलिनी उस भेदरूप आभासमात्र को भी निराकरण कर अपने से अभिन्न जीवात्म और परमात्मा के व्यापक स्वरूप

का ज्ञान करती हुई आत्मा को भली प्रकार से स्व स्वरूप में अवस्थित कर देती है। अतः उस कुण्डलिनी की कृपा से अखण्ड अपने स्वरूप में व्यापक हो जाता है यही ऊर्ध्व शक्ति निपात का अर्थ है ॥२५॥

मू०--शिवस्याभ्यन्तरे शक्तिः शक्तेराभ्यन्तरः शिवः। अन्तरंनैवजानीयाच्चन्द्रचन्द्रिकयोरिव ॥२६॥

सं० टी०--शिवो व्यापक स्तदीयाशक्तिरपि व्यापिकैव तथाच शिवस्य मध्येशक्तिः शक्तेर्वामध्ये शिव इत्युभय व्यवहारः समुचित एव। किञ्चोभयोर्भेदाभावे ऽप्युभय व्यवहारो भवतीति स दृष्टान्त माहोत्तरार्द्धेन यथा पिण्डीभूतस्यचन्द्रस्य विरलावस्थ चन्द्रिकया सह वस्तुतो भेदाभावेऽपि विरलत्व पिण्डत्वोपाधि प्रयुक्तभेदमादायो भय व्यवहार स्तथैवात्रापि संकोच विकाशशालीत्व कूटस्थत्वोपाधिवशाद् वस्तुतो भेदाभावेऽपि भेदमादाय शिव शक्ति व्यवहारः। दृष्टान्तस्य परिच्छिन्नत्वेन वास्तविकमपि विरलत्वं पिण्डत्वञ्च दार्ष्टान्तिके तू भयो र्व्यापकत्वादुपाधी अप्यनिर्वचनीयाविति सूचयितु माह (अन्तरं नैव जानीयात्) नैव भेदं ज्ञातुं शक्नुयादिति प्रकाशत्वेन भेदाभावेऽपि भेदव्यवहारस्योभयत्र साम्यमादाय दृष्टान्त दार्ष्टान्तिक भावोज्ञेयः ॥२६॥

भा० टी०--कूटस्थ, असङ्गशिव व्यापक रूप से सर्वत्र विद्यमान है। एवं उस असङ्गशिव की सम्पूर्ण विश्व को धारण करने वाली चिद्रूप शक्ति भी व्यापक है। शिव शक्ति में है या शक्ति शिव में है। इसका उत्तर यह है कि जब शिव और शक्ति दोनों ही चिद्रूप और व्यापक हैं तब यही भाव निकलता है कि पर शिव में शक्ति और शक्ति में शिव नित्य सम्बन्ध होकर रहते हैं। जैसे चन्द्रमा की चाँदनी चन्द्रमा से भिन्न नहीं। केवल प्रकाश के पिण्ड समुदाय का नाम चन्द्रमा है और विरल प्रकाश का नाम चाँदनी है। परन्तु पिण्डत्व और विरलत्व धर्म को छोड़कर प्रकाश में कोई अन्तर नहीं है।

इसी प्रकार चिद्रूप शिव और शक्ति में भी भेद नहीं है। केवल कूटस्थ असङ्ग चेतन का नाम शिव है और संकोच विकाश शालिनी चित् का नाम शक्ति है। अतः कूटस्थ पन और संकोच विकाशशाली धर्म को लेकर शिव और शक्ति का व्यावहारिक भेद भले ही रहे परन्तु परमार्थ विचार से शिव शक्ति में कोई भेद नहीं। क्योंकि दोनों चित् और व्यापक होने से नित्य सम्बद्ध हैं ॥२६॥

मू०—अतऊर्ध्वशक्तिनिपातेनयोगिभिःपरमंपदंप्राप्य न इति सिद्धम् ॥२७॥

सं० टी०—(अतः) उभयोरभेदादेव (ऊर्ध्वशक्तिनिपातेन) कुण्डलिन्याः प्रबोधोत्थानद्वारा सहस्रारस्थ परमात्मशक्त्या सहैक्ये सति (योगिभिः) योगाभ्यास शालिभिः। न तु शाब्दिक ज्ञानमात्रेणा त्मानं कृतकृत्यमन्वानै रलसधौरेयैः। परंपदं प्राप्यते मुक्तोभवति, (इति सिद्धम्)। नात्र सन्देहो-विधेय-इति ॥२७॥

भा० टी०—शिव और शक्ति का अभेद होने से ही ऊर्ध्व-शक्ति निपात द्वारा योगाभ्यास की मुद्राओं के अच्छी तरह साधन से कुण्डलिनी के उत्थान पूर्वक महा सिद्ध योगियों को परपद की प्राप्ति होती है॥२७॥

मू०—सत्त्वे सत्त्वे सकल रचना राजते संविदेका।
तत्त्वे तत्त्वे परममहिमा संविदेवावभाति ॥
भावे भावे बहुलतरला लम्पटा संविदेषा।
भासे भासे भजन चतुरा बृंहिता संविदेव ॥२८॥

सं० टी०—चिद्रूपस्य व्यापकत्वप्रदर्शनाय सर्वत्र सद्भावः प्रदर्श्यते श्लोकेनानेन (सत्त्वे सत्त्वे) सकल द्रव्येषु (सकल रचना) समस्तावयव संश्लेष कारिणी (एका संवित्) चिदेव (राजते) शोभते चित्सद्भावमन्तरा द्रव्यावयव संघातस्यासम्भवो भवेदतश्चेतन प्रयुक्तावयव समुदायात्मक द्रव्यस्थितिः। एवं (तत्त्वे तत्त्वे) प्रकृत्यादि निखिल पदार्थेषु

[परम महिमा] महत्त्व विशिष्टा सत्ता (संविदेव) चिदेव (अवभाति)- प्रकाशते चैतन्याधीनैवजड़सत्तेतिभावः (भावे भावे) सकल भावभूत भौतिक पदार्थेषु (बहुल तरला) अति चञ्चला भौतिकपरिणामादिक्रियां चित्मारोप्याधिष्ठानंविनारोपासम्भवात्क्रियापिचेतनाधीनैवेतिभावोऽ- तएव (लम्पटा) अन्यत्रस्थिता (एषा) स्वप्रकाशा (संवित्) भातीतिशेषः किञ्च (भासे भासे) सकल मानसिक व्यापारेषु (बृंहिता) मनोवृत्यनु रक्ता ऽतएव (भजन चतुरा) उपाधि भूतविषय सेवापरा (संविदेव) चिदेव। अतः सर्वाधारो, व्यापिकाचिदेवेतिफलितम् ॥२८॥

भा० टी०—जो शुद्ध चेतन योगियों को प्राप्त करने योग्य है और जिस आदिनाथ स्वरूप परब्रह्म को प्राप्त होकर इस संसार में जन्म मरण रूप दुःख का स्वप्न भी नहीं देखता वह ज्ञानरूप ब्रह्म सब जगह व्यापक है। इसी अभिप्राय को श्री योगाचार्य उपरोक्त पद्य से वर्णन करते हैं। समस्त पृथ्वी आदि भूत भौतिक द्रव्यों के अवयवों की रचना करने वाली आदिनाथ से मिली हुई शक्ति ही सर्वत्र विद्यमान है। क्योंकि चेतन के विना जड़ वस्तु की स्थिति सर्वथा असम्भव है। इससे सिद्ध हुआ कि चेतन ही सबका आधार है। तथा प्रकृति मायादि तत्वों में पर महिमा सहित शक्ति सर्वत्र प्रकाशमान हो रही है। एवं भावरूप स्थिर वस्तुओं में सूर्य प्रभा की तरह व्यापक और सकल कार्यों में अनुगत रूप से यह संवित् शक्ति ही भासमान है और सकल प्राणियों की बुद्धिवृत्ति में निश्चय रूप से बढ़ी हुई भी यह संवित् शक्ति ही है। इसी से वे प्राणी अपने अपने कार्य में तत्पर रहते हैं। या ज्ञान, ध्यानादि में स्थिति कराने वाली भी यही शक्ति है। अतः सर्वत्र व्यापक सर्वाधार महासिद्ध योगियों के ध्यान से ही गम्य चेतन ब्रह्म नाना आकार से प्रकाशमान हो रहा है ॥२८॥

मू०--किमुक्तम्भवतिपरापरविमर्शरूपिणीसंवि- न्नानाशक्तिरूपेणनिखिलपिण्डाधारत्वेनवर्तते

इति सिद्धान्तः॥२६॥

इति महेश्वरावतार श्री गोरक्षनाथ कृतौ सिद्धसिद्धान्तपद्धतौ पिण्डाधारनामा चतुर्थोपदेशः

सं० टी०—अनेन श्लोकेन (किमुक्तं भवति) कः सारोऽस्येति प्रश्नः। उत्तरयति (परापरविमर्शरूपिणी) समष्टि व्यष्टि भूतानुभवरूपा (सवित) चित (नाना शक्तिरूपेण (निखिल पिण्डाधारत्वेन) सर्वेषामाश्रयत्वया (वर्तते) विद्यव इति सिद्धान्तो निर्विवादः॥२६॥

इति सिद्धसिद्धान्तपद्धतौ सर्वतन्त्र कोविद श्री पं० द्रव्येश झा कृत गूढार्थ दीपिकायां चतुर्थोपदेशः

भा० टी०—इस उपदेश के आद्योपान्त विचार करने से यही भाव निकलता है कि व्यष्टि, समष्टि, भूत भौतिक, छोटी, बड़ी वस्तुओं का अनुभव रूप चेतन ब्रह्म ही निजा, परा, सूक्ष्मा आदि नाना शक्ति रूपों के द्वारा सकल पिण्डों का आधार है॥२६॥

श्रीगोरक्षनाथकृतौसिद्धसिद्धान्तपद्धतौ श्री१०८ योगीन्द्रवोहराधिपतिश्रीपूर्णनाथशिष्येण योगिश्रीपंडित भीष्मनाथेनवेदान्ताचार्य्येण विरचितायांसारदीपिकाख्य हिन्दीटीकायां पिण्डाधारनामा चतुर्थोपदेशोऽयरंसीत्।



अथ पिण्डपदयोः समरस करणं कथ्यते

मू०--महासिद्ध योगिभिः पूर्वोक्तक्रमेणपर पिण्डादिस्वपिण्डान्तंज्ञात्वापरमपदेसमरसं कुर्यात् ॥१॥

स० टी०--पिण्डोऽव्यष्टि रूपः पदं समष्टि रूपंचतयोः समरस करणं समरसत्वमैक्यमितिभावः । अयमभिसन्धिः । यत्तु व्यापकं तत् समष्टि रूपं कथ्यते । यच्च व्याप्यं तत् व्यष्टि रूप मभिधीयते । अस्यां दशायां न समरसतोभयोर्भिन्नपदव्यवहार्य्यत्वात् । यदातु योगेन पिण्डमिमम् व्यापकरूपं व्याप्यरूपं च विधातुं प्रभुर्भवति तदासमरसत्वमायाति । उभयपद व्यवहार्यत्वेनैक्यात् । स्थूलवपुषोऽयं धर्मोयद् भौतिक स्थूल कुण्ड्यादिनाऽस्यगतिप्रतिबन्धः क्रियते । अतएव सर्वतः प्रतिरुद्धभवनमध्येस्थितमिदंशरीरंन शक्नोति बहिर्निःसारयितुम् । लिङ्गशरीरस्य च धर्मः केनापि स्थूलभौतिकेन न गतिः प्रति हन्यते । अतएव शिलान्तर्गच्छति न वह्न्यादिना दह्यत इत्यादि परन्तु योगाभ्यासाद् यस्य योगिनः कायसिद्धिर्जाता तस्य सर्वतः प्रतिरोधेऽपि स्थूलविग्रहेण सहैव बहिर्निः सरति सः । तेन सिद्धस्य स्थूलसूक्ष्मोभयशरीरस्य समरसोजातो न केवल स्थूलस्य न च केवल सूक्ष्मस्य धर्मोऽपितूभयो धर्मसमावेशादुभयमपि युगपदेव व्यवहर्तुं शक्यम् । तथैव ब्रह्माण्डेनसह पिण्डस्यापि समरसोभवतीति साम्प्रतम् (महासिद्धयोगिभिः) स्वयमनुभवशालिभिर्न तु केवल तर्क कर्कशमानसैस्तार्किकवरैः (पूर्वोक्त क्रमेण) गतोपदेश प्रदर्शित सरण्या (परपिण्डादि स्वपिण्डान्तं ज्ञात्वा) परपिण्डाङ्गानि सूर्य्यादीनि स्वपिण्डे चक्षुरादिषु स्थानेषु स्थितिं विदित्वोभयोरभेददार्ढ्येन (परमपदे) परमात्मनि (समरसं) ऐक्यं (कुर्य्यात्) कर्तव्यम् ॥१॥

भा० टी०--अब व्यष्टि समष्टि के अभेद रूप समरस करणता का निरूपण करते हैं। पूर्वोक्त उपदेशों में वर्णित पद्धति

के द्वारा ब्रह्माण्ड और अस्मदादि शरीर से लेकर परिमित अपने देह पर्यन्त के स्वरूप को भली प्रकार जानकर अखण्ड चेतन शिव शक्ति रूप परमपद में समरस अर्थात एकता करे। जैसे अपने इस देह में स्थित नेत्र हैं वैसी ही अधिदेव में विराट् समष्टि का सूर्य चक्षु है वहां सूर्य व्यष्टि शरीराभिमानी जीव के नेत्र का अधिष्ठाता देवता है। इसी से सूर्य की भी नेत्र में स्थिति है। अतः व्यष्टि गत नेत्र और सूर्य की एकता मानकर ध्यान करें। उसध्यान से नेत्रों में सूर्य जैसी सामर्थ्य आ जाती है। इस प्रकार प्रत्येक प्राण और इन्द्रिय आदिकों के समष्टि सूत्रात्मा तथा अधिदेवों की एकता करता हुआ अन्त में परमपद व्यापक असङ्ग शिव में अभेद करे। ऐसा करने से वह भी व्यापक और असङ्ग शिव हो जाता है ॥१॥

मू० परमपदमिति स्वसंवेद्यमत्यन्तभासा भासकमयम् ॥२॥

सं० टी०—परमपदस्य संक्षेपेण वास्तविक रूपमाह (स्वसंवेद्यम्) स्वानुभवेनैवबुद्ध्यते नत्वन्य सूर्यादि प्रकाशेन प्रकाश्यते। (अत्यन्त भासा) वितत स्वकीय प्रकाशेन (भासकमयम्) प्राचुर्य्येण भासकम्। प्राचुर्य्येमयडत्र। तेन सूच्यते भासकता स्वाभाविको धर्मः सदैवतिष्ठति किन्तूपाधि शरीरादिमध्यपातित्वेन भास्यताऽपिकदाचित्सम्भवतेऽहमस्मि त्यनुभवविषयत्वात्! इदमेवान्यत्रानुमतम् श्रु० मी न तावदयमेकान्तेना विषय इति। स्वयन्तुसर्वेषांप्रकाशकमितरेणाप्रकाश्यमिति फलितम् ॥२

भा० टी०—अब परम पद के अर्थ को स्वयं श्री गोरक्षनाथ जी कहते हैं। अपनी महिमा में प्रतिष्टित और केवल योग समाधि द्वारा आत्मा के अनुभव से ही जानने योग्य तथा स्वतः सिद्ध स्व चेतन प्रकाशसे जो नित्य प्रकाशित है उसी को परमपद कहते हैं। इसी से वह परमपद जड़ प्रकाश रूप सूर्य चन्द्र अग्नि और बिजली आदि का भी प्रकाशक कहा जाता है क्योंकि चेतन प्रकाश की ही सत्ता को लेकर जड़ प्रकाश भी देदीप्यमान हो रहा है। यही परम पद का अर्थ है ॥२॥

मार्गा दृश्यन्ते तेषु कः श्रेयान् इति जिज्ञासामुपशमयति सन्मार्गो योगमार्गः, चेतसो निखिल वृत्ति निरोधो मुख्योयोगः, तत्साधनमैका प्र्यमपि योगः, युज्यते निरुध्यते ऽनेन इति व्युत्परोः, तस्य मार्गाः उपाया यमनियमादय उपासना भक्ति श्रद्धादयः श्रौत स्मार्त कर्माणि च साक्षात्परम्परया वा यथाधिकारं ग्राह्याः । तदितरः, चित्तविक्षेप कारकः पाषण्डमार्गः, वञ्चक इति यावत् नत्रैव आदिनाथोक्त प्रमाणयति-तंत्रेषु तन्त्र श्रुति स्मृत्यादि शास्त्राणि तत्प्रति पाद्येषु (योगमार्गेषु) पूर्वोक्त योगसाधनेषु दीक्षितानां दीक्ष्यमानां कर्मोपासना दितत्पराणाम् ये दूषका निन्दकाःक्वचिद् दीक्षितांश्च दूषका इति पाठः, तस्यापि भावार्थ स्त्वयमेव किन्तु तस्मिन् पाठे दूषका इत्यत्र तुमुन्ण्वुलौ क्रियायामिति सूत्रे ण्वुलि रूपम्-तथा च भाविष्यत्. कालस्य भात्रेन अकेनोर्भविष्यदाधमर्ण्ययोरित्यनेन"कर्तृ कर्मणोरित्यस्य निषेधे' तदिति साधु । तान् दीक्षितान् ये दूषका दूषयन्ति ते पाषण्डिनोभविष्यन्ति इति व्याख्यार्थः, तेहि निन्दकाः पाषण्डिनः सद्मार्ग भ्रष्टा व्यर्थजीवनयापिनः, वञ्चकाः प्रोक्ताः शिष्टैः स्वीकृताः । एवम् तै निन्दिकैः सहवासिनः सहचारिणोऽपि पाषण्डिन एव तस्मात् निन्दक पुरुषैः सह वार्त्तादिकं किमपि न विधेयमिति ॥५॥

भा० टी०—इस परमपद की प्राप्ति के उपदेश में अच्छी तरह से सन्मार्ग को जानने वाला हो गुरु होना चाहिये यहां सन्मार्ग से योग मार्ग का ही ग्रहण होता है। क्यों कि योग समाधि से ही वास्तविक आत्मा के अखण्ड व्यापक और स्वसंवेद्य स्वरूप का भान होता है। योग मार्ग से अन्य मार्गों में आत्मा के असली स्वरूप का साक्षात्कार नहीं होता। अतः आत्मा के अनुभव से वंचित करने वाले सब पाखण्ड मार्ग हैं। इसी को आदिनाथ शिव जी ने कहा है कि योग और उस के उपायभूत मार्ग नियम आदि श्रद्धा ईश्वर भक्ति तथा निष्काम कर्मादि के स्वरूप का बोध कराने वाले तन्त्रो में निपुण जो पुरुष हैं उन की निन्दा करने वाले अविवेकी जन और उन के सहवासी पाखण्डी कहलाते हैं ॥५॥

मू०—यस्मिन्दर्शिते सति तत्क्षणात् स्व संवेद्य साक्षात्कारः समुत्पद्यते ततो गुरुरेवात्र कारणमुच्यते ६

सं० टी०—परमार्थः गुरुः कीदृश इति नियमयति । येन गुरुणा यत्परमात्मतत्त्वं दर्शितम्-तज्ज्ञानकाल एव स्व संवेद्यात्म साक्षात्कारःपरमात्मपदत्वं समुत्पद्यतेसगुरुरयमाशयः योहि स्वयमनुभवी सिद्धस्तस्योपदेशे झटिति परमात्म बोधोभवति सिद्धिश्च त्वरित मुपनमते । ततः पूर्वोक्त हेतोर्गुरुरेवात्र परमात्म तत्त्व निरूपणे । कारणम् परम साधन मुच्यते ॥६॥

भा० टी०—जिस समय सिद्ध गुरु परमपद के उपाय भूत योग मार्ग को दिखलाता हुआ व्यापक आत्मा का बोध कराता है उसी क्षण में सिद्ध गुरु की कृपा से अपने अनुभव से जानने योग्य अखण्ड व्यापक आत्मा को साक्षात्कार और सकल सिद्धियों का प्रादुर्भाव होता है इसी से परमार्थ आत्मतत्त्व के उपदेश और साक्षात्कार कराने में सद्गुरुही परम कारण है तात्पर्य यह है कि तीन प्रकार की शिक्षा होती है औपदेशिक करुणावलोकन और शक्तिपात। प्रथम और द्वितीय शिक्षा हर एक विद्वान् दे सकता है, अन्तिम शिक्षा के देने में सिद्ध और ईश्वर के अतिरिक्त अन्य की शक्ति नहीं है ॥६॥

मू०—तस्माद्गुरुकटाक्षपातात्स्वसंवेद्यतयामहा-सिद्ध योगिभिः स्वकीयंपिण्डंनिरुत्थानानुभवेन सम-रसं क्रियत इतिसिद्धान्तः ॥७॥

सं० टी०—तस्माद् गुरु कटाक्षमात्रबलमाश्रित्य स्वसंवेद्यतयाच स्वानुभवादितर प्रमाणवलान पेक्षणेन महासिद्ध योगिभिः, मनो निग्रह तत्परैः (स्वकीयं पिण्डं) परिच्छिन्नं शरीरमिदं निरुत्थानुभवेन व्यापकपरपिण्डाभेदोपासनया समरसमैक्यम् क्रियते स्वयं व्यापको भवति" यथाकीटंभ्रमरयति भ्रमरी ॥७॥

भा० टी०—अतः गुरु की करुणा दृष्टि मात्र से जानने योग्य

स्वसंवेद्य परमपद है। इसी लिये महासिद्ध योगिजन परिमित अपने देह को परपिण्ड के साथ शुद्ध चैतन्य का निश्चल अभेदानुभव रीति से समरस करते हैं। यह सिद्धों का सिद्धान्त है ॥७॥

मू०--निरुत्थानप्राप्त्युपायः कथ्यते। महासिद्ध योगिनः स्वस्वरूपतयानुसंधानेननिजावेशोभवति निजावेशान्निःपीडितनिरुत्थानदशामहोदयः कश्चिज्जायते ततः सच्चिदानन्दचमत्कारादद्भुताकारप्रकाश प्रबोधोजायते, प्रबोधादखिलमेतद् द्वयाद्वयप्रकटतया चैतन्यभासाभासकंपरात्परपरमपदमेव प्रस्फुटंभवतीति सत्यम् ॥८॥

सं० टी०--यं लब्ध्वा पुनरुत्थानं न भवति येन स उपायः कथ्यते साम्प्रतम् महासिद्ध योगिनः, महासिद्धपदलिप्सोर्योगिनः साधकस्य स्वस्वरूपतया निज पिण्डभावनानुसन्धानेन ममपिण्डो यमहंचेति दृढभावनया निजावेशो भवति पर पिण्डे स्व स्वत्वं प्रविष्टं भवति यथा ऽस्मिन् पिण्डे स्व स्वत्वावेशेनोत्थान चालनादि सर्वाधिकारस्तथैव पर पिण्डेऽपि सर्वाधिकारः सम्पद्यते स चावेशो न क्षणिको ऽपितु स्थायी सर्वकालिकः, तदा तस्माद् निजावेशात स्वस्वत्वावेश बलेन निःपीडित निरुत्थान दशामहोदयः, अत्यन्तनिरुत्थानावस्था महाभाग्यम् कश्चिदनिर्वचनीयो गीयते हर्षसूचककरतलनिनादेन उच्चैरुद्घुष्यते (ततः) निरुत्थानदशातः सच्चिदानन्दचमत्कारात् परमाह्लादास्वादात् (अद्भुताकार प्रकाशः) सर्वातिशायिचित्रूपसहितः प्रबोधो मानसिकवृत्तिरूपः जायते, आविर्भवति तस्मात प्रबोधादखिलं यथा स्यात्तथेति क्रियाविशेषणम एतद्द्वयाद्वयस्य व्यवहारिकद्वैतपारमार्थिकाद्वैतरूपस्य समष्टि व्यष्टि रूप जगतः प्रकटतया स्वाभिन्नत्वेन प्रत्यक्षतया चैतन्यभासास्वप्रकाशेन सर्वेषामितिशेषो भासकं परादपि परमपदं सर्वोत्कृष्ट मिति यावत

तत्त्वं प्रस्फुटं हस्तामलकवत् प्रत्यक्षम् भवतीति सत्यम् मन्तव्यम् नात्र संशय लेशस्याप्यवसरः ॥८॥

भा० टी०—अब योग द्वारा प्राप्त करने योग्य निरुत्थान अर्थात् स्व परपिण्डादि अभेद रूप परमपद की प्राप्ति के उपाय को कहते हैं। उस अभेदरूप परमपद को चाहने वाले महा सिद्ध योगि जन परमगुरु से बताई हुई स्व पर पिण्डादि की अभेद पद्धति से चराचर सहित परमेश्वर को योगध्यान के द्वारा जब अपने स्वरूप से अभिन्न देखते हैं। तब उन का स्वपिण्ड परपिण्डादि अभेद के अनुभव से अत्यन्त अभेद ध्यान द्वारा सर्वेश्वर के शरीर में भी निजावेश होता है। अर्थात् निज देह के सदृश अभिमान होता है कि यह भी मेरा ही शरीर है। एवं व्यष्टि सूक्ष्म शरीर का समष्टि सूक्ष्म के साथ तथा जीव चैतन्य का परमेश्वर के साथ दृढ एकता की भावना से परमात्मा में भी स्वकीय अभिमान होता है। जैसे अपने व्यष्टि शरीर के संचालन में सामर्थ्य होती है उसी तरह समष्टि शरीर के संचालन आदि में भी सामर्थ्य प्राप्त कर लेता है। योगी को दृढ़ निश्चल भावना होजाने पर अखण्ड आत्मा के स्वसंवेद्य अनुभव के चमत्कार से अद्भुत प्रकाश स्वरूप आत्मा का बोध होता है। 'अहं ब्रह्मास्मि। शिवोऽहम्' इत्यादि प्रकार से सर्वत्र व्यापक आत्मा को ही देखता है। उसी निर्बाध अखण्ड पूर्ण आत्मा के बोध से समस्त द्वैताद्वैत रूप जड़ चेतन की हस्तामलकवत् प्रत्यक्ष प्रतीति होती है। अतः वह आदित्यादि का भी प्रकाशक सर्वाधिष्ठान स्वरूप है। तथा समस्त जगत् कार्य की अपेक्षा पर जो अव्याकृत (माया) उससे भी परे है। वही व्यापक चेतन रूप परमपद प्रत्यक्ष रूप से स्फुट होजाता है। यह सत्य है ॥८॥

मू०—अत एव महा सिद्ध योगिभिःसम्यग्गुरु प्रसादंलब्ध्वावधानबलेनैक्यंभजमानैस्तत्क्षणात् परमं पदमेवानुभूयते ॥ ६ ॥

सं० टी०—अत एव वस्तुत ऐक्यादेव महासिद्धयोगिभिः अस्य अनुभूयते इत्यनेनान्वयः। ओदनं पचतीतिवत् भविष्यद् वृत्त्या साधनावस्थायामपि महा सिद्ध योगि पदेन व्यवहारो नान्याय्यः। सम्यग् गुरु प्रसादं लब्ध्वा गुरु प्रसाद एव योगसिद्धौ मुख्यं कारणमतः प्रथमं तत्संपादनीयम्। तत्पश्चात् विषयान्तरेभ्यो मनो निवर्त्य लक्ष्यं स्थापनरूपमवधानङ्कर्तव्यम्। तदाहावधानबलेनेति तेन, ऐक्यं भजमाने स्वभेदोपासनां कुर्वाणै योगिभिस्तत्क्षणादुपासनाकालमारभ्य सिद्धिपर्यन्तंपरंपदमेवपरमपिण्डाख्यान्यः कश्चिदित्यनुभूयते ज्ञायते ॥ ९ ॥

भा०टी०—अतः पूर्वोक्त रीति से योग साधन द्वारा भविष्य में महासिद्धि को प्राप्त होने वाले योगिजन अच्छी तरह गुरुदेव को प्रणाम और सेवादि से प्रसन्न करें। क्योंकि योग सिद्धि में गुरु की प्रसन्नता ही मुख्य कारण है। इसके उपरान्त गुरु मन्त्रादि पूर्वक योग-विधि को प्राप्त करते हुये योगिजन जब सावधानता पूर्वक ध्यान द्वारा स्वपिण्ड से लेकर परपिण्डादि पर्यन्त एकता की दृढ़ भावना करते हैं तब उसीक्षण अपने से अभिन्न ब्रह्म रूप परमपद का अनुभव होता है कि मैं हूँ सो शिव है ओर शिव है सो मैं हूँ तथा सर्वोपाधि विनिर्मुक्त केवल स्वयं ज्योति स्वरूप अखण्ड व्यापक हूँ ॥९॥

मू०—तदनुभवबलेनस्वकीयंसिद्धंसम्यक् निज पिण्डं ज्ञात्वा तमेव परमपद एकीकृत्यतस्मिन्प्रत्यावृत्या स्वदेहाभ्यन्तरेस्वपिण्डसिद्ध्यर्थे महत्त्वमनुभूयते ॥१०॥

सं० टी०—तेनानुभव बलेन समान वृत्ति प्रवाह बलेन स्वकीयं निज पिण्डं एतच्छरीरस्य सारभूतं तेजो पुञ्जम्, निज पिण्ड पदस्य साङ्केतिकोयमर्थः। स्वयमेवाग्रे व्याख्यास्यते सम्यक् सिद्धं व्यापकं जातमिति ज्ञात्वा परिच्छिन्न शरीरे ऽस्मिन्संकुचितमिदं तेजो पुञ्जम्। उपासना बलात्सर्वतो निःसृतं सद् व्यापकं भवतीति सारांश एतादृशीं सिद्धिं प्राप्याग्रे किं कर्तव्यमित्यत्र प्रकार द्वयं विकल्पतया प्रदर्श्यते तत्र

प्रथम: कल्प:। तमेव निज पिण्डं प्रसूतं स्वकीय तेजो पुञ्जं परमपदे परपिण्ड एकीकृत्य परपिण्डे मेलनेनाभिन्नतामापाद्य कल्पनान्तरमाह। प्रवृत्त्यारूढे वाभ्यन्तरे। परपिण्डे मेलयित्वा पुन: परावर्त्य स्वपिण्डस्याभ्यन्तरे उपसंहृत्य स्वपिण्डसिद्ध्यर्थं एतत्पिण्डस्याजरामरसिद्धौ महत्त्वं परपिण्डात्मकत्वमनुभूयतेस्वकीय पिण्डमवलम्ब्यपरपिण्डा भिन्न स्वरूप महत्त्वं ज्ञायते ॥१०॥

भा०टी०—पूर्वोक्त अभेदानुभव के बल से निज देह पिण्ड को अच्छी तरह सिद्ध हुआ जानकर उसी को परमपद रूप परपिण्ड में एक कर बार बार एकता की आवृति को दृढ़ करे। इसी प्रकार अपने शरीर को भी अवलम्बन बनाकर अपने पिण्ड में ही परपिण्ड की एकता करता हुआ बार बार एकता कीभावनाकरे। इससे वे महासिद्ध योगिजन अजर अमर रूप परममहत्व पद का अनुभव करते हैं। फिर अपने व्यष्टि पिण्ड में ही सार्वभौम ऐश्वर्य और परमानन्द का प्रादुर्भाव होता है ॥१०॥

मू०—निज पिण्डपरीक्षाचस्वस्वरूपकिरणानन्दोन्मेषमात्रं यस्योन्मेषस्य प्रत्याहरणमेव समरसकरणंभवति ॥११॥

सं० टी०— इदानीं निजपिण्डपदस्य स्वसांकेतिकार्थमाह (निज पिण्डमिति) स्वरूप किरणानां स्वात्मन: संकुचितावयवीभूतप्रकाशानां तदभिन्नानन्दाना मुन्मेष मात्रम् सर्वतो विकाश: यस्योन्मेषस्य प्रत्याहरणम् परावर्त्य स्वस्मिन् स्थापनमेव समरसकरणम् जीवात्मपरमात्मभेद भित्ति विलाप्यैक्य करणं भवति ॥११॥

भा० टी०—अब सिद्ध हुये स्वपिण्ड की परीक्षा को कहते हैं। परमनाथ से अभिन्न जीव का सूर्य की किरणों के सदृश प्रकाशमय आनन्द का विस्तृत विकाश होता है। उस आनन्द विकाश को फिर अपने देह पिण्ड में समेट लेना ही समरस करण कहलाता है। तात्पर्य यह है कि जो यह शरीर परिमित साकार लौकिक दृष्टि से प्रतीत हो रहा है। वह वास्तव में उस परमेश्वर की चिद्रूप शक्ति का परिमाण है। इसी से तेज पुंज यह शरीरपरमेश्वर की स्वयं प्रभारूप

है। जैसे सूर्य की किरण प्रभारूप हैं। किन्तु अविद्यादि कर्मपाश के वश से यह शरीर निकृष्टरूप से प्रतीत हो रहा है। जब पूर्वोक्त अभेद की दृढ़ भावना से समरस करण होने पर वास्तविक व्यापक रूप से सर्वत्र स्वशरीर का भान होने लगे तभी समरस करण सिद्ध हुआ जानना चाहिये। इस परीक्षा की कसौटी स्वानुभव ही है ॥११॥

मू०--अतएव स्वकीयं पिण्डं महद्रश्मिपुञ्जं स्वेनैवाकारेणप्रतीयमानंस्वानुसन्धानेनस्वस्मिन्नुररीकृत्य महासिद्धयोगिनःपिण्डसिद्ध्यर्थं तिष्ठन्तीतिप्रसिद्धम्१२

सं० टी०--अतएव किरणपुञ्जस्य प्रत्याहरणार्थत्वादेव स्वकीय पिण्डं महद्रश्मिपुञ्जम्, मदीय पिण्डो विशालतेजः स्वरूपोऽस्ति न तु जडरूपइति ध्यानवलेन यदा स्वेनैवाकारेण तेजोरूपाकारेण प्रतीयमानमनुभूयमानं यावत् स्वानुसन्धानेन स्वकीयानुभवानुकूलं रूपं स्वस्मिन्नुररीकृत्य हठमङ्गीकृत्य महासिद्धयोगिनः पिण्डसिद्ध्यर्थं कायसिद्ध्यर्थं तिष्ठन्ति ध्यानतत्परा निवसन्ति,इति प्रसिद्धं योगिजनेषु !१२

भा० टी०--इसी अभेदरूप समरस करण की रीति से अपने प्राकृतिक स्वभाव से प्रतीयमान पिण्ड को अपने में देदीप्यमान और सिद्ध हुआ जानकर बार बार अनुभव करते हुये अजरामरत्व पद को प्राप्ति करने के लिये महासिद्ध योगी बहुत समय तक स्थित रहते हैं। बाद में स्वयं ही कर्ता धर्ता हो स्वच्छन्द गति से विचरण करते हैं ॥१२॥

मू०--अथ पिण्डसिद्धौ वेषः कथ्यते-
शंख मुद्राधारणं च केशरोमप्रधारण,
ममरीपानममलं तथा मर्दनमुत्तमम् ॥१३॥
एकान्तवासो दीक्षा च संध्याजपसमायया,
ज्ञानं भैरव मूर्त्तेस्तु तत्पूजा च यथा विधि ॥१४॥
शंखध्मातं सिंहनादं कौपीनं पादुके तथा

अंगवस्त्रं बहिर्वस्त्रं कम्बलं छत्रमङ्कनम् ॥१५॥
वेत्रं कमण्डलुं चैव भस्मना च त्रिपुण्ड्रकं
कुर्यादेतान् प्रयत्नेन गुरुवन्दन पूर्वकम् ॥१६॥

सं० टी०—पिण्ड सिद्धिफलाय लिङ्गधारणमपि परम्परा सहकारि, तथाह्यसंगस्यात्मनः कर्मणा सह सम्बन्धं विना फल सम्बन्धः कदापि न सम्भवति कार्य्यकारणयोः सामानाधिकरण्य नियमात् । न जातु हरिद्वारे व्याप्रियमाणः कुलालः काश्यां घटमुत्पादयितु मिष्टे कर्मणा सह सम्बन्धश्च अध्यासात्मकाभिमानादृते नान्यः । अतोऽभिमानरहितत्वेन स्वयं कृतमपि कर्म न फलदानायालम्, अभिमानवशादेव ऋत्विक् पुत्रादि कृतमपि कर्म यजनानजनकादिभ्यः फलं प्रसूत इति । इन्द्रेणाप्यशक्य निवारणायुक्तिः, ईश्वरीयवैदिक धर्मानुयायिनो गेहे गेहे नर्नार्त वत्तल्लिङ्गधारणं हि बलात् तत्तद्धर्माभिमानं प्रवर्द्धयति । अतः काय सिद्धि फलकोपासनातत्परैरभिमानादिद्वारा शक्ति सञ्चालकानि लिङ्गान्यवश्यं धारणीयानीनि तानि प्रदर्श्यंते । तत्र प्रथमं शंखमुद्राधारणं शंखश्च मुद्राचेति द्वन्द्वः तत्र योग्यता बलात गले हस्ते वा शंखधारणं कर्णयो मुद्रा कुण्डल द्वय धारणम्, केशरोमधारणं समस्त शरीरे केश वपनं न कार्यम्,(अमरीपानम्) खेचरी मुद्रया सहस्रदल पद्मतः प्रक्षरित सुधारसस्यास्वादनं विधेयम्, अस्यक्रियागूढममविद्गुरु, मुखादेवावगंतव्या । योगिजनेषु या प्रसिद्धिः सैव कर्तव्या । अनुष्ठानरहस्य शास्त्र रहस्ययोः क्वचित् क्वचित पृथक् पथ पथिकत्वात । गुरुं विना स्वमनीषया कर्म नाचरेत अमरीपानस्य विशेषणम्, अमलम् । तस्यायमाशयः प्रथमेऽन्ते च यन्निःसरति तत् समलं भवति । अतस्तत्परिहेयम् माध्यमिकं च पेयमिति ध्वन्यते एवमेवानुष्ठानमार्गे प्रख्यातम् । तथोत्तम मर्दनं कुण्डलिन्याः सिद्धासनेन मर्दनम् । एकान्तवासः, यत्र चित्तविक्षेपकं वस्तु नास्ति तादृशारण्य पर्वत गुहा गंगादि तटेषु निवासः । दीक्षा च श्रद्धेय गुरुद्वारा मन्त्राद्युपदेशः । सन्ध्या सायं प्रातः स्नात्वा शुद्धासने उपविश्य ॐ आत्मतत्वाय स्वाहा, ओं विद्यातत्वाय स्वाहा, ओं शिवतत्वाय स्वाहा, इति मन्त्रेण त्रिराचम्य प्रणवेनभूमौ सप्तधा जलमुत्क्षिपेत्, ततः प्राणायामंविधाय वामहस्ते जलमादाय दक्षि-

णेनाच्छाद्य 'हं यं रं लं वँ' इति मन्त्रेणाभिमन्त्र्य सप्तवारं पुनः पुनः प्रणवेन शिरसि जलमुत्क्षिपेत्, पुनः पूर्वोक्त मन्त्रेण त्रिराचमनम्। प्रातः काले वक्ष्यमाणतर्पणमपि संध्याङ्गं न तु सायम्। गुरुं तर्पयामि, परमगुरुं तर्पयामि, परात्पर गुरुंतर्पयामिपरमेष्ठि गुरुं तर्पयामि,देवान् तर्पयामि, ऋषीन् तर्पयामि आरवण देवाँस्तर्पयामि भैरवं तर्पयामि, ॐ ह्रीं हंसःमार्तण्डभैरवाय, प्रकाश सहिताय, श्री सूर्यनारायणाय, स्वाहा तर्पयामि, सिद्धौघान् तर्पयामि, स्वेष्टदेवं तर्पयामि, इति संक्षेपसंध्या ततः यथाशक्ति जापः, स्वेष्टदेवताया गायत्री मन्त्रस्य जपः। यम नियमाः पूर्वोक्ताः, ततः स्ववासभवने भैरव मूर्त्तेस्तु ज्ञानं स्मरणं यथाविधि विधिमनतिक्रम्य तत्पूजा, भैरवपूजा शंखाध्मातं शंखध्वनिं सिंहनादं प्रसिद्ध मिदं वाद्यं वादयेत्। कौपीनं पादुकम्, काष्ठपादुकञ्च तथैवाङ्गवस्त्रं धौतवस्त्रादि बहिर्वस्त्रं प्रावरणादि कम्बलं तथातपादिवारकच्छत्रम्। विलक्षणवेत्रं वेणुदण्डं कमण्डलुञ्च धारयेत्, तथैव भस्मना भाले त्रिपुण्ड्रकं कुर्य्यात्, एतद् यत्नतो धारयेत्, सर्वत्र गुरुवन्दनं मुख्यं तन्न हेयम्, इति सावधानता प्रदर्शनायाचकथद् गुरुवन्दनपूर्वकमिति ॥१३॥ ॥१४॥ ॥१५॥ ॥१६॥

भा० टी०—अब उपरोक्त पिण्ड सिद्धि के लिये वेष धारण की रीति को कहते हैं। शङ्ख, कानों में कुण्डल या खेचरी आदि मुद्रा को तथा केश, रोमों को धारण करना अर्थात् जटाधारी या मुण्डित मुण्ड रहना। एवं आदि अन्त को छोड़कर युक्ति युक्त शिवाम्बु का सेवन तथा आसन, प्राणायाम आदि के परिश्रम से उत्पन्न पसीने को अच्छी तरह शरीर में ही मसलकर सुखाना। क्योंकि ऐसा करने से शरीर स्वच्छ और हल्का होता है। योगाभ्यास के उपर्युक्त एकान्त स्थान में जल के आश्रय में निवास करना, और गुरुमन्त्र धारण पूर्वक योग की दीक्षा लेना, एवं निष्कपटभाव से ॐ आदि मन्त्र का जप और योग सन्ध्या यम नियमादि का अच्छी तरह पालन करना। तथा भक्ति पूर्वक भगवान् भैरवदेव की मूर्ति का ध्यानादि करना। क्योंकि भैरवदेव सिद्धों के अधीश्वर हैं और योग के आरम्भ काल में रोट, लंगोट आदि पूजा से प्रसन्न किया हुआ भैरवदेव योग में विघ्न नहीं आने देता। अतः निर्विघ्न कार्य की समाप्ति

के लिये इन्द्रादिदेव भी सिद्ध भैरवदेव की पूजा करते हैं। तथा सायं प्रातः काल नियम से ऊँचेस्वर से शङ्ख बजाना कौपीन, खड़ाऊँ, शीत निवारण के लिये ओढने का वस्त्र कम्बल, छाता, वेत कमण्डलु, मस्तक में त्रिपुण्ड और रुद्राक्षादि का धारण करना। इन उपरोक्त चिन्हों को श्रद्धा पूर्वक श्री गुरुदेव को आदेश (प्रणाम) करताहुवा धारण करे ॥१३॥ १४-१५-१६॥

मू- तेषांपिण्डसिद्धौसत्यांसर्वसिद्धयःसंनिधानाभवन्ति
यस्मिञ्ज्ञाते जगत्सर्वं सिद्धं भवतिलीलया
सिद्धयः स्वयमायान्ति तस्माज्ज्ञेयं परं पदम् ।१८
परं पदं न वेषेण प्राप्यते परमार्थतः।
देह मूलं हि वेषः स्याल्लोकप्रत्ययहेतुकः ॥१६॥

सं० टी०— तेषामित्थमाचरतां पिण्डसिद्धिर्भवति तस्यां सत्यां सर्व सिद्धयः, अणिमादयः सन्निधाना भवन्ति सम्मुखमुपतिष्टन्ते। एतदेव पद्येनद्रढयति, यस्मिन्निति यस्मिन् परमात्म तत्त्वे ज्ञाते सति अभिन्नतामापन्ने सति सर्वं जगत् परमात्माधीनं वस्तु, सिद्धम्, स्वाधीन लीलयैव अनायासेनैव भवति किञ्च (सिद्धयः) अणिमादयः स्वयमायांति उपनमंते तस्मात् परमं पदं परमपिण्डमेवज्ञेयम् साधनीयम् साधनं विहाय केवल लिङ्गधारणेनैवात्मानं कृतकृत्यं मा मन्यतामित्यतः, साधनेन सलिङ्गं समुच्चिचीषया केवललिङ्गं निन्द्यते परंपदं परमार्थतो वस्तुतो वेषेण केवल लिङ्गेन न प्राप्यते हि यतः, देहमूलं देहो मूलं यस्येति देहगतं वेषं चिह्नं लोक प्रत्ययस्यायमेतद्धर्मसाधक इति ज्ञानस्य हेतुकं हेतुरेव हेतुकम्, कारणमिति यावत, अतः साधन सहित लिङ्ग धारणं कुर्य्यादित्येव मुख्यतात्पर्य्यम्॥ १८-१६

भा० टी०—उपरोक्त वेष को गुरु से विधि पूर्वक धारण कर योगानुष्ठान के द्वारा जब उन महात्माओं की पिण्ड सिद्धि होती है। तब अणिमादि सकल सिद्धियों का प्रादुर्भाव होता है। उस समय उन सिद्धियों में आसक्त न होकर केवल आत्म निष्ठा में ही तत्पर रहे। इसी

भाव को आगे के पद्य से श्री योगाचार्य जी कहते हैं। जो असङ्ग ज्योति स्वरूप आत्मा सर्वत्र व्यापक और अपने से अभिन्न है। उसी के यथार्थ स्वरूप को प्रत्यक्ष करना चाहिये। उस निज व्यापक आत्मा के जान लेने पर समस्त भूत भौतिक प्रपञ्च रूप जगत् अनायास जाना जाता है और सिद्धियां स्वयं ही प्राप्त हो जाती हैं तथा अपने में अनुराग कराने के लिये कोशिश करती हैं। इस लिये सिद्धों को चाहिये कि उनमें कदापि आसक्त न हों। केवल आत्म रूप परमपद को ही जानें। पूर्वोक्त वेष मात्र को धारण करने से ही अपने को कृतकृत्य नहीं समझना चाहिये यथार्थ में योग जन्य ज्ञान के विना मोक्ष रूप परमपद की प्राप्ति वेष के धारण मात्र से नहीं होती, किन्तु सांसारिक जनों को भी साधुपन का ज्ञान हो जाय इस लिये देह मूलक बाहर का चिन्ह(वेष) धारण किया जाता है ॥१८॥ ॥१९॥

मू०—लोके निकृष्ट मुत्कृष्टं परिगृह्य पृथक् कृतम् ।
तत्स्वधर्म इति प्रोक्तो योगमार्गेविशेषतः ॥२०॥
योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौ स्मृतौ ।
शास्त्रेष्वन्येषु सर्वेषु शिवेन कथितः पुरा ॥२२॥

सं० टी०—लोके यद्वस्तु निकृष्ट मैहिकफल जनकं सेवाद्युत्कृष्टमामुष्मिकफलदं दानादि तत् परिगृह्यादाय पुनः पृथक् कृतम्, त्यक्तम्, तत् स एव त्यागः स्वधर्म इति ख्यातः कर्तव्यतयाविहितः, यद्यप्ययं सार्वजनीनस्तथापि योगमार्गेऽयं प्रकारः विशेषत आद्रियते योगमार्गादन्यः (परः) श्रेष्ठो मार्गः पन्थाः श्रुतौ स्मृतौ वा अन्येषु शास्त्रेषु च नास्तीति पुरा शिवेन कथितः ॥२१॥ ॥२२॥

भा० टी०—लोक में प्रत्यक्ष फल देने वाला सेवादि कर्म निकृष्ट तथा स्वर्गादि फल जनक कर्म उत्कृष्ट कहलाता है। यद्यपि अविवेकी जन दोनों प्रकार के कर्मों को प्रथम कामना से करते हैं। तथापि पहले सकाम रूप से उस कर्म को ग्रहण कर जब ईश्वरार्पण बुद्धि विवेक द्वारा वह कर्म करने वाला उस कर्म के फल को छोड़ देता है। तब

परम्परा से चित शुद्धि द्वारा मोक्ष का उप योगी वह कर्म स्व धर्म कहलाता है। परन्तु वहां पर भी धर्म शब्द का व्यवहार गौण है। वास्तव में विशेष रूप से योग मात्र को ही धर्म कहना उचित है। क्यों कि योग के बिना स्थूल दुःखों का नाश और मोक्ष रूप परम-शान्ति नहीं मिलती। अतः योग मार्ग से बढ कर उत्तम आत्मा के कल्याण का मार्ग अन्य कोई नहीं है। यह श्रुति स्मृति और अन्य सब शास्त्रों में शिव जी ने कहा है। "बिना योगेन देवाऽपि न मोक्षं लभते प्रिये!" इत्यादि ॥ २२-२३-२४ ॥

मू०—योगः संहननोपायो ज्ञान संगति युक्तिषु ॥२२॥
लोके निकृष्टं सततं यं वा यं वा प्रकुर्वते।
तं वा तं वा वर्जयन्ति लोका ज्ञान बलेनतु॥२३॥
मनुष्याणां च सर्वेषां प्राक्संस्कारवशादिह॥
शास्त्र युक्ति समाचारः क्रमेण भवति स्फुटम् ॥२४॥

सं० टी०—लोके जनेषु योगः, योग शब्दः संहननोपायज्ञान संगति युक्तिषु संहननं संधातस्तस्योपायः सर्वतो वस्तु संयोजनं, ज्ञानं ज्ञान साधन प्रणिधानादिः, संगतिः, मेलनम्, युक्ति स्तर्क एष्वर्थेषु प्रयुज्यते किन्विति शेषः, लोकाः सततं यं यं निकृष्ट मनित्य फलदं योगं प्रकुर्वते। तं तं पूर्वोक्त सर्वं ज्ञानबलेन वर्जयन्ति, अतो ज्ञान साधनार्थं क एव योगो मुख्य उत्कृष्ट इति तात्पर्यम् नन्वेवं सर्वेषामुत्कृष्टे योगएव कथं न प्रवृत्ति रत आह सर्वेषां मनुष्याणां प्राक् संस्कार वशात् पूर्वजन्मार्जित वासना बलात्(इह)अस्मिन् जन्मनि। शास्त्र युक्तिःशास्त्रीयतर्कः समाचारो व्यवहारः स्फुटं तत्त्वतः प्रकाशमानं क्रमेण भवति। स्व स्व वासनावशात् व्यवहारस्य तत्त्वं प्रतीयते तत्र सद्वासनावतोऽल्पतया मुख्य योगे विरलस्य प्रवृत्तिरिति बोध्यम् ॥१६॥

भा० टी०—दो वस्तुओं को मिलाना उपाय ज्ञान सङ्गति युक्ति इन अर्थोंमें योग शब्द का प्रयोग होता है। लोकमेंनिरन्तर अनित्य फल देने वाली वस्तुओं में जो योग का अर्थ किया जाता है वह अर्थ गौण है।

और ज्ञान साधनार्थक तथा मोक्ष का उपयोगी यह योग शब्द का मुख्य अर्थ है। अत: ज्ञान सम्पन्न विद्वान् उस अनित्य फल दायक गौण अर्थ को छोड़ कर मुख्य अर्थ का ही ग्रहण करते हैं। इसी से उनकी मुख्य रूप से योग में निष्ठा होती है।

प्र०—यदि अद्वैत आत्म निष्ठा ही मुख्य है तब सबकी प्रवृत्ति उसी में क्यों नहीं होती ?

उत्तर—यह संसार भिन्न स्वभाव है। इस में अनेक प्रकार के मनुष्य हैं उन में से कुछ ही पूर्व जन्मोपार्जित पुण्य कर्म के प्रभाव से शास्त्र और युक्तियों में क्रमशः निपुण होते हैं। अत: विशिष्ट बिद्वान् ही योग के यथार्थ अर्थ को जानते हैं। इसी लिये योग में कोई भाग्यवान् ही पुरुष प्रवृत्त होता है ॥१६॥

मू०—एवं पिण्डे संसिद्धे ज्ञान प्राप्त्यर्थं तच्च परमं पदं महासिद्धानां मतं परिज्ञाय च तस्मिन्नहं भावे जीवात्मा च सहज संयम सोपायाद्वैत क्रमेणोपलक्ष्यते ॥२५॥

सं० टी०—एवं पूर्वरीत्या (पिण्डे) स्वशरीरे (संसिद्धे) प्रथमतो ज्ञाते सति पश्चात् महासिद्धानां मतमंगीकृतम् तत परमंपदम् चिच्छक्ति सहिताखण्ड सच्चिदानन्द रूपं शिव तत्वं परिज्ञाय "यस्मिन्" परम तत्त्वेऽहंभावे सति पूर्वं जीवतत्त्वं पश्चाच्च शिव तत्त्वं विज्ञायोभयोरभेदे सतीति रहस्यम्। जीवात्मा च सहजसंयम सोपायाद्वैत तच्चतुष्टय क्रमेणोपलक्ष्यते परमपदेनेति शेष: जीवोहि परस्यैकदेशत्वेन परमात्मन उपलक्षणं य एव सोपाधि ज्ञायते स एवोपाधिपरिच्छेदरहित: सञ्ज्ञायेत तदा व्यापक: सन् परमात्मा सम्पद्यतइति तत्र प्रकार चतुष्टयस्य प्रतिपद व्याख्यान मनुपदमेवाग्रेऽभिधास्यते स्वयमेव ॥२५॥

भा० टी०—पूर्वोक्त योग रीति से अच्छी तरह देह पिण्ड के सिद्ध होजाने पर अखण्ड ज्ञान प्राप्ति के लिये महासिद्धों का अभिप्रेत जो चिद्रूप शक्ति सहित अखण्ड परम शिव तत्त्व है वही परमपद कहाजाता है। उसको अपना आत्मा जान कर उसी असङ्ग शिवतत्त्व

में यह भाव करें कि मैं परम शिव हूँ। मेरे में और शिव में कुछ भी भेद नहीं। यही वास्तव में अभेद रूप समरस कहलाता है। अतः परमशिव से अभिन्न और व्यापक जो जीव का असली स्वरूप है वह सहज संयम सोपाय और अद्वैत क्रम से लक्षित होता है ॥१७॥

मू०—तत्र सहजमिति विश्वातीतं परमेश्वरं विश्वरूपेणावभासमानमितिज्ञात्वैकमेवास्तीति स्वस्वभावेन यज्ज्ञानं तत्सहजं प्रसिद्धम् ॥२६॥

सं० टी०—परमेश्वरम् विश्वातीतम् निर्गुणतया विश्वं संसारमतीतमतिक्रान्तमपि विश्वरूपेण मायासहितत्वात् संसार रूपेणावभासमानं संसारं प्रत्युपादानतया तदात्मकत्वादितीत्थं ज्ञात्वा तादृशं परमेश्वरमिति पूर्वोक्ताहम्भावनया ज्ञात्वैकमेव तत्त्वमस्तीति हेतोःस्वस्वभावेन स्वस्वरूपेणाभिन्नं निखिल वस्त्विति यज् ज्ञानं तत् सहजमिति कथ्यते ॥१८॥

भा० टी०—अब पूर्वोक्त सहज संयमादियों में से सहज ज्ञान का निरूपण करते हैं। यद्यपि सर्वाधार अखण्ड व्यापक स्वयं ज्योति परमेश्वर वास्तव में सकल विश्व से अतीत है तथापि अपनी शक्ति द्वारा नाना जीवादि संसार रूप से भी मूर्ख जनों को वही प्रतीत होरहा है। परन्तु तत्त्वदृष्टि से वह एक ही है। वही मेरा यथार्थ स्वरूप है। अतः मैं असङ्ग और व्यापक हूँ। इस प्रकार जो स्वाभाविक यथार्थ ज्ञान होता है वही सहज ज्ञान कहलाता है ॥१८॥

मू०—संयमइतिसावधानानांप्रस्फुरद्व्यापाराणां निजवर्तिनांसंयमंकृत्वाऽऽत्मनिधीयत इतिसंयमः ॥२७॥

सं० टी०—इदानीं संयमपदार्थो विव्रियते निजवर्त्तिनाम् स्वस्मिन् विद्यमानानां सावधानानां स्वकार्योत्पादन पटूनां न तु दुर्बलानां प्रस्फुरद् व्यापाराणां प्रस्फुरन्ते ये व्यापारा इति कर्मधारयस्तेषां संयमनं निवृत्तिं कृत्वा विधाय, आत्मनि, अखण्ड परमात्मनि धीयते स्थाप्यते येन स एव संयमः ॥१९॥

भा° टी०—अब संयम शब्द का अर्थ बताया जाता है। इन्द्रियां अपने अपने विषयों के ग्रहण करने में तत्पर रहती हैं। क्योंकि इन्द्रियों का विषयों में प्रवृत्त होना स्वाभाविक धर्म है। अतः निरन्तर व्यापार वाली वे इन्द्रियां निज देह में वर्तमान हैं। मन के सहित उन इन्द्रियों को विषयों से रोक कर आत्मा में लगाने को संयम कहते हैं ॥१६॥

मू०—सोपायमिति स्वयमेव प्रकाशमयं स्वेनैव स्वात्मन्येकीकृत्य सदा तत्त्वेन स्थातव्यम् ॥२८॥

सं० टी०—अधुना सोपायमधीयते स्वप्रकाशमयमन्यानपेक्षं प्रकाशरूपं स्वयं केवलचेतनं स्वेनैव चैतन्य रूपेणैव स्वात्मनि स्वस्वरूपेचैवन एकीकृत्याभिन्नं विधाय सदा तत्त्वेना विचलित भावतया स्थातव्यम् स्थितिर्विधेया येन तत्सोपायम्।

भा० टी०—अब सोपाय ज्ञान का वर्णन करते हैं। केवल अपने स्वप्रकाश आत्मा को सर्वत्र व्यापक रूप से एक जानकर सदा उसी में आत्म निष्ठ होकर स्थित रहना ही उचित है। यह स्थिति जिस ज्ञान से होती है वह 'सोपाय ज्ञान निष्ठा' कहलाता है। उसी ज्ञान से अखण्ड आत्मा का भान होता है ॥२०॥

मू०—अद्वैतमित्यकर्तृतयैव योगीनित्यतृप्तो निर्विकल्पः सदा निरुत्थानत्वेन तिष्ठति ॥२६॥

सं० टी०—कल्पना रहितो योगी सदा निरुत्थानत्वेन कदाचिदपि स्वस्वरूपप्रच्युतिरहितः सन् तिष्ठति स एवाद्वैत पदार्थः ॥२१॥

भा° टी०—अब अद्वैत का वर्णन किया जाता है। आत्मा कर्तृत्व भोक्तृत्वादि धर्म शून्य असङ्ग व्यापक और एक है। उस असङ्ग व्यापक अद्वैत आत्म निष्ठा को प्राप्त होकर निज आत्मा में ही नित्य तृप्त हुआ योगी कदापि उस स्थिति से विचलित नहीं होता। यही अद्वैत रूप परम पद कहलाता है ॥२१॥

मू०—सहजंस्वात्मसंवित्तिःसंयमःस्वस्वनिग्रह।
सोपायं स्वस्वविश्रान्ति रद्वैतं परमंपदम् ॥३०॥

सं० टी०—उक्तमेव सहजादिपद व्याख्यानं सारांशानुसन्धाना यान्ते संक्षेपेणाह। सहजमित्यादि स्वस्वरूपस्य वास्तविक विज्ञानं सहजं निखिल शरीरेन्द्रियादि व्यापाराणा मात्मनि स्थापनं संयमः। स्वस्वरूपे स्थितिः सोपायः, साक्षात् परमपद मद्वैतम् ॥२२॥

भा० टी०—जीवात्मा और परमात्मा के अभेद ज्ञान को सहज ज्ञान कहते हैं। विषयों में तत्पर इन्द्रियों के प्रवाह को रोककर आत्मा में लगाने को संयम कहते हैं। योगादि उपाय पूर्वक ब्रह्मज्ञान से होने वाली आत्म निष्ठा को सोपाय कहते हैं। और अन्त में अद्वैत ही परमनिर्भय पद है ॥२२॥

मू०--तज्ज्ञेयं सद्गुरोवक्त्रान्नान्यथा शास्त्र कोटिभिः।
तर्क शब्द विज्ञानान्नाचाराद्वेदपारगात् ॥३१॥
वेदान्त श्रवणान्नैवतत्त्वमस्यादि बोधनात्,
नहंसोच्चारणाज्जीव ब्रह्मणोरैक्य भावनात् ॥३२॥
न ध्यानान्नजपाल्लीनः सर्वज्ञः सिद्धिपारगः।
स्वेच्छो योगी स्वयं कर्त्ता लीलया चाजरामरः ॥३३॥
अवध्योदेवदैत्यानां क्रीडति भैरवो यथा।
इत्येवं निश्चलो योऽसौ क्रमेणाप्नोति लीलया ॥३४॥
असाध्याः सिद्धयः सर्वाः सद्गुरोःकरुणांविना
अतस्तुगुरुः संसेव्यः सत्यमीश्वरभाषितम् ॥ ३५॥

सं० टी०—ननु पूर्वोक्तरीत्या स्वयमनुष्टानेनापि सिद्धिर्भविष्यत्येव किमर्थं गुरुपादसेवनमिति सनातन सम्प्रदायतो विचलित मतीनां शंकां दूषयति तज्ज्ञेयमित्यादि। योहि स्वयं योगानुष्ठानतत्परः स एव सद्गुरुः, तस्यैव वाक्यात् तत्पूर्वोक्ततत्त्वं विज्ञेयंबोद्धव्यम् न चान्यथानान्यत्प्रकारेण

शास्त्रकोटिभिः । योगोपायविज्ञानं तर्कशास्त्रविज्ञानादपि न भवति नचारात् केवल वेद पाठात् ॥२६॥ गुरुरहितेन वेदान्त श्रवणेनैव तत्त्वमस्यादि वाक्यज्ञानातहंसोच्चारणात् जीव ब्रह्मणोरैक्यभावनात् गुरूपदिष्ट योग प्रक्रियारहितात् स्वयमाहितभावनात् ॥३०॥ ध्यानात् स्वकल्पितोपायकध्यानात् जपात् केवल बाह्य जपात् न सिद्धिर्भवतीति सर्वत्र सम्बन्धस्तथा च कीदृशोगुरुः कर्तव्य इत्यत आह लीनः, संसारतोविरक्तोब्रह्मणि लीनः सर्वज्ञःकृतस्थूल सूक्ष्मोभय प्रत्यक्षः(सिद्धिपारगः)अष्टसिद्धिसम्पन्नः स्वच्छो रागद्वेषविधुरः योगीस्वयंकर्ता संसाररचनाकौशलसम्पन्नो भवति सोपिलीलया नत्वायासबाहुल्यम् किञ्चाजरोवार्द्धक्य रहितो ऽमरोमरणविहीनः सन् ॥३१॥ दैवदैत्यानामप्यवध्यो भवति न कोऽपितस्य हनने समर्थो यथा भैरवः क्रीडति सकलैरवध्यः सन् इतरान् पराजित्य विहरति लोके तथैव सोपि साधकोभवति तत इत्येवम् । गुरुपूर्वक पूर्वोक्तसाधनेऽनुरक्तः सन् निश्चलः सन्देह रहितोयः साधको ऽपि क्रमेण क्रमशःलीलयागुरुबलेनाभ्यासं विनैव सिद्धिमवाप्नोति गुरुरहितैस्तु सिद्धयो ऽसाध्या भवन्ति वर्षशतैरपि न सिद्धयन्तीति गुरुदेव पादसेवनं ध्रुवं विधेलिममिति हृद्यम् अस्यैव सत्संप्रदायतां सूचयितुमाह सत्यमीश्वर भाषितम् पूर्वोक्त तत्त्वमेवेश्वरेण भाषितमत स्तदेव सत्यमितरत् सर्वं मनुष्योत्प्रेक्षिततयाऽतथ्यमिति फलति ॥३३॥

भा० टी०—पूर्वोक्त योगादि तत्व को सद्गुरु के मुखारविन्द में सुन कर ही अनुष्ठान करे अन्यथा नहीं क्यों कि गुरु के बिना अनेक शास्त्रों के मन माने अर्थ से आत्मा को नहीं जान सकता । न शुष्कतर्कों से न केवल आचार से न वेद पाठ से न तत्त्वमस्यादि महावाक्य के जानने से न हंस मन्त्र के उच्चारण से न जीव ब्रह्म की अभेद भावना से न ध्यान से और न जप से ही आत्मा को किन्तु विधि पूर्वक गुरु के द्वारा ही आत्मा को सांगो पांग योग विधि को तथा और भी उपरोक्त सारभूत तत्वों को जान सकता है। इस प्रकार दृढ़ निश्चय वाला योगी जब सिद्ध गुरु से यथावत् जानकर योगानुष्ठान में तत्पर होता है तब अनायास ही क्रम से अजरामर रूप परमपद को प्राप्त होता है। फिर वह निज आत्मा में मग्न सकल

सिद्धियों का पारंगम सर्वत्र स्वच्छन्द गति और जरामरणादि विकार रहित सब का कर्ता धर्ता होता हुआ देवदैत्यों से भी अवध्य हो जाता है। तथा भगवान् भैरव देवके सदृश सर्वत्र स्वतन्त्रगति से विचरता है। अवधूत सिद्ध गुरु के उपदेश बिना योग कदापि सिद्ध नहीं हो सकता। अतः गुरु का आश्रय परम आवश्यक है यह शिव जी का वचन सत्य है ॥२३॥

प्रथमेत्वरोगतासिद्धिः सर्वलोक प्रियो भवेत् ।
कांक्षन्ति दर्शनं तस्य स्वात्मारूढस्य नित्यशः॥३६
कृतार्थः स्याद्द्वितीये च कुरुते सर्वभाषणम् ।
तृतीये दिव्य देहस्तु स्याले व्याघ्रैर्न बाध्यते ॥३७॥
चतुर्थे क्षुत्तृषा निद्रा शीतातप विवर्जितः ।
जायते दिव्य योगीशो दूरश्रावी न संशयः ॥३८॥
वाक् सिद्धिः पञ्चमे वर्षे परकाय प्रवेशनम् ।
षष्ठे न छिद्यते शस्त्रैर्वज्रपातै र्न भिद्यते ॥३६॥
वायु वेगी क्षिति त्यागी दूरदर्शी च सप्तमे ।
अणिमादि गुणोपेत स्त्वष्टमेवत्सरे भवेत् ॥४०॥
नवमेवज्रकायः स्यात् खेचरो दिक् चरो भवेत् ।
दशमे पवना द्वेगी यत्रेच्छा तत्र धावति ॥४१॥
सम्यगेकादशे वर्षे सर्वज्ञः सिद्धि भाग् भवेत् ।
द्वादशे शिवतुल्योऽसौकर्त्ता हर्त्ता स्वयं भवेत्॥४२॥
त्रैलोक्ये पूज्यते सिद्धः सत्यं श्री भैरवो यथा ४३

सं० टी०—क्रमेणाप्नोतीत्युक्तं तत्र कः क्रम इति जिज्ञासोपशमनाय सिद्धीनां क्रमः प्रदर्श्यते पूर्वोक्तरीत्या कृतसंयमस्य साधकस्य नित्यशः आत्मरूढस्य सतत मात्मारूढस्य पूर्वप्रतिपादितरीत्या

पिण्डाण्डयोः समरसकरणे परिनिष्ठितस्य प्रथमे वर्षे इति शेषः प्रथम वर्षो ऽप्यरोगतायाः सिद्धिः, रोगरहितो भवति किञ्च सर्वलोकप्रियो भवेत् न कोऽपि तं प्रति द्वेषभावमाधत्ते प्रत्युत यथा स्वात्मनि प्रीतिं विदधति तथैव तस्मिन्नपि सर्वे प्रीतिमावहन्ति, अतस्तस्य दर्शनं सर्वोपि कांक्षति, इदमत्र रहस्यम् सर्वत्रात्मभावनोपासना बलात् सर्वेषां बुद्धावेवं प्रत्यग्यात्मभावः स्वयमेवोदेति, अतः समुचितमेव तं प्रति प्रीतिदर्शनम् इति विदन्ति कोविदाः ३६। द्वितीय वर्षद्वय पर्यन्तं साधने सम्पन्ने सति कृतार्थः परिपूर्णमनोरथः सन् संकल्परहितो भूत्वेति यावत् सर्वभाषया व्यवहार मित्याहारः कुरुते सर्वभाषाविज्ञोभवतीत्यर्थः तृतीयवर्षे परिपूर्णे सति दिव्य देहः सिद्धशरीरो भूत्वा व्यालैः सर्पव्याघ्रैरुपलक्षणमेतत् सकल हिंस्त्रैर्नबाध्यते न हिंस्यते इति। ३७ चतुर्थवत्सरे पूर्णे क्षुधा पिपासा निद्राशीतोष्ण द्वन्द्वबाधारहितो भूत्वा दिव्य योगीशो विशिष्टयोगीन्द्रः सन् दूरश्रावी दूरतएव श्रवणशीलोजायतेऽत्र नास्ति संशयः। ३८ पञ्चमे वर्षे व्यतीते वाक् सिद्धिर्भवति यद्यद् वदति तत्तत् सफलं भवत्येव न जातु वैकल्यं प्रयाति किञ्च परकाय प्रवेशनमपि जायते। विद्यमान शरीरं विहाय मृतकशरीरान्तरे प्रविश्य तेनैव व्यवहारं प्रकरोति यथा परमाचार्य्यः श्री मत्स्येन्द्रनाथो राज शरीरे प्रविष्ट इति गाथा प्रसिद्धा। षष्ठे वर्षे तु शस्त्रैर्न छिद्यते तस्य शरीरम् इति शेषः किञ्च वज्रपातैरपि न बाध्यते ॥३९॥ सप्तमे वर्षे पृथ्वीं विहाय विहायसा वायुवद्वेगशील: सन्द्रुतं गच्छति किञ्च दिव्य चक्षुष्मत्वाद् दूरस्थ वस्तूनामपि द्रष्टा भवति। अष्टमेवत्सरेत्वणिमाद्यैश्वर्य सम्पन्नो जायते ॥४०॥ नवमे वर्षे वज्रवदभेद्यदेहोभवति किञ्च आकाश गामी सर्व दिक् सञ्चरणशीलो जायते। दशमेवायुवद् यत्र गमनेच्छा तत्रैव देशेगच्छत्येकादशेसर्वज्ञः ॥३९॥ द्वादश वर्षे निर्विघ्न समाप्ते ऽसौ योगी शिव तुल्यः सृष्टेः कर्ता हर्ता च स्वयं भवेत्। यद्यप्यनादीश्वर संकल्पवशात् शान्तः सन्निमां सृष्टिं न संहरति न चान्यां प्रकुरुते किन्तु यदीच्छेत् तदा तदपि कर्तुं पारयेदिति योग्यता प्रदर्शनेन शक्तिसद्भावः साध्यते ॥४०॥ स सिद्धः त्रैलोक्ये पूज्यत आद्रियते यथा श्री भैरव एतत् सत्यं मन्तव्यम् ॥४१॥ ॥२४॥

भा० टी० जो गुरुभक्त शिष्य गुरुमन्त्रादि योगदीक्षा से दिक्षित होकर जब योगाभ्यास आरम्भ करता है। तब क्रम से जो योग सामर्थ्य होती है उसी का पूज्य आचार्य नीचे वर्णन करते हैं। योगारम्भ के प्रथम वर्ष में योगाभ्यासी का शरीर रोग रहित और निर्मल हो जाता है। तथा वह सर्वलोक प्रिय होजाता है। क्योंकि वह नित्य अपने आत्मरूप में तत्पर रहता है। अतः उस आत्मरूढ़ सिद्ध के देवता भी दर्शन करना चाहते हैं। दूसरे वर्ष में वह योगाभ्यासी आत्मानन्द में मग्न हुआ मनुष्य जन्म के सफल होने से कृतकृत्य होजाता है और देव पशु, पक्षी आदि से भी बातचीत करने की शक्ति आजाती है। तीसरे वर्ष में उसका शरीर देव तुल्य होजाता है और सर्प व्याघ्र आदि से अवध्य होता है। चौथे वर्ष में वह योगीश्वर भूख, प्यास, नींद, सर्दी और गर्मी आदि से रहित हो दूर के शब्द को भी सुनने लगता है। इसमें सन्देह नहीं। पञ्चम वर्ष में वचन की सिद्धि होती है अर्थात् जो मुख से कह देता है वह सत्य होता है और दूसरे शरीर में प्रवेश होने की शक्ति हो जाती है। छटे वर्ष में तलवार आदि तीक्ष्ण शस्त्रों से भी उसका शरीर नहीं कट सकता और उस समय उसके शरीर पर बिजली या इन्द्र का वज्र भी असर नहीं कर सकता। सप्तम वर्ष में वह योगी पृथ्वी को छोड़कर वायु के सदृश वेगवान होकर ऊपर चलने लगता है और दिव्य दृष्टि से दूर तक की वस्तुओं को भी देखने लगता है। आठवें वर्ष में अणिमादि सकल सिद्धियों से सम्पन्न होजाता है। नवमें वर्ष में वज्र शरीर होजाता है और ऊर्ध्व गति होने से आकाशगामी तथा सब दिशाओं में घूमने का सामर्थ्य आजाती है। दशवें वर्ष में पवन से भी अधिक वेग युक्त होकर आकाश मार्ग से जहाँ इच्छा होती है वहीं शीघ्रगति से चलाजाता है। ग्यारहवें वर्ष में अभ्यास के बढ़जाने से सर्वज्ञ सकल सिद्धियों से युक्त तथा सत्य कर्ता हो जाता है। बारहवें वर्ष में तो शिवजी की तरह स्वयं ही सकल विश्व का कर्त्ता हर्त्ता हो जाता है और भैरव भगवान् की तरह तीनों लोकों में पूजित होता है। यह सत्य है। ३६-३७-३८-३९-४०-४१-४२

मू०- एवं द्वादशवर्षैस्तु सिद्ध योगी महाबलः ।
जायते सद्गुरोः पादप्रभावान्नात्र संशयः ॥४४॥

सं० टी०-एवं पूर्वं क्रमानुष्ठानेन सद्गुरोः पादप्रसादात् सद्गुरु पाद सेवनबलाद् द्वादशवर्षैः महाबलः शिवतुल्यः सिद्धयोगी जायतेऽत्र नास्ति संशयः ॥४४॥

भा० टी०-इस प्रकार सिद्ध अवधूत गुरुदेव के चरणों की कृपा से बारह वर्ष में महा योग बलशाली होजाता है ॥४४॥

मू०-अनुबुभूषतियोनिजविश्रमं,सगुरुपादसरोरुहमाश्रयेत् ।
तदनुसंसरणात्परमंपदं,समरसीकरणंनचदूरतः ॥४५॥

सं० टी०-योमुमुक्षुर्निज विश्रमं स्वकं मोक्ष मनुबुभूषति, अनुभवितु मिच्छति स गुरु पादसरोरुहमाश्रयेदाचार्य चरणेन्दीवरं सेवेत गुरुरेवमूलमत्रे तिव्यज्यते भूयोऽपि तदेवाह तदनुसंसरणादिति गुरुपत्पङ्कजानुगमनात्, नदूरतरत्वरित मेवपरममुत्कृष्टं चरमाव धीति यावत पदंस्थानं समरसीकरणमण्ड पिण्डयोरैक्यं भवतीतिशेषः चकारोनुक्त समुच्चयार्थः ॥४५॥

भा० टी०-अतः जो मुमुक्षु परमशान्ति चाहता है। वह योग तत्त्व के जानने वाले गुरु के चरण कमलों का आश्रय करे। क्योंकि योग विशारद गुरु की बतलाई विधि से जब योगानुष्ठान में तत्पर होगा तभी समरस की प्रणाली से पिण्डसिद्धि और मोक्ष रूप परम पद की प्राप्ति सुलभ होगी ॥४५॥

मू०-गुरुकुलसन्तानंपञ्चधाप्रोक्तम् । आईसन्तानं बिलेश्वरसन्तानंविभूतिसन्तानंनाथसन्तानंयोगीश्वरसन्तानञ्चेत्येषामपिसन्तानानांपृथक्पृथक्वैशिष्ट्यंवर्तते४६

सं० टी०-गुरुकुल सन्तानं योगप्रचाराय आचार्यवंशः वंशोद्विधा विद्यया जन्मनाचेति, अत्र विद्ययैवं वंशःकथितः योगविद्यायाः प्रदाता गुरुः पितृस्थानीयः,ग्रहीता शिष्यःपुत्रस्थानीयोबोध्यः सचवंशः पञ्चधा

पञ्च प्रकारकः प्रोक्तः पारंपर्यात प्रसिद्धः तत्राभ्यर्हितत्वात् प्रथमतः प्र-दर्श्यते आईसन्तानमिति अस्मिन्नेव महासिद्धपुरुषः श्रीमत्तनाथः श्री गोरक्षनाथावताररूपः संजात एतच्चरित्र वैचित्र्य जिज्ञासुभिर्मत्कृतटीका संवलित पंच विंशति सर्गात्मक श्रीमत्तनाथ चरित्र नामकग्रन्थो द्रष्टव्यः तत्पादसञ्चारपरिपूतवर्षाशिष्यसंस्थापितोबोहरस्थानस्थसिंहासनमधिरूढः श्रीपूर्णनाथोयोगीन्द्रःसाम्प्रतंराजते विल्वेश्वरसंतानंद्वितीयंविभूतिसन्तान तृतीयंनाथसन्तानञ्चचतुर्थं योगीश्वरसन्तानंपञ्चमं सर्वेषांस्वरूपतोभेद प्रदर्शनाय सर्वत्र चकारः प्रयुक्तो यथाधवश्च खदिरश्चेति द्वन्द्व वि-ग्रहे न च समासः कुतो न कृतस्तस्य वैकल्पिकत्वात्। ननु द्वादशपथाः सन्ति कथं पञ्चधैवेत्यतआह एतेषामपि सन्तानानां पृथक् पृथक् वैशि-ष्ट्यं वर्त्तते यतकिंचितवैशिष्ट्यमादायैव द्वादशधा, वस्तुत. सर्वेषामत्रा-न्तर्भावेऽपि न क्वापि मन्त्रसिद्धान्तयोः क्षतिः॥४६॥

भा० टी०—अब योग विद्या के प्रचारक सिद्धगुरुओं की वंश परम्परा का वर्णन करते हैं। वह वंश दो प्रकार का होता है। जन्म से विद्या से, जन्म वंश का सम्बन्ध गृहस्थाश्रम में होता है। अवधूत योग सम्प्रदाय में तो केवल विद्याकृत वंशकासम्बन्धजानना। इसीलिये योग सम्प्रदाय में दीक्षित योगी नाद के कहलाते हैं। विन्दु के नहीं। क्योंकि जब मुमुक्षु सिद्धसम्प्रदाय में प्रविष्ट होकर गुरमन्त्रादिदीक्षा से दीक्षित होता है तभी से वह नाद का योगी कहा जाता है। इसका अभिप्राय यह है कि जो नाद शक्ति सम्पन्न परब्रह्म परापश्यन्ती आदि क्रम से समस्त ऋग्वेदादि सृष्टि और भूतादि अर्थ सृष्टि का कारण है वही परमनाथ तत्त्वतू है। अतः योग समाधि में अपनी नाद शक्ति को अभिव्यक्त कर अपने अखण्ड स्वरूप में प्रतिष्ठित हो। तू भ्रम में न न पड़ तू काल का भी काल है तू व्यापक अखण्ड परब्रह्म है। तू दीन न हो। क्यों कि तू ही परम नाथ है। इत्यादि उपदेश से योग सम्प्रदाय में योगी जन शिष्य के दीन भाव को दूर कर नाथ शब्द से अलंकृत कर देते हैं। वहप्राचीन गुरु वंश प्रणाली पांच प्रकार की है। आई नाम विमलाशक्तिका है। इसी को आई नाथ या दयनाथभी कहते हैं। अतः आई नाथ देवी की शिष्य परम्परा का आई सन्तान नाम है। जो इस

समय आई पन्थ नाम से प्रसिद्ध है। दूसरी विलेश्वर गुरु की वंश प्रणाली है। यद्यपि स्वयं वस्त्र रहित दिगम्बर तपस्वी हैं। तथापि शरणागत दीन दुखी श्रद्धालु अधिकारी जनों को पवित्र उपदेश देने तथा उनके दुखों को दूर करने में जो समर्थ हैं वे विलेश्वर वंशपरम्परा के कहलाते हैं और अपनी इच्छा से आसन प्राणायामादि की धारणा में अत्यन्त समर्थ होते हैं। तीसरी विभूति को धारण करने वाली सिद्धगुरु वंश प्रणाली है। जिन्होंने प्रथम योगधारणादि की अच्छी तरह साधना की है। इसी से वे अणिमादि विभूतियों से सम्पन्न कहलाते हैं। अतः सिद्धगुरु योग सामर्थ्य को चाहने वाले मुमुक्षु शिष्यों को योग चमत्कार दिखा कर उन में श्रद्धा उत्पन्न करते हुये उन को आत्म कल्याण के मार्ग पर लगाते हैं। यही विभूति सन्तान है। चौथी नाथ सन्तान (वंश) का वर्णन करते हैं। सकल प्रपञ्च की अपेक्षा से जो अव्याकृत, और उस से भी परे परम नाथ तत्त्व है वही लक्ष्य भूत है। उस लक्ष्य में ही आत्मा के व्यापक रूप को दिखलाते हुये सिद्ध गुरु योग्य अधिकारियों को समरस रूप अभेद के उपदेश की प्रणाली से परम पद मोक्ष को प्राप्त करादेते हैं। अतः व्यापक परमनाथ के स्वरूप को प्राप्त कराने से वे सिद्ध नाथ वंश में गिने जाते हैं। अब पांचवीं योगीश्वर सन्तान का निरूपण करते हैं। पूर्वोक्त व्यापक असङ्ग नाथ तत्त्व में अपने स्वरूप के लय होनेपर सृष्टि आदि क्रिया के करने में भी योगसामर्थ्य का उपयोग करते हुये जो सिद्ध गुरु अधिकारी जनों को योग्यता के अनुकूल उपदेश देते हैं। वे योगीश्वर सन्तान में गिने जाते हैं। उपरोक्त पांच प्रकार से जो सिद्धगुरु वंश परम्परा का संक्षेप से वर्णन किया है। उस परम्परा में भी बहुत से अवान्तर भेद हैं। वे बारह और अठारह शाखाओं में प्रसिद्ध हैं ॥४६॥

मू०--परमार्थतः सर्वं पाञ्चभौतिकंनजाताः पुरुषाः सम्बोधमात्रैकरूप. शिवस्तदितरत्सर्वमज्ञान मव्यक्तं भवति तत्र शिवस्तुज्ञानम् ॥ ४७

सं० टी० परमार्थतः सर्ववस्तुपाञ्चभौतिकम्, अतःपञ्चधैव साम्ता नमुचितमत्र ग्रन्थे सर्वं पंचप्रकारेणैवव्याख्यातमिति न विस्मरणीयम् मजाताअनुत्पन्नाः पुरुषाः जीवात्मानः सम्बोधमात्रैकरूपः चिन्मा त्र रूपः शिवस्तदितरत् तद्भिन्नं सत्रमज्ञानं जडरूपमव्यक्तम् जडोपादान म्प्रकृति रिति सर्वं पेण पदार्थ वर्णनं सृष्टिरेव वंशास्तस्य कर्त्तागुरु रतः पंचभूत स्थानीयाः पंचगुरवस्तेषां वंशाः सर्गा ॥४७॥

भा० टी०—यथार्थ में संसार की सबवस्तुएं पाँचभूतों से बनी हैं। इसी से इस ग्रन्थ के उत्पत्ति प्रकरण में प्रत्येक वस्तु का पाँच पाँच प्रकार से निरूपण किया है। अतः सिद्ध गुरुओं की वंश प्रणाली को भी आचार्य ने पाँच भागों में विभक्त किया है। यदि पांचभौतिक सकल प्रपंच की उत्पत्ति होती है तो आत्मा उत्पन्न होता है या नहीं ? इस शंका का उत्तर यह है—आत्मा की उत्पत्ति नहीं होती क्यों कि यह आत्मा अखण्ड चेतन ज्योतिः स्वरूप एक और व्यापक शिव है। यहाँ आत्मा की उत्पत्ति का निषेध आत्मा में जन्म मरणादि सकल विकारों के निषेध का भी द्योतक है। आत्मा जन्म मरण वृद्धि ह्रास आदि विकारों से शून्य आकाश की तरह व्यापक असङ्ग चेतन और सर्वान्तर्यामी है। उसी व्यापक आत्मा के रूप के ज्ञान से अमृत रूप परमपद की प्राप्ति होती है। और आत्मा से भिन्न समस्त प्रपञ्च अज्ञान रूप है। क्योंकि अज्ञान अव्यक्तादि नाम से बोधित माया का कार्य होने से यह जगत् भी मिथ्या कहलाता है। केवल शिव ही चेतन विज्ञानमय और सर्वत्र व्यापक है ॥४७॥

मू०—एतेषामपिसन्तानानांकेचित्स्वरूप
पराङ्मुखा वेशमात्रसम्पन्नाः क्रयविक्रयादिकं कुर्वन्ति
सन्तानभेदंप्रत्यन्योन्यमधःकुर्वन्तियोगमार्गं द्वेषयन्ति ४८
रजसाघोर संकल्पाःकामुकाअतिमन्यवः ।
दाम्भिका मानिनः पापा धिक्कुर्वन्तीश्वरप्रियान् ॥ ४९
साधुसंगमसच्छास्त्रपरमानन्दलक्षितान् ।

स्वेच्छाचारविहारैकज्ञानविज्ञानसंयुतान् ॥ ५०

यूयं शिष्टा वयं दुष्टा दुष्टा यूयं वयं तथा ।

एवं वदन्ति चान्योन्यं प्रमोहेननिरन्तरम् ॥५१॥

सं० टी०— एतेषां विद्यमानानां संतानानां वंशानां मध्ये केचिज्ज जनाः स्वरूपपराङ्मुखा आत्मचिन्तनतो विरक्ताः कृयविकृयादिकं सांसारिक व्यवहारं कुर्वन्ति, अन्योऽन्यं परस्परं सन्तान भेदं प्रति भेदबुद्धिं कुर्वन्ति रागद्वेष समाकुला भवन्ति । अत एव योगमार्गं वास्तविक श्रेयः साधनं द्वेषयन्ति निन्दन्ति रजसा रजोगुणबलेन घोर संकल्पाः सांसारिकविषयचिन्तनतत्पराः कामुकाः कामान्धा अतिमन्यवः अत्यन्तक्रोधिनः स्वात्मानमधिकं मन्यमानाः पापाः पापवन्तोः जनाः ईश्वरप्रियान् परमेश्वरभक्तान् । साधुसंगमः साधुसहवासः सच्छास्त्राणि आत्मपरमात्मबोधकानि योगवेदान्तादि शास्त्राणि यो यः परमानन्दस्तेन लक्षितान् संयुतान् परमानन्दानुभवशालिनः स्वेच्छाचारविहारौ चानियत कमनिवासौ एक विज्ञानं आत्मैक्य बोध स्ताभ्यां संयुक्तान् संहितान् सज्जनान् धिक् कुर्वन्ति व्यवहारा नभिज्ञतानपुंस्कादिदोषं प्रदर्श्य निन्दन्ति । कस्यचित् सत्कार करण काले दुष्टत्वेऽपि यूयं शिष्टाः स्वरूपस्य शिष्टत्वेऽ पि वयं दुष्टाः किञ्च मित्रादि साहाय्यकाले यदि यूयं दुष्टास्तथा वयमपि भवामइत्येवं प्रमोहेनाज्ञतया निरन्तर परिवदन्ति ॥ ४८-४९-५०-५१

भा० टी०—उक्त वंश परम्परा में भी बहुत से अपने योगधर्म को छोड़ कर केवल वेष मात्र को धारण किये क्रय विक्रयादि लौकिक व्यापार में तत्पर रहते हैं और इस वेश परम्परा में प्रेमीजनों का तिरस्कार कर जो योग मार्ग से द्वेष करते हैं उन द्वेषी जनों के स्वभाव का निम्न प्रकार से वर्णन किया जाता है । उक्त योग मार्ग के द्वेषी और रजोगुणी जनों के मनोरथ भी अति दारुण होते हैं जिन का पूरा होना भी असंभव है । इसी से वे भोग्यविषय के इच्छुक होते हैं और यदि उनके काम का विघात होजाय तो क्षणभर में अत्यन्त क्रुद्ध

होजाते हैं ऐसे कपट स्वभाव दम्भी अभिमानी और रागद्वेषादि से दूषित अन्तः करण वाले वे पापी सज्जन साधुओं के संग से और योगादि उत्तम शास्त्रों के अभ्यास से परमानन्द रूप मोक्ष पद को ही लक्ष्य करने वाले स्वच्छन्द गति से विचरने वाले और आत्मा के अनुभव से सम्पन्न ईश्वर भक्तों को धिक्कारते हैं कि तुम लोग अपने को शिक्षित एवं सभ्य मानते हो और हम को दुष्ट समझते हो परन्तु ऐसा नहीं है किन्तु तुम ही दुष्ट असभ्य और मूर्ख हो और हम शिक्षित बुद्धिमान् तथा सभ्य हैं। इस प्रकार अज्ञान से आपस में निन्दित वचनों का प्रयोग करते हैं। अतः जगत को राग द्वेष से परिपूर्ण देखकर योगी को आत्म निष्ठ होकर एकान्त में रहना चाहिये ॥५१॥

मू०—पृथ्वीजलं तथा वह्निर्वायुराकाशमेव च
ऐते सन्तानो दयास्तु सम्यगेव प्रकीर्तिताः ५२

सं० टी०—शक्ति सम्वलितशिवस्य स्वीय प्रकृत्युत्पादितानि पंचभूतानि पंचशरीराणि तदधिष्ठातारश्च पुरुषाः पञ्च पुत्रास्ते एव पंचदेवाः गुरुकुल सन्तानपदेनोक्ताः अत्रविशद व्याख्यायन्ते पृथिव्यादि पंचभूतानि संतानोदया सम्यगेव प्रकीर्तिताः सन्तानानां निखिल प्रजानां भौतिकशरीराणामुत्पत्ति स्थानानि कारणानि रूपाणि उदीयन्ते अस्मिन्नित्युदया अधिकरणसाधनश्चायम ॥५२॥

भा० टी०—अब पञ्चभूत सन्तान का वर्णन करते हैं—पृथिवी, जल, अग्नि, वायु, आकाश यह पंचभूत सन्तान कहलाता है और ये सब श्री आदिनाथ की शक्ति से उत्पन्न हुए हैं। इनकी उत्पत्ति का वर्णन पहले अच्छी प्रकार से हो चुका है ॥५२॥

मू०—काठिन्यं चार्द्रता तेजो धावनंस्थिरता खलु।
गुणाएतेच पञ्चैव सन्तानानां क्रमात्स्मृताः ॥५३
ब्रह्माविष्णुश्चरुद्रश्च ईश्वरश्च सदाशिवः।
एताश्चदेवताःप्रोक्तासन्तानानां क्रमेण तु५४

सं० टी०—पृथिव्याः काठिन्यं गुणः ब्रह्मा तदधिष्ठाता देवः, ज-

लस्याद्रता गुणो विष्णुश्चाधिष्ठातृदेव एवं यथा संख्यक्रमेणैकैकभूतस्यै को गुणः देवश्च संतापनोदः। अयमाशयः पराशक्ति सहितः परमात्मा शिव आदिनाथः प्रोच्यते स एवाकाशं समुत्पाद्य तदधितिष्ठन् सदा शिव शब्देन वायुमुत्पाद्य तदभिमानृत्वेन ईश्वर पदेन तेजोधिष्ठाता रुद्रनाम्ना जलाभिमानी विष्णु संज्ञया पृथिव्यन्तर्यामी ब्रह्माभिधया च व्यवह्रियते तथा च भौतिक प्रजाना मेतेपंचदेवाः गुरवः तेषामप्यादिनाथो गुरु रतः सर्गेषां गुरुरादिनाथः सर्वतो गरीयानिति प्रकरण रहस्यम् पंचदेवोपासनायाश्चेदमेव तत्त्वं यत्कार्यरूपेणावस्थाभेदेन च पंचानां परस्परस्वरूपभेदेऽपि कारणरूपेणादिनाथाभिन्नतया ऐक्यमेव॥५४

भा० टी०—अब पांच भूतों के गुण और अधिष्ठाता देवों का वर्णन करते हैं। पृथिवी का कठोरता आदि गुण और ब्रह्मा अधिष्ठातृ देवता है। जल का द्रव (गीलापन) गुण और विष्णु देवता है। अग्नि का उष्ण गुण और रुद्र देवता है। वायु का चलना गुण और ईश्वर देवता है। आकाश का स्थिर (अचल) गुण और सदा शिव अधिष्ठाता है॥५४॥

मू०-स्थूलसूक्ष्मकारणतुर्यं तुर्यातीतमिति पञ्चावस्थाः क्रमेण लक्ष्यन्ते एतेषामपि सर्वेषां विज्ञाता यः स योगी ससिद्धपुरुषः स योगीश्वरेश्वर इति परमरहस्यं प्रकाशितम् ॥५५॥

सं० टी०—यथैव पूर्वं सर्वं पञ्चात्मकं व्याख्यातं तथैवावस्थापि पञ्चधैव प्रतिपाद्यते जाग्रत् स्थूलावस्था। स्वप्नः सूक्ष्मावस्था सुषुप्तिः कारणावस्था। समाधिः तुर्यावस्था। अस्यामपि वृत्ति सद्भावः तस्या विनाशे शुद्धमुक्तावस्था। तुर्यातीतावस्था। एताः क्रमेण पर्यायेण न न युगपत् लक्ष्यन्ते लोकैः स्वयमेवानुभूयंते एतेषां पूर्वोक्त वस्तूनां योज्ञ ऽनुभविष्णुः ससाधनेकाले पश्चात् स योगी योगीश्वरेश्वरः सिद्धपुरुषः सम्मतइ इति परम रहस्यम् प्रकाशित मनेनाचार्यस्य प्रजासु कारुण्यातिशय इति व्यज्यते ॥३६॥५५॥

भा० टी०—जाग्रत स्वप्न सुषुप्ति ये तीन अवस्थाएं एवं तुर्य (समाधि) और मोक्ष ये पाँच अवस्थाएं लक्षित होती हैं । भाव यह है कि योग की सात भूमिकाएं होती हैं । नित्या नित्य वस्तु के विवेक पूर्वक तीव्र मुमुक्षारूप शुभेच्छा को योग की प्रथम भूमिका कहते हैं । इस के उपरान्त गुरु के पास से गुरुमन्त्रादि योग दीक्षा को ग्रहण कर उपनिषद् और योग शास्त्र के श्रवण और मननात्मक दूसरी विचारणा नाम की भूमिका है । मन में अनेक संकल्प विकल्पों का जो प्रवाह उठता है उसको आसन प्राणायामादि और निदिध्यासन के बल से आत्मा में विजय कर केवल आत्म रूप सूक्ष्म पदार्थ के ग्रहण में तत्पर होना तनुमानसानाम की तीसरी योगभूमिका है । ये तीन साधन भूमिकाएं जाग्रत कहलाती हैं । क्योंकि इन में भेद बुद्धि से प्रतीत होने वाला यह जगत द्वैत रूप से स्फुरित रहता है । पूर्वोक्त तीन भूमिकाओं के अच्छी तरह साधन से जब अन्तः करण अत्यन्त शुद्ध होजाता है । तब वह योगी "अहं ब्रह्मास्मि,, मैं ब्रह्म हूँ इस प्रकार सब जगह दृढ़ अभेदात्म द्रष्टा होजाता है और समस्त प्रपञ्च को स्वप्न तुल्य देखता है । क्यों कि अद्वैत आत्म पदार्थ के स्थिर होजाने से उस योगी को समाधि के अभ्यास से समस्त जगत स्वप्न की तरह मिथ्या प्रतीत होने लगता है । अत: केवल आत्मा को ही दृढ़रूप से बोधन करने वाली और आत्मा से भिन्न समस्त जगत को मिथ्या दर्शाने वाली यह सत्त्वापत्ति नाम की चौथी भूमिका है । इसी को स्वप्नावस्था भी कहते हैं । क्यों कि इस अवस्था में आत्मा से भिन्न सबको स्वप्नवत मिथ्या देखता है । यह योग भूमि उक्त तीन योग भूमिका साधनों के बिना सिद्ध नहीं होती ।

इस चतुर्थ भूमिका को प्राप्त हुआ योगी ब्रह्मवित् कहलाता है । आगे की तीन भूमिकाएं क्रम से जीवन मुक्ति रूप कहलाती हैं । क्योंकि चौथी भूमिका से ही जब सिद्धियों का प्रादुर्भाव होता है । तब उनमें आसक्त न होना ही असंसक्ति नाम की पञ्चम योग भूमिका सिद्ध हो जाती है । इसको सुषुप्ति रूप भी कहते हैं क्योंकि निर्विकल्प योग समाधि की परिपक्व निष्ठा से केवल आत्मानन्द में मग्न हुआ योगी

सांसारिक बाह्य व्यापार से सोया सा रहता है इस योग भूमिका को जब योगी प्राप्त होता है तब उसको ब्रह्म वेत्ताओं में श्रेष्ठ कहते हैं और उस समय वह योगी समाधि से स्वयं ही प्रवुद्ध हो जाता है। जिसमें ब्रह्म से अतिरिक्त दूसरे पदार्थ की भावना न कर केवल योगाभ्यास से चिरकाल तक आत्मानन्द में ही स्थित रहता है। उसको पदार्थभाविनी नाम की छठी भूमिका कहते हैं। इसको गाढ़ सुषुप्ति भी कहते हैं। क्योंकि इस भूमिका में जब योगी पहुँचता है। तब वह अन्य सिद्ध के बोधनमात्र से ही जाग्रत होजाता है। अन्यथा एकाग्र समाधि में शून्याकार हो रहता है। तब वह योगी ब्रह्मविद् वरीयान् कहलाता है। तुर्यगा नामकी सातवीं योग भूमिका है। इसमें प्राप्त हुआ योगी तो दूसरे के व्यापार से भी नहीं जागता। इस भूमिका को प्राप्त हुआ योगी ब्रह्मविद् वरिष्ठ कहलाता है। यानि छठी भूमिका से सातवीं भूमिका में पहुंचने वाला योगी कभी कुछ निमेष उन्मेष आदि व्यापार करता हो या न करता हो विदेह मुक्त कहलाता है। क्योंकि उसको देह का जरा भी भान नहीं रहता। इस लिये सप्तमी योग भूमिका विदेह मुक्ति रूप भी कहलाती है यह सब योग भूमिकाओं की चरम सीमा है और मन वाणी से भी अगोचर है—

ज्ञानभूमि शुभेच्छाख्या प्रथमा परिकीर्तिता।
विचारणाद्वितीयास्यात्तृतीया तनुमानसा॥
सत्वापत्तिश्चतुर्थीस्यात्ततोऽसंसक्तिनामिका।
पदार्थाभाविनी षष्ठी सप्तमी तुर्यगा स्मृता॥
भूमिका तृतीयं त्वेतन्नाम जाग्रत मिति स्थितम्।
यावद्भेद बुद्धय दंजगज्जाग्रति दृश्यते
अद्वैते स्थैर्यमायाते द्वैते प्रशम मागते।
पश्यन्ति स्वप्न वल्लोकं चतुर्थी भूमिकामिता॥
पञ्चमी भूमिका मेत्य सुषुप्ति पदनामिकाम्।
षष्ठी गाढ शुषुप्त्याख्यां क्रमात्पतति भूमिकाम्॥
षष्ठयां भूम्यामसौ स्थित्वा सप्तमी भूमिमाप्नुयात्।
किञ्चिदेवेश सम्पन्न स्त्वथवैषम किञ्चन॥

विदेह मुक्तता तूक्ता सप्तमी योग भूमिका ।
अगम्या वचसां शान्ता सासीमा योग भूमिषु ॥

पूर्वोक्त योग भूमिकाओं के साधन से योगी अजरामर व्यापक और स्वयं शिव होजाता है। इसी से मूल ग्रन्थ में कहा है "जाग्रत्, स्वप्न, सुषुप्ति, तुर्या, तुर्यातीत" इत्यादि । यहां आगे अपि शब्द भी आया है उससे यह भाव निकलता है कि योग की सात भूमिकाएं भी उक्त पाँचों अवस्थाओं के अवान्तर भेद हैं । इनको जो योगी योग के अनुभव से जानता है वही यथार्थ योगी और वही काल को जीतने वाला सिद्ध पुरुष भी है । अधिक क्या कहें जीवन्मुक्त भी वह साक्षात् पर ब्रह्म स्वरूप होने से योगीश्वरों का भी ईश्वर है यह परम रहस्य है ॥५५॥

मू०—अतएव सम्यग् निज विश्रान्तिकारकं महासिद्धयोगिनं सद्गुरुं सेवयित्वा सम्यक् सावधानेन परमंपदं संपाद्य तस्मिन्निज पिण्डे च समरसभावं कृत्वा त्यन्त निरुत्थानेन सर्वानन्दत्वेनिश्चलंस्थातव्यं ततः स्वयमेव महासिद्धो भवतीति सत्यम् ॥५६॥

सं० टी०—समरस भावनाया मोक्षादिसिद्धि प्रदत्वादेव सम्यग् निजविश्रान्तिकारकम् । योहि स्वयमेव संसारचक्रारूढोऽनवरतं बंभ्रम्य मागः स च कथमन्यं विश्रामधामाधिरोहयेत् । अतः योहि समीचीनतया निजस्य स्वस्य विश्रान्तिः मोक्षाख्यविश्रामस्तस्य कारकं साधक ।मतएव महायोगिनं योगिराज तं सद्गुरुं सेवयित्वा व्युत्थान दशायां गुरुसेवनं न तु समाधाविति सूचनाय क्त्वा प्रयोगः (सम्यग्) अशेषतः सावधानेन भ्रमप्रमादरहितः सन् परमं पदं सम्पाद्य परमात्म स्वरूपमवगत्य तस्मिन परमात्मनि निज पिण्डे स्वकीय पिण्डे समरसभावं पूर्वोक्तरूपेणाभेदभावनां कृत्वा विधायात्यन्त निरुत्थानेन सांसारिक विषयोन्मुखता परिहारेण, आत्यन्तिकात्म निष्ठतया सर्वदानन्दत्वे सच्चिदानन्दघने निश्चलं नियतकालावधि पुनरुत्थान वर्जितं यथास्यात् तथा स्थातव्यम्, समुपासितव्यम् वादशाद्वाभ्यासात् स्वयमेव प्रयत्नान्तर निरपेक्ष तयैव महासिद्धो भवतीति सत्यं ना-

रित्र सन्देहावसरः स्वानुभवावसानत्वात् ॥५६॥

भा० टी०—अत एव पूर्वोक्त तुर्यादि आत्म निष्ठा सम्पादन के लिये अच्छी तरह निज आत्म निष्ठारूप परम शान्ति को कराने वाले महासिद्ध योगिराज सद्गुरु की सेवा कर बड़ी सावधानी से परमपद को जानकर व्यापक परमपद में और व्यष्टिनिज पिण्ड में पूर्वोक्त परस्पर धेयावलम्बन की रीति से अभेद रूप समरस कर के अनादिअज्ञान रूप माया से सचेत हुआ वह योगी सर्वानन्द व्यापक अपने आत्मा में अचल भाव से स्थित हो जाय। उस के बाद स्वयं महासिद्ध होजाता है। ऐसा महासिद्ध होजाने पर उसका कर्तव्याकर्तव्य कुछ भी बाकी नहीं रहता ॥५६॥

मू०—न विधिर्नैव वर्णश्च न वर्ज्यावर्ज्य कल्पना।
न भेदो निधनं किंचिन्नाशौचं नोदकक्रिया ॥५७
योगीश्वरेश्वरस्यैवं नित्यतृप्तस्य योगिनः।
चित्स्वात्मसुखविश्रान्तिभावलब्धस्यपुण्यतः ॥५८॥
सम्यक् स्वभाव विज्ञानात् क्रमाभ्यासान्नवासनात्
न वैराग्यान्ननैराश्या न्नाहारात्प्राणधारणात् ॥५९
न मुद्राधारणाद्योगान्मौन कर्मसमाश्रयात्।
न विरक्तौ वृथायासान्नकाय क्लेशधारणात् ६०
न देवार्चनाश्रयाद् भक्तयानाश्रमाणां च पालनात् ॥
न षड्दर्शनकेशादि धारणान्न च मुंडनात्। ६१
न जपान्नतपोध्यानान्नयज्ञतीर्थसेवनात्।
ना नन्तोपाय यत्नेभ्यः प्राप्यते परमंपदम् ॥ ६२

सं० टी०—कुलकमेते श्लोका अतो व्युत्क्रम्य व्याख्येयाः पुण्यत इह जन्मनि पूर्वजन्मनि वा समुपार्जितपुण्यपुञ्ज प्रभावेण सम्यग् यथार्थतः स्वभावस्यात्मस्वरूपस्य विज्ञानात्।

आचार्योपदेश जनित ज्ञान बलात् पश्चात् क्रमाभ्यासात् पूर्वोक्तक्रमेणाभ्यास बलात् चित्स्वात्म सुख विश्रान्तिभाव लब्धस्य परमानन्दैक विश्रामधाम समीयुषः, नित्य तृप्तस्य क्षुत्पिपासादिरहितस्य योगिनः साम्प्रतं योगीश्वरेभ्यस्य कृते सिद्धावस्थायां न विधिः प्रेरणा नैव वर्णाः न च वर्ज्यावर्ज्य कल्पनेदं वर्जनीयमिदं न वर्जनीयमित्यादि, आज्ञा निषेधौ न भवतः। न भेदो न च निधनं मरणं च मरणादि जन्यम् अशौचं नोदक क्रिया तर्पणादि। इदमत्र रहस्यं मोक्षरूपसिद्धिं प्रति गुरुद्वारात्म विज्ञान तदभ्यास एव साक्षात् कारणं नान्यत्। आसन वैराग्यादयस्तु परम्परया तत्त्व ज्ञानोत्पादने साहाय्य सम्पादन द्वारा कारणं न तु साक्षात्। अतएव साक्षात् कारणस्य तत्त्वज्ञानस्य प्रशंसायै, अग्रे निषेधति न चासनात् वैराग्यादिभ्यः परं पदं प्राप्यत इति न त्वासन वैराग्यादीनां सर्वथा वैयर्थ्ये बोधनाय तेषां स्वस्वफलैः सफलत्वादन्यत् सर्वं स्पष्टम्॥६२॥

भा० टी०—पूर्वजन्म में उपार्जित पुण्य कर्म के बल से सिद्ध-गुरु के उपदेश द्वारा आत्मा को अच्छी प्रकार से जानकर क्रम से योगाभ्यास की परिपक्व निष्ठा से चेतन व्यापक आनन्द घन निज आत्मा के सुख रूप विश्रान्ति भाव को प्राप्त होने पर आत्मानन्द में तृप्त हुआ योगी जब परब्रह्म स्वरूप होजाता है तब वह महासिद्ध अवस्था को प्राप्त होने से योगीश्वरों का भी ईश्वर कहलाता है। ऐसे सिद्ध के लिये न शास्त्रीय विधि और न निषेध है, न वर्णाश्रम न वर्ज्यावर्ज्य विचार और न ग्रहण या त्याग की कल्पना है। न भेद है न उसका जरामरण है क्योंकि वह काल का भी काल है। उसके लिये न अशुद्धि और न जलक्रियां ही है। भावार्थ यह है कि मोक्ष रूप परमपद की प्राप्ति के लिये गुरु मुख द्वारा आत्मज्ञान और योगानुष्ठान का अभ्यास ही आत्मा के साक्षात्कार में कारण है। उक्त साधन के बिना न केवल आसन न वैराग्य, न निराशा न प्रत्याहार न प्राणायाम न मुद्राधारण न योग न मौन रहना, न तितिक्षा न देव पूजा न आश्रम सेवा न षड्दर्शन केशादि धारण न मुण्डन न जप तप ध्यान न यज्ञ न तीर्थ सेवन और न अनन्त उपायों से परमपद प्राप्त होता है॥६२॥

मू०—एतानि साधनानि सर्वाणि दैहिकानि परित्य ज्य परमपदेऽदैहिके स्थीयते सिद्धपुरुषैरिति ॥ ६३ ॥

सं० टी०—एतानि पूर्वोक्तानि, आसनवैराग्यादीनि सर्वाणि दैहिकानि स्थूल देहसम्बन्धीनि साधनानि परित्यज्य सिद्धावस्थायां कृतकार्य्ये तया विहाय परस्मै पदे दैहिके परमात्मरूप देहे सिद्ध पुरुषैः स्थीयते सिद्धाः परमात्मस्था भवंतीति यावत् ॥६३॥

भा० टी०—उपरोक्त सब साधन देह सम्बन्धी हैं। अतः इन अनात्म पदार्थों में आसक्त न हो कर आत्म रूप परमपद में ही सिद्ध योगि राज स्थित रहते हैं। अतः परमपद से आत्म निष्ठा में ही ऊपर के साधनों का उपयोग होना उचित है। अन्यथा नहीं ॥६३॥

मू०—तत् कथङ् गुरुदृक् पातनात् प्रायो दृढानां सत्यवादिनांसास्थितिर्जायते ।६४

कथनाच्छक्ति पाताद्वा यद्वापादावलोकनात् ।

प्रसादात्स्वगुरोः सम्यक्प्राप्यते परमंपदम् ॥६५॥

सं० टी०—ननु तत् कथम्प्राप्यते। इति प्रश्न पूर्वकमुत्तरमाह गुरुदृक् पातनादाचार्य्य करुणा कटाक्षोन्मेषात्, किं सर्वेषानेत्याह प्रा यइत्यादिप्रायोदृढानां प्रवलवित्त पंविना स्थिरचित्तानांसत्यवादिनां मिथ्या भिभाषणवहिर्मुखाणां सा स्थितिःपरमात्मनिष्ठा जायते। गुरुकृपैव श्र-द्धादि द्वारात्मनिष्ठतां प्रति मुख्य कारणमितिभावः तत्र प्रकारमाह स्व-गुरोः, जयः जयो भवत्विति कथनादाशीर्वचनादिति भावः शक्तिपाताद्वा अकथयित्वैव किंचिदपि सूक्ष्म व्यापारेण शिष्येषु शक्ति संचारादथवा वलोकनाद् दृष्टि मात्रात् किं वा प्रसादात् मनः सन्तोषात् मानसिक प्रीतिरेव परमं पदं प्राप्यते गुरुणा शिष्य इत्यध्याहारोऽस्यन्तात् प्रयोज्य कर्मणि लट् श्री गोरक्षनाथैरेव वाक्यपदीयकार भर्तृहर्यादिषु शक्तिसंचारः पूर्णादिषु कृपावलोकनं कृतमितिच प्रसिद्धम् ॥६५॥

भा० टी०—जिस आत्म निष्टा में सिद्ध योगी स्थित रहते हैं वह आत्म निष्ठा किसको कैसे प्राप्त होती है इसका उत्तर सुनिये गुरु-

भक्त श्रद्धालु धीर सत्यवादि शिष्यों को वह आत्म निष्ठा पूज्य गुरुदेव की करुणा दृष्टि के पात से सुलभ होजाती है। श्रुति में भी कहा है कि जिसकी महेश आदि देवों के समान पूज्यगुरु में भी भक्ति है। ऐसे गुरु भक्त श्रद्धालु जनों को आत्म निष्ठा आदि पदार्थ प्रकाशित होते हैं। औपदेशिक, शक्तिपात, करुणावलोकन भेद से तीन प्रकार की शिक्षा होती है। औपदेशिक शिक्षा वह कहलाती है जिससे गुरु संसार को स्वप्न तुल्य मिथ्या बतलाता हुआ आत्मा के शुद्ध, बुद्ध, मुक्त स्वभाव निरंजन, अखण्ड ज्योतिः स्वरूप में शिष्य को योगादि साधन द्वारा भले प्रकार से स्थित करे। जो आस्तिक श्रद्धालु शिष्य अत्यन्त मन्द बुद्धि है किन्तु गुरु उसको उसी क्षण कृतार्थ करना चाहता है उस समय सिद्धयोगिराज गुरु निज कृपा पात्र शिष्य में अपनी अलौकिक योग शक्ति का पात करता है। तब वह शिष्य भी गुरु जैसा ही समर्थ और त्रिकालदर्शी होजाता है। जैसे योगाचार्य श्री गोरक्षनाथ जी ने अनेक भर्तृहरि आदि शिष्यों को इसी शक्तिपात की शिक्षा से अमर किया है। "जब लग धर्त्री तब लग भर्तृ, जायगी धर्त्री रहेगे भर्तृ।" इत्यादि कहावतें भी प्रसिद्ध हैं। इसी को शक्तिपात शिक्षा कहते हैं। इस शिक्षा को महासिद्ध योगी और ईश्वर के बिना दूसरा नहीं दे सकता। जिस को प्रेम भरी दृष्टि से देख कर कृतार्थ किया जाय जैसे योगाचार्य जी ने विकल अङ्ग पूर्णभक्त को करुणावलोकन मात्र से ही सर्वाङ्ग सजीव और अमर किया था, इस को करुणावलोकन शिक्षा कहते हैं। यह शिक्षा भी सिद्धयोगी और ईश्वर की ही सफल होती है। अतः उपरोक्त तीन शिक्षाएं और आशीर्वाद आदि गुरु प्रसाद से ही मोक्षरूप परमपद की प्राप्ति होती है॥ ६५॥

मू०—अतएव शिवेनोक्तम्।

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं नगुरोरधिकम्
शिवशासनतःशिवशासनतःशिवशासनतःशिवशासनतः ६६

सं० टी०—शिवशासनतः शिवोपदेशाज् ज्ञायते यद् गुरोरधिक मुत्तमं साधनं न किमप्यस्ति महीतले ऽत्र वीप्सायां द्वित्वेन आवश्यकतां ध्वनयति ॥६६॥

भा० टी०—अत एव शिवजी ने भी कहा है कि मोक्ष के कपाट खोलने में गुरु से बढकर अन्य कोई भी उपाय नहीं। इसी बात को पुष्ट करने के लिये शिवोक्त श्लोक में चार आवृत्ति की हैं। अतः लखचौरासी के धन्दे को आत्म ज्ञान द्वारा समूलोच्छेद कर परम मोक्ष के देने वाले अवधूत सिद्ध गुरुको साक्षात् शिवही समझे ॥६६॥

मू०--वाङ्मात्राद्वाथदृक्पाताद्यःकरोतिच तत्क्षणात्।
प्रस्फुटं शांभवंवेद्यं स्वसंवेद्यं परं पदम् ॥ ६७ ॥

मू०–करुणा खण्डपातेन छित्त्वा पाशाष्टकं शिशोः।
सम्यगानन्द जनकः सद्गुरुःसोभिधीयते ॥६८॥

सं० टी०–किंच[करुणाऽखण्डपातेन]दयारूपाखण्ड दृष्टिपातेन [शिशोः] शिष्यस्य [पाशाष्टकम्] जन्ममृत्यु जरा व्याधि धर्माधर्मद्वेषात्मकं बन्धन जालं[छित्त्वा]दूरीकृत्य[सम्यगानन्द जनकः]परिपूर्णानन्दात्मक निज देहोत्पादकः[यः]सः सद्गुरुः, अभिधीयते,कथ्यते अतोऽन्यः साधारणोगुरुरितियुग्मतया सद्गुरुलक्षणमाह- [वाङ् मात्रात्] आशीर्वचनादेव [अथवा दृक् पातात्] अवलोकन मात्रात् [तत्क्षणात्] तस्मिन्नेव क्षणे [प्रस्फुटम्] स्पष्टम् [वेद्यम् ज्ञातव्यम् [शांभवम्]शिवसम्बन्धि [परम पदम्] वास्तविक तत्त्वम् [स्व संवेद्यम्] शिष्यस्य स्वानुभवावसानं करोति ॥ ६७-६८ ॥

भा० टी०–जो गुरु क्षणमात्र में अपने अनुभव से जानने योग्य परमपद मोक्ष को मधुर उपदेश मात्र से या करुणा दृष्टि पात से अभिव्यक्त करदेता है। तथा उस कृपादृष्टि से शिष्यके जरामरण काम क्रोध लोभ, मोह, अहंकार और अविद्या इन आठ बन्धनों का विनाश कर आत्म ज्ञान के द्वारा अच्छी तरह आनन्द को प्राप्त कराता है वह सद्गुरु कहलाता है ।६७-६८

मू०–निमिषार्धार्धपाताद्वा यद्वा पादावलोकनात्।
स्वात्मानं स्थिरमाधत्ते तस्मै श्री गुरवेनमः॥६९॥

सं० टी०—यस्य निमिषचतुर्थांश पातात् कटाक्ष लेशादपीति यावत् यद्वा [पादावलोकनात्] चरणदर्शनात्,शिष्य इतिशेषः [स्वात्मानं] स्वान्तः करणं [स्थिरं] निश्चलं समाधत्ते कुरुते तस्मै प्रभावशालिने श्री गुरवेनमः प्रह्वीभावोऽस्तु ॥६६॥

भा० टी० शिष्य के द्वारा निज चरण कमल के ध्यान से प्रसन्न हुआ गुरु निमेष के चतुर्थांश दृष्टिपात से शिष्य को निज आत्मानन्द में स्थिर कर देता है। अतः उस परमपद शान्तिदाता श्री गुरुदेव को प्रणाम है ॥६६॥

मू –नानाविकल्पविश्रान्तिकथया कुरुते तुयः।
सद्गुरुः सतु विज्ञेयो नतु मिथ्या विडम्बकः॥
अतएव परमपद प्राप्त्यर्थं स सद्गुरुः सदावन्दनीयः॥७०॥

सं० टी०—किंच यः कथया स्वोपदेशेन (नाना विकल्प विश्रान्तिम्) निखिल सांसारिकविषयकविविधकोटिक विज्ञानविनाशं समस्त संशयोच्छेदमिति यावत् कुरुते विधत्ते स एव सद्गुरु विज्ञेयो न तु मिथ्याविडम्बकः–आपात रमणीय मायिक वस्तूपदर्शनेन वञ्चकः अत एव गुरोः प्रधानत्वादेव (सः) सद्गुरुः (सदावंदनीयः) सर्वदा पूजनीय इति ॥७०॥

भा० टी० आत्म स्वरूप बोधक पवित्र और आध्यात्मिक कथाओं से शिष्य के मन में स्थित नाना संकल्प विकल्प भेद आदि विकार की शान्ति को करने वाला ही सद्गुरु कहलाता है आत्म कल्याण से वंचित करनेवाला मिथ्यावादी धूर्त नहीं। अतः परमपद की प्राप्ति के लिये सद्गुरु सदा वन्दनीय है ॥७०॥

मू०–गुरुरिति गृणातिशं सम्यक् चैतन्यविश्रान्ति मुपदिशति विश्रान्त्या स्वयमेव परात्परं परमपदमेव प्रस्फुटं भवति तत्क्षणात् साक्षात्कारोभवति ॥७१॥

सं० टी०—यो गुरुः (गृणातिशम्)कल्याणमाधत्ते यत्सम्यक् चै

तन्यं परिपूर्णं विज्ञान घनं तस्मिन् विश्रान्ति निष्ठामुपदिशति विश्रान्त्या तन्निष्ठया स्वयमेव साधनान्तर निरपेक्षं सत (परात) अस्मदाद्यपेक्षया हिरण्यगर्भ देवादि परं ततोपि परं समुत्कृष्टं परम पदं शिव तत्त्वं प्रस्फुटं भ्रम संशय रहितं निश्चितं भवतितत्क्षणात्) तत्कालं शिवस्य साक्षात्कारो भवति॥४०॥

भा० टी०—अब गुरु शब्द के अवयवार्थ का वर्णन करते हैं। शिष्य के अन्तः करणस्थ अज्ञान पटल का समूलोच्छेद कर, जो कल्याण का मार्ग बतलावे अर्थात् वास्तविक निज आत्मानन्द चैतन्य विश्रान्ति का जो उपदेश दे वही सद्गुरु है। क्योंकि उस उपदेश से आत्मनिष्ठा रूप शान्ति के द्वारा स्वयं ही सर्वोत्तम मोक्ष रूप परमपद स्फुट होने लगता है और उसीक्षण में साक्षात्कार हो जाता है

मू०—अतएव महासिद्धानां मते प्रोक्तं वाङ्मात्रेण सम्यगवलोकनेनवातत्क्षणान्मुहुर्विश्रान्तियुक्तं करोतीति-यःससद्गुरुर्भवति। नोचेन्निजविश्रान्तिं विना पिण्ड-पदयोःसमरसकरणं न भवतीतिसिद्धान्तस्तस्मान्निज-विश्रान्तिकारकःसद्गुरुरभिधीयतेनान्यः। पुनर्वागादि शास्त्रदृष्ट्यनुमानतर्कमुद्रयाभ्रामको गुरुस्त्याज्यः॥४१॥

सं० टी०—गुरुं विना अकृतार्थत्वादेव (महासिद्धानां मते प्रोक्तम्) सिद्धमते कथितं यत (वाङ् मात्रेण)मन्त्रोपदेशेन, अथवा सम्यग वलोकनेन दृष्ट्या तेनैव तत्क्षणात् (मुहुर्विश्रान्तियुक्तम्) परमात्म तत्त्वराणां सिद्धानां मध्ये विश्रमयुतं करोति विदधाति यः स सद्गुरु भवति नो चेद् यदि शिष्यस्य प्रथमतः परमात्मनिष्ठां न कुर्यात्तदा (निज विश्रान्तिम्, आत्मनिष्ठां विना (पिण्ड पदयोः) आत्म परमात्मनोः (सम रस करणम्) अभेद भावनं न भवतीति निश्चितं सर्वमते। तस्माद्धेतो निजविश्रान्तिकारकः परमात्मनिष्ठा सम्पादकः सद्गुरुरभिधीयते कथ्यते नत्वन्य इति आत्मचर्चा रहित संसार प्रदर्शक केवल शब्दाडम्बर शास्त्रीय विषय निजाऽनुमान मात्र कुशलः (तर्क मुद्रया) युक्तिच्छलेन

भ्रामको भ्रमोत्पादकोगुरुस्त्याज्यो दूरतः परिहर्तव्यः ॥ ७२ ॥

भा० टी०—इसी से महासिद्धों के मत में कहा है कि उपदेश मात्र से या करुणा कटाक्ष से जो गुरु तत्काल शिष्य को बारंबार परम शान्तियुक्त करता है वही सद्गुरु कहलाता है। यदि उपरोक्त लक्षण युक्त गुरु नहीं है तो वह स्वयं भी आत्मनिष्ठ न होने से शिष्य के लिये भी पिण्डपद के समरस करण में सर्वथा असमर्थ है। इसलिये शिष्य को आत्म विश्रान्ति कराने वाला और श्रेष्ठ कल्याण मार्ग का प्रदर्शक ही सद्गुरु कहलाता है दूसरा नहीं। किन्तु शुष्क वागाडम्बर द्वैत शास्त्र दृष्टि अनुमान तथा निष्फल आत्म शून्यवाद से शिष्य को भ्रम में डालने वाला गुरु सर्वथात्याज्य है।७२

मू०—ज्ञानहीनो गुरुस्त्याज्योमिथ्यावादीविडम्बकः।
स्वविश्रान्तिं न जानाति परेषां स करोति किम् ॥७३॥

सं० टी०—ज्ञानहीनः स्वकीयानुभव रहितः केवल लौकिक कृत्यकुशलः (मिथ्यावादी) संसारस्यैव मिथ्यात्वात् तद् वादी मिथ्यावदनशीलः, अत एव (विडम्बकः) विडम्बना कारको गुरुस्त्याज्यः परिहेयः। यतो यः स्व विश्रान्तिं ब्रह्मनिष्ठतां न जानाति नानुभवति स (परेषां) शिष्याणां किं करोति ॥ ७३ ॥

भा० टी०—आत्मज्ञान से वंचित करने वाला मिथ्यावादी और ज्ञानहीन गुरु त्यागने योग्य है क्योंकि जब स्वयं ही आत्मनिष्ठारूप शान्ति को नहीं जानता तो वह दूसरे को कैसे आत्मनिष्ठा में कल्याण का भागी बना सकता है। इसमें दृष्टान्त भी देते हैं ॥७३॥

मू०—शिलया किं परं पारं शिला संघः प्रतार्य्यते।
स्वयं तीर्णो भवेद्योऽसौ परान्निस्तारयत्यलम् ॥७४॥
विकल्पसागराद् घोराच्चिन्ताकल्लोलदुस्तरात्।
प्रपञ्चवासनादुष्टग्रहजालसमाकुलात् ॥ ७५

वासनालहरीवेगान्न स्वं तारयितुं क्षमः ॥७६॥
स्वस्थेनैवोपदेशेन निरुत्थानेन तत्क्षणात् ।

सं० टी०--अत्रैव दृष्टान्तमुच्यते शिलया सुरसरित्प्रवाहेपतितेन पाषाणेन तत्र स्थितः शिलासंघः (परं पारं) अपरं कुलं नावेव किं प्रतार्य्यते, उत्तार्यते नहि वर्षपूगैरपीत्याक्षेपस्तथैव स्वयमसिद्धोगुरु; शिष्यम् भवाम्बुधे स्तारयितुं नालम्; अतो यो हि स्वयं तीर्णो भवेत् स्वानुष्ठानेन परमात्मनिष्ठोऽसौ (परान्) शिष्यान् (अलम्) प्रभूतं तारयति यथा स्वयं क्रिया सहिततरिः स्व क्रिययैव निरुद्ध मपि पाषाणादि तारयतीति न्यायः योहि परमात्मनिष्ठाविहीनःस(चिंताकल्लोलदुस्तरात् चिंतैव कल्लोला बुद्बुदास्तै दुंस्तरात्, दुःखेन तीर्यंत इति तस्मात् प्रपञ्चानां सांसारिक विषयाणां-वासनाः संस्कारास्त एव दुष्टग्राहा स्तेषां जालै, र्विस्तारैः समाकुलात् संकीर्णान्, वासना पुनर्जायमान संस्कार एव लहर्य्या वेगो यस्मिन्,तस्मात् (विकल्प सागरात्) विविध कोटिक संशय रूप समुद्रात् स्वात्मानं तारयितुं नक्षमो नहि समर्थो भवति ॥

भा० टी०—जैसे शिला, शिला के समूह को नदी पार करने में सर्वथा असम्भव है। इसी प्रकार आत्मज्ञान से शून्य गुरु शिष्य के बन्धनों को नहीं छुड़ा सकता। इससे यह सिद्ध हुआ कि जो आत्मनिष्ठ अवधूत सिद्ध गुरु स्वयं संसार के बन्धन से मुक्त है वही दूसरे को भी बन्धन मुक्त कर सकता है। अन्य नहीं और चिंता रूप तरंगों से घोर दुस्तर तथा जगत् की वासना रूप दुष्ट ग्राह समूह से व्याप्त जो मोह ममता आदि रूप संसार है तथा उस वासना रूप तरंगों के वेग से युक्त संसार से पार कर मोक्षपद को देने वाले तथा सुन्दर उपदेशों से क्षणमात्र में पार करने में जो समर्थ है वही यथार्थ में गुरु है। ऐसा ही समर्थ गुरु शक्तिपात के उपदेश या करुणा कटाक्ष से शिष्य को अवश्य संसार से पारकर परम मोक्ष पद में पहुँचाता है ॥

मू०—तारयत्येव दृक्पातात् कथनाद्वा विलोकनात् ॥
तारिते स्वपदंधत्ते स्वस्वमध्ये स्थिरो भवेत्॥७७

ततः समुच्यते शिष्यो जन्म संसार बन्धनात् ॥
परानन्दमयो भूत्वा निष्कलः शिवतां व्रजेत् ।७८
कुलानां कोटिकोटीनां तारयत्येव तत्क्षणात् ॥
अतस्तुसद्गुरुं साक्षात् त्रिकालमभिवन्दयेत् ७९
सर्वाङ्ग प्रणिपातेन स्तुवन्नित्यं गुरुं व्रजेत् ।
सजनःस्थैर्य्यमाप्नोति स्वस्वरूपमयो भवेत् ॥८०

सं० टी०—यस्तु स्वयं स्थिर आत्मनिष्ठः स स्वस्थैर्य्येण निरुत्थानेन, उपदेशेन निश्चयात्मकोपदेश बलेन कथनात्, वा विलोकनात् कृपाकटाक्षाद्वा तत्क्षणादेव तारयति स सद्गुरुरिति शेषः। तारिते गुरुणो द्धारिते सति शिष्यः (स्व पदं) स्वलक्ष्यं (धत्ते) धारयति किंच (स्वस्वमध्ये) स्वस्वरूपपरमात्मनि (स्थिरो भवेत्) निश्चलोजायेत (ततः) तदा जन्म संसार बन्धनात्, उत्पत्ति मरण प्रबन्ध प्रपञ्चात् स मुच्यते मुक्तो भवति। (परानन्दमयः) ब्रह्मस्वरूपः (निष्कलः) इन्द्रियादि रहितः सन् (शिवतां) शिवस्वरूपं (व्रजेत्) प्राप्नोति। स्वयं तरतीति किंचित्रं (कोटि कोटीनां) अनेक स्वकुलानां शेषे षष्ठी तत्क्षणादेव तारयति। (अतः) पूर्वोक्तहेतोः (नित्यम्) प्रत्यहं (सद्गुरुम्) अभिवन्दयेत् प्रणमेत् "सर्वाङ्ग प्रणिपातेन" दण्डवद् विनिपातेनेति पूर्वान्वयः, यः स्तुवन् प्रशंसन् गुरुं व्रजेत। स जनः स्थैर्य्यं परमात्मनिष्ठा माप्नोति लभते (स्व स्वरूपमयः) साक्षात् शिवस्वरूपो भवेत् ॥७७-७८-७९-८०

भा० टी०—योग विद्या में निपुण सिद्ध गुरु शिष्य का अपनी शक्तिपात या आत्मज्ञान के उपदेश से या करुणा कटाक्ष द्वारा इस दुस्तर असार संसार से अवश्य निस्तार कर देता है। अतः उपरोक्त विधि के द्वारा गुरु शिष्य को जब अज्ञान निद्रा से जगाता है तब वह शिष्य केवल लक्ष्य रूप अद्वैत आत्म निष्ठा धारण में ही तत्पर होता है। पीछे व्यापक असङ्ग परमज्योतिः स्वरूप आत्मा में स्थिर हो जाता है। इसी से गुरु का कृपा पात्र शिष्य योग के द्वारा आत्मज्ञान को प्राप्त हो जन्म मरणरूप संसार बन्धन से सदा के लिये छुट जाता है पश्चात

वह सर्वदोषशून्य असंङ्ग अभेद आत्म दर्शी स्वकीय वास्तविक परमानन्द स्वरूप को प्राप्त होकर व्यापक सर्वाधार केवल असङ्ग शिव रूप मोक्ष को जीवन काल में ही प्राप्त कर लेता है। महासिद्ध गुरु असंख्य कुलों को भी अल्प समय में ही निज योग विद्या के प्रभाव से जन्म मरण रूप संसार चक्र से छुड़ा देता है या जिसकुल में जो साधु होता है वह यदि सद्गुरु की कृपा से योग सिद्धि को प्राप्त करले तो उसके योग विद्या के पुण्य प्रभाव से उस कुल में उत्पन्न होने वाले अनेक जनों का भी उद्धार हो जाता है और वह सद्गुरु की कृपा से मोक्ष रूप परम पद को प्राप्त होता है। इसका तो कहना ही क्या है। इसी लिये साक्षात् शिवरूप, योगविद्या के दाता सद्गुरु को तीनों समय श्रद्धा पूर्वक प्रणाम करे। दण्डवत् प्रणाम के द्वारा भक्ति श्रद्धा से स्तुति करता हुआ नित्य गुरु के पास जाय और वहाँ गुरु के सत्सङ्ग से योग में ज्ञान ध्यान विषयक अपने सन्देह की निवृत्ति करे इस क्रम से जब योगाभ्यास करता है। तब वह योगाभ्यासी शिष्य स्थिरता को प्राप्त होता है। इसके अनन्तर वह अपने को ब्रह्मरूप से सर्वत्र व्यापक और असङ्ग देखता है ॥ ७७-७८-७९-८०॥

मू०—किमत्र बहुनोक्तेन शास्त्र कोटिशतेन च ।
दुर्लभाचित्त विश्रान्तिर्विना गुरुकृपां पराम् ॥८१
चित्तविश्रान्ति लब्धानां योगिनां दृढचेतसाम् ।
स्वस्वमध्ये निमग्नानां निरुत्थानं विशेषतः ॥८२

सं० टी०—अत्र बहुनोक्तेन, अनल्पजल्पनेनकिं शास्त्र कोटिशतेन च केवल स्वबुद्धिसंलापितानेकशास्त्रैः परां श्रेष्ठां गुरुकृपा माचार्यानुकम्पां विना चित्त विश्रान्तिः, मनोवृत्ति निरोधे दुर्लभा बहुलायास साध्या। चित्त विश्रान्तौ फलं प्रदर्शयति चित्तेति चित्त विश्रान्ति लब्धानां मनो व्यापार निरोधं प्राप्तवतामतएव दृढचेतसामुपस्थितेऽपि विषयेऽविचलित चेतसां (स्वस्वमध्ये) स्वकीयात्मस्वरूपे परिनिष्ठितानां योगिनां निरुत्थानं स्वरूपभावनातोऽप्रच्युति विंशेषतो विशेषरूपेण जायते ॥८१-८२॥

भा० टी०—अधिक क्या कहें सिद्ध गुरु की कृपा के विना करोड़ों शास्त्रों के अभ्यास से भी विशेष रूप से चित्त की शान्ति होना दुर्लभ है। अतः सिद्धगुरु की अनुकम्पा से सकल इन्द्रिय समूह के सहित मन को अच्छी तरह जीतने वाले और परम शान्ति को प्राप्त हुये अखण्ड ज्योतिः स्वरूप व्यापक निज आत्मानन्द ही में मग्न योगिराजों का विशेष रूप से अविद्यारूप निद्रा से जागरण होता है। क्योंकि अनादि अज्ञान निद्रा में सोया हुआ यह जीव ईश्वर कृपा होने पर जब गुरु से जगाया जाता है तब वह अपने को जन्म मरण रहित व्यापक असङ्ग और चेतन रूप से देखता है। जैसे पर्वत के ऊँचे शिखर पर चढ़ा हुआ व्यक्ति भूमि में स्थित प्राणियों को अत्यन्त छोटे आकार में देखता है इसी प्रकार वह योगी सकल जगत को अज्ञान निद्रा में धँसा हुआ देखकर विचार करता है कि ये लोग आत्मानन्द से वंचित हुये विपरीत मार्ग का अनुसरण कर रहे हैं, यही तो माया का खेल है। यहां ज्ञानी और अज्ञानी का मार्ग भिन्न होता है। जिस अखण्ड आत्मानन्द को न जानने से सब प्राणियों के लिये वह रात्रि रूप है इसी से उसमें समस्त प्राणी सोये हैं और योगिराज उसमें जागता है। जिस भोग्य विषय रूप तृष्णा रात्रि में मूर्खजन आसक्त रहते हैं। वह सर्वत्र एक अखण्ड ज्योति आत्मा को देखने वाले योगिराज की रात्रि होती है। उसमें वह सदा के लिये सोजाता है यही निरुत्थान पद का भाव है ॥८१-८२

मू०—निमिषात् प्रस्फुटं भाति दुर्लभं परमं पदम् ।
यस्मिन् पिण्डो भवेल्लीनः सहसानात्र संशयः॥८३

सं० टी०—ततश्च निमिषात् झगिति दुर्लभमपि परमंपदं प्रस्फुटं भाति यस्मिन् परमात्मनि पिण्डोऽयं देहः सहसा हठाल्लीनोऽभिन्नो भवति नास्त्यत्र संशयः ॥८३॥

भा० टी०—अतः जब योगी की निरुत्थान (अखण्ड आत्म बोध) दशा सिद्ध हो जाती है तब पल भर में ही दुर्लभ परमपद भी स्फुट रूप से प्रतीत होने लगता है। जिस व्यापक परमपद रूप पिण्ड में व्यष्टि पिण्ड का अभेद रूप समरस होता है अर्थात् व्यष्टि स्थूल

शरीर का समष्टि शरीर के साथ तथा व्यष्टि सूक्ष्म शरीर का समष्टि सूक्ष्म के और व्यष्टि चेतन का समष्टि चेतन के साथ अभेद होता है इसमें सन्देह नहीं। ऐसा होने पर योगी में सर्वेश्वर जैसी सामर्थ्य आ जाती है। अन्त में वह योगी अजर अमर होता हुआ स्वेच्छा से परम नाथ तत्त्व रूप परब्रह्म में लीन हो जाता है ॥८३॥

मू-संवित्क्रियाविकर्णोदयचिद्विलासो विश्रान्तिमेवभजतांस्वयमेव भाति । अस्तेस्ववेगनिचये पदपिण्डमैक्यंसत्यं भवेत्समरसं गुरुवत्सलानाम् ।८४

इति श्रीगोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ पिण्डपद समरस करणो नाम पञ्चमोपदेशः ।

सं० टी०—(संवित् क्रियायाः, बुद्धिवृत्ते र्विकर्णो विस्तारः तस्योदय उत्पत्ति स्तेन यश्चिद्विलासः केवलात्म प्रकाश स्तस्मिन् विश्रान्ति स्थितिमेव न तु सांसारिक विषयक चिद्विलास विश्रान्तिमित्येव पदेन व्यज्यत, (भजताम्) सेवमानानां शिष्याणां (स्ववेग निचये) स्वीयमानस व्यापारे (अस्ते) निरुद्धेसति (पदपिण्डम्) समष्टिव्यष्टि रूपं स्वयमेव भाति प्रकाशते किञ्चैक्यं समरसं गुरुवत्सलानामाचार्य्य कृपा भाजां सत्यं ध्रुवं भवेदित्याचार्य प्रतिज्ञा ॥८४॥

इति श्रीगोरक्षनाथ कृतौ सिद्धसिद्धान्तपद्धतौ सर्व्वतन्त्र स्वतन्त्र श्री पं० द्रव्येश झा रचितायां गूढार्थ दीपिकायां टीकायां पञ्चमोपदेशः।

भा० टी०—बुद्धि के व्यापार का जो सांसारिक बाह्य विकाश होता है उसकी शान्ति करने से उसी सत्त्व प्रधान बुद्धि दर्पण में अभिव्यक्त और आत्म विषयक अखण्डाकार वृत्ति में परम निष्ठा रूप शान्ति का आश्रय करने वाले जो गुरु के कृपा पात्र शिष्य हैं उनको स्वयं ही सम्पूर्ण मानसिक वृत्तियों के अस्त होजाने पर जीवात्मा और परमात्मा का अभेद रूप समरस अवश्य होता है। यह सत्य है ॥८४॥

इति सिद्धसिद्धान्तपद्धतौ पूज्यपाद वोड्राधिपति योगीन्द्र श्री १०८ श्रीपूर्णनाथ शिष्येण वेदान्ताचार्य्येण पण्डित श्रीभीष्मनाथेन कृतायां सारदीपिकायां हिन्दीटीकायां पञ्चमोपदेशः

अथावधूतयोगिलक्षणंकथ्यते

मू०—अथ कोऽवधूत योगिनामेत्यपेक्षायामाह । यः सर्वान्प्रकृतिविकारानवधुनोतीत्यवधूतयोगी, योगोऽस्यातीति योगी धूञ् कम्पने धूञिति धातुः कम्पनार्थे वर्तते कम्पनं चालनं देह दैहिक प्रपंचादिषु विषयेषु संगतं मनः परिगृह्य तेभ्यः प्रत्याहृत्य स्वधाममहिम्निपरिलीनचेताः प्रपञ्चशून्यआदिमध्यान्तनिधनभेदवर्जितः॥१॥

सं० टी०—अथ गुरुं समासाद्य तदुपदर्शित समस्त करणानुष्ठानेन सिद्धिं प्राप्त्यनन्तर मवधूत योगी भवति । तस्य परिचयाय लक्षणं कथ्यत इति प्रकरण सङ्गतिः प्रदर्शिता भवति । कोऽवधूतनामा योगीति कस्यापि जिज्ञासोदये तदुपशमनाय लक्षणं प्रदर्श्यते । अवधूत इति सार्थकमिदं न तु केवलं रूढम्, तत्रैव शाब्दिकरीत्या व्युत्पत्तिः प्रदर्श्यते। अवधूनोति कम्पयति चालयति स्वस्मात् त्यजतीति यावत् किमित्यपेक्षायामाह सर्वानिति तत्र किञ्चित् परित्यागे मानाभावात् किं त्वात्मस्वरूपस्य हातुमशक्यतयाऽनात्मभूतान् प्राकृत सर्व पदार्थां स्तथा च निखिल प्राकृतमलपरिरहितो विशुद्ध एवावधूत पदार्थः, इति निर्गलितः कम्पनेऽपि गतेः सद्भावेन गत्यर्थकत्वात् "गति वुद्धि" इति सूत्रेण कत-रिक्तः, योग: परमात्मना सकल शक्ति मता सह सम्बन्धोऽस्य.स्तीति योगी अवधूतश्चासौ योगीति कर्मधारयः । धूञ् कम्पने इति शाब्दिक प्रक्रियामादाय स्वयमेव तस्यार्थमाह धूञिति धातुः कम्पनार्थे वर्तते कम्पन पदार्थमाह कम्पनं चालनं परित्याग इति यावत् साम्प्रतमवधूत योगीति पदद्वयस्य निर्गलितार्थं संचिन्त्याह देहदैहिक प्रपंचादिषु विषयेषु संसारेषु । अत्र दैहिक पदेन देह सम्बन्धि कलत्रपुत्र धनादयो ग्राह्याः "संगतम्" आसक्तम् (मनः) चित्तं परिगृह्य ध्यानाद्यभ्यासेन वशीकृत्य (तेभ्य. प्रत्याहृत्य) दोषदर्शनादिजन्य वैराग्येण विषयेभ्यो विनिवर्त्य । न नु तस्य क स्थितिः कर्तव्येत्यत आह स्वधाम महिम्नीति सर्व शक्ति सम्पन्न परमात्मनि (विलीन चेताः) विलीनं चेतो यस्येति सः । तथा च चेतसो-

लयः । अतएव (प्रपंचशून्यः) प्राकृत सकल सम्बन्धोज्झितः । तस्मात् (आदिमध्यान्तभेद वर्जितः) समस्त भेद शून्यः अद्वितीय रूप मुख्याव-धूत योगी संजातः किंत्वोदनं पचतीतिवदेतदर्थं साधन दशापन्नोऽप्य वधूत योगीति ध्वन्यत इत्यग्रे स्फुटी भविष्यति ॥१॥

भा० टी०—सद्गुरु के चरणों की कृपा से समरस करण के अनुष्ठान द्वारा जो सिद्ध होजाता है। वह समस्त सांसारिक कर्तव्य बन्धन से विमुक्त होकर अवधूत योगी कहलाता है। इसी लिये समरस करण का प्रकार पंचम उपदेश में निरूपण कर अब इस उपदेश में अवधूत योगियों का लक्षण कहा जाता है। क्योंकि लक्षण से ही वस्तु का निर्णय होता है। अतः अवधूत योगी कौन है। इस आकांक्षा को हटाने के लिये लक्षण कहना भी आवश्यक है। अवधूत पद तथा योगी पद का व्याकरण की रीति से जो अर्थ निकलता है वही उन का लक्षण है। देह और देह सम्बन्धी पुत्र कलत्र मित्र धनादि समस्त सांसारिक पदार्थों में आसक्त मन को हटा लेना अवधूत पद का अर्थ है। क्योंकि व्याकरण में धू शब्द का अर्थ कम्पन है। जैसे घोड़ा अपने देह को हिलाकर समस्त धूलि को झाड़ देता है। वैसे ही आत्मा से अतिरिक्त देह इन्द्रिय आदि सब जड़ वर्ग रूप मल को अलग करने वाला अवधूत कहलाता है। योगी पद का अर्थ है कि मन को परमात्मा में लीन करदेना। इन दोनों पदों के मिलने से यह अर्थ हुआ कि समस्त प्राकृत सम्बन्ध से विमुक्त होकर अखण्ड स्वप्रकाश शिव शक्ति रूप समरस करना आदि मध्य अन्त तथा मृत्यु आदि सकल भेद रहित अपने स्वरूप में स्थित रहने वाला मुख्य अवधूत योगी कहलाता है। तथा जो इस अवस्था की प्राप्ति के लिये साधन कररहा है वह भी अवधूत योगी कहलाता है ॥१॥

मू०-यकारो वायुबीजं स्याद्रकारो वह्नि बीजकम् ।
तयोरभेदओंकारश्चिदाकारः प्रकीर्तितः ॥२॥

सं० टी०—वाच्य वाचक योरतादात्म्य मिति नियमेन तत्तदर्थ वाचको वर्णरूपः पदरूपो वा शब्दस्तदर्थरूप एव कथ्यते, अतएवो

पनिपत्सु ब्रह्मवाचकः प्रणवो ब्रह्मरूप एवेति गीयते। विन्दु पदवाच्यः शिवो बीजपदवाच्या शक्तिरिति तान्त्रिक संकेतः। एवं च पृथिवी तत्त्वस्य या शक्तिः सा पृथिवी बीजम्। तस्या वाचको लकार वर्णः, अतो लँकार पृथिवी बीजम्। एवमेव जलादिभूत चतुष्टयेषु योज्यम, अनया-रीत्या जल बीजं वँ तेजो बीजं रँ मूले वाहुलकादुरादिफ इत्यभावेकार प्रत्ययेरकार पदं साधु। वायु बीजं यँ आकाश बीजं हँ। अत्र श्लोके दिग्दर्शन न्यायेन वायुवह्न्योरेव बीजे कथिते। तथा च तयोरिति पदेनो पलक्षणतया सर्वेषां बीजानां ग्रहणम्। अतः सर्वेषां बीजानां सर्वासां शक्तिनामिति निष्कर्षः (अभेदः) उपादान कारणतया तादात्म्य प्राप्नुवन् (ओंकारः) पंचभूतबीजशक्तियुक्तः प्रणवः (चिदाकारः) परमात्मरूपः (प्रकीर्तितः) कथितः। अवधूतोऽपि कार्य्यरूपं परित्यज्य कारणरूप मापन्न तया तद्रूपोभवतीति व्यज्यते। अतएव अवधूत लक्षण प्रकरणेऽयमु-पन्यस्तः ॥२॥

भा० टी०—संज्ञा और संज्ञी अर्थात् नाम और नाम वाला इन दोनों में अभेद का व्यवहार लोक और शास्त्र में होता है। लोक में जैसे यह कौन है? राम। राम कौन है? यह। इस प्रकार यह और राम में अभेदरूप से ही व्यवहार होता है। वेद मे भी ओंकार को ब्रह्मरूप कहा गया है। क्यों कि वाच्य वाचक का अभेद सम्बन्ध होता है। तान्त्रिकसंकेत से विन्दु का अर्थ शिव और बीज का अर्थ शक्ति है। इस रीति से पृथ्वी बीज का अर्थ पृथ्वी तत्त्व की शक्ति हुआ। और उसी शक्ति का नाम लकार है और विन्दु शिव कहा गया है। अतः पृथ्वी बीज लकार कहलाता है। इस तरह पांचों भूतों के पांच बीजहैं। लँ वँ रँ यँ हँ। इनमें लँ बीज पृथ्वी का वँ जल का रँ वह्नि का यँ वायु का और हँ आकाश का बीज है। यद्यपि इस श्लोक में दो ही बीजों का वर्णन है तथापि प्रकरण वश पांचों बीजों का ग्रहण करना इष्ट है। अर्थात् पांच भूतों का अभेद अपने पांच बीजों से होता है। और उन बीजों का भी अभेद ओंकार से होता है क्यों कि ओंकार ही सकल बीज मन्त्र और शब्दों का उपादान कारण है जैसे पृथ्वी से उत्पन्न घट पटादि और स्थावर जंगम सभी पृथ्वी कहलाते हैं। इसी प्रकार ओंकार से उत्पन्न

सब बीज ओंकार रूप हैं। उस ओंकार से चिद्रूप शक्ति का अभेद है। क्यों कि संज्ञा और संज्ञी का अभेद होता है ॥२॥

मू०—तदेतद्व्यक्तमुच्यते,

क्लेशपाशतरंगाणां, कृन्तनेन विमुण्डनम् ।
सर्वावस्था विनिर्मुक्तः सोवधूतोऽभिधीयते ॥३॥

सं० टी०—(तदेतत्) पूर्वोक्त श्लोके च व्यंग्यतया कथितम्। यत्त देवात्र (व्यक्तम्) स्पष्टतरम् (उच्यते) कथ्यते मयेति शेषः क्लेशपाशेति अविद्यास्मिता रागद्वेषाभिनिवेशाः पंचक्लेशास्त एव पाशबन्धका स्तेषां तरंगाणां व्यापाराणां (कृन्तनेन) उच्छेदनेन (विमुंडनम्) परित्यागं यः करोतीति शेषः (स सर्वावस्था विनिर्मुक्तः) जाग्रत स्वप्न सुषुप्तिभिर्बाल्या दिभिर्वा रहितोऽवधूतोऽभिधीयते ॥ ॥

भा० टी०—पूर्व श्लोक में व्यङ्ग रूप से जो अवधूत योगी का लक्षण किया है वही यहां स्पष्ट रूप से कहा जाता है। जिस के अविद्यादि पांच क्लेश रूप जाल के वेग का उच्छेद कर त्याग दिया है और बाल्य यौवन वार्धक्य तथा जाग्रत् स्वप्न सुषुप्ति इन तीन अवस्थाओं के प्रपञ्च से जो मुक्त होगया वह अवधूत कहलाता है ॥३॥

मू०—निजस्मर विभूतिर्यो योगी स्वांगे विभूषितः ।
आधारे यस्य वारूढिः सोऽवधूतोऽभिधीयते ॥

सं० टी०—पुरस्तादन्तरङ्गमभिधायाधुनावहिरंगलक्षणमन्तरगेण वहिरङ्गस्य सामरस्यञ्चाह। तथा च द्विविधोऽवधूतो मुख्यो गौणश्च तत्रोभय लक्षणलक्षितो मुख्यः। अन्यतर लक्षण सहितो गौण इति व्यज्यते (यो योगी) साधकः (स्वाङ्गे) स्वविग्रहे (निजस्मर विभूत्या) स्वरूप स्मारक भस्मना (विभूषितः) अलंकृतः (आधारे) आचार्य परम्परावलम्बित मार्गे (यस्य) साधकस्य (रूढिः) दृढाध्यवसायः) सोऽवधूतः। वा शब्दपूर्वोक्तान्तरंग लक्षणाभिप्राये चकारार्थ को वा। तेन समुच्चयः ॥४॥

भा० टी०—अविद्यादि पांच क्लेशों का वर्णन मंगल श्लोक

की व्याख्या में हो चुका है। वहां यह भी जान लेना आवश्यक है कि उन पाँचों में एक अविद्या क्षेत्र रूप अर्थात् कारण है और अस्मिता आदि चार कार्य रूप हैं वे कार्य अविद्या में प्रसुप्त तनु विच्छिन्न और उदार इन चार भेदों से विद्यमान रहते हैं। जिस समय सूक्ष्म रूप होकर अविद्या में छिप जाते हैं और उन का बीजपना तत्त्वज्ञान से दग्ध नहीं हुआ है। अतः आगे उत्पन्न होने वाले हैं उस समय वे प्रसुप्त कहलाते हैं। योगियों के अस्मिता आदि क्लेश प्रसुप्त नहीं कहे जाते हैं। क्यों कि उनके क्लेशों में बीजपना नष्ट हो चुका है। साधक योगियों के क्लेश तनु कहे जाते हैं। क्यों कि उन में दोष देख कर वैराग्य भावना से सूक्ष्मता होजाती है जैसे जिस समय में एक स्त्री में राग वर्तमान है उस समय में अन्य स्त्री का राग दवा हुआ है वह विच्छिन्न कहलाता है। वैसे ही दबे हुये क्लेश विच्छिन्न कहलाते हैं। अपने स्वरूप से विद्यमान् काल में उदार कहलाते हैं इन उपर्युक्त क्लेशों को समूलनष्ट करनेवाला और प्रपञ्चावस्था से विमुक्त अवधूत योगी होता है ॥४॥

मू०—लोकमध्ये स्थिरासीनः समस्त कलनोज्झितः।
कौपीनं खर्परोऽदैन्यं सोऽवधूतोऽभिधीयते ॥५॥

सं० टी०—(लोक मध्ये) संसारे (स्थिरासीनः) स्थिरं निश्चलं यथा स्यात्तथा (आसीनः) रागद्वेष विनिर्मुक्तो मध्यस्थश्चेति यावत् (समस्त कलनाभिः) अयं ब्राह्मणः क्षत्रियो वेत्यादि सांसारिक निखिल गणनाभिः, (उज्झितः) शून्यः (अदैन्यम्) यस्य (कौपीनम्) कटिवस्त्रम् (खर्परम्) हस्ते पात्रम् सोऽवधूतोऽभिधीयते ॥५॥

भा० टी०—पहले अवधूत योगी का मुख्य लक्षण कहकर अब वहिरंग लक्षण का निरूपण करते हैं। अपने स्वरूप का स्मरण कराने वाले विभूति रूप अलङ्कार से जो सुशोभित तथा निज गुरु के बतलाये हुये आसन पर आरूढ़ है वह अवधूत योगी कहलाता है। जिस ने इस संसार में ही समस्त राग द्वेषादि प्रपञ्च का परित्याग किया है इसीलिये समस्त कल्पनाओं से मुक्त और स्थिर आत्मानन्द में स्थित है तथा जिस के कटिदेश में कौपीन और हाथ में खप्पर है

एवं दीन भाव से भी रहित है वह पक्का अवधूत है ॥५॥

मू०--शं सुखं खं परं ब्रह्म शंखं संघट्टनाद् भवेत् ।
सिद्धा न्तोधारितोयेनसोऽवधूतोऽभिधीयते॥६

सं० टी०—शंख शब्दघटकः शं शब्दः सुखवाचकः खशब्दश्चव्यापक ब्रह्म वाचकः । एवं च ख समभिहारात् लौकिकसुखस्य शमिति समभिहाराच्च जडात्मकाकाशस्य च व्यावृत्तिः परस्पर समभिहार बलेनाखण्डः सच्चिदानन्दो गृह्यते तथा चाखण्ड सच्चिदानन्दरूपः शंखो येन धारितोऽधारिसः "अवधूतः" कथ्यते । अवधूतस्य यानि लिङ्गानि तानि सकलानि सच्चिदानन्द ब्रह्म स्मारकतया ब्रह्म लिङ्गानि कथ्यन्ते । तत्र द्विविधा दृष्टिः। अभेदेन भेदेन च प्रथमा यथादित्यो ब्रह्मेत्यत्राभेद भावनयाऽऽदित्य दर्शनेन ब्रह्म स्मर्यते । अयमपि सच्चिदानन्द एवेति । न चेत्थं प्रतीकोपासना स्यात् तथा च प्रतिकोपालम्बान्नयतीति चेन्नेत्यादि व्यास सूत्रोक्त सिद्धान्तानुसारेण तस्य मोक्षो न स्यादिति वाच्यम् । तस्य तात्पर्यान्तरत्वात् तथाहि यस्यातिरिक्त सच्चिदानन्द स्वरूप ब्रह्म पदार्थ ज्ञानं नास्ति किन्त्वस्यादित्य पिण्डस्य यादृशस्वरूपन्तदेव ब्रह्मपदार्थो नान्यादृगिति बुद्ध्योपासनं स एव प्रतीकोपालम्बन स्तस्यैवातत्क्रतुत्व हेतुं प्रदर्श्य मोक्षो वारितस्तत्र नतु यस्यातिरिक्त सच्चिदानन्द ब्रह्मपदार्थ विज्ञानं तदभिन्नतयाऽऽदित्यादीनां तस्य प्रतिकोपालम्बनत्वं तस्य च तत्क्रतुत्वेन(ब्रह्मभावनया)मोक्षो ध्रुव एवेति रहस्यं मर्म विदो विदन्ति । तथैवावधूतेन स्वधारित शंख लिङ्ग सुखात्मक व्यापक ब्रह्म बुद्धिराधीयते नैतावता प्रतीकोपालम्बनत्वम्, अपितु ब्रह्मज्ञानित्वमेव । अतस्तेन मोक्षो हस्तयित एव इदमेव रहस्यं सनातन धर्मावलम्बिनां मूर्ति पूजासु न जातु कश्चिद् वटुकोऽपि जानाति यदियमेव प्रतिमा परमेश्वरः । अपितु,अस्ति कश्चिच् शक्तिशाली परमेश्वरः स्वमहिम्निप्रतिष्ठितः । किन्तु प्रतिमापि तस्यैव रूपमेवावगच्छन्ति सर्वे तावता ब्रह्मज्ञानित्वस्य न क्षतिः किन्तु ब्रह्मज्ञतायाद्रढीयस्त्वमेव सम्पद्यतेऽतो ब्रह्मज्ञैरपि प्रतिमा पूजनीयेत्युपदिश्यते। अथवायोहि ब्रह्म पदार्थानभिज्ञस्तस्य त्वरितमतिरिक्त ब्रह्म पदार्थज्ञानस्याशक्यतयाऽन्तः

करणादि शुद्धिफलाय तावत् प्रतिमापूजाविधेयैव शुद्धे मनसि स्वयमेवा तिरिक्तं ब्रह्मज्ञायते यथाऽन्नं ब्रह्मेति क्रमिकविज्ञानादन्ते विशुद्ध ब्रह्म विज्ञानं भृगो र्बभूवेति तैत्तरीयोपनिषदि प्रसिद्धम्। ततश्चावधूतवदेव प्रतिमा पूजनेऽपि न मोक्ष प्रतिबन्धः। अपितु ब्रह्म ज्ञानस्यपरिपूर्णतयैव परिचीयते। एवं च ज्ञान्यज्ञान्युभयोरपि सर्वावस्थासु विदेह कैवल्यात् प्राक् प्रतिमा पूजनीयं त्याद्य भेद्यतर्कार्गलमिमं सनातन सिद्धान्तं मनसि निधायोपदिशन्ति शं सुखेत्यादि ॥ द्वितीय प्रकारो भेदेन दृष्टि रत्र पक्षे मूर्त्तिस्तूपाधिस्तेन तदुपहित ब्रह्म स्माय्यते ॥ ६ ॥

भा० टी०—"शम्" शब्द का अर्थ सुख और ख पद का अर्थ आकाश सदृश व्यापक पर ब्रह्म है। इनदोनोंशब्दों का परस्पर मेल होने से शङ्ख शब्द सिद्ध हुआ। शंख शब्द का अर्थ सुख रूप व्यापक परब्रह्म होता है। यही अद्वैत रूप सिद्धान्त है। इस सिद्धान्त का पालन करने वाला अवधूत योगी कहलाता है तथा इसी सिद्धान्त के स्मारक शङ्खरूप वाद्य विशेष का धारण करना अवधूत योगियों का बाह्यचिन्हहै ॥६॥

मू०—पादुका पद संवित्ति र्मृगत्वक् स्यादनाहता।
शेली यस्य परासंवित् सोवधूतोऽभिधीयते ॥७॥
मेखला निवृत्तिर्नित्यं स्वस्वरूपं कटासनम्।
निवृत्तिःषड्विकारेभ्यः सोऽवधूतोऽभिधीयते ॥८
चित्प्रकाश परानन्दौ यस्य वैकुण्डल द्वयम्।
जपमालाच्च विश्रान्तिः सोऽवधूतोऽभिधीयते ॥९॥
यस्य धैर्य्यमयोदण्डः पराकाशञ्च खपरम्
योगपट्टो निजाशक्तिः सोऽवधूतोऽभिधीयते॥१०॥

सं० टी०—एवं यस्य (पदसंवित्तिः) पद्यत इति पदा सा च संवित्तिस्तत्वज्ञानं सैव प्राप्तव्येत्यर्थः (पादुकाः) या चरणे धार्य्यते। यस्य चाङ्गोपरि (मृगत्वक्) मृगचर्म (अनाहता) अनाहतनादरूपास्यात् किंच (परासंवित्) पराशक्तिज्ञान स्वरूपा च (शेली) गले स्यात् तथा

चान्तरंगविहिरंगयोः सामग्रस्यमेव व्याख्याने फलितं सः अवधूतोऽभिधीयते ॥ ७ ॥ यस्य कटौ (निवृत्तिः) वैराग्यरूपा (मेखला) मौञ्जी नित्यं वर्तते (स्व स्वरूपं) आत्मरूपम् (कटासनम्) कटशय्यास्ति । पूर्वं निवृत्तिरित्युक्तं तत्रावध्यंशेनित्य साकांक्षतया कस्मान्निवृत्तिरित्यपेक्षायामाह (षड्विकारेभ्यः) काम क्रोध लोभ मोह भयेर्ष्याभ्यः सोऽवधूतः ॥८ यस्य "चित्प्रकाश परानन्दौ,, तद्रूपौ "कुण्डलौ,, कर्णयोर्भूषणे भवतः "अक्ष विश्रान्तिः,, इन्द्रियविरामरूपा "जपमाला,, रुद्राक्षमाला,, कण्ठे हस्ते वा वर्तते सः "अवधूतः,, ॥९॥ यस्य (दण्डः) दण्डस्थानीयः धैर्य्यमयः,, प्रचुर धैय मेवार्थं च् चतुर्थाश्रमे यद्दण्डधारणं तदिह धैर्यधारणम् "पराकाशम्,, हृदयाकाश रूपं वा "खपरम्,, तत्पात्रम् 'योगपट्टः, काष्ठनिर्मितो योगिनां विश्राम दायकः । सा "निजाशक्तिः,, स्व शक्तिमेव योग पट्टं मन्यत इति भावः "सोऽवधूतः,, पूर्ववत् ॥१०॥

भा०टी०—उदयभूत परमात्मा के ज्ञानकी बोधक खड़ाऊँओं को जिसने पैरों में धारण किया है तथा देह पर अनहद नाद रूप मृगचर्म ओढ रक्खा है और सर्वोत्कृष्ट ज्ञान की परिचायक शेली (जनेऊ) को जिस ने गले में धारण किया है वह अवधूत कहलाता है। तात्पर्य यह है कि प्रत्येक अन्तरङ्ग साधन का द्योतक प्रत्येक वाह्य चिन्ह है। जिस की नित्य ही काम क्रोध लोभ मोह भय ईर्ष्याइन विकारों को निवृत्ति रूप तगड़ी है तथा स्व स्वरूप आत्मानन्द में निरन्तर मग्न होना ही स्थिर आसन है वह अवधूत है। जिस के कानों में चित प्रकाश और परमानन्द यही दोनों कुण्डल हैं और इन्द्रियोंकाविषयों से उपरत होना ही रुद्राक्ष जपमाला है। ऐसी माला जिस के कण्ठ में या हाथ में हो वह अवधून है। जिस के आत्म संयम में धैर्य रूप ही दण्ड है तथा पराकाश (परमात्मा) रूप खप्पर है और जिस का निजा शक्ति रूप ही योग पट्ट (आशा) है वह अवधूत कहलाता है ॥१०

मू०—भेदा भेदौ स्वयंभित्वांकृत्वास्वा स्वादने रतः।
जारणा तन्मयी भावः सोऽवधूतोऽभिधीयते ॥ ११ ॥

अचिन्त्येनिजदिग्देशे स्वान्तरं वस्तुगच्छति।

एकदेशान्तरीयो यः सोऽवधूतोऽभिधीयते ॥१२॥
स्वपिण्डममरी कर्तुमनन्ता ममरीं च यः ।
स्वयमेव पिबेदेतां सोऽवधूतोऽभिधीयते ॥१३॥
अचिन्त्या वज्रवद्‌गाढा वासनामलसंकुला ।
सा वज्री भक्षितायेन सोऽवधूतोऽभिधीयते ॥१४॥
आवर्तयति यः सम्यक् स्वस्व मध्ये स्वयं सदा ।
समत्वेन जगद् वेत्ति सोऽवधूतोऽभिधीयते ॥१५॥

सं० टी०— स्वयं 'भेदा भेदौ ,, द्वैता द्वैतौ "भित्तां कृत्वा;, भक्षयित्वा,. स्वास्वादने,, स्वस्य स्वस्वरूपस्य,, आत्मन आस्वादने निजानन्दानुभव इति यावत् (रतः) संलग्नः । जारणा, रागद्वेषयोर्भेदयो र्वा पाचनं जागरापाठ पक्षे जागरणं तन्मयी भावः--आत्मनिष्ठतारूप जागरणं यस्य सः "अवधूतः,, ॥११॥केवल प्राकृत तीर्थादि दिग्देशाद्य भ्रममाणो नावधूतोऽपि तु यः (एक देशान्तरीयः) लौकिकदृष्ट्यैकदेश मध्य स्थितोऽपि । "अचिंत्ये" चिन्तनातीतेऽपरिमिते 'निजदिग्देशे' वास्तविक स्वकीय व्यापक प्रदेशे (स्वान्तरम्) स्वकीयान्तः करणं (गच्छति) मेलयति सः 'अवधूतः' कथ्यते अयम्भावः स्थूलदेहापेक्षया परिच्छिन्न देशे समासीनोऽपि मनसा सर्वदेशस्थितो यः सोऽवधूतः ॥१२॥ यः 'स्वपिण्डम्' प्राकृतस्वस्थूलशरीरम् 'अमरी कर्तुम्' अनमरममरं कर्तुं मृत्युं विजेतुम् 'अनन्ताम्' अविनश्वर शीलाम् 'अमरीम्' पूर्वोक्तां खेचरीमुद्रया निःसृत सुधाम् स्वयमेव पिबेत् सः 'अवधूतः कथ्यते ॥१३॥ या 'मलसंकुला' सांसारिक विषयरूप मल व्याप्ता । अतएव(अचिन्त्या) वाङ्मनो विषयातीता (वज्रवद्‌गाढा) वज्रवद्‌घनीभूता दुर्भेद्या सा'वज्री'तन्नाम्ना व्यवहरणीया'येन भक्षिता'समूलोत्पाटिता सः'अवधूतः'कथ्यतेयेनवज्रो लीकृता सोऽवधूत इति भावः। १४ (स्वस्व मध्ये) सकलात्मसु (सदा) सततं यो योगी स्वयं) स्वस्वरूपं 'सम्यगावर्तयति' अभेदेन संघटयति। अतएव समत्वेन स्वाभिन्नत्वेन (जगत्) संसारं 'वेत्ति' अनुभवति सः 'अवधूत'; कथ्यते ॥१५॥

भा० टी०—भेद और अभेद इन दोनों की भिक्षा कर अर्थात उन भेदाभेदों को त्यागकर जो स्वयं आत्मानन्द के रसास्वादन में तत्पर है और उन दोनों को ब्रह्मानन्द में लीन होने से जीर्ण करनेवाला अवधूत कहाता है। केवल बाहर घूमने से ही अवधूत नहीं होता किन्तु जो देश कालादि से अपरिमित परमात्मा में ही अपने व्यापक आन्तरिक आत्मा को प्राप्त करने वाला इसीलिये साधारण जनों की दृष्टि से वह एक देश में स्थित प्रतीत होने पर भी वास्तव में ब्रह्म रूप से सर्वत्रव्यापक अखण्ड ज्योतिरूप है वही अवधूत कहाता है। जिसने इस प्राकृतिक स्थूल शरीर को अमर बनाने के लिये खेचरी मुद्रा द्वारा स्वयं ही अनन्त अमरीपान किया है उस को अवधूत कहते हैं। जिसने वासना रूप मलों से भरी हुई अतएव चिन्तातीत और वज्र की तरह दुर्भेद्य वज्रीनाडी को स्वाधीन कर लिया है वह अवधूत कहलाता है। सब की आत्माओं में अपनी तथा अपने में सब की जो अभिन्न रूप से भावना करता है कि मैं ही सर्वत्र व्यापक हूं। इस प्रकार समस्त संसार को निज आत्मरूप से जानने वाला अवधूत कहलाता है ॥१५॥

मू०—स्वात्मानमवगच्छेद्यः स्वात्मन्येवावतिष्ठते ।
अनुत्थानमग्नः सम्यक् सोऽवधूतोऽभिधीयते ॥१६॥
अनुत्थाधारसंपन्नः परविश्रान्तिपारगः ।
धृतिचिन्मय तत्त्वज्ञः सोऽवधूतोऽभिधीयते ॥१७॥
अव्यक्तं व्यक्तमाधत्ते व्यक्तं सर्वं ग्रसत्यलम् ।
स सत्यं स्वान्तरे सन्नः सोऽवधूतोऽभिधीयते ॥१८॥
अवभासात्मकोभासः प्रकाशे सुख संस्थितः ।
लीलया रमते लोके सोऽवधूतोऽभिधीयते ॥१९॥
क्वचिद् भोगी क्वचित्त्यागी क्वचिन्नग्नः पिशाचवत् ।
क्वचिद्राजा क्वचाचारी सोऽवधूतोऽभिधीयते ॥२०॥

सं० टी०—'स्वात्मानमवगच्छेत्' स्वस्वरूपं प्रत्यक्षतोजानातित्वा

त्मन्येव स्वस्वरूपमात्रे, अवतिष्ठते सदा रमते । किंनिमेषमात्रं न किन्तु, अनुत्थानमयः अनुथानशीलः(सोऽवधूतः)अत्रात्मज्ञानस्य मुख्यतां तन्निष्ठतायाश्च दुर्लभतां प्रदर्शयति पुनः पुनर्वाद इतिन पुनरुक्तेः शंका कार्या ॥१६॥ अनुत्थेति नोत्तिष्ठतीत्यनुत्थः कूटस्थः स चासावाधारो जगता मधिष्ठानात्मभूतः परमात्मा तत्र सम्पन्नोऽभिन्नतां गतः परविश्रा न्ति पारगः, परविश्रान्तिः सत्संपत्तिः स्तस्या पारगो निःशेषं परिलब्धा (धृतिचिन्मयतत्त्वज्ञः) धृत्या धैर्येण सम्यक्कृतयेति यावत् चिन्मयतत्त्वम् आत्मतत्त्वम् तज्जानाति सः "अवधूतः,, ॥१७॥

(अव्यक्तम्) विलीनं स्व स्वरूपं कचिद् भक्त विशेषे (व्यक्तम्) प्रकटरूपम् (आधत्ते) करोति भक्ताय दर्शनं ददातीति भावो यथाचार्य पादः समये समये प्रादुर्भवति । अथवा "अव्यक्तम्,, सूक्ष्मतत्त्वम् व्य-क्तम्,, प्रकटं करोति तथैव व्यक्तमपि सर्वं ग्रसति वा (अव्यक्तम्) परमे श्वरम् (व्यक्तम्) प्रत्यक्षं करोति निजभक्तिप्रभावाद् व्यक्तं च सर्वजड वर्गं (ग्रसति) परमात्म बुद्ध्याऽऽच्छादयति । अत एव सः (स्वान्तरे) स्वाभ्यन्तरे (सत्वम्) परमात्मानम् (सन्नः) प्राप्तः सोऽवधूतोऽभिधी यते ॥१८॥ (अवभासात्मकः) सकलप्रकाशकः (भासः) प्रकाशो भवती ति शेषः । ननु सतिप्रकाशेऽपि दुःखंस्यादत आह—प्रकाशे सुखं स्थितः सुखेन सम्यक् सम्पन्नः । ननुजडीभूततया मृतकल्पः किम्- अत आह (लीलया) अनायासेन लोके रमते सः "अवधूतः" ॥१९॥

भा० टी०—जो सकल चराचर को आत्म रूप जानकर सदा आत्मनिष्ठ रहता है अर्थात् कभी भी आत्म स्वरूप से विचलित नहीं होता वह अवधूत कहाता है । जिस समय सिद्धपूर्ण ब्रह्मज्ञान निष्ठा को प्राप्त हो जाते हैं उस समय उन सिद्धों के लिये सब बाह्य चिन्ह आत्म रूप से भासने लगते हैं । अतः उनको बाह्य चिन्हों की आवश्यकता नहीं रहती । हां, साधनावस्था में बाह्य चिन्ह धारण करना अनिवार्य है क्योंकि बाह्य चिन्ह आत्म विज्ञान और वैराग्यादि अन्तरङ्ग साधनों के स्मारक हैं और उनमें भी आत्म बुद्धि रहने से वे अवधूत पन के बाधक न होकर साधक बन जाते हैं । इसी अभिप्राय का गीता में भी "ब्रह्मार्पणं ब्रह्महविरित्यादि" रूपसे स्पष्टवर्णनकिया है ।१६। सकल चराचर जगत

के अधिष्ठान भूत कूटस्थ परमात्मा में धैर्य से जीवात्मा और परमात्मा की एकता सम्पादन करने वाला इसी लिये परमानन्द की अन्तिम सीमा को प्राप्त हुआ और वास्तविक तत्त्व को पहिचानने वाला अवधूत कहलाता है।१७। जो ब्रह्मनिष्ठ अपने स्वरूप को कदाचित किसी प्रिय शिष्य के कल्याणार्थ प्रकट कर देता है और कभी प्रकट शरीर को भी छिपा देता है इस लिये वह अपने शरीर में ही अखण्ड व्यापक ज्योति चित् स्वरूप को प्राप्त हुआ अवधूत कहलाता है या अव्यक्त प्रकृति ही व्यक्त रूप को धारण करती है। अतः प्रकृति का विकार होने से व्यक्त स्वर्गादि सब भोग्य विषयक प्रपञ्च अनित्य क्षण भंगुर और जल बुद्बुद् की तरह विनश्वर है। इसी से समस्त कार्य कारण रूप भूत भौतिक प्रपञ्च से विरक्त और सदा अचल, सत्य आत्मानन्द में तृप्त रहने वाला अवधूत योगी कहलाता है।१८। जो सदैव अखण्डव्यापक आत्म सुख में स्थित रहता है अतः असङ्ग ब्रह्म स्वरूप होने से जगत् के प्रकाशक सूर्य चन्द्रादि का भी प्रकाशक है और मायावी के समान लीला से स्वच्छन्द गति के द्वारा विचरने वाला अवधूत कहलाता है ॥१९॥

मू०-एवं विध नानासंकेत सूचको नित्य प्रकाशेवस्तुनि निज स्वरूपी सर्वेषां सिद्धान्तदर्शनानां स्वस्वरूप दर्शने सम्यक् सद्बोधकोऽवधूत योगीत्यभिधीयते स सद्गुरुर्भवति यतः सर्वं दर्शनानां स्व स्वरूप दर्शने समन्वयं करोति सः "अवधूत योगी स्यात् ॥२०॥

सं० टी०–(नित्य प्रकाशे) स्वरूपानुभवे संजाते (एवं विधेति) एवं विधानां सकलानां संकेतानां सूचकः पूर्वोक्त प्रकारेण नाना मत प्रदर्शकः (निजस्वरूपी) स्व स्वरूपानुभवनिष्ठः (सर्वेषां) आस्तिक नास्तिकानाम् (सिद्धान्त दर्शनानाम्) विभिन्न मत प्रदर्शकशास्त्राणाम् (स्वस्वरूप दर्शने) परमात्मस्वरूप बोधने सम्यक् समीचीनतया बोधकः समन्वयद्वारातत्त्वोपदेशकः(अवधूत योगीति कथ्यते) सएवच सद्गुरुर्भवति (यतः) यस्मात्कारणात (सर्वदर्शनानाम्) सकल शास्त्राणाम् (आत्मदर्शने)

समन्वयं संलापनं करोति सः "अवधूत योगी" स्यान्नतु भेदबोधज रागान्तः कलुषितः ॥२०॥

भा० टी०—जो शुद्ध, बुद्ध, व्यापक, नित्य प्रकाश, ज्योतिःस्वरूप आत्मानन्द में ही मग्न है इसी से परस्पर विरुद्ध मत वाले जनों के सिद्धान्त दर्शन को भी निज अखण्ड व्यापक स्वरूप में ही उक्तरीति से अनेक नाम संकेतों को भी परमार्थ अवस्था में ही घटानेवाला अवधूत योगी कहलाता है और वही योगी अच्छी प्रकार से नित्य अखण्ड आत्मोपदेश में समर्थ होता है। क्योंकि आत्म निष्ठ होने से जब वह जीवन मुक्त संसार मोह बन्धन को तोड़ चुका है तब दूसरे को भी आत्मोपदेश द्वारा पार कर सकता है, इसमें सन्देह नहीं। अतः वास्तविक हितचिन्तक होने से वह अवधूत योगी ही सद्गुरु कहलाने योग्य है क्योंकि वह अभेदात्मदर्शी विरुद्ध सिद्धान्त के प्रतिपादक मतों का भी वास्तविक अभिन्न निज स्वरूप में ही अभेद रूप से समन्वय कर लेता है। अर्थात् आत्मरूप में देखता है। वही यथार्थ में अवधूत है ॥२०॥

मू०—अत्याश्रमी च योगी च ज्ञानीसिद्धश्चसुव्रतः।
ईश्वरश्च तथा स्वामी धन्यः श्री साधुरेव च ॥२१॥
जितेन्द्रियश्च भगवान् स सुधी कोविदो बुधः।
चार्वाकश्चार्हतश्चेति तथा बौद्ध प्रकाशयित् ॥२२॥
तार्किकश्चेति सांख्यश्च तथा मीमांसकोविदुः।
देवतेत्यादि विद्वद्भिः कीर्तितः शास्त्रकोटिभिः ॥२३॥
आत्मेति परमात्मेति जीवात्मेति पुनः स्वयम्।
अस्तितत्त्वं परं साक्षाच्छिवरुद्रादि संज्ञितम् ॥२४॥

सं० टी०—इत आरभ्य व्यवहारै रित्यन्तैः सकल स्वरूपतां प्रदर्श्यावधूतस्य महिमानमातनोति सएवावधूतः (अत्याश्रमी, आश्रमानतीत्य वर्त्तमानः चकारादाश्रमानतीतोऽपि (योगी) योगाभ्यासतत्परः (ज्ञानी), आत्मज्ञः (सिद्धश्च) अणिमादि सिद्धिसम्पन्नः, (सुव्रतः) तपोनिष्ठः, ईश्वरो हिरण्यगर्भादिदेवः। तथा (स्वामी) नायकः श्री साधुः शक्तिसहि-

तोपासकः परोपकार निरतः, धन्यवादार्हः, अवधूते सर्व स्वरूपता घटत इतिभावः।२१।सएव 'जितेन्द्रियः वशीकृतेन्द्रियवर्गः 'भगवान् ऐश्वर्य संपन्नः स सुधीः, शोभनध्यानकर्ताबुधः, लौकिकावगमनवान् (कोविदः) पण्डितः, आत्मज्ञचार्वाकादीनां व्यावहारिकमत भेदेऽपि परमार्थावधूतत्वे कोऽपि भेदोनेति बोधयितुं तदनुवादः। चार्वाकः प्रत्यक्ष मात्र प्रमाण वादी (आर्हतः:) अर्हदुपासको जैनः। बौद्धप्रकाशविद् बौद्धसम्बन्धि प्रकाशवेत्ता बुद्धिवृत्तिरूप क्षणिक विज्ञान वादि सौगतः ॥२२॥ तार्किकः नैयायिकः (सांख्यः) कापिलः (मीमांसकः) कर्मवादी ब्रह्मवादी च ननु कथं सर्वस्वरूपोवधूतः सति भेदेऽत आह एते यमात्मानं विदुः (दैवतेत्यादि विद्वद्भिः) दैवताकालभावादि वादिभिः (शास्त्र कोटिभिः) तत्तद्दर्शनैः 'यः आत्मा कीर्तितस्तत्स्वरूपोऽवधूतोतश्चार्वाकादिरूप इति।२३। (आत्मा) भूतात्मा इत्यप्यवधूत एव (परमात्मा) ब्रह्मेत्यपिसः (जीवात्मा) जीवरूपोऽपि स एव यत्तु (साक्षाच्छिवरुद्रादिसंज्ञितम्) शिवरुद्र शब्देन कथ्यमानम् (परं तत्त्वम्) सर्वथा बाधरहितं वस्तु तत् स्वरूपोयमवधूतः सकल स्वरूपः संजातः कृतं परिगणनेन ॥२४॥

भा० टी०—पूर्वोक्त अवधूत ही चारों आश्रमों से अतीत होने से अत्याश्रमी है। क्योंकि वह ब्रह्मनिष्ठ है इसी से किसी आश्रम विशेष में अभिमान नहीं रखता। समाहित आत्मा होने से योगी ब्रह्मनिष्ठ होने से ज्ञानी अणिमादि सिद्धि युक्त होने से सिद्ध दृढनिश्चयी होने से सुव्रत सर्व सामर्थ्य युक्त होने से ईश्वर जितेन्द्रिय होने से स्वामी और सबका कल्याण साधक होने से वही धन्य है। भूतों की उत्पत्ति प्रलय गति आगति विद्या अविद्या को जानने वाला भगवान् और जितेन्द्रिय होता है वही अच्छा ध्यानी ज्ञानी पण्डित कहा जा सकता है। इन्द्रिय परायण व्यसनी पुरुषों में उक्त लक्षण नहीं घट सकता। अब मतान्तरों में अरुचि दिखाते हैं। देहात्म वादी चारवाक मध्यम परिमाणात्मवादी जैन क्षणिक विज्ञान वादी बौद्ध आरम्भ वादी नैयायिक परिणाम वादी सांख्य और केवल कर्मवादी मीमांसक ये सब अपने अपने मत के अनुसार जिस तत्त्व का उपदेश देते हैं तथा अनेक शास्त्रों और विद्वानों ने भी इस संसार

का कारण देवता स्वभाव काल कर्म आदि को कहा है। भूतात्मा परमात्मा और जीवात्मा इत्यादि नाना रूप से जो वर्णित है वास्तव में वह एक ही तत्त्व है। वही प्रत्यक्ष आत्म रूप चेतन सर्व व्यापक तीनों कालों में अबाध्य शिव रुद्रादि नामों से कहा जाता है। इसीलिये किसी सिद्धान्त से परम अद्वैत सिद्धों के सिद्धान्त का विरोध नहीं। क्यों कि सिद्ध समाहित आत्मा होने से वास्तविक एक ब्रह्म तत्व में निष्ठ रहते हैं। पूर्वोक्त वादी लोग परिणामशाली बुद्ध्यादि के उपासक होने से बुद्धि की कल्पना के आधार पर भले ही चले इससे समाहित आत्मा सिद्धों की कुछ हानि नहीं। २१-२२-२३-२४

मू०—शरीर पद्म कुहरे प्रत्सर्वेषामवस्थितम् ।
तदवश्यं महापाशाच्छेदितव्यं मुमुक्षुभिः ॥ २५ ॥
ब्रह्मा विष्णुश्च रुद्रश्च सोऽत्तरः परमः स्वराट् ।
स एवेन्द्रः स च प्राणःसकालाग्निःस चन्द्रमाः ॥२६॥
स एव सूर्यः स शिवः स एव परमः शिवः ।
स एव योग गम्यश्च सांख्य शास्त्रपरायणैः ॥२७॥
स एव कर्म इत्युक्तः कर्ममीमांसकैरपि ।
सर्वत्र सत्परानन्द इत्युक्तो वैदिकैरपि॥ २८ ॥
व्यवहारैरयं भेदस्तस्मादेकस्य नान्यथा ॥ २६ ॥
मुद मोदे तु रादाने जीवात्म परमात्मनोः ।
उभयो रेक संवित्तिर्मुद्रेति परिकीर्तिता ॥३०॥
मोदन्ते देव सङ्घाश्च द्रवन्ते ऽसुरराशयः ।
मुद्रेति कथिता साक्षात् सदा भद्रार्थ दायिनी ॥३१॥
अस्मिन्मार्गे ऽदीक्षिता ये सदासंसाररागिणः ।
तेहि पाषण्डिनः प्रोक्ताः संसार परिपेलवाः ॥३२॥
अवधूत तनुर्योगी निराकार पदे स्थितः ।

सर्वेषां दर्शनानाञ्च स्वस्वरूपं प्रकाश्यते ॥ ३३ ॥

सं० टी०—सर्वेषां प्राणिनां शरीरे यत् पद्मं हृदयाख्यं तस्य कुहरे गुहायाम् (यत्) आत्मतत्वमवस्थितम्, वर्तमानम् । तदात्मतत्त्वम् (महापाशात्) अविद्यादिजालात् (मुमुक्षुभिः) मोक्षार्थिभिर्मनुष्यैरवश्य मेव (छेदितव्यम्) पृथक् कर्तव्यं विज्ञानासिना एयन्त छिद्धेस्तव्यति रूपम् । तदेव मनुष्य जन्म साफल्यं तत्त्वावधूतेन सम्पादितमिति स्तुति ध्वनिः ॥ २५ ॥ एकैवात्मतत्त्व रूपोऽवधूतो व्यवहारेऽनेक नामरूपो पाधिभेदैर्व्यवह्रियत इति वर्णयति ब्रह्मेत्यादिरजउपहितो ब्रह्मा सत्वोप हितो विष्णुस्तमउपहितो रुद्रः स एवोपाधि रहितोऽक्षरः परमः स्वराट् स्वर्गाधिपति पिण्डोपहित इन्द्रः "सूत्रात्मा प्राणः„ प्रलय कालिकः कालाग्निस्तथा चन्द्रः ॥ २६ ॥ स एवावधूतः सूर्यरूपः, कल्याण रूपः, परमः शिवः, सकल जगत् संहारकः किं च योग शास्त्र गम्यः क्लेश कर्म विपाकेत्यादि सूत्र प्रतिपाद्यः,सांख्यशास्त्रोक्तासंगचिद्रूपानेक पुरुषा अपि स एवेति ॥ २७ ॥ स एवावधूतः कर्म योग मीमांसकसम्मत् कर्म रूपः किं च वैदिकैरद्वैत वेदान्तिभिरपि सत्परानन्द शब्देन सर्वत्रोपनि-षत्सु कथितः सोऽपि स एव ॥ २८ ॥ तस्माद् व्यवहारैरेवायं भेदः संजातो न तु परमार्थतया तस्मादेकस्य तत्वस्य (नान्यथा) न भेदो भवितुमर्हति ॥ २९ ॥ मुद्रा शब्दे मुदिति रा इति च पदं तत्र मोदत इति व्युत्पत्या मुद शब्दार्थो जीवात्मा आनन्द भोग कर्तृत्वात्। राति ददातीति व्युत्पत्या रा पदार्थश्च परमात्मा सर्वेषां कर्मफल दातृत्वात् । उभयत्र वाच्यार्थयोर्भेदेऽपि लक्ष्यभूत चैतन्यस्यैक्यमेवेति मुद्रापदार्थमाह मुद इति मुद् धातु र्मोदेर्थे रा धातु र्दानेऽर्थे च वर्तते तदुभयार्थयोर्जीवा त्म परमात्मनोरैक्य संवित्तिरभेदज्ञानं मुद्रेति प्रकीर्तिता तस्मात्कलिङ्क (मुद्रा) कर्णकुण्डलमिति यावत् ॥ ३० ॥ किं च मुद्रा पदस्य वाच्यान्तर माह—मोदन्त इति मुदं राति ददातीत्यर्थे व्युत्पत्तिमङ्गीकृत्योच्यते देवा नां मुदं ददाति, अर्थादेतद् भूषणं दृष्ट्वा देवा मोदन्ते हृष्टा भवन्ति। यथा राजा स्वदत्त चिन्ह धारिणं पुरुषं दृष्ट्वा मोदते । किं च नामैकदेश न्यायेन मुग्धा असुरा द्रवन्ते । एनां दृष्ट्वा पलायन्ते । यथा चोरः राज

चिन्हात। सदा साक्षाद् भद्रार्थ दायिनी कल्याण प्रदा मुद्रा शास्त्रे प्रकीर्तिता कथिता ॥ ३१ ॥ (अस्मिन्मार्गे) योग मार्गे (अदीक्षिताः) अशिक्षिताः (सदा संसार रागिणः) नित्यं भवविषयाभिलाषुकाः 'संसार एव परि पेलवः, अति रमणीयो येषां ते (पाषण्डिनः) धूर्ताः प्रोक्ताः । अथ वाऽस्मिन् मार्गे योगमार्गे दीक्षिताः सन्तः सदा निरन्तरं जीवननिर्वाह काधिक काले संसाररागिणस्तेपीत्यर्थोऽपि वक्तुं शक्यते ॥ ६२ ॥ सांसारिक पुरुषान्दयित्वा परमार्थमभीप्सु योगिनः प्रशंसन्ति यः (निराकार पदे) चिदानन्द घने (स्थितः) रममाणः (अवधूत तनुः) सकल लिंङ्ग रहित विग्रहः (योगी) साधनवान् स सर्वेषां दर्शनानां निखिल सिद्धान्तानाम् (स्व स्वरूपम्) निजात्म स्वरूपं प्रकाशते प्रकाशयतीत्य स्तर्भावितण्यर्थः ॥ ६३ ॥

भा० टी०—सर्व प्राणियों के शरीरस्थ हृदय कमल में विशेष करके आत्म तत्त्व अभिव्यक्त होता है। वही उपाधियुक्त होने से शोक मोहादि पाश से बद्ध हो संसार चक्र में भ्रमण करता है। अतः मुमुक्षु को चाहिये कि अज्ञानरूप उपाधि बन्धन को तोड़कर निज अखण्ड आत्मानन्द में प्रतिष्ठित होजाय बस यही मनुष्य जन्म की सफलता है। वास्तव में आत्म तत्त्व एक ही है किन्तु व्यवहार काल में अनेक वादियों की कल्पना से उसी के अनेक नाम होजाते हैं। इसी अभिप्राय को यहां से लेकर उनतीस श्लोक तक वर्णन करेंगे। वही आत्मतत्त्व ब्रह्मा, विष्णु, रुद्र परब्रह्म, इन्द्र, प्राण कालाग्नि और चन्द्रमा है। वही सूर्य, शिव तथा योग से जानने योग्य परम शिव और वही सांख्य में प्रतिपादित असङ्ग आत्म तत्व है। उसी परम तत्व को कर्म कहकर मीमांसक जगत् का कारण कहते हैं और उसीको वेदान्ती लोग सच्चिदानन्दनाम से कहते हैं। अतः वास्तव में तो वह एक ही आत्म तत्व है। उसीके ये व्यावहारिक अनेक भेद हैं वास्तविक नहीं। मुद्रा शब्द में दो पद हैं। एक 'मुद्' दूसरा 'रा' इनमें मुद् का अर्थ आनन्द भोक्ता जीवात्मा और रा का अर्थ दाता परमात्मा है। दोनों के मेल से जीवात्मा और परमात्मा का अभेद ज्ञान सिद्ध होता है। अतः इसी लक्ष्य के स्मारक मुद्रा अर्थात् कुण्डल कानों में योगीजन धारण करते हैं। मुद्रा शब्द के दूसरे

अर्थ का वर्णन करते हैं। 'मुद्' अर्थात हर्ष 'रा' का अर्थ है देनेवाला। जैसे राजा अपने बनाये हुये चिन्ह विशेषों से सज्जित सेना को देखकर प्रसन्न होता है वैसे ही देवगण जिसके कानों में मुद्रा देखते हैं उसके ऊपर प्रसन्न होतेहैं और जैसे चोर राज चिन्ह को देखकर भयभीत होता है वैसे ही इस देव चिन्ह मुद्रा को देखकर असुर गण भय मानते हैं। अतः योगियों के लिये मुद्रा धारण करना कल्याणकारी है। जो इस योगमार्ग में दीक्षित या अदीक्षित हैं वे यदि सदा संसार में ही अनुरक्त होकर संसार को ही सर्वोत्तम रमणीय मानलें तो वे आत्म तत्त्व के विरोधी और पाखण्डी कहलाते हैं। जो योगी शरीरस्थ मल विक्षेप आदि दोषों को दूर करने वाला तथा सदा निराकार ज्योतिः पद में ही स्थित रहने वाला है उसीको सब दर्शन आदि शास्त्रों में व्यापक आत्म स्वरूप प्रकाशित होता है। अर्थात् वह केवल ब्रह्म स्वरूप होजाता है ॥२५-२६-२७-२८-२९-३०-३१-३२-३३॥

मू०—सर्वतोभरिताकारं निज बोधेन बृंहितम्।
चरते ब्रह्मविद्यस्तु ब्रह्मचारी स कथ्यते ॥३४॥
गृहिणी पूर्णता नित्या गेहं व्योम सदावलम्।
यस्तया निवसत्यत्र गृहस्थः सोऽभिधीयते ॥३५॥
सदान्तः प्रस्थितो योऽसौ स्व प्रकाशमये वने।
वानप्रस्थः सविज्ञेयो न वने मृगवच्चरन् ॥३६॥
परमात्माऽथ जीवात्मा आत्मन्येव स्फुरत्यलम्।
तस्मिन्न्यस्तः सदा येन संन्यासी सोऽभिधीयते॥३७॥

सं० टी०—अधुना सकलसम्प्रदायावलम्बिनामवधूतपदार्थेऽन्तर्भाव इति प्रदर्शनाय परमार्थत एकमेव परमार्थ तत्त्वं सर्वेषां लक्ष्यमिति बोधनद्वारा ब्रह्मचर्यादि निखिल शब्दानामवधूतपदार्थे समन्वयः प्रस्तूयते तत्र प्रथमं ब्रह्मचारि पदार्थमाह यो ह्यवधूते सम्यग् घटते (सर्वतोभरिताकारम्) सर्वतः परितोभरितः पूर्ण आकारः स्वरूपं यस्य तत् स्वस्वरूपम् परिपूर्णम् बृंहितम्, व्यापकम्, ब्रह्मयदस्ति तत्र विशेषः

(निजबोधेन) स्वकीय ज्ञानद्वारा (चरति) सदा रमते स ब्रह्मचारीकथ्यते सोवधूतः ।३४। एवं गृहस्थ व्युत्पत्तिरपि तत्रैव संघटयते नित्यरूपापूर्णैव (गृहिणी सहचारिणी तया सह–आकाश वाच्यब्रह्मरूपगृहेसदायो निवसति स एव गृहस्थः कथ्यते ।३५। तथैव वानप्रस्थतापि संस्थाप्यते योऽसौ वनमेव वानः प्रज्ञादित्वादण् तस्मिन् प्रकाशमये प्रकाशरूपे प्रकर्षेण स्थितः, निष्ठः, स एव वानप्रस्थः। न तु मृगवद्वनेऽन्धकारात्मके चरन् वानप्रस्थतया समन्वीयते ।३६। संन्यासि पदार्थमाह–परमात्मेति तथा चोपाधि वशाज्जीवात्मपरमात्मेति भेदेन व्यवह्रियमाणोऽपि चेतनः स्वस्वरूपता (आत्मन्येव) स्वरूपमात्रे (स्फुरति) भाति तस्मिन् येन सर्वं जीवभावादिकं न्यस्तं स संन्यासीति व्यवह्रियते ॥३७॥

भा० टी०—अब ब्राह्मणादि द्विज वर्णों में जो ब्रह्मचर्य गार्हस्थ्य आदि का लौकिक अर्थ है उसी को परमार्थतः अवधूत योगी में घटाते हैं। व्यापक ज्योतिःरूप आत्मा के वोध से बढ़ा हुआ अतएव ब्रह्मज्ञान द्वारा स्वस्वरूप की रक्षा करने वाला और ज्योतिः स्वरूप आत्मा में ही रमण करने वाला अवधूत योगी ही वास्तविक ब्रह्मचारी कहा जाता है। जिस सिद्ध योगि राज के निरन्तर साथ रहने वाली आत्म व्यापकता ही पत्नी है और व्यापक ब्रह्म ही जिस का सदा घर रूप बल है उस ब्रह्म घर में अपने से अभिन्न आत्म व्यापकता के साथ निरन्तर रहने वाला अवधूत योगी ही परमार्थ गृहस्थ है। जो जितेन्द्रिय अवधूत योगी आत्म प्रकाश रूपी वन में विचरता है वही परमार्थ वानप्रस्थ है। केवल मृग के सदृश जङ्गल में घूमने वाला वानप्रस्थ नहीं है। सर्वज्ञत्व उपाधि सहित परमेश्वर और अल्पज्ञत्व उपाधि सहित जीव ये दोनों उपाधि रहित अखण्ड ज्योति आत्मा में ही जिसको अभिन्न रूप से प्रतीत होते हैं और उसी ज्योति स्वरूप आत्मा में जो समस्त वाह्य कल्पनाओं का परित्याग करने वाला अवधूत योगी है वही वास्तव में परमार्थ संन्यासी कहलाता है ॥ ३४-३५-३६-३७ ॥

मू०–मायाकर्मकलाजालमनिशं येन दण्डितम्।
अचलो नगवद्भाति त्रिदण्डी सोभिधीयते॥३८॥

एकं नानाविधाकारं चंचलन्तु सदातु यत् ।
तच्चित्तं दण्डितं येन एकदण्डी सकथ्यते ॥३९॥

शुद्धं शान्तं निराकारं परानन्दं सदोदितम् ।
तं शिवं यो विजानाति शुद्ध शैवो भवेत्तु सः ॥ ४० ॥

सन्तापयति दीप्तानि स्वेन्द्रियाणि च यः सदा ।
तापसः स तु विज्ञेयो न च गोभस्म धारकः ॥४१॥

क्रिया जालं पशुं हृत्वा पतित्वं पूर्णतां गतम् ।
यस्तिष्ठेत् पशु भावेन स वै पाशुपतो भवेत् ॥४२॥

सं० टी०—संन्यासे कश्चित् त्रिदण्डी भवति तस्यतात्त्विकमर्थमाह-१ (माया, अविद्या, २-(कर्म) धर्माधर्मौ, ३-(कलाजालम्) प्राणादि लिङ्ग शरीरमेतत् त्रयं येन (दण्डितम्) तत्त्वज्ञानेन निवारितम् (स्वयं च) नगवत् पर्वतवदचलः यो भाति स त्रिदण्डी कथ्यते न तु केवल वंशदण्ड त्रयधारणेन त्रिदण्डित्वमाप्नोति । अतः,मुख्य लक्ष्ये सावधानेन स्थातव्यम् ॥ ३८ ॥ (नानाविधाकारम्) कदाचिद्रागरञ्जितं कदाचिद् द्वेषाकुलितमित्थं नानावृत्ति विलसितम् (चंचलम्) क्षणैकस्मिन् परः सत् संकल्प शीलम् यच्चित्तं तदेकं दण्डितं येन स एकदण्डी कथ्यते ॥ ३९ ॥ (शुद्धं शान्तं) सकल धर्म रहितम् (निराकारम्) अखण्डम् (परानन्दम्) चिदानन्द स्वरूपं सदोदितम्, अस्तमनवर्जितम् एतादृशं शिवं यो जानाति सः शुद्धशैवः ॥ ४० ॥ यः (सदा) सर्वदा (दीप्तानि) विषयाभिमुखानि(इन्द्रियाणि)चक्षुरादीनि (संतापयति) विषयेभ्यो निवर्त्तयति स च तापसो विज्ञेयः,) न तु भस्म मात्रधारकः ४१ (क्रियाजालम्) कर्मपाशात्मकम् (पशुम्) सेवकत्वरूप जीवभावं (हृत्वा) परित्यज्य (पूर्णताम्) व्यापकतारूपम् (पतित्वं) स्वामित्वरूप परमात्म भावम् (गतम्) प्राप्तम् (शिवम्, यः (तिष्ठेत्) उपासते सवै निश्चयेन (पाशुपतः) पशुपति मतानुयायी पशुभावेन स्वस्वामिभावेन भेदरूपेणोपासक इति अत्रोपासनार्थवाचकत्वेन स्था धातुः सकर्मको यथादित्य

मुपतिष्ठते। उपसर्गस्य द्योतकतया वह्निनापि धातु प्रयोगे तदर्थो व्याख्यः ॥४२॥

भा० टी०—माया तथा माया का कार्य्यभूतशुभाशुभ कर्म और नाना कला जालादि प्रपञ्च को त्यंचिन् करने वाला एवं एक आत्मस्वरूप में ही पर्वत के सदृश अचल ऐसा अवधूत योगी ही उक्त तीनों को दण्डित करने से परमार्थ त्रिदण्डी कहलाता है। अनेक विषय वासनाओं में अनुरक्त इसी से सदा चंचल स्वभाव ऐसे चित्त को भी जिस ने योग बल से जीत लिया है। वह अवधूत योगी यथार्थ एक दण्डी है। भाव यह है कि एक मन के जीतने से ही संसार बन्धन से मुक्त हो सकता है अन्यथा नहीं। शुद्ध शान्त निराकार एवं परमानन्द स्वरूप और सदा प्रकाशमान व्यापक ज्योतिः स्वरूप ऐसे शिव को जो जानता है वही अवधूत वास्तविक और शुद्ध शैव कहलाने योग्य है दूसरा नहीं इन्द्रियों की अपने अपने विषयों में प्रवृत्ति स्वाभाविक है उनको अपने अपने विषयों से रोक कर आत्मा में लगाना ही उन इन्द्रियों का तपाना है। अतः आत्म ध्यानी जितेन्द्रिय योगी को ही सच्चा तपस्वी जानो केवल उपले की भस्म रमाने वाला नहीं। सकाम कर्मसमूहरूप पशु को छोड़कर निज आत्मा की व्यापकता को प्राप्त हुआ जो योगिराज पशु भाव से रहता है वह यद्यपि यथार्थ ब्रह्मनिष्ठ है तथापि स्थूल बुद्धि मूर्ख जनों को उस तत्त्व ज्ञानी का व्यापार पशु जैसा दीखता है। ऐसा सिद्धराज ही सच्चा पाशुपत मतावलम्बी कहलाता है॥ ३८-३९-४०-४१-४२॥

मू०—परानन्दमयं लिङ्गं निजपीठे सदाऽचले।
तल्लिङ्गं पूजितं येन स वै कालमुखो भवेत् ॥४३॥
विलयं सर्वतत्त्वानां कृत्वा संधार्यते स्थिरम्।
सर्वदा येन वीरेण लिङ्गधारी भवेत्तु सः ॥४४॥
अन्तकादीनि तत्त्वानि त्यक्त्वा नग्नो दिगम्बरः।
यो निर्वाण पदे लीनः स निर्वाणपरो भवेत् ॥४५॥
स्वस्वरूपात्मकं ज्ञानं समन्त्रं तत् प्रपालितम्।

अनन्यत्वं सदा येन स वै कापालिको भवेत् ॥४६॥

सं० टी०—(परानन्दमयम्) सच्चिदानन्द स्वरूपम् (लिङ्गम्) संसारकारणम् (सदाऽचले) नित्यरूपे (निजपीठे) स्वधाम्नि यद् वर्तमान मिति शेषः तल्लिङ्गं येन पूजितं पुष्पचन्दनादिभिर्ध्यानादिभिश्चोपासितं सवै कालमुखः कालोमुखे यस्येति काल विजेता। इदमेव लिङ्गोपासना रहस्यम् ।महाकालोपासकोऽमरो भवति यथालिङ्गपूजनेनमार्कण्डेय श्चिरजीवितां गतः ॥४३॥ (सर्वतत्त्वानां) सर्वभूतानाम् भूत लौकिक वस्तूनाम् (विलयं कृत्वा) तेषुसम्बन्धाभिमानं विहाय येन वीरेण संसाराभिमानरूपरिपु दमनेनैव वीरतेति ध्वन्यते। स सर्वदा (स्थिरम्) कूटस्थब्रह्मधार्य्यते, उपास्यते। स लिङ्गधारी भवेत्। तत्स्मारकं वाह्यलिङ्ग धारणमिति ध्वनिः ॥४३॥ अन्तकादीनि तत्त्वानि विनश्वर वस्तूनि (त्यक्त्वा) उज्झित्य (नग्नः) संसारात्मकावरणरहितः, अतो दिगम्बरः (दिगेव ब्रह्मैवाम्बरो यस्य सः (यो निर्वाणपरः) ब्रह्मलीनस्तन्निष्ठः स निर्वाणपरो निर्वाणीति भवेत् ॥४४॥ (स्वस्वरूपात्मकम्) आत्मरूपं नित्यम् (ज्ञानम्) ब्रह्म समंत्रम्) गुरुमन्त्रसहितम् येनोपासितमिति शेषः किञ्च (अनन्यत्वम्) आत्मपरमात्मनोरैक्यम् (प्रपालितम् । भेदभ्रदात् वस्करात्द्रक्षितं स वै कापालिकः, मुख्यः कापालिकमतानुयायी ॥४६॥

भा० टी०—जो सदा अचल और परमानन्द रूप होकर निज धाम में स्थित है वह लिङ्ग है। अर्थात् जगत् का कारण रूप है उस की ही पूजा जिस ने की है अर्थात पत्र पुष्पादि द्वारा वाह्य पूजन और ध्यानादि द्वारा मानस पूजन किया है वह काल को जीतनेवाला महाकाल का उपासक कहलाता है। यही लिङ्गोपासना का रहस्य है। वाह्य शिव लिङ्ग उसी की प्रतिकृति अर्थात् फोटो है। सकल चराचर भूतों का लय करके अर्थात् भूत दृष्टि का परित्याग कर जिस अभेदोपासक ने सदा स्थिर परमात्मा को धारण करलिया है वह वास्तविक लिङ्गधारी है। इसी भाव का स्मारक वाह्यलिङ्गधारण है। जन्म मरण आदि सांसारिक पदार्थों को छोड कर जो संसार रूप आवरण से रहित होगया है अत एव वह दिगम्बर और सदा ब्रह्म रूप निर्वाण में स्थित

निर्वाणी कहलाता है। जिस ने गुरुमन्त्र द्वारा अभिन्न निज आत्म रूप ज्ञान की रक्षा की है वह कापालिक होता है ॥ ४३-४४-४५-४६ ॥

मू०–महाव्याप्तिपरंतत्त्वमाधाराधेयवर्जितम् ।
तद्व्रतं धारितं येन स भवेद्धै महाव्रतः ॥४७॥
कुलं सर्वात्मकं पिण्डमकुलं सर्वतोमुखम् ।
तयोरैक्यपदं शक्तिर्यस्तां वेद स शक्तिभाक् ॥४८॥
कौलं सर्वकलाग्रासः सकृतः सततं यया ।
तां शक्तिं यो विजानाति शक्तिज्ञानी स कथ्यते ॥
ज्ञात्वा कुलाकुलं तत्त्वं स क्रमेणक्रमेणतु ।
स्वप्रकाश महाशक्त्या ततः शक्तिपदं लभेत् ॥४९॥

सं० टी०–(आधाराधेय वर्जितम्) सर्वेषामाधारः सन् स्वयं निराधारः (महाव्याप्तिपरम्) अखण्ड तत्त्वमविनाशि बृहद्व्रतं तदुपासनं येन धारित मनुष्ठितं वैनिश्चयेन स महाव्रतो भवेत् ।४७। (पिण्डम्) पिण्डरूपम् कार्यात्मकं (सर्वात्मकं) समष्टि सृष्टिरूपम् प्राकृत प्रकृतिरूपञ्च कुलं भवति । अखण्डचिद्रूपं च सर्वतोमुखं कारण रूपं स्थापित स्वान्तः सकलकार्यमकुलं व्यवह्रियते (तयोः कुलाकुलयो रैक्यपदम भिन्नतारूपा शक्तिः । एकैव शक्तिः सर्वत्र व्याप्तेति भावः । तां समष्टि रूपाम्, शक्तिं यो वेद स शक्तिभाक् शाक्तः कौलं नाम सर्व कलाग्रासः सर्वासां कलानांप्राणादिवस्तूपादान चतुःषष्टि शक्तीनां ग्रासः प्रलयः (सः) लयः (यया) शक्त्या सततं नित्यम्(कृतः) सम्पादितः (तां) शक्तिम् (प्रलयकारिणीं महाकालीं यो विजानाति विशेषेण स्वानुभवेन वेत्ति स शक्तिज्ञानी कथ्यते सक्रमेण यथा क्रमं कुलाकुलं पूर्वोक्तं ज्ञात्वा क्रमेण (स्वप्रकाशमहाशक्त्या) चिद्रूप महाशक्त्या सहैक्यं सम्पादयेत (ततः) साधनानन्तरं शक्तिपदं शाक्त स्थानं लभते ॥४९॥

भा० टी०–अब महाव्रत के मुख्य अर्थ का निरूपण किया जाता है। जो आधार आधेय रहित है अर्थात् सब चराचर का आधार होता हुआ भी स्वयं निराधार है तथा सर्वत्र व्यापक अखण्डतत्त्व है

उस का व्रत जिसने धारण किया है वह महा व्रत कहलाता है। अब शाक्त का अर्थ सुनिये जो दृश्यमान चराचर और अखिल ब्रह्माण्ड तथा उनकी प्रकृति सूक्ष्म समष्टि है वह अचित् कुलपद से व्यवहृत होता है। और जो सर्वव्यापक चिद्रूप वह अकुलपद से व्यवहृत होता है। इन दोनों की उपादान उपादेय एकता ही शक्ति है उस को जो जानता है वह शाक्त है सकल कार्य करने वाली व्यष्टि शक्ति तथा सकल पदार्थों का प्रलय जिस में हो वह कौल है। यह प्रलय जिस शक्ति के द्वारा होता है उस महाकाली शक्ति को जो जानता है जप ध्यानादि द्वारा जिस ने स्वानुभव गोचर किया है वह शक्तिज्ञानी कहलाता है। पूर्वोक्त कुला कुल तत्व को उपर्युक्त क्रम से जानकर फिर उसी क्रम से स्वप्रकाश चिद्रूप महाशक्ति के साथ एकता करे तब शक्तिपद का लाभ होता है यह सर्वोच्चपद है। अतः इसका अनेक श्लोकों से निरूपण किया गया है ॥ ४७-४८-४९॥

मू०—मदोमद्यमतिर्मुद्रा मायामीनं मनः पलम्।
मूर्च्छनं मैथुनं यस्य तेनासौ शाक्त उच्यते ॥५०॥

सं० टी०—पञ्च मकारेण पूजनमिति शाक्तमतम्, तत्र के पंच मकारपदार्थास्तान् दर्शयति (मदः) अभिमानमेव (मद्यम्) सुरानतुबाह्य मद्यम् (मतिः) कामना (मुद्रा) मुदं मनोराज्यरूपमानन्दं राति ददातीत्य र्थिका। न तु शष्कुली (माया) च मीनपदार्थोऽतिचञ्चलत्वान्न तु जलचरः। मन एव पलम्। मांस पद वाच्यम्। अन्नमयत्वात्। न तु पललम्। (मूर्च्छनम्) प्राणापानयोः संगमः कुम्भक इति (मैथुनम्) मैथुन पद वाच्यम्। न तु ग्राम्य धर्मः। क्वचित् कुण्डलिन्याः सहस्रारस्थ परम शिवेन योग एव मैथुनमित्याहु। यस्य पूर्वोक्त पदार्थाः परमात्मनि समर्पणीयाः सन्ति। तेनासौ शाक्त उच्यते। अत्रेदं बोध्यम्। प्राकृत विषयका एते मोक्ष प्रतिबन्धका अतस्तेषां परमशक्तौप्रत्यर्पणं क्रियते। अतस्तेन परित्यक्तो जीवो विशुद्धः सन् स्वरूप भूत मोक्षपदं लभते। ननु ग्राम्य कर्मानुष्ठाने विमुक्तो भवतीति सिद्धान्तः (एतेन) एतदीय रहस्यमजानन्तः पंच मकार पूजनस्य निन्दका रहस्येतर सेवकाश्चोभये निरस्ताः ॥ ५० ॥

भा० टी०—शाक्त मत में पांच मकारों से पूजन करना प्रसिद्ध है। अज्ञ पुरुष उस का निन्दनीय अर्थ जानकर कोई अनुष्ठान न करे अतः उस का रहस्य अर्थ श्री नाथ जी स्वयं निरूपण करते हैं। यहां मद्य का अर्थ अभिमान है! न कि सुरा। मुद्रा का अर्थ कामना (अभिलास) है न कि शष्कुली (पूड़ी) मीन का अर्थ माया है न कि मछली। संकल्प विकल्पात्मक मन ही अन्न रसमय होने से मांसपद का अर्थ है और मैथुन पद का अर्थ मूर्च्छन अर्थात् संसार सम्बन्ध से बुद्धि की अविवेकिता है इन पांचों पदार्थों को जिस ने महा शक्ति में समर्पित किया है वह शाक्त है। भाव यह है कि ये पांच मोक्ष के प्रतिबन्धक हैं। अतः इनका महाशक्ति में समर्पण कर देने से जीव उस से छूट कर मोक्ष को प्राप्त करलेता है। इस रहस्य को न जान कर जो लोग पञ्च मकारों द्वारा पूजन की निन्दा करते हैं। और निन्दित मदिरादि का सेवन करते हैं वे त्याज्य हैं ॥५०॥

मू०—यया भासस्फुरद्रूपं कृतं चैव स्फुटं बलात्।
तां शक्तियोविजानातिशाक्तःसोऽत्राभिधीयते।५१।
यः करोति निरुत्थानं कर्तृ चित् प्रसरेत् सदा।
तद्विश्रान्तिस्तया शक्त्या शाक्तःसोत्राभिधीयते ५२
व्यापकत्वे परं सारं यद्विष्णो राद्य मव्ययम्।
विश्रान्ति दायकं देहे तज्ज्ञात्वा वैष्णवो भवेत् ५३
भास्वत् स्वरूपो यो भेदात् भेद भावोज्झितः खलु।
भाति देहे सदा यस्य सबै भागवतो भवेत्।५४।
यो वेत्ति वैष्णवं भेदैः सर्वासर्वमयं निजम्।
प्रबुद्धं सर्व देहस्थं भेदवादी भवेत्तु सः ॥५५॥
पंचानामक्षया हानिः पंचत्वं रात्रिरुच्यते।
तां रात्रिं यो विजानाति स भवेत् पांचरात्रिकः॥५६॥

सं० टी०—यया शक्त्या हठाद् बलात् भासस्फुरद्रूपं प्रकाश-

संचार क्रिया विशिष्टं जगत् इत्यध्याहारः कृतं सृष्टिं समर्जेतिभावः। अथ च ब्रह्म रूपं प्रकाशितवन् तां यो विजानाति स शाक्त इति ॥५१॥ यः शक्त्या विश्रान्ति तया विगता श्रान्ति यस्यास्तस्याभावो विश्रान्तिता विश्रामेणेति फलितम्। यथा साधर्म्य मित्यादौ समानो धर्मो यस्य तस्य भावः समानधर्म इति फलति। शक्तिं संकोच्येति यावत् (निरुत्थानं) निर्विकल्प समाधिं करोति तस्यां दशायां (कर्तृचित्) स्वतन्त्र चेतन रूपः सन् 'प्रसरेत्' विरहेत (अत्र)संसारे स शाक्तोऽभिधीयते ॥५२॥ (विष्णोः) विष्णु पदवाच्यस्य व्यापकत्वे सति यत (परम्) सर्वतः श्रेष्ठं (सारम्) वस्वभूतम् (आत्मम्) सर्वनिदानम् (अव्ययम) त्रिविध परिणाम शून्यं वस्तु विचारतो निर्गलितं तत्त्वं (देहे) स्वपिण्डे (विश्रान्ति दायकम्) स्थितिकारकम् चैतन्यं ज्ञात्वा वैष्णवो भवेत ॥५३॥ यः(भास्वत् स्वरूपः) चैतन्यरूपः (भेदभावोज्झितः) स्वरूपतोऽभिन्नः (भेदात्) शरीरोपाधि-भेदात (यस्य) जनस्य (देहे) शरीरे (भाति) प्रकाशते तज्ज्ञाता भागवतो भवेत् ॥५४॥ (सर्वासर्वमयम्) समष्टि व्यष्टि रूपम् (निजम्) स्वयम् (प्रबुद्धम्) प्रकाशमानम् (सर्व देहस्थम्)एकमेव शरीरोपहितम् (वैष्णवम्) विष्णुतत्त्वम् (यो भेदैः) नानारूपेण (वेत्ति) जानाति स तु भेदवादी भवेत (पंचानाम्) पंचभूतानां या (अत्यया) समूलतोऽनुच्छिन्ना (हानिः) स्थूल रूपविनाशरितिरोभाव इति यावत्तदेव पञ्चत्वं प्रलयावस्थारात्रिः। तां योविजानाति स पांचरात्रिकः। अयमाशयः पंचानां रात्रिः, इति विग्रहः पंच पदार्थः भूतपंचकं रात्रिपदार्थः प्रलयस्तथा च पंचभूतलयः पंचरात्रि पदार्थः तात्कालिक परमेश्वरोपासकः पांचरात्रिक इति। अथवा पंचैव रात्रयः धर्मप्रधानतया पंचत्वरूपा रात्रिर्लय इति यावत् तद् बोद्धा लय योग ज्ञाता पांचरात्रिको भवेन्न केवल नाम मात्रेण नारदपंचरात्र ग्रन्थप्रमाणवादीति ध्वनिः ॥५६॥

भा० टी०—जिस शक्ति ने अखिल क्रिया कौशल विशिष्ट जगत का आविर्भाव और ब्रह्मानुभव का विकाश किया है उस शक्ति को जो जानता है वह शाक्त है। जो शक्ति को संसार से संकुचित करके निरुत्थान निर्विकल्प समाधि करता है और उस समाहित दशा में

स्वतन्त्र चेतन हो विहार करता है वह शाक्त है। विष्णुपद का अर्थ व्यापक है। अतः जो उस व्यापक अखण्ड अविनाशी तत्व को अपने देह में स्थित अपने स्वरूप से अभिन्न जानता है वह वैष्णव होता है। जो स्व प्रकाश भेद रहित होकर सर्वत्र अभेद रूप से प्रकाशमान है उस का जिस ने निज पिण्ड में अनुभव कर लिया है वही भागवत है। जो व्यष्टि समष्टि व्यापक तथा प्रकाशमय एक ही विष्णु तत्व को नाना रूपों में देखता है वह भेदवादी कहलाता है। पाञ्चरात्रिक पद का अर्थ यह है कि पंच भूतों का जिस में प्रलय होता है। उस का उपासक पाञ्चरात्रिक कहलाता है ॥ ५१-५२-५३-५४-५५-५६

मू॰—येन जीवन्ति जीवा वै मुक्तिं यान्ति तत्क्षणात्।
सजीवो विदितो येन सदा जीवी स कथ्यते ॥५७
यः करोति सदा प्रीतिं प्रसन्ने पुरुषे परे।
शासितानीन्द्रियाण्येव सात्त्विकः सोऽभिधीयते॥५८
सर्वाकारं निराकारं निर्निमित्तं निरञ्जनम्।
सूक्ष्मं हंसं च यो वेत्ति स भवेत् सूक्ष्म सात्त्विकः ५९
सत्यमेकमजं नित्यमनन्तं चाक्षयं ध्रुवम्।
ज्ञात्वा यस्तु वदेद्धीरः सत्यवादी स कथ्यते ॥६०॥
ज्ञानज्ञेयमयाभ्यां तु योगिनः स्व स्वभावतः।
कलंकी सतु विज्ञेयो व्यापकः पुरुषोत्तमः ॥६१॥

सं॰ टी॰—येन चैतन्येन जीवाः संसारावस्थायां जीवन्ति ज्ञाने सति तत्क्षणात् तत्कालमेव मुक्तिं मोक्षं यान्ति प्राप्नुवन्ति स जीवश्चैतन्यरूपो येन विदितः सः(सदा जीवी)सः,'अमरः'कथ्यते॥५७॥(यः) प्रसन्ने आनन्दरूपे (परे) सर्वतः श्रेष्ठे (पुरुषे) पूर्णरूपे (सदा प्रीतिम्) आत्मरूपतयाऽकृत्रिमं प्रेम करोति 'किं च' (इन्द्रियाणि) शासितानि विषयेभ्यो निवर्तितानि स सात्त्विकः कथ्यते ॥५८॥ (सर्वाकारम्) सृष्टिरूपम् (निराकारम्) वस्तुतः सर्वोपाधिरहितम् (निर्निमित्तम्) कारण-

रहितम् निरंजनम्, धर्माधर्मादि रहितम् (सूक्ष्मं हंसम्) हं पदार्थः शक्तिः स पदार्थः शिवस्तथा च शक्ति सहितं शिवम्। अथवा हं पदार्थोजीवः स पदार्थो ब्रह्म तयोरभेदः कर्मधारय समासार्थस्तथा च जीवाभिन्नं परमेश्वरं यो वेत्ति स सूक्ष्म सात्त्विको भवेत् ॥५९॥ (एकम्) द्वैतरहितम् (सत्यम्) त्रैकालाबाधितम् (अजम्) परिणामशून्यम् (अनन्तम्) तिरोधानवर्जितम् (अक्षयम्) क्षयादिह्रास शून्यम् (ध्रुवम्) निष्क्रियं परमात्मानं ज्ञात्वा यस्तु (धीरः) योग्य जिज्ञासुं प्रति वदेत् स सत्यवादी कथ्यते ॥६०॥ (योगिनः) योगिना कृत्यानां कर्तरिवेति कर्तरिषष्ठी विज्ञेय इत्यन्वयः (ज्ञानज्ञेयमयाभ्याम्) ज्ञानम येन मानस वस्तुना ज्ञेयमयेन च प्राकृत वस्तुना च सह सम्बद्ध इति शेषः (स्वस्वभावतः) स्वरूपेण (व्यापकः) सर्वगतः (पुरुषोत्तमः)परमेश्वरो यः स कलंकी कलंक उपाधिरूप चिन्ह यस्यास्तीति विज्ञेयः निरुपाधि प्राप्त्युपायतया साधनीयः ॥६१॥

भा० टी०—जिस चैतन्य के बल से जीव संसारावस्था में जीवित रहता है और उसी को जानकर मोक्ष को प्राप्त करता है उस परमात्मा से अभिन्न चेतनरूप जीव को जिस ने जान लिया वह सदा अमर है। जो परम पुरुष परमात्मा में निरन्तर प्रीति करता है और जिस ने इन्द्रियों का दमन करलिया है वह सात्त्विक कहलाता है। सर्व स्वरूप निराकार निरंजन और सूक्ष्म परमात्मा को जो जानता है वह सूक्ष्म सात्त्विक होता है। एक नित्य कूटस्थ अक्षय सत्य को जानकर जनता में जो उस का उपदेश देता है वह सत्य वादी कहलाता है। मानस और बाह्य दोनों प्रकार के पदार्थों से सम्बद्ध और स्व स्वरूप से व्यापक जो पुरुषोत्तम है वही कलङ्की अर्थात् उपाधि रूप कलङ्क से विशिष्ट सगुण ईश्वर योगियों को निर्गुण पद की प्राप्ति के लिये जानना चाहिये ॥ ५७-५८-५९-६०-६१ ॥

मू०—मुक्तिचारेमति र्या वै व्यापिकास्वप्रकाशिका।
एषाज्ञानवती येन ज्ञातासौ सात्त्विको भवेत्॥६२॥
क्षपणंचित्तवृत्तीनां रागद्वेषविलुण्ठनम्।

कुरुते व्योमवन्नग्नो योऽसौ क्षपणको भवेत् ॥
प्रसरं भासते शक्तिः संकोचं भासते शिवः ।
तयोर्योगस्य कर्ता यः स भवेत्सिद्ध योगिराट् ॥६३॥

सं० टी०—(मुक्ति चारे) मोक्षार्थानुष्ठाने (स्व प्रकाशिका) स्व प्रकाशरूपा (व्यापिका) अखण्डात्मिका या (मतिः) बुद्धिः एषा (ज्ञान-वती) प्रशस्तं ज्ञानं निश्चयो यस्यांसा (येन) जनेन (ज्ञाता) असौ सात्विको भवेत् ॥ ६२ ॥ (चितवृत्तीनाम्) मनोवृत्तीनाम् (क्षपणम्) निरोध क्रियाम् (राग द्वेष- विलुण्ठनम्) रागद्वेषयो निग्रहणम्, यः (कुरुते) करोति तथा (व्योमवन्नग्नः) नभोवन्नग्नःस क्षपणको भवेत् । यद्यपि शिवं विना न शक्तिः, शक्तिविना न शिवस्तिष्ठति, उभयोः स्वाभाविकः सम्बन्धः । तथापि यथा शक्तिः प्रवर्द्धते तथा सृष्टिर्भवति यदा च शिवः स्वान्तर्विलालयति तदा प्रलयः । परन्तु-इदं चक्रं प्राणि कर्मवशाद् बंभ्रमीत्यतो नावधिरस्य कर्मणामानन्त्यात् योऽनुष्ठान बलात् स्वेच्छया, उभयोः सम्बन्धं घटयति स सिद्धराजो योगी सृष्टिप्रलयोभय करणे समर्थो भवेत् । इत्यमुमर्थं दर्शयति शक्तिः (प्रसरम्) सृष्टि प्रसारं प्रकाशते प्रकाशयतीत्यन्तर्भावितण्यर्थः । शिवः (संकोचम्) लयम् (भासते) करोति (तयोर्योगस्य) सम्बन्धस्य (कर्ता) स्वेच्छावशात्संघटयिता स सिद्धयोगिराड् भवेत् । अथ च द्वितीयार्थोऽप्यस्य (शक्तिः) प्राणवायुः (प्रसरम्) प्रश्वासनिःसारणम् (भासते) करोति (शिवः) अपान वायुः संकोचं भासते श्वासमध आकर्षयति (तयोः) प्राणापानयोः (योगस्य) एकत्र मेलनस्य कुम्भकस्येति यावत् कर्ता स सिद्ध योगिराड् भवेत् । ननु शक्ति शिव शब्दाभ्यां कथं प्राणापानयो ग्रहणमिति चेच् शृणु, आधारभूत शिवः, आधेय भूताशक्तिः तत्साहश्येनाग्नि माणवक इवाधार भूतापानस्य शिव शब्देनाधेय भूत प्राणस्य च शक्ति शब्देन ग्रहणं मार्मिक दृष्ट्या संघटतेतराम् ॥ ६३ ॥

भा० टी०—मोक्ष के लिये अनुष्ठान में जो स्व प्रकाशरूप अखण्ड बुद्धि होती है उस को जिस ने प्राप्त करलिया वह सात्विक होता है जो चित्तवृत्तियों के निरोध पूर्वक रागद्वेषादि का नाशकर आकाश

की 'तरह नग्न (निर्मल) रहता है वह क्षपणक कहलाता है। यद्यपि शिवके बिना शक्ति नहीं रहती और शक्तिके बिना शिव नहीं रहता, तथापि जब शक्ति बढती है तब सृष्टि होती है और जब शिव शक्ति को अपने में लीन करलेता है तब प्रलय होता है। जो योगी इन दोनों क्रियाओं में कुशल है वह सिद्धों में योगिराज कहलाता है। इस का दूसरा अर्थ है कि प्राण वायु श्वास को बाहर निकालता है और अपानवायु श्वाश को नीचे खेंचता है इन दोनों के योग को कुम्भक कहते हैं। इस को करने वाला सिद्ध योगिराज होता है॥ ६२-६३॥

मू०–विश्वातीतं यथाविश्वमेकमेव विराजते।
संयोगेन सदा यस्तु सिद्ध योगी भवेत्तु सः॥६४॥
सर्वासां निज वृत्तीनां प्रसृति भजते लयम्।
स भवेत्सिद्धसिद्धान्ते सिद्धयोगीमहाबलः॥६५॥
उदासीनः सदा शान्तः स्वस्थोन्तर्निजभासकः।
महानन्द मयो धीरः स भवेत्सिद्ध योगिराट्॥६६॥
परिपूर्ण प्रसन्नात्मा सर्वासर्वपदोदितः।
विशुद्धो निर्भरानन्दः सभवेत् सिद्ध योगिराट्॥६७॥
गतेन शोकंविभवेन वाञ्छा प्राप्ते न हर्षं न करोति योगी।
आनन्दपूर्णोनिजबोधलीनोनबाध्यतेकालपथेननित्यम्॥६८॥

सं० टी०–(यथाविश्वम्) विश्वमनतिक्रम्य विश्वसहितमिति फलितम्। (विश्वातीतम्) संसारात्परं परब्रह्म (एकमेव) अद्वैतमेव-तत्त्वं सत् (सदासंयोगेन) सम्यग् योगेन निर्विकल्प समाधिद्वारा योयोगी विराजते स सिद्धयोगी भवेत्। तत्त्वमित्यस्य नित्यनपुंसकत्वाद् य इत्यनेनसामानाधिकरण्यान्वयेन क्षतिः ६४ यस्य सर्वासांनिजवृत्तीनाम् समस्तस्वीयमनो व्यापाराणाम् (प्रसृतिः) उद्गमः (लयं लभते) विलयं व्रजति सएव सिद्धसिद्धान्ते--सिद्धमते (महाबलः) सकल रचना समर्थ

सिद्धयोगी कथ्यत इति ॥६५॥ यः (उदासीनः) संसाराद्विरक्तः, अतएव (सदा) सततम् (शान्तः) चित्त विक्षेप रहितः [स्वस्यान्तः] स्वशरीर मध्ये [निज भासकः]स्वस्वरूप प्रकाशकः । अतः [महानन्दमयः] प्रचुरानन्दोऽत्र प्राचुर्य्येऽर्थे मयट् सः [धीरः] ध्यानवान् सिद्धयोगिराड् भवेत् ॥६६॥ [परिपूर्ण प्रसन्नात्मा] अखण्डानन्द रूपः [सर्वा सर्व-पदोदितः] सकल वस्त्वधिष्ठानतयोपहितरूपेण सकलशब्दवाच्योऽथवा असर्वे तिच्छेदस्तथा वस्तुतो जाति गुण क्रिया तीतत्वात् कस्यापि-पदस्य वाच्यतां नाश्रयतीत्यर्थः [विशुद्धः] प्राकृतसम्बन्ध शून्यः, अतः [निर्भरानन्दः] अखण्डानन्दः स सिद्ध योगिराट् ॥६७॥ योगी [गतेन] नष्टेन [विभवेन] धनेन [शोकम्] उपतापम् [वांछितवस्तुप्राप्त्या वाञ्छ त्यत्र कर्मण्यङ् प्राप्त्यत्रच भावक्तो ज्ञेयः । [हर्षम्] प्रसन्नताम् [न करोति] न विदधाति । ननुकिं करोत्यत आह—आनन्द पूर्णोनिज बोधलीनः, आनन्द पूर्णः सर्वशक्तिमान् परमेश्वरश्चासावुस्तस्यनिजः शिवानुरूपः व्यापक रूप इति यावत्] बोधलीनो–बोधो ज्ञानं तस्मिन् लीनः, तत्परः सन् [कालपथेन मृत्युना नबाध्यतेऽमरो भवती त्यर्थः ॥६८॥

भा० टी०—संसार से अतीत होकर संसार में व्यापक परमेश्वर से जो निर्विकल्प समाधि द्वारा अभिन्न हो जाता है वह सिद्ध योगी है समस्त इन्द्रिय वृत्तियों को जो लीन करलेता है सिद्धों के सिद्धान्तमें वह महाशक्ति शाली योगी होता है । जो संसार से विरक्त सदा चित्त विक्षेप से रहित अपने देह में स्व स्वरूप का प्रकाशक और समाहित होता है वह योगिराज कहलाता है । जो अखण्ड शान्तियुक्त और जाति गुण क्रिया रहित होने से शब्द के द्वारा अकथ-नीय विशुद्ध सकल संसार के सम्बन्धों से शून्य और अखण्डानन्द हो जाता है वह सिद्ध योगिराज कहलाता है । जो धनादि के नष्ट होजाने पर दुःख नहीं मानता तथा न धनादि लाभ होने से प्रसन्न ही होता है किन्तु सदा परिपूर्ण परमात्मा के ज्ञान में ही संलग्न रहता है वह मृत्यु से भी वाधित नहीं होता । अर्थात् अमर हो जाता है ॥ ६४-६५-६६-६७-६८ ॥

मू०—एवंतुसर्वसिद्धान्तदर्शनानांपृथक्पृथग्भूताना मपिब्रह्मणिसमन्वयसूचनशीलोपदेशकर्ताऽवधूत एवंकर्ता सद्गुरुःप्रशस्यतएषामुपदेशानां पृथक् पृथक् सूचितानां जायते यत्र विश्रान्तिः साविश्रान्तिश्चविधीयते॥ ६९ ॥

लीनतां च स्वयं याति निरुत्थान चमत्कृतेः।
यतो निरुत्थानमयात् सोऽयं स्यादवधूतराट् ॥७०॥
तस्मात्तं सद्गुरुं साक्षाद् वन्दयेत् पूजयेत्सदा।
सम्यक्सिद्धपदंधत्तेतत्क्षणात्स्वात्मभाषितम्॥७१॥
नवन्दनीयास्ते काष्ठादर्शनभ्रान्ति कारका।
वर्जयेत्तान् गुरून् दूराद् धीरः सिद्धमताश्रयः॥७२॥

सं०टी०—(एवम्) पूर्वोक्त प्रकारेण (पृथग् भूतानामपि) विभिन्न मतप्रकाशकानामपि (सर्वसिद्धान्त दर्शनानाम्) निखिल सिद्धान्त बोध कानां शास्त्राणाम् (ब्रह्मणि) सच्चिदानन्दे (समन्वय सूचन शीलोपदेश-कर्ता) सम्यक् तात्पर्य निश्चय फलक व्याख्यानकारकोऽवधूतः, सद्गुरुः (एवं कर्ता) समन्वय कारकः (प्रशस्यते) स्तूयते तदेव प्राचीनोपदेश मुखेन दृढयति। एषा मित्यादि (यत्र) ब्रह्मणि (एषां विश्रान्तिः) सकल दर्शनानां समन्वयः, जायते वस्तुतः सैव विश्रान्ति र्विधीयते न तु क्षणि क विश्रान्तिः प्रशस्यते ॥ ६९ ॥ (निरुत्थानचमत्कृतेः) निरुत्थानेनपुनर नुद्गमनेन चमत्कृते: सुशोभिते ब्रह्मणि (लीनताम्) लयम् (स्वयं) योगी (याति) प्रयाति (नान्य साहाय्य मपेक्षते यतो यो निरुत्थानमपुनराग-मनम् [आयात्] अगच्छन, अतः सोऽय मवधूतराट्, अवधूत शिरोमणिः स्यादिति निश्चयः।७०। [तस्मात्] उक्त हेतोः [तम्] अवधूतम् [सद्गुरुम्] मोक्ष)प्रदम्, साक्षात प्रत्यहं समक्षम्, सदा यो (वन्दयेत्) प्रणमेत (पूज-येत्) भोजनाच्छादनादिभिरलं कुर्यात स स्वात्मभाषितम् स्वगुरूपदिष्टम् (सम्यक्सिद्धपदम्) सिद्धपदवीम् चारुतया (धत्ते) श्रयते सिद्धो भवतीति यावत् ।।७१।। ये (काष्ठादर्शनभ्रान्ति कारकाः) दिग्दर्शने ब्रह्मदर्शने भ्रमो

त्पादकाः (ते न वन्दनीयाः) न पूजनीयाः किं च सिद्धमताश्रयः सिद्धानुयायी (तान्) प्रागुक्तान् गुरून् दूराद् वर्जयेत् परित्यजेत् ॥७२॥

भा० टी०—पूर्वोक्त प्रकार से विभिन्न मत प्रकाशक सकल सिद्धान्त बोधक वाक्यों का समन्वय सच्चिदानन्द ब्रह्म में करनेवाला सद्गुरु अवधूत प्रशंसनीय है। कहा भी है कि विभिन्न रूपसे प्रतीयमान इन उपदेशों का जिस ब्रह्म में जो समन्वय होता है वही समन्वय प्रशंसनीय कहाता है। बन्ध कोटि में न आना निरुत्थान है। उस चमत्कारशाली परमात्मा में योगी स्वयं लीन होजाता है। उस योगी को संयम योग के अतिरिक्त साधन की अपेक्षा नहीं है। अतः जिस ने उस निरुत्थान पद को प्राप्त करलिया वह अवधूत राज हो जाता है। इस लिये उस अवधूत सद्गुरु कोनित्य प्रणाम करेऔर वस्त्र भोजनादि से उसकी पूजा करे। ऐसा करनेवाला अपने गुरु से बतलाये सिद्ध पद को उसी क्षण प्राप्त करलेता है। जो ब्रह्मदर्शन में भ्रम डालने वाला है वह कदापि वन्दनीय नहीं है। ऐसे गुरु को सिद्धमतावलम्बी धीरजन दूर से त्याग दे ॥ ६९-७०-७१-७२ ॥

मू०—वेदान्ती बहुतर्ककर्कशमतिग्रस्तः परं मायया
भाट्टाः कर्मकलाकुला हतधियो द्वैतेन वैशेषिकाः।
अन्ये भेदरता विवादविकलाः सत्तत्त्वतो वञ्चिता
स्तस्मात्सिद्धमतंस्वभावसमयंधीरःसदासंश्रयेत्॥७३॥

सं० टी०—यो हि वेदान्ती केवल वेदान्त शास्त्र मधीत्य स्वानुभव विहीनोऽपि कर्मोपासनादिकं सदुपायं विहाय केवल शाब्दिक ज्ञान बलेनोन्मत्तः (बहुतर्ककर्कशमतिः) बहवस्त र्काद्वैतखण्डनोपाय युक्तयस्तैः कर्कशा कठिनानिदिध्यासनबहिर्मुखा मतिः बुद्धिर्यस्येति, अतः सः (मायया) परमत खण्डनादिमानसिकानात्म चिन्तन जालेन(परमम्) अत्यन्तम्, ग्रस्तः(भाट्टाः) श्रीकुमारिलभट्टमतानुयायिनः (कर्मकला कुलाः) केवल कर्म कौशल तत्पराः (वैशेषिकाः) नैयायिकाः (द्वैतेन) भेदेन (हत धियः) द्वैतस्थापनाग्रहग्रहेण विनष्ट बुद्धयः (एवमन्येऽपि) क्षपणक नग्न

कादयः (भेदरताः) विवादविकलाः विवाद श्रमेण खिन्नमानसाः (एते) सर्वे (सत्तत्त्वतः) वस्तुभूत सच्चिदानन्दतः (वञ्चिताः) पृथग्भूताः सन्तो न मोक्षायालम् (तस्मात्) पूर्वोक्त हेतोः (धीरः)मुमुक्षुः (सिद्धमतम्) सिद्धैर्मतं स्वीकृतं (स्वभावसमयम्) स्वभावतः समयं सिद्धान्तम्। नतु केनचित् कृतमनादि सिद्धान्तमिति यावत् (संश्रयेत्) सेवेतेति निष्कर्षः। अयमाशयो विक्षिप्त चित्तेन चिदानन्द साक्षात्कारो दुर्लभः। चित्तपाश्च ध्यानादि योगमन्तरा न समूल काषं कषितुमर्हन्तीति सार्वजनीनोऽयं पन्थाः। अतस्तमधिरूढवतामवधूतानां सिद्धान्त एव परान् सकलानति तिशेते। ननु सर्वेषां कर्मोपासनादीनां तु निन्दैव कृता तर्हिकोऽवशिष्टः सिद्धान्तःसिद्धानामिति चेच् शृणु रहस्यम्। समरसकरणमेव मुख्य सिद्धान्तो यस्य प्रक्रिया पूर्वमेवोक्ताचार्य पादैः। अतएव सर्वेषामेकैकानुष्ठान पराणां निन्दा प्रस्तूयते समरसकरणायैव न तु निन्दा तात्पर्येण यथा वेदेऽन्धं तमः प्रविशन्तीत्यादिना प्रत्येकं कर्मोपासनयोर्निन्दोभय समुच्चयः ॥७३॥

भा० टी०—जो वेदान्ती केवल वेदान्त शास्त्र को पढ स्वानुभव रहित कर्मोपासनादि सदुपाय को छोडकर केवल शाब्दिक ज्ञान से ही द्वैत खण्डनादि युक्तियों में तत्पर रहते हैं उन की बुद्धि निदिध्यासनसे से वहिर्मुख होजाती है। अतः वे माया से ही ग्रस्त हैं अर्थात् माया के जाल में ही फंसे रहते हैं। भट्ट मतानुयायी पूर्व मीमांसक केवल कर्मकाण्ड में ही व्याकुल रहते हैं इस लिये उन को ईश्वरोपासना का अवसर ही नहीं मिलता वैशेषिक कणादमतानुयायियों की बुद्धि द्वैत के आग्रह से ही विनष्ट होजाती है ऐसे ही अन्य द्वैतवादी भी द्वैताग्रह से बुद्धि को नष्ट करलेते हैं और सदा परस्पर विवाद में तत्पर रहते हैं। इस लिये अपने धेयतत्व से वंचित ही रहजाते हैं। अतः धीर जन को चाहये कि सिद्धों के सम्मत समरस भाव का ही सेवन करे। अर्थात् सकल दर्शनों का समन्वय कर अद्वैत तत्व में तत्पर होजाय। वाद विवाद में कभी न फंसे एक दर्शन का ही पक्षपाती होकर अपने लक्ष्य को न खो वैठे ॥ ७३ ॥

मू०—सांख्यावैष्णववैदिकाविधिपरा संन्यासिनस्तापसाः।
सौरा वीर पराः प्रपञ्च निरता बौद्धा जिन श्रावकाः ॥
एते कष्टरता बृथा पथगताः सत्तत्त्वतो वञ्चिताः।
तस्मात्सिद्धमतं स्वभावसमयं धीरः सदासंश्रयेत् ॥७४॥
आचार्या बहुदीक्षिता हुतिरता नग्नव्रतास्तापसाः ।
नानातीर्थ निषेवका जपपरा मौनेस्थिता नित्यशः ॥
एते ते खलुदुःखभारनिरताः सत्तत्त्वतो वंचिता
स्तस्मात्सिद्धमतं स्वभावसमयं धीरः सदा संश्रयेत्॥७५

सं० टी०—एवं सांख्य मतावलम्बिनो वैष्णवा वैदिकाश्च एतेऽपि (विधिपराः) प्रवृत्तिपरायणाः, न तु निवृत्ति निष्ठा स्तथैव संन्यासिनोयतयः (तापसाः) वानप्रस्थाः (बौद्धाः)बुद्धमतानु यायिनः (जिनश्रावकाः) जिनस्य तत्प्रोक्तस्य ग्रन्थस्य श्रावकाः श्रोतारस्तदनुयायिन इति भावः। तेऽपि प्रपञ्चनिरताः,, सदा सांसारिक व्यवहारपरायणता मार्गे व्यर्थं भ्रमन्तः। अत एव (कष्टरताः) दुःख बहुलाः सन्तः सत्तत्त्वतो वंचिता इत्यादेः पूर्ववदर्थः ॥७४॥ (बहुदीक्षिताः) बहुभिर्दीक्षिता अनियतमतावलम्बिनोऽश्वत्थ पर्णवन्निराधाराः कमण्डलुवद्दोलायमानाः। बहवो दीक्षिता ये वा शिष्यरुच्यनुसारमनुच्य शिष्य सम्पादकाः (हुतिरताः) हवन व्रताः (तापसाः) व्रतपराः (नग्नव्रताः) दिगम्बराः (नानातीर्थनिषेवकाः) तीर्थाटनपराः (जपपराः) जपशीलाः (मौनेस्थिताः) नित्यशो मौनिनः। एतेऽपि सत्तत्त्वतो वञ्चिता अतो दुःख भार निरता भवन्ति न तु मुक्ता इति ध्वनिः शेषं पूर्ववत् ॥ ७५ ॥

भा० टी०—एवं शांख्य वैष्णव और वैदिक तथा सन्यासी वानप्रस्थ आदि जो प्रवृत्ति मार्ग परायण हैं और जो बौद्ध जैन चारवाक आदि संसार व्यवहार में फँसे रहते हैं वे भी कुमार्ग में भटकते हुये असली तत्त्व से वंचित हो दुःख के भागी होते हैं। इस लिये धीरजन सिद्ध सम्मत समरस करण का ही अवलम्बन करें इसी तरह जो एक गुरु निष्ठ नहीं है अथवा अनेक शिष्य बनाने वाले

आचार्य हवन में तत्पर रहने वाले तथा नग्न व्रत को धारण करने वाले तापस अनेक तीर्थों में घूमने वाले जप परायण और सदा मौनी रहने वाले ये सब भी श्रेष्ठतत्व से वंचित होकर दुःख के भागी होते हैं इस लिये धीर जन का कर्तव्य है कि सिद्ध सम्मत समरस भाव का ही सेवन करे ॥७४—७५॥

मू०—आदौ रेचक पूरकुम्भकविधौनाडी यथाशोधितम् ।
कृत्वाहृत्कमलोदरे तु सहसा चित्तंमहा मूर्च्छितम् ॥
पश्चादक्षर मव्ययं परकुले चोङ्कार दीपांकुरे ।
तस्मात्सिद्धमतं स्वभाव समयंधीरः सदासंश्रयेत् ॥७६॥
चार्वका श्चतुराश्च तर्क निपुणा देहात्मवादे रताः ।
ते सर्वे न तरन्ति दुःसहतरं येते परं सात्विकाः ॥
तेसर्वे प्रभवन्ति ये च यवना पापेरता निर्दयाः ।
तेषामैहिकमल्प मेव हि फलं तत्त्वं न मोक्षं पदम् ॥७७॥

सं० टी०—ये (आदौ) प्रथमं (रेचक पूरक कुम्भक विधौ) प्राणायाम सिद्धये (नाडी यथा शोधितम्) नाडीनां पन्थानस्तेषांयथाशोधितं सम्यक् शोधनं कृत्वा हृदय कमले (ओंकारदीपाङ्कुरे) अर्थप्रकाशत्वादोङ्कार एव दीपः, तस्याङ्कुरेऽकारोकारमकार रूपालम्बेन (अक्षरमव्ययम्) परमेश्वरम् । समाहितेन मनसा) शान्तस्वान्तेन पश्यन्ति । तेषामपि (ननित्यं पदम्) न साक्षान्मोक्षः समरस करणं विना द्वैता निवृत्ते र्न साक्षान्मोक्षः किन्तु सत्यलोक प्राप्तिद्वाराक्रममुक्ति रिति भावः ॥ ७६ ॥ (चार्वाकाः) परम नास्तिकाः, अतः (चतुराः) लोक कर्म कुशलाः (तर्कनिपुणाः) आगमानपेक्षाः (देहात्मवादेरताः) पृथिव्यादि भूत चतुष्टयं देहाकार परिणतं मद शक्तिवत्तत्रत एव समुत्पन्न चैतन्य मात्मेति न तु देहाति रिक्तो नित्य आत्मा । अतो यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेदिति सिद्धान्तं नानाविधतर्कैः स्थापयन्ति । तेऽपि (दुःसहतरम्) संसारं न तरन्ति न परमधिगच्छन्ति किं च (परम्) तत्त्वम् (न तरन्ति) न प्राप्नुवन्ति किं च ते सात्विका अपि न प्रभवन्ति

किं तु राजसाः । ये च यवना म्लेच्छा हिंसादौ (रताः) तत्पराः अतो निर्दया दया रहिता । (तेषामल्पमेव) ऐहिक फलं भवति न तु तत्त्वं मोक्ष पदम् ॥ ७७ ॥

भा० टी०—जो निरन्तर नाड़ी शोधन तथा रेचक पूरक और कुम्भक में ही लगे रहते हैं और हृदय कमल में मन को रोककर पश्चात् ओंकार रूप दीपक के अवयव अकार उकार मकार को ब्रह्म की मूर्ति मान कर मन से उस ब्रह्म का ध्यान करते हैं उन को भी समरस करण के विना द्वैत की निवृत्ति न होनेसे साक्षातमोक्षपद की प्राप्ति नहीं होती किन्तु सगुण ब्रह्म की प्राप्ति द्वारा मोक्ष होता है इसी का नाम क्रम मुक्ति है । शुष्क लौकिक तर्क में तत्पर और अपने को ही चतुर मानने वाले प्रत्यक्ष प्रमाण वादी चारवाक देह को ही आत्मा मानते हैं वे परलोक में फल देने वाले क्रम से वंचित होकर इस असार संसार से पार नहीं होने पाते और मुहम्मद मतानुयायी लोग भी व निर्दय तथा अनेक पाप कर्मों में संलग्न रहते हैं उन को इसलोक में ही क्षणिक विषय सुख मिलता है मोक्षपद की तो उन्हें स्वप्न में भी आशा नहीं है ॥७६—७७

मू०—श्री हट्टे मस्तकान्ते त्रिपुट पुट विले ब्रह्मरन्ध्रे ललाटे ।
भ्रूनेत्रे नासिकाग्रे श्रवण पथरवे घण्टिका राजदन्ते ॥
कण्ठे हृन्नाभिमध्ये त्रिकमल कुहरे चोड्डियाने च पीठे ।
एवं ये स्थानलग्नाः परमपदमहो नास्तितेषांनिरुत्थम्॥७८॥
गोल्लाटेदीप्तिपुञ्जेप्रलयशिखिनिभेसिद्धजालन्धरेवा
शृङ्गाटे ज्योतिरेकं तडिदिवतरलं ब्रह्मनाड्यन्तराले ॥
भालान्ते विद्युदाभे तदुपरिशिखरे कोटिमार्तण्डचण्डे ।
ये नित्यंभावयन्तेपरमपदमहोनास्तितेषांनिरुत्थम् ॥७६॥
लिङ्गाद्दण्डांकुरान्तमनपवनगमाद्ब्रह्मनाड्यादिभेदम् ।
कृत्वा बिन्दुं नयन्तः परम पदगुहां शंखगर्भोदरोर्ध्वम् ॥

मन्त्रान्तर्नाद घोषं गगन गुणमयं वज्रदण्डी क्रमेण ।
ये कुर्वन्तीहकष्टान् परमपदमहोनास्तितेषांनिरुत्थम्॥८०॥

सं० टी०—श्री हट्ट इति मस्तकान्त इत्यस्य विशेषणं श्रीणां शोभा प्रभाणां "श्रीर्लक्ष्मीभारती शोभा प्रभासुसरल द्रुम इति यादवः। हट्टे विपण इवाकर इति यावत् सहस्रारे निखिल पदार्थाः सन्तीति भावः। (मस्तकान्ते) सहस्रारे यः (त्रिपुट पुटः) त्रिकोणाकार यंत्रस्तस्य बिलेच्छिद्रे ब्रह्मरन्ध्रे ये ध्यानं कुर्वन्तीत्यध्याहार स्तथा ललाटे ततोऽधो भाल पटले भ्रूनेत्रे च लुप्त चकारोऽत्र द्रष्टव्यः (भ्रुवि नेत्रे च) भ्रूश्च नेत्रं चेति समाहार द्वन्द्वस्ततो ङौ रूपम्। तथैव (नासिकाग्र श्रवण पथ रवे) नासिकाग्रे श्रोत्रस्य शब्दे चात्रापि समाहार द्वन्द्वः (घण्टिका राजदन्ते) कण्ठदेशस्थ मांसखण्डे तथा कण्ठे हृन्मध्ये नाभिमध्ये च (त्रिकमल कुहरे) त्रिकोणाकार कमल मध्ये (उड्डियाने) तन्नामक बन्धे पीठे नाभितोऽधः प्रदेशे (एवं ये स्थान लग्नाः) पूर्वोक्तेषु स्थानेषु संलग्नास्तत्रैवाशक्ताः सन्तो यतंते तेषामपि निरुत्थं परमपदं नास्ति, साक्षान्मोक्षो न भवति किन्तु परम्परया हिरण्यगर्भादि द्वारेति भावः ॥ ७८ ॥ गोल्लाट इति-गोल्लाटः स्थानविशेषस्तस्मिन्दीप्ति पुञ्जे प्रकाशसमुदाये (प्रलयशिखिनिभे) प्रलयकालिकाग्निप्रभे(वा सिद्धजालन्धरे) ध्यानस्थाने (शृङ्गाटे)सर्वपरिभागे ब्रह्मनाडीमध्यस्थाने (भालान्ते)मस्तकान्ते (विद्युदाभे) विद्युत्प्रभे तथा (कोटिमार्तण्डचण्डे) कोटिभास्वद्दीप्ते (तदुपरिशिखरे) तदूर्ध्वोच्चस्थाने ये सन्तः(तडिदिवतरलम्) विद्युद्वल्लोलमेकं ज्योतिः प्रकाशम् सततम् (भावयन्ते) भावनांकुर्वन्तेतेषां परमंपद मुच्चस्थानं निरुत्थं मोक्ष वस्तु नास्तीत्यहो आश्चर्यम् ॥७९॥ लिङ्गादारभ्य (दण्डांकुरान्तः) मेरुदण्ड मध्ये (मन पवन गमनात्) अत्र सान्तस्याप्यदन्तत्वात् मनसः पवनस्य च प्राणवायोः गमनवशात् (ब्रह्मनाड्यादि भेदम्) सुषुम्ण नाडिभेदनम् (कृत्वा) विधाय (विन्दुम्) शुक्रम् (शंखगर्भोदरोर्ध्वम्) शंखगर्भ गलमध्य भाग स्तस्योदरान्मध्यदेशादूर्ध्वम् उपरिभागे। (परमपदगुहायाम्) वीर्यस्य मूलस्थानं भ्रमरगुहाशिरसः पृष्ठ भागे वर्तते तत्र (नयन्तः) वहन्तस्तत्र वज्रदण्डी क्रमेण वज्रोली क्रिया प्रकारेणान्तर्मध्ये (गगनगुणमयम्) आकाशध्वनि प्रचुरम्। 'व्याप

कमिति यावत (नादघोषम्) नित्यनाद ध्वनितं ये कुर्वन्ति तेऽपि कष्टङ्कुर्वन्ति तेषामपि नात्यन्तिकसाक्षान्मोक्षस्तत्रैवासक्तत्वादितिपूर्ववज्ज्ञेयम् ॥ ८० ॥

भा० टी०—लक्ष्मी सरस्वती शोभादि सकल पदार्थों के खजाने सहस्रार के ऊपर जो त्रिकोण यंत्र है उसके मध्य ब्रह्मरन्ध्र में जो ध्यान करते हैं और उसके नीचे कपाल भ्रकुटि, नेत्र, नासिका, श्रोत्र, कण्ठ के ऊपर तथा कण्ठ, हृदय नाभि, और उसके नीचे स्वाधिष्ठान आदि स्थानों में जो ध्यान करते हैं वे भी साक्षात निरुत्थान (मोक्ष) नहीं प्राप्त कर सकते । किंतु क्रम मोक्ष को ही प्राप्त होते हैं । दीप्ति पुञ्ज प्रलयकालिक अग्नि के सदृश गोल्लाट में जालन्धर शृङ्गाट ब्रह्म नाड़ी के मध्यस्थान में बिजली की तहर दीप्त मस्तकान्त में तथा करोड़ों सूर्य प्रकाश सदृश शिखर में जो योगि जन चंचल बिजली के आकारवालेज्योतिः पुञ्ज का ध्यान करते हैं उन को भी मोक्ष नहीं मिलता। लिङ्ग से लेकर मेरु दण्ड केबीचमनऔरप्राणवायुकेगमन द्वारा सुषुम्णा नाड़ीकाभेदन कर बिन्दु कोगलेसेऊपरभ्रमरगुहानामकशिरके पीछेभाग में लेजाते हुये बज्रोली क्रिया द्वारा वहाँ स्थापित कर व्यापक नित्य नाद ध्वनि को जो करते हैं उनको भी साक्षात् मोक्ष नहीं मिलता॥—७९-८०॥

मू०--सम्यक् चालन दोहनेन सततं दीर्घी कृतांलम्बिकां
तां तालवन्तर वेशितां च दशम द्वारोदरे सन्धिनीम् ॥
नीत्वा मध्यमसन्धिसंघटघटात् प्राप्तांशिरो देशतः।
पीत्वाषड्विधपानकाष्ठ भजनंवाञ्छन्तिये मोहिताः॥८१॥
गुह्यात्पश्चिमपूर्वमार्गमुभयं रुध्वानिलं मध्यमम् ।
नीत्वा ध्यानसमाधि लक्ष्य करणै र्नामासमा ध्यासजैः ॥
प्राणापान गमागमेन सततं हंसोदरे संघटा ।
एवं येऽपि भजन्ति ते भवजले मज्जन्त्यहो दुःखिताः॥८२॥

सं० टी० --केवल खेचरी मुद्रा करणेनापि न मोक्ष सिद्धि रिति

दर्शयति सम्यगिति सततम्(सम्यक् चालन दोहनेन) चालन दोहन क्रियया (दीर्घीकृताम्) विस्तारिताम् (ताल्वाभ्यन्तरवेशिताम्) तालु मध्ये विपरीत रूपेण प्रवेशिताम्(तत्र दशमद्वारोदरे) भ्रू मध्ये सन्धिनीं सन्धिकारिणीं संयुक्तामिति यावत्(लम्बिकाम्) जिह्वां (नीत्वा) प्रापय्य (मध्यमसन्धि संघट घटात्) मध्यमश्चासौ सन्धिः संगमो नाल्पो नाति दीर्घ इति यावत् तस्य संघटः समुदायस्तस्यघटात् करणात् तत्र भ्रू मध्ये मध्यम रूपेण वारंवारं रसनायाः संगम करणादितिभावः (शिरोदेशतः) सहस्रारतः (प्राप्ताम्) समागतां सुधामिति शेषः (पीत्वा) आस्वाद्य ये जनाः सततम् (षड्विध पानकाष्ठ भजनम्) षड्सास्वादन रूप जड सेवां वाञ्छन्ति तेऽपीति शेषः (मोहिताः) तत्त्व बोधतो वञ्चिताः। तत्त्व ज्ञान साधनमिदं लक्ष्यं मत्वा सततं तदासक्ता न भवन्त्वित्युपदेशायात्र प्रकरणे सर्वेषां निन्दा कृता न तु निन्दा तात्पर्येणेति पूर्वोक्तं न विस्मर्तव्यमिति ॥ ८१ ॥ केवल वायुरोधज समाधितो न मोक्ष इति प्रदर्श्यते गुह्येति (गुह्यात्) मूलाधारात्, आरभ्येति प्रभृत्यर्थक योगे पंचमी(उभयं पश्चिम पूर्व मार्गम्) इडापिंगलोभयपथम् (रुद्ध्वा) अवरोध्य (मध्यमनिलम्) सुषुम्णायां वायुम् (नीत्वा)प्रगमय्य (ध्यानसमाधि लक्ष्यकरणैः) ध्यानं च समाधिश्च तयो लक्ष्ययोः करणैः साधनैः (नानासमाध्यासनैः) भूयोऽभ्यासैः (प्राणापान गमागमेन) प्राणस्यापानस्य चोच्छ्वास निःश्वासयोर्गमागमेन याता यातेन (हंसोदरे) नाडी कुहरे (संघटा) संघर्षः सम्पाद्यत इति शेषः। एवमपि ये भजन्ति तेऽपि दुःखिताः सन्तोभव जले मज्जन्ति विना ज्ञानं समाधिना प्रकृति लयो भवतीति न संसाराद्विमुक्तिरतस्तत्त्व ज्ञानाय सावधानेन स्थातव्यमित्युपदेशः ॥ ८२ ॥

भा० टी०—अब केवल खेचरी से भी साक्षात् मोक्ष की प्राप्ति नहीं होती इस का निरूपण करते हैं। अच्छीतरह चालन दोहन द्वारा जिह्वा को लम्बी बना कर तालु के भीतर ले जाते हुये तथा दशमद्वार में संयुक्त करते हुये बार बार उस जिह्वा सम्बन्ध से सहस्रार से टपकने वाले अमृत को पीते हुये जो षट् प्रकार के रसास्वाद रूप जड़पान में आसक्त हैं वे भी साक्षात् मोक्ष से वञ्चित हैं मूलाधार से लेकर इड़ा पिङ्गला के मार्ग को रोक कर सुषुम्णा द्वारा वायु को

ऊपर लेजाकर अपने ध्येय के साक्षात्कार के उपाय अनेक प्रकार के अभ्यास से वायु के गतागत द्वारा नाड़ी चक्रों में ही जो सदा आसक्त रहते हैं वे भी समरस करण के विना साक्षात् मोक्ष के भागी न होने से दुःखी ही रहते हैं ॥८१-८२॥

मू०—शक्त्याकुञ्चनमग्नि दीप्ति करणंत्वाधारसंपीडनात्
स्थानात्कुण्डलिनी प्रबोधनमतः कृत्वा ततो मूर्धनि ॥
नीत्वा पूर्णगिरिं निपातनमधः कुर्वन्ति तस्याश्च ये।
खण्डज्ञानरतास्तुते निजपदं तेषां हि दूरं मतम् ॥८३॥
बन्धं भेदञ्च मुद्रां गलविलचिबुकाबद्धमार्गेषुवह्निः ।
चन्द्रार्कौ सामरस्यं शमदम नियमा नादविन्दुंकलान्ते ॥
ये नित्यं मेलयन्ते ह्यनुभव मनसाप्युन्मनीयोगयुक्ता
स्तेलोकान्भ्रामयन्तेनिजसुखविमुखाःकर्मदुखाध्वभाजः८४

सं० टी०—केवलषट्चक्रभेदेन शक्ति संचालन क्रियानुरामोऽपि न श्रेयस्करः किंतु साध्यसिद्धिपर्यन्तमेव साधनं कर्तव्यं यथौदन पर्यन्तमेव पाकस्तण्डुलनिष्पत्ति पर्यन्तमेवावघातश्चान्यथा निष्क्रियाव स्था रूपावधूतत्वं न स्यादित्युपदिश्यते। शक्त्येति-(आधारसंपीडनात्) मूलाधारस्य बन्धनमुद्रयामर्दनात् (शक्त्याः)कुण्डलिन्याः (आकुञ्चनं)सं कोचः तथा (अग्निदीप्तिकरणम्) कुक्षिस्थाग्निं प्रगृह्याधारे संयोजनम् एतत्साधनद्वयबलेन (स्थानात्) स्वस्थानात् (कुण्डलिनी प्रबोधनम्) मूलाधारस्थ शक्ति जागरणं भवति ततः प्रबोधान्मूर्धनि भाल मध्ये (ताम्) कुण्डलिनीम् कृत्वा (ततः) तस्मादप्युपरि (पूर्णगिरिम्) सहस्रा रस्थितपीठ देशं नीत्वा तस्याश्च पुनः (अधः) नीचैः (निपातनम्) प्रपा तनं ये कुर्वन्ति सततं कुण्डलिन्या उत्थानावपातनयोरेवासक्तास्तेऽपि खण्ड ज्ञानरता एकदेश साधन सम्पन्ना अपि, अवधूतत्व सम्पादकनै ष्कर्म्यादि पूर्णसाधन रहिता अतस्तेषां निज पदं स्वस्थानं (दूरम्) अन ल्प विलम्बनेन मोक्षो भवति नैष्कर्म्यादि साधनं यावत्प्रतीक्षते ॥८३॥ सिद्धिपर्यन्तमेव साधनंतत्परं तदपि हेयमन्यथा सङ्गतारूय मोक्षो न

स्यादित्युक्तं पूर्वं तथैवात्रापि बोध्यमियमेव प्रक्रिया सर्वदर्शनेषु समा दृता। यथा तत्त्वज्ञानस्यापि वृत्तिरूपतया वृत्तेश्चाविद्यारूपत्वाद्धू यतैव पर्यवस्यतीति घण्टाघोषः (बन्धम्) जालन्धरादिम् (भेदम्) चक्रभेदम् (मुद्राम्) खेचरी प्रभृतिकृत्वेति शेषः। (गलविलचिबुकाबद्धमार्गेषु) गलस्य कण्ठस्य विलं छिद्रं चिबुकम्-ओष्ठाधो भागस्तयो राबद्धमार्गाः आप्रतिबद्धाः सम्यग् निरुद्धामार्गानाडीरन्ध्रास्तेषु सत्सु (वह्निः) सुषुम्णा नाडी (चन्द्रः) इडानाडी (अर्कः) पिंगलानाडी तेषाम् (सामरस्यम्) सम रस भावमैक्यमिति यावत्। (शमः) अन्तरिन्द्रियनिग्रहः (नियमाः) शौचादयः (नादः) आन्तरिक शब्दः (बिन्दुः) शुक्रम्, एतेषां समुदा यंकलान्तेसाधयित्वा सिद्धैः पश्चादपि-(उन्मनी योग युक्ताः)संसारापसृत्य परमात्मनिष्ठाः सन्तोऽपि-उन्मनी पदार्थः प्रागुक्तः। अपि शब्दस्य भिन्न क्रमतां स्वीकृत्यात्र सम्बन्धः (अनुभवमनसा) साधनज्ञानाशक्त चित्त तया पूर्वोक्त साधनं नित्यं मेलयन्ते ते निजसुख बिमुखाः स्वात्मानन्द वञ्चिता लोका भ्रामयन्ते साधनोपदेशेन वञ्चयन्ते। अत उन्मनीभा वात् पूर्वमेव साधनं विधेयं नतु ततः पश्चादिति 'निष्कर्षः॥ ८४॥

भा० टी०—जब योगी एड़ी से मूलाधार को दबाकर भली प्रकार सिद्धासन लगाकर मूलबन्ध को दृढ़ करता हुआ बैठता है तब मूलाधार के युक्तियुक्त दबाने से अग्नि प्रज्वलित होती है। उस अग्नि प्रज्वलन से तथा अपानवायु को ऊपर की ओर खेंचने से मूलाधार में कुण्डलिनी शक्ति को प्रबोधित करे। उस कुण्डलिनी शक्ति को प्रबुद्ध कर पीछे मूर्ध स्थान में स्थित "पूर्णगिरिपीठ" नामक ब्रह्मस्थान सहस्रदल में पहुँचाकर योगी यथाशक्ति समाधि में स्थित रहते हैं। यह निर्भय मोक्ष स्थान है। यहाँ काल की गति नहीं है। इसी को पूर्णगिरिपीठ भी कहते हैं क्योंकि यहाँ पूर्णब्रह्म रूप निजस्वरूप में प्रतिष्ठित हो जाता है। फिर वेही ध्यानी लोग ध्यान उतारते समय उसी कुण्डलिनी को नीचे निजस्थान पर गिरादेते हैं। अतः वे ध्याना-वस्था से फिर प्रपञ्चावस्था में लौट आते हैं। इस अवस्था को प्राप्त हुये योगिजन यद्यपि उत्तम कोटि में गिने जाते हैं। तथापि ऐसे अभ्यासी महात्मा भी खण्ड ज्ञान में ही रहते हैं क्योंकि यह केवल

ससाधन भूचरी मुद्रा का फल है। अतः जब तक साङ्गोपाङ्ग योग विधि से निज पिण्डपदका समरसकरण न किया जाय तब तक उन खण्डज्ञानियों के लिये अखण्ड ज्योतिःस्वरूप पद दूर माना जाता है। मूलादिबन्ध तथा कुण्डलिनी प्रबोध से षट्चक्र और ब्रह्मा विष्णु रुद्र ग्रन्थियों का भेदन या महावेधकर तथा खेचरी आदि मुद्रा एवं ठोड़ी को वक्षःस्थल में जालन्धर बन्ध द्वारा नियोजित कर गलबिल के प्रतिरोध से समस्त नाड़ी मार्गों के रुक जाने पर प्रज्वलित हुई अग्नि का तथा सूर्य और चन्द्र स्वर के सुषुम्णागत मेलका, एवं शमदमादि नियम पालन पद्धति से नाद और बिन्दु का या शमदमादि नियमों का तथा नाद और बिन्दु का जहाँ शब्दादि समस्त कलाओं का अन्त होता है ऐसे शिवराजधानी स्वरूप सहस्रदल में अर्थात् सर्वचक्रातीत निरञ्जन देव में, उन्मनी योग से युक्त हुये भी जो योगी अनुभव आत्मक मानस ज्ञान से नित्य सम्मेलन करते हैं, वे स्वयं भी कर्मरूप दुःख अन्धकार के भागी होते हुये निज आत्मानन्द सुख से विमुख हैं और लोगों को भी भ्रम में डालते हैं। क्योंकि स्व स्वरूप में प्रतिष्ठित करने वाली सहजावस्था होती है उसी को उन्मनीयोग या समाधिनिष्ठा कहते हैं। उसी को प्राप्त करने के लिये समस्त योग साधनों का अनुष्ठान किया जाता है और जब उन्मनी योग सिद्ध होता है तब फिर आत्मानन्द को छोड़कर उन साधनों में ही आसक्त रहना तो एकप्रकार से स्वयं भी दुःखभार को सहते हुये लोगों को भ्रम में डालना है। इसी भाव का पूज्यपाद श्री योगाचार्य जीने ऊपर के श्लोक में वर्णन किया है ॥८३॥८४॥

मू०-अष्टाङ्गं योगमार्गं कुलपुरुषमतं षण्मुखी चक्रभेदम्।
ऊर्ध्वाधो वायुमध्ये रवि किरणनिभं सर्वतो व्याप्तिसारम्॥
दृष्ट्या ये वीक्षयन्ते तरलजलसमं नीलवर्णं नभो वा।
एवं ये भावयन्तेनिगदितमतयस्तेऽपिहा कष्टभाजः॥८५॥
आदौ धारणशंखधारण मतः कृत्वा महाधारणम्,
सम्पूर्णम्प्रतिधारणं विधिबलाद् दृष्टिस्तथा निर्मला।

अर्धोली बहुलीह वासनमथो घण्टाश्च सन्नौलिका,
ये कुर्वन्ति च कारयन्ति च सदा श्राम्यन्ति खिद्यन्ति ते॥८६॥

सं० टी०—(अष्टाङ्गयोगमार्गम्) पूर्वोक्त यमनियमादि रूपाष्टांगयोगमार्गम् (तथा) कुलपुरुष मतम्) कुलपुरुषः कुलपतिराचार्यस्तेन मतं स्वीकृतम् (षण्मुखीचक्रभेदम्) मूलाधारादि षट् चक्रभेदं कृत्वेति शेषः (ऊर्ध्वाधोवायुमध्ये) उच्छ्वास निःश्वास मध्ये भ्रूमध्य इति यावत् (रविकिरणनिभम्) भास्करप्रभा सदृशम् (सर्वतो व्याप्ति सारम्) परितो देदीप्यमानं तेजोः पुञ्जं ये दृष्ट्या त्राटकादि मुद्रया (वीक्षयन्ते) पश्यन्ति (वा) अथवा (तरल जल समम्) चंचल नीर तुल्यं (नील वर्णम्) ईषत् श्यामलभं नभो वीक्षयन्ते। एवं सततं भावयमाना अपि कष्ट भाज एवेति शेषं पूर्ववत् ॥ ८५ ॥ (विधिबलात) शास्त्राचार्य नियोग बलात् (आदौ(पञ्चभूत धारणेषु प्रथमम् (धारणशंख धारणम्) धारणं शं मंगलं यस्मिस्तस्य खस्याकाशस्य धारणमथवा धारणश्चासौ शंखः "धार्यते जगदनेनेति संसारस्थिति कारकः, शंसुखात्मकः, खो व्यापकस्तस्य परमेश्वरस्य धारणमतः (पश्चान्महाधारणम्) समस्त पंच भूतधारणम्, अव्याकृताकाशधारणं वा (प्रतिधारणम्) विपरीतधारणं प्रत्येकभूत धारणं वा तदङ्गभूतचिन्ह धारणम् (सम्पूर्णम्) सकलं सम्याग्(दृष्टिम्) बुद्धिन् (निर्मलाम्) स्वच्छां तथा (अर्धोली) धोति (बहुली) बस्ति (वासनम्) नेति भस्त्रिकाश्च (अथो) अथ च (घण्टा) त्राटकम् (नौलिका) नौलिः"एकदेशानुमत्याभस्त्रेति,, एवं ये स्वयं षट् कर्माणि कुर्वन्ति। अन्यान् कारयन्ति च ते सदा स्वयं श्राम्यन्ति खिद्यन्ति च पूर्ववत ॥ ८६ ॥

भा० टी०—कुण्डलिनी शक्ति से जिसमें चक्रों का भेदन कहा है और सर्व सम्मति द्वारा शिव शक्ति मतानुयायी से अभिमत एवं यम नियमादि साधन विशिष्ट अष्टाङ्ग योग मार्ग कहा जाता है और ऊर्ध्व ध्येय सहस्रदलयुक्तपद्म तथा ब्रह्मचक्र ललाटादि के मध्य एवं अधो धेय मूलाधारादि और मध्य ध्येय नाभिचक्र आदिकों के बीच में सूर्य की किरणों के समान सर्वतो व्यापक तेजोमय वा

तरल स्वच्छ जल के समान या नील वर्ण आकाश के सदृश वस्तु को उन ध्येय स्थानों में देखकर जो ध्यान करते हैं वे लोग भी परम लक्ष्य पर न पहुँचने से परिमित बुद्धिवाले हैं। दुःख है कि वे पूर्वोक्त रीति से भावना करते हुये भी केवल दुःख भार को ही उठाते हैं। सर्व-प्रथम दूसरे उपदेश में कहे हुये पाँच आकाशों में से आकाशधारणा पराकाशधारणा और महाकाशधारणा को कर सम्पूर्ण तत्त्वों की प्रतिधारणा यानि प्रत्येक धारणा अर्थात तत्त्वाकाश-धारणा को करके योगविधि से ध्येय लक्ष्य में दृष्टि जमाकर निर्मल करते और कराते हैं। एवं नेति, धोति वस्ति, त्राटक नौलि और कपाल भाति (भस्त्रिका) इनको जो सदा करते हैं और कराते हैं वे भी परम लक्ष्य तक न पहुँचने से भ्रान्त हुये दुःख का उपभोग करते हैं ॥८५॥८६॥

मू०—शंखक्षालन मन्तरं रसनया ताल्वोष्ठनासारसम्।
वान्तेरुल्लुठनं कपाटममरी पानं तथा खर्परी ॥
वीर्यद्रावितमात्मजं पुनरहो ग्रासं प्रलेपञ्च वा।
ये कुर्वन्ति जडास्तु ते नहि फलं तेषां तु सिद्धान्तजम्॥८७॥
घण्टाकोहलकालमार्दुलमहाभेरीनिनादंयदा।
सम्यङ्नाद मनाहत ध्वनिमयं शृण्वन्ति चैतादृशम् ॥
पिण्डे सर्वगतं निरन्तरतया ब्रह्माण्डमध्येऽपि वा।
तेषां सिद्धपदं ततः समुचितं नैवं परं लभ्यते ॥ ८८ ॥

सं० टी०—ये सततं कर्मणिरतास्तत्त्वाभिमुखा न भवन्ति तेऽपि जडाः (सिद्धान्तजं फलं) मोक्षस्तेषां न भवति। किं किं कुर्वन्तीति कथ्य ते (अन्तरम्) अभ्यन्तरम् (शंखक्षालनम्) शंख नाड़ी शोधनम्, आन्त रिक कमल शोधनमिति यावत्। वथा ताल्वोष्ठं नासिका रतासां रसं तस्येति शेषः (रसनया) जिह्वया (वान्तेः) वमनस्य करणेनेति शेषः (उल्लु ठनम्)निःसारणम् (कपाटम्) कपाट मुद्रां भ्रू द्वार भेदनम् (अमरीपानम्) शिवजल सुधापानं तथा (खर्परी) खर्पर धारणम् (वीर्य्यद्रावितम्) वी

र्यनिःसृतम् (आत्मजम) स्वकीयम् पुनस्तस्यैव (ग्रासम्) कवलनम् (प्रलेपनम्) वाऽङ्गं मर्दनमित्यादि ये कुर्वन्ति। तेषां सिद्धान्तजं फलं मोक्षो न भवतीति किमु वक्तव्यं शिष्टमण्डलेऽपि समावेशस्तस्य दुर्लभः ॥ ८७ ॥ (यदा) प्राणवायुरोधकाले (घण्टेत्यादि) घण्टा प्रसिद्धं वाद्यं तस्याः कोहलः, कोलाहलस्तस्यैव कालम्, मार्दुलं च यस्य। कलस्य भावः कालो माधुर्यमिति यावन्मृदुलस्य भावो मार्दुलम्, कोमलत्व मिति भावः। सा चासौ महाभेरी निनादो वाद्य विशेष ध्वनिस्तं किं च (अनाहतध्वनिमयम्) महाकाशस्थित प्राकृत नित्य शब्दस्य यो ध्वनिः सोऽनाहतध्वनिस्तन्मयं तत्प्रायं (सम्यग्ध्वनिम्) सुन्दरध्वनिम् (सर्वगतम्) व्यापकम् (निरन्तरतया) अनवरतम् (पिण्डे) शरीर मध्ये वा ब्रह्माण्ड मध्ये ये शृण्वन्ति तेषां (ततः) तेनैव ज्ञानरहितेन साधनेन (सिद्धपदम्) सिद्धानां प्राप्यं समुचितं परं तत्त्वं ब्रह्म नैव लभ्यत इति किन्तु साधनेन ज्ञान प्राप्ति स्ततो मोक्ष इति ब्रूमः ॥ ८८ ॥

भा० टी०—शङ्ख धोने के बाद स्वभाव से तालु, ओष्ठ और नासारस एवं वान्ति का उछाल, कपाल कपाट अमरीपान तथा खर्परी होना, निज विन्दु का द्रावण फिर उसी का ग्रास (पीना) और लेप जो जड़ बुद्धि करते हैं उनको स्वसिद्धान्त वर्णित फल की प्राप्ति कदापि नहीं हो सकती। क्योंकि यह कल्याण से गिराने वाला अत्यन्त विपरीत मार्ग है। घन्टा, कोहल, (ढोल) काल, (कांस्यका वाद्य विशेष) डमरू और बड़ी नौवत इनके तथा और भी ऐसे ही अनेक चित्र विचित्र अनहद ध्वनिरूप नाद को सर्वगत रूप से जो स्वपिण्ड में या ब्रह्माण्डमात्र में निरन्तर सुनते हैं, उन अभ्यासियों को यथावत सिद्धि की प्राप्ति होती है। क्योंकि पूर्वोक्त प्रकार से शब्द सुनना योग सिद्ध सूचक शुभ लक्षण है। जब प्राण वायु तीनों ग्रन्थियों का भेदन कर सहस्रदल शिव स्थान में पहुँचने लगता है तब घण्टादि वाद्य विशेषों की यह विशाल ध्वनि उत्पन्न होती है। उस समय योग सिद्धियाँ समीप आजाती हैं परन्तु उन सिद्धियों के आने पर भी अपने को कृतकृत्य न समझे। क्योंकि यह सिद्धिरूप सार्वभौम पद भी माया का कार्य है। अतः इससे भी तृप्त न होना चाहिए क्योंकि इतने से भी

आत्मारूप व्यापक पद की प्राप्ति नहीं होती। हाँ अणिमादि ऐश्वर्य में जब विरक्ति भाव होता है उसके बाद अखण्ड ज्योतिः रूप परम व्यापक आत्मतत्त्व को प्राप्त होजाता है ॥८७,८८॥

मू०—वैराग्यात् तृणशाकपल्वलजलं कन्दं फलंमूलकम्
भुक्त्वा यौवनवासमेव भजते चान्ये च देशान्तरे ॥
बालोन्मत्तपिशाचमूक जडवच्चेष्टाश्च नानाविधाः ।
ये कुर्वन्ति पदं विना मतिबलं भ्रष्टा विमुह्यन्ति च ॥८९॥
कंथादर्शन मद्भुतं बहुविधं भिक्षाटनं नाटकम् ।
भस्मोद्धूलन मंग कर्कश तरं धृत्वा च वर्षं त्वरेत् ॥
क्षेत्रं क्षेत्र मटन्ति दुर्गमतरे स्थित्वाऽथ सर्वेन्द्रियम् ।
नो विंदन्ति परंपदं गुरुमुखाद्गर्वेण कष्टाश्च ते ॥९०॥

सं० टी०—ये (वैराग्यात) संसारात् विरज्य (तृणशाक पल्वलजलम्) तृण विशेषं शाकं वास्तुकादि, पल्वलं, जलाशयस्तस्थ जलं, प्रसिद्धं कंदम् , सुरणादि, फलमाम्रादि, मूलकं प्रसिद्धम् । एतानि भुक्त्वा वन वासरण्यमेव (भजते) सेवतेऽन्यं च ये देशान्तरं जन्मदेशादन्यत्र (बालो न्मत्तपिशाच मूक जडवत) कचिद्बालवत् कुत्रचिदुन्मत्तादिवत् (नानावि- धाः) अनेक प्रकाराः (चेष्टाः) व्यापारान् कुर्वन्ति ते मतिबलम् (ज्ञान शक्तिम् (विना) ऋते भ्रष्टाः स्वसिद्धान्ताद् विचलिताः सन्तो विमुह्यन्ति मुग्धा भवन्ति ॥ ८९ ॥ (अद्भुतम्) विचित्रम् (कन्थादर्शनम्) कन्था रूप वस्त्रम् (बहुविधम्) नाना प्रकारकम् (भिक्षाटनम) याचनम् (नाटक म्) नाटकवद् बहुवेषम् (भस्मोद्धूलनम्) विभूतिपरिलेपनम्-अत एव (अङ्गकर्कशतरम) अतिशयेन कठिनाङ्गम् (धृत्वा) परिधाय कृत्वा च (वर्षम्) निरन्तर बहुवर्षावधि(त्वरेत)विचरति (क्षेत्रं क्षेत्रम्) प्रतिस्थानम् (अटन्ति) अतन्ति (अथदुर्गमतरे) विषमस्थाने (स्थित्वा) आसित्वा सर्वेन्द्रियं निरुध्येति शेषः (गर्वेण) अहङ्कारेण (गुरुमुखात्) आचार्य

चक्रात (परंपदम्) तत्वं (नो विन्दन्ति) न लभन्तेऽतस्ते कष्टाः दुखिता इति ॥ ९० ॥

भा० टी०—बहुत से वैराग्य हो जाने पर पत्ती के शाक से ही निर्वाह करते हैं। एवं पत्तों के जल पात्र से ही जल का ग्रहण करते हैं या तृण, शाक और पत्तों से निकाला हुआ जल, कन्द, फल, और मूल, आदिकों को खाकर वन में ही निवास करते हैं या अन्य देश में रहते हैं। इसी प्रकार जो बालक, उन्मत्त, पिशाच गूंगे और मूर्ख पुरुष के सदृश चेष्टा करनेवाले हैं। अतः विपरीत बुद्धि के कारण योग रूप आनन्द से वंचित हो, वे बनावटी विरक्तिपद का ठाट दिखाते हैं वे आत्मानन्द से भ्रष्ट हुये इस संसार के माया चक्र में ही मोहित हो रहे हैं। अनेक प्रकार के चित्र विचित्र कन्था (चोला) और वसनादिकों को धारण करने वाले एवं अनेक प्रकार से भिक्षा के निमित भ्रमण रूप नाटक में परायण तथा भस्मी और धूल को शरीर में रमाकर देह को अति कठोर बना कितने ही वर्षों तक कठिन नियमों का पालन करते हैं और अन्य कितने ही समस्त इन्द्रियों को जीतकर दुर्गम तीर्थ क्षेत्रों में ही भ्रमण करते हैं, परन्तु वे स्वयं पण्डितमानी होते हुये गर्व से योग तत्व वेत्ता गुरु की शरण में पहुँच कर भी योगद्वारा आत्म रूप परमपद को नहीं जानते। वे भी आत्मानन्द से वंचित यों ही दुःख भार से पीड़ित हैं ॥८९॥९०॥

मू०—वाणीं येच चतुर्विधां स्वरचितां सिद्धैश्चवा निर्मिताम् ।
गायत्रीं चतुराश्च पाठ निरता विद्या विवादे रताः ॥
नो विन्दन्ति तदर्थमात्म सदृशं खिद्यन्ति मोहाच्छलात् ।
दण्डैः कर्तरि शूलचक्र लगुडै र्भाण्डाश्च दुष्टाश्च ते ॥९१॥
एवं शून्यादि शून्यं परम परपदं पञ्चशून्यादि शून्यम् ।
व्योमातीतं ह्यनाद्यं निज कुलमकुलं चाद्भुतं विश्वरूपम् ॥
अव्यक्तं चान्तरालं निरुदयमपरं भासनिर्नाम मैक्यम् ।

वाङ्मात्राद्भासयन्तोबहुविधमनसोऽव्याकुलाभ्रामितास्ते

सं० टी०–(स्वरचिताम्) परमात्मनो निःसृतां श्रुति रूपाम् (सिद्धैः) सिद्ध पुरुषैर्निर्मितां स्मृतिरूपाम् (चतुर्विधाम्) निपातोपसर्ग सुबन्ततिङन्तरूपाम् "चतुर्विधाः शब्दाः,, नामाख्यातोपसर्ग निपाताः इति व्याकरण महाभाष्ये (वाणीम्) मन्त्रात्मक शब्दम् (गायत्रीम्) तत्त इव गायत्रीं पठितुमिति शेषः। (चतुराः) निपुणाः (पाठनिरताश्च) जपतप परा अपि यदि (विद्याविवादेरताः) विद्याविवादेसंलग्नाः (आत्म सदृशम्) स्वानुरूपम्-यथार्थमिति यावत् (तदर्थम्) मन्त्रार्थम् (नोविन्दन्ति) न लभन्ते तदा सिद्धिमप्राप्य खिद्यन्ति। अतो विहाय विवादं मन्त्रार्थ लाभाय यतितव्यमिति भावः, पश्चान्मोहाच्छलाद्वा ते कर्तरि शूल चक्र लगुडैः। ततद्स्त्रैः (दण्डैः) परपीडनैः (भाण्डाः) निर्लज्जा बहुवागिमनः (दुष्टाश्च) परच्छिद्रान्वेषिणश्च लोके कथ्यन्त इति शेषः॥ ९१॥ एवं पूर्व प्रकारेण ये स्वयं (बहुविधमनसः) नाना विषय व्यावृत्त चेतसः (व्याकुलाः) चिन्ताग्रस्ताः सन्तः (वाङ्मात्रात्) वहि र्वचनमात्रेणैवान्यान् (ऐक्यम्) अद्वैतम् (भासयन्तः) लोकान् भ्रमेभु निपातयन्तो वञ्चकाः सन्तीति तात्पर्यम् कीदृशं तत्त्वमित्यस्य विशेषणानि शून्यादीनि (शून्यस्य) संसाराभावस्य (आदि) कारणम् (शून्यम् सर्व धर्मरहितम् (परम परपदम्) सर्वोत्कृष्ट स्थानम् (पञ्च शून्यादि शून्यम्) पञ्च शून्यानां पञ्च भूतावसानानां मध्ये आदि शून्यम्प्रथम शून्यस्वरूपम्। अयमाशयः-एकैक भूतस्य योऽवसानः स शून्यपदेन कथ्यते तथा च पृथिवी जलयो मध्ये एक शून्यमेवं जल तेजसोर्मध्ये द्वितीयं शून्यं तथैव तेजो वायो र्मध्ये तृतीयं शून्यं वाय्वाकाशयो र्मध्ये चतुर्थ माकाशान्तं च पञ्चमम. तथा च पञ्च शून्यानि भवन्ति, तेषु प्रथमाकाशान्तिम ब्रह्म रूपमिति यावत्। अत एव (व्योमातीतम्) आकाशमतिक्रम्य स्थितम् (अनाद्यम्) नास्त्याद्यं कारणं यस्यतत् (निजकुलम्) व्यवहारे (निजम्) स्वयं (कुलम्) सकल वंश प्रवर्तकम् (अकुलम्) वस्तुतः कुलरहितंस्व कारण रहित मिति यावत्, अत एव (अद्भुतम्) आश्चर्य रूपम् (विश्वरूपम्) सर्व स्वरूपं कार्य कारणयोस्तादात्म्यात् (अव्यक्तम्) सूक्ष्मम् (अन्तरालम्) सर्वेषामभ्यन्तरस्थम् (निरुदयम्)

उत्पत्ति रहितम् (परम)उत्कृष्टम् (भासनिर्नामम) भासमानं सन्नाम रहितम् ,नाम्नोऽभाव इत्यर्थाभावेऽव्ययीभावः, अतः "नपुंसकादन्यतरस्यामिति टच् ॥ ६२ ॥

भा० टी०—जो परा, पश्यन्ती, मध्यमा और वैखरी रूप चार प्रकार की वाणी या गद्य पद्यात्मक संस्कृत भाषारूप स्वरचित चतुर्विध वाणी या सिद्धों से निर्माण की हुई वाणी को पढ़ते हैं तथा गायत्री मन्त्र आदि में चतुर, स्तोत्रादि के पाठ में तत्पर और विद्या विवाद में भी तत्पर रहते हैं वे भी आत्मा के सदृश अर्थ को अर्थात सर्वत्र व्यष्टि समष्टि अण्डपिण्ड में भीतर, बाहर ऊपर, नीचे एक ही अखण्ड ज्योतिः स्वरूप आत्मा है इस प्रकार नहीं जानते। क्योंकि वे माया चक्र में फँसकर अज्ञान वश खेद को प्राप्त हो रहे हैं। इतना ही नहीं बल्कि इनमें बहुत से तो पूरे कृपानिधान होते हैं, सुनिये— आत्म बोध से विमुख हो कितनेक तो दण्ड धारी दण्ड का उपयोग करते हैं। बहुत से कुल्हाड़ी, त्रिशूल चक्र लाठी आदि शस्त्रों को ही धारण करते हैं। अतः ऐसे पामर जन एक प्रकार के भाँड और दुष्ट हैं। क्योंकि वे आत्मा की तरफ से एकदम विमुख हुये पशुवृत्ति में ही तत्पर रहते हैं। अब केवल शून्य वादी के मत का खण्डन करते हैं। जैसे पूर्व में खण्डन किया हुआ मत निःसार है वैसे ही इसको भी जानना। समस्त जगत् के विनाश का कारण भी महाशून्य है उससे पर कुछ नहीं है, अपितु वही सबसे पर और परमपद है। तथा क्रम से पञ्च भूतों के मध्यवर्ती विशेष पञ्चशून्य अभाव का कारण भी वही शून्य है। वह शून्य आकाश से भी अतीत और आदि अन्त से रहित है एवं वह अस्मदादियों का कारण और स्वयं कारण रहित है। व्यवधान रहित अव्यक्त अद्भुत विलक्षण और विश्वरूप ऐसा वह शून्य है तथा उदय अस्त से रहित सर्वोत्कृष्ट व्यापक रूप और नामरूपसे रहितएकहै। इस प्रकारकेवलवाणीमात्र से वर्णन करने वाले वे शून्यवादी नाना विक्षेपण से व्याप्त हैं। क्योंकि उस वागाडम्बर से स्वयं उनके मन में भी सन्तोष नहीं है अतः वे भी भ्रान्त ही हैं ॥६१॥६२॥

मू०-आज्ञा सिद्धि करं सदा समुचितं सम्पूर्णभाभासकं
पिण्डे सर्वगतं विधानममलं सिद्धान्त सारं वरम् ॥
भ्रान्तेर्निर्हरणं सुखातिसुखदं कालान्तकं शाश्वतम् ।
तन्नित्यं कलनोज्झितं गुरुमयं ज्ञेयं निरुत्थं पदम् ॥६३॥

सं० टी०—अनात्मेत्यादिना यदखण्ड सच्चिदानन्दाद्वितीयतत्त्वमुपक्रान्तं तस्य कार्य विशेषं सृष्ट्यादि तज्ज्ञानप्रकारं प्रसंगागतं च सर्वं प्रदर्श्य, उपक्रमोपसंहाराभ्यां तात्पर्य विनिर्णयः,, इति न्यायेनास्य ग्रन्थस्य तत्रैव तात्पर्यं सूचयितुं पुनरपि ग्रन्थान्ते तदेवोपसंहरति। आज्ञेत्यादि श्लोकेन (गुरुमयम्) गुरुरूपं स्वार्थे मयट् (निरुत्थंपदम्) यस्य नास्त्युत्थानं तदुत्तमं पदम् (प्राप्यम्) तत्त्वं ज्ञेयं कीदृक् तत्तत्त्वमिति विज्ञापनाय बहुविशेषणै विशिनष्टि (आज्ञासिद्धिकरम्) आज्ञायाः स्वीयोपदेशस्य सिद्धिं साफल्यङ्करोति तच्छीलम्, "कृञोहेतुताच्छील्येति टच्,, सत्यसंकल्पत्वाद्यदेवोपदिशति यं प्रति तत् तथैव भवतीति भाव (सदासमुचितम्) अन्यायोपदेशरहितम्। (सम्पूर्णभाभासकम्) सम्पूर्णानां सकलानां भानां सूर्यादि प्रकाशानां भासकं प्रकाशकम्। तस्य भासा सर्वमिदं विभातीति श्रुतिः (पिण्डे) शरीरे ब्रह्माण्डे च (सर्वगतम्) व्यापकम् (विधानम्) सर्वं कारकम् (अमलम्) रागद्वेषादि मल रहितम्। (सिद्धान्तसारम्) सिद्धान्तेषु सारं दृढं वादिभि रजेयत्वात्। अत एव (वरम्) श्रेष्ठम् (भ्रान्तेः) संसार रूप भ्रमस्य (निर्हरणम्) विनाशकम् (सुखातिसुखदम्) नित्यमोक्षात्मकानन्द दायकम् (कालान्तकम्) सर्वमारकस्यापि कालस्याप्यन्तकम्मारकमजरामरमिति यावत्। अत एव (शाश्वतम्) ध्रुव कूटस्थमिति (कलनोज्झितम्) गणनारहितं संकल्प रहितत्वम् (नित्यम) नित्य रूपं तत् तत्त्वन्तत्र गुरुपद दानेन गुरोः परमात्मनश्चैकमेवलक्षणन्तथा चैतादृश गुरु द्वारा तत्त्वं झटिति सुबोधं ध्रुवं भवतीति ध्वनितम्। अत एव इतः पूर्वं वञ्चक गुरुन् निन्दित्वा कीदृशो गुरुराश्रयणीय इत्याकांक्षा मुपशमितवान् ॥ ६२ ॥

भा० टी०—अब इस शास्त्र के प्रतिपाद्य और सिद्धों के लक्ष्यभूत परमपद का वर्णन करते हैं। सृष्टि के आदि में सदा ही

उचित समय में अपनी शक्ति से अभिन्न वह ब्रह्म जगत विषयक इच्छा और जगत की उत्पत्ति को करता है, पीछे परम्परा से वही जगत के विशेष अवयव विन्यास और देव मनुष्यादि सकल प्राणियों की भी रचना करता है। वास्तव में वह असङ्ग अखण्ड और ज्योतिरूप है किन्तु सूर्य, चन्द्र, अग्नि विद्युत और नक्षत्र आदि सम्पूर्ण भासक वस्तुओंका भीवहप्रकाशक है। क्योंकि चेतन सत्ता केबिना इन उपर्युक्त सूर्य चन्द्रादिकों की स्थिति असम्भव है। यद्यपि वह अखण्ड ज्योति चेतन अण्डपिण्ड में सर्वत्र एकरस और व्यापकरूप से विद्यमान है तथापि इस देह पिण्ड में ही योग पद्धतिद्वारा विशेष ध्यान करने से उस शुद्ध निरञ्जन ज्योतिः स्वरूप परब्रह्म की अभिव्यक्ति होती है। वही यथार्थ में सिद्धों के सिद्धान्त का उत्कृष्टसार है और जिस समय योग ध्यान से उस चेतनपरमार्थ तत्त्व का साक्षात्कार हो जाता है तब यथार्थ में अविद्यारूप भ्रान्ति और अविद्या के कार्यभूत समस्त दुःख प्रपञ्च की निवृत्ति हो जाती है। वही परब्रह्म निरतिशय सुख कोदेताहै जैसे इसलोक में कोई किसीकोधनी बना देता हैवैसे हीसुखरूप ब्रह्म अन्य को भी अपने जैसा आनन्द स्वरूप सुखी बना सकता है और तो क्या विषय सम्बन्धी क्षण भंगुर सुख भी उस ब्रह्म सुख का ही लेश है। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इत्यादि श्रुतियों में भी कहा है। परन्तु वह उपाधि परिच्छिन्न होने से तुच्छ कहलाता है और वह परमेश्वर ही आदि अन्त से रहित शाश्वत और काल का भी काल है। क्योंकि इस ब्रह्म के भय से ही वायु, सूर्य, चन्द्र, अग्नि, इन्द्र और मृत्यु ये सब स्वय अपने अपने काम में तत्पर रहते हैं वही ब्रह्म नित्य और बाध से रहित है क्यों कि परिच्छिन्न अनित्य वस्तु का देश और काल कृत अन्त होता है। परन्तु व्यापक नित्य चेतन ब्रह्म में उपरोक्त विकार नहीं हैं। अतः वह ब्रह्म नित्य है। इसी से वह समस्त कल्पनाओं से रहित और शुद्ध है। एवं गुरु पद भी वही है। अर्थात् "गु" शब्द से अज्ञान और रु शब्द से उसका विनाश, यानि वही परमेश्वर आचार्य मूर्ति में स्थित होकर उपदेश द्वारा अज्ञान विनाशक कहलाता है। या

वही सर्वेश्वर सर्वोच्च व्यापक और सुखरूप कहलाता है और वह शरीर, इन्द्रिय, मन, बुद्धि आदि अन्तःकरण और अव्याकृत मायासे भी परे है। वही योगियों का निर्भय और उत्कृष्ट परमपद है ॥६३॥

मू०—आत्मेति परमात्मेति जीवात्मेति विचारणे।
त्रयाणामैक्य संभूति रादेश इति कीर्त्तितः ॥६४॥
आदेश इति सद्वाणीं सर्वद्वन्द्व क्षयापहाम्।
यो योगिनं प्रति वदेत् सयात्यात्मान मैश्वरम् ॥६५॥
आशादहनं भसितं कुण्डलयुगलं विचार सन्तोषः।
कौपीनं स्थिरचित्तं खर्परमाकाश मात्मनो भजनम् ॥६६॥

सं० टी०—ब्रह्मविद्यालाभाय गुरुराश्रितव्य इति पूर्व श्लोके प्रतिपादितन्तत्र केन शिष्टाचारेण गन्तव्यमिति बोधयितुम्प्रथम मादेश पदार्थमाह—आत्मेति आत्मा इति भूतात्मा पिण्ड स्तदुपलक्षकं सकलाधिभौतिक पदार्थस्य (परमात्मा) परमेश्वरः (जीवात्मा) जीवः (एतेषां त्रयाणां विचारणे) विवेके सति (ऐक्य सम्भूतिः) एक तैव भवति स एवादेश इति कीर्त्तितः, कथितः॥ ६४ ॥ अयं भावः–आ० १, दे २, श ३" अत्र पदेऽक्षर त्रयमेलनं तेनाधि भौतिकाध्यात्मिकाधि दैविक पदार्थानामैक्य भाव एव आदेश पदस्य सांकेतिकोऽर्थः प्रसिद्धो योगिनाम्, आदेश इति कथनेन योगी प्रसीदति ततो ब्रह्मविद्यां ददाति द्वितीयेन श्लोकेनाह (आदेश इतिसद्वाणीम्) सतो ब्रह्मणोबोधिकावाणी, आदेश इति अत एव (सर्वद्वन्द्व क्षयापहाम्) सकल द्वैत प्रयुक्त दुःख विनाशिनीं तां वाणीं यो योगिनं प्रति वदेदुच्चारयेत् स ऐश्वरम्। ईश्वर एव ऐश्वर स्तं अथवोपाधि विशिष्टईश्वर स्तस्य भावःसाक्षिणमात्मानमानन्दचिद्घनम् याति- प्राप्नोतिपरमात्म विद्या साधनान्युपदर्शयति (आशादहनम) आशायाः सङ्कल्पस्य दहनं विनाशङ्कुर्यादिति शेषः (भसितं) अंगे भस्म(कुण्डल युगलम) कर्णयोः कुण्डले धारयेत(विचार सन्तोषः) विचारे ब्रह्म विवेकेएवसन्तोषोयस्य न तु धने(कौपीनम्) वस्त्र धारयेत् (स्थिरचित्तम) निश्चलं मनः कुर्यात्। हस्ते (खर्परम्) पात्र

धारयेत् (आकाशम) हृदयाकाशम् (आत्मनः) परमात्मनो भजनं, भज न स्थानं भज्यते यत्र त्यधिकरण साधनम् ॥ ६६ ॥

भा॰ टी०— अब पूज्यपाद योगाचार्य श्री गोरक्षनाथ जी सिद्ध योगियोंमें प्रचलितआदेश शब्द के अभिप्रेत अर्थ का निरूपण करते हैं। सब उपाधियों से रहित नित्य, अनन्त, शुद्ध, बुद्ध,सच्चिदानन्द स्वरूप आत्मा है। एवं शुद्ध सत्वगुण प्रधान माया उपाधि वाला सर्वज्ञ समस्त जगत की उत्पत्ति, स्थिति, प्रलय करने वाला जो ईश्वर है वही यहां परमात्मा पद से लिया जाता है और मलिन सत्वगुण प्रधान अविद्यारूप उपाधिवाला अल्पज्ञ और सुख दुःखादि सहित जीवात्मा है। जीव और ईश्वर की अविद्या एवं मायारूप उपाधि को छोड़कर आत्मा, परमात्मा और जीवात्मा की एक सम्भूति अर्थात् अभेद, आदेश शब्द का अर्थ है। अतः उपरोक्त रीति से एक संभूति पद के द्वारा एक ब्रह्म का ही बोध हुआ। क्योंकि वास्तविक सिद्धान्त में द्वितीय का अभाव है। परन्तु जहाँ बद्धाञ्जलि शिष्य शिर को झुकाकर गुरु के प्रति आदेश आदेश कहता है वहाँ शिष्य का, हे गुरु महाराज ? आप ब्रह्म स्वरूप हो। इस प्रकार स्तुति करने में तात्पर्य है। क्योंकि स्तुति अन्तरप्रणाम के साथही की जातीहै और जो पुरुष जिसको प्रणाम करता है वह उसकी स्तुति भी अवश्य करता है। जैसे रावण ने श्री महेश्वर को प्रणाम कियाथा और उनकी स्तुति भी की थी, परन्तु श्री रामचन्द्र को प्रणाम नहीं किया तो उनकी स्तुति भी नहीं की। यह बात सर्वलोक प्रसिद्ध है। यहाँ आदेश शब्द नमस्कार का वाचक नहीं है यह शंका भी नहीं हो सकती। क्योंकि पूर्वोक्त रीति से नमस्कार पदार्थ को आदेश पदार्थ के अन्तर्भूत होने से अर्थात् आत्मा की एकता का बोधक जो आदेश शब्द है उसी में नमस्कार पदार्थ का भी समावेश होता है और जब शिष्य गुरु के प्रति आदेश आदेश करता है तब गुरु भी शिष्य के प्रति आदेश ही करता है। वहाँ गुरु का अभिप्राय यह है कि हे शिष्य ! तू भी ब्रह्मस्व रूप है। इसरीति से गुरुदेव का उपदेश करने में तात्पर्यहै। जहां दो समान पुरुष परस्पर आदेश आदेश करते हैं किन्तु उनका गुरु शिष्य

भाव नहीं है वहां केवल स्तुतिमात्र करने में तात्पर्य है। तात्पर्य के वश से शाब्दबोध सर्वप्रामाणिक पुरुषों से सम्मत है। जैसे कि "सैन्धव-मानय,, इस वाक्य के सुनने के बाद तात्पर्य वश से कभी अश्व का और कभी नमक का भी बोध होता है। जहां दो बार आदेश आदेश ऐसा उच्चारण किया जाता है वहाँ अत्यन्त आदर अर्थ जानना। अब आदेश शब्द के माहात्म्य का निरूपण करते हैं। आदेश यह सिद्धों को प्रसन्न करने वाली परम आदरणीय शुद्ध वाणी है और उच्चारण मात्र से ही सकल दुःख जाल को समूल नष्ट कर कल्याण को देती है। क्योंकि आदेश शब्द अद्वितीय ब्रह्म का बोधक है। अतः इसके उच्चारण मात्र से सकल विघ्नों का विनाश और कल्याण की प्राप्ति स्वाभाविक है वेदों में भी अद्वितीय ब्रह्म का बोधक आदेश शब्द देखने में आता है। देखियेः—

,,तस्यैष आदेशो यदेतद् विद्युतो विद्यु तदा" इति के० उ०। "उत तमादेशमप्राक्ष्यम्" इत्यादि। छा० उ०। अर्थात् "आदेशो नेति नेति"। बृ० उ०। अन्तर केवल इतना है कि कहीं उस अनुपम ब्रह्म के उपदेश का बोधक आदेश शब्द विधिरूप से देखा जाता है, जैसे ऊपर के छान्दोग्य उपनिषद् वाक्य में और कहीं निषेध रूप से जैसे बृहदा-रण्यक उपनिषद् में। अतः जो प्रेमीजन योगी के प्रति आदेश आदेश इस प्रकार परमपावन शिवरूप आदेश शब्द का प्रयोग करता है वह निज आत्म स्वरूप शिव के लोक को प्राप्त होता है। जिस अवधूत योगी ने सम्पूर्ण लोकों को दास बनाने वाली आशा का दहन करदिया है वही यथार्थ में आत्म निष्ठ है। उस अवधूत योगी का आत्मविचार और आत्म सन्तोष ही मानों भास्वर कुण्डल हैं, या आशा का उच्छेद रूपी भस्म जिसने धारण की है निज चित्त की स्थिरता ही कौपीन और आकाश रूप खप्पर है और निज आत्म स्वरूप का स्मरण ही भजन है॥ ६३ ॥ ६४ ॥ ६५ ॥

मू०—एतच्छास्त्रं महादिव्यं रहस्यं पारमेश्वरम्।
सिद्धान्तं सर्व सारस्य नाना संकेत निर्णयम् ॥६७॥
सिद्धानां प्रकटं सिद्धं सद्यः प्रत्यय कारकम्।

आत्मानन्द करं नित्यं सर्व सन्देह नाशनम् ॥९८॥
न देयं पर शिष्येभ्यो नान्येषां सन्निधौ पठेत् ।
न स्नेहान्नबलाल्लोभान्नमोहान्नानृताच्छलात् ॥९९॥
न मैत्री भावनाद्दानान्न सौन्दर्यान्न चासनात् ।
पुत्रस्यापि न दातव्यं गुरु शिष्य क्रमं विना ॥१००॥

सं० टी०—एतच्छास्त्रं पारमैश्वरं परमेश्वर सम्बन्धि परमेश्वरस्य प्रकाशकम्परमेश्वर रचितत्वात्तो महादिव्यमलौकिकम् (रहस्यम्) गोपनीयम् (सर्वसारस्य) सर्वेषां मध्ये सारः श्रेष्ठ स्तस्य प्रकाशमिति शेषः (नाना संकेत निर्णयम्) अनेक संकेतै निश्चीयमानम् (सिद्धान्तम्) प्रकाशयतीति शेषः ॥ ९७ ॥ एतच्छास्त्रमिति पूर्वेण सम्बन्धः (सिद्धानां प्रकटम्) सिद्ध योगिभिः प्रत्यक्षीकृतम् अतः सिद्धम् (आत्मानन्द करम्) ब्रह्मानन्द जनकम् (सर्व सन्देह नाशनम्) सकल संशयोच्छेदकम्, नित्यमासूर्य चन्द्रं विद्यमानमेतच्छास्त्रमतोऽवश्य मुपादेयमिति ध्वनिः ॥९८॥ गुरुशिष्य क्रमं विना न कस्मैचिद्देयम्, अत्र राग द्वेषौ न शंकनीयौ किन्तु गुरु शिष्य क्रमं विना केवल ग्रन्थं विलोक्य क्रिया करणे ऽनेक बाधा समुपतिष्ठते ततश्च विद्या लाभो दूरे तावद् हानिरेव पुरतः समाढौकतेऽत एवोक्तं न देयं पर शिष्येभ्य इत्यादि । सर्व मन्यत्सुगमम् । ॥९९॥१००॥

भा० टी०—महादिव्य यह योग शास्त्र महेश्वर सम्बन्धी परम गोपनीय रहस्य है । अधिक क्या कहें उत्तमोत्तम सर्वशास्त्रों के सार का भी सिद्धान्त रूप हृदय है । "सिद्धसिद्धान्त पद्धति" इस नाम से ही इसके संकेत का निर्णय हो जाता है । अर्थात सिद्धों के अत्यन्त गोपनीय सिद्धान्त को बतलाने वाला यह ग्रन्थ है । यह निज कार्य में परिणत होने से सिद्धों में प्रत्यक्ष सिद्ध है । किन्तु अन्य जिज्ञासु को भी शीघ्र निश्चय करा देता है । यह महादिव्य योग शास्त्र नित्य अभ्यास करने वालों के सन्देह को दूर करता हुवा आनन्द को बढ़ाता है । जो योग में रुचि नहीं रखते ऐसे शिष्यों को

इनका उपदेश न दे और उनके समीप बैठकर इस शास्त्र का पठन पाठन भी न करे। इसको न स्नेह से, न बल से न लोभ से, न मोह से, न मिथ्या भाषण से और न छल से देना चाहिये। न मित्रपन से न दान से न रूप सौन्दर्य से और आसनादि सत्कार से भी न दे। इतना ही नहीं किन्तु योग्य अधिकारी पुत्र को भी गुरु शिष्य क्रम के बिना न देवे ॥९७॥९८॥९९॥

मू०—सत्यवन्तो दयाचित्ता दृढभक्ताः सदाचलाः।
निस्तरंगा महाशांताः सदा ज्ञान प्रबोधकाः॥१०१॥
भयदैन्यघृणालज्जातृष्णाशोकविवर्जिताः।
आलस्यमदमात्सर्यदम्भमायाच्छलोज्झिताः॥१०२॥
अहंकारमहामोहरागद्वेषपराङ्मुखाः।
क्रोधेच्छाकामुकासूयाभ्रान्तिलोभविवर्जिताः॥१०३॥
निस्पृहा निर्मला धीराः सदाऽद्वैत पदे रताः।
तेभ्यो देयं प्रयत्नेन धूर्त्तानां गोपयेत्सदा॥१०४॥

सं० टी०—इदं शास्त्रं कस्मै देयमित्यधिकारि विशेषं लक्षयति। ये सत्यवादिनो दयालवो दृढ भक्ति विशिष्टाः सततं स्वधर्मं तत्पराः। उद्वेग रहिताः सत्यप्यपराधे शान्ति सहिताः सतत सज्जनेभ्यः परलोक ज्ञान प्रदर्शकाः। भय जुगुप्सा लज्जा तृष्णा शोक रहिताः। आलस्य मद मात्सर्य पाखण्ड माया च्छल रहिताः। अहंकार महामोह (अज्ञान) राग द्वेष वहि र्मुखाः। क्रोध धनेच्छा कामुकता परिच्छिद्रान्वेषण भ्रम लोभ शून्याः। अतः संसाराद्विरक्ताः, मल रहिताः। सततमद्वैत पदे विशुद्ध चिदानन्दे परमात्मन्यनुरागवन्तः, एतेभ्य इदं शास्त्रम्प्रदेयं धूर्त्तेभ्यस्तु सततं गोपनीयमिति ॥१०१॥१०२॥१०३॥१०४॥

भा० टी०—किन्तु निम्न लिखित अधिकारियों को अवश्य देना चाहिये। सत्यवक्ता, दयालु, ईश्वर और गुरु में दृढ़ भक्ति रखने वाला निज धर्म में अचल, चञ्चलता दोष शून्य, महाशान्त, सदा ज्ञान

का उपदेशक और भय, दीनता, घृणा, लज्जा, तृष्णा, शोक, आलस्य, मद, दम्भ, छल मिथ्या इनसे रहित, अहंकार, महामोह राग द्वेष काम क्रोध, इच्छा निद्रा भ्रान्ति इत्यादि दोषों से सर्वथा रहित तथा निष्प्रिय, निर्मल, धीर और जो सदा अद्वैत पद में रत हैं ऐसे उत्तमाधिकारियों को प्रयत्न से इस शास्त्र की शिक्षा दे और धूर्तों से सदा इस शास्त्र को गुप्त रक्खे ॥१०१॥१०२॥१०३॥१०४॥

मू०—निन्दका ये दुराचाराश्चुम्बका गुरु तल्पगाः।
नास्तिका ये शठाः क्रूरा विद्या वादरतास्तथा ॥१०५॥
योगाचार परिभ्रष्टा निद्राकलहयोः प्रियाः।
स्वस्य कार्ये परानिष्ठा गुरुकार्येषु निस्पृहाः ॥१०६॥
एतान् विवर्जये दूरे शिष्यत्वेना गतानपि ॥१०७॥
सच्छास्त्रं सिद्धमार्गञ्चसिद्धसिद्धान्तपद्धति।
न देयं सर्वदा तेभ्यो यदीच्छेच्चिरजीवनम् ॥१०८॥
गोपनीयं प्रयत्नेन तस्करेभ्यो धनं यथा।
तेषां यो बोधयेन्मोहा दपरीक्षित मन्दधीः ॥१०९॥
नहि मुक्तिर्भवेत्तस्य सदा दुःखेन सीदतः।
खेचरी भूचरी चैव शाकिनी च निशाचरी ॥११०॥
एतासामद्भुतं शापः सिद्धानां भैरवस्य च।
मस्तके तस्य पतति तस्माद्यत्नेन रक्षयेत् ॥१११॥

सं० टी०—अनधि कारिणः शिष्या अपि परिहर्तव्याः, तत्र केऽनधिकारिण इत्याह निन्दकेति ये निन्दकाः परनिन्दा तत्पराः, चुम्ब काः कामुकाः, गुरो स्तल्पे शय्यायां दारेषु वा गच्छन्तीति गुरु तल्पगा नास्ति परलोकः श्रुति स्मृतयः प्रमाणं वेति मतिर्येषान्ते नास्तिकाः। योगाचार पदेन यमनियमादयस्तद्रहिता इत्यर्थः, स्वकीय काय्य सम्पादने संलग्नाः किन्तु गुरुकार्य्येषूदासीनाः। एतान् शिष्यत्वं प्राप्तवतोऽपि

दूरतो निःसारयेत् । सिद्धा मार्गा यस्मिन् सिद्धानां वा मार्गा यस्मिन् वासिद्धानां मार्गः सिद्धमार्गः सोऽस्मिन्नस्तीतिमत्वर्थीयोऽच् प्रत्ययः । तत् सच्छास्त्रं सिद्धसिद्धान्तपद्धतिरूपम्(तेषाम्) सम्बन्ध सामान्ये षष्ठी पूर्वोक्त दुर्गुणविशिष्टेभ्यो न देयम्।अन्यथाकरणे दण्डमाह यदीच्छेदिति। प्रदाने सत्यल्प जीननं भवति। अतोयथातस्करेभ्यो धनं गोप्यते तथा तेभ्य इदं गोपनीयं यो हि मोहादज्ञानतः (अपरीक्षितमन्दधीः) दुष्ट शिष्य स्तस्मिदं शास्त्रं ज्ञापयेत(तस्य)गुरोः शिष्यस्य च मुक्ति र्न भवति। किञ्च खेचरी भूचरी शाकिनी निशाचरीणां शापोऽपि तस्य मस्तकेऽद्भुतं यथा स्यात्तथा पतति यदि सिद्धश्चेत् तस्य मस्तके भैरवस्य शापः पतति तस्मात्-यत्नेन रक्षयेत्। बलात्करणे दातु र्ग्रहीतु रुभयो र्हानि रिति १०५॥१०६॥१०७॥१०८॥१०९॥११०॥१११॥

भा० टी०—अब अनधिकारी धूर्तों को बतलाते हैं। निंदक दुराचारी, गुरुतल्पगामी, नास्तिक, शठ,निर्दयी और केवल शुष्कविद्या विवाद में ही रत एवं योगाचार से परिभ्रष्ट निन्दा और कलह चाहने वाले स्वार्थी और गुरुके कार्य की उपेक्षा करनेवाले ऐसे पुरुषों को दूर से ही त्याग दे चाहे शिष्यरूप से भी क्यों न आये हों।यह सिद्ध सिद्धान्त पद्धतिरूप दिव्य शास्त्र सिद्धों का अभीष्ट मार्ग है अर्थात् इस मार्ग पर चलने से योग प्रवीण ज्ञानी अवश्य सिद्ध हो जाता है। यदि चिरकाल तक जीना चाहे तो ऊपर वर्णित अनधिकारियों को इस दिव्य योग सिद्धान्त का कदापि उपदेश न दे। जैसे चोरों से धन की रक्षा की जाती है वैसे ही इस शास्त्र को प्रयत्न पूर्वक धूर्तों से गुप्त रक्खे। किन्तु जो मन्द बुद्धि बिना परीक्षा किये मोह से या लोभ तथा अज्ञान से उपरोक्त अनधिकारी धूर्तों को पढ़ाता है उसकी मुक्ति नहीं हो सकती और सदा ही दुःखी रहेगा। इतना ही नहीं किन्तु भूचरी, खेचरी, शाकिनी और निशाचरी इत्यादि योगिनियों का अद्भुत शाप लगेगा और यदि अनधिकारियों को बतलाने वाले सिद्ध हैं तो उनपर सिद्धराज भैरव देव का शाप होगा । इसलिये इस ग्रन्थ की रक्षा यत्न से करनी चाहिये ॥१०५॥१०६॥१०७॥१०८॥१०९॥११०॥

मू०—गुरुपादाम्बुजस्थाय परीक्ष्य प्रवदेत्सदा ।
कुतोदुःखञ्च भीतिश्चतत्त्वज्ञस्य महात्मनः ॥११२॥
कृपयैव प्रदातव्यं सम्प्रदाय प्रवृत्तये ।
सम्प्रदाय प्रवृत्ति र्हि सर्वेषां संमता यतः ॥११३॥
मायाशंकरनाथायसिद्धसिद्धान्तपद्धतिम् ।
लिखित्वायःपठेद्भक्त्यासयातिपरमांगतिम् ॥११४॥
विदधात्वर्थनिचयंभक्तानुग्रहमूर्त्तिमत् ।
स्मरानन्द भरं चेतो गणपत्यभिधं महः ॥११५॥

महेश्वरावतार श्रीगोरक्षनाथकृतौसिद्धसिद्धान्तपद्धतावववधूत योगिलक्षणोनाम षष्ठोपदेशः समाप्तिमगात। श्री साम्बशिवः प्रीयतामनेन । श्रीनाथपादपद्मेभ्योनमःशुभम्भूयात् ।

सं० टी०—ये गुरु पादपद्म सेवकाः, तान् शरणमाश्रिता निदं शास्त्रं प्रवदेत । एवं कृते भैरवादि शापो न भवति तदेवाह तस्य तत्त्वज्ञस्य योग्या योग्य विवेकवतो महात्मनः कुतोदुःखं भीतिश्च दुःखभययोः कुतः शङ्कावसरः । नन्वस्योपरि भैरव शापो न पततीत्यत्र को हेतु रित्युपपादयति सम्प्रदाय प्रवृत्तये कृपयैव प्रदातव्यं योग सम्प्रदायस्य रक्षार्थं तत्रापि केवल कृपया नतु भय लोभादिना, इदं शास्त्रं योग्य शिष्याय देयम् । अन्यथा सम्प्रदायस्यो च्छेदः स्यात्तच्च सर्वेषा मनिष्टम्, यतः सम्प्रदाय प्रवृत्तिः, सम्प्रदाय रक्षा सर्वेषां देवादीनां सम्मताऽभिप्रेताः, अतोऽभिप्राय विरोधमनाचरत आचार्य्याय श्रीभैरवः कथं शापं प्रदद्यात् । मायाशङ्करनाथाय, मायया शक्त्या सहिताय शङ्कर नाथाय कल्याण प्रदादिनाथ मनुकूलयितुम् (सिद्धसिद्धान्तपद्धतिम्) इदं शास्त्रं लिखित्वा यो भक्त्या प्रीत्या पठेत् स परमांगतिम् मोक्षं याति, प्राप्नोति इदानीं शिष्टाचार परिपालनाय ग्रन्थान्ते मङ्गल मातनुते । विदधा त्विति, स्मरानन्द भरं ज्ञानानन्द परिपूर्णम् (चेतः) मनो यस्य तत (भक्तानुग्रह मूर्त्तिमत्) भक्तानामनुग्रह उपकारस्तस्मै या मूर्त्तिराकार विशेषः

सगुण रूपधारणमिति यावत् सास्ति अस्य तद् गणपत्यभिधम्। गणप ति नामकं महस्तेजः। अर्थं निचयं पुरुषार्थं चतुष्टयं (विद्धातु) करोतु एतच्छास्त्रानुयायिन इति शिवम् ॥११२॥११३॥११४॥११५॥

गुरोः कृपाकटाक्षेण द्रव्येशविदुषा कृता।
गूढार्थ दीपिका प्रीत्यै भूयादाद्यादिनाथयोः ॥ १ ॥
यां गूढान्तरभावतस्करभरां स्वान्तेन नाद्यावधिम्।
गन्तुं कोऽपि न कोविदोऽशकदतः श्री पूर्णनाथाज्ञया ॥
तां गत्वा स्खलतिः क्वचिद्यदि ममा सौ वै पथो दर्शिका।
ह्यन्येषां विदुषां सुलोचन समुन्मेषात्प्रमोदं वहेत् ॥ २ ॥

इति श्री गोरक्षनाथकृतौसिद्धसिद्धान्तपद्धतौ—

मिथिलास्थनैपालराज्यान्तर्गत वसतपुर ग्राम वास्तव्य सर्वतन्त्र स्वतन्त्र श्रीपूर्णनाथसंस्कृतकालेज योगाश्रम प्रधानाध्यापक पं० श्री द्रव्येश झा कृत गूढार्थ दीपिकायां षष्ठोपदेशः

भा० टी०—यदि योग्य अधिकारी मिलजाय तो उसके लिये इस उत्तम योग शास्त्र का उपदेश जरूर करे। यही भाव आगे स्वयं श्री योगाचार्य जी दिखलाते हैं। श्री गुरुदेव के चरणकमलों का आश्रय कर तथा अधिकारी शिष्य की परीक्षा कर सदा उपदेश करे। सत्यज्ञानी महात्मा को दुःख और भय हो ही कैसे सकता है। किन्तु योग्य शिष्य के ऊपर कृपा कर इस ग्रन्थ का उपदेश देना चाहिये। क्योंकि योग सम्प्रदाय का प्रचार सबके लिये सम्मत है। अब इस ग्रन्थ के पाठ के माहात्म्य का संक्षेप से वर्णन करते हैं। जो श्रद्धालु जगदम्बा भवानी सहित श्री आदिनाथ महेश्वर को या लोक कल्याणार्थ लीला शरीर धारी योगाचार्य श्री गोरक्षनाथ जी को प्रणामकर तथा सिद्ध सिद्धान्त पद्धति नामक इस ग्रन्थ को लिखकर श्रद्धा भक्ति से पाठ करता है वह आवागमन से छूटकर उत्तम गति को प्राप्त होता है भक्तों के अनुग्रहार्थमूर्त्तिमान् यथा स्मरणमात्र से ही अमन्द आनन्द से पुलकित चित्त जो गण पति नाम का तेज है वह इस ग्रन्थ में वर्णित अर्थ समूह को सार्थक करे ॥११२॥११३॥११४॥११५॥

जयति सोऽयुग्मनयनो भूमानिःश्वसितवेद भूमानो।
शरदभ्रशरीरोलं गोरक्षो विश्वेशितालम् ॥१॥

इतिश्री गोरक्षनाथकृतौसिद्धसिद्धान्तपद्धतौश्रीमत् पूज्यपादबोहराधिपतिश्री १०८ श्रीपूर्णनाथशिष्यवेदान्ताचार्य्यश्रीपं० योगिभीष्मनाथ कृतायां सारदीपिकाख्यहिन्दीटीकायामवधूतयोगिलक्षणनामाषष्ठोपदेशः।

समाप्तश्चायंग्रन्थः

शुद्धि पत्रम्

अशुद्धम्	शुद्धम्	पृष्ठम्	पंक्तिः
आशिः षु	आशीः षु	२	१२
स्वीकीय	स्वकीय	३	७
स्वभाविकी	स्वाभाविकी	४	१६
श्रद्धालू	श्रद्धालु	१५	१०
सृष्टी	सृष्टि	२३	६
से तिल	से पूर्व तिल	२७	२३
धम	धर्म	३८	१५
कम	कर्म	३८	२१
पिपासुना	पिपासूनां	४१	२०
प्राग् भाव	प्रागभाव	४८	११-१२
चक्षृणु	चक्षृणु	४६	२६
अत्र त्म	अत्रात्म	४६	१४
चिद्र् पैव	चिद्र् पैव	,,	१५
सृष्ठौ	सृष्टौ	,,	६
शक्त त्मीयत्व	शक्तेरात्मीयत्व	,,	१८
शिव शक्त्यो	शिवशक्त्यो	,,	११
निः श्वसितम्	निः श्वसितं	१३	६
वखरी	वैखरी	४६	१६
नित्यावधूत	नित्यपिण्डावधूत	२८	६
प्रदर्शयेयूः	प्रदर्शयेयुः	५७	७
यतो साऽपि	यतोऽसावपि		
कार्योद्गमनम्	कार्य्योद्गमनम्	,,	२५
सम्बन्धि	सम्बन्धि	७०	२४
उपन्पस्तम्	उपन्यस्तम्	७१	१८
अलवुद्धिः	अलंबुद्धिः	८५	७
स्फुर्तिः	स्फूर्तिः	८७	११
उद्ध्वमाक्रामति	ऊर्ध्वमाक्रमते	६४	१२

अशुद्धम्	शुद्धम्	पृष्ठम्	पंक्तिः
गुणों	वायुओं	१०५	२५
प्राण पति के	प्राण के	१०६	१८
हंस	हंत्त	१०९	२९
यजमानः	जप संकल्पं	१०८	२५
ज	ल	११०	४
कराठ	कण्ठ	११०	११
वण	वर्ण	११०	१७
पृष्ट	पृष्ठ	११९	९
सून्य	शून्य	१२२	६
निरूपाणानन्तरं	निरूपणानन्तरं	१२३	२६
पाष्णिना	पार्ष्णिना	१२४	११
उड्याण	उड्डीयान	१२५	२०
विरोध	निरोध	१२६	१३
ग्यारहवाँ	बारहवाँ	१२९	७
ग्यारहवाँ	तेरहवाँ	१२९	१४
भूमध्य	भ्रूमध्य	१२९	७
गोल्ललाट	गोल्लाट	१३०	२९
सुसुम्नयः	सुषुम्नयः	१३२	४
प्रथमम् भ्यर्हितत्वात्	प्रथममभ्यर्हितत्वात्	१३२	५
ज्ञान लिये	ज्ञान के लिये	१३९	१५
त्रय इन्द्रो	त्रयमिन्द्रो	१४९	९
वक्ष स्थल	वक्षःस्थल	१५०	११
चतुष्पष्ठि	चतुःषष्टि	१५२	२५-२६
पुण्य	पुण्य	१५७	१९
पदार्थ अवयव	पदार्थ के अवयव	१६४	१६
निर्धामत्वान्	निर्धर्मत्वात्	१६६	२४
ऊर्ध्व सृष्टि	ऊर्ध्व शक्ति	१७६	७
अभद्	अभेद्	१८८	२३
स्थूल	समूल	२०३	४
निरुत्थारेन	निरुत्थानत्वेन	२०६	१९

तर्क शब्द	न तर्क शब्द	२०७	१३
कल्प	संकल्प	२११	२६
स्व प्रकार	स्व प्रकाश	२३६	२०
जिसके	जिसने	२३९	१३

नोट—छठें उपदेश में तृतीय श्लोक की हिन्दी का कुछ अंश चतुर्थ श्लोक में तथा चौथे श्लोक की हिन्दी का कुछ अंश पाँचवें श्लोक में गया है। अतः पाठक उक्त बात में ध्यान दें।

१२४ पृष्ठ में "तत्राग्नि दीपनं भवति" इस खण्ड वाक्य की हिन्दी छूट गई है उसका अर्थ "ऐसा करने से अग्नि दीपन होता है" समझना चाहिये।

SIDDHA - SIDDHĀNTA - PADDHATI
AND
OTHER WORKS OF THE NĀTHA YOGĪS

By
SMT. KALYANI MALLIK, M.A., B.T., Ph.D.,
Author of the History, Philosophical Doctrine and Practice of the Nātha Saṁpradāya &c.

FOREWORD
By
Rao Bahadur P. C. DIVANJI, M.A., LL.M.

POONA ORIENTAL BOOK HOUSE
330A, Sadashiv Peth, POONA.

Price Rs. 10.

First impression 1954

Printed by B. G. Dhawale at the Karnatak Printing Press, Chira Bazar, Bombay 2
and Published by D. K. Gondhalekar, Proprietor, Poona Oriental Book House,
330 A, Sadashiv Peth, Poona 2.

DEDICATED
IN
MEMORY
OF
MY HUSBAND
AND
OUR ONLY SON

FOREWORD

नवमे वज्रकायः स्यात् खेचरो दिक्चरो भवेत् ।
दशमे पवनाद्वेगी यत्रेच्छा तत्र धावति ॥ ४० ॥

सम्यगेकादशे वर्षे सर्वज्ञः सिद्धिभाग्भवेत् ।
द्वादशे शिवतुल्योऽसौ कर्ता हर्ता स्वयं भवेत् ॥ ४१ ॥

त्रैलोक्ये पूज्यते सिद्धः सत्यं श्रीभैरवो यथा ।
एवं द्वादशवर्षेषु सिद्धयोगी महाबलः ॥
जायते सद्गुरोः पादप्रभावान्नात्र संशयः ॥ ४२ ॥

गुरुकुलसन्तानश्चेति पञ्चधा प्रोक्तम्
आई–सन्तानं विलेश्वर–सन्तानं विभूति–सन्तानं नाथ–सन्तानं योगीश्वर–सन्तानश्चेति एषामपि सन्तानानां पृथक् पृथक् वैशिष्ट्यं वर्तते ॥ ४३ ॥

परमार्थतः सव पाञ्चभौतिकं । तज्जार्ताः पुरुषाः । (स्वबोध) सम्बोधमात्रैकरूपः सशिवः । तदितरत्सर्वमज्ञानमव्यक्तं भवति तत्र शिवस्तु ज्ञानं ॥ ४४ ॥

एतेषामपि सन्तानानां केचित्स्वरूपपराङ्मुखाः वेशमात्रसम्पन्नाः क्रयविक्रयादिकं कुर्वन्ति सन्तानभेदं प्रत्यन्योऽन्यमधः कुर्वन्ति योगमार्गं द्वेषयन्ति ॥ ४५ ॥

१७ – यत्रेच्छा तत्र धावति (यो.). १८ – न जाताः (ह.).

रजसा घोरसंकल्पाः कामुकाः अतिमन्यवेः[19] ।
दाम्भिकाः मानिनः पापाः धिक्कुर्वन्त्यीश्वरप्रियान् ।। ४६ ।।

साधुसङ्गम – सच्छास्त्र – परमानन्द – लक्षितान् ।
स्वेच्छाचारविहारैक – ज्ञानविज्ञानसंयुतान् ।। ४७ ।।

यूयं दुष्टा वयं शिष्टा भ्रष्टा यूयं वयं तथा ।
इत्येवं परिवदन्ति संप्रमोहे निरन्तरम् ।। ४८ ।।

पृथ्वी जलं तथा वह्निः वायुराकाशमेव च ।
एते सन्तानोदयास्तु सम्यगेव प्रकीर्तिताः ।। ४९ ।।

काठिन्यश्चार्द्रता तेजो धावनं स्थिरता खलु ।
गुणान्येतानि पञ्चैव सन्तानानां क्रमात् स्मृताः ।। ५० ।।

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः
एताश्च देवताः प्रोक्ताः सन्तानानां क्रमेण तु ।। ५१ ।।

स्थूल – सूक्ष्म – कारणं तूर्यं तूर्यातीतमिति पञ्चावस्थाः क्रमेण लक्ष्यन्ते । एतेषामपि सर्वेषां विज्ञाता यः स योगी स सिद्ध-पुरुषः स योगीश्वरेश्वर इति परमरहस्यं प्रकाशितम् ।। २२ ।।

अतएव सम्यक् निजविश्रान्तिकारकं महायोगिनं सद्गुरुं सेवयित्वा सम्यक् सावधानेन परमं पदं सम्पाद्य तस्मिन् निज-पिण्डे (पिण्डं) समरसभावं कृत्वाऽत्यन्तं निरुत्थानेन सर्वानन्दतत्त्वे निश्चलं स्थातव्यम् । ततः स्वयमेव महासिद्धो भवतीति सत्यम् ।। ५३ ।।

न विधिर्नैव वर्णश्चं[20] न वर्ज्यावर्ज्यकल्पना ।
न भेदो निधनं किञ्चिन्नाशौचं नोदकक्रिया ।। ५४ ।।

योगीश्वरेश्वरस्यैवं नित्यतृप्तस्य योगिनः ।
चित्स्वात्मसुखविश्रान्तिभावलब्धस्य पुण्यतः ।। ५५ ।।

---

१९ – अहिमन्यवः (यो.). २० – निषेधश्च (तं.).

सम्यक् स्वभावविज्ञानात् क्रमाभ्यासान्न चासनात् ।
न वैराग्यान्न नैराश्यान्नाहार – प्राण – धारणात् ॥ ५६ ॥

न मुद्रा–धारणाद्योगान्न मानकर्म–समाश्रयात् ।
न विरक्तौ वृथायासान्न कायक्लेशधारणात् ॥ ५७

न जपान्न तपोध्यानान्न यज्ञात्तीर्थसेवनात् ।
न देवार्चनाश्रयाद्भक्त्या नाश्रमाणाश्च पालनात् ॥ ५८ ॥

न षड्दर्शनकेशादिधारणान्न च मुण्डनात् ।
नानन्तोपाययत्नेभ्यः प्राप्यते परम पदम् ॥ ५९ ॥

एतानि साधनानि सर्वाणि दैहिकानि परित्यज्य परमपदेऽदैहिके स्थीयते सिद्धपुरुषैरिति ॥ ६० ॥

तत्कथं । गुरुदृक्पातनात् प्रायो दृढानां सत्यवादिनां सा स्थितिर्जायते ॥ ६१ ॥

कथनाच्छक्तिपाताद्वा पादावलोकनात् ।
प्रसादात् स्वगुरोः सम्यक् प्राप्यते परमं पदम् ॥ ६२ ॥

अतएव शिवेनोक्तम्—

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम् ।
शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः ॥६३॥

वाङ्मात्राद्वाथदृक्पातात् यः करोति च तत्क्षणात् ।
प्रस्फुटं शाम्भवं वेद्यं स्वसंवेद्यं परं पदम् ॥ ६४ ॥

करुणाखड्गपातेन छित्वा पाशाष्टकं शि(प)शोः ।
सम्यगानन्दजनकः सद्गुरुः सोऽभिधीयते ॥ ६५ ॥

निमिषार्धार्धपाताद्वा यद्वा पादावलोकनात् ।
स्वात्मानं स्थिरमाधत्ते तस्मै श्रीगुरवे नमः ॥ ६६ ॥

नाना-विकल्प-विश्रान्तिं कथया कुरुते तु यः ।
सद्गुरुः स तु विज्ञेयो न तु मिथ्या-विडम्बकः ॥ ६७ ॥

अतएव परमपदप्राप्त्यर्थं स सद्गुरुः सदा वन्दनीयः
गुरुरिति गृणाति शं[२१] सम्यक् चैतन्यविश्रान्तिमुपदिशति ॥
विश्रान्त्या स्वयमेव परात्परं परमपदमेव प्रस्फुटं भवति
तत्क्षणात्साक्षात्कारो भवति ॥ ६८ ॥

अतएव महासिद्धानां मते प्रोक्तं । वाग्मात्रेण वा दृक्पात-
मात्रेण वा सम्यगवलोकनेन वा तत्क्षणान्मुहुर्विश्रान्तिमत्तां
नयतीति (विश्रान्तियुक्तं करोतीति, ह)
यः स सद्गुरुर्भवति । नो चेन्निजविश्रान्तिं
विना पिण्डपदयोः समरसकरणं न भवतीति सिद्धान्तः ।
तस्मान्निजविश्रान्तिकारकः सद्गुरुरभिधीयते नान्यः ॥
पुनर्वागादि-शास्त्रदृष्ट्यानुमानतस्तर्क-मुद्रया श्रमिको[२२]
गुरुस्त्याज्यः ॥ ६९ ॥

उक्तश्च :—

ज्ञानहीनो गुरुस्त्याज्यः मिथ्यावादी विडम्बकः ।
स्वविश्रान्तिं न जानाति परेषां स करोति किम् ॥ ७० ॥

शिलया किं परं पारं शिलासंघः प्रतार्यते ।
स्वयं तीर्णो भवेद्योऽसौ परान्निस्तारयत्यलम् ॥ ७१ ॥

विकल्पसागराद्घोराच्चिन्ताकल्लोलदुस्तरात् ।
प्रपञ्च-वासना-दुष्ट-(ग्रह) ग्राहजालसमाकुलात् ॥ ७२ ॥

वासना-लहरी-वेगाद्यः स्वं तारियतुं क्षमः[२३] ।
स्वस्थेनैवोपदेशेन निरुत्थानेन तत्क्षणात् ॥ ७३ ॥

२१–गुणातिशय (यो.), गुणातीतः (त.). २२–श्रामको (ह.). २३–नास्वस्थतरितुं क्षयः (त.).

तारयत्येव दृक्पातात् कथनाद्वा विलोकनात् ।
तारिते स्वपदं धत्ते स्वस्वमध्ये स्थिरो भवेत् ॥ ७४ ॥

ततः स मुच्यते शिष्यो जन्मसंसारबन्धनात् ।
परानन्दमयो भूत्वा निष्कलः शिवतां व्रजेत् ॥ ७५ ॥

कुलानां कोटिकोटीनां तारयत्येव तत्क्षणात् ।
अतस्तं सद्गुरुं साक्षात् त्रिकालमभिवन्दयेत् ॥ ७६ ॥

सर्वाङ्गप्रणिपातेन स्तुवन्नित्यं गुरुं भजेत् ।
भर्जनात्[२४]स्थैर्यमाप्नोति स्वस्वरूपमयो भवेत् ॥ ७७ ॥

किमत्र बहुनोक्तेन शास्त्रकोटिशतेन च ।
दुर्लभा चित्तविश्रान्तिर्विना गुरुकृपां पराम् ॥ ७८ ॥

चित्तविश्रान्तिलब्धानां योगिनां दृढचेतसाम् ।
स्वस्वमध्ये निमग्नानां निरुत्थानं विशेषतः ॥ ७९ ॥

निमिषात्प्रस्फुटं भाति दुर्लभं परमं पदम् ।
यस्मिन् पिण्डो भवेल्लीनः सहसा नात्र संशयः ॥ ८० ।

संवित्क्रिया-विकरणोदय-चिद्विलोलै[२५]-
विश्रान्तिमेव भजतां स्वयमेव भाति ।
ग्रस्ते स्ववेगनिचये पदपिण्डमैक्यं,
सत्यं भवेत्समरसं गुरुवत्सलानाम् ॥ ८१ ॥

॥ इति श्रीगोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ
पिण्डपदयोः समरसकरणं नाम पञ्चमोपदेशः ॥ ५ ॥

२४–सजनः (ह.). २५–सम्यक् स्वभावकिरणोदयचिद्विलास (तं.).

षष्ठोपदेशः

अथ अवधूतयोगिलक्षणं कथ्यते :—

अवधूतयोगी नाम क इत्यपेक्षायामाह ।

यः सर्वान् प्रकृतिविकारान् अवधूनोतीत्यवधूतः । योगोऽस्यास्तीति योगी । धूञ् कम्पने इति धातुः कम्पनार्थे वर्तते । कम्पनं चालनं देह –दैहिक– प्रपंचादिषु विषयेषु संगतं मनः परिगृह्य तेभ्यः प्रत्याहृत्य स्वधाममहिम्नि परिलीन– चेताः प्रपञ्चशून्य आदिमध्यान्तनिधनभेदवर्जितः ॥ १ ॥

यकारो वायुबीजं स्याद्रकारो वह्निबीजकम् ।
तयोरभेदओंकारश्चिदाकारः प्रकीर्तितः ॥ २ ॥

तदेतद् व्यक्तमुच्यते :—

क्लेशपाशतरङ्गाणां कृन्तनेन विमुण्डनम् ।
सर्वावस्थाविनिर्मुक्तः सोऽवधूतोऽभिधीयते ॥ ३ ॥

निजेस्मरविभूतिर्यो योगी स्वाङ्गे विभूषितः ।
आधारे यस्य वारुढिः (ढः) सोऽवधूतोऽभिधीयते ॥ ४ ॥

लोकमध्ये स्थिरासीनः समस्त – कलनोज्झितः ।
कौपिनं खर्परोऽदैन्यं सोऽवधूतोऽभिधीयते ॥ ५ ॥

शं सुखं खं परं ब्रह्म शंखं सघंट्टनाद् भवत् ।
सिद्धान्तं धारितं येन सोऽवधूतोऽभिधीयते ॥ ६ ॥

पादुका पदसंवित्ति र्मृगेत्वच् महाहतम् ।
वेला यस्य परा संवित्सोऽवधूतोऽभिधीयते ॥ ७ ॥

मेखला निवृत्तिर्नित्यं स्वस्वरूपं कटासनम्
निवृत्तिः षड्विकारेभ्यः सोऽवधूतोऽभिधीयते ॥ ८ ॥

१–उकारं (तं.). २–निजस्फार (तं.). ३–त्वक् स्यादनाहता (ह.). ४–शेली (ह.), चेलं (तं.). ५–निरतिः (तं.).

चित्प्रकाश–परानन्दौ यस्य वै कुण्डलद्वयम् ।
जपमालाक्षविश्रान्तिः सोऽवधूतोऽभिधीयते ॥ ९ ॥

यस्य धैर्यमयो दण्डः पराकाशं च खर्परम् ।
योगपट्टं निजा शक्तिः सोऽवधूतोऽभिधीयते ॥ १० ॥

भेदाभेदौ स्वयं भिक्षां षट्रसास्वादने रतः
जारणा(त) तन्मयीभावः सोऽवधूतोऽभिधीयते ॥ ११ ॥

अचिन्त्ये निज–दिग्देशे स्वान्तरं यस्तु गच्छति ।
एकदेशान्तरीयो यः सोऽवधूतोऽभिधीयते ॥ १२ ॥

स्वपिण्डममरं कर्तुमनन्ताममरीं च यः ।
स्वयमेव पिवेदेतां सोऽवधूतोऽभिधीयते ॥ १३ ॥

अचिन्त्यं वज्रवद्गाढा वासनामलसंकुला ।
सा वज्री भक्षिता येन सोऽवधूतोऽभिधीयते ॥ १४ ॥

आवर्त्तयति यः सम्यक् स्वस्वमध्ये स्वयं सदा ।
समत्वेन जगद्वेत्ति सोऽवधूतोऽभिधीयते ॥ १५ ॥

स्वात्मानमवगच्छेद्यः स्वात्मन्येवावतिष्ठते ।
अनुत्थानमयः सम्यक् सोऽवधूतोऽभिधीयते ॥ १६ ॥

अनुत्वा(त्था)धारसम्पन्नः परविश्रान्तिपारगः ।
धृतिचिन्मयतत्त्वज्ञः सोऽवधूतोऽभिधीयते ॥ १७ ॥

अव्यक्तं व्यक्तमाधत्ते व्यक्तं सर्वं ग्रसत्यलम् ।
स्व(स)त्यं स्वान्तरे सन् यः सोऽवधूतोऽभिधीयते ॥ १८

अवभासात्मको भासः स्वप्रकाशे सुसंस्थितः ।
लीलया रमते लोके सोऽवधूतोऽभिधीयते ॥ १९ ॥

क्वचिद्भोगी क्वचित्त्यागी क्वचिन्नग्नः पिशाचवत् ।
क्वचिद्राजा क्वचाचारी सोऽवधूतोऽभिधीयते ॥ २० ॥

६–निर्भ्रांति (यो.) कृत्वा स्वास्वादने (ह.). ७–अविद्या (तं.).

एवं-विध नानासंकेतसूचकनित्यप्रकाशे (वस्तुनि) सुनिज-स्वरूपी सर्वेषां सिद्धान्तदर्शनानां स्वस्वरूपदर्शने सम्यक् सद्धेर्धकोऽवधूतयोगी-त्यभिधीयते स सद्गुरुर्भवति । यतः सर्वदर्शनानां स्वस्वरूपदर्शने समन्वयं करोति सोऽवधूतुयोगी स्यात् ॥

अत्याश्रमी च योगी च ज्ञानी सिद्धश्च सुव्रतः ।
ईश्वरश्च तथा स्वामी धन्यः श्रीसाधुरेव च ॥ २१ ॥

जितेन्द्रियश्च भगवान् स सुधीः कोविदो बुधः ।
चार्वाकश्चार्हतश्चेति तथा बौद्धः प्रकाशवित् ॥ २२ ॥

तार्किकश्चेति सांख्यश्च तथा मीमांसको विदुः ।
देवतेत्यादिविद्वद्भिः कीर्तितः शास्त्रकोटिभिः ॥ २३ ॥

आत्मेति परमात्मेति जीवात्मेति पुनः स्वयम् ।
अस्तितत्त्वं परं साक्षाच्छिव–रुद्रादि–संज्ञितम् ॥ २४ ॥

शरीरपद्मकुहरे यत्सर्वेषामवस्थितम् ॥
तदवश्यं महायासाद्वेदितव्यं[11] मुमुक्षुभिः ॥ २५ ॥

ब्रह्मा विष्णुश्च रुद्रश्च सोऽक्षरः परमः स्वराट् ।
स एव इन्द्रः स प्राणः स कालाग्निः सचेन्द्रकः[12] ॥ २६ ॥

स एव सूर्यः स शिवः स एव परमः शिवः ।
स एव योगगम्यस्तु सांख्यशास्त्रपरायणैः ॥ २७ ॥

स एव कर्म इत्युक्तः सर्वकर्ममीमांसकैरपि ।
सर्वत्र सत्परानन्द इत्युक्तो वैदिकैरपि ॥ २८ ॥

व्यवहारैरयं भेदः तस्मादेकस्य नान्यथा ।
मुद्–मोदे तु रानन्दो (रादाने) जीवात्मपरमात्मनोः ॥ २९ ॥
उभयोरैक्यं संवित्ति मुद्रेति परिकीर्तिताः ॥ ३० ॥

८–सद्बोधकोऽवधूत (ह.). ९–संन्यासी (तं.) १०–शाब्दि कश्चेति (तं.).
११–महापाशात्छेदितव्यं (ह.).१२. शास्ता स विनायकः स कालाग्निः स चन्द्रार्कौ(तं.).

मोदन्ते देवसंघाश्च द्रावन्तेऽसुरराशयः ।
मुद्रेति कथिता साक्षात्सदा भद्रार्थदायिनी ।। ३१ ।।

अस्मिन् मार्गेऽदीक्षिता ये सदा संसाररागिणः ।
ते हि पाषण्डिनः प्रोक्ताः संसारपरिपेलवाः ।। ३२ ।।

अवधूत–तनुर्योगी निराकारपदे स्थितः ।
सर्वेषां दर्शनानां च स्वस्वरूपं प्रकाशते ।। ३३ ।।

तत्र ब्राह्मणेषु ब्रह्मचर्याश्रममाह :—

सर्वतो भरिताकारं निजबोधेन बृंहितम् ।
चरते ब्रह्मविद्यस्तु ब्रह्मचारी स कथ्यते ।। ३४ ।।

गृहिणी पूर्णता नित्या गेहं व्योम सदाचलम्[१३] ।
यस्तयोर्निवसत्यत्र गृहस्थः सोऽभिधीयते ।। ३५ ।।

सदान्तःप्रस्थितो योऽसौ स्वप्रकाशमये वने ।
वानप्रस्थः स विज्ञेयो न वने मृगवच्चरन् ।। ३६ ।।

परमात्माथ जीवात्मा आत्मन्येव स्फुरत्यलम् ।
तस्मिन् न्यस्तः सदा येन संन्यासी सोऽभिधीयते ।। ३७

मायाकर्मकलाजालमनिशं येन दण्डितम् ।
अचलो नगवद्भाति त्रिदण्डी सोऽभिधीयते ।। ३८ ।।

एकं नानाविधाकारमस्थिरं चञ्चलं सदा ।
तच्चित्तं दण्डितं येन एकदण्डी स कथ्यते ।। ३९ ।।

शुद्धं शान्तं निराकारं परानन्दं सदोदितम् ।
तं शिवं यो विजानाति शुद्धबुद्धशैवो भवेत्तु सः ।।४०।।

सन्तापयति दीप्तानि स्वेन्द्रियाणि च यः सदा ।
तापसः स तु विज्ञेयो न च गोभस्मधारकः ।। ४१ ।।

१३–सदावलं (ह.).

क्रियाजालं पशुं हत्वा पतित्वं पूर्णतां गतम् ।
यस्तिष्ठेत्पशुभावेन स वै पाशुपतो भवेत् ॥ ४२ ॥

परानन्दमयं लिङ्गं निजपीठे सदाऽचले ।
तल्लिङ्गं पूजितं येन स वै कालमुखो भवेत् ॥ ४३ ॥

विलयं सर्वतत्त्वानां कृत्वा संधार्यते स्थिरम् ।
सर्वदा येन वीरेण लिङ्गधारी भवेत्तु सः ॥ ४४ ॥

अन्तकादीनि तत्त्वानि त्यक्त्वा नग्नो दिगम्बरः ।
यो निर्वाणपदे लीनः स निर्वाणपरो भवेत् ॥ ४५ ॥

स्वस्वरूपात्मकं ज्ञानं समन्त्रं (समन्तात्) तत्प्रतिपालितम्
अनन्यत्वं सदा येन स वै कापालिको भवेत् ॥ ४६ ॥

महाव्याप्तिपरं तत्त्वमाधाराधेयवर्जितम् ।
तद्व्रतं धारितं येन स भवेद्वै महाव्रतः ॥ ४७ ॥

कुलं सर्वात्मकं पिण्डमकुलं सर्वतोमुखम् ।
तयोरैक्यपदं शक्तिर्यस्तां वेद स शक्तिभाक् ॥ ४८ ॥

कौलं सर्वकलाग्रासः स कृतः सततं यया ।
तां शक्तिं विजानाति शक्तिज्ञानी स कथ्यते ॥ ४९ ॥

ज्ञात्वा कुलाकुलं तत्त्वं स क्रमेण क्रमेण तु ।
स्वप्रकाशमहाशक्त्या ततः शक्तिपदं लभेत् ॥ ५० ॥

मदो मद्यं मतिर्मुद्रा माया मीनं मनः पलम् ।
मूर्च्छनं मैथुनं यस्य तेनाऽसौ शाक्त उच्यते ॥ ५१ ॥

यया भासस्फुरद्रूपं कृतं चैव स्फुटं वलात् ।
तां शक्तिं यो विजानाति शाक्तः सोऽत्राभिधीयते ॥ ५२ ॥

यः करोति निरुत्थानं कर्तृचित्प्रसरेत्सदा ।
तद्विश्रान्तिस्तया शक्त्या शाक्तः सोऽत्राभिधीयते ॥ ५३ ॥

व्यापकत्वे परं सारं यद्विष्णोराद्यमव्ययम् ।
विश्रान्तिदायकं देहे तज्ज्ञात्वा वैष्णवो भवेत् ॥ ५४ ॥

भास्वत्स्वरूपो यो भेदाद् भेदाभेदभवोज्झितः ।
भाति देहे सदा यस्य स वै भागवतो भवेत् ॥ ५५ ॥

यो वेत्ति वैष्णवं भेदं सर्वासर्वमयं निजम् ।
प्रबुद्धं सर्वदेहस्थं भेदवादी भवेत्तु सः ॥ ५६ ॥

पञ्चानामक्षया हानिः (पञ्चानामक्षपातानां) पञ्चत्वं रात्रिरुच्यत ।
तां रात्रिं यो विजानाति स भवेत्पांचरात्रिकः ॥ ५७ ॥

येन जीवन्ति जीवा वै मुक्तिं यान्ति च तत्क्षणात् ।
स जीवो विदितो येन सदाजीवी स कथ्यते ॥ ५८ ॥

यः करोति सदा प्रीतिं प्रसन्ने पुरुषे परे
शासितानीन्द्रियाण्येव सात्त्विकः सोऽभिधीयते ॥ ५९ ॥

सर्वाकारं निराकारं निर्निमित्तं निरञ्जनम् ।
सूक्ष्मं हंसश्च यो वेत्ति स भवेत्सूक्ष्मसात्त्विकः ॥ ६० ॥

सत्यमेकमजं नित्यमनन्तश्चाक्षयं ध्रुवम् ।
ज्ञात्वा यस्तु वदेद्धीरः सत्यवादी स कथ्यते ॥ ६१ ॥

ज्ञानज्ञेयमयाभ्यां तु योगिनः स्वस्वभावतः ।
कलङ्की स तु विज्ञेयो व्यापकः पुरुषोत्तमः ॥ ६२ ॥

मुक्तिचारे मतिर्या वै व्यापिका स्वप्रकाशिका ।
एषा ज्ञानवती यस्य ज्ञाताऽसौ सात्विको भवेत् ॥ ६३ ॥

क्षपणं चित्तवृत्तीनां रागद्वेषविलुण्ठनम् ।
कुरुते व्योमवन्नग्नो योऽसौ क्षपणको भवेत् ॥ ६४ ॥

प्रसरं भासते शक्तिः संकोचं भासते शिवः ।
तयोर्योगस्य कर्ता यः स भवेत् सिद्धयोगिराट् ॥ ६५ ॥

विश्वातीतं यथा विश्वमेकमेव विराजते ।
संयोगेन सदा यस्तु सिद्धयोगी भवेत्तु सः ॥ ६६ ॥

सर्वासां निजवृत्तीनां प्रसृति र्भजते लयम् (तु यः) ।
स भवेत् सिद्धसिद्धान्ते सिद्धयोगी महाबलः ॥ ६७ ॥

उदासीनः सदा शान्तः स्वस्थोऽन्तर्निजभासकः ।
महानन्दमयो धीरः स भवेत् सिद्धयोगिराट् ॥ ६८ ॥

परिपूर्णः प्रसन्नात्मा सर्वासर्वपदोदितः ।
विशुद्धो निर्भरानन्दः स भवेत् सिद्धयोगिराट् ॥ ६९ ॥

परिपूर्णः प्रसन्नात्मा सर्वानन्दकरः सुधीः ।
सर्वानुग्रहधीः सम्यक् स भवेत् सिद्धयोगिराट् ॥ ७० ॥

गते न शोकं विभवे न वांछां प्राप्ते च हर्षं न करोति योगी ।
आनन्दपूर्णो निजबोधलीनो न बाध्यते कालपथेन
नित्यम् ॥ ७१ ॥

एवं सर्वसिद्धान्तदर्शनानां पृथक् पृथक् भूतानामपि ब्रह्मणि समन्वयसूचनशीलोपदेशकर्ताऽवधूत एव सद्गुरुः प्रशस्यते । एषामुपदेशानां पृथक् पृथक् सूचितानां जायते यत्र विश्रान्तिः सा विश्रान्तिरभिधीयते ॥ ७२ ॥

लीनतां च स्वयं याति निरुत्थानचमत्कृतेः ।
[14]यतो निरुत्थानमयात् (मयः) सोऽयं स्यादवधूतराट् ॥ ७३ ॥

तस्मात्तं सद्गुरुं साक्षाद्वन्दयेत् पूजयेत्सदा ।
सम्यक् सिद्धपदं धत्त तत्क्षणात्स्वात्मभासितम् ॥ ७४ ॥

न वन्दनीयास्ते का[15]ष्ठाः दर्शनभ्रान्तिकारकाः ।
वर्जयेत् तान् गुरून् दूरे धीरः सिद्धमताश्रयः ॥ ७५ ॥

१४–अतो (तं.). १५–कष्टाः (तं.).

परपक्षं निरासं करोति :—

वेदान्ती बहुतर्ककर्कशमतिर्ग्रस्तः परं मायया ।
भाट्टाः कर्मफलाकुला हतधियो द्वैतेन वैशेषिकाः ॥
अन्ये भेदरताः विवादविकला स्ते तत्त्वतोवञ्चिताः
(सत्तत्त्वतोवञ्चिताः) ।
तस्मात्सिद्धमतं स्वभावसमयं[16] धीरः सदा संश्रयेत्[17] ॥ ७६ ॥

सांख्या वैष्णवा वैदिका विधिपराः संन्यासिनस्तापसाः ।
सौरा वीरपराः प्रपञ्चनिरता बौद्धा जिनाः श्रावकाः ॥
एते कष्टरता वृथापथगतास्ते सत्तत्त्वतो वञ्चिताः ।
तस्मात्सिद्धमतं स्वभावसमयं धीरः सदा संश्रयेत् ॥ ७७ ॥

आचार्या बहुदीक्षिता हुतिरता नग्नव्रतास्तापसाः ।
नानातीर्थनिषेवका जपपरा मौनस्थिता नित्यशः ॥
एते ते खलु दुःखभारानिरतास्ते सत्तत्त्वतो वञ्चिताः ।
तस्मात्सिद्धमतं स्वभावसमयं धीरः सदा संश्रयेत् ॥ ७८ ॥

आदौ रेचक-पूरक-कुम्भक-विधौ नाडीपथा शोधितम् ।
कृत्वा हृत्कमलोदरे तु सहसा चित्तं महामूर्च्छितम् ॥
पश्चादव्ययमक्षरं परकुले चोंकारदीपाङ्कुरे ।
ये पश्यन्ति समाहितेन मनसा तेषां न नित्यं पदम् ।
तस्मात्सिद्धमतं स्वभावसमयं धीरः सदा संश्रयेत् ॥ ७९ ॥

चार्वाकाश्चतुराश्च तर्कनिपुणा देहात्मवादे रताः ।
ते सर्वे तरन्ति दुःसहतरं ये ते परं सात्विकाः ॥
ते सर्वे प्रभवन्ति ये च यवनाः पापे रता निर्दयाः ।
तेषामैहिकमल्पमेव फलदं तत्त्वं न मोक्षपदम्[19] ॥ ८० ॥

१६–कमयं (तं.). १७–शैवाः पाशुपता महाव्रतधरा कालामुखा जंगमाः ।शाक्ताः कौल कुला कुलार्चनरता – कापालिकाः शाम्भवाः । एते कृत्रिममंत्रतंत्रनिरतास्ते तत्त्वतो वञ्चिताः तस्मात सिद्धमतं (तं.). १८–रजसा (तं.). १९–मोक्षफलम् (तं.).

श्रीहट्टे[२०] मस्तकान्ते त्रिपुटपुटबिले ब्रह्मरन्ध्रे ललाटे।
भ्रूनेत्रे नासिकाग्रे श्रवणपथरवे घण्टिका राजदन्ते ॥
कण्ठे हृन्नाभिमध्ये त्रिकमलकुहरे चोड्डियाणे च मूले[२१]।
एवं ये स्थानलग्नाः परमपदमहो नास्ति तेषां निरुत्थम् ॥ ८१ ॥

कोल्लाटे दीप्तिपुंजे प्रलयशिखिनिभे सिद्धजालन्धरे वा।
शृङ्गाटे ज्योतिरेकं तडिदिव तरलं ब्रह्मनाड्यन्तराले ॥
भालान्ते विद्युदाभं तदुपरि शिखरे कोटिमार्तण्डचण्डे।
ये नित्यं भावयन्ते परमपदमहो नास्ति तेषां निरुत्थम् ॥ ८२ ॥

लिङ्गाद्दण्डांकुरान्तर्मनःपवनगमात् ब्रह्मनाड्यादिभेदम्।
कृत्वा बिन्दुं नयन्तः परमपदगुहां शंखगर्भोदरोर्ध्वम् ॥
तत्रान्तर्नादघोषं गगनगुणमयं वज्रदण्डीचोलीक्रमेण।
ये कुर्वन्तीह कष्टात् परमपदमहो नास्ति तेषां निरुत्थम् ॥ ८३ ॥

सम्यक् चालनदोहनेन सततं दीर्घां कृतां लम्बिकाम्।
तां ताल्वभ्यंतरवेशितां च दशमद्वारेऽपि[२२] चोल्लंघिनीम् ॥
नीत्वा[२३] मध्यम-सन्धि-संघट-घटात्प्राप्तां शिरोदेशतः
पीत्वा षड्विधपानकाष्टितजनां मूर्च्छां[२४] चिरं मोहिताः ॥ ८४ ॥

गुह्यात्पश्चिमपूर्वमार्गमुभयं रुध्वानिलं मध्यमम्।
नीत्वा ध्यानसमाधिलक्षकरणैर्नानासनाभ्यासनैः ॥
प्राणापानसमा[२५]गमेन सततं हंसोदरे संघटा[२६]।
एवं येऽपि भजन्ति ते भवजले मज्जन्त्यहो दुःखितः ॥ ८५ ॥

शक्त्याकुञ्चनमग्निदीप्तिकरणं त्वाधारसंपीडनात्
स्थानात्कुण्डलिनीप्रबोधनमनः (तः) कृत्वा ततो मूर्धनि ॥

२०–शृंगाटे (तं.). २१–पीटे (ह.). २२–द्वारोदरे सन्धिनीम् (ह.). द्वारोदरे शंखिनी (तं.). २३–प्राप्तां (तं.). २४–भजनं वाञ्छन्ति ये मोहिताः (ह.). २५–गमागमेन (ह.). २६–सद्धटात् (तं.).

नीत्वा पूर्णगिरिं निपातनमधः कुर्वन्ति तस्याश्च ये ।
खण्डज्ञानरतास्तु ते निजपदं तेषां हि दूरं पदम् ॥ ८६ ॥

बन्धं भेदं च मुद्रां गल-बिल-चिबुका-बद्धमार्गेषु वन्हिम् ।
चन्द्रार्कौ सामरस्यं शमदम नियमानादबिन्दुं कलान्ते ॥
ये नित्यं मेलयन्ते ह्यनुभवमनसाप्युन्मनीयोगयुक्ताः ।
ते लोकान् भ्रामयन्ती निजमुखविमुखाः कर्मदुःखाघ्वभाजः ॥ ८७ ॥

अष्टाङ्गं योगमार्गं कुलपुरुषमतं षण्मुखीचक्रभेदम् ।
ऊर्ध्वाधो वायुमध्ये रविकिरणनिभं सर्वतो व्याप्तिसारम् ॥
दृष्ट्वा ये वीक्षयन्ते तरलजलसमं नीलवर्णं नभो वा ।
एवं ये भावयन्ते निगदितमतयस्तेऽपि हा कष्टभाजः ॥ ८८ ॥

आदौ धारण शंख धारणमतः कृत्वा महाधारणम् ।
सम्पूर्णं प्रतिधारणं विधिबलात् दृष्टिं तथा निर्मलां ॥
अर्धोली बहुलीह दृष्टिंासनमथो घण्टी वसन्तोलिका ।
ये कुर्वन्ति च कारयन्ति च सदा भ्राम्यन्ति खिद्यन्ति ते ॥ ८९ ॥

शंखक्षालनमन्तरं रसनया ताल्वोष्ठनासारसम् ।
वान्तेरुर्लुटनं कवाटममरीपानं तथा खर्परी ॥
वीर्यद्रावितमात्मजं पुनरहो ग्रासं प्रलेपंश्च वा ।
ये कुर्वंति जडास्तु ते नहि फलं तेषां तु सिद्धान्तजम् ॥ ९० ॥

घण्टाकादल–कालमर्दल–महा–भेरीनिनादं यदा ।
सम्यङ् नादमनाहतध्वनिमयं शृण्वन्ति चैतादृशम् ॥
पिण्डे सर्वगतं निरन्तरतया ब्रह्माण्डमध्येऽपि वा ।
तेषां सिद्धपदं ततः समुचितं तत्वं परं लभ्यते ॥ ९१ ॥

वैराग्यात्तृणशाकपल्लवजलं कन्दं फलं मूलकम् ।
भुक्त्वा ये वनवासमेव भजन्ते चान्ये च देशान्तरम् ॥

२७—मधो (तं.), वासनमथो (ह.). २८—रुलुठनम् (तं.). २९—कपाट (ह.). ३०—ग्रासप्रदं पञ्चधा (तं.).

बालोन्मत्तपिशाचमूकजडवत् चेष्टाश्च नानाविधा ।
ये कुर्वन्ति पदं विना मतिबलाद्भ्रष्टा विमुह्यन्ति ते ॥ ९२ ॥

कथां दर्शनमद्भुतं बहुविधं भिक्षाटनं नाटकम् ।
भस्मोद्धलनमङ्गं कर्कशतरं कृत्वाथ वर्षं चरेत्[३१] ॥
क्षेत्रं क्षेत्रमटन्ति दुर्गमतरं छित्वाथ सर्वेन्द्रियम् ।
नो विन्दन्ति परं पदं गुरुमुखाद्गर्वेण कष्टाश्च ते ॥ ९३ ॥

वाणीं ये च चतुर्विधां स्वरचितां सिद्धैश्च वा निर्मितां ।
गायत्रीचतुराश्च पाठनिरता विद्याविवादे रताः ॥
नो विन्दन्ति तदर्थमात्मसदृशं खिद्यन्ति मोहाद्धलात् ।
दण्डैः कर्तरिशूलचक्रलगुडैर्भण्डाश्च दुष्टाश्चये ॥ ९१ ॥

एवं शून्यादिशून्यं[३२] परमपरपदं पञ्चशून्यादिशून्यम् ।
व्योमातीतं ह्यनाद्यं निजकुलमकुलं चाद्भुतं विश्वरूपम् ॥
अव्यक्तं चान्तरालं निरुद्यमपरं भासनिर्नाममैक्यम् ।
वाङ्मात्राद्भासयन्तो बहुविधमनसो व्याकुला भ्रामितास्ते ॥ ९४ ॥

आज्ञासिद्धिकरं सदा समुचितं सम्पूर्णमाभासकम् ।
पिण्डे सर्वगतं[३३] विधानममलं सिद्धान्तसारं वरम् ॥
भ्रान्तेर्निर्हरणं सुखातिसुखदं कालान्तकं शाश्वतम् ।
तन्नित्यं कलनोद्धृतं[३४] गुरुमयं ज्ञेयं निरुत्थं पदम् ॥ ९५ ॥

आत्मेति परमात्मेति जीवात्मेति विचारणे ।
त्रयाणामैक्यसंभूतिः आदेश इति कीर्तितः ॥ ९६ ॥

आदेश इति सद्वाणीं सर्वद्वन्द्वक्षयापहाम् ।
यो योगिनं प्रतिवदेत् स यात्यात्मानमैश्वरम् ॥ ९७ ॥

आशादहनं भसितं कुण्डलयुगलं विचारसन्तोषः ।
कौपीनं स्थिरचित्तं खर्परमाकाशमात्मनो भजनम् ॥ ९८ ॥

---

३१ – त्वरेत् (ह.). ३२ – शून्यातिशून्यं (तं.). ३३ – मृत्युहरं (तं.). ३४ - कलज्झितं (ह.).

एतच्छास्त्रं महादिव्यं रहस्यं पारमेश्वरम् ।
सिद्धान्तं सर्वसारस्वं नानासंकेतनिर्णयम् ॥ ९९ ॥

सिद्धानां प्रकटं सिद्धं सद्यःप्रत्ययकारकम्[३५] ।
आत्मानंदकरं नित्यं सर्वसंदेहनाशनम् ॥ १०० ॥

न देयं परशिष्येभ्यः नान्येषां सन्निधौ पठेत् ।
न स्नेहान्न बलाल्लोभान्न मोहान्नानृन्ताच्छलात् ॥ १०१ ॥

न मैत्रीभावनाद्दानान्न सौन्दर्यान्न चासनात् ।
पुत्रस्यापि न दातव्यं गुरुशिष्यक्रमं विना ॥ १०२ ॥

सत्यवन्तो दयाचित्ताः दृढभक्ताः सदाचलाः
निस्तरङ्गाः महाशान्ताः सदाज्ञानप्रबोधकाः ॥ १०३ ॥

भयदैन्यघृणालज्जातृष्णाशाशोकवर्जिताः ।
आलस्यमदमात्सर्यदम्भमायाछलोज्झिताः ॥ १०४ ॥

अहङ्कारमहामोहरागद्वेषपराङ्मुखाः
क्रोधेच्छाकामुकासूयाभ्रान्तितालोभवर्जिताः ॥ १०५ ॥

निस्पृहा निर्मला धीराः सदाद्वैतपदे रताः ।
तेभ्यो देयं प्रयत्नेन धूर्तानां गोपयेत् सदा ॥ १०६ ॥

निन्दका ये दुराचाराश्चुम्बकाः गुरुतल्पगाः ।
नास्तिका ये शठाः क्रूरा विद्यावादरतास्तथा ॥ १०७ ॥

योगाचारपरिभ्रष्टाः निद्राकलहयोः प्रियाः ।
स्वस्वकार्ये परानिष्ठाः गुरुकार्येषु निस्पृहाः ॥ १०८ ॥

एतान् विवर्जयेद् दूरे शिष्यत्वेन गतानपि ॥ १०९ ॥

सच्छास्त्रं सिद्धमार्गश्च सिद्धसिद्धान्तपद्धतिम् ।
न देयं सर्वदा तेभ्यो यदीच्छेच्चिरजीवनम् ॥ ११० ॥

---

३५ – कारणम् (तं.).

गोपनीयं प्रयत्नेन तस्करेभ्योधनं यथा ।
तेषां यो बोधयेत् मोहादपरीक्षितं[३६]मन्दधीः ॥ १११ ॥
न हि मुक्तिर्भवेत्तस्य सदा दुःखेन सीदतः ।
खेचरी भूचरी योगी शाकिनी च निशाचरी ॥ ११२ ॥
एतेषामद्भुतं शापः सिद्धानां भैरवस्य च ।
मस्तके तस्य पतति तस्माद्यत्नेन रक्षयेत् ॥ ११३ ॥
गुरुपादाम्बुजस्थाय [३७]परीक्ष्य प्रवदेत्सदा ।
कुतो दुःखं च भीतिश्च तत्त्वज्ञस्य महात्मनः ॥ ११४ ॥
कृपयैव प्रदातव्यं सम्प्रदायप्रवृत्तये ।
सम्प्रदायप्रवृत्तिर्हि सर्वेषां सम्मता यतः ॥ ११५ ॥
मायाशंकरनाथाय नत्वा सिद्धान्तपद्धतिम् ।
लिखित्वा यः पठेद्भक्त्या स याति परमां गतिम् ॥ ११६ ॥
त्रिद्धात्वत्यर्थनिच(ल)यं भक्तानुग्रहमूर्तिमत् ।
स्मरानन्दपरं चेतो गणप(य)त्यभिधं महः ॥ ११७ ॥
॥ इति श्रीगोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ अवधूत —
योगिलक्षणं नाम षष्ठोपदेशः ॥ ६ ॥

३६ – उपरोक्ष तु (बो). ३७ – यआश्रित्य (यो.).

॥ योगविषयः ॥

गुरुश्च गुरुपुत्रश्च ये चान्ये गुरुबान्धवाः ॥ १ ॥

अन्येषांच क्रमाज्ज्येष्टास्तेषां पादौ नमाम्यहम् ।
यादृशी भावनातीतं तं गुरुं प्रणमाम्यहम् ।
भ्रान्तश्च भ्रमते लोको निर्भ्रान्तः कृतनिश्चयः ॥ २ ॥

तस्य सिध्यन्ति पुरुषा आदिनाथे व्यवस्थिताः ।
कुलजातिसमायुक्तः सुचरित्रगुणान्वितः ॥ ३ ॥

गुरुभक्तियुतो धीमान् स शिष्य इति कथ्यते ।
आकुलेनादिनाथेन केजापूपीनवासिना ॥ ४ ॥

कृपयैव परं तत्त्वं मीननाथोऽपि बोधतः ।
मीननाथोऽपि सच्छिष्यं प्रत्युवाच समाहितः ॥ ५ ॥

त्वं गुरुस्त्वञ्च शिष्यश्च शिष्यस्य च गुरोरपि ।
नानयोरपि भेदोऽत्र समसिद्धिः प्रजायते ॥ ६ ॥

उमाशङ्करपुत्रोऽहं मीननाथो मुनीश्वरः ।
कथयामि परं तत्त्वं कुलाकुलविबोधकम् ॥ ७ ॥

आधारः स्वाधिष्ठानञ्च मणिपूरमनाहतम् ।
विशुद्धिराज्ञा कौलानि षट् चक्राणि शुभानि च ॥ ८ ॥

आधारश्च गुदे तस्थौ स्वाधिष्ठानञ्च लिङ्गके ।
मणिपूरं नाभिगतं हृदये चाप्यनाहतम् ॥ ९ ॥

विशुद्धिः कण्ठदेशे च आज्ञाचक्रं भ्रुवोर्मुखम् ।
चक्रभेदमिति ज्ञात्वा चक्रातीतं निरञ्जनम् ॥ १० ॥

इडा वहति वामे च पिङ्गला वहति दक्षिणे ।
इडापिङ्गलयोर्मध्ये सुषुम्ना सुखरूपिणी ॥ ११ ॥

आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे ।
द्वे पत्र षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के
नासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वराणाम् ।
हं क्षं तत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ १२

प्राणोऽपानः समानश्च उदानो व्यान एव च ।
पञ्चकर्मेन्द्रिययुक्ताः क्रियाशक्तिसमुद्यताः ॥ १३ ॥

नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ।
पञ्चज्ञानेन्द्रियैर्युक्ताः बुद्धिशक्तिसमन्विताः ॥ १४ ॥

पावकश्शक्तिमध्यस्थो नाभिचक्रे रविः स्थितः ।
बन्धमुद्रा कृतास्सर्वे नासाग्रे तु सुलोचनम् ॥ १५ ॥

अकारो वन्हिदेशे च उकारो हृदि संस्थितः
मकारश्चः भ्रुवोर्मध्ये वचनाच्च निबोधयेत् ॥ १६ ॥

ब्रह्मग्रन्थिरधष्कारे विष्णुग्रन्थि हृदि स्थितः ।
रुद्रग्रन्थिर्भ्रुवोर्मध्ये विमुच्यन्ते त्रयस्तथा ॥ १७ ॥

अकारो ब्रह्म इत्याहुः उकारो विष्णुरुच्यते ।
मकारे च शिवं साक्षाच्छान्तेश्शान्ततरं परम् ॥ १८ ॥

कण्ठसंकोचनं कृत्वा द्वे नाड्यौ स्तम्भयेद् दृढम् ।
रसनापीड्यमानास्तु षोडश्श्चोर्ध्वगामिनी ॥ १९ ॥

त्रिकूटं त्रिहठाचैव गोल्हाटं शिखरं तथा ।
त्रिशिखं वज्रमोङ्कार मूर्ध्वनाखं भ्रुवोर्मुखम् ॥ २० ॥

आकुञ्चयेद्रविश्चैव पश्चान्नाडी प्रवर्तते ।
भेदे त्रिहठसंघट्टमुभयोश्शशिदर्शनम् ॥ २१ ॥

प्रणवा गुदनाला च नलिनी सर्पिणी तथा ।
वङ्कनालि क्षया शौरी कुण्डली कुण्डलाः स्मृताः ॥ २२ ।

कुण्डलीं (ली) चालयेत् प्राणो (णान्) भेदिते शशिमण्डले ।
सिध्यन्ति वज्रगुम्भानि नव द्वाराणि बन्धयेत् ।। २३ ।।

सुमनः पावनारूढः स गाढं निर्गुणस्तथा ।
ब्रह्मस्थाननिनादेन शंखिन्यामृतवर्षिणी ।। २४ ।।

षट्चक्रमण्डलोद्धारं ज्ञानदीपं प्रकाशयेत् ।
सर्वेषां स्नापनं देहे क्रियते देवतार्चनम् ।। २५ ।।

चन्द्रामृतेन चिद्रूपमीश्वरं स्नाप्य भक्तितः ।
मनःपुष्पं तथा देयमर्चयेत्परमं शिवम् ।। २६ ।।

आत्मरूपं तमालोक्य ज्ञानरूपं निरामयम् ।
दृश्यते देहरूपेण सर्वव्यापी निरञ्जनः ।। २७ ।।

हंस हंस पदे वाक्यं प्राणिनां देहमाश्रितः ।
सम्प्राणापानयोर्ग्रन्थिरूपे...त्यभिधीयते ।। २८ ।।

सहस्रमेकञ्च युतं षट्छतं चैव सर्वदा ।
उच्चारपदतो हंसः सोऽहमित्यभिधीयते ।। २९ ।।

पूर्वभागे मथो लिङ्गं शंखिन्यां चैव पश्चिमम् ।
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये रक्तशुक्लात्मकं शिवम् ।। ३० ।।

पूर्वपश्चिमदिग्भागे वज्रदण्डे व्यवस्थिते ।
द्वौ षष्टिभोगिनी स्थानं पशाल्लिङ्गं प्रकाशयेत् ।। ३१ ।।

शीताशीतं परं स्थानं मेदोमज्जाभिपूरितम् ।
स्रवति ब्रह्मणः स्थानात् सिञ्चते भुवनत्रयम् ।। ३२ ।।

सर्वव्याधिक्रियाकर्म — वातपित्तसमन्वितम् ।
दशाष्टदोषरहितं मीननाथेन कथ्यते ।। ३३ ।।

।। इति मत्स्येन्द्रनाथविरचितं भक्तिसं (?) सम्पूर्णम् ।।

॥ श्री ॥

श्रीमद्गोरक्षनाथविरचितः

"अमरौघप्रबोधः"

ओं नमोऽस्त्वादिनाथाय मीननाथाय वै नमः ।
नमश्चारङ्गिनाथाय सिद्धबुद्धाय धीमते ॥ १ ॥

लयादिप्रतिपन्नानां कलहोत्सुकचेतसाम् ।
गोरक्षकेण कथितः प्रबोध–प्रत्ययात्मकः ॥ २ ॥

लययोगो हठश्चैव मंत्रयोगस्तृतीयकः ।
चतुर्थो राजयोगश्च द्विधाभवविवर्जितः ॥ ३ ॥

यच्चित्तसन्ततलयः स लयः प्रदिष्टः ।
यस्तु प्रभञ्जनविधानरतो हठस्सः ।
यो मंत्रमूर्तिवशगः स तु मन्त्रयोगः ।
यश्चित्तवृत्तिरहितः स तु राजयोगः ॥ ४ ॥

ओषध्योऽध्यात्मकश्चेति राजयोगो द्विधा क्वचित् ।
हठोऽपि द्विविधः क्वापि वायुबिन्दुनिषेवणात् ॥ ५ ॥

षट्कर्मप्रतिपत्तिहेतुकमिदं मंत्रं न तद् दृश्यते ।
भ्रूनासादिषु कीटवन्न (द) भि मनो मग्नं कथञ्चिद्भवेत ॥
आधारे पवनो न याति विविधादभ्यासतो योगिनाम् ।
नित्यानन्दमयात्प्रभावनिलयाच्छ्रीराजयोगादृते ॥ ६ ॥

नित्यं मंत्रयतो लभेन्न नृपतां (तिः) नैवाधिपत्यं तथा ।
दिव्यस्त्रीनवसङ्गमोऽप्यनुदिनं न ध्यायतो लभ्यते ॥
हस्तिन्यास्तुरगः खराच्च करभः शाल्योदनं कोद्रवात् ।
जायन्ते हठतः कथं वद विभो स्वीयं प्रभावं विना ॥ ७ ॥

केचिन्मूत्रं पिबन्ति प्रमलमशनतः केचिदश्नन्ति लालां ।
केचित्काष्ठीं प्रविष्टो युवतिभगवताद्विन्दुमूर्ध्वं नयन्ति ॥
केचित्खादन्ति धातून्निखिलतनुसिरा वायुसञ्चारदक्षाः ।
नैतेषां देहसिद्धिर्विगतनिजमनो राजयोगादृतेऽस्मात् ॥ ८ ॥

चित्तो समत्वमापन्ने वायौ व्रजति मध्यमे
एषाऽमरोली वज्रोलीतदामति मतेति च (सहजोली प्रजायते) ॥ ९ ॥

तथाच श्रीसम्पुटे :—

विश्राणः पवनं हठान्नियमितं ग्रासोऽस्ति मीनोदरे ।
कैवल्यो भगवान्विमुच्य सहसा यावन्नचेतत्यसौ ॥
तं चोक्त्वा गिरिशेन भाषितमिदं कालो न चेतः परं ।
पार्वत्या सह मीननाथमवदन्नित्यं चिरं जीमहि ॥ १० ॥

यदि जीवेदोषधीभिः संसारे निरुपद्रवे ।
आमयास्ता जराग्रस्ता म्रियन्ते भिषजः कथम् ॥ ११ ॥

चरकानुचरणचतुराश्चटुलधियः सुश्रुतश्रवणलोलाः ।
अमनस्कौषधि.... वा ...ज्या कथमखिलंगतं तत्क्षयो भवति ॥ १२ ॥
बिन्दुनादौ महौषध्यौ विद्येते सर्वजन्तुषु ।
तावविज्ञाय सर्वेऽपि म्रियन्ते गुरुवर्जिताः ॥ १३ ॥

चालयेत्संवृतं वायुं भानुमग्निंच धुक्ष्यति ।
ज्वलन्नसौ चलत्यस्माद्बीजश्चलति पार्वति ॥ १४ ॥

यो जानात्यनयोस्सारं सद्गुरोरुपदेशतः ।
कायक्लेशजराव्याधिपापमृत्युभयं कुतः ॥ १५ ॥

निर्याते चित्तराते व्रजति खररुचौ मेरुमार्गं समन्तात् ।
दुद्रन्ने (?) वन्हिभावे स्रवति शशधरे पूरयत्याशुकाये ॥
उद्यत्यानन्दवृन्दे त्यजति तव ममेत्यादि मोहान्धकारे ।
प्रोद्भिन्ने ब्रह्मरन्ध्रे जयति शिव शिवा सङ्गमः कोप्यपूर्वः ॥ १६ ॥

एक एवामरौघो हि राजयोगाभिधानकः ।
मयादिभिस्समायुक्तश्चतुर्थो दीयते कथम् ॥ १७ ॥

मृदुमध्याध मात्रश्च अधिमात्रतरस्तथा ।
चतुर्धा साधको ज्ञेयस्तत्सोपानमिहोच्यते ॥ १८ ॥

मन्दोत्साही मन्दरागी पराधीनो विदूषकः ।
व्याधिस्थो हीनसत्वश्च ग्र (गृ) हवासी मृदुः स्मृतः ॥ १९ ॥

समबुद्धिः समाभ्यासी समकायः समाश्रयः ।
मध्यस्थः सर्वकार्येषु मध्यसत्वोऽभिधीयते ॥ २० ॥

क्षमावीर्यनयैर्युक्तो वयस्थस्सत्ववानपि ।
स्वाधीनश्च खरश्शूरस्सोऽधिमात्रो निगद्यते ॥ २१ ॥

सर्वशास्त्रकृताभ्यासो मनोज्ञो वीर्यशौर्यवान् ।
निर्मोहस्सर्वसम्पन्नो निर्विकारो महाश्रयः ॥ २२ ॥

अधिमात्रतरस्सोऽपि महाकायः प्रवर्तते ।
तरन्ति च भवाम्भोधिं तारयन्ति परानपि ॥ २३ ॥

मृदवे दीयते मंत्रो मध्याय लय उच्यते ।
अधिमात्रे हठं दद्यादमरौघो महेश्वरे ॥ २४ ॥

तत्र मंत्रम्ः—

अह (ओ) मिति एकाक्षरं मंत्रं तत्सप्रणवादिकम् ।
शिवं शम्भुं हृदि ध्यात्वा द्वादशे भिन्नमण्डले ॥ २५ ॥

एकलक्षजपान्मृत्युं नाशयेदतिदारुणम् ।
दशांशं हवनं कृत्वा क्षौद्रक्षीरघृताम्बुजैः ॥ २६ ॥

अथलयः—

कामरूपे शिवं देवं लिङ्गाभं मणिसन्निभम् ।
स्रवन्तं चामृतरसं यो ध्यायेन्निजविग्रहे ॥ २७ ॥

निरन्तरकृताभ्यासात्पण्मासात् सिद्धिभाग्भवेत् ।
वलीपलितनिर्मुक्तो जीवेदब्दशतत्रयम् ॥ २८ ॥

अथ हठः—

पादमूलेन वामेन योनिं सम्पीड्य दक्षिणम् ।
प्रसारितं पदं कृत्वा कराभ्यां पूरयेन्मुखे ॥ २९ ॥

कण्ठे बन्धं समारोप्याधाराद्वायुमूर्ध्वतः ।
यथा दण्डाहतस्सर्पो दण्डाकारः प्रजायते ॥ ३० ॥

ऋजुभूता तदा शक्तिः कुण्डली सहसा भवेत् ।
तदासौ मरणावस्था जायते द्विपुटाश्रिता ॥ ३१ ॥

महारोगा महाक्लेशा जीर्यन्ते मरणादयः ।
महामुद्रांच तेनैनां वदन्ति विबुधोत्तमाः ॥ ३२ ॥

महामुद्राकृता येन साधकाय प्रसिध्यति ।
कथ्यतेऽसौ महाबन्धो जरामरणनाशकः ॥ ३३ ॥

पूरांयत्वा मुखे वायुं हृदय चु (ंच) बुक कृतं ।
निभृतं योनिमाकुञ्चेन्मनो मध्ये नियोजयेत् ॥ ३४ ॥

अयं च सर्वनाडीनामूर्ध्वं गतिविशोधनः ।
त्रिवेणीसङ्गमं कृत्वा केदारं प्रापयेन्मनः ॥ ३५ ॥

रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना ।
महामुद्रामहाबन्धौ निष्फलौ वेधवर्जितौ ॥ ३६ ॥

सव्यं प्रसारितं पादं कराभ्यां धारयेद् दृढम् ।
आन्दोलनं ततः कुर्याच्छरीरस्य त्रिमार्गतः ॥ ३७ ॥

पुनरास्फालनं कुर्यां सुस्थिरं कण्ठमुद्रया ।
वायुना गतिमाहृत्य कृत्वा पूरककुम्भकौ ॥ ३८ ॥

समहस्तयुगो भूत्वा समपादयुगस्तथा ।
वेधयेत्क्रमयोगेन चतुष्पीठं तु वायुना ।। ३९ ।।

आफालयेन्महामेरू वायुवज्राग्निकोटिभिः ।
पुटद्वयं समाक्रम्य वायुः स्फुरति सत्वरम् ।। ४० ।।

सोमसूर्याग्निसम्बन्धं जानीयादमृताय वै ।
मृतावस्था समुत्पन्ना ततो मृत्युभयं कुतः ।। ४१ ।।

एतत्त्रयं महागुण्यं जरामृत्युविनाशनम् ।
अष्टधा क्रियते चैतत् यामे यामे दिने दिने ।। ४२ ।।

वह्निवृद्धिकरं चैव अणिमादिगुणप्रदम् ।
पुण्यं सञ्चयसंहारि पापौघभिदुरं सदा ।। ४३ ।।

सम्यग्शिक्षावतामेवं स्वल्पं प्रथमसाधने ।
वह्निस्त्रीपथसेवानामादौ वर्जनमाचरेत् ।। ४४ ।।

आरम्भश्च घटश्चैव प्रत्ययश्च तृतीयकः ।
निष्पत्तिः सर्वयोगेषु योगावस्था चतुर्विधा ।। ४५ ।।

ब्रह्मग्रन्थे भवेद् वेधादानन्दा....न्यसम्भवम् ।
विचित्रक्वणको देहेनाहतः श्रूयते ध्वनिः ।। ४६ ।।

दिव्यदेहश्च तेजस्वी दिव्यगन्धस्त्वरोगवान् ।
सम्पूर्णहृदयश्शूर आरम्भे योगिनो भवेत् ।। ४७ ।।

द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानादेव समप्रभः ।। ४८ ।।

विष्णुग्रन्थेस्तथा वेधात् परमानन्दसूचकः ।
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत् ।। ४९ ।।

तृतीयायां ततो भित्वा विपाको (विहायो) मर्दलध्वनिः ।
महाशून्यं तदा जातं सर्वसन्धि(सिद्धि)समाश्रयम् ।। ५० ।।

चित्तानन्दं ततो जित्वा सहजानन्दसम्भवः ।
दोषमृत्यु-जरा-दुःख-क्षुधा-निद्राविवर्जितः ॥ ५१ ॥

रुद्रग्रन्थिं ततो भित्वा सत्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवश्शब्दः क्वणन्वीत (न्निव) क्वणो भवेत् ॥ ५२ ॥

एकीभूतं तदा चित्तं राजयोगाभिधानकम्
सृष्टिसंहारकर्ताऽसौ योगीश्वरसमोभवेत् ॥ ५३ ॥

न नादो न च बिन्दुश्च न चेतो नाप्यचेतनः ।
नाभ्यासदुस्तरं किञ्चित् राजयोगो निगद्यते ॥ ५४ ॥

लीनं यत्र चराचरं लयवशात् तल्लिङ्गमित्युच्यते ।
सा शक्तिर्यदचिन्त्यरूपगहनाल्लोकत्रयोद्भासिनी ॥
तद्ध्यानं यदशेषवस्तुविषयव्यापारहीनं मनः ।
तत्क्षात्र यदसीमकालपटलध्यानासनं हेलया ॥ ५५ ॥

पञ्चभूतात्मको देहः पञ्चमण्डलपूरितः ।
काठिन्यात्पृथिवी ज्ञेया पानीयं यद्द्रुवाकृतिः ॥ ५६ ॥

दीपनं तु भवेत्तेजः स्पर्शो वायोस्तथा भवेत् ।
आकाशे चेतनं सर्वं ज्ञातव्यं योगमिच्छता ॥ ५७ ॥

षट्च्छतान्यधिकान्यत्र सहस्राण्येकविंशतिः ।
अहोरात्रं वहेच्छ्वासो वायुमण्डलरेचनात् ॥ ५८ ॥

तत्पृथ्वीमण्डले क्षीणे बलिरायाति देहिनाम् ।
तोये क्षीणे तृणानीव चिकुराः पाण्डुराः क्रमात् ॥ ५९ ॥

तेजःक्षीणे क्षुधाकान्तिर्नश्यते मारुते श्लथे ।
वेपथुश्च भवेन्नित्यं साहसेनैव जीवति ॥ ६० ॥

इत्थंभूतक्षयान्मृत्युजीवितं भूतधारणात् ।
प...श्चेद्वर्षशते लक्ष्येन्नान्यथा मरणं भवेत् ॥ ६१ ॥

यामाष्टककृताभ्यासात्सर्वान्छ्वासान् ग्रसत्यसौ ।
स षोडशकलोपेतश्शशी तिष्ठति पूरकान् (त्) ।। ६२ ।।

निस्तरङ्गे स्थिरे चित्ते वायुर्भवति मध्यगः ।
रविरूर्ध्वपदं याति विन्दुना याति वश्यताम् ।। ६३ ।।

आनन्दपूरितो योगी जायते शिवसन्निभः ।
तदेश्वरगुणास्सर्वे दृश्यन्ते दशमासतः ।। ६४ ।।

इत्यमरौघसंसिद्धौ गोरक्षेण प्रकाशितः ।
लयाद्युपायकौशल्यप्रबोधप्रत्ययात्मकः ।। ६५ ।।

सर्वचिन्तां परित्यज्य दिनमेकं परीक्ष्यताम् ।
यदि तत्प्रत्ययो नास्ति तदा मे तु मृषा वचः ।। ६६ ।।

रूमो (?) मरीचि खद्योत दीपज्वालेन्दु भास्कराः ।
अमी कला महाविम्बं विश्वविम्बं प्रकाशते ।। ६७ ।।

प्रबोधं यो न जानाति सोऽमरौघं न विन्दति ।
समीभावे समुत्पन्ने चित्ते द्वैतविवर्जिते ।। ६८ ।।

अहं ममेत्यपीत्युक्त्वा सोऽमरौघं विचिन्तयेत् ।
चित्तं जीवितमित्याहुरचित्तं मरणं विदुः ।। ६९ ।।

चित्ताचित्ते समीभूते जीवन्मुक्तिरिहोच्यते ।
यत्र स्वभावसद्भावो भाषितुं नैव शक्यते ।। ७० ।।

न जीवति ततः कोऽपि न च कोऽपि मरिष्यति ।
राजयोगं पदं प्राप्य सर्वसत्ववशङ्करम् ।। ७१ ।।

सर्वं कुर्यान्न कुर्याद्वा यथारुचि विचेष्टितम् ।
नग्नः कोऽपि गुहासु दिव्यवसनः कौपीनवासाः क्वचित् ।
दिव्यस्त्रीसुरतान्वितोऽपि कुहचित्स ब्रह्मचारी क्वचित् ।

भिक्षाहाररतः क्वचित् क्वचिदपि प्राप्नोति भोगास्पदम् ।
सर्वत्राप्रतिबद्धवृत्तिरखिलक्लेशापहा योगिराट् ।। ७२ ।।

श्रीमद्गोरक्षनाथेन सदामरौघवर्तिना ।
लयमंत्रहठाः प्रोक्ताः राजयोगाय केवलम् ।। ७३ ।।

कायेनैव परीक्षेत वाक्पटुः किं करिष्यति ।
चिकित्सापाठमात्रेण रोगिणः किं करिष्यति ।। ७४ ।।

।। इति श्रीमद्गोरक्षनाथविरचितं —
अमरौघप्रबोधं सम्पूर्णम् ।।

॥ अथ योगमार्तण्डग्रन्थः प्रारम्भः ॥

द्विजचोदितशंखस्य (शाखस्य) श्रुतिकल्पतरोः फलं ।
शमनं भवतापस्य योगं सेवत सत्तमाः ॥ १ ॥

आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥ २ ॥

आसनानि च तावन्ति यावन्तो जीवजन्तवः ।
एतेषां लक्षणं भेदं विजानाति महेश्वरः ॥ ३ ॥

चतुराशीतिलक्षाणामेकमेकमुदाहृतम् ।
ततः शिवेन पीठानां षोडशानो शतं कृतम् ॥ ४ ॥

आसनेभ्यः समस्तेभ्यः द्वयमेव विशिष्यते ।
एकं स्वस्थासनं (सिद्धासनं) प्रोक्तं द्वितीयं कमलासनम् ॥ ५ ॥

योनिस्थानेकमंघ्रिमूलघटितं कृत्वा दृढं विन्यसेत् ।
मेढ्रे पादमथैकमेव हृदये कृत्वा समं विग्रहं ॥ ६ ॥

स्थाणुः संयमितेंद्रियोऽचलदृशो सश्येद्धु (पश्येद्धु) वोरन्तरम् ।
चैतन् मोक्षकवाटभेदजनकं सिद्धासनं प्रोच्यते ॥ ७ ॥

वामोरूपरि दक्षिणं च चरणं विन्यस्य वामं तथा ।
नाम्यो (दक्षो)रूपरि पश्चिमेन घटिता धृत्वा कराभ्यां दृढम् ॥ ८ ॥

अङ्गुष्ठे (ष्ठौ) हृदये निधाय चिबुकं नासाग्रमालोकयेत् ।
एतद् व्याधिविकारहारि यमिनां पद्मासनं प्रोच्यते ॥ ९ ॥

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ।
योनिस्थाने तयोर्मध्ये कामरूपं निगद्यते ॥ १० ॥

आधाराख्ये गुदस्थाने पङ्कजं यच्चतुर्दलम् ।
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता ॥ ११ ॥

योनिमध्ये महालिङ्गं पश्चिमाभिमुखं स्थितम् ।
मस्तके मणिमद्भिन्नं (वद्बिम्बं) यो जानाति स योगवित् ॥ १२ ॥

तप्तचामीकराभासं तडिल्लेखेव विस्फुरत् ।
त्रिकोणं तत्पुरं वह्नेः अधो (धो) मेढ़ प्रदेशतः (मेढ्रात्प्रातिष्ठितम्)
स्व शब्देन भवेत्प्राणः स्वाधिष्ठानमिति स्मृतम् ॥ १३ ॥

स्वाधिष्ठानमिदं चक्रं मेढ्रमेव निगद्यते ।
तन्तुना मणिवत्प्रोक्तं (तं) पूर्यते यत्र वायुना ॥
तं नाभिमण्डलं चक्रं प्रोच्यते मणिपूरकम् ॥ १४ ॥

द्वादशारे महाचक्रे पुण्य – पाप – विवर्जिते ।
तावज्जनो भ्रमत्येव यावत्तत्त्वं न विन्दति ॥ १५ ॥

ऊर्ध्वं मेढ्रादधो नाभेः कन्दो योऽस्ति (निः) खगांडवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः ॥ १६ ॥

तेषु नाडीसहस्रेषु द्विसप्ततिरुदाहृता ।
प्रधानाः प्राणवाहिन्यो भवस्तत्र दश स्मृता ॥ १७ ॥

इडा च पिङ्गला चैव सुषुम्ना च तृतीयकम् ।
गान्धारी हस्तजिह्वाच पूषा चैव पयस्विनी ॥ १८ ॥

अलम्बुषा कुहूश्चैव शंखिनी दशमी स्मृताः ।
एवं नाडीमयं चक्रं ज्ञातव्यं योगिभिः सदा ॥ १९ ॥

सततं प्राणवाहिन्यश्चन्द्रसूर्याग्निदेवताः ।
इडा पिङ्गला सुषुम्नेति तिस्रो नाड्य उदीरिताः ॥ २० ॥

इडा वामे स्थिता भागे पिङ्गला दक्षिणे तथा ।
सुषुम्ना मध्यदेशे तु प्राणमार्गास्त्रयः स्मृताः ॥ २१ ॥

प्राणापानसमानश्च उदानो व्यान एव च ।
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥ २२ ॥

हृदि प्राणो वशी नित्यं अपानो गुदमण्डले।
समानो नाभिदेशे तु उदानः कण्ठमध्यगः ॥ २३ ॥

व्यानो व्याप्य शरीरे तु प्रधाना पञ्च वायवः
प्राणाद्याः पञ्च विख्याताः नागाद्याः पञ्चवायवः ॥ २४ ॥

नागो गृह्णन्ति पञ्चैताः कूर्म उन्मीलने स्थितः।
क्षुधं करोति कृकरो देवदत्तो विजृम्भणे ॥ २५ ॥

वृत्तं धनञ्जयः शब्दे क्षणमात्रं न निश्चयेत्।
एवं नाडीसहस्रेषु वर्तन्ते जीवरूपिणः ॥ २६ ॥

प्राणापानवशाच्छ्वासो अधश्चोर्द्ध्वं प्रधावति।
वामदक्षिणमार्गेण चञ्चलत्वान्न दृश्यते ॥ २७ ॥

आक्षिप्तो भुविपाशेन (भुजदण्डेन) यथा चलति कन्दुकः।
प्राणापानसमुत्क्षिप्तस्तत्त्व ('था) जीवो न विश्रमेत् ॥ २८ ।

रज्जुबंधे यथान्योऽन्यो (श्येनो) गतोऽप्याकृष्यते पुनः।
गुणबन्धस्तथा जीवः प्राणापानेन कृष्यते ॥ २९ ॥

प्राणेनाकृष्यतेऽपानः प्राणोऽपानेन कृष्यते।
उर्ध्वं चाधःस्थितावेतौ यो जानाति स योगवित् ॥ ३० ॥

हंकारेण बहिर्याति सकारेण विशेत्पुनः।
हंसो हंसेत्यमुं मंत्रं जीवो जपति सर्वदा ॥ ३१ ॥

षट्च्छतान्यहोरात्रं सहस्राण्येकविंशतिः।
एतत्संख्यान्वितं मंत्रं जीवो जपति सर्वदा ॥ ३२ ॥

अजपा नाम गायत्री योगिनां मोक्षदाय (यि) का।
अस्य संकल्पमात्रेण नरः पापैः प्रमुच्यते ॥ ३३ ॥

अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं पुण्यं न भूतो न भविष्यति ॥ ३४ ॥

कुण्डलिन्या समुत्पन्ना गायत्री प्राणधारिणी ।
प्रणवाद्यास्तथा (प्राणविद्यामहा) विद्या यस्तं वेद स वेदवित् ॥ ३५ ॥

कन्दोर्ध्वं कुण्डली शक्तिः अष्टधा कुण्डलीकृता ।
ब्रह्मद्वारमुखं नित्यं मुखेन चाध्य (आच्छाद्य) वतिष्ठति ॥ ३६ ॥

योगमार्गेण (येनद्वारेण) गन्तव्यं ब्रह्मस्थानं निरामयम् ।
मुखेनाभ्युद्यते तत्र प्रसन्ना (मुखेनाच्छाद्य तद् द्वारं प्रसुप्ता)
परमेश्वरी ॥ ३७ ॥

प्रस्फुरद्भुजगाकारा पद्मतन्तुनिभा शुभा ।
प्रसुप्ता वायुना सार्धं प्रबोधं यान्ति साग्निना ॥ ३८ ॥

प्रबुद्धावग्नियोगेन मनसा मरुता सह ।
सूचीव गुणमादाय व्रजत्युर्ध्वं सुषुम्नया ॥ ३९ ॥

उद्घाटयेत् कवाटं तु यथा कुम्भि (ञ्चि) कया हठात् ।
कुण्डलिन्या तथा योगी मोक्षमार्गं प्रभेदयेत् ॥ ४० ॥

कृत्वा संघटितौ करौ दृढतरं बध्वा तु पद्मासनम् ।
गाढं वक्षसि सन्निधाय चिबुकं ध्यानं ततश्चेतसा ॥ ४१ ॥

पारं वा...समूर्ध्नि (वारं वारमपानमुर्ध्वं) मनिलं प्रोच्चालयन् पूरितम् ।
प्राणं मुञ्चति रोधमेति शनकैः शक्तिप्रबोधान्नरः ॥ ४२ ॥

अङ्गानां मर्दनं कुर्यात्स्वेदवारिनिवारणम् ।
दृढता लघुता चापि तेन गात्रस्य जायते ॥ ४३ ॥

कट्वम्ललवणत्यागी क्षीरभोजनमाचरेत् ।
ब्रह्मचारी मिताहारी योगी योगपरायणः ॥ ४४ ॥

कन्दोर्ध्वं कुण्डली शक्तिरष्टधा कुण्डलीकृता ।
बन्धनाय च मूढानां योगिनां मोक्षदायिका ॥ ४५ ॥

महामुद्रा नभोमुद्रा ओड्याणं च जलन्धरम् ।
मूलबन्धं च यो वेत्ति स योगी सिद्धिभाग् भवेत् ।। ४६ ।।

अपानप्राणयोरैक्यं क्षयो मूत्रपूरीषयोः ।
युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ।। ४७ ।।

पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम् ।
अपानमुर्ध्वमाकृष्य मूलबन्ध निगद्यते ।। ४८ ।।

ओड्याणं कुरुते यस्मादविश्रान्तं महाखगः ।
ओड्याणं च तथैव स्यात्तत्र बद्धो विधीयते ।। ४९ ।।

उदरात्पश्चिमे भागे अधो नाभेस्तथा युते ।
ओड्याणाख्यो स्वयं बद्धो मृत्युमातङ्गकेसरी ।। ५० ।।

बध्नाति हि शिराजालं अधो नाभिं नभोजलम् ।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः ।। ५१ ।।

जालन्धरे कृते बद्धे कर्ण (कण्ठ) संकोचलक्षणे ।
पीयूषं न पतत्यग्नौ न च वायुः प्रकुप्यति ।। ५२ ।।

चित्तं चरति खे यस्माज्जिह्वा चरति गे गता ।
कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।। ५३ ।।

भ्रुवोरन्तर्गता दृष्टि मुद्रा भवति खेशरी ।। ५४ ।।

न रोगो मरणं तस्य न निद्रा न क्षुधा तृषा ।
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ।। ५५ ।।

तेनैषा खेचरी मुद्रा सर्वलिद्धैर्नमस्कृता ।
गुदमूल शरीराणां (बिन्दूमूल शरीरं यः) शिरस्तत्र प्रतिष्ठिसम् ।। ५६ ।।

भावयन्ति शरीराणां (शरीरं यः) आपादतलमस्तकः ।
खेचरीं (यां) मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।। ५७ ।।

न तस्य क्षरते बिन्दुः कामिन्याश्लेषितस्य च ।
यावद्बिन्दुः स्थितो देही (हे) तावन्मृत्युभयं कुतः ।। ५८ ।।

यावद्बद्धा नभो मुद्रा तावद्बिन्दुर्न गच्छति ।
चरितोऽपि यदा विन्दुः संप्राप्तस्य हुताशनम् ॥ ५९ ॥

व्रजमूर्ध्वं तथा शक्त्या निबद्धो योनिमुद्रया ।
सततं द्विविधो विन्दुः पाण्डुरो लोहितस्तथा ॥ ६० ॥

पाण्डुरं शुक्लमित्याहुः लोहिताख्यं महारजः
सिन्धूररजसंकाशं रविस्थाने स्थितं रजः ॥ ६१ ॥

शक्तिस्थाने स्थितो विन्दुस्तयोरैक्यं सुदुर्लभम् ।
बिन्दुः शिवो रजश्शक्तिः लम्बे यदारजः (विन्दुरिन्दुः रजो रविः)॥६२॥

यदा रजः विन्दोः सहैकत्वं भवेद्दिव्यं वपुस्तथा ।
सुप्रभया संगमादेव ताप्यते ह्यमुत्रपदम् ।
वायुना शक्तिं चालयेदिन्दु विन्दु रजो रविः ॥ ६३ ॥

शुक्रं चन्द्रेण संयुक्तं रजस्सूर्येण संयुतम् ।
द्वयोस्समरसैकत्वं यो जानाति स योगवित् ॥ ६४ ॥

शोधनं नाडिजालस्य चालनं चन्द्रसूर्ययोः ।
रसना शोषणं चैव महामुद्रां च योऽभ्यसेत् ॥ ६५ ॥

हंस (वक्ष) न्यस्त हनुः प्रपीडयत रसाः (सुचिरं) योनिं च वामांघ्रिणा ।
हस्ताभ्यां हनुं धारयेत् प्रसारितं पादं तथा दक्षिणम् ॥ ६६ ॥

आपूर्य श्वसनेन कुक्षिविवरं बध्वा शनैः रेचयेत् ।
सर्वव्याधिविनाशिनीति महती मुद्रा नृणां प्रोच्यते ॥ ६७ ॥

सूर्याङ्गेण समभ्यस्य चन्द्राङ्गेणाभ्यसेत्पुनः
यावत्तुल्या भवेत्संख्या ततो मुद्रां विसर्जयेत् ॥ ६८ ॥

न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः ।
अपि भुक्तं विषं घोरं पीयूषमिव जीर्यते ॥ ६९ ॥

क्षयकुष्ठगुदावर्तगुल्मशूलज्वरव्यथा ।
रोगाः सर्वे क्षयं यान्ति महामुद्रां च योऽभ्यसेत् ॥ ७० ॥

कथितेयं महामुद्रा महासिद्धिकरा नृणाम् ।
गोपनीयं प्रयत्नेन न देयं यस्य कस्यचित् ।। ७१ ।।

पद्मासनं समारुह्य समकायशिरोदरः ।
नासाग्रे दृष्टिरेकाकी जीवे (जपेत्) दोङ्कारमव्ययम् ।। ७२ ।।

भूर्भुवः स्वरिमे लोकाश्चन्द्रसूर्याग्निदेवताः ।
त्रयो वर्णा स्थिता यत्र तत्परं ज्योतिरोमिति ।। ७३ ।।

अकारश्च उकारश्च मकारो बिन्दु—संज्ञकः ।
त्रयो वर्णाः स्थिता यत्र तत्परं ज्योतिरोमिति ।। ७४ ।।

त्रयः काला स्त्रयो लोकास्त्रयो वेदास्त्रयो स्वराः ।
त्रयो देवा स्थिता यत्र तत्परं ज्योतिरोमिति ।। ७५ ।।

वचसा यज्जपेद्बीजं वपुषा यत्समभ्यसेत् ।
मनसा यत्स्मरेन्नित्यं तत्परं ज्योतिरीमिति ।। ७६ ।।

शुचिर्वाप्यशुचिर्वापि जपेदोङ्कारमव्ययम् ।
न स लिप्यति पापेन पद्मपत्रमिवाम्भसा ।। ७७ ।।

चले वाते चलेत्सर्वं निश्चले निश्चलं तथा ।
योनिस्थानमवाप्नोति ततो वायुं निरोधयेत् ।। ७८ ।।

यावद्वायुः स्थितो देहे तावज्जीवं न मुञ्चति ।
मरणं तस्य निष्प्राणः ततो वायुं निरोधयेत् ।। ७९ ।।

यावद्बद्धो मरुद्देहे तावच्चित्तं निरामयम् ।
यावच्चक्षु र्भ्रुवोर्मध्ये तावत्कालभयं कुतः ।। ८० ।।

अतः मृ (का) लभयाद्ब्रह्म प्राणायामपरायणः ।
योगिनामुत्तमश्चैव ततो वायुं निरोधयेत् ।। ८१ ।।

षट्त्रिंशदङ्गुलो हंसः प्रयाणं कुरुते बहिः ।
वामदक्षिणभागेन ततः प्राणो निधीयते ।। ८२ ।।

शुद्धीयेत् (द्धमेति) यदा सर्वं नाडिचालं महाजलम् (मलाकुलम्) ।
तथै (दै) व जायते योगी समप्राण निरोधने (प्राणसंग्रहणेक्षमः)
॥ ८३ ॥

बद्धः पद्मासने योगी प्राणं चन्द्रेण पूरयेत् ।
धारयित्वा यदाशक्ति पुनः सूर्येण रेचयेत् ॥ ८४ ॥

अमृतद्रवसंकाशं गोक्षीरधवलोपमम् ।
ध्यात्वा चन्द्रमयं बिम्बं प्राणायामे (मी) सुखो (खी) भवेत् ॥ ८५ ॥

प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः ।
कुम्भयित्वा विधानेन पुनश्चन्द्रेण रेचयेत् ॥ ८६ ॥

प्रज्वल–ज्वलन–ज्वाला–पुंजमादित्यमण्डलम् ।
ध्यात्वा नाभिस्थितं योगी प्राणायामे सुखी भवेत् ॥ ८७ ॥

प्राणं चेदिल (ड) यापि प्रवेश्य च तं भूयोन्यया रेचयेत् ।
पीत्वा पिङ्गलया समीरणचयं बध्वा त्यजेद्वामया ॥ ८८ ॥

सूर्याचन्द्रमसोरनेन विधिना बिम्बद्वयं ध्यायतां ।
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वजः ॥ ८९ ॥

यथेष्टं धारणा वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥ ९० ॥

प्राणो देहे स्थितो वायुरपानस्य निबन्धनम् ।
एकस्य श्वसने मात्रमुद्घाटेद्गमने गतिः ॥ ९१ ॥

रेचकः पूरकश्चैव कुम्भकः प्रणवात्मकः ।
प्राणायामो भवेत् त्रेधा मात्रा द्वादश संस्कृताः ॥ ९२ ॥

मात्रा द्वादशसंयुक्ता दिवाकरनिशाकरौ ।
दोषजालं विनिघ्नन्तौ ज्ञातव्यो योगिभिस्सदा ॥ ९३ ॥

अधमो द्वादश प्रोक्तो मध्यमो द्विगुणः स्मृतः ।
उत्तमस्त्रिगुणः प्रोक्तः प्राणायामस्य निर्णयः ॥ ९४ ॥

अधमस्याधमो धर्मः कम्पो भवति मध्यमः ।
उत्तमाःस्थाणुमाप्नोति ततो वायुं निरुन्धयेत् ।। ९५ ।।

बद्धपद्मासनो योगी नमस्कृत्वा गुरुं शिवम् ।
नासाग्रे दृष्टिमादाय प्राणायामं समभ्यसेत् ।। ९६ ।।

द्वाराणां नर(व)कं निरुध्य पवनं जित्वा दृढं धारयेत् ।
नीलाकाशमपानवह्निसहितं शक्त्या समुच्चालितम् ।। ९७ ।।

उर्ध्वमाकृष्य चापानं वायुं प्राणेन योजयेत् ।
अपानेन धत्ते प्राणं सर्वपापैः प्रमुच्यते ।। ९८ ।।

आत्मध्यानयुतं त्वनेन विधिना साभ्यासमूर्ध्वं सुखम् ।
यावत्तिष्ठति तावदेव महता सांख्येन संस्तूयते ।। ९९ ।।

प्राणायामे भवत्येषा पातके घन पावकः ।
भवेद्व्याधिमहासेतुः प्रोच्यते योगिभिस्सदा ।। १०० ।।

आसने मरुतो हन्ति प्राणायामेन पातकम् ।
विकारं मानसं हन्ति प्रत्याहारेण योगवित् ।। १०१ ।।

धारणायां मनोधैर्यं ध्यानादैश्वर्यमद्भुतम् ।
समाधेर्मोक्षमाप्नोति त्यक्त्वा कर्मशुभाशुभम् ।। १०२ ।।

प्राणायामद्विषट्केन प्रत्याहारः स उच्यते ।
प्रत्याहारद्विषट्केण जायते धारणा शुभा ।। १०३ ।।

धारणा द्वादश प्रोक्तं ध्यानं ध्यानविशारदैः ।।
ध्यानद्वादशकेनैव समाधिरभिधीयते ।। १०४ ।।

यस्समाधिः परं ज्योतिः सर्वाङ्गं विश्वतोमुखम् ।
तस्माद्द्रष्टुं क्रिया कार्या यातायातं निपातिते ।। १०५ ।।

संबध्यासनमूलमंघ्रिघटितं कर्णाक्षिनासापुट-
द्वाराण्यङ्गुलिभिर्नियम्य पवनं वक्त्रेण वा पूरितम् ।। १०६ ।।

धृत्वा वक्षसि वह्निवायुसहितं घूर्णिस्थितं धारयेत् ।
एवं याति शिवेन तत्र समता योगी चिरं जीवति ।। १०७ ।।

गगनं पावने प्राप्ते ध्वनिरुत्पद्यतेततो महान् ।
गंडादिनादं गम्भीरं सिद्धिस्तस्य न दूरतः ।। १०८ ।।

प्राणायामेन युक्तेन सर्वपापक्षयो भवेत् ।
अयुक्ताभ्यासयुक्तेन सर्वरोगसमुद्भवः ।। १०९ ।।

हिक्काश्वास्यं तथा कासं शिरःकर्णाक्षिवेदना ।
भवन्त्यविधिना दोषाः पवनस्य व्यतिक्रमात् ।। ११० ।।

यथा सिंहो गजो व्याघ्रो भवेद्वश शनैः शनैः ।
अन्यथा हन्ति योक्तारं तथा वायुरसेवितः ।। १११ ।।

युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च पूरयेत् ।
युक्तं युक्तं च बध्नीयात् एवं सिद्धिं निगच्छति ।। ११२ ।।

चरतां चक्षुरादीनां विषयेषु यथाक्रमम् ।
यत्प्रत्याहरणं तेषां प्रत्याहारः स उच्यते ।। ११३ ।।

यथा तृतीयकालस्थो रविः संहरते प्रभाः ।
तृतीयाङ्गस्थितो योगी विकारं मानसं तथा ।। ११४ ।।

अङ्गमध्ये यथाङ्गानि कूर्मः संकोचमाचरेत् ।
योगी प्रत्याहरेच्चैव इन्द्रियाणि तथात्मनि ।। ११५ ।।

यं यं श्रृणोति कर्णाभ्यां प्रियं वाप्यथवाऽप्रियम् ।
तं तमात्मेति संपश्यन् प्रत्याहारस्स उच्यते ।। ११६ ।।

सुखमुष्णं समं दुःखं वाचा संस्पृश्यते तु यत् ।
तं तमात्मेति संपश्यन् प्रत्याहारः स उच्यते ।। ११७ ।।

अगन्धमथवा गन्धं यं यं जिघ्रेति नासया ।
तं तमात्मेति संपश्यन् प्रत्याहारः स उच्यते ।। ११८ ।।

चन्द्रामृतमयीं धारां प्रत्याहरति भास्करः ।
तं प्रत्याहरणं यं तु प्रत्याहारः स उच्यते ॥ ११९ ॥

एकांस्त्रि युज्यते त्वाभ्यां आगता सोममण्डलात् ।
तृतीयो यः पुनस्ताभ्यां स भवेच्चाजरामरः ॥ १२० ॥

नाभिमध्ये वसत्येषा भास्करो दहनात्मकः ।
अमृतात्मा स्थितो नित्यं तालुमध्ये तु चन्द्रमाः ॥ १२१ ॥

वर्षत्यधोमुखं चन्द्रो ग्रसत्यूर्ध्वमूखो रविः ।
विज्ञातस्य करणं तत्र येन पीयूषमाप्यते ॥ १२२ ॥

ऊर्ध्वं नाभिरधस्तालु ऊर्ध्वं भानुरधश्शशी ।
करणं विपरीताख्यं गुरुवाक्येन लभ्यते ॥ १२३ ॥

त्रिधा बद्धो वृषो यत्र रोरवीति महान् पुनः
अनाहतं च तच्चक्रं योगिनो ह्यतिदुःखभित् ॥ १२४ ॥

अनाहतमतिक्रम्य नाकृष्य मणिपूरकात् ।
प्राप्ते प्राणि तथा पद्मं योगिनाममृतायते ॥ १२५ ॥

ऊर्ध्वं षोडशपद्मपत्रगलितं प्राणादवाप्तं हठात् ।
ऊर्ध्वास्ये रसनां नियम्य विवरे शक्तो परां चिन्तयन् ॥ १२६

उत्कल्लोलकलाजलं सुविमलं जिह्वाकुलं यः पिबेत् ।
निर्दोषस्य मृणालकोमलवपुः योगी चिरं जीवति ॥ १२७ ॥

काकचञ्चुपुटास्येन शीतलं सलिलं पिबेत् ।
मासार्धेन संमोहो सर्वरोगविवर्जितः ॥ १२८ ॥

विशुद्धं परमं चक्रं भूत्वा सोमकलात्मकम् ।
उन्मार्गेनात्र जलं याति वञ्चयित्वा मुखे रवौ ॥ १२९ ॥

प्राणापानविधानेन योगी भवति निर्जरः ।
रसनातालुमूलेन य प्राणं सततं पिबेत् ॥ १३० ॥

बध्वा सोमकलाजलं सुविमलं कर्णस्थलादूर्ध्वतो ।
नासान्तो सुचिरेण याति गमनद्वारं ततः सर्वतः ॥ १३१ ॥

ऊर्ध्वास्ये भ्रुवसन्निवेश नयने सिक्ताङ्गगात्रं पिबेत् ।
एवं यो विजितेन्द्रियमना नवास्ति तस्य क्षयः ॥ १३२ ॥

ऊर्ध्वजिव्हास्ततो भूत्वा सोमपानं करोति यः ।
मासार्धे नात्र सन्देहो मृत्युं जयतु योगवित् ॥ १३३ ॥

सम्पीड्य रसनाग्रेण राजदण्डैर्बिलं महत्
ध्यात्वामृतमयीं देवीं षण्मासेन कविर्भवेत् ॥ १३४ ॥

बध्नंमूर्ध्वफलं येन तेन विष्णुं निवारितम् ।
अजरामरमाप्नोति यथा पञ्चमुखो हरः ॥ १३५ ॥

आसनेन समायुक्तः प्राणायामेन च संयुतः ।
प्रत्याहारेण सम्पन्नो धारणं च समभ्यसेत् ॥ १३६ ॥

सर्वद्वाराणि बध्नाति यदूर्ध्वंतु बिलं धृतम् ।
न मज्जत्यत्यमृतं क्वापि सम्पन्नाः पञ्चधारणाः ॥ १३७ ॥

चुं.........तायद्धि लम्बिकाग्रमनिशं जिह्वा रसस्यन्दिनी ।
स क्षीराकटुकाथदुग्धसदशा मध्वाज्यतुल्योधवो ॥ १३८ ॥

याधिनां हरणं जरान्तकरणं शास्त्रागमो धीरणम् ।
तस्य स्यादमृतत्वमष्टगुणकं सिद्धाङ्गनाकर्षणम् ॥ १३९ ॥

अमृतं पूर्णदेहस्य योगिनो द्वित्रिवत्सरात् ।
ऊर्ध्वं प्रवर्तते तस्य अणिमादिगुणोदयः ॥ १४० ॥

नित्यं सोमकलापूर्णं देही देहं न मुञ्चति ।
आसनेन समायुक्तः प्राणायामेन संयुतः ॥
प्रत्याहरणसम्पन्नः धारणं च समभ्यसेत् ॥ १४१ ॥

भूरादिपंचभूतानां धारणा च पृथक् पृथक् ।
मनसो निश्चलत्वेन धारणा च विधीयते ॥ १४२ ॥

यः पृथ्वी हरितालहेमरुधिरातत्वेलकारान्वितम् ।
संयुक्तं कमलासनेन हि चतुःकोणा हरिस्थायिनी ॥ १४३ ॥

प्राणं तत्र विनीय्य पंच घटिकाचित्तान्वितं धारयेत् ।
येषां स्तंभकरी सदा क्षितिजयाकुर्यात्ततो धारणा ॥ १४४ ॥

अर्धेन्दुप्रतिमं च कुन्दधवलं कर्णे च तत्त्वस्थितं ।
तत्पीयूषवकारबीजसहितं युक्तं सदा विष्णुना ॥ १४५ ॥

प्राणं तत्र विलीय्या पंचघटिकाचित्तान्वितं धारयेत् ।
विषाग्निः सह कालकूट रजिना तद्वारुणी धारणा ॥ १४६ ॥

तालौ संस्थितमिन्द्रगोपसदृशं तत्वं त्रिकोणान्वितम्
तेजो रेफमयं प्रवालरुचिरं रुद्रेण सत्संगतम् ॥ १४७ ॥

प्राणं तत्र विलीन पंच घटिका चित्तान्वितं धारणा ॥ १४८ ॥

तेषां वह्निमसंसलं ज्वलते वैश्वानरी धारणा ।
यद्भिन्नांजनपुंजसन्निभमिदं दृष्ट्वा भ्रुवोरन्तरे ॥ १४९ ॥

तत्त्वं सत्यमयं यकारसहितं यत्रेश्वरो देवता ।
प्राणं तत्र विनीय्य पंचघटिका चित्तान्वितं धारयेत् ॥ १५० ॥

येषां योगमनं (लं) करोति यमिनां सा वायवी धारणा ।
आकाशं शुचिशुद्ध वा सदृशं यद्ब्रह्मरन्ध्रस्थितम् ॥ १५१ ॥

तन्मध्ये सदाशिवेन सहितं युक्तं यकाराक्षरम् ।
प्राणं तत्रविलीनपंचघटिका चित्तान्वितं धारयेत् ॥ १५२ ॥

तेषां मोक्षकवाटभेदनपटुः प्रोक्ता नभोधारणा ।
स्तम्भी निद्रा — चैव दाहिनी भ्रामिणी तथा ॥ १५३ ॥

शोषणा च भवत्येषा भूतानां पञ्चधारणा ॥ १५४ ॥

कर्णानां मधुरस्सर्वा धारणा पञ्च दुर्लभाः ।
विज्ञाताः सततं येन सर्व पापैः प्रमुच्यते ॥ १५५ ॥

सर्व छित्वा समायुक्तं योगिनो हृदि वर्तते ॥
यस्तत्त्वे निश्चलं चेतः तद्ध्यानं च प्रचक्षते ॥ १५६ ॥

द्विधा भवति तद्ध्यानं सगुण निर्गुणं तथा ।
सगुणं वर्णभेदेन निर्गुणं केवलं विदुः ॥ १५७ ॥

अश्वमेधसहस्राणि वाजपेयशतानिच ।
एकस्य ध्यानयोगेन कलां नार्हन्ति षोडशीं ॥ १५८ ॥

अन्तश्चेता बहिश्चक्षुरधिष्ठाय सुखासनम् ।
समत्वंच शरीरस्य ध्यानमुद्रेति कीर्तिता ॥ १५९ ॥

आधारं प्रथमं चक्रं तप्तकाञ्चनसन्निभम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा मुञ्चति किल्बिषम् ॥ १६० ॥

स्वाधिष्ठानं द्वितीयं च सन्माणिक्यशिखोपमम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा संशोभते जगत् ॥ १६१ ॥

हृदाकाशस्थितं चक्रं प्रचण्डरवितेजनम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा ब्रह्ममयो भवेत् ॥ १६२ ॥

सततं कर्णिकामध्ये विशुद्धं चक्रमुच्यते ।
नासाग्रे दृष्टिमादाय ध्यात्वा दुःखात्प्रमुच्यते ॥ १६३ ॥

स्रवत्पीयूषसम्पूर्णं लम्बिके चन्द्रमण्डलम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा मृत्युं प्रमुञ्चति ॥ १६४ ॥

भ्रुवोर्मध्ये स्थितं देवं स्निग्धमौक्तिकसन्निभम् ।
नासाग्रे दृष्टिमादाय ध्यात्वानन्दमयं भवेत् ॥ १६५ ॥

ध्यानेन लक्षणं नित्यं भ्रूमध्ये परमेश्वरम् ।
आत्मना वर्जितं प्राण योगी योगमवाप्नुयात् ॥ १६६ ॥

निर्गुणञ्च शिवं शान्तं गगने विश्वतोमुखम् ।
भ्रूमध्ये दृष्टिमादाय ध्यात्वा ब्रह्ममयो भवेत् ॥ १६७ ॥

निर्मलं गगनाकारं मरीचिजलसन्निभम् ।
आत्मानं सर्वगं ध्यात्वा योगी योगमवाप्नुयात् ॥ १६८ ॥

गुदं मेढ्रश्च नाभिश्च हृदयं चक्रमूर्ध्वतः ।
घंटिका लम्बिका स्थानं भ्रमध्यश्च नभोबिलम् ॥ १६९ ॥

कथितानि चैवैतानि ध्यानस्थानानि योगिनाम् ।
उपाधितत्त्वयुक्तानि कुर्वन्त्यष्टगुणोदयम् ॥ १७० ॥

उपातिष्ठितया तत्त्वं द्वयमेतमुदाहृतम् ।
उपाधि प्रोच्यते वर्णः तत्त्वमात्माभिधीयते ॥ १७१ ॥

उपाधिरन्यथा ज्ञानं तत्त्व संस्थितिरन्यथा ।
समस्तोपाधि निर्मुक्तं तत्तत्त्वं योगिनो विदुः ॥ १७२ ॥

शब्दादीनां च तन्मात्रं यावत्कर्मादिषु स्थितम् ।
उपाधिवर्णयोगेन दृश्यते स्फटिको मणिः ॥ १७३ ॥

युक्तयः शक्तिभेदेन तत्सदात्म प्रकाशिते ।
विरजं परमाकाशं यद्यदक्षरमव्ययम् ।
स्तौति श्रुतिकृतिरहोरात्रं तत्त्वं तत्त्वविदोविदुः ॥ १७४ ॥

तावद्व्यवस्थितं ध्यानं तत्समाधिपरं तपः ।
धारणं पञ्च नाड्यस्तु ध्यानं षट् चैव नाडिकाः ॥ १७५ ॥

ये द्वादशचक्रेनैव समाधि प्राणसंयमः ।
अम्बुसैन्धवयोस्साम्यं यदा भवति योगतः ।
तथात्ममनसोरैक्यं समाधिः सोऽभिधीयते ॥ १७६ ॥

यथा संक्षीयते प्राणो मानसश्च विलीयते ।
तथा समरसैकत्वं समाधिः सोऽभिधीयते ॥ १७७ ॥

इन्द्रियाणि मनोवृत्तिरपरोक्षेपयाहि सः ।
अद्वयत्वं गते जीवे न मनो इन्द्रियाणि च ॥ १७८ ॥

न गन्धो न रसं रूपं न स्पर्शो न च निस्वनः ।
नात्मानञ्च परं वेद योगयुक्तः समाधिना ॥ १७९ ॥

अभेद्यः सर्वशास्त्राणां अबाध्यः सर्वदेहिनाम् ।
बाध्यते न च कालेन बाध्यते न च कर्मणा ॥ १८० ॥

साध्यते न च केनापि योगियुक्तः समाधिना ।
अग्राह्यो मन्त्रशास्त्राणां योगियुक्तः समाधिना ॥ १८१ ॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १८२ ॥

निरातङ्कं निरालम्बं निष्प्रपञ्चं निराश्रयम् ।
निरामयं निराकारं तत्त्वं तत्त्वविदो विदुः ॥ १८३ ॥

निर्मलं निश्चलं नित्यं निर्गुणं निष्क्रियं महत् ।
व्योमविज्ञानमानन्दं ब्रह्म ब्रह्मविदो विदुः ॥ १८४ ॥

कातु दृष्टान्त निर्मुक्तमनुबन्धेरगोचरम् ।
व्योमविज्ञानमानन्दं ब्रह्म ब्रह्मविदो विदुः ॥ १८५ ॥

दुग्धे क्षीरं घृते सर्पिर्वह्नौ वह्निरिवार्पितम् ।
अव्ययत्वं व्रजेदेवं योगिलीनः परात्परे ॥ १८६ ॥

भववनजवह्निं मुक्तिसोपानमार्गम् ।
प्रकटितपरमार्थं ग्रन्थगुह्यञ्च गुह्यम् ॥ १८७ ॥

सकृदपि पठतिच मयः श्रृणोति प्रबद्धम् ।
स भवति भुवि भव्यो भाजनं मुक्तिमुक्तयोः ॥ १८८ ॥

॥ इति श्रीगोरक्षनाथविरचिते योगशास्त्रे योगमार्तण्डं समाप्तम् ॥
॥ साम्बसदाशिवार्पणमस्तु ॥

॥ श्रीराम ॥

॥ गोरख उपनिषद् ॥

इस प्रकार प्राणायाम पातकरूपी इंधन के लिये अग्नि है यह पापों को जला डालता है। यह पापों के समुद्र के लिये महासेतु है। योगीजन सदा ऐसा कहते है ।। ५३ ।।

आसनेन रुजो हन्ति प्राणायामेन पातकम् ।
विकारं मानसं योगी प्रत्याहारेण सर्वदा ।। ५४ ।।

योगी आसन से रोग नष्ट करता है, प्राणायाम से पातक नष्ट करता है और प्रत्याहार से मानसिक विकार नष्ट करता है ।। ५४ ।।

चन्द्रामृतमयी धारां प्रत्याहरति भास्करः ।
तत्प्रत्याहरणं तस्य प्रत्याहारः स उच्यते ।। ५५ ।।

चन्द्रमा की अमृतधारा को सूर्य रोक देता है अर्थात् सुखा देता है या नष्ट कर देता है। जो इस अवरोध को रोक दे उसे प्रत्याहार कहा जाता है ।। ५५ ।।

एका स्त्री भुज्यते द्वाभ्यामागता सोममंडलात् ।
तृतीयो यो भवेत्ताभ्यां स भवत्यजरामरः ।। ५६ ।।

सोममण्डल से आयी हुई एक स्त्री (चन्द्रामृतमयी धारा) दो के द्वारा युक्त होती है। उन दोनों से भिन्न तीसरे के होने से वह (योगी) अजर-अमर हो जाता है। (यह इस योग की एक प्रक्रिया है जो सुधा और नाड़ियों से सम्बन्धित है जिसे साधकों को उस सम्प्रदाय के योगियों से जानना चाहिये) ।। ५६ ।।

नाभिदेशे भवत्येको भास्करो दहनात्मकः ।
अमृतात्मा स्थितो नित्यं तालुमूले च चन्द्रमाः ।। ५७ ।।

नाभि-स्थान में दहन (जलाकर भस्मसात) करनेवाला सूर्य स्थित है और तालुमूल (तालु मध्य) में अमृतात्मा (अमृत निस्पन्दित करते हुये) चन्द्रमा स्थित है ।। ५७ ।।

वर्षत्यधोमुखश्चन्द्रो ग्रसत्यूर्ध्वमुखो रविः ।
ज्ञातव्यं करणं तत्र येन पीयूषमाप्यते ।। ५८ ।।

(तालुमूल में) अधोमुख चन्द्रमा अमृत बरसाता है और (नाभि देश में) ऊर्ध्वमुख सूर्य उसे ग्रस (सोख) लेता है। योगी को वह (विधि) जाननी चाहिये जिससे अमृत प्राप्त हो ।। ५८ ।।

ऊर्ध्वनाभिरधस्तालु ऊर्ध्वभानुरधः शशी।
करणं विपरीताख्यं गुरुवक्त्रेण लभ्यते ।। ५९ ।।

नाभि ऊर्ध्व (ऊपर) और तालु अधः (नीचे) तथा सूर्य ऊपर और चन्द्रमा नीचे हो जाये, यह विपरीत करने की क्रिया (किसी योगी) गुरु के मुख से जाननी चाहिये ।। ५९ ।।

त्रिधा बद्धो वृषो यत्र रौरवीति महारवनम्।
अनाहतं च तच्चक्रं हृदये योगिनो विदुः ।। ६० ।।

वृषभ (सांड़े) तीन तरफ से बंधा हुआ है और घोर गर्जना कर रहा है। हृदय में यह अनाहत चक्र है जिसे योगी लोग जानते है ।। ६० ।।

अनाहतमतिक्रम्य चाक्रम्य मणिपूरकम्।
प्राप्ते प्राणे महापद्मं योगित्वममृतायते ।। ६१ ।।

मणिपुर और अनाहत के अतिक्रमण होने पर प्राण की अवस्थिति महापद्म में होती है। (अनाहत में पहुचने पर ही) योगित्व (योगी कहलाने लायक) की संज्ञा होती है जो अमृतमय है ।। ६१ ।।

विशब्दः संस्मृतो हंसो निर्मलः शुद्ध उच्यते।
अतः कण्ठे विशुद्धाख्यं चक्रं चक्रविदो विदुः ।। ६२ ।।

विशद्ध (निरश्वब्दता) हंस का द्योतक और निर्मलता को शुद्धि कहा जाता है। इसलिये कण्ठ में विशुद्धि चक्र है। (इसे शुद्धि का चक्र भी कहा जाता है जहां सब कुछ शुद्ध और संतुलित हो जाता है) इसे (इस तथ्य को) चक्रों के ज्ञाता जानते है ।। ६२ ।।

विशुद्धे परमे चक्रे धृत्वा सोमकलाजलम्।
मासेन न क्षयं याति वंचयित्वा मुखं रवेः ।। ६३ ।।

(विशुद्धि चक्र के जागृत होने पर) परम विशुद्धि चक्र में चन्द्रमा की कलाओं का जल (अमृत) धारण करने पर महीने भर उसका क्षय नहीं होता

और वह (अमृत) सूर्य के मुख में जाने से बच जाता है ।। ६३ ।।

संपीड्य रसनाग्रेण राजदंतबिलं महत् ।
ध्यात्वाऽमृतमयी देवीं षण्मासेन कविर्भवेत् ।। ६४ ।।

जिह्वा के अग्रभाग से राजदन्त के छिद्र को दबाकर और उस अमृतमयी देवी का ध्यान कर (जो योगी उस अमृत को धारण करता है वह) छः महीने में कवि हो जाता है ।। ६४ ।।

अमृतापूर्णदेहस्य योगिनो द्वित्रिवत्सरात् ।
ऊर्ध्वं प्रवर्तते रेतोप्यणिमादिगुणोदयः ।। ६५ ।।

योगी दो-तीन वर्षों तक देह को अमृतपूर्ण बनाये रखे तो उसका रेतस् ऊर्ध्वगामी हो जाता है और उस देह में अणिमादि सिद्धियों का उदय होने लगता है ।। ६५ ।।

इन्धनानि यथा वह्निस्तैलैर्वर्तिं च दीपकः ।
तथा सोमकलापूर्णं देही देहं न मुंचति ।। ६६ ।।

जिस प्रकार इंधन होने पर अग्नि जलती रहती है, तेल से पूर्णवर्तिका होने पर दीपक जलता रहता है। उसी प्रकार सोमकला (अमृत) पूर्ण देह को देही (आत्मा) त्याग नहीं करती। (उस अमृतपूर्ण देह में वह बनी रहती है)।। ६६ ।।

आसनेन समायुक्तः प्राणायामेन संयुतः ।
प्रत्याहारेण संयुक्तो धारणाश्च समभ्यसेत् ।। ६७ ।।

आसन, प्राणायाम और प्रत्याहार से संयुक्त (इन तीनों के पूर्ण अभ्यास सिद्ध) होने पर धारणा का अभ्यास करना चाहिये ।। ६७ ।।

हृदये पंचभूतानां धारणाश्च पृथक् पृथक् ।
मनसो निश्चलत्वेन धारणा च विधीयते ।। ६८ ।।

हृदय में पंचभूतों (पृथ्वी, जल, अग्नि, वायु और आकाश) की धारणा पृथक-पृथक् करनी चाहिये। मन की निश्चलता से धारणा होती है। (एकाग्रता को ही धारणा कहा जाता है।)।। ६८ ।।

या पृथ्वी हरितालदेशरुचिरा पीता लकरान्विता
संयुक्ता कमलासनेन हि चतुष्कोणा हृदि स्थायिनी।
प्राणं तत्र विनीय पंचघटिकाश्चित्तान्वितं धारये-
देषा स्तम्भकरी सदा क्षितिजयं कुर्याद्भुवो धारणा।। ६९।।

जिसे पृथ्वी (तत्त्व या महाभूत) कहते है वह (मूलाधार) में कमलासन (चार दलों वाले कमल) पर हरिताल की तरह पीली आभा से युक्त पीले रंग के चतुष्कोण के मध्य पीताभलंकार (लं बीज से युक्त) है वहां पाचं घटिका तक प्राण और चित्त को स्थिर करके उसकी धारणा करनी चाहिये। यह स्तम्भकारी है और इसके द्वारा पृथ्वी (तत्त्व या भूत) पर जय प्राप्त करनी चाहिये। यही पृथ्वी धारणा है।। ६९।।

अर्धेन्दुप्रतिमं च कुंदधवलं कंठेबुतत्त्वं स्थितं
यत्पीयूषवकार बीज सहितं युक्तं सदा विष्णुना।
प्राणं तत्र विनीय पंचघटिकाश्चित्तान्वितं धारये-
देषा दुर्वहकालकूटजरणा स्याद्वारिणी धारणा।। ७०।।

(स्वाधिष्ठान चक्र में) जहां अर्ध चन्द्रमा है उसके कण्ठ (ऊपरी भाग में) कुन्द-पुष्प के समान धवल जल तत्त्व स्थित है और वहां विष्णु के साथ अमृत-स्वरूप वकार बीज है। वहां पर पांच घटिका तक प्राण और चित्त को स्थित कर धारणा करनी चाहिये। यह दुर्वह (महाकठिन) कालकूट (हलाहल विष) को भी क्षीण करनेवाला है। यह वारिणी (जल महाभूत की) धारणा है।। ७०।।

यत्तालस्थितमिंद्रगोपसदृशं तत्त्वं त्रिकोणोज्ज्वलं
तेजोरेफमयं प्रवालरुचिरं रुद्रेण यत्संगतम्।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वितं धारये-
देषा वह्निजयं सदा विदधते वैश्वानरी धारणा।। ७१।।

(मणिपुर चक्र में) जल से भरे बादलों के रंग वाले कमलों के मध्य रक्तिम त्रिकोण में रक्त वर्ण का रकार (रं बीज) है जिस पर रक्त वर्णी रूद्र हैं वहां पर पांच घटिका तक प्राण और चित्त स्थिर कर धारणा करने से अग्नि-जय होती है। यह वैश्वानरी (अग्नि-भूत की) धारणा है ।। ७१।।

यद्भिन्नांजनपुंजसान्निभमिदं तत्त्वं भ्रुवोरन्तरे
वृत्तं वायुमयं यकारसहितं यत्रेश्वरो देवता।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वितं धारये-
देषा खे गमनं करोति यमिनां स्याद्वायवी धारणा ।। ७२ ।।

(अनाहत चक्र में) जहां भिन्नाञ्जनपुंजसान्निभ (धूम वर्ण का) वायु तत्त्व का यकार (यं बीज) है। और उसके देवता ईश्वर है, वहां पांच घटिका, तक प्राण और चित्त को स्थिर कर धारणा करनी चाहिये जिससे योगी आकाश गमन में समर्थ होता है। यह वायवी (वायु भूत की) धारणा है ।। ७२ ।।

आकाशं सुविशुद्धवारिसदृशं यद्ब्रह्मरन्ध्रे स्थितं,
तत्राद्येन सदाशिवेन सहितं शांतं हकाराक्षरम्।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वयं धारये-
देषा मोक्षकवाटपाटनपटुः प्रोक्ता नभोधारणा ।। ७३ ।।

(विशुध्दि चक्र में) जहां विशुद्ध जल के सदृश (उज्ज्वल) आकाश-तत्त्व स्वरूप, हकार (हं बीज) शान्त सदाशिव के साथ स्थित है, वहां पांच घटिका तक प्राण और चित्त को स्थिर कर धारणा करनी चाहिये। यह धारणा मोक्ष के कपाट को खोलने वाली है। इसे नभोधारणा (आकाश-भूत की धारणा) कहते है ।। ७३ ।।

स्तम्भनी द्रावणी चैव दहनी भ्रामणी तथा।
शोषणी च भवन्त्येव भूतानां पंचधारणाः ।। ७४ ।।

स्तम्भनी, द्राविणी, दहनी, भ्रामणी और शोषणी ये (पंच) भूतों की पांच धारणाएं है ।। ७४ ।।

कर्मणा मनसा वाचा धारणाः पंच दुर्लभाः।
विधाय सततं योगी सर्वपापैः प्रमुच्यते ।। ७५ ।।

कर्म, मन और वाणी से (अभ्यास करने योग्य) ये पांच धारणाएं दुर्लभ है। इनका सतत् अभ्यास करने से योगी सभी पापों से मुक्त हो जाता है ।।७५ ।।

सर्व चिंतासमावर्ति योगिनो हृदि वर्तते।
यत्तत्वे निश्चितं चेतस्ततु ध्यानं प्रचक्षते ।। ७६ ।।

योगियों के हृदय में सभी चिन्तनो में जो एक धातु निर्मल चिन्तन है। उसमें निश्चित (एकतान रूप में) चित्त लग जाये उसे ध्यान कहते है ।। ७६ ।।

द्विधा भवति तद्ध्यानं सगुणं निर्गुणं तथा।
सगुणं वर्णभेदेन निर्गुणं केवलं विदुः ।। ७७ ।।

वह ध्यान दो प्रकार का है। एक सगुण और दुसरा निर्गुण। सगुणं में वर्णभेद (रूपात्मक भेद) होता है, किन्तु निर्गुण में केवल (रूपाभाव-आकार-राहित्य) होता है ।। ७७ ।।

आधारं प्रथमं चक्रं तप्तकांचनसन्निभम्।
नासाग्रे दृष्टिमादाय ध्यात्वा मुंचति किल्बिषम् ।। ७८ ।।

तप्त स्वर्ण के समान (पीले रंग का) आधार (मूलाधार) प्रथम चक्र है। नासाग्र दृष्टि रखकर उसका ध्यान करने से किल्विष (दोष, रोग) नष्ट हो जाता है ।। ७८ ।।

स्वाधिष्ठानं द्वितीयं तु सन्माणिक्यसुशोभनम्।
नासाग्रे दृष्टिमादाय ध्यात्वा मुंचति पातकम् ।। ७९ ।।

माणिक्य-वर्ण (सिन्दूरी रंग का) स्वाधिष्ठान द्वितीय चक्र है। नासाग्र-दृष्टि रखकर उसका ध्यान करने से पातक नष्ट हो जाता है ।। ७९ ।।

तरुणादित्यसंकाशं चक्रं च मणिपूरकम्।
नासाग्रे दृष्टिमादाय ध्यात्वा संक्षोभजेज्जगत् ।। ८० ।।

तरुण सूर्य के सदृश वर्ग (रक्त वर्ण का) मणिपूरक (तृतीय) चक्र है। नासाग्र दृष्टि रखकर उसका ध्यान करने से (योगी जगत् को संक्षोभित करने में समर्थ होता है।)।। ८० ।।

(श्लोक संख्या ८१ लुप्त है).

विद्युत्प्रभावं हृत्पद्मे प्राणायामविभेदनैः।
नासाग्रे दृष्टिमादाय ध्यात्वा ब्रह्ममयो भवेत् ।। ८२ ।।

प्राणायाम के द्वारा भेदन कर विद्युत की आभा (रक्तोज्ज्वल अनाहतं) हृदयपदम् में नासाग्र दृष्टि रखकर ध्यान करने से (योगी) ब्रह्ममय हो जाता है।। ८२।।

संततं घटिकामध्ये विशुद्धं चामृतोद्भवम्।
नासाग्रे दृष्टिमादाय ध्यात्वा ब्रह्ममयो भवेत्।। ८३।।

घण्टिका के मध्य (उपजिह्वा के मध्य दीपक प्रभा वाले) विशुद्धि चक्र जहां निरन्तर अमृत का उद्भव होता रहता है, नासाग्र दृष्टि रखकर उस पर ध्यान करने से (योगी) ब्रह्ममय होता है।। ८३।।

भ्रुवोर्मध्ये स्थितं देवं स्निग्धमौक्तिकसन्निभम्।
नासाग्रे दृष्टिमादाय ध्यात्वाऽऽनंदमयो भवेत्।। ८४।।

दोनों भौंहों के मध्य (आज्ञा चक्र में) में माणिक्य-प्रज्ञा के सदृश (इतराख्य लिंग के साथ) देदीप्यमान देव (परमेश्वर) स्थित है। नासाग्र दृष्टि रखकर वहां ध्यान करने से (योगी) आनन्दमय हो जाता है।। ८४।।

निर्गुणं च शिवं शांतं गगने विश्वतोमुखम्।
नासाग्रे दृष्टिमादाय ध्यात्वा दुःखाद्विमुच्यते।। ८५।।

गगन-रूप (सहस्त्रार) में विश्वोन्मुख निर्गुण परम शान्त शिव है। नासाग्र-दृष्टि रखकर वहां ध्यान करने से सभी दुःखों से मुक्ति मिल जाती है।। ८५।।

गुदं मेढ्रं च नाभिं च हृत्पद्मं च तदूर्ध्वतः।
घंटिकां लंपिकास्थानं भ्रूमध्ये परेश्वरम्।। ८६।।
निर्मलं गगनाकारं मरीचिजलसन्निभम्।
आत्मानं सर्वगं ध्यात्वा योगी योगमवाप्नुयात्।। ८७।।

गुदा, मेढ्र, नाभि, हृदयपद्म तथा उसके ऊपर घण्टिका और लम्पिका स्थान (तालु स्थान) में भ्रूमध्य में परमेश्वर तथा अतिशय प्रकाश से भास्वर गगनस्वरूप निर्मल-सर्वव्यापी आत्मा (परम आत्मा) का ध्यान करने से योगी को योग (समाधि) की प्राप्ति होती है।। ८६-८७।।

कथितानि यथैतानि ध्यानस्थानानि योगिनाम्।
उपाधितत्त्वयुक्तानि कुर्वन्त्यष्टगुणोदयम्।। ८८।।

योगियों के लिये ये ध्यान-स्थान कहे गये है ये आठ गुणों के उदय को उपाधि और तत्त्व से युक्त कर देते है।। ८८।।

उपाधिश्च तथा तत्त्वं द्वयमेवमुदाहृतम् ।
उपाधिः प्रोच्यते वर्णस्तत्त्वमात्माभिधीयते ।। ८९ ।।

उपाधि और तत्त्व ये दोनों पृथक हैं। वर्ण (आकार) को उपाधि कहा जाता है तथा तत्त्व को आत्मा कहते हैं ।। ८९ ।।

उपाधिरन्यथाज्ञानं तत्त्वं संस्थिमयन्यथा ।
समस्तोपाधिविध्वंसि सदाभ्यासेन योगिनाम् ।। ९० ।।

उपाधि अन्यथाज्ञान (मिथ्याज्ञान) है, किन्तु तत्व वास्तविक ज्ञान है। योगी निरन्तर अभ्यास से सभी उपाधियों का विध्वंस (नष्ट) करते है ।। ९० ।।

आत्मवर्णेन भेदेन दृश्यते स्फाटिको मणिः ।
मुक्तो यः शक्तिभेदेन सोऽयमात्मा प्रशस्यते ।। ९१ ।।

स्फटिक मणि पर आत्मवर्ण (जिस वर्ण का प्रतिबिम्ब पड़ता है) उसी वर्ण (उसी रंग) का यह दिखता है। (आत्मा के साथ भी ऐसा ही होता है।) वर्ण (रंग संस्कार आदि उपाधियों) के शक्ति-भेद से जो मुक्त है, वही आत्मा प्रशस्त है ।। ९१ ।।

निरातंकं निरालंबं निष्प्रपंचं निराश्रयम् ।
निरामयं निराकारं तत्त्वं तत्त्वविदो विदुः ।। ९२ ।।

निरातंक (निर्भय), निरालम्ब (आलम्बन रहित), निष्प्रपंच (प्रपंच से भिन्न), निराश्रय (आश्रय रहित), निरामय (रोग रहित), निराकार (किसी भी प्रकार के आकार से रहित) स्वरूप वाला तत्व (आत्मा) है। तत्वविद् ऐसा जानते है ।। ९२ ।।

शब्दाद्याः पंच या मात्रा यावत्कर्णादिषु स्मृताः ।
तावदेव स्मृतं ध्यानं तत्समाधिरतः परम् ।। ९३ ।।

शब्द आदि (शब्द, स्पर्श, रूप, रस, गंध) कर्ण आदि इन्द्रियों के विषय है। यहां तक स्मृति ध्यान है। इसके उपरान्त समाधि है ।। ९३ ।।

यदा संक्षीयते प्राणो मानसं च विलीयते ।
तदा समरसैकत्वं समाधिरभिधीयते ।। ९४ ।।

जब प्राण क्षीण हो जाते है, मन विलीन हो जाता है। तब समरसत्व (एकरसत्व) हो जाता है, वही समाधि है।। ९४।।

(श्लोक संख्या ९५ लुप्त है)

धारणाः पंचनाड्यस्तु ध्यानं च षष्टिनाडिकाः।
दिनद्वादशकेनैव समाधिः प्राणसंयमः।। ९६।।

धारणा पांच नाड़ी (दण्ड-चौबीस मिनट का एक दण्ड या एक नाड़ी होती है)। और साठ नाड़ी तक ध्यान होता है। बारह दिनों तक समाधि होती है। यही तक प्राण-संयम होता है।। ९६।।

न गंधं न रसं रूपं न स्पर्शं न च निःस्वनम्।
आत्मानं न परं वेत्ति योगी युक्तः समाधिना।। ९७।।

जब योगी के समक्ष (उसके चित्त में) न गन्ध रहती है, न रस रहता है न रूप रहता है, न स्पर्श रहता है, न शब्द रहता है। और वह आत्मा से भिन्न कुछ भी नहीं जानता (देखता) तो यह समाधि है। (ऐसा होना समाधि में ही संभव है। और ऐसा योगी मुक्त योगी है।)।। ९७।।

खाद्यते न च कालेन बाध्यते न च कर्मणा।
साध्यते न च केनापि योगी युक्तः समाधिना।। ९८।।

समाधि से युक्त ऐसा योगी काल (मृत्यु) के द्वारा कवलित नहीं होता कर्म से बाधित नहीं होता, और किसी के द्वारा साधित भी नहीं होता।। ९८।।

निर्मलं निश्चलं नित्यं निष्क्रिय निर्गुणं महत्।
व्योमविज्ञानमानंदं ब्रह्म ब्रह्मविदो विदुः।। ९९।।

ब्रह्म निर्मल, निश्चल, नित्य, निष्क्रिय, महत् व्योम-रूप, विज्ञान-रूप आनन्द-रूप है। ब्रह्मविद् यह जानते है।। ९९।।

दुग्धे क्षीरं घृते सर्पिरग्नौ वह्निरिवार्पितः।
अद्वयत्वं व्रजेन्नित्यं योगवित्परमे पदे।। १००।।

जिस प्रकार दुग्ध में क्षीर, घृत में सर्पिस (घृत) और अग्नि में वह्नि

अर्पित किया जाता है। (युग्म के दोनों शब्द एक ही अर्थ के द्योतक है) उसी प्रकार योगविद् परम पद में अद्वयभाव से नित्य निवास करते है ।। १०० ।।

भवभयवने वह्निर्मुक्तिसोपानमार्गतः ।
अद्वयत्वं व्रजेन्नित्यं योगवित्परमे पदे ।। १०१ ।।

संसार के भय के जंगल में अग्नि के समान, मुक्ति के सोपान-मार्ग से परम पद में अवस्थित होकर योगविद् नित्य (निरन्तर) अद्वय रूप में रहते हैं ।। १०१ ।।

।। इति श्री गोरक्षनाथप्रणीतः गोरक्षशतकम् समाप्तम् ।।

●●●

श्री पीताम्बरा पीठ

ह्लीं

दतिया(म.प्र.)

PRINTED AT : SHIV SHAKTI PRESS,NAGPUR

SARASWATĪBHAVANA-GRANTHAMĀLĀ

(Vol. 110)

General Editor
DR. BHĀGĪRATHA PRASĀDA TRIPĀTHĪ, 'VĀGĪŚA ŚĀSTRĪ'
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

GORAKṢA SIDDHĀNTA SAṂGRAHAḤ

Edited by
JANĀRDANA ŚĀSTRĪ PAṆḌEYA

VARANASI

1973

Published by
Director, Research Institute
Varanaseya Sanskrit Vishvavidyalaya
Varanasi–2

Available at—
Publication Section
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi–2

First Edition—500 Copies

Price Rs 10 50

Printed by :
Sri Ghana Shyama Upadhyaya
Manager
Varanaseya Sanskrit Vishvavidyalaya Press
Varanasi–2

सरस्वतीभवन-ग्रन्थमाला

(११०)

प्रधानसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

गवेषणालयसञ्चालकः

वाराणसेयसंस्कृतविश्वविद्यालये

गोरक्षसिद्धान्तसंग्रहः

(परिवर्धितं सशोधितं च संस्करणम्)

सम्पादकः

श्रीजनार्दनशास्त्री पाण्डेयः

वाराणस्याम्

२०३० तमे वैक्रमाब्दे १८९५ तमे शकाब्दे १९७३ तमे खिस्ताब्दे

प्रकाशकः—
सञ्चालकः
गवेषणालयस्य
वाराणसेय-संस्कृत-विश्वविद्यालये

प्राप्तिस्थानम्—
प्रकाशनविभाग,
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी-२

प्रथमं संस्करणम् : ५०० प्रतिरूपाणि
मूल्यम्—१०.५० रूप्यकाणि

मुद्रकः
श्रीघनश्याम उपाध्यायः
प्रबन्धकः
वाराणसेय-संस्कृत-विश्वविद्यालयीयमुद्रणालयस्य

प्रास्ताविकम्

रोगजरामृत्युभयाकुलो जिजीविषुर्मानवो नीरुक्त्वस्यामरत्वस्य च समासादनाय चिराद् दृश्यते प्रयतमानो भूमण्डले। रोगविखण्डनाय जरापसारणाय च ऋग्वेदोपवेद आयुर्वेदः प्रवर्तते सुपुरातनकालाद् भारते वर्षे। रुक्प्रतिक्रियात्मका नानाविधा आविष्कृता औषधयः, साम्प्रतं चाप्याविष्क्रियन्ते चिकित्सकैराविष्कारकैः। यद्यपि मृत्युजयार्थमपि बहुविधा यत्ना आस्थिताश्चिकित्साक्षेत्रे, सम्प्रत्यपि विधीयन्ते, तथापि न क्वापि भावितं साफल्यं तज्ज्ञैः। 'जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः' इति पातञ्जलयोगसूत्राद् जन्मजसिद्धिरोषधिजसिद्धिर्मन्त्रजसिद्धिस्तपोजसिद्धिः समाधिजसिद्धिश्चेति पञ्च सिद्धयो ज्ञायन्ते। तत्रामरत्वप्रतिपादनाय सिद्धिपरायणैः सिद्धसम्प्रदायानुयायिभिर्गोरक्षनाथादिभिरायुर्वेदे रसायनतन्त्रं पारदशक्तिप्रकाशकमाविष्कृतम्, अनादिकालतः प्रवर्तमाने योगमार्गे चाविर्भावितः पुरातनपरम्परातः किञ्चिद्विलक्षणो हठयोगः। तत्र गोरक्षनाथेन योगमार्गः सुव्यवस्थापित इति तद्ग्रन्थानां परिशीलनेन बुध्यते। तद्रचिताः प्रायशोऽष्टाविंशतिसंख्याका ग्रन्था संस्कृतभाषामया अन्ये च चत्वारिंशत्संख्याका हिन्दीभाषामयाः प्रथिताः।

गोरक्षनाथः

यद्यपि विभिन्नैः प्रमाणैर्गोरक्षनाथो दशमशताब्दीक एकादशशताब्दीको वा सिद्ध्यतीति लब्धवर्णानां मतम्, तथापि गोरक्षसिद्धान्तसंग्रहकारानुसारेण ब्रह्माण्डपुराणे ललितापुरवर्णने ललिताखण्डेऽपि गोरक्षनाथस्योल्लेखो विद्यते—

सिद्धैर्दिव्यर्षयश्चैव पवनाभ्यासिनोऽपरे।
गोरक्षप्रमुखाश्चान्ये योगिनो योगतत्पराः ॥ इति।

श्रीकृष्णकृतगोरक्षनाथस्तोत्रे गोरक्षस्तुतिस्तत्रास्तीति तन्मतम् (३८ पृ०)।

सिद्धमतपरम्परा

(सिद्धो नाथोऽवधूतश्चेत्यनर्थान्तरम्)

पद्मपुराणान्तर्गतकपिलगीतायां नवनाथानामुल्लेखः 'दत्तात्रेयादिसिद्धानां नवनाथास्तथैव

व' इति । शाबरतन्त्रानुसारेण द्वादश सिद्धाः सन्ति । ते चेमे—

१. आदिनाथः, २. अनादिः, ३. कालः, ४. अतिकालक, ५. कराल, ६. विकरालः, ७. महाकाल, ८. कालभैरवनाथ, ९. बटुक, १०. भूतनाथः, ११. वीरनाथः, १२. श्रीकण्ठश्चेति ।

शिष्यपरम्पराया द्वादश शिष्याः प्रसिद्धा । ते चेमे—

१. नागार्जुनः, २. जडभरतः, ३. हरिश्चन्द्र., ४. सत्यनाथः, ५. भीमनाथः, ६. गोरक्षनाथः, ७. चर्पटः, ८. अवद्यः, ९. वैराग्य, १०. कन्थाधारी, ११ जलन्धर, १२. मलयार्जुनश्चेति (द्र० १४, १५ पृ०) ।

सिद्धपरम्परायां तु नव सिद्धा. प्रथन्ते—१. श्रीगुरुरादिनाथ., २. मत्स्येन्द्रनाथः, ३. उदयनाथ, ४. दण्डनाथ, ५ सत्यनाथः, ६. संतोषनाथ., ७. कूर्मनाथः, ८. भवनार्जिः, ९. गोरक्षनाथश्चेति ।

सिद्धा एव नाथरूपत्वेन प्रसिद्धा । अस्य ग्रन्थकारस्यानुसारेण मण्डनमिश्रः (सुरेश्वराचार्यः) शङ्कराचार्यश्चोभावेव सिद्धोपदेशेन गृहीतावधूतावस्थौ जातौ (१४ पृ०) । कापालिकास्तान्त्रिकाः शाक्ताश्चास्यैव सम्प्रदायस्य शाखारूपाः ।

समन्वयकर्ताऽवधूत एव गुरुः

सिद्धसंप्रदाये यद्यपि सर्वेषा शास्त्राणा निन्दा कृता, तथापि हठयोगप्रदीपिकानुसारेण तत्र गुरुवाक्येन ज्ञान, मुक्तिः, स्थिति, सिद्धिरित्यादयो लभ्यन्त इति गुरुमहिमाऽङ्गीकृत एव (१२,३१ पृ०) । तस्मिन् मार्गे सर्वश्रेयोमूलभूतो गुरुरेव । स चावधूत एव, नान्यः । त्यागभोगाभ्यामलिप्तोऽप्यवधूतस्त्यागभोगप्रदः । स चाखिवर्णाश्रमी सर्वाधिकारिणा गुरूणामपि गुरुः प्रोक्त । पक्षपातविनिर्मुक्तः स एव ब्रह्म सपद्यते । अवधूतस्य व्यवहारस्त्वनियत एव । स क्वचिद् भोगी, क्वचित् त्यागी, क्वचित् पिशाचवद् नग्नः, क्वचिद् राजा, क्वचिच्चाचारी इत्येतादृशलक्षणलक्षितोऽवधूतो विधीयते । एव च सर्वसाधनशिरोमणियोगमूर्तिभूतोऽवधूत एव परमपुरुषार्थविचक्षणो भवति (८ पृ०) ।

योगस्तु कस्यापि सापेक्षो नास्ति । उत्तरावस्थाऽवधूत एवेति तान्त्रिकाणामयमेव सिद्धान्तः षट्शाम्भवरहस्ये दृश्यते (१४ पृ०) । अवधूतमार्गो दिव्यः । वेदान्ततात्पर्यलक्ष्य चावधूत एवास्ति (१४ पृ०) । यः सर्वदर्शनाना स्वरूपदर्शनेन समन्वयं करोति सोऽवधूतः, स योगी स्यात् । प्रारब्धकर्मनिर्मूलकरणमवधूतानामेव कर्म (१२ पृ०) । यः

सर्वान् प्रकृतिविकारान् अवधुनोति सोऽवधूत (१ पृ०)। तस्य व्युत्पत्तिरित्थ दृश्यते—

अनन्तानन्दब्रह्मज्ञः अकार तस्य लक्षणम् ।
वासना वर्जिता येन वक्तव्य च निरामयम् ।।
वर्तमानेषु वर्तेत वकार तस्य लक्षणम् ।
धूलिधूसरगात्राणि धूतचित्तनिरामयम् ।।
ध्यानधारणनिर्मुक्त धूकार तस्य लक्षणम् ।
तत्त्वचिन्ता येन धूता चिन्ता चेष्टाविवर्जिता ।।
तमहङ्कारनिर्मुक्तं तकार तस्य लक्षणम् । (२८ पृ०)

भक्तिपूर्वकमेतादृशगुरुप्रणामेन परमपदावाप्तिर्जायते (५ पृ०)। देहाभिमान एव पक्षपात.। गुणातीतत्वेन पक्षपातरहितस्यात्याश्रमिण एव मुक्तिप्रदगुरुत्व नान्यस्य कस्यापि। कुलाचारविहीनस्तु गुरुरेको हि दुर्लभः—

वर्णाश्रमाभिमानेन वर्तते श्रुतिकिङ्करः ।
अभिमानविहीनस्तु वर्तते श्रुतिमूर्द्धनि ।।

शीर्षण्यं रत्नम्—योगः

इह खलु संसारे योगो भोगश्चेति द्वौ पदार्थौ स्त । एतद् द्वय विना किमपि न स्यात्, सर्वस्याप्येतयोरन्तर्भूतत्वात् । तयोर्मध्ये योगे लग्ना महासिद्धा., भोगे तु संसारिणः। योगस्य फलं मुक्तिः, भोगस्य तु बन्ध इति। यद्यपि भोगाद् बन्धस्तथापि नानाविलासैर्विषयानन्दमनुभवति मानव आदौ। योगिना तु प्रथमतो मनाग् श्रमो भवेत्। 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्' इति। पश्चात् तु महानन्द इति सन्मार्गो योगमार्ग.।

'वेदस्य त्वभ्यासेऽप्यवधूतानां दोष एव स्यात्। वेदस्य पूर्वभागस्तु वर्णिनामेव, वेदान्तभागस्तु भिक्षूणामेव, योगमार्गोऽस्त्यवधूतानाम्। वेदान्ततात्पर्यं लक्ष्य चावधूत एवास्तीति ग्रन्थकृन्मतम्।

सर्वेषा वेदादिशास्त्राणामैदम्पर्यं योग एवास्ति। योगशास्त्रं तु सूक्ष्मम्। समुद्रे इतरवस्तु सुलभम्, रत्न तु श्रमेण लभ्यते। एवमेव वेदादिशास्त्रे व्यवहारादि सुलभम्, योगस्तु भूरिश्रमेण लभ्यते। यथा रत्नखनौ रत्नमेव लभ्यते, तथा योगशास्त्रे योग एव लभ्यते, नान्यदस्ति किञ्चिदसारं वस्तु। स च योगो गुरुकृपयाऽल्पश्रमेणैव प्राप्यः, सर्वं परित्यज्य सेवनीयः। योग एव पर साधनम्। श्रुतौ स्मृतौ च योगमार्गात् परो मार्गो नास्ति। यथोपायेन दारु मथित्वाऽग्निर्दृश्यते, तथा शरीरस्थ आत्मा योगेनैव साक्षात्क्रियते।

योगिन श्रेष्ठाः। तेषाममृत स्थान ब्रह्मणः परम पदमस्ति। प्राणायामपरायणा न निवर्तन्ते। ते पर स्थान लभन्ते। एव सर्वनमस्कार्यमेतन्मतम्। क्षेत्रज्ञपरमात्मनो संयोगो योगः। मन्त्रयोगादीनि त्वेतस्यैव योगस्याङ्गानि। वेदादिज्ञान योगज्ञानादवाप्नोति योगी (६ पृ०)। ध्यानयोगस्य परो महिमा त्वित्थं दृश्यते—

अश्वमेधसहस्राणि वाजपेयशतानि च।
एकस्य ध्यानयोगस्य कला नार्हन्ति षोडशीम् ॥ इति।

क्रियायुक्तस्य सिद्धिः

शास्त्रपाठमात्रेण क्रियाशून्यस्य सिद्धिर्न सपद्यते। प्रथमे प्रकारे वायुनिरोध। चले वाते चित्तं भवति चलम्, निश्चले वाते तु चित्तमपि जायते निश्चलम्। द्वितीये प्रकारे तु—मनसः स्थैर्ये वायुनिरोधः (प्राणायाम)। तत स्थिरबिन्दुतेति। हठयोगप्रदीपिकातो योगिनामनेका अवस्था ज्ञायन्ते। तत्रारम्भावस्था—घटावस्था, परिचयावस्था, निष्ठावस्थेत्यादयः।

सिद्ध्युत्तरं महानन्दः

नाथसंप्रदायस्य मुख्यमाकर्षण सिद्ध्युत्तरमहानन्दोऽस्ति। योगाद्यनुष्ठाने कष्टानुभव· स्वाभाविक·। कष्टोत्तरं त्वखण्डैकनाथरूपो ब्रह्मविष्णवाद्यधीश्वरो नानारूपो महानानन्दो भवत्येव। ब्रह्मादयः सर्वे तस्य पूजा कुर्वन्ति। योगारूढो नानाभोगान् भुनक्ति, न तु तैर्लिप्यते (१२ पृ०)।

'गोरक्षसिद्धान्तसंग्रहः' इति प्रस्तुते ग्रन्थे सिद्धान्तशब्दो नास्ति राद्धान्तवाचकः। स तु सिद्धमतस्य तात्पर्यमेव सिद्धान्त, न तु वादिप्रतिवादिभिर्निर्णीतोऽर्थ· सिद्धान्त.। सिद्धस्यैव तात्पर्यं सिद्धान्तः। सिद्धस्यैव सिद्धान्तो न त्वन्यस्यात एव शङ्करेण सिद्धान्तबिन्दुः कृतः (१४ पृ०)।

योगिनां मुख्यचिह्नानि

१. मुद्रा, २. नाद·, ३. विभूतिः, ४. आदेशधारणं चेति मुख्यानि चिह्नानि योगिनाम्। १. मुद्राधारणं कर्णयोः क्षुरिकां विना न संभवतीति क्षुरिकोपनिषदि क्षुरिकाप्रशंसा विद्यते (७ पृ०)। एतादृशाः सिद्धा लोके 'कनफटा'-रूपेण प्रसिद्धाः। २. अनाहतशृङ्गीति नादः। ३. त्रिपुण्ड्रधारणाय कालाग्निरुद्रोपनिषदि प्रशंसा। ४. सर्वद्वन्द्वक्षयावहा सद्वाणी—आदेशः।

परमाद्वैतस्य भाव एव—आत्मा

अस्ति कश्चित् परमाद्वैतस्य भावः । स एवात्मा मन्तव्यः (१२ पृ०)

परमात्मा

अथ परमात्मा नाम यथाक्षरमुपासनीयः । न जायते, म्रियते,··· निष्कलो निर-ञ्जनो निरभिमान ······निराकाङ्क्ष ··· । निष्क्रियस्तस्य संस्कारो नास्ति ।

नादब्रह्म

नाथसंप्रदाये यद्यपि वेदाना सर्वेषा च शास्त्राणामुपेक्षापरकाण्येव वचनानि (पृ० ४, ६, १०, ११, १२–१३, १८, १६, २०, २३, २४), तथापि 'प्रणववेद इत्यभ्युपगम्य तद्द्वारा तत्प्रवर्तकनादब्रह्मेत्यवलम्ब्य नादब्रह्मणो यन्मूलं तत् तत्त्वमिति विश्रान्तिमता मने का वा श्रुति साधिका न भवतीति प्रसिद्धतरमेत्र सर्वत्र' इत्यादिना नादब्रह्ममहिमाऽङ्गीकृतः ।

योगिनां परमः पुरुषार्थः—मुक्तिः

परमपुरुषार्थस्तु मुक्तिरभ्युपेया । सा चादिदेवपदेन नाथस्वरूपेणावस्थानम् । तत्स्वरूपं तु गोरक्षोपनिषदि—'अद्वैतोपरि सदानन्ददेवता' इति बोध्यम् । आत्मनो बन्धोऽभिमानो ज्ञेयः । तन्निवृत्तिस्तु मोक्षः । सर्वसंकल्पनातीतत्वेन पर ब्रह्म भवति । द्वैताद्वैतविवर्जितं पदं निश्चलं दृश्यते, तदेव सत्यमित्यभ्युपगन्तव्यम् ।

सत्यां शास्त्रनिन्दायां कथमिह शास्त्रप्रमाणानि

ग्रन्थकारो ग्रन्थेऽस्मिन् पदे पदे वेदशास्त्रादिप्रमाणान्युपस्थापयन्नपि वेदशास्त्राणि निन्दत्येव । स तत्कारणमित्थं प्रकटयति—'एतद्ग्रन्थे बहुशास्त्राणा प्रामाण्यं दीयते । तत् त्वस्मदीयार्थं वा एतन्मार्गस्य शिष्याणा श्रद्धार्थं दीयत इति नास्ति । अस्मिन्नर्थे तु योगशास्त्रस्यैव प्रामाण्यमेतच्छास्त्रज्ञानेन पूर्णम्, परन्तु वादिना हिताय भोः ग्रन्थान्तरेऽपि भवदीयनानामतान्तरेऽपि चायमेव मार्गः श्रेष्ठः सर्वस्य लक्ष्यभूतोऽवधूत एवेति हेतुर्न तु सिद्धान्तार्थः । अस्माकं त्वन्यप्रमाण उपेक्षेति ज्ञेयम्' इति (४९ पृ०) ।

इतोऽग्रे ग्रन्थकारो वेदादिवचनप्रामाण्यमनुद्धृत्यैव गद्येन गोरक्षसिद्धान्तान् निरूपयति ।

ग्रन्थस्य भाषा

ग्रन्थस्यास्य संस्कृतभाषा श्लथा विद्यते । भर्तृहरिनाम्ना प्रमाणरूपेण स्मृता केचन श्लोका न तदीयेषु ग्रन्थेषु लभ्यन्त इति ग्रन्थकारोऽधिका सामग्री कर्णपरम्परयाऽवगता-मुपस्थापति । 'सहस्राणामपि पुरुषाणा कष्ट भवेत्' (१२ पृ०), 'शक्तेर्वृत्तान्तं दृष्टम्' (१३ पृ०), 'नान्यदस्ति किञ्चिदसारम्' १६ पृ०), 'तत् तु अस्मदीयार्थं वा' (४९ पृ०) इत्यादिषु भाषादोषा दृश्यन्ते ।

प्रस्तुतं संस्करणम्

प्रसिद्धस्य सिद्धस्य श्रीगोरक्षनाथस्य सिद्धान्तानामेकत्र सग्रहो जिज्ञासूनां महते कल्याणाय जायेतेति धिया सिद्धसप्रदायानुयायिना केनचित् सस्कृतज्ञेन 'गोरक्षसिद्धान्त-सग्रहः' गद्येन प्रणीत । स पञ्चत्रिंशत्युत्तरैकोनविंशतितमे ख्रीस्ताब्दे सरस्वतीभवनग्रन्थ-मालाया अष्टादशपुष्परूपेण प्रख्यातवैदुष्यैर्महामहोपाध्यायैर्गोपीनाथकविराजमहोदयैर्ग्रन्थगुण-गरिम्णा यथोपलब्धोऽपूर्ण एव सपादितो विदुषा पुरस्तादुपस्थापनाय । स चेदानी मुद्रणातीतो नोपलभ्यते जिज्ञासुभिरिति सरस्वतीभवनपण्डितप्रवरेण श्रीजनार्दनपाण्डेयेन संपादितपूर्व-सस्करणतो मनागधिकमश गवेषयित्वा तत्रागतवचनोद्धरणादिसंकेतान् परिश्रमेण योजयित्वा सूच्यादिभिश्च भूषयित्वा द्वितीयं सस्करणमिद सपाद्यमान विदुषा मोदकरं स्यादिति मन्यते ।

माघपूर्णिमायां
२०२९
(१७-२-७३)

भागीरथप्रसादत्रिपाठी 'वागीश: शास्त्री'
संचालकः
अनुसन्धानसंस्थानस्य

किञ्चिन्निवेदनम्

अथैतस्य गोरक्षसिद्धान्तसङ्ग्रहस्य द्वितीयं संस्करणमुपस्थापयतो मे भृशं मोमुदीति चेतः। मन्ये ग्रन्थस्यास्य नाम "नाथसिद्धान्तसंग्रहः" इति क्रियेत चेत् समीचीनं स्यात्। यतो ह्यत्र प्रतिपादिता सिद्धान्ता गोरक्षनाथतः पूर्वस्मिन्नपि सिद्धमते प्रचलिता आसन्। गोरक्षनाथोऽस्य सम्प्रदायस्य कश्चिन्महापुरुषोऽभवत्, न तु प्रवर्तकः, अस्य प्रवर्तकस्तु भगवान् आदिनाथः साक्षाच्छिव एव।

यद्यपि घटेसमुद्रन्यायेन लघुकलेवरेऽप्यस्मिन् ग्रन्थे ग्रन्थकृता बहु विवेचितम्, तथापि भारतीयविचारसरणिं तिरस्कृत्य पाश्चात्यपद्धतिप्रभावपिहितचक्षुषामाधुनिकविदुषामेतद्-विषयकविवेचनेषु बहुत्र विप्रतिपत्तिं दृष्टवता मयाऽपि कश्चित् स्वकीयोऽभिप्रायोऽत्रोपस्था-प्यते। तत्र तथ्यातथ्यनिर्णयस्तु नीरक्षीरविवेचकानां विद्वद्राजहंसानां वशवर्तीति मन्ये।

नाथशब्दस्य निरुक्तिः

याच्ञोपतापैश्वर्यात्मकेऽर्थत्रये नाथति इति, आशीरर्थे च नाथते इति विग्रहेण नाथृ धातोर्नाथशब्दो निष्पद्यते। तत्र प्रथमोऽर्थो नाथस्य याचक इति। परस्वत्वनिवृत्तिपूर्वकं स्वस्वत्वोत्पत्त्यनुकूलो व्यापारो याचनार्थः, एवं च महेश्वरस्यापि सतो भक्तानुग्रहार्थं स्वशक्ति-बलेन विविधविग्रहवतो भक्तभवनेषु भिक्षुकपरिपाटीमूरीकृत्य पर्यटतोऽस्य स्फुटमेव याचकत्वम्। यद्वा स्वीकारानुकूलो व्यापारो याचना। यथा— अविनीतं विनयं याचते" इति। एवं स्वशिष्यात् योगविज्ञानादिविविधोपायसाद्गुण्यादेशं स्वीकारयतीति स्फुटं तस्य नाथत्वम्। द्वितीयोऽर्थ उपतापक इति। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः शुक्लमशुक्लं शुक्लाशुक्लं चेति त्रिविधं कर्म, एतद्विपाकश्च जात्यायुर्भोगरूपः, तत्तद्दुःखसुखाद्यनुभवजन्यो वासनाराशिः, एते च संसारबन्धास्तेषामयमुपतापकः स्वेन संबन्धविच्छेदको नाथः। तृतीयो-ऽर्थं ईश्वर इति। अणिमाद्यष्टविधैश्वर्यसम्पन्नो नाथ इति। चतुर्थश्चार्थं आशीर्वादक इति। आदेश इति प्रार्थयमानान् श्रद्धालुजनान् स्वकीयेनाशीर्वचसा स्वस्वाभीष्टप्रदानेन च सन्तोष-यतीति नाथः।

नाथमतस्य प्रत्नत्वम्

इदं च मतं कियतः कालात् प्रचलतीति प्रश्नस्य विशुद्धभारतीयपद्धत्या यद्युत्तरं दीयेत तर्हीदमेवायाति यदनादिकालादेवेदं मतं भारते प्रवर्तते। यतो ह्यस्य प्रवर्तक आदिनाथः शिवः स्वयमनादिरनन्तश्च। अथ चास्माकं सार्वभौमानामुपास्यदेवानां जगन्नाथ-बदरीनाथ

केदारनाथ-विश्वनाथ-सोमनाथादिनाथान्ताभिधानमेतस्य साक्षि यदस्य नाथसम्प्रदायस्यास्माकं संस्कृत्या जीवनेन च सहात्यन्त घनिष्ठः सम्बन्धोऽतिपुरातनकालात् प्रवर्तते। मत्स्येन्द्रनाथ-गोरक्षनाथादि-सिद्धमहापुरुषाणामवतरण तु काले-काले साधनापरिपाट्या युगानुरूपं नूतन-दिशो दर्शनाय भवति, तेभ्यः प्रागपीद सिद्धमतमत्र प्रवृत्तमासीदित्यत्र नास्ति सदेहलेशोऽपि।

विद्वासः प्रतापिनो वा पुरुषा जगति सर्वेषु देशेषु बभूवु सन्ति भविष्यन्ति च, किन्तु भारतस्यैवेद गौरव यदिदं सिद्धानामपि जन्मभूः, न त्वन्य. कश्चिद् देशोऽनेन गौरवेणा-लङ्क्रियते। इदमेव कारण यद् भारतवर्षे सिद्धेभ्यो यादृशं महत्त्व दीयते तादृशं नान्यस्मै कस्मैचिदपि। सकलशास्त्रपारङ्गत कश्चिद्वयसा वृद्धोऽपि विद्वान् कस्यचिदल्पवयस्कस्याक्षर-ज्ञानशून्यस्य सिद्धपुरुषस्य चरणयोर्दण्डवत्पतित्वा प्रणमति। विद्वत्त्व सिद्धिश्च द्वे पृथग् वस्तुनी विद्येते। स्वकीयपरिश्रमानुरूप कोऽपि जनो विद्वान् भवितु शक्नोति किन्तु सिद्धो न सर्वो भवति, "अनेकजन्मसंसिद्धस्ततो याति परा गतिम्" इति गीतावाक्यस्येदमेव तात्पर्य यदनेकजन्मना साधनाया. फलस्वरूपमेव जनः सिद्धो भवति, सिद्ध सन् परा गतिं (मोक्ष-मिति यत्त्वत्) लभते। सिद्धस्य कृते नेदमावश्यक यत् स ग्रन्थवित् शास्त्रज्ञो वा भवतु, यतो हि स्वीयोत्कृष्टसाधनावशात् स तामवस्था प्राप्नोति यल्लोकेभ्यस्तस्य प्रत्येकं वचनमेव शास्त्रं प्रत्येकमाचरण च सदाचारो भवति। यदि च सिद्धो भूत्वा शास्त्रज्ञोऽपि भवेच्चेत् स्वर्णे सुगन्धः स्यात्। प्राक्तनाना वशिष्ठव्यासादीना का कथाधुनिकेऽपि भारतीयेतिहासे गुरुनानक-कबीरदासादयोऽनेके महापुरुषा अभवन् ये शास्त्राणा पण्डिता नासन् किन्तु तेषा सिद्धत्वे तु न कस्यचिद् विवादः। तैर्यदुक्त तदेव लोकेभ्य. शास्त्र सजात यच्चाचरितं तदेव सदाचारः संजात। एवमेव महावीर-शङ्कराचार्य-गोरक्षनाथादयो महापुरुषा सिद्धा अप्यासन् विद्वासश्चेति तेषा चरितैस्तत्प्रणीतशास्त्रैश्च स्फुटमवलोकयितु शक्यते।

नव नाथाः

भारतीयसाधनापद्धतौ गुरोः सर्वाधिकं महत्त्वमिति न तिरोहित कस्यापि। अत्रापि गोरक्षसिद्धान्तसङ्ग्रहे प्रारम्भ एव गुरोर्महिमा प्रदर्शित। तमेव गुरु साधको नवात्मतया कल्प-येदिति स्पष्टो निर्देश, यथा गोरक्षसहितायां चतुर्विंशे पटले।

गुरुं नवात्मकं भद्रे नवभावैर्विभावयेत्। (गो० स० २४।१३)

तथा च—

भृगु–लाकुल–संवर्त–महाकाल–पिनाकिनः।
खड्गीश च भुजङ्गाख्यं बालीशमर्घिणा युतम्॥
अर्धेन्दुबिन्दुसंयुक्तं कलया चोर्ध्वदीपितम्।
एतन्नवात्मकं देवि गुरु·····················॥

(गो० सं० २४।१७-१८)

एतत्प्रतीकरूपा एव नव नाथा इति सिद्धसम्प्रदाये प्रसिद्धिः। सामान्योऽपि भारतीयः चतुरशीति सिद्धाः, द्विपञ्चाशद्वीरा., चतुःषष्टिर्योगिन्यः, नव नाथा इति रूढ्या परम्परा-

प्रचलितया परिचितो भवति । तत्र के ते नव नाथा इत्यत्र ग्रन्थकृता परस्पर नैकमत्य दृश्यते । महार्णवतन्त्रे नवनाथाना पृथक् दिक्षु न्यासविधानं कृतं तदनुसारं च नव नाथा इमे—

१. गोरक्षनाथ २. जालन्धरनाथ., ३. नागार्जुन, ४. सहस्रार्जुन, ५. दत्तात्रेयः, ६. देवदत्तः, ७. जड़भरतः, ८. आदिनाथः, ९. मत्स्येन्द्रनाथश्च ।

योगिसम्प्रदायाविष्कृतिग्रन्थे नवनारायणा एव नवनाथरूपेणावतीर्णाः, येन च नारायणेन यो नाथावतारो धृतः स इत्थम्—

१.	कविनारायणः	—	मत्स्येन्द्रनाथः
२.	करभाजननारायणः	—	गहिनीनाथ·
३.	अन्तरिक्षनारायण	—	ज्वालेन्द्र(जालन्धर)नाथ
४.	प्रबुद्धनारायण	—	करणिपानाथ
५.	आविर्होत्रनारायणः	—	नागनाथः
६.	पिप्पलायननारायण	—	चर्पटनाथ
७.	चमसनारायणः	—	रेवानाथ.
८.	हरिनारायण	—	भर्तृनाथ
९.	द्रुमिलनारायणः	—	गोपीचन्द्रनाथ इति ।

सुधाकरचन्द्रिकाया निर्दिष्टा नामावलिस्त्वित्थम्—

१. एकनाथः, २. आदिनाथः, ३. मत्स्येन्द्रनाथ., ४. उदयनाथ., ५. दण्डनाथ, ६. सत्यनाथ, ७. सन्तोषनाथ, ८. कूर्मनाथः, ९. जालन्धरनाथः ।

उपर्युक्तोभयोरपि ग्रन्थयोर्गोरक्षनाथस्य नाम न विद्यते, योगिसम्प्रदायाविष्कृतौ तु नवनाथोत्पत्त्यनन्तर महादेवेन गोरक्षनाथ उत्पादित इति स्पष्टमेवोक्तम् । प्रकृतग्रन्थे (गोरक्षसिद्धान्तसग्रहे) तु नामावलिरित्थम्—

१. आदिनाथ·, २. मत्स्येन्द्रनाथः, ३. उदयनाथः, ४. दण्डनाथ, ५. सत्यनाथ., ६. सन्तोषनाथ, ७. कूर्मनाथ·, ८. भवनार्जि, ९. गोरक्षनाथ. ।

परन्तु नाथपरम्परानुयायिनो नवनाथरूपेषु यासां मूलदेवताना ध्यानं कुर्वन्ति ता इत्थम्—

१.	आदिनाथ.	—	महादेवः
२.	उदयनाथः	—	पार्वती
३.	सत्यनाथ	—	ब्रह्मा
४.	सन्तोषनाथ.	—	विष्णुः
५.	अचलनाथः	—	पतञ्जलिः
६.	कन्थड़िनाथः	—	गणेशः
७.	चौरङ्गिनाथ·	—	चन्द्र (पूर्णकलः)
८.	मत्स्येन्द्रनाथः	—	मत्स्यावतारः
९.	गोरक्षनाथः	—	सदाशिवः

[महादेवः—शिव सदाशिवश्च पृथक् तत्त्वद्वयमिति संप्रदायसिद्धम् ।]

स्थितिकालविषये किञ्चित्

पाश्चात्त्यशिक्षाप्रभावितेषु आधुनिकभारतीयग्रन्थकर्तृष्वपि नूतनोऽयं व्याधि. संक्रान्तो यत् कस्यापि पूर्ववर्तिन कवेर्महापुरुषस्य वा चर्चायां "स कदा प्रादुरभवत् कदा च तिरोभूत" इति विचारणायामेव तेषा ज्ञानस्याधिकोऽश व्यतीयते, तत्र च यानि प्रमाणानि दीयन्ते तानि केवलं कल्पनामाधृत्यैव । आङ्ग्लशासनस्यायं दुष्प्रभावोऽस्मद् देशे । यतो हि तेषामाङ्ग्लाना केवल द्विसहस्रवर्षात्मकः खीष्टानन्तरवर्ती इतिहासो वर्तते । फलत अनयैव स्वीयया तुलया ते समग्रस्य विश्वस्य सभ्यतां संस्कृतिञ्च तोलयितुं वाञ्छन्ति । अस्माकं भारतस्य तु स्थितिरतो नितरा भिन्नैव । सृष्टेरादिकालादारभ्याद्यावधिकोऽस्माक प्रामाणिक· स्वीयेतिहासः स्वीया च संस्कृतिः । भारतीयैर्विद्वद्भिः कालाय किमपि महत्त्व न दीयते । एते जीवनस्योपयोगिता स्वीकुर्वन्ति न तु जीवन्याः । बहवो महर्षयो महापुरुषा कवय. शास्त्रप्रणेतारश्चाभवन्, ते वाञ्छेयुश्चेत् स्वप्रणीतग्रन्थेषु स्वकीयं परिचय स्थितिकाल वाऽनायासेन दद्यु, किन्तु तैर्न स्वीकृतं तस्य किमप्युपयोगित्वम्, तेषा मतेन महत्त्वमासीद् ग्रन्थेषु प्रतिपादिताना सिद्धान्तानाम् । केवल तत्रैव तै स्वविद्वत्त्व प्रकटितम् ।

अस्तु, नाथपरम्पराया प्रादुर्भूताः सिद्धा अपि नैतदपवादभूता, पाश्चात्त्यैराधुनिकभारतीयैश्च विद्वद्भिर्मत्स्येन्द्रनाथगोरक्षनाथादीनां स्थितिकाल खीष्टाष्टमशतकाद् द्वादशशतक यावद् मध्यवर्तीतैर्मन्यते, वैयक्तिकरूपेण मम तु मतमस्मान्नितरा भिन्नमेव। मन्ये नैतेषा कोऽपि कालः स्थिरीकर्तुं शक्यते, अत्र च हेतु·—

एकत्र तु वयं भारतीयशास्त्राणां प्रामाण्यमुद्घोषयामोऽपरत्र तेषु यल्लिखितं तत्र न विश्वसिम । यथाऽमुकस्य रसस्य रसायनस्य वा सेवनेन अथवा योगसाधनायास्तन्त्रसाधनाया वाऽमुकप्रक्रियया मानवः शतायुः सहस्रायुरजरोऽमरो वा भवतीत्यादि । अतीव हास्यास्पदेयं स्थितिरस्माक यदि वयं स्वीकुर्महे यन्नाथमार्गीयसिद्धान्ते जीवन्मुक्तिरेव कैवल्यं न तु विदेहमुक्ति, मन्यामहे च षडङ्गयोगेन सह नेति-धौतीत्यादिषट्कर्मद्वारा कायशोधन कृत्वा रसादि-पारदादिप्रक्रियाभिश्चैते देहं तामवस्था प्रापयन्ति यत् स जरा व्याधि मृत्यु वा जयेत्, तदा एतत्स्वीकरणे काऽस्माकं विप्रतिपत्तिर्यद् गोरक्षनाथादयो महासिद्धाः शत-सहस्रायुषोऽमरा वा भवितुं शक्नुवन्ति, इति ।

एतत्तु समीचीन यत्, नाथमार्गस्थाः सर्वे सिद्धास्तामवस्था न प्राप्नुवते किन्तु विशिष्टसाधनापराणा महापुरुषाणां विषये तु वक्तु शक्यत एव ।

अत्रेदमपि विशेषेण विचारणीय भवति यद् गोरक्षनाथो मत्स्येन्द्रनाथो जालन्धरोऽन्यो वा सिद्धो दिवसैकस्य कृतेऽपि क्वापि प्रकटित कुत्रापि विहृतवांश्चेत्तत्र तस्य किमपि स्मारकं चिह्नमवश्यं वर्तते । स्वजीवनकाले ये सिद्धा इयती प्रसिद्धिमुपगता, यत् समग्रेऽपि भारते शत-

शस्तेषा साधनास्थलानि, विहारभूमयः, चमत्कारक्षितयश्च दृश्यन्ते किन्तु तैः कुत्रापि जीवनस्येहलीला समापितेति सूचकं समाधिस्थलं न क्वचिद् दृश्यते न च श्रूयते । यै समग्रमपि भारतं परिक्रान्तं कोटिशो येषामनुयायिन आसन् ते तूष्णीं क्वचिद्देहं जहुरिति प्रत्याययितुं नास्मच्चेनः प्रभवति । अतो बलाद्बाध्या वयमेतद्विश्वसितुं यत् ते जितमृत्यवः कस्मिन्नपि काले कस्मिन्नपि देशे केनापि रूपेण प्रकटितुं समर्था भवन्तीति नात्र सन्देहः कर्तव्यो न चाश्चर्यमिति ।

तन्त्रशास्त्रेण सम्बन्धः

इदानीन्तनैर्ग्रन्थकृद्भिः कैश्चिन्नाथसिद्धेषु शैवतन्त्राणामपरैश्च शाक्ततन्त्राणामन्यैश्च बौद्धतान्त्रिकाणा प्रभावोऽस्तीति प्रकटितम्, किन्तु कल्पनैव तेषामेषा । नाथमार्गीयाः सिद्धास्तन्त्रस्याप्युपासका अभवन् इति तु तथ्यम् । अनयोर्मार्गयोः कस्तावत्सम्बन्ध इति विचारणायां गोरक्षसिद्धान्तसंग्रहकृता दत्तमुत्तरम् (द्रष्टव्यं १४ पृष्ठे) तस्यायमभिप्रायो यत् 'नाथमार्गो यद्यपि विशुद्धयोगसाधनापरस्तथापि कौलकापालिकादयोऽपि मार्गा नाथेनैव प्रकटिता" इति । अयमत्राशयः—अन्तरङ्गसाधनापरो योगमार्गः, बहिरङ्गसाधनापरश्च तन्त्रमार्गः । बहिरङ्गसाधना विना नान्तरङ्गसाधना सिद्ध्यति । अत केनापि साधकेन प्रथम बहिरङ्गसाधनायाः कोऽपि प्रकारोऽवश्य स्वीकर्तव्य इति कृत्वा भगवता आदिनाथेन शैवाना शाक्ताना च तन्त्राणा प्रवर्तनं विहितम् । एषु साधक स्वयोग्यतानुरूप शक्त्यनुरूपं प्रवृत्त्यनुरूप वा कमपि मार्गमुपचिनोति, तेन च मार्गेण बहिरङ्गसाधना समापयन् सोऽन्तरङ्गसाधनाभिमुखो भवति । नास्ति किमपि बन्धनं तस्मै यत् सोऽमुकसाधनामेवाङ्गीकुर्यादिति । मत्स्येन्द्रनाथो योगिनीकौलाख्यस्य सम्प्रदायस्य प्रवर्तक एवासीदिति प्रसिद्धिः, किन्तु भगवता गोरक्षनाथेन गोरक्षसंहिताया प्रतिपादितः सिद्धान्तस्तस्माद् भिन्न एवास्ति । एव जालन्धरनाथादीनामन्येषामपि पन्थान. सन्ति, परन्तूद्देश्यं सर्वेषामेकमेव, बहिरङ्गसाधना कुर्वन्तस्ते तां स्थितिं प्राप्नुवन्ति यदन्तरङ्गसाधनायामनायासेन प्रवृत्ता भवेयुः । एतत्तु साधकस्य योग्यता साधनां चापेक्षते यत् स कियता श्रमेण कालेन वा तामवस्था प्राप्नोतु । उच्चैःकोटिकाः साधका एव बहिरङ्गसाधनां निस्तीर्य योगभूमिं प्राप्नुवन्ति, न्यूनकोटिकास्तु कौला कापालिका अन्ये वा भूत्वैव तिष्ठन्ति ।

दार्शनिकं स्वरूपम्

अयं च नाथमार्गो विशुद्धयोगसाधनापर इति निर्विवादम, पाशुपतैः सहास्य न कोऽपि सम्बन्धः प्रतीयते किन्तु रसेश्वरैः सह वर्तते इति बहूना नाथसिद्धानां रसविषयकैरतीवमान्यतांगतैः प्रसिद्धग्रन्थैः प्रतीयते । यथा सिद्धनागार्जुनस्य "नागार्जुनतन्त्रम्", नित्यनाथस्य "रसरत्नाकर.", चालिनाथस्य "रसमञ्जरी", मन्थानभैरवस्य "रसरत्नम्", स्वयं गोरक्षनाथस्य "गोरक्षसंहिताया भूतिप्रकरणम्", अन्ये च भूयासो ग्रन्था दृश्यन्ते, चर्पटनाथस्य रससिद्धत्वं विश्रुतमेव । एतन्मार्गीया सिद्धाः आगमनिर्दिष्टामेव योगसाधनां विदधति, योगसाधनैवास्य

मतस्यादिर्मध्योऽन्तश्च । इयं चैतेषा साधना पातञ्जलयोगस्यैव विकसितं रूपमुच्येत चेन्मन्ये न कापि विप्रतिपत्तिः। अस्मिंश्च पथि ऊर्ध्वरेतस्त्वं सर्वातिशायि।

वामश्च मार्ग ईश्वरं वदति, अतस्तत्रेश्वरः सदिति मन्यते, बौद्धाश्चानीश्वरवादिनोऽतस्तत्रेश्वरः शून्यमसद्वा, किन्तु नाथास्तं सदसद्भ्यां व्यतिरिक्तं मन्यन्ते। उपनिषदां "नासदासीन्नो सदासीत्" इति सिद्धान्तः पूर्णतया तैरङ्गीकृतः। गोरक्षनाथस्योक्तिः श्रूयते—

बस्ती न शुन्यं शुन्यं न बस्ती अगम अगोचर ऐसा।
गगनशिखर महं बालक बोलैहुं ता का नाम धरहुगे कैसा॥ गोरख-शबद॥

एभिर्मन्यते परमात्मा केवलोऽस्ति (न सत् न चासत्)। अनेन परमात्मना जीवस्य य कोऽपि सम्बन्धो भवेत्, तस्य तेन सम्मिलनमेव योग कैवल्यं मोक्षो वा। अस्य च कैवल्यस्य अस्मिन्नेव जन्मनि अनेनैव देहेनानुभूतिर्भवेदित्येतेषा चरमं लक्ष्यभूतम्। अस्य लक्ष्यस्य प्राप्त्यै कायसाधनं प्रथम सोपानम्। एते सिद्धा कायं शत्रुवन्न क्लेशयन्ति, न च विषयेष्वासक्ताः सन्तस्तमखलीनं मुञ्चन्ति, प्रत्युत देहं परमात्मन आवासं मत्वा तदनुरूपा साधनां कुर्वन्ति, अनेनैव देहेन कैवल्यमनुभवन्ति, जन्ममरणजीवनान्यधिकुर्वन्ति, जराव्याधिकालादीन् निर्जित्य तिष्ठन्ति, कायशोधनरूपस्योद्देश्यस्य पूर्त्तये योगाङ्गैर्यमनियमादिभिः सहैते षट्कर्माणि (नेति-धौति-वस्ति-नौलि-कपालभाति-त्राटकाख्यानि) अपि कुर्वन्ति। विशुद्धहठयोगस्य राजयोगस्य च क्रियाकलापमस्मिन् मार्गेऽनुशिष्ट वर्त्तते।

योगसाधनाया प्रतीकरूपेणैवैते मुद्रा विभूति नादमादेश च बाह्यस्वरूपेऽपि धारयन्ति। गुरोरेवात्र सर्वाधिक महत्त्व वर्तते। नाथस्वरूपेणावस्थानमेव मुक्तिः।

एवमस्य नाथमतस्य बाह्यमाभ्यन्तर च स्वरूपं बहुधा महत्त्वपूर्णं विवेचनार्हं च किन्तु विस्तरभयान्नात्राधिकं विविच्यते, अत परं नाथसाहित्ये केषाञ्चिद् ग्रन्थाना नामान्युट्टङ्कितानि तेभ्यः पूर्णतयाऽस्य स्वरूपावगतिर्जिज्ञासुभिः कर्त्तव्येति निवेद्यते।

नाथसाहित्यम

यद्यपि भारतीयवाङ्मयस्य विपुलोंऽशो नाथसाहित्येऽन्तर्भवति, यतो हि पातञ्जलं योगदर्शनमस्याधारभूतमेव, हठयोगस्य प्रक्रिया अप्यङ्गभूता., रसशास्त्रेण प्रत्यक्ष एव सम्बन्ध, कुलागमादिकमप्यनेन सपृक्तमिति कृत्वा सर्वमेतद्विषयकं साहित्यं नाथसाहित्यमेवेति वक्तु शक्यते तथापि प्राचीना अर्वाचीनाश्च केचन ग्रन्था. सन्ति येषामध्ययनेनास्य मतस्याध्यात्मिकी व्यावहारिकी साम्प्रदायिकी, ऐतिहासिकी च स्थितिर्ज्ञातु शक्यते, तेषु केषाचिन्नामावलिरत्र दीयते—

अमनस्कयोग.
अमरौघशासनम्
अवधूतगीता
आदिनाथसंहिता

कौलज्ञाननिर्णयः
कौलावलीतन्त्रम्
कौलावलीनिर्णयः
कौलोपनिषत्

क्षुरिकोपनिषत्
खेचरीसंहिता
गरीबनाथसंहिता
गोरक्षकल्पम्
गोरक्षकवचम्
गोरक्षकौमुदी
गोरक्षगीता
गोरक्षनाथस्तोत्रम्
गोरक्षपद्धति·
गोरक्षमञ्जरी
गोरक्षशतकम्
गोरक्षसंहिता *
गोरक्षसिद्धान्तसंग्रहः
गोरक्षोपनिषत्
गोरखबानी (- सबद)
घेरण्डसंहिता
चतुरशीतिसिद्धानामितिहासः (मार्नसिंहकृतः)
जालन्धरसंहिता
धोरंगनाथकथा
नवनाथकथा
नाथचरितम्
नाथतीर्थावलिः
नाथपुराणम्
नाथसूत्रम्
निरञ्जनपुराणम्
पृथ्वीनाथसंहिता
बाधूलनाथसूत्रम्
भर्तृहरिसंहिता
मत्स्येन्द्रसंहिता
महार्थमञ्जरी
महेशसंहिता
मेघमाला
योगबीजम्
योगमञ्जरी
योगशास्त्रम्
योगिनरहरिनाथप्रभृतिभिः संपादिता योगप्रचारिणी सभा काशीतः प्रकाशिताः प्रायः पञ्चाशद् ग्रन्था
योगिवंशावली
योगिसम्प्रदायाविष्कृति.
वर्णरत्नाकरः
विवेकमार्तण्ड
शिवसंहिता
सिद्धकोशः
सिद्धसिद्धान्तपद्धतिः—गोरक्षनाथकृता
सिद्धसिद्धान्तपद्धतिः—नित्यनाथकृता
सिद्धसिद्धान्तसंग्रहः
सुधाकरचन्द्रिका
हठयोगप्रदीपिका
हठयोगरत्नावली
हठसंकेतः—गोरक्षनाथकृतः

---

* अस्य ग्रन्थस्य पुष्पिका (COLOPHON) एवं वर्तते—

"इति श्रीमहामन्थानविनिर्गते सप्तकोट्यर्बुदे स्वच्छन्दशक्त्यावतारिते गोरक्षसंहितायां शतसाहस्रखण्डान्तर्गते श्रीमतोत्तरखण्डे कादिभेदे कुलकौलिनीमते नवकोट्यवतारभेदे श्रीकण्ठनाथावतारे विद्यापीठे योगिनीगुह्ये .... नाम .... पटलः।"

एतेन प्रतीयते कियद्वैशद्यमस्य ग्रन्थस्य भवेत् कियांश्च विषयोऽत्र प्रतिपादितः स्यादिति। एतदन्तर्गतस्य कादिप्रकरणस्य कश्चित्खण्डितोऽशो मयाधिगत आसीत् कश्चिच्च त्रुटितोऽशः सरस्वतीभवनग्रन्थालये विद्यते, उभयोर्मिलित्वापि ग्रन्थस्तु पूर्णो नाभवत्, किन्तु प्रायः षट्सहस्रमिताः श्लोका उपलब्धाः, अतीव दुर्लभस्यास्य तादृशस्यैव प्रकाशनं कल्याणाय

इदानीन्तनैरपि लेखकैरत्रविषये बहुविवेचितम्, तत्र विशेषेण द्रष्टव्यम्—

नाथ सम्प्रदाय	—डा० हजारीप्रसाद द्विवेदी
नाथसिद्धों की बानियाँ	—,, ,,
नाथसप्रदायेर इतिहास, दर्शन ओ साधना	—डा० कल्याणी मलिक
सिद्धसिद्धान्तपद्धति एण्ड अदर वर्क्स आफ नाथयोगीज	—डा० कल्याणी मलिक
कौलज्ञाननिर्णय भूमिका	—डा० प्रबोधचन्द्र बागची
नाथ और सन्तसाहित्य का तुलनात्मक अध्ययन	—डा० नगेन्द्रनाथ उपाध्याय
गोरखनाथ और उनका युग	—डा० रांगेयराघव
गोरखबानी	—डा० पीताम्बरदत्त बडथ्वाल
नाथयोग	—प्रो० अक्षयकुमार बनर्जी
गोरखनाथ एण्ड कनफटा योगीज	—डा० ब्रिग्स

एतदतिरिक्त म० म० डा० गोपीनाथ कविराज महोदयै, योगिराज श्रीनरहरिनाथ-राहुल साकृत्यायन-शिवकुमार 'मानव' प्रभृतिभि· भूयसा ग्रन्थाना भूमिकासु, लेखरूपेण विविधपत्रिकासु च पर्याप्त साहित्यं प्रकाशित विद्यते।

गोरक्षसिद्धान्तसंग्रह:, प्रस्तुतसंस्करणञ्च

लघुकलेवरोऽप्यय ग्रन्थः स्वस्मिन् जनाना कियदुपकरोतीति तु स्वसवेद्यमेव वर्तते। भगवता गोरक्षनाथेनान्यैर्वा सिद्धैर्महापुरुषैर्विद्वद्भिश्च प्रणीता यावन्तो ग्रन्था दृश्यन्ते ते सर्वे प्राय· साधनोपयोगिविधिपरा एव। यतोहि व्यावहारिकतत्थ्यानामपि तेषु तदुपयोगार्हाणा मेव सकलन वर्वर्ति, नाथमार्गीयदार्शनिकविचाराणा लौकिके सामाजिके वा जीवने कियानु-पयोगो भवितु शक्नोतीतिप्रतिपादकास्तु ग्रन्था प्रायोऽङ्गुलिगणनीया एव। एतद्दृष्ट्याऽस्य महनीयं महत्त्वं वर्तते। अत्र प्रतिपादिता विषयास्तु विषयसूचीतोऽवगन्तव्या', विशेषेण गुरोर्महत्त्वम्, नाथलक्षणम्, मुक्तेर्नाथस्वरूपेणावस्थितिः, योगप्रशंसा, योगिना चिह्नानि तेषा-माध्यात्मिक रहस्यम्, वेदाना तन्मूलकशास्त्राणा च प्रवृत्तिनिमित्तत्वम्, ज्ञानोपासनयोर्योग-साधनत्वनिरास', द्वैताद्वैतयोर्व्यर्थता, अद्वैतपराजयः, नाथस्य तन्त्रप्रवर्तकत्वम्, ज्ञानिनो मरणोत्तरगतिः सर्वदर्शनाना स्वरूपदर्शने समन्वयः, मुद्राणामवस्थाना च भेदा·, नाथ-सिद्धान्तस्य स्वरूप तन्महत्त्वञ्च, नाथपरम्परा, नाथाम्नायवर्णनम् शिष्यस्य १२ गुरोश्च

संस्कृतविश्वविद्यालयीयप्रकाशनविभागतः क्रियते। सम्प्रति भूतिप्रकरणमप्युपलब्धम्, [योगप्रकरणं च १८६९ खीष्टे श्रीप्रसन्नकुमारवन्द्योपाध्यायेन वंगानुवादेन सह प्रकाशितमासीत्, तदपीदानीं दुर्लभमेव] अतः अस्य प्रकरणद्वयस्य मुद्रणं चात्र समाप्तप्रायमेवाचिरात् पाठकानां दृष्टिपथमुपयास्यतीति निवेद्यते।

३६ लक्षणानि, सिद्धानामाचारविधि, देवाना भगवत्तानिरासो नाथस्य सर्वोपरिवर्तित्वम्, योगस्यात्मधर्मत्वनिरूपणं चेति विशेषेण द्रष्टव्या वर्तन्ते। एतत्प्रसङ्गेनावान्तरविषयाणामपि प्रचुरतयात्र संनिवेशोऽस्ति।

अस्य च ग्रन्थस्य प्रणेता नाम्ना अज्ञातोऽपि नातिप्राचीन इति तदीयोद्धृतप्रमाण-ग्रन्थसूचीतः प्रतीयते। किन्तु विपश्चिद्वरेणानेन यया रीत्या स्वकीयो विषय· प्रतिपादित यावन्ति च प्रमाणानि स्वमतपोषकाणि ग्रन्थान्तरेभ्य उद्धृतानि तैरस्य बहुश्रुतत्वं प्रौढ पाण्डित्यं च स्फुटं परिलक्ष्यते।

अस्य ग्रन्थस्यैकामपूर्णां मातृकामुपलभ्यातीवमहत्त्वपूर्णेति मत्वा श्रद्धेय म०, म० गोपीनाथकविराजमहाभागैः सम्पाद्य सरस्वतीभवनग्रन्थमालाया प्रकाशितमेकं सस्करणम्, तदपि बहुवर्षेभ्यो दुष्प्रापमेव। ममैकेन मित्रेण पुस्तकान्तरभ्रान्त्या स्वीयैकामातृका मह्यमुप-दर्शिता, पूर्वस स्करणापेक्षया तस्याः पाठो मया बहुत्रशुद्धोऽधिकश्च व्यलोकि, अतो यथामति संशोध्य शुद्धमुचित च पाठ मूले संस्थाप्य तदितरपाठश्च टिप्पण्या दत्त। मूलग्रन्थे येषा ग्रन्थानमुद्धरणानि सन्ति तानि प्रकाशितेभ्योऽप्रकाशितेभ्यश्च सम्यङ्मेलयित्वा तेषामङ्क संख्यापि यथोपलब्धा दत्ता। एव यथामति यथासभवं च कृतेऽपि संशोधने व्यस्ततावशात् मानवस्वभावसुलभचपलतया च यास्त्रुटय· स्युस्ता ममानवधानमिति क्षन्तव्याः संशोध्या-श्चेति भूयोभूय. प्रार्थये कृपाघनान् विदुषः—

सरस्वतीभवनम्
मकरसंक्रान्तिः सं० २०२९

विद्वच्चरणचञ्चरीकः
जनार्दनशास्त्री पाण्डेयः

Prefatory Note

The following pages, which embody the doctrines of Gorakṣanātha and the Nātha sect in general and represent an ancient collection of essays by members of the same sect, are presented to the public for the first time, I believe, in the hope of removing a long-felt want. The study of Nāthism—so it is called by Mahāmahopādhyāya Haraprasad Śāstri who had occasions to write upon the subjects more than once—has been suffering for a long time from paucity of adequate literary data Besides the Haṭhayoga Pradīpikā, Goraksa Śataka, Goraksapaddhati, Gheraṇḍa Saṁhitā, and more, very little is known of the Sanskrit Literature of the Nāthas. The contributions of Wilson, Aksayakumāra Datta, Farquhar and others have all been consequently more or less incomplete. The publication of the present work, therefore, must be considered as a welcome addition to our Library, specially in view of the fact that it comprises many short tracts attributed to the venerable sages themselves, e.g. Gorakṣanātha, Matsyendranātha, Jalandharanātha, Bhartrihari etc.

The greatest defect in the Sanskrit writings of the sect is the frequent violation of the rules of grammar, metrics etc. Unnecessary repetition, ambiguity of expression and incoherent presentation are also to be noticed. But all these defects, and others not mentioned here and arising from insufficient Mss materials, are insignificant in comparison with the high importance of the work, from the historical as well as religious and philosophical points of view.

The book is full of inaccuracies. But it has been allowed to come out in its unvarnished form, for the editor has no right to step beyond his limits and introduce corrections or alterations in the

language of the original author It is hoped, however, that the readers will appreciate this attitude and make allowance for these defects

Further details regarding the work and the sect will be found in the General Introduction which will follow and in my 'Studies in Nāthism' (to appear shortly).

Sanskrit College }
Benares }

Gopinath Kaviraj

विषय-सूची

|| ॐ श्रीगणेशाय नमः ||

|| ॐ भगवते आदिनाथाय नमः ||

|| श्रीगोरक्षनाथो विजयतेतराम् ||

|| गोरक्षसिद्धान्तसङ्ग्रहः ||

निर्गुणं वामभागे च सव्यभागेऽद्भुता निजा ||
मध्यभागे स्वयं पूर्णस्तस्मै नाथाय ते नमः || १ ||

मुक्ता लुण्ठति पादाग्रे नखाग्रे जीवजातयः ||
मुक्तामुक्तगतेर्मुक्तः सर्वत्र रमते स्थिरः || २ ||

वामभागे स्थितः शम्भुः सव्ये विष्णुस्तथैव च ||
मध्ये नाथः परं ज्योतिस्तज्ज्योतिर्मे तमोहरम् || ३ ||

अस्मिन्मार्गे सर्वश्रेयोमूलभूतो गुरुरेव, स चावधूत एव नान्यः, स कोऽवधूत इत्यपेक्षायामाह—

वचने वचने वेदास्तीर्थानि च पदे पदे ।
दृष्टौ दृष्टौ च कैवल्यं सोऽवधूतः श्रियेऽस्तु नः ||

एकहस्ते धृतस्त्यागो भोगश्चैककरे स्वयम् ।
अलिप्तस्त्यागभोगाभ्यां सोऽवधूतः श्रियेऽस्तु नः ||

सिद्धसिद्धान्तपद्धतौ—

यः सर्वान् प्रकृतिविकारान् अवधुनोतीत्यवधूतः । (सि० ६।१)
प्रसरं भासयेच्छक्तिः सङ्कोचं भासयेच्छिवः ।
तयोर्योगस्य कर्ता यः स भवेत्सिद्धयोगिराट् || इति || (सि० ६।६३)

अवधूतगीतायाम्—

आब्रह्मस्तम्बपर्य्यन्तं सम्पूर्णं परमात्मनि ।
भिन्नाभिन्नं न पश्यामि तस्याऽहं पञ्चमाश्रमी || इति ||

सूतसंहितायाम्—

अतिवर्णाश्रमी प्रोक्तो गुरुः सर्वाधिकारिणाम् ।
न कस्यापि भवेच्छिष्यो यथाऽहं पुरुषोत्तमः ||
(सू० सं० मुक्ति खं० ५।१४)

'यथाऽहं पुरुषोत्तमः' इति विष्णुं प्रति शिववचनम्।

अतिवर्णाश्रमी साक्षाद् गुरूणां गुरुरुच्यते।
तत्समो नाधिकश्चास्मिल्लोकेऽस्त्येव न संशयः ॥ इति ॥
(सू० सं० मु० खं० ५।१५)

ब्रह्मबिन्दूपनिषदि—

पक्षपातविनिर्मुक्तं ब्रह्म सम्पद्यते तदा।
स्वरेण [1]साधयेद्योगमस्वरं भावयेत्परम् ॥
अस्वरेण हि भावेन भावो नाऽभाव इष्यते।
तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम्।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म सम्पद्यते ध्रुवम् ॥
(२।६-८, ई० अ० पृ० १२७)

तत्राऽऽशङ्कते—पक्षपातः क इति ? देहाभिमान एव सः। सोऽपि क इति ? अहं ब्राह्मणोऽहं क्षत्रियोऽहं वैश्योऽहं शूद्रोऽहं पुनरन्त्यजोऽहं ब्रह्मचार्य्यहं गृहस्थोऽहं वानप्रस्थोऽहं संन्यास्यहमुत्तमोऽहं मध्यमोऽहमधम इत्यादि सङ्कल्प एव सः। तं सङ्कल्पं विहाय सर्वव्यापकं परमनाथ याथातथ्येन पश्यत्यथ मुक्तो भवति तादृश एव स्यादिति। तथा च वर्णाश्रमादिव्यवहारमतीत्य नाथं साक्षात्कुर्वतो मुक्तिरिति।

यदि कोऽपि वदेद्वर्णाश्रमाचारव्यवहारं त्यक्तवतः परमयोगिनो मुक्तिर्भवतु नाम, वर्णाश्रमाचारवतः सा कथं न भवेत् ? "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इत्यादीनि कानिचिच्छास्त्रवाक्यान्यवलम्ब्य वदन्ति चामुको गृहस्थो मुक्तो मुक्तश्चामुको भिक्षुरिति ? तत्रोच्यते—गुणानतीत्यैव मुक्तो भवति[2] न तु गुणाभिमानीति सर्वसम्मतः सिद्धान्तो भवत्येव। वर्णव्यवहारे तु न सम्भवति गुणातीतत्वम्। कथम् ? वर्णमात्रस्यापि गुणनिर्मितत्वादिति। उक्तञ्च गीतायाम्—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम् ॥ (गी ४।१३)

तथा च कथं गुणसत्त्वे मुक्तिरिति ? तत्र वादी वदति—वर्णाभिमानिनः किं न त्यजन्ति गुणानिति ? सत्यम्; यदि गुणांस्त्यजेयुस्तर्हि कथं वर्णसद्भावः ? गुणमूलकत्वादेव वर्णत्वस्य। तथा चाश्रमित्वं स्यात् ? तदा वादी वदति-भवद्भिस्त्वाश्रमिणोऽपि गुणातीतत्वाभावान्मुक्तिर्नेत्युच्यते। सा च भवद्वचनक्रमेण त्वायास्यति। तत्र किमुत्तरमिति ? उच्यते; नैवमाश्रमिण। मुक्तिरायाता। कथम् ? आश्रमाणामपि गुणलेशत्वात्[3]। प्रथमतो वर्णव्यवहारेण गुणभजनम्। गुणवृत्तिषु च सत्त्वगुणवृत्तय

१. स्न्धयेत्—मु० पा०। २. भवेत्.-पा०.
३. गुणमूलकत्वात्—पू० सं०

उत्तमा, रजस्तमोवृत्तयस्ततो निकृष्टा, इति कृत्वा गुणेष्वप्युत्तमादित्वं स्यात्, परन्तु गुणवृत्तित्व तु सर्वसाधारणमतो नास्ति गुणवृत्तीनां मुक्तिसाधकत्वम्। तत्र दृष्टान्त --

यथा द्वे स्त्रियौ रूपवत्यौ भवतस्तयोर्द्वयोरपि संयोगे न भवेद्गर्भोत्पत्तिः ? किन्तु तद्धर्मभिन्नत्वेन पुरुषेणैव सा भवेत्, किञ्च सौन्दर्यतारतम्येनैकस्या अपरा अधिका न्यूना वा भवतु नाम, परन्तु भोक्ता तु तयोर्द्वयोरपि पुरुष एव, नास्ति तयोरन्योन्यं भोक्तृभोग्यत्वम्। तथा नास्ति वर्णानां साक्षान्मुक्तिविषयेऽन्योयं गुरुशिष्यत्वम्। किञ्चाश्रमिणोऽपि प्रथमतो वर्णाभिमानेन गुणभाज एवेति चोत्तरत्रापि प्रारब्धमभिमत्य भोगभाजो भवन्ति। तेन च प्रारब्धकर्मणां भोगोऽवश्य इति कृत्वा कर्म्मणां सत्यत्वं तावद् दर्शयति—यतो गुणलेश एतेषामपि न निवृत्तो यतो मुक्तत्वपुरुषार्थविहीनास्तेऽपि नपुसकप्रायाः सन्तो न मुक्तिस्त्रियमर्हन्ति[1]।

यद्यपि नपुंसकाः पुरुषवेषिणो वर्त्तन्ते, तथापि पुरुषत्वेन सन्ततिसम्पादका न भवन्ति, एवं वेषमात्रेणाश्रमिणोऽपि सम्मानपूजाद्यर्हन्तु नाम गुरुत्वम्। अतो गुणातीतत्वेनात्याश्रमिण एव मुक्तिप्रदगुरुत्वं नान्यस्य कस्यापीति बहुधा शास्त्रे निरूपितम्।

कैवल्योपनिषदि—

विविक्तदेशे सुखमासनस्थः शुचिः समग्रीवशिरः शरीरः।
अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य॥
(कै० उ० १।५, ई० अ० पृ० १२८)

तेजोबिन्दूपनिषदि—

लोभं मोहं भयं दर्पं कामं क्रोधं च किल्विषम्।
शीतोष्णे क्षुत्पिपासे[2] च सङ्कल्पं सविकल्पकम्॥
न ब्रह्मकुलदर्पं[3] च न मुक्तं[4] ग्रन्थसञ्चयम्।
न भयं सुखदुःखं च तथा मानापमानयोः॥
एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परम्॥ इति॥
(ते० उ० १२-१४; ई० अ० पृ० २२३)

अमनस्के—

कुलाचारविहीनस्तु गुरुरेको हि दुर्लभः। (अम० २।१७)

इति वर्णाश्रमित्वमुक्तम्। नास्ति वर्णाश्रमाचारे सर्वारम्भपरित्याग इति। पुनः एवं चावधूत एव सन्मार्गदर्शनशीलो भवति। स एव गुरुर्मुमुक्षुभिः कर्तव्यः।

---

१. मुक्तिश्रियम्,—पू० सं०। २. शीतोष्णं क्षुत्पिपासं च—मु० पा०।
३. दर्पं—मु० पा०। ४. मुक्तिग्रन्थि—मु० पा०।

सिद्धसिद्धान्तपद्धतौ—

फलितानेकपुण्यानां मुमुक्षूणां हितावहम् ।
साधनं साधनश्रेष्ठमाह योगमतः परम् ॥

सन्मार्गश्च योगमार्गस्तदितरस्तु पाखण्डमार्गस्तदुक्तमादिनाथेन—

योगमार्गेषु निष्णाता दीक्षिता ये तु[१] दूषकाः ।
ते हि पाखण्डिनः प्रोक्तास्तथा तैः सह वासिनः ॥

योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौ स्मृतौ ।
शास्त्रग्रन्थेषु[२] सर्वेषु शिवेन कथितं पुरा ॥

विवेकमार्तण्डे—

योगशास्त्रं पठेन्नित्यं किमन्यैः शास्त्रविस्तरैः ।
यत्स्वयं चादिनाथस्य निर्गतं वदनाम्बुजात् ॥[३]

खेचरीसहितायाम्[४]—

उत्सृज्य सर्वशास्त्राणि जपहोमादि कर्म च ।
धर्माधर्मविनिर्मुक्तो योगी योग समभ्यसेत् ॥

वर्णाश्रमाभिमानेन वर्त्तते श्रुतिकिङ्करः ।
अभिमानविहीनस्तु वर्तते श्रुतिमूर्द्धनि ॥

न वेदो वेद इत्याहुर्वेदावेदो निगद्यते ।
परात्मा विद्यते येन स वेदो वेद उच्यते ॥

वर्णधर्मे च सन्ध्या विहिता, तत्प्रतिरूपकमाह—

न सन्ध्या सन्धिरित्याहुः सन्ध्या सन्धिर्निगद्यते ।
सुषुम्णासन्धिग प्राणः सा सन्ध्या सन्धिरुच्यते ॥

ध्यानबिन्दूपनिषदि—

यदि शैलसमं पाप विस्तीर्णं योजनान्बहून् ।
भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन ॥
(१, ई० अ० पृ० २४५)

विवेकमार्तण्डे—

द्विजसेवितशाखस्य श्रुतिकल्पतरोः फलम् ।
शमनं भवतापस्य योगं भजत सत्तमाः ॥ (वि० ६।१)

---

१. त्तांश्च—पा० । २. शास्त्रेष्वन्येषु—मु० पा० ।
३. मुद्रितेषु नोपलभ्यते । ४. नास्ति—पू० सं० ।

मुण्डकोपनिषद्यङ्गिरसं प्रति शौनकवचनं प्रश्नरूपम्—

"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति ? इति। तस्मै स होवाच- द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति। परा चैवापरा च। तत्रापरा— ऋग्वेदो यजुर्वेदः सामवेदो [1]ब्रह्मवेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमितिहासपुराणं न्यायो मीमांसा धर्मशास्त्राणीति परा यया तदक्षरमधिगम्यत इति।" (१।३-५; ई० अ० पृ० १४)

यदक्षरं यया प्राप्यत इत्युक्तं सा योगविद्यैव। कथम् ? श्रुतिस्मृतिपुराणादिसर्वविद्यानामपरविद्यायामेवोक्तत्वाद्योगविद्यायाश्चानुक्तत्वात् पृथक्त्वमर्थात् सिद्धम्। तदुक्तमात्मोपनिषदि—

"अथ परमात्मा नाम [2]यथाक्षरमुपासनीय। स च प्राणायामप्रत्याहारधारणाध्यानसमाधियोगानुमानाध्यात्मचिन्तकवटकणिका वा श्यामाकतन्दुलो वा वालाग्रशतसाहस्र[3]कल्पनादिभिः स लभ्यते, नोपलभ्यते, न जायते, न म्रियते, न शुष्यते, न दह्यते, न कम्पते, निर्गुणः, साक्षीभूतः शुद्धो निरवयवात्मा केवलः सूक्ष्मो निष्कलो [4]निरञ्जनो [5]निरभिमानः शब्दस्पर्शरूपरसगन्धवर्जितो निर्विकल्पो निराकाङ्क्षः सर्वव्यापी सोऽचिन्त्योऽवर्ण्यश्च, पुनात्यशुद्धान्यपूतानि। निष्क्रियस्तस्य संस्कारो नास्ति (संस्कारो नास्तीत्येष परमात्मेति)[6]।" (१, ई० अ० पृ० ४५१)

सा चामृतबिन्दूपनिषदि स्पष्टमाह—

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः।
परमं ब्रह्मविद्याया उक्त्वा नान्यमथोत्सृजेत्॥

ॐकारं रथमारुह्य विष्णुं कृत्वा तु सारथिम्।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः॥

यावद्रथेन गन्तव्यं तावद्रथपथि स्थितः।
स्थित्वा रथं यथास्थानं रथमुत्सृज्य गच्छति॥

मात्रालिङ्गपदं त्यक्त्वा शब्दव्यञ्जनवर्जितम्।
अस्वरेण मकारेण पदं सूक्ष्मं च गच्छति॥

शब्दादिविषयाः पञ्च मनश्चैवातिचञ्चलम्।
चिन्तयेदात्मनो रश्मीन् प्रत्याहारः स उच्यते॥

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते॥ इत्यादि यावत्समाप्ति।

---

१. अथर्ववेदः—मु० पा०। २. यथाक्षर—मु० पा०।
३. विकल्पनाभिः—मु० पा०। ४. निर्ममो—मु० पा०।
५. निर्विकारः—मु० पा०। ६. () नास्ति—मु०।

मनुस्मृतौ—

क्षरन्ति सर्वा वैदिक्यो जुहोति-यजति-क्रियाः।
अक्षरं दुष्करं ज्ञेयं ब्रह्म चैव प्रजापतिः॥ (म० २।८४)

उत्तरगीतायाम्—

यथाऽमृतेन[1] तृप्तस्य पयसा किं प्रयोजनम्।
एवं तत्त्वपदे प्राप्ते वेदे नास्ति प्रयोजनम्॥ (१।२२)
पुराणं भारतं वेदा धर्मशास्त्राण्यनेकशः।
पुत्रदारादिसंसारो योगमार्गस्य विघ्नकृत्॥ (३।२)
मुहूर्तमपि योगस्थो नासाग्रे मनसा अपि।
सर्वं तरति पापं च तस्य जन्मशतोद्भवम्॥ (२।१०)
अश्वमेधसहस्राणि वाजपेयशतानि च।
एकस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम्॥

वायुपुराणे—

ऋचो यजूंषि सामानि वेदोपनिषदस्तथा।
योगज्ञानादवाप्नोति ब्राह्मणोऽध्यात्मचिन्तकः॥

मार्कण्डेयपुराणे—

एतत्ते कथितं ज्ञानं योगं चेम निबोध मे।
यं प्राप्य ब्राह्मणो[2] योगी शाश्वताऽन्यतां[3] व्रजेत्॥

एवं बहुधा शास्त्रेषु योगस्य प्रशंसा विदितैव, तस्या दिङ्मात्रमिद दर्शितम्। तस्य योगस्य लक्षणं तु विवेकमार्तण्ड उक्तम्—

योगं चात्र प्रवक्ष्यामि योगं चाष्टाङ्गसंयुतम्।
संयोगं योगमित्याहुः क्षेत्रज्ञपरमात्मनोः॥

एतस्यैव योगस्य मन्त्रयोगादीन्यङ्गानीति ज्ञेयम्।

सन्मार्गत्वेन योगस्तु सेव्यो हित्वाऽन्यसाधनम्।
मुमुक्षुभिर्यतस्तेषां पदप्राप्तिः परा भवेत्॥
योगिनो वीतसङ्कल्पा निर्द्वन्द्वा पुण्यदर्शनाः।
योगरत्नकरण्डास्ते जयन्त्यविधिगोचराः॥

तद्वतामेव परमपदप्राप्तिरिति तेषां स्वरूपं प्रशंसां चाह कैवल्योपनिषदि—

विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरः शरीरः।
अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य॥

---

१. घृतेन—मु० पा०। २. ब्रह्मणो—मु० पा०
३. मान्यता—पू० सं०।

हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ।
अनन्तमव्यक्तमचिन्त्यरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥
तमादिमध्यान्तविहीनमेकं [2]विभुं चिदानन्दमरूपमद्भुतम् ।
उमासहायं परमेश्वरं [3]विभुं त्रिलोचन नीलकण्ठं प्रशान्तम् ॥
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ।
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
स एव विष्णुः सः प्राणः स आत्मा परमेश्वरः ॥
स एव सर्वं यद्भूतं यच्च भाव्यं सनातनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥
(कै० १।५-९, ई० अ० पृ० १२८)

गीतायां च—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ (गी० ६।४६)

महार्णवे—

योगी ब्रह्मा योगिनो विष्णुरूपं योगी देवो देवदेवो महेशः ।
योगी मोक्षः पूर्णतत्त्वस्वरूपो योगी ध्यानं सृष्टिकर्ता च हर्ता ॥

इत्यादि वचनं सन्दर्भेण योगिनामेव परमश्रेयः ।

तेषां [4]मुख्यचिह्नं किमित्यपेक्षायां मुद्रा-नाद-विभूति-आदेशधारणं मुख्यमिति तत्प्रशंसामाह सिद्धसिद्धान्तपद्धतौ—

मुद्मोदे तु रादाने जीवात्मपरमात्मनोः ।
उभयोरैक्यसंभूति[5]र्मुद्रेति परिकीर्तिता ॥
मोदन्ते देवसङ्घाश्च द्रवन्ते सुरराशयः ।
मुद्रेति कथिता साक्षात्सदा भद्रार्थदायिनी ॥ (सि० ६।३०-३१)

तद्धारणं कर्णयोर्विना क्षुरिकां न सम्भवतीति क्षुरिकाप्रशंसामाह क्षुरिकोपनिषदि—

क्षुरिकां सम्प्रवक्ष्यामि धारणां योगसिद्धये ।
[6]सम्प्राप्य न पुनर्जन्म योगयुक्तस्य जायते ॥ इत्यादि ।
(क्षु० १; ई० अ० पृ० २१२)

वृहदारण्ये—अथात आदेशो नेति नेतीति ।
छान्दोग्ये च—उत तमादेशमित्यादि ।

---

१. अचिन्त्य—मु० पा० । २. कवि—मु० पा० ।
३. प्रभुं—मु० पा० । ४. अमुष्य—पू० सं० ।
५. सवित्ति—मु० पा० । ६. यां प्राप्य—मु० पा० ।

तेषामन्योऽन्यमन्यत्रापि च यो वाग्व्यवहारस्तमाह—

[सिद्धसिद्धान्तपद्धतौ—

आत्मेति परमात्मेति जीवात्मेति विचारणे ।
त्रयाणामैक्यसम्भूतिरादेश इति कीर्तितः ॥
आदेश इति सद्वाणीं सर्वद्वन्द्वक्षयावहाम् ।
यो योगिनं प्रतिवदेत्सवेत्त्यात्मानमीश्वरम् ॥ इति ।

(सि० ६।९४-९५)

नादधारणमाह गोरक्षोपनिषदि—अनाहतशृङ्गीति ।][1]

तेषां भस्मोद्धूलनमपि तत्त्रिपुण्ड्रमपि च तैर्धार्यमिति तद्धारणप्रकारप्रशंसे प्राह कालाग्निरुद्रोपनिषदि—

"कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छाधीहि भगवंस्त्रिपुण्ड्रं सविधि सतत्त्वं किं द्रव्यमित्यादि प्रश्ने तं होवाच भगवान्—यद्द्रव्यं तदाग्नेयं भस्मसद्यदिदं ब्राह्मणैः परिगृह्य "अग्निरिति भस्म" इत्यभिमन्त्र्य" इत्यादि "प्रकुर्वीत व्रतमेव तच्छाम्भवं समाचरेन्मुमुक्षुर्न भवाय यथा सनत्कुमार" इत्यन्तं "समस्तपातकोपपातकेभ्यः पूतो भवति, तेन सर्वे देवा ध्याता भवन्ति, स सर्वैर्वेदैर्ज्ञातो भवति, स सर्वतीर्थेषु स्नातो भवति, देहं त्यक्त्वा शिवसायुज्यतामेति, न स पुनरावर्त्तते, न स पुनरावर्त्तते, इत्याह कालाग्निरुद्र इति ।"[2] (का० १, ई० अ० पृ० २००)

तेषामनियत एव व्यवहार इत्याह सिद्धसिद्धान्तपद्धतौ—

क्वचिद्भोगी क्वचित्त्यागी क्वचिन्नग्नः पिशाचवत् ।
क्वचिद्राजा क्वचाचारी सोऽवधूतो विधीयते ॥ (सि० ६।२०)

एवं सर्वमयः सर्वेभ्यो विलक्षणः पृथगिति बहुधा सिद्धसिद्धान्तपद्धत्यादियोगग्रन्थेषु प्रपञ्चितम् । तद्विशेषं जिज्ञासुभिर्द्रष्टव्यं विस्तरभयान्नात्र लिख्यते । एवञ्च सर्वसाधनशिरोमणियोगमूर्तिभूता अवधूता एव परमपुरुषार्थविचक्षणाः सर्वशिरोमणयो जयन्ति ।

सन्मार्गसाधका वर्णाश्रमाचारानपेक्षकाः ।
योगिनो ह्यवधूता ये ते संक्षेपान्निरूपिताः ॥
परमः पुरुषार्थस्तु मुक्तिरुक्ता ह्यतस्तु सा ।
निरूप्यतेऽवधूतानां योगसाधनजं फलम् ॥

परमपुरुषार्थस्तु मुक्तिरित्युक्तम् । सा च नाथस्वरूपेणावस्थानम् । तत्स्वरूपं तु गोरक्षोपनिषदि—"अद्वैतोपरि सदानन्ददेवता ।"

---

१. [ ] अयमंशो नास्ति पूर्व संस्करणे ।

२. मध्ये मध्ये विच्छिद्य गृहीतः पाठः; ब्र०—ई० अ० पृ० २०० ।

ब्रह्मोपनिषदि—

"स्वयममनस्कमश्रोत्रपाणिपादं ज्योतिर्विदितं तत्र लोका न लोकाः, वेदा न वेदाः, देवा न देवाः, यज्ञा न यज्ञाः, माता न माता, पिता न पिता, स्नुषा न स्नुषा, चाण्डालो न चाण्डालः, पौल्कसो न पौल्कसः, श्रमणो न श्रमणः, पशवो न पशवः, तापसो न तापस इत्येकमेव परमिति ।" (ई. अ. पृ. १५१)

ब्रह्मविन्दौ च—"नैव चिन्त्यं न चाचिन्त्यमचिन्त्यं चिन्त्यमेव च ।" इत्यादि । (२।६; ई अ. पृ. १२७)

सर्वोपनिषत्सारे—

"कथं बन्धः कथं मोक्षः" इत्यादिप्रश्ने "अनात्मनो देहादीनात्मत्वेनाभिमन्यते सोऽभिमानः, आत्मनो बन्धस्तन्निवृत्तिर्मोक्षः" (१।१; ई. अ. पृ २१५) इत्यनेन स्वरूपेणावस्थानमिति सिद्धम् । अमनस्के—

भावाभावविनिर्मुक्तं नाशोत्पत्तिविवर्जितम् ।
सर्वसङ्कल्पनातीतं परं ब्रह्म[1] तदुच्यते ॥ (अम० १।१२)

अवधूतगीताया च—

अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।
समं तत्त्वं न विन्दन्ति द्वैताद्वैतविलक्षणम्[2] ॥ (१।३६)
यदि सर्वगतो देवः स्थिरः पूर्णो निरन्तरः ।
अहो माया महामोहो द्वैताद्वैतविकल्पना ॥ (१।६१)

श्रीनित्यनाथकृतसिद्धसिद्धान्तपद्धतौ—

न ब्रह्मा विष्णुरुद्रौ न सुरपतिसुरा नैव पृथ्वी न चापो
नैवाग्निर्नापि वायुर्न च गगनतलं नो दिशो नैव कालः । (१।२)
नो वेदा नैव यज्ञा न च रविशशिनौ नो विधिर्नैव कल्पाः ।
स्वं ज्योतिः सत्यमेकं जयति तव पदं सच्चिदानन्दमूर्ते ॥ (१।३)

सा मूर्तिः का वा ? तथाह श्रीनित्यनाथकृतसिद्धसिद्धान्तपद्धतौ—

आदिनाथं महासिद्धं शक्तियुक्तं जगद्गुरुम् ।
तं वन्दे नित्यतो वक्ष्ये सिद्धान्तं स्वानुभावतः ॥

पुनरत्रैव प्रवृत्तौ आदिदेवमेतत्पदेनावस्थानं मुक्तिरिति ।

नाथस्य लक्षणं तु राजगुह्ये—

नाकारो नादरूपं च थकारः स्थाप्यते सदा ।
भुवनत्रयमेवैकः श्रीगोरक्ष नमोऽस्तु ते ॥

---

१. परब्रह्म—पू० स०; परं तत्त्व—मूलमातृकायां ।

२. °विवर्जितम्—मु० पा० ।

शक्तिसङ्गमतन्त्रे—

श्रीमोक्षदानदक्षत्वान्नाथ [द] ब्रह्मानुबोधनात् ।
स्थगिताज्ञानविभवाच्छ्रीनाथ इति गीयते ॥

इत्यादीनि वाक्यानि[१] प्रमाणानि । तस्य निदर्शनं शास्त्राणि सूर्यस्य दीपा इव कथं करिष्यन्ति । तत्तु पदं तादृग्योगिनामेवापरोक्षमिति सिद्धान्तः । अन्ये तु मतवादिनस्तत्पदमनालम्बमाना स्वाभिप्रायानुसारि तत्पदं विधाय विवादभाराक्रान्तमतयः क्लिश्यन्ति न तु शाम्यन्तीत्याह सिद्धसिद्धान्तपद्धतौ—

वेदान्ती बहुतर्ककर्कशमतिर्ग्रस्तः परं मायया ।
भाट्टाः कर्मफलाकुला हतधियो द्वैतेन वैशेषिकाः ।
अन्ये भेदरता विवादविकलास्ते तत्त्वतो वञ्चिताः
तस्मात्सिद्धमतं स्वभावसमय धीरः परं संश्रयेत् ॥ (सि० ६।७३)

अस्यार्थः—वेदान्तो वेदोत्तरभागशास्त्रवादी अद्वैतवस्तुन्यध्यारोपापवादाभ्यां द्वैतकल्पनां कुर्वन् बहुभिस्तर्कैः कर्कशा कठोरा मतिर्यस्य सोऽत एव परं केवलं ग्रस्तो यतो निर्मायिकं वस्तु वदन् मायादूषणं च तत्र ददाति । पुनः भाट्टाः मीमांसका अनीश्वरवादमारोपयन्तः कर्मफलेष्वेवाकुलिताः सन्तो गतधियो भवन्ति । तथा द्वैतेन द्वैतवादेन वैशेषिका अपि गतधिय एव । तदन्येऽपि ये भेदवादरतास्तेऽपि विवादविकला एव भवन्ति । यत एते तत्त्वतो वञ्चिता भवन्ति न तु तत्त्वमालम्बन्ते इत्यर्थः । तस्मान्महासिद्धानां स्वाभाविकं सहजावस्थामयं मतं धीरः पुमान् संश्रयेत् । तदेव श्रेयस्करमिति मान्यम् ।

साङ्ख्या वैष्णववैदिका विधिपराः संन्यासिनस्तापसाः
सौराश्चीरपराः[२] प्रपञ्चनिरता बौद्धा जिनाः श्रावकाः ।
एते कष्टरता वृथापथगतास्ते तत्त्वतो वञ्चिताः
तस्मात्सिद्धमत स्वभावसमयं धीरः परं संश्रयेत् ॥ (सि० ६।७४)

अस्यार्थः—साङ्ख्याः प्रकृतिकारणवादिनः कपिलमतानुयायिन इति यावत्, वैष्णवाः पाञ्चरात्राः, वैदिका वेदानुवर्तिनस्ते च विधिपरा वाक्यकोविदा इत्यर्थः । स्पष्टमन्यत् ।

आचार्या बहुदीक्षिता हुतिरता नग्नव्रतास्तापसाः
नानातीर्थनिषेवका जिनपरा मौने स्थिता नित्यशः ।
एते ते खलु दुःखभारनिरतास्ते तत्त्वतो वञ्चिताः
तस्मात्सिद्धमतं स्वभावसमयं धीरः परं संश्रयेत् ॥ (सि०६।७५)

---

१. पुराणवाक्यानि—पू० स० । २. वीरवरा—मु. पा. ।

अस्यार्थः—आचार्या मन्त्रव्याख्यातारो बहुदीक्षिता अग्निहोत्रादिकर्त्तारः, त एवाहुतिपरा न तु तत्त्वपरा, अजिनपरा वल्कलवाससस्ते तीर्थनिषेवका यद्वा जपपराः, शेषं स्पष्टम्। इत्यादि। हठप्रदीपिकायां च—

केचिदागमजालेन केचिन्निगमसंकुलाः[१]।
केचित्तर्केण मुह्यन्ति नैव जानन्ति शाङ्करीम्[२] ॥ (४।४०)

अस्यार्थः—केचिद्वैखानसाद्यागमोक्ततत्त्वभ्रमास्तत्र तत्त्वाभिमानिनो देहात्मवादिनश्चार्वाकसधर्माणस्ते मनुष्यास्तप्तचक्राद्यङ्किता जीवन्तोऽपि मृतकमिव शरीरं सत्कर्मानर्हं कुर्वाणा देवनिन्दका इति। केचिच्च ऋग्यजुरादिवेदासक्ताः कर्मज्ञानरताः कर्मणैवायुः पूर्णं कुर्वन्ति, अथ च तत्त्ववञ्चिताः साधनेऽशक्तास्ते हि कातर्य्येण प्रारब्धशरणा भूत्वा शरीरसुखार्थमहं ब्रह्मेति वदन्तस्तिष्ठन्ति, तदेवात्मानं चेद्विजानीयादित्यादावुक्तम्। एवं निगमसङ्कुला इति। केचिच्चातर्क्यैश्वर्ये परमपदे वस्तुनि शुष्कतर्कानाश्रित्य पण्डितम्मन्या भवन्तीति कृत्वा शाङ्करीं न जानन्तीति।

सा शाङ्करी स्तूयते हठप्रदीपिकायाम्[३]—

वेदशास्त्रपुराणानि सामान्यगणिका इव।
मा पुनः शाङ्करी मुद्रा प्राप्ता कुलवधूरिव ॥

ऋग्यजुरादयो वेदा धर्मार्थकाममोक्षोपदेष्टारो [४]ब्रह्मचर्यगृहस्थवानप्रस्थभिक्षुकाश्रमोपदेष्टारश्च भवन्ति। ते च मुख्ये वस्तुनि गौणत्वमापादयन्त्यमुख्ये च मुख्यत्वमतो यत्र तादृशा अधिकारिणो बहवो लग्नास्ते चोत्तमपुरुषैरसेवनीया द्रव्यस्पृहः प्रवृत्तावेवासक्ता भवन्ति। शास्त्राणि च वैशेषिकादीनि। तैर्भ्रममूलकैः[५] कदापि विश्रान्तिर्नास्ति। पुराणानि च नरानात्मसाधनेष्वशक्तत्वं प्राय आपादयन्ति। यतो बालकानामिव रुचिरतरासु कथासु लोकानां चित्तवृत्तिं गमयन्ति। तेऽपि सर्वे सामान्यगणिका इव भवन्ति। तद्यथा—गणिकागृहे शृङ्गारप्रधाना एव वार्ता मुख्याः स्युरैश्वरी वार्त्ता तु गौणी, ताश्च गणिका बह्वयो बहूनां धूर्तानां लम्पटानामुपरि चासक्ता भवन्त्यः सत्यवादिनामकामिनां प्रियेश्वरकथानामुपरि नासक्तिं कुर्वन्ति, इति।

किञ्च इह खलु संसारे योगो भोगश्च द्वौ पदार्थौ स्तः। एतद्द्वयं विना किमपि न स्यात्, सर्वस्याप्येतयोरन्तर्भूतत्वादिति। तयोर्मध्ये योगे लग्ना महासिद्धाः, भोगे तु सर्वे संसारिणः। योगस्य फलं मुक्तिर्भोगस्य तु बन्ध इति। यद्यपि भोगाद्बन्धस्तथापि नानाविलासैर्विषयानन्दं विलुण्ठयति। यदि दुःखमपि भवेत्तर्हि भवतु

१ °सङकुलैः—मु० पा०। २ तारक—मु० पा०,
३. नास्ति—पू० स०। ४. ब्रह्मचारि—पू० स०।
५. भ्रमम०—पू० सं०।

नामेति। योगिनां तु पुनः प्रथमतः किञ्चिच्छ्रमो भवेत् "क्लेशोऽधिकतरस्तेषाम-व्यक्तासक्तचेतसाम्" इत्याद्युक्तत्वादिति, पश्चात्तु महानानन्द। तत्र बहवः कथयन्ति-किञ्चिदिति कथ; योगे तु क्लेशोऽधिकतर इत्युक्तम। तदुपरि मया तु कथ्यते—भो पुरुषा. ! गुरुहीनानां तेषा कष्ट भवेत्; यदा तादृशः पूर्वोक्तः पूर्णो गुरुर्लभ्येत तदा महदपि कष्टं स्वल्प भवेत्। तत्र दृष्टान्तः यथा महाभारयुक्ता या शिला भवेत् तस्या उत्थापने सहस्राणामपि पुरुषाणां कष्टं भवेत्, सा च बुद्धिमता पुरुषेण कृत-काष्ठादियत्नेनाप्रयासेनैवोत्थाप्यते, तथा गुरुमय्या कुञ्जिकया स्वल्पेनापि कष्टेन सहजसिद्धिर्भवति, यदि च महत्कष्टमपि भवेत् तदा कष्टोत्तरे तु महानानन्दो भव-त्येव, यस्त्वखण्डैकनाथरूपो भवति। ब्रह्मविष्णवाद्यधीश्वरो भवति। नानारूपो भवति। ब्रह्मादयः सर्वे तस्य पूजां कुर्वन्ति, योगारूढो नानाभोगान् भुनक्ति, न तु तैर्लिप्यते, योगं विना भोगी रोग्येव स्यात्, भोग्यपि योगी संसारीव दृश्यते, न तु संसारीव बन्धनं प्राप्नोति।

ननु केचिच्छास्त्रिणः कर्माद्युपासनं साधनं कथयन्ति, तदा मया कथ्यते—तेषां कथनं मया न निवार्यते, तदेव कुर्वन्तु नाम, परन्तु तत्करणे फलं किमिति। कथं कर्मणामवधिर्मीमांसकास्ते तु पठनपाठनोत्तरं पठनपाठनदोषनिवृत्त्यर्थमिष्ट-स्मरणं कुर्वन्ति। यस्य शास्त्रस्य पठने पाठने चापि दोषस्तस्य सेवनेन किं भविष्यति इति। पुनः य स्वामिनं भजेत् स स्वतन्त्रो भवेत्, यश्च प्रसन्नः स्वयमेव यदिच्छति तद्ददाति मन्त्रिभ्यः। अन्यस्य तु पुरुषस्य न कस्याप्यपेक्षां करोति, अयं देहः कर्म-रचितः, कर्माणि च सर्वाणि त्रिगुणाना सन्ति, गुणाश्च मायायाः। एवञ्च यदि अनेन प्राणिना प्रारब्धं कर्माभिमतं तदा मायाऽभिमता, तदभिमाने च तत्रैव समये ब्रह्म-तत्त्वात् पृथग्भूतः। ततश्च पूर्वं पश्चादपि गुणलेशो विद्यत एव, स च बाधक एव, तस्मात्प्रारब्धकर्मनिर्मूलकरणमवधूतानामेव कर्म।

वेदान्ती चित्तशुद्ध्यर्थं कर्माभिमत्य तदनन्तरं ज्ञानं साधनमित्युपदिशति, अतः सोऽपि सापेक्ष एव। मीमांसको मन्त्रीव राजसापेक्षः, परन्तु सापेक्षता तूभयोरेवास्ति, कस्याप्यपेक्षामकुर्वन् योग आवश्यकः सर्वेषां कर्तव्यो यः सर्वदा स्वतन्त्रोऽस्ति।

मीमांसको द्वैतमभिमन्यते, वेदान्ती त्वद्वैतमभिमन्यते, तदुपरि च वदामः—एतदुभयमपि प्रकृतिविकारः। प्रकृतिविकारश्च सदा चञ्चलो नास्ति कदापि स्थिरः। ब्रह्म तु सर्वदा स्थिरमेवास्ति। तत्र द्वैतवादिनो निश्चलं नास्तीति वदन्ति, तथैवाद्वैतमभिमन्यतां निश्चलं नास्तीति कथम्?

यदि ब्रह्माद्वैतमस्ति तर्हि द्वैतं कुत आगतम्? तदा मायाकल्पितमिति ते वदेयुस्तर्हि तान्वदतो वयमवाचोऽक्रियांश्च कुर्मः[१], तत्किमिति चेदुच्यते-अद्वैतं तु

१. कर्म—पू० सं०।

निष्क्रियादि त्याग्यस्ति। यतः कस्यापि वस्तुनो भोगोऽपि युष्माभिर्न कर्तव्य इत्याद्यनेकविधिभिरद्वैतखण्डन करिष्यामः। महासिद्धैरुक्तम्-यद् द्वैताद्वैतविवर्जितं पदं निश्चलं दृश्यते तदेव सत्यमित्यभ्युपगमिष्यामः, तत्त उग्रभैरवनामककापालिकरूपतः श्रीभैरवेण शङ्कराचार्योपरि कृतम्।

कथम्? चतुर्भिः शिष्यैः संयुक्त· शङ्कराचार्यो नदीतीरे स्थितः। तस्मिन्स्थले कापालिकः समुपागत्योक्तवान्—भो त्वं तु संन्यासी, मित्रारिपक्षे तुल्यः, सुखदुःखादिद्वन्द्वपदार्थरहितोऽस्यस्माकं चायमभिप्रायो वर्त्तते-यत् तव शिर उच्छिद्य[१] पश्चात् श्रीभैरवार्पण करिष्यामि तदा मम प्रतिज्ञा पूर्णा भविष्यति, अतो भवान् शिरो ददातु-इति। तदा शङ्कराचार्येणालोचितं नैवं करिष्यते तदा त्वद्वैतहानिः शत्रुमित्रपक्षे तुल्यत्वं न स्यात्, कृते च पराजयो भवेत्। एतद्द्वयविचारेऽपि पराजय एवेति मत्वा न किमपि तेनोक्तम्। शैथिल्यं जातम्। तदा [२]पद्मपादाचार्येण नृसिंहस्मरणं कृतम्। उग्रभैरवोपरि नृसिंहेण प्रहारः कृतो यस्तु महासिद्धः तच्छरीरं त्यक्त्वा तादृशमेव च शरीरं गृहीत्वा सम्मुखे संस्थितो भूत्वा प्रसन्नवदनो मेघगम्भीरया गिरोवाच—भो अद्वैतपराजयोऽद्वैतपराजय इति। शत्रुमित्रपक्षे [तुल्यत्व यदवदस्तत्कुत्र गतमद्वैतमेवाद्वैत] [३]यदवदस्तत्कुत्र गतम्। मदीयं तु यथा मल्लो नियुद्धे स्वयमेव निपत्यान्यस्य पातनं करोति तथा स्वशरीर त्यक्त्वा परसिद्धान्तहानिः कृतैवेति चरितं पुनः साम्प्रत त्वदीयहानिरतः परमपि क्रियते। उत्तिष्ठोत्तिष्ठ युद्धं कुर्व[४] इत्याह, तदा प्रारब्धकर्माचरणं वर्त्तते न्यासिनां मते यतः क्रियाकरणमिति सिद्धान्तो नास्तीति कृत्वा युद्धेऽशक्तो जातः। कापालिकोपदेशेनाक्रियैव स्वसिद्धान्तेऽद्वैतस्थितिवत्स्थितः। तदा कापालिकेन योगमाया निर्मिता, तया च चतुःशिष्यसंयुक्तस्याचार्यस्य मस्तकं छिन्नम्, पश्चाच्च सञ्जीवितः कृतस्तर्हि विरागो जातः। पश्चिमायां दिशि गतः शक्तिस्मरणं कृतवान्।

पूर्ववार्त्ता। शङ्कराचार्यस्योत्पत्तिर्दक्षिणस्यां दिशि। तत्र तु कर्मसेवनमेव कृतं विष्णूपासनादि। यदा चित्तशान्तिर्न जाता तदा पृथ्वीपरिक्रमा[५]करणार्थं प्रयाणं कृतम्। पूर्वस्यां दिशि चागत्य तत्र वैद्यनाथाख्यस्थलं गत्वा पूजां चकार। तदेश्वरेण नाङ्गीकृता पूजा। किमर्थं त्वया विष्णुभक्तिः कृता। अहं तु साक्षादीश्वरः स तु त्वया विस्मृत इति। तदा शङ्करेणापराधक्षान्त्येऽपराधक्षमापननामक स्तोत्रं कृतम्, पुनरपि शिवभक्ति विशेषेण कृता, तथापि चित्तशान्तिर्न जाता। पश्चाच्च पश्चिमां दिशं गतस्तत्र शक्तिरहितो जातः, शक्तेर्वृत्तान्तं दृष्टम्। तदा शक्त्योक्तं शिव एव

---

१. उच्छिन्न-पा०। २. पद्माचार्येण-पा०।
३. [ ] नास्ति पू० सं०। ४. कुर्वि°-पू० स०।
५. °प्रदक्षिण° पू० सं०।

सर्वं करिष्यतीति। तेन भयाकुलो जातः। सौन्दर्यलहरीनामकं स्तोत्रं कृत्वा शाक्तो जातस्तथापि पूर्णा शान्तिर्न जाता। तत उत्तरां दिशं गतः। सा तु महासिद्धसमुदायेन सर्वाऽपि दिग्व्याप्ता। यत्र यत्र गतस्तत्र तत्र सर्वैरुपहासः कृतस्तत्र श्रीतारानाथेनोक्तम्–तीर्थाटनमेव करिष्यते किमप्यात्मसाधनमपि करिष्यते ? तदा शङ्करेणोक्तम्–भवद्भिर्यत्कथ्यते तन्मया करिष्यते[1]। तदा महासिद्धेन योगोपदेशः कृतस्तेन सर्वाबाधानिवृत्तात्मा च प्रसन्नो जातस्तदा वज्रसूचिकोपनिषत् कृता। सा तु सर्वाऽपि नाथमार्गानुसारिण्येव। तत्र श्रीसिद्धसिद्धान्तपद्धतिप्रमाणं दत्तं "वेदान्ती बहुतर्ककर्कशमतिः" इत्यादि "तस्मात्सिद्धमतं स्वभावसमयं धीरः परं संश्रयेत्" इत्यन्तानि पद्यानीति, यथा मण्डनमिश्रः सुरेश्वराचार्यो जातस्तथाऽयमपि सिद्धो भूत्वा सिद्धान्तबिन्दुप्रभृतिग्रन्थांश्चकार

सिद्धान्तस्तु सिद्धस्य तात्पर्यार्थ एव सिद्धान्तो न तु वादि-प्रतिवादिभिर्निर्णीतोऽर्थः सिद्धान्तः। तन्मध्ये न चैकं तदन्यद्द्वितीयं कुतः स्यात्तत्तु द्वैताद्वैतविलक्षणत्वेनैव सिद्धान्तो जातः। न्यासिनां त्वद्वैतमेव सिद्धान्तो भवतीत्येषा रीतिर्ज्ञेया।

अन्यैः सिद्धान्तः कथ्यते। तेषां मुख्ये सिद्धान्तशब्दप्रवृत्तिर्महासिद्धानां मुखादागतोऽन्यमुखे सिद्धान्तः केवलं रूढित एव। सिद्धानां मते रूढिर्यौगिकं च द्वयमपि वर्तते। तर्हि सिद्धान्तः सिद्धस्यैव तात्पर्यम्। एतत्कारणात् सिद्धस्यैव सिद्धान्तो न त्वन्यस्यात एव शङ्करेण सिद्धान्तबिन्दुः कृतः।

प्रथम तु दक्षिणदेशे कर्मसेवने विष्णूपासना कृता, पश्चात्पूर्वदेशे शिवदर्शने संन्यासो गृहीतः, पश्चिमे च शक्तिदर्शने शाक्तो जातस्तन्त्रविषयकं प्रपञ्चसारादि ग्रन्थं कृतवान्, पश्चादुत्तरदेशे सिद्धोपदेशेनावधूतावस्था गृहीता। तेन सर्वं श्रेयो जातम् इति।

ननु कापालिकप्रसङ्गकथनातेदेषां कापालिकमतमिति कैश्चिज्ज्ञायते, इति; तत्त नास्त्येवास्माकं मतं त्ववधूतमेव। परन्तु कापालिकमपि मतं नाथेनैव प्रकटीकृतमेतन्मार्गस्य प्रकटकर्त्ता नाथ एव। तदुक्तं शाबरतन्त्रे—

आदिनाथो ह्यनादिश्च कालश्चैवातिकालकः।
करालो विकरालश्च महाकालश्च सप्तमः॥

कालभैरवनाथश्च बटुकस्तदनन्तरम्।
भूतनाथो वीरनाथः श्रीकण्ठो द्वादशो मतः॥

---

१. क्रियते–पू० स०।

एते[1] कापालिकाः प्रोक्ता वीरतुम्बीमहाफलैः ।
शिष्याणां सूर्यसङ्ख्या च तानिहो वच्मि संश्रृणु ॥

नागार्जुनो जडभरतो हरिश्चन्द्रस्तृतीयकः ।
सत्यनाथो भीमनाथो गोरक्षश्चर्पटस्तथा ॥

अवद्यश्चैव वैराग्यः कन्थाधारी जलन्धरः ।
मार्गप्रवर्तका ह्येते तद्वच्च मलयार्जुन ॥

पुनः शैवं शाक्तोऽपि मार्गस्तन्त्रानुसारी । तस्याप्युपदेष्टा नाथ एव । नाथेनैव रचितानि तन्त्राणि । तदुक्तं षोडशनित्यातन्त्रे—

कादिसञ्ज्ञा भवद्रूपा[2] सा शक्तिः सर्वसिद्धये ।
तन्त्रं मदुक्तं भुवने नवनाथैरकल्पयत् ॥

तया तैर्भुवने तन्त्रं कल्पे कल्पे विजृम्भितम् ।
अवसाने तु कल्पानां सा तैः सार्द्धं व्रजेच्च माम् ॥

नामपर्यायतो व्याप्तं कालावाप्तमिदं द्वयम् ।
प्रसिद्धं बाह्यतो यच्च त्रीणि नामानि साधके ॥

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ॥

नवाय नवरूपाय परमार्थैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ॥

स्वतन्त्राय दयाशक्तिविग्रहाय रसात्मने ।
परतन्त्राय शाक्तानां भव्याय भव्यरूपिणे ॥

पुनः योगस्तु कस्यापि सापेक्षो नास्ति, परन्तु तान्त्रिकाणामयमेव सिद्धान्तो वर्त्तते यत्रोत्तरावस्थाऽवधूत एव । तदुक्तं षट्शाम्भवरहस्ये—

अथान्यत्सम्प्रवक्ष्यामि सम्प्रदायस्वरूपकम् ।
आदितो वैदिकः प्रोक्तस्ततो हि वैष्णवः परः ॥

ततो गाणपतः प्रोक्तः क्रमेण हि मया तव ।
गाणपत्यं च द्विविधं ततः सौरं प्रकीर्तितम् ॥

सौराच्छ्रेष्ठं शैवशास्त्रं शैवाच्छाक्तं महेश्वरि ।
शाक्ताद्वामं महादेवि श्रेष्ठं ते परिकीर्त्तितम् ॥

---

१. एके--प० स० ।   २. भवेद्रूपा-प० सं० ।

वामात्तु दक्षिणं श्रेष्ठं दक्षिणाद्वीर एव तु।
अथ वीराच्चावधूतः कौलः पूर्वं प्रकीर्तितः॥
अवधूताद्दिव्यमार्गो दिव्याच्छ्रेष्ठो न विद्यते॥ इति।
(पट० १।१४०-१४४)

तान्त्रिकानुष्ठानस्य फलमपि योग एव। योगिनां पूर्वावस्थायामपि योगित्वमुत्तरावस्थायामपि योगित्वमेव न त्ववस्थाभेदाद् गौणमुख्यभावौ। तन्त्रादि यस्य-कस्यापि सापेक्षं, परन्तु तान्त्रिकाणां पूर्वावस्था तन्त्रानुष्ठानं बहिरङ्गमुपासनं, योगिनान्त्वन्तरङ्गमुपासनम्। इयं रीतिस्तान्त्रिकाणाम्–तान्त्रिकः प्रथमतो बहिरङ्गपूजनं स्थूलशक्तेः करोति, पश्चादवधूतपदे प्राप्तेऽन्तरङ्गपूजनं सूक्ष्मशक्तेः कुण्डलिन्याः करोति। अतः कारणात्तान्त्रिकाणामपि तात्पर्यमवधूतपद एव।

कापालिको मार्गः किमर्थं प्रकटीकृतः? इत्यपेक्ष्ययाह–विष्णोश्चतुर्विंशतिसङ्ख्याका अवतारा जातास्ते च कार्यान्ते मदोन्मत्ता जाता। कथम्? यथाऽन्ते तिर्यग्योनयो जन्तवः क्रीडाः कुर्वन्ति तथा वराहो नृसिंहश्चेत्यादयो भूदारण-वन्य-भयदानादिकरणे प्रवृत्ताः। पुरग्रामादिताडनं केषाञ्चित समुद्रपातोऽपि। तत्रापि कृष्णेन व्यभिचारिभावो विशेषेण धृतः। परशुरामेणैकक्षत्रियदोषेणानेकेषां क्षत्रियाणां नाशः कृत इत्यादि विरुद्धाचारोपरि नाथेन कोपं कृत्वा चतुर्विंशत्यवतारोपरि चतुर्विंशति कापालिकरूपाणि धृतानि। धृत्वा च चतुर्विंशत्यवतारैः सह समरं कृतम्। तत्र सर्वेषामवताराणां कपालानि छिन्नानि कृतानि। स्वकरैस्तानि धृतानि। तेन कापालिका जाताः। पुनस्ते सर्वे कपालच्छेदान्मदहीना जातास्तदा वरं दत्वा कपालानि तच्छरीरे धृतानि तेन जीविता बभूवुरिति।

कानिचिच्छास्त्राणि मोक्षरक्षकाणि कानिचिच्च व्यवहाररक्षकाणि। तत्र मोक्षरक्षकाणि श्रुति-स्मृत्यादीनि। मुमुक्षवः पुरुषाः कोटीनां मध्ये द्वित्रा एव भवन्ति, व्यवहारिणस्तु कोटिकोटिरेवातः कारणाद्व्यवहारार्थं विधिवाक्यशास्त्राणि बहूनि सन्ति, कथम्? व्यवहारिणां बाहुल्यात्, योगशास्त्रं तु सूक्ष्मम्। कथम्? मुमुक्षुपुरुषाणामल्पत्वात्, वेदादिशास्त्राणामपि योगो वर्त्तत एव, सर्वेषां च तात्पर्यं योग एवास्ति, परन्त्वेतद्रीत्या यथा समुद्रे रत्नानि शङ्खाः, पाषाणखण्डानि, जलं जलजन्तवश्चेत्याद्यनेकवस्तूनि सन्ति, तथा वेदादिशास्त्रेष्वपि योगादीनि सन्ति, समुद्रे चेतरवस्तु सुलभं, रत्नं तु श्रमेण लभ्यते। एवं वेदादिशास्त्रे व्यवहारादि सुलभं, योगस्तु भूरिश्रमेण लभ्यते। योगशास्त्रे तु योग एव लभ्यते, नान्यदस्ति किञ्चिदसारं, यथा रत्नखनौ रत्नमेवेति।

स च योगो गुरुकृपयाऽल्पश्रमेणैव प्राप्तो भवेदतोऽन्यत्सर्वं परित्यज्य योग एव सेवनीयः, इति। षट्शाम्भवरहस्ये—

पृथ्वी कर्त्री महादेवी नाथाः शास्त्रस्य बन्धकाः ।
ब्रह्मतत्त्वविदित्याद्याः शरभाद्यास्तु रक्षकाः ॥ (१-१५६)

ननु श्लोके तु पृथ्वी कर्त्रीत्युक्तं भवद्भिस्तु नाथः कर्त्तेत्युच्यते, तत्कथमिति चेत् ? उच्यते; 'नाथाः शास्त्रस्य बन्धकाः' इत्यनेन शास्त्रप्रबन्धकत्वं तूक्तमेव, पुनः कर्तृत्वं तु पृथिव्या अपि नाथरूपत्वेनैव, चतुरशीतिसिद्धगणनायामादिकुमारीनामकस्य सिद्धत्वेनोक्तत्वात् । सिद्धाश्च नाथरूपत्वेन प्रसिद्धा एवेति । तथैव यत्साधनं कर्त्तव्यं यत्तेनैव साधनेन सिद्धिर्भवेदित्येवं तु योग एव परं साधनमित्याशयेनोक्तम्—

योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौ स्मृतौ—इति ।

तद्वन्तश्च श्रेष्ठा उक्ता इति सर्वत्र लभ्यते । एवञ्च योगिनः श्रेष्ठास्तेषां श्रेष्ठ्यं गम्यत्वेनाप्याह पद्मपुराणे—

मर्यादां स्थापयामास यथास्थानं यथागुणम् ।
वर्णानामाश्रमाणां च धर्माधर्मभृतां वर ॥
लोकांश्च सर्ववर्णानां सम्यक् धर्मानुपालिनाम् ।
प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं तु पार्थिव ॥
स्थानमैन्द्रं क्षत्रियाणां यतीनामूर्ध्वरेतसाम् ।
स्मृतं तेषां तु यत्स्थानं तदेव गुरुवासिनाम् ॥
सप्तर्षीणां च यत्स्थानं स्मृतं तद्वै वनौकसाम् ।
प्राजापत्यं गृहस्थानां न्यासिनां ब्राह्मसंज्ञितम् ॥
योगिनाममृतं स्थानं ब्रह्मणः परमं पदम् ।
एकान्तिनः सदोद्युक्ता व्यापिनो[1] योगिनो हि ये ॥
तेषां तत्परमं स्थानं यन्न[2] पश्यन्ति सूरयः ।
गत्वा गत्वा[3] निवर्तन्ते चन्द्रादित्यादयो ग्रहाः ॥
अद्यापि नो निवर्त्तन्ते प्राणायामपरायणाः ।

(सृष्टिखण्डे ३।१५३-१६१)

गीतायाञ्च—

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ इति

(गी० ८।२८)

एवं सर्वनमस्कार्यमेतन्मतमिति ।

तत्र यूयं केऽपि वदेत–भवन्मते श्रुतिः साधिका नास्तीति तेषामज्ञात्वा मत-रहस्यमेवं वदतां युष्माकं तात्पर्यमस्माभिर्विदितप्रायमेवेति । तदेवमस्ति । एवं प्रतोध-

१. ध्यायिनो–मु० पा० । २. यत्तत्–मु० पा० ।
३. गता गता–मु० पा० ।

माना अपि कदाचिच्छ्रुत्याश्रयत्वमङ्गीकुर्वन्तु नामैते, किन्त्वेतत्साक्षादनिर्वचनीयं तत्सत्यस्वरूपं तत्त्वं सर्वस्य विदितमेवेति तस्यैव प्रवृत्तिशास्त्राश्रयत्वं केन प्रकारेणाङ्गीक्रियते। यदस्माकमत्र श्रुत्याश्रयाङ्गीकरणं राज्ञामिव मन्त्र्याश्रयाङ्गीकरणं भवति। तथोक्तं महाभारते मोक्षधर्मे—

ऋचो यजूंषि सामानि शरीराणि व्यपाश्रिताः।
जिह्वाग्रेषु प्रवर्त्तन्ते यत्नसाध्याविनाशिनः॥

न चैवमिष्यते ब्रह्म शरीराश्रयसम्भवम्।
न यत्नसाध्यं तद् ब्रह्म नादिमध्यं न चान्तवित्॥

ऋचामादिस्तथा साम्नां यजुषामादिरुच्यते।
अन्तश्चादिमतां दृष्टो न त्वादिर्ब्रह्मणः स्मृतः॥

अनादित्वादनन्तत्वात्तदनन्तमथाव्ययम्।
अव्ययत्वाच्च निर्दुःखं द्वन्द्वाभावस्ततः परम्॥

अन्यच्च—अग्निर्यथाह्युपायेन मथित्वा दारु दृश्यते।
तथैवात्मा शरीरस्थो योगेनैवात्र दृश्यते॥

पुनः—आदिज्ञानी भवेद् ब्रह्मा युगादिज्ञानियोगिनः॥

गीतायाम्—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥ (गी० २।४२-४४)

येन च परमवेदप्रणवस्याश्रयोऽङ्गीकृतो वा तेन स्थूलवेदस्याश्रयो नाङ्गीकर्तव्यः।

उत्तरगीतायाम्—

चतुर्वेदविदो विप्राः सूक्ष्मब्रह्म विदन्ति न।
वेदभारभराक्रान्तास्ते वै ब्राह्मणगर्दभाः[१]॥

एतदेवाभिप्रेत्य कावषेयगीतायाम्—दुर्वासा कश्चिन्मुनिर्बहुविधशास्त्रपुस्तकभारैः सह महादेवं नमस्कर्त्तुमागत्य तत्सभायां नारदेन केनचिन्मुनिना भारवाही गर्दभसाम्यमापादितः, कोपात् पुस्तकानि लवणार्णवे परित्यज्य महादेवेनात्मविद्यायां प्रवर्त्तित इति।

१. ते विप्राः पुरुषाधमाः—पू० सं०।

गृहे गृहे पुस्तकभारभाराः पुरे पुरे पण्डितयूथयूथाः ।
वने वने तापसवृन्दवृन्दा न ब्रह्मवेत्ता न च कर्मकर्त्ता ॥

एवं बहवः प्रस्तावाः सन्तीत्येकमुत्तरम् ॥ १ ॥

पुनः भवद्भिस्तु श्रुतयः पुनः पुनरुच्यन्ते, तत्किमिति ? वेदास्तु कर्मनिरूपकास्तदधिकारिणामेवौचित्यं दर्शयन्ति । एते योगिनस्तु संसारत्यागिनो निष्कर्माणः । किञ्च, वेदेषु मुख्यत्वेनाग्निहोत्रादियज्ञकर्माणि दृश्यन्ते, तानि चाग्निसाध्यानि, एते तु नाग्नेः स्पर्शमपि कुर्वन्ति । अग्नेरेव गृहपतित्वमाह—'अग्ने गृहपते' इत्यादि श्रुतिः । यत एतेषां किमाचरणमुपधार्य्यैतान् निरूपयन्ति । बाहुल्येन वेदविदांश्चैते किं प्रयोजनमङ्गीकृत्याङ्गीकुर्युर्वाचोविग्लापनं[1] हितत्' इत्यादि श्रुतिवाक्यैरेव "एवं विमृश्य सुधियो विरमन्ति शब्दाद्" इत्यादिपुराणवाक्यैरेव च तदनङ्गीकरणं दर्शितम् ।

किञ्च "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन" इति श्रुतेः ॥

बहुशास्त्रकथाकन्थारोमन्थेन वृथैव किम् ।
अन्वेष्टव्यं प्रयत्नेन तत्वज्ञैर्ज्योतिरान्तरम् ॥ इति ।

उत्तरगीतायाम्[2]—

अधीत्य[3] चतुरो वेदान् धर्मशास्त्राण्यनेकशः ।
ब्रह्मतत्त्वं[4] न जानाति दर्वी पाकरसं यथा ॥ इत्यादि ।
(उ० २।४१)

किञ्चैतेषां सत्यस्वरूपभूतानां महिमान निरूपयन्तो वेदा मुह्यन्तीव च । अवृत्तिविषयत्वात् । तथा च कर्मकाण्डे मुख्यमपि ज्ञानं[5] न मुख्यत्वेन दर्शयन्ति । दर्शिते च तस्मिन् कर्ममोह एव स्यात् । एव ज्ञानकाण्डे च योगतन्महिम्नि दर्शिते ज्ञानं मोहः स्यात् । तथा च वेदेषु तन्महिमा नोपलभ्यते—इत्येतदेवाभिप्रेत्योद्योगपर्वणि सनत्सुजातीये प्रोक्तम्—

आभाति शुक्लमिव लोहितमिवाथो कृष्णमायांजनं काद्रवं वा ।[6]
न पृथिव्यां तिष्ठति नान्तरिक्षे नैतत्समुद्रे सलिलं बिभर्त्ति ॥
न तारकासु न च विद्युताश्रितं न चाभ्रेषु दृश्यते रूपमस्य ।
न चापि वायौ न देवतासु नैतच्चन्द्रे दृश्यते नोत सूर्ये ॥
नैवर्क्षु तन्न[7] यजुष्षु नाप्यथर्वसु न दृश्यते वै विमलेषु सामसु ।
रथन्तरे बार्हद्रथे वापि राजन् महाव्रते नैव दृश्येद्ध्रुवं[8] तत् ॥

---

१. विप्लावनं—पू० सं०
२. नास्ति—पू० सं० ।
३. आलोच्य—मु० पा० ।
४. यौ वै ब्रह्म—मु० पा० ।
५. नाज्ञ—पू० स०
६. कृष्णमायसमर्कवर्णम्—इति मातृका पाठः ।
७. नैतद्य०—मु० पा० ।
८. महाव्रतस्यात्मनि—पा०. ।

अपारणीयं[1] तमसः परस्तात् तदन्तकोऽप्येति[2] विनाशकाले ।
अणीयरूपं क्षुरधारया समं[3] महच्चरूपं तद्वै[4] पर्वतेभ्य ॥
(स० ३।२०–२३)

[5]सा प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र हि ॥ (स० ४।२३)

अनामयं तन्महदुद्यतं यशो वाचोविकारं कवयो वदन्ति ।
तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं ये तद्विदुरमृतास्ते भवन्ति ॥

ननु तद्विदुरित्यनेन योगोपसर्जन ज्ञानमेवोक्तमिति चेन्नैतस्यैव शास्त्रस्याग्निमेऽध्याये—

यत्तच्छुक्लं महज्ज्योतिर्दीप्यमानं महद्यशः ।
तद्वै देवा उपासन्ते तस्मात्सूर्यो विराजते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ (स० ४।१)

इत्यादि सविस्तरमुक्तमतो ग्रन्थभारवहनं वृथैव । किन्तु तदन्तर्गतं स्वोपयुक्तं सारमात्रं गुरुवाक्याद् गृहीत्वा योगेन कृतकृत्यो भवेदिति—

आत्मनस्तत्त्वमज्ञात्वा मूढः शास्त्रेषु मुह्यति ।
[6]गोपः कक्षागते छागे कूपे पश्यति दुर्मति ॥
वदन्तो वाऽऽत्मनोभावं [7]वदन्त्युपनिषद्गिरः ।
रहस्युपदिशन्त्यन्ये स्वयं नानुभवन्ति ते ॥
विहाय योगशास्त्राणि नाना गुरुमतानि च ।
अहङ्कारावृताः केचिज्ज्ञात्वा शास्त्रसमुच्चयम् ॥
उपदेशं न जानन्ति न च ग्रन्थशतैरपि ॥

इति द्वितीयमुत्तरम् ॥ २ ॥

पुनः तदेव मुख्यतयोच्यते—श्रुतिस्त्वस्मिन्नपि मते साधिकैवास्ति, परन्त्वेतन्मतस्य बोधो युष्माकं नास्ति । तेन यूयं शङ्कर-वैष्णवप्रवर्त्तितमार्गानुसारितत्त्वमालम्ब्य वदथ श्रुतिः साधिका नास्तीति । तत्सत्यम्, शङ्कररामानुजादिश्रुतयश्चात्र साधिका मा भवन्तु नाम, श्रुतयस्तु भविष्यन्त्येव साधिका इति ।

---

१. °अवारणीयं°–मु० पा० ।
२. °तोऽभ्येति–मु० पा० ।
३. च तथाप्यणीय–मु० पा० ।
४. स्वरूपं त्वयि–मु० पा० ।
५. तत्–मु० पा० ।
६. गोपकक्षागतच्छाये–पू० सं० ।
७. वदन्तोप°–पू० सं० ।

अयम्भावः—वेदस्तु शाखाभेदैरनेकधा विस्तृतः। तत्र पञ्चाशदुपनिषदां निबन्धः कृत[1]स्ततोऽप्यधिका उपलभ्यन्ते। परन्तु न तेन निबन्धेन प्रायो निर्णयव्यवहारः। तत्रापि शङ्करेण दशैवाभिमता उपनिषद ईश-केनेत्यादयः प्रसिद्धाः। रामानुजप्रभृतिभिस्तु दशस्वपि शङ्कराभिमतादन्योऽर्थ इति स्पष्टमुदीर्यते। एवमन्येऽपि स्वाभिप्रायानुसारि वेदस्य तात्पर्यं वर्णयिष्यन्ति। एतावता[2] तत्तात्पर्यं तेषामेव न तु वेदस्येति। यथा विरोचनः प्रजापतिनाऽनुशिष्टोऽपि स्वचित्तदोषेण देह आत्मत्वबुद्धिं दृढीकृत्यासुरान् सर्वाननुशशासेति छान्दोग्ये स्पष्टाख्यायिकाऽस्ति। यतो योगिनां स्थूलवेदे प्रयोजनमेव नास्ति। सर्ववेदमूलभूत ॐकार एव प्रयोजनं तात्पर्यञ्च। तत्र सर्ववेदानां[3] लयोदयौ भवतः, यतः ॐकारप्रतिपादिकाः सर्वाः श्रुतयोऽत्र साधिकाः। तथाहि—

"वेदस्य सारतरः प्रणवः भूरित्येव ऋग्वेदादजायत, भुव इति यजुर्वेदात्, स्वरिति सामवेदात्तानि शुक्राण्यभ्यतपत्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति। तानेकधा समभरत्तदेतदोमिति" बह्वृचब्राह्मणे। अस्य च प्रणवस्य ॐ इत्येतदक्षरमिदं सर्वमिति सर्वात्म्यश्रुतौ तन्मात्राणां चाकारोकारमकाराणां क्रमात् स्थूलकारणप्रपञ्चवाचकयोरभेदात् पूर्वस्योत्तरोत्तरत्र प्रविलापने गुरुयुक्त्या क्रियमाणे स्थूलस्य जगतो वेदस्य वा सूक्ष्मे लवणोदकन्यायेन प्रविलयो भवति। तथा सूक्ष्मस्य कारणे कारणस्य तुरीयेऽर्द्धमात्रावाच्ये मात्राख्ये "शिवमद्वैतं चतुर्थं मन्यन्ते" इति श्रुतेर्गलिताखिलद्वैतभावे वाङ्मनसातीते प्रविलयो भवति। अतः प्रणववेद इत्यभ्युपगम्य तद्द्वारा तत्प्रवर्तकनादब्रह्मेत्यवलम्ब्य नादब्रह्मणो यन्मूलं तत्तत्त्वमिति विश्रान्तिमतां मते का वा श्रुतिः साधिका न भवतीति प्रसिद्धतरमेव सर्वत्र।

प्रणवप्रशंसा च [4]शिखोपनिषदि—

"प्रणवः सर्वान्प्राणान् [5]प्रणामयति वै तस्मात्प्रणवश्चतुर्द्धा[6]ऽवस्थित इति वेददेवयोनिः सर्ववाच्यवस्तु प्रणवात्मकम्। देवाश्चेति सन्धत्तां[7] सर्वेभ्यो दुःसहेभ्यः[8] सन्वारयति। तारणात्तानि सर्वाणीति। [अथर्वशिखोप० १-२, ई० अ० पृ० १५८]

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च।
पञ्चधा पञ्चदैवत्यः प्रणवः परिपठ्यते॥

तत्राधिकं क्षणमेकमास्थाय क्रतुशतस्यापि फलमवाप्नोति। कृत्स्नमोङ्कारगतं च सर्वज्ञानेनेति। माण्डूक्योपनिषदि—

---

१. निबन्धाः कृता—पू० सं०।
२. तावता—मु० पा०।
३. सर्वदेवानां—पू० सं०।
४. शिवोप°—पू० सं०।
५. परमात्मनि प्रणाययति—मु० पा०।
६. चतुर्था°—मु० पा०
७ वेददेवयोनिर्ध्येयाश्चेति संधत्तां—पू० सं०।
८. दुःखभयेभ्यः—मु० पा०

ॐकाराच्छन्दसो[१] ज्ञात्वा न किञ्चिदपि चिन्तयेत् ।
युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ॥
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचिद् ।
प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः[२] स्मृतः ॥
अपूर्वोऽनन्तरोऽवाह्योऽनपरः प्रणवोऽव्ययः ।
सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ॥
एवं हि प्रणवं ज्ञात्वा फलते[३] तदनन्तरम् ।
प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम् ॥
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ।
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिव ॥
ॐ कारो विदितो येन समुनिर्नेतरो जनः ॥ इति ।

(मा० आगम० २४-२८)

बृहदारण्यके—स यथार्द्रैधाग्नेरभ्याहितस्येत्यादि ।

(४।५।११, ई० अ० पृ० १०८)

छान्दोग्ये—एतदक्षरमुद्गीथेत्यादि । (१।४।१, ई० अ० पृ० ३३)

एतदेवाभिप्रेत्य महाभारते सनत्सुजातीयवचनम्—

यतो न वेदा मनसा सहैव मैनं[४] प्रविशन्ति ततोऽथ मौनम् ।
यत्रोत्थितो वेदशब्दस्तथायं स तन्मयत्वेन विभाति राजन् ॥

(स० २।२)

भागवते चाप्येकादशस्कन्धे—

स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रास्वरो वर्ण इति स्थविष्ठः ॥

(भा० ११।१२।१७)

शब्दब्रह्म सुदुर्बोध प्राणेन्द्रियमनोमयम् ।
अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत् ॥
मयोपबृंहितं भूम्ना ब्रह्मणाऽनन्तशक्तिना ।
भूतेषु घोषरूपेण विसेषूर्णेव लक्ष्यते ॥
यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ।
आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ॥

---

१. ओङ्कार पादशो–मु० पा० ।
२. चापरः—पू० स० ।
३. व्यश्नुते–मु० पा०
४. सहैनमनु–मु० पा० ।

छन्दोमयोऽमृतमयः सहस्रपदवीं प्रभुः।
ॐ काराद्व्यञ्जितस्पर्शस्वरोष्मान्तस्थभूषिताम् ॥
(भा० ११।२१।३६-३९)

इत्यादि, अन्यच्च—

वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक्।
उपासते तपोनिष्ठा हंसं मां मुक्तकिल्विषाः ॥
त्रेतायुगे महाभाग प्राणान्मे हृदयात्त्रयी।
विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ॥
विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः ॥ इत्यादि।
(भा० ११।१७।११-१३)

गीतायाञ्च—

ॐ इत्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ (गी० ८।१३)

एवमन्यत्रापि बहुधा प्रपञ्चितम्, तदत्र विस्तरभयान्न लिख्यते। इति तृतीयमुत्तरम् ॥ ३ ॥

पुनः वेदार्थस्य बोधस्तु केषाञ्चिन्नास्त्येव। केवलमभिमानमेव पुरस्कृत्य ये वदन्ति तान् प्रति चतुर्थमिदमुत्तरम्—यद्भवद्भिर्वेदो वेद इति पुनः पुनरुच्यते। तस्य वेदस्य त्वभ्यासेऽप्यवधूतानां दोष एव स्यात्। कथमिति चेदुच्यते-वेदस्य पूर्वभागस्तु वर्णानामेव, वेदान्तभागस्तु भिक्षूणामेव, योगभागोऽस्त्यवधूतानाम्। वेदस्य पूर्वभागे ज्ञानं वाच्यार्थेन न दर्शितम्। किन्तु तात्पर्ये तदस्तीति भवद्भिरेवोच्यते। एवञ्च वेदस्य पूर्वभागे यथा ज्ञानं तात्पर्येऽस्ति तथा वेदान्तभागे योगस्तात्पर्यार्थोऽस्ति। यद्यपि बहुधा वाच्यार्थेनापि दर्शितो योगस्तथापि मुख्योत्तरं तु मुख्यतात्पर्यं एवास्ति। यतो वेदान्ततात्पर्यं लक्ष्यं चावधूत एवास्ति। "सर्वे वेदास्तत्पदमामनन्ति" इत्यादि श्रुतयो "वेदैश्च सर्वैरहमेव वेद्यो" इत्यादि स्मृतयश्च।

रूपे इमे सदसती तव वेद सृष्टेर्बीजाङ्कुराविव न चान्यदरूपकस्य।
युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥

इत्यादिपुराणवाक्यानि चात्र साधकानि। एतदेवाभिप्रेत्य महाभारते सनत्सुजात आह—

न वेदानां वेदिता कश्चिदस्ति कश्चित्त्वेतान् बुध्यते वापि राजन्।
यो वेद वेदान्न स वेद वेद्यं सत्ये स्थितो यस्तु स वेद वेद्यम् ॥
न वेदानां वेदिता कश्चिदस्ति वेद्येन वेदं न विदुर्न वेद्यम्।
यो वेद वेदं सच वेद वेद्यं यो वेद वेद्यं न स वेद सत्यम् ॥
यो वेद वेदान् सच वेद वेद्य न तं विदुर्वेदविदो न वेदाः[1]।
तथापि वेदेन विदन्ति वेदं ये ब्राह्मणा वेदविदो वदन्ति ॥

---

१. विप्राः—पा०।

धामांशभागस्य तथाहि वेदा यथा च शाखा हि महीरुहस्य ।
संवेदने चैव यथामनन्ति तस्मिन् हि सत्ये परमात्मनोऽर्थे ॥
(स० २।४१-४४)

धृतराष्ट्र उवाच—

आख्यानपञ्चमैर्वेदैर्भूयिष्ठं कथ्यते जनः ।
तथा चान्ये चतुर्वेदास्त्रिवेदाश्च तथा परे ॥
द्विवेदाश्चैकवेदाश्च अनृचश्च तथा परे ।
तेषां तु कतरः स स्याद्यमहं वेद वै द्विजम् ॥
(स० २।३५-३६)

सनत्सुजात उवाच—

एकस्य वेदस्याज्ञानाद्वेदास्ते बहवः कृताः ।
सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवस्थितः ॥ (२।३७)
एवं वेदमविज्ञाय प्राज्ञोऽहमिति मन्यते ।
दानमध्ययनं यज्ञो लोभादेतत्प्रवर्तते ॥
सत्यात्प्रच्यवमानानां सङ्कल्पश्च तथा भवेत्[1] ।
ततो यज्ञः प्रतीयेत सत्यस्यैवावधारणात्[2] ॥ (२।३८)

धृतराष्ट्र उवाच—

ऋचो यजूंषि यो वेद[3] सामवेदं च वेद यः ।
पापानि कुर्वन् पापेन लिप्यते किं न लिप्यते ॥ [स० २।३]

सनत्सुजात उवाच—

नैनं सामान्यृचो वापि न यजूंष्यविचक्षणम् ।
त्रायन्ते कर्मणः पापान्न ते मिथ्या ब्रवीम्यहम् ॥
न छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्त्तमानम् ।
नीडं शकुन्ता इव जातपक्षाश्छन्दांस्येनं प्रजहत्यन्तकाले[4] ॥
(स० २।४५)

एवञ्च स्थूलवेदतात्पर्यैर्युष्माभिः सूक्ष्मवेदतात्पर्याणामस्माकं मतमविज्ञाय योऽनुयोगस्तत्प्रतिवाक्यमिदं चतुर्थमुत्तरम् ॥ ४ ॥

योगबीजे—

बद्धा येन विमुच्यन्ते नाथमार्गमतः परम् ।
तमहं कथयिष्यामि तव प्रीत्या सुरेश्वरि ॥ (यो० बी० ७)
अनेकशतसङ्ख्याकैस्तर्कव्याकरणादिभिः ।
पतिताः शास्त्रजालेषु प्रज्ञया ते विमोहिताः ॥

---

१. संकल्पा वितथाभवन्–मु० पा० ।
२. कर्म प्रतायेत सत्यस्य नवधा–मु० पा०
३. यजूंष्यधीते यः–मु० पा० ।
४. पादव्यत्यासः–मु० पु० ।

नानामार्गैस्तु दुष्प्राप्यं कैवल्यं परमं पदम् ।
सिद्धमार्गेण लभ्येत नान्यथा शिवभाषितम् ॥
अनिर्वाच्यपदं वक्तुं न शक्यं तैः सुरैरपि ।
स्वात्मप्रकाशरूपं तत् किं शास्त्रेण प्रकाश्यते ॥
(यो० बी० ७–१०)

विशुद्ध एव परमात्मा जीवाभिध इत्युक्त्वा जीवस्य दोषाः कामक्रोधभयचिन्तेत्यादयश्चोक्ताः ।

तस्माद्दोषविनाशार्थमुपायं कथयामि ते ।
ज्ञानं केचिद्वदन्त्यत्र केवलं तन्न सिद्धये ॥
योगहीनं कथं ज्ञानं मोक्षदं भवतीश्वरि ॥
(यो० बी० १८, १९)

अज्ञानात्संसारो ज्ञानेन मुच्यते । तत्र योगस्य किं कार्यमिति देव्या पृष्ट ईश्वर उवाच—(योगबीजे)

असौ दोषैर्विमुक्तः किं कामक्रोधभयादिभिः ।
सर्वदोषैर्वृतो जीवः कथं ज्ञानेन मुच्यते ॥ २२ ॥
ज्ञाननिष्ठो विरक्तो हि धर्मज्ञो विजितेन्द्रियः ।
विना योगेन देवोऽपि न मोक्षं लभते प्रिये ॥ ३३ ॥
अपक्काः परिपक्काश्च द्विविधा देहिनः स्मृताः ।
अपक्का योगहीनास्तु पक्का योगेन देहिनः ॥ ३४ ॥
तस्माज्ज्ञान च वैराग्यं जपः स्यात्केवलं श्रमः ॥ ४१ ॥
शरीरेण जिताः सर्वे शरीरं योगिभिर्जितम् ॥
तत्कथं कुरुते तेषां सुखदुःखादिजं फलम् ॥ ४९ ॥
देवैरपि न लभ्येत योगदेहो महाबलः ॥
छेदबन्धैर्विमुक्तोऽसौ नाना शक्तिधरः परः ॥ ५१ ॥
यथाऽऽकाशस्तथा देह आकाशादपि निर्मलः ॥
सूक्ष्मात्सूक्ष्मतरो देहः स्थूलात्स्थूलो जडाज्जडः ॥ ५३ ॥
इच्छारूपो हि योगीन्द्रः स्वतन्त्रस्त्वजरामरः ॥
क्रीडति त्रिषु लोकेषु लीलया यत्र कुत्रचित् ॥ ५४ ॥
अचिन्त्यशक्तिमान् योगी नानारूपाणि धारयन् ॥
संहरेच्च पुनस्तानि स्वेच्छया विजितेन्द्रियः ॥ ५५ ॥
पुरैव मृत एवासौ मृतस्य मरणं कुतः ।
मरणं यत्र सर्वेषां तत्रासौ सखि जीवति ॥ ५७ ॥
कर्त्तव्यं नैव तस्यास्ति कृतेनासौ न लिप्यते ।
जीवन्मुक्तः सदा स्वस्थः सर्वदोषविवर्जितः ।

विरक्ता ज्ञानिनश्चान्ते देहेन विजिताः सदा ॥
ते कथं योगिभिस्तुल्या मांसपिण्डाः कुदेहिनः ॥ ६० ॥

देव्युवाच—

ज्ञानिनस्तु मृता ये वै तेषां भवति कीदृशी ।
गतिः कथय देवेश कारुण्यामृतवारिधे ॥ ६१ ॥

ईश्वर उवाच—

देहान्ते ज्ञानिनः पुण्यात्पापान्न फलमाप्यते ।
यादृशं तु भवेत्तत्र मुक्तो ज्ञानी पुनर्भवेत् ॥ ६२ ॥
पुण्यात्पुण्येन लभते सिद्धेन सह सङ्गतिम् ।
ततः सिद्धस्य कृपया योगी भवति नान्यथा ॥ ६३ ॥
ततो नश्यति संसारो नान्यथा शिवभाषितम् ॥ ६४ ॥
महाविष्णुमहेशानां प्रलयेष्वपि योगिनाम् ॥
नास्ति पातो लयस्थानां महातत्त्वे विवर्त्तिनाम् ॥ ६५ ॥

वेदान्ततर्कोक्तिभिरागमैश्च नानाविधैः शास्त्रकदम्बकैश्च ॥
ध्यानादिभिः सत्करणैर्न गम्यं चिन्तामणिं त्वेकगुरुं विहाय ॥ ६ ॥ (योगबीजे)

सिद्धसिद्धान्तपद्धतौ—शिवाद् भैरवः, भैरवाच्छ्रीकण्ठः, श्रीकण्ठात् सदाशिवः, सदाशिवादीश्वरः, ईश्वराद्रुद्रः, रुद्राद्विष्णुः, विष्णोर्ब्रह्मा, इति। महासाकारपिण्डस्य[१] मूर्त्यष्टकम् । (सि० १।३७)

आचारे ब्राह्मणा वसन्ति, शौर्ये क्षत्रियाः, व्यवसाये वैश्याः, सेवाभावे शूद्राः। अनन्तसिद्धा मतिप्रकाशे। अस्ति कश्चित्परमाद्वैतस्य भावः। स एवात्मेति।

शिवस्याभ्यन्तरे शक्तिः शक्तेरभ्यन्तरे शिवः ।
अन्तरं नैव जानीयाच्चन्द्रचन्द्रिकयोरिव ॥ (सि० ४।२६)
तज्ज्ञेयं सद्गुरोर्वक्त्रान्नान्यथा शास्त्रकोटिभिः ।
न तर्कशब्दविज्ञानात् नाचाराद्वेदपावनात्[२] ॥
वेदान्तश्रवणान्नैव तत्त्वमस्यादिबोधनात् ।
देवार्चनाश्रयाद् भक्त्या नाश्रमाणां च पालनात्[३] ॥
स्वस्थो[४] योगी स्वयं कर्ता लीलया चाजरामरः ।
अवध्यो देवदैत्यानां क्रीडते भैरवो यथा ॥
(सि० ५।३१-३४)

न गुरोरधिकं न गुरोरधिकं शिवशासनतः शिवशासनतः ॥ (सि० ५।६६)

१. °साकारस्य–पू० स० । २. °पारगात्–मु० पा० ।
३. "न हंसोच्चारणाज्जीवब्रह्मणोरैक्यभावनात्" इति मु० पा० ।
४. स्वेच्छो–मु० पा० ।

करुणाखड्गपातेन छित्वा पाशाष्टकं शिशोः ।
सम्यगानन्दजनकः सद्गुरु सोऽभिधीयते ॥ (सि० ५।६८)

पुनर्वागादिना शास्त्रद्रष्टाऽनुमानात्तर्कमुद्रया भ्रामको गुरुस्त्याज्यः ।

स्वविश्रान्तिं न जानाति परेषां स करोति किम् ।
शिलया किं परं पारं शिलाजालं प्रताय्यर्ते ॥
स्वयं तीर्णो भवेद्योऽसौ परान्निस्तारयत्यलम् । (सि० ५।७३-७४)

सर्वदर्शनानां स्वरूपदर्शनेन समन्वयं करोति–सोऽवधूतः स योगी स्यात् ।

अत्याश्रमी च योगी च ज्ञानी सिद्धश्च सुव्रतः ।
ईश्वरश्च तथा स्वामी धन्यः श्रीसाधुरेव च ॥
जितेन्द्रियश्च भगवान् स सुधीः कोविदो बुधः ।
सर्वेषां दर्शनानां च स्वरूपं स पकाशयेत् ॥
(सि० ६।२०-२२)

सर्वतो भरिताकारं निबद्धं येन[1] वृंहितम् ।
चरते ब्रह्म तद्यस्तु ब्रह्मचारी स कथ्यते ॥
गृहिणीपूर्णता नित्यं गेहं व्योम सदाऽचलम् ।
यस्तया निवसत्यत्र गृहस्थः सोऽभिधीयते ॥
सदाऽन्तःप्रस्थितो योऽसौ स्वप्रकाशमये वने ।
वानप्रस्थः स विज्ञेयो न वने मृगवच्चरन् ॥
परमात्मा च जीवात्मा चात्मन्येव स्फुरत्यलम् ।
तस्मिन्न्यस्तः सदा येन संन्यासी सोऽभिधीयते ॥
(सि० ६।३३-३७)

न वन्दनीयास्तत्काष्ठा[2] दर्शनभ्रान्तिकारकाः ।
वर्जयेत्तान् गुरून् दूराद्धीरः सिद्धमताश्रयः ॥
(सि० ६।७२)

पद्मपुराणे कपिलगीतायाम्—

दत्तात्रेयादि सिद्धानां नवनाथास्तथैव च ।
शङ्करं गुरुरूपेण बोधितश्चात्मतत्त्वभिः (?) ॥
ऋग्वेदोऽथ यजुर्वेदो सामवेदो ह्यथर्वणः ।
सूक्ष्मवेदो हि अध्यक्षः पञ्च वेदाः प्रकीर्तिताः ॥

ईश्वर उवाच—

ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
तस्मिन्मध्ये स्थितं तत्त्वं प्रदर्शयति सद्गुरुः ॥

---

१. निजबोधेन–मु० पा० । २. °स्ते काष्ठा–मु० पा० ।

ॐ मित्येवं परं ब्रह्म सर्वतत्त्वानुदर्शनम् ।
आब्रह्मस्तम्बपर्यन्तं सर्वानुग्रहकारकम् ॥
तारकं च भवेद् ब्रह्मा दण्डकं विष्णुरुच्यते ।
कुण्डल्यां हि तथा रुद्रो अर्द्धचन्द्रः स ईश्वरः ॥
बिन्दुः सदाशिवः साक्षात्प्रणवे पञ्चदेवताः ।
निरञ्जनस्तदतीत उत्पत्तिस्थितिकारणम् ॥
दुर्लभो विषयत्यागी दुर्लभं तत्त्वदर्शनम् ।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥
विचारदर्पणं[१] यस्य अवलोकनमीक्षितम् ।
दृश्यते तत्स्वरूपं च तत्रैकं पृच्छ किं नहि ॥
हृदयं दर्पणं यस्य मनस्तत्र विलोकयेत् ।
दृश्यते प्रतिबिम्बेन आत्मरूपं सुनिश्चितम् ॥

धूतगीतायाम्—

आब्रह्मस्तम्बपर्यन्तं सम्पूर्ण[२]परमात्मनि ।
भिन्नाभिन्नं न पश्यामि तस्याऽहं पञ्चमाश्रमः ॥
आशापाशविनिर्मुक्तमादिमध्यान्तनिर्मलम् ।
अनन्तानन्दब्रह्मज्ञः[३] अकारं तस्य लक्षणम् ॥ (८।६)
वासना वर्जिता येन वक्तव्यं च निरामयम् ।
वर्तमानेषु वर्त्तेत वकारं तस्य लक्षणम् ॥
धूलिधूसरगात्राणि धूतचित्तनिरामयम् ।
ध्यानधारणनिर्मुक्तं धूकार तस्य लक्षणम् ॥ (८।७)
तत्त्वचिन्ता येन धूता चिन्ता चेष्टाविवर्जिता ।
तमहंकारनिर्मुक्तं तकारं तस्य लक्षणम् ॥ (८।६-०)
शिवं न जानामि कथं वदामि शिवं च जानामि कथं वदामि ।
अहं शिवश्चेत् परमार्थरूपं स्वच्छस्वभावं[४] गगनोपमं च ॥
(१।२७)
वेदा न लोका न सुरा न यज्ञा वर्णाश्रमौ नैव कुलं न जातिः ।
न धूममार्गो न च दीप्तिमार्गो ब्रह्मैव रूपं परमार्थतत्त्वम् ॥
(१।३४)
व्याप्यव्यापकनिर्मुक्तं त्वमेकः सकलं यदि ।
प्रत्यक्षं चापरोक्षं च आत्मानं मन्यसे कथम् ॥ (१।३५)

---

१. विचारो–पू० सं० । २. सम्पूर्ण–पू० सं० ।
३. आनन्दे वर्त्तते नित्यं–मु० पा० । ४. परमार्थतत्त्वं च समस्वरूपं–मु.पा. ।

आदिमध्यान्तमुक्तोऽहं न बद्धोऽहं कदाचन।
स्वभावनिर्मलः शुद्ध इति मे निश्चला मतिः ॥ (१।४४)
न बद्धो नैव मुक्तोऽहं न चाहं ब्रह्मणः पथक्।
न कर्त्ता नैव भोक्ताऽहं व्याप्यव्यापकवर्जितः ॥ (१।५०)
न जातोऽहं मृतो वापि न मे कर्म शुभाशुभम्।
शुद्धोऽहं निर्गुणं ब्रह्म बन्धमुक्ती[1] कथं मम ॥ (१।५९)
यदि सर्वंगतो देवः स्थिरः पूर्ण इति स्मृतः[2]।
अन्तरं न हि पश्यामि सबाह्याभ्यतरः कथम् ॥ (१।६०)
भावगम्यं निराकारं साकारं दृष्टिगोचरम्।
भावाभावविनिर्मुक्तमन्तरालं तदुच्यते ॥ (२।१८)
साकारं च निराकारं नेति नेतीति सर्वथा।
भेदाभेदविनिर्मुक्तं वर्त्तते केवलं शिवः ॥
दिवानक्तं न ते चित्त उदयास्तमयौ नहि।
विदेहस्य शरीरित्वं कल्पयन्ति कथं बुधाः ॥

न ते च माता न पिता न बन्धुर्न ते च पत्नी न सुहृन्न पुत्रः।
न पक्षपातो न विपक्षपातः कथं हि सत्ताऽसि रजो हि चेतः ॥

धर्मार्थकाममोक्ष च द्विपदादि चराचरम्।
मन्यते योगिनः सर्वं मरीचिजलसन्निभम् ॥

विन्दति विन्दति नहि नहि मन्त्रश्छन्दो लक्षणमिह नहि तन्त्रः।
समरसमग्नो भावितपूतः प्रलपितमेतत्कथमवधूतः[3] ॥ (५।३२)
अद्वैतरूपमखिलं हि कथं वदामि नित्यं ह्यसत्यमखिलं हि कथं वदामि।
सत्यं ह्यसत्यमखिलं हि कथं वदामि ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ (३।५)
ब्रह्मादयः सुरगणाः कथमत्र सन्ति स्वर्गादयो वसतयः कथमत्र सन्ति।
यद्येकरूपममलं परमार्थतत्त्वं ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ (३।२४)
मायाप्रपञ्चरचना न च मे विकारः कौटिल्यदम्भरचना न च मे विकारः।
सत्यानृतेतिरचना न च मे विकारो ज्ञानामृतं समरसं गगनोपमोऽहम् ॥ (३।२७)
न शून्यरूपं न विशून्यरूपं न शुद्धरूपं न विशुद्धरूपम्।
रूपं विरूपं न भवामि किञ्चित् स्वरूपरूपं परमार्थसत्त्वम् ॥ (३।४५)
नावाहनं नैव विसर्जनं च पत्राणि पुष्पाणि कथं भवन्ति।
ध्यानानि मन्त्राश्च कथं भवन्ति समासमं सर्वं[4] शिवार्चनं च ॥ (४।१)

---

१. बन्धमुक्तौ—प० सं०। २. पूर्णो निरन्तरः—मु० पा०।
३. प्रलयति तत्त्वं परमवधूतः—मु० पा०। ४. चैव—मु० पा०।

नाहं न च पण्डितोऽहं मौनं च वार्ता[१] न च मे कदाचित् ।
वितर्कं च कथं वदामि स्वरूपनिर्वाणमनामयोऽहम् ॥ (४।२०)
नैव सदोदितोऽहं तमश्च तेजो न च मे विभाति ।
कं कर्म कथं करोमि[२] स्वरूपनिर्वाणमनामयोऽहम् ॥ (४।२२)
तत्त्वमसिप्रभृतिश्रुतिभिः प्रतिपादितमात्मनि तत्त्वमसि ।
गविवर्जितसर्वसमं किमु रोदिषि मानस[३] सर्वसमम् ॥ (५।२)
ल्पितभागविभाग इति नहि रागविराग[४]विचार इति ।
गविवर्जितसर्वसमं किमु रोदिषि मानस[३] सर्वसमम् ॥ (५।४)
विवेकमबोध इति अविकल्पविकल्पविबोध इति ।
चैकनिरन्तरबोध इति किमु रोदिषि मानस[३] सर्वसमम् ॥ (५।१०)
श्रुतयः प्रविदन्ति यतो वियदादिरिदं मृगतोयसमम् ।
चैकनिरन्तरसर्वसमं किमु रोदिषि मानव[३] सर्वसमम् ॥ (५।३१)
क्तिविभक्तिविहीनपरमणुकायविकाय[६]विहीनपरम् ।
चैकनिरन्तरसर्वशिवं[७] यजनं च कथं स्तवनं[८] च कथम् ॥ (६।२)
त्रिविभेदनिराकरणमुदितानुदितस्य निराकरणम् ।
चैकनिरन्तरसर्वशिवं रविचन्द्रमसौ ज्वलनश्च कथम् ॥ (६।४)
न च आश्रमवर्णविहीनपरो न तु कारणकर्तृविहीनपरः ।
यदि चैकनिरन्तरसर्वशिवं गुणदोषविचारवचांसि कथम् ॥

पिकायाम्—

क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत् ।
न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते ॥
वर्जयेद्दुर्जनप्रीतिं वह्निस्त्रीपथिसेवनम् ।
प्रातः स्नानोपचारादि कायक्लेशादिकं तथा ॥
चले वाते चलं चित्तं निश्चले निश्चलं तथा ।
योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् ॥
ब्रह्मादयोऽपि त्रिदशा पवनाभ्यासतत्पराः ।
तेन सिद्धिं गतास्ते च तस्मात्पवनमभ्यसेत् ॥

---

१. विमोचं—मु० पा० ।
२. वदामि—मु० पा० ।
३. मानव सर्वसमः—मूलमातृकायाम् ।
४. कारणकार्य०—मु० पा० ।
५. अवि०—मु० पा० ।
६. ननु कार्य विकार्य०—मु०पा० ।
७. शिवः—पू० सं० ।
८. तपनं—मु० पा० ।
९. चन्द्रमसोज्ज्वलन—पू० स० ।

पक्षपाता तया समपक्षपातया (बहुव्रीहिसमास.) भवत्रा, अनुरागपूर्वकम् । * सक्तम्—अनासक्तम्, अव्यसनितया अर्थात् बिना किसी आसक्ति के, निस्सङ्ग भाव से । सञ्ज् + क्त कर्त्तरि = सक्त:, न सक्तः असक्त: (नञ् तत्पुरुष) तत् यथा स्यात्तथा असक्तम् (क्रियाविशेषण) । आराधयत. अस्य—सेवमानस्य दुर्योधनस्य । आ + राध् + लट् लकार—शतृ प्रत्यय, षष्ठी एकवचन । अर्थात् सेवन करते हुए उस दुर्योधन का । त्रिगणः–त्रिवर्ग. । त्रयाणा, धर्मार्थकामाना गणः (षष्ठी तत्पु०) इति त्रिगणः । धर्म, अर्थ एव काम-इन तीनो को त्रिवर्ग कहते है । नाटक से इन्ही तीनो की सिद्धि बताई गई है–'त्रिवर्गसाधन नाट्यम् ।' त्रिवर्ग मे 'मोक्ष' को भी सयुक्त कर देने पर 'पुरुषार्थचतुष्टय' संज्ञा बनती है । त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः इत्यमरः । गुणानुरागात्—गुणवदाश्रयलोभात् । गुणो मे अनुराग होने के कारण अथवा (दुर्योधन के) गुणानुरोधवश । गुणेषु अनुराग· (अनु + रञ्ज् + घञ् भावे) इति गुणानुराग (सुप्सुपा), तस्मात् । 'हेतौ पञ्चमी' इस नियम से हेतु (कारण) के अर्थ में पञ्चमी विभक्ति हुई है किन्तु 'विभाषा गुणेऽस्त्रियाम्' नियम से वह वैकल्पिक ही है । सूत्रका अर्थ यह है कि—'स्त्रीलिङ्ग से भिन्न लिङ्ग वाले गुणवाचक शब्दो मे हेत्वर्थक पञ्चमी विभक्ति विकल्प से ही होती है ।' सख्यम्—मैत्रीभावम् । मित्रता को । सख्युर्भाव· सख्यम् (सखि + य प्रत्यय—'सख्युर्यः' सूत्र से) । ईयिवान् इव—प्राप्तवान् इव । प्राप्त किये हुये से । इण् गतौ + लिट्-क्वसु: सु विभक्ति । परस्परम्—अन्योऽन्यम् । एक दूसरे को । परम्-परम् इति परस्परम् । 'कर्म का व्यतिहार अर्थात् क्रिया की अदलाबदली सूचित करने के लिये प्राय· सर्वनाम शब्द का द्वित्व हो जाता है और प्रायः उनमे समास भी कर दिया जाता है' ऐसा वार्तिककार आचार्य कात्यायन का मत है- 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्' । परन्तु आचार्य भट्टोजि दीक्षित अन्य तथा पर शब्दो मे समासवद्भाव मानते ही नही 'अन्यपरयोः न समासवत्' । इस प्रकार कर्मव्यतिहार के कारण सर्वनाम 'पर' को द्वित्व तो हुआ 'परस्परम्' किन्तु समास नही हुआ (अन्यथा 'परपरम्' रूप बनता) अब, जब 'परम्-परम्' के बीच समास नही हुआ तो पूर्वपदस्थ (पहले पर मे स्थित) सुप् को सु हो गया, वार्तिक है—असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः । इस प्रकार—पर + सु + परम् = परस्परम् । न बाधते—विरोध नही करता है (बाध् धातु, लट्लकार प्रथमपुरुष, एकवचन) ।

प्रस्तुत श्लोक मे 'ईयिवान् इव' आदि शब्दो द्वारा एक सम्भावना व्यक्त की गई, है अतएव यहाँ उत्प्रेक्षा अलङ्कार है—'सम्भावनमथोत्प्रेक्षा' ।

दिव्यगन्धो दिव्यचक्षुस्तेजस्वी[1] स्यादरोगवान् ।
सम्पूर्णहृदये शून्ये[2] आरम्भो योगवान् भवेत् ॥ (७१।१)

अथ घटावस्था—

द्वितीयायां घटीकृत्य वायुर्भवति मध्यमः[3] ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तथा ॥ ७२
विष्णुग्रन्थिर्यदा भिन्नः परमानन्दसूचकः ।
अतिशून्यविभेदश्च[4] भेरीशब्दस्तथा भवेत् ॥ ७३ ॥

अथ परिचयावस्था—

तृतीयायां ततो भित्त्वा विमायो[5]मर्द्दलध्वनिः ।
महाशून्यं तथा[6]याति सर्वसिद्धिसमाश्रयम् ॥ ७४ ॥
चित्तानन्दं ततो जित्वा सहजानन्दसम्भवः ।
दोषदुःखक्षुधानिद्राजरामृत्युविवर्ज्जितः[7] ॥ ७५ ॥

अथ निष्ठावस्था—

रुद्रग्रन्थिं ततो भित्वा सर्वपीठगतो[8]ऽनिलः ।
निष्पन्नो वैष्णवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥ ७६ ॥
अस्तु वा माऽस्तु वा मुक्तिरत्रैवाऽखण्डितं महत् ।
लयामृतमिदं सौख्यं राजयोगादवाप्यते ॥ ७८ ॥
राजयोगपदं प्राप्तं सुखोपायं[9] सुचेतसाम् ।
सद्यः प्रत्ययसंधायी जायते नादजो लयः ॥ ८० ॥
नादानुसन्धानसमाधिभाजां योगीश्वराणां हृदये प्ररूढम् ।
आनन्दमेकं वचसामवाच्यं जानाति तं श्रीगुरुनाथ एव ॥
नादकोटिसहस्राणि बिन्दुकोटिशतानि च ।
सर्वे तत्र लयं यान्ति यत्र देवो निरञ्जनः ॥
योगिनां ज्ञानविदुषामन्येषां च महात्मनाम् ।
प्राप्तं तं कालपुरुषं सुविज्ञाप्यं विचक्षणैः ॥
यावन्नैव प्रविशति मरुद्विज्वरो मध्यमार्गे
यावद्बिन्दुर्न भवति दृढः प्राणवत्सुप्रबद्धः ।

---

१. दिव्यदेहश्च तेजस्वी दिव्यगन्ध —मु० पा० ।
२. हृदयः शून्य—मु० पा० ।
३. मध्यगः—मु० पा० ।
४. अतिशून्ये विमर्दश्च—मु० पा०,
५ तु विज्ञेयो विहायो—मु० पा० ।
६. तदा—मु० पा० ।
७. दोषदुःखजराव्याधिक्षुधानिद्रा—मु० पा० ।
८. शर्वपीठ°—मु० पा० ।
९. °पायोल्प—मु० पा० ।

यावद्व्योम्नः सहजसदृशं जायते नैव तत्त्वम्
तावत्सर्वं वदति यदिदं दम्भमिथ्याप्रलापः ॥

हठप्रदीपिकायां दशमोपदेशे[१]—

आदिनाथोदितं सर्वमष्टैश्वर्यप्रदायकम् ।
वल्लभं सर्वसिद्धानां दुर्लभं महतामपि ॥
पीड्यते न तु रोगेण न च लिप्येत कर्म्मणा ।
बाध्यते न च कालेन यो मुद्रां वेत्ति खेचरीम् ॥

ऊर्ध्वं षोडशपत्रपद्मगलितं प्राणादवाप्तं हठा—
दूर्ध्वास्यो रसनां नियम्य विवरे शक्तिं परां चिन्तयेत् ।
उत्कल्लोलकलाजलं च विमलं धारामृतं यः पिबेत्
निर्दोषः स मृणालकोमलवपुर्योगी परं जीवति ॥
यत्पाताले विशति सुषिरं मेरुमूले तदस्ति
तस्मिंस्तत्त्वं प्रविशति सुधीस्तन्मुखं निम्नगानाम् ।
चन्द्रात्सारः स्रवति वपुषस्तेन मृत्युर्नराणां
तं बध्नीयात् सुकरणमथो नान्यथा कायसिद्धिः ॥

बद्धं मूलबिलं येन तेन विघ्नो विदारितः ।
अजरामरतां याति यथा पञ्चमुखो हरः ॥
तत्रास्ति कारणं दिव्यं सूर्यस्य मुखबन्धनम् ।
गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः ॥
येन सञ्चालिता शक्तिः स योगी सिद्धिभाजनम् ।
किमत्र बहुनोक्तेन कालं जयति लीलया ॥

ज्ञानं कुतो मनसि जीवति देवि यावत्,
प्राणेऽपि जीवति मनो नृपते न तावत् ।
प्राणो मनोद्वयमिदं विलयं प्रयाति,
मोक्षं स गच्छति नरो न कथञ्चिदन्यः ॥

इन्द्रियाणां मनो नाथो मनोनाथश्च मारुतः ।
मारुतस्य लयो नाथः स लयो नादमाश्रितः ॥
अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जितः ।
एषा सा शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥
शक्तिमध्ये मनः कृत्वा शक्तिं मनसि मध्यतः ।
मनसा मन आलोक्य धारयेत्परमं पदम् ॥
अन्तःशून्यो बहिःशून्यः शून्यकुम्भ इवाम्बरे ।
अन्तःपूर्णो बहिःपूर्णः पूर्ण कुम्भ इवाम्भसि ॥

---

१. हठप्रदीपिकायाश्चत्वार एवोपदेशा उपलभ्यन्ते ।

सङ्कल्पमात्रकलनैव जगत्समग्रं सङ्कल्पमात्रकलना हि मनोविलासः।
[1]सङ्कल्पमात्रकलनैव कृतिस्तु नित्या सङ्कल्पनिश्चयमवाप्नुहि चात्मशान्तिम्[2]॥ (४।५८)

ज्ञेयं सर्वमतीतं च ज्ञानं च मन उच्यते।
ज्ञानं ज्ञेयं मनश्चैव[3] नान्यः पन्था द्वितीयकः॥ (४।६०)

श्री आदिनाथेन सपादकोटिलयप्रकाराः कथिता जयन्ति[4]।
नादानुसन्धायकमेव नान्यं मन्यामहे धन्यतमं लयानाम्॥ (४।६६)

मनःस्थैर्ये स्थिरो वायुस्ततो बिन्दुः स्थिरो भवेत्।
बिन्दुस्थैर्योदयात्सत्यं पिण्डस्थैर्यं प्रजायते॥
न्यासतः सुप्रसन्नात्मा निर्द्वन्द्वो विजितेन्द्रियः।
कुरुते युक्तकर्माणि नित्यनैमित्तिकानि च॥
योगेन पद्मात्मानं गुहायां प्राप्यते च सा।
तारकं जपते नित्यं जितासुः कामवर्जितः॥
युक्तासने समारुह्य समकायशिरोधरः।
नासाग्रदृष्टिरेकाकी जपेदोङ्कारमक्षरम्॥
भूर्भुवःस्वरिमे लोकाश्चन्द्रसूर्याग्निदेवताः।
यस्य मात्रासु तिष्ठन्ति तत्परज्ज्योतिरोमिति॥
अकारश्च उकारश्च मकारो बिन्दुसंज्ञकः।
त्रिधा मात्रा स्थिता यत्र तत्परज्योतिरोमिति॥
त्रयः कालास्त्रयो वेदास्त्रयो देवास्त्रयोऽग्नयः।
त्रयो लोकाः स्थिता यत्र तत्परं ज्योतिरोमिति॥
इच्छा क्रिया तथा ज्ञानं ब्राह्मी रौद्री च वैष्णवी।
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति॥
वचसा च जपेद्विद्वांश्चक्षुषा च समभ्यसेत्।
मनसा संस्मरेन्नित्यं तत्परं ज्योतिरोमिति॥
शुचिर्वाप्यशुचिर्वापि यो जयेत्प्रभवं सदा।
न स लिप्यति योगेन पद्मपत्रमिवाम्भसा॥
शरीरं नो त्यजेदेवं कालः कस्यापि कुत्रचित्।
अन्तःशरीररक्षार्थं यत्नः कार्यस्तु योगिना॥
ततो लक्ष्यमनोऽभ्यासमहंभावविवर्जितम्।
सर्वाङ्गकल्पनाहीनं कथं कालो जयेत तम्॥

१. सङ्कल्पमात्रमतिमुत्सृज निर्विकल्पमाश्रित्य–मु० पा०। २. °शान्तिः–पू० सं०।
३. समं नष्ट–मु० पा०। ४. न सन्ति–पू० सं०।

स एव काले स शिवः स सर्वो नापि किञ्चन ।
कः केन हन्यते तत्र म्रियते वापि कश्चन ॥
ततो व्यतीते समये कालस्य भ्रान्तिरूपितम् ।
योगी सुप्तोत्थित इव बोधं याति निबोधतः ॥

एवं सिद्धो भवेद्योगी वञ्चयित्वा विधानतः ।
कालं कलितसंसारं पौरुषेणाद्भुतेन च ॥
तत्रापि भवने योगी विहरत्येक एव सः ।
पश्यन्संसारवैचित्र्यं स्वेच्छया निरहङ्कृतिः ॥

द्वाराणां नवकं निरुद्ध्य मरुतं पीत्वा दृढं धारितम्
नीत्वाऽऽकाशमपानवह्निसहितं शक्त्या समुच्चालितम् ।
आत्मध्यानयुतस्त्वनेन विधिना विन्यस्य मूर्ध्नि ध्रुवम्[1]
यावत्तिष्ठति तावदेव मरुतां सङ्घेन संस्तूयते[2] ॥
(वि० मा० ६।१००)

दृष्टिः स्थिरा यस्य विनापि दृश्यं वायुः स्थिरो यस्य विना प्रयत्नम् ।
चित्तं स्थिरं यस्य विनावलम्बं स एव योगी स गुरुः स सेव्यः ॥

गोरक्षोपनिषदि—

आदौ देवो महानन्दात्रिर्ममे देवता स्वयम् ।
तस्मादिच्छा सुसम्पन्ना इच्छा ज्ञानं ततः क्रिया ॥
ततो व्यधां वरारोहे पिण्डब्रह्माण्डबुद्बुदम् ।
अव्यक्ताव्यक्तभावेन विचरामि जगत्त्रये ॥

एवं श्रीगुरुः आदिनाथः, मत्स्येन्द्रनाथः, तत्पुत्र उदयनाथः, दण्डनाथः, सत्यनाथः, सन्तोषनाथः, कूर्मनाथः, भवनार्जिः, तस्य श्रीगोरक्षनाथः, ईश्वरसन्तान आदिर्ब्राह्मणः सूक्ष्मवेदी, अद्वैतोपरि सदानन्द देवता, अनाहतशृङ्गी, खेचरीमुद्रा ।

विवेकमार्तण्डे—

अन्तर्निश्चलितात्मदीपकलिकास्वाधारबन्धादिभि[1]-
र्यो योगी युगकल्पकालकलनातत्त्वं च यो गीयते ।
ज्ञानामोदमहोदधिः समभवद्यत्रादिनाथः स्वयं
व्यक्ताव्यक्तगुणाधिकं तमनिशं श्रीमीननाथं भजे ॥

---

१. प्रणामविधिनावष्टभ्य मूर्ध्ना भ्रुव—मु० पा० ।

२. तावदायनगत श्रेयः फल विन्दति—मु० पा० ।

१. बेधादिभिः—पू० स० ।

अजपानाम गायत्री योगिनां मोक्षदायिनी ।
अस्याः सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतो न भविष्यति ॥ (६।३५-३७)
अनया सदृशं तीर्थमनया सदृशः क्रतुः ।
अनया सदृशं पुण्यं न भूतं न भविष्यति ॥
अनया सदृशं स्वर्ग्यमनया सदृशं तपः ।
अनया सदृशं वेद्यं न भूतं न भविष्यति ॥
एतत्कालभयाद् ब्रह्मा प्राणायामपरायणः ।
योगिनो मुनयः सर्वे ततो वायुं नियन्त्रयेत् ॥
यत्सर्वं द्वन्द्वयोरैक्यं जीवात्मपरमात्मनो· ।
समस्तनष्टसङ्कल्पः समाधिः सोऽभिधीयते ॥
अवेद्यः सर्वशास्त्राणामभेद्य सर्वदेहिनाम् ।
अग्राह्यो मन्त्रयन्त्राणां योगी युक्त· समाधिना ॥
हेतुदृष्टान्तनिर्मुक्तं मनोबुद्ध्याद्यगोचरम् ।
व्योमविज्ञानमानन्दं तत्त्व तत्त्वविदो विदुः ॥
यथा घृते घृत क्षिप्तं घृतमेव हि जायते ।
क्षीरे क्षीरं तथा योगी तत्त्वमेव हि जायते ॥
यावद्बिन्दुः स्थितो देहे तावन्मृत्युभय कुतः ।
यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति ॥ (६।६१)
बिन्दुः शिवो रजः शक्तिर्बिन्दुरिन्दू रजो रविः ।
उभयोः सङ्गमादेव प्राप्यते परमं पदम् ॥ (६।६५)

या पृथ्वी हरितालहेमरुचिरा तत्त्वं लकारान्वितम्
संयुक्ता कमलासनेन हि चतुष्कोणा हृदि स्थायिनी ।
प्राणं तत्र विलीय पञ्चघटिकं चित्तान्वितं धारयेत्
एषा स्तम्भकरी सदा क्षितिजयं कुर्याद् भुवो धारणा ॥ (वि० ६।१४६)

अर्द्धेन्दुप्रतिमं च कुन्दधवलं कण्ठेऽम्बुतत्त्वं स्थितम्
यत्पीयूषवकारबीजसहितं युक्त सदा विष्णुना ।
प्राणं तत्र विलीय पञ्चघटिकं चित्तान्वितं धारयेत्
एषा दुःसहकालकूटजरणा स्याद्वारुणी धारणा ॥ १४७ ॥

यत्तालुस्थित इन्द्रगोपसदृशं तत्त्वं त्रिकोणं ज्वलत्-
तेजो रेफयुतं प्रवालरुचिरं रुद्रेण यत्सङ्गतम् ।

प्राणं तत्र विलीय पञ्चघटिकं चित्तान्वितं धारयेत्
एषा वह्निजयं सदा विदधती वैश्वानरी धारणा ॥ १४८ ॥

यद्भिन्नाञ्जनसन्निभं मिदं वृत्तं भ्रुवोरन्तरे
तत्त्व वायुमयं यकारसहितं तत्रेश्वरो देवता ।
प्राणं तत्र विलीय पञ्चघटिकं चित्तान्वितं धारयेत्
एषा खे गमनं करोति यमिनां स्याद्वायवी धारणा ॥ १४९ ॥

आकाशं सुविशुद्धवारिसदृश यद्ब्रह्मरन्ध्रे स्थितम्
यन्नाथेन सदाशिवेन सहितं शान्तं हकाराक्षरम् ।
प्राणं तत्र विलीय पञ्चघटिकं चित्तान्वितं धारयेत्
एषा मोक्षकपाटपाटनपटुः प्रोक्ता नभोधारणा ॥ १५० ॥

स्नातं तेन सहस्रतीर्थसलिले दत्तं द्विजेभ्यो धनम्
यज्ञानां च हुतं सहस्रमयुतं देवाश्च सम्पूजिताः ।
सत्यं तेन सुतर्पिताश्च पितरः स्वर्गं च नीता पुनर्-
यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः ॥

राजगुह्ये श्रीकृष्णकृतगोरक्षनाथस्तोत्रे—

गकारो गुणसंयुक्तो रकारो रूपलक्षणः ।
क्षकारेणाक्षयं ब्रह्म श्रीगोरक्ष नमोऽस्तुते ॥
ब्रह्मणां च परं ब्रह्म रुद्रादीनां शिरोमणे ।
त्रैलोक्यं निर्मितं येन श्रीगोरक्ष नमोस्तु ते ॥
सर्वगुणो गुणाभावो निर्गुणश्च गुणस्थितः ।
साकारो वा निराकारः श्रीगोरक्ष नमोस्तु ते ॥
स्वः पूजयन्ति देवास्तं मर्त्यलोके च मानवाः ।
पाताले नागलोकाश्च श्रीगोरक्ष नमोस्तु ते ॥
एकाकी वर्त्तते नित्यं भवपाशविवर्जितः ।
परं ब्रह्माक्षयं ज्योतिः श्रीगोरक्ष नमोस्तु ते ॥
श्री गोरक्षस्येदं स्तोत्रं स्वयं कृष्णेन निर्मितम् ।
भक्तिभावविनिर्मुक्तो दासोऽहमिति भावयेत् ॥
आकाशं मन्दिरं यस्य नानारत्नोपशोभितम् ।
हस्तमध्ये स्थितं शम्भोरभय वरदायकम् ॥
नमन्ति ब्रह्मा विष्णुश्च सुरा नृमुनयस्तथा ।
ज्ञानसाराखिलाः सिद्धाः श्रीगोरक्ष नमोस्तु ते ॥
श्री नाथं तु महात्मानं न जानाति स्वयं हरिः ।
किञ्चित्किञ्चिद्विजानाति महादेवनमस्कृतम् ॥

श्रीनाथश्चाक्षयो देवो देवानामप्यगोचरः ।
तत्पादौ चिन्तयेद्योगी अक्षयो योगनिश्चलः ॥

कल्पद्रुमतन्त्रे श्रीगोरक्षकवचे—

योगीश्वरं चादिकाथं सर्वव्याप्यं महेश्वरम् ॥

कल्पद्रुमतन्त्रे श्रीगोरक्षसहस्रनामस्तोत्रे

शुद्धस्फटिकसङ्काशं जटाजूटं त्रिलोचनम् ।
निरञ्जनं निराकारं निर्विकल्पं निरामयम् ॥
त्रिमूर्तिं च त्रिलोकीशं विधिविष्णुमहेश्वरम् ।
विश्वरूपं सदाकारं गोरक्षं नाथदैवतम् ॥
विद्यापतिर्मन्त्रनाथो ध्याननाथो निरञ्जनः ।
नित्यनाथो भूतपतिर्नित्यानन्दो महीपतिः ॥
सर्वाराध्यः पूर्णनाथो द्युतिनाथो द्युतिप्रियः ।
सृष्टिनाथः स्थितिनाथो हारनाथो महागुरुः ॥
रमणो रामभद्रश्च रामनाथो जनार्दनः ।
घटस्थापनकार्य्याणि मुक्तिकार्य्ये विशेषतः ॥
विना गोरक्षमन्त्रेण न कर्तव्य कदाचन ।
आगमोक्तानि कर्माणि वैदिकानि तथैव च ।
विना गोरक्षमन्त्रेण न सिध्यन्ति कदाचन[1] ॥

सारसङ्ग्रहे ब्रह्माण्डपुराणे ललितापुरवर्णने ललिताखण्डे—

तस्य चोत्तरकोणे तु वायुलोको महाद्युतिः ।
तत्र वायुशरीराश्च सदादानमहोदयाः ॥
सिद्धदिव्यर्षयश्चैव पवनाभ्यासिनोऽपरे ।
गोरक्षप्रमुखाश्चान्ये योगिनो योगतत्पराः ॥

द्वात्रिंशत्तमेऽध्याये—

नाथान्तरमितिप्रोक्तं हस्तविंशति चोन्नतम् ।
चतुर्नल्वप्रविस्तारं प्राग्वत्सोपानमण्डितम् ॥
तत्र नाथा महादेव्या योगशास्त्रप्रवर्तकाः ।
सर्वेषां मन्त्रगुरवः सर्वविद्या महातपाः ॥
चत्वारो योगनाथास्तु लोकानामिह गुप्तये ।
तुष्टाः कामेशदेवेन तेषां नामानि मे शृणु[2] ॥

---

१. साधयेत्तथा–पू० सं० ।   २. मच्छृणु– पू० सं० ।

[1]मित्रीशोड्डीशषष्ठीशचर्य्याख्या कुम्भसम्भवाः ।
तैः सृष्टा बहवो लोका रक्षार्थं पादुकात्मकाः ॥
... ... दिव्यौघा तेषां नामानि मे शृणु ।
[2]मित्राद्या मानवौघाश्च सिद्धौघाः सुरतापसाः ॥
प्रायः[3] सालोक्यसारूप्यसायुज्यादिकसिद्धयः ।
महान्तो गुरवस्तांस्तु सेवन्ते[4] चतुरो गुरून् ॥
(उ० भा० उप० पा० ३७।२६-३१)

स्कन्दपुराणे काशीखण्डे—

मम भक्तिं प्रकुर्वाणा ये विश्वेशं द्विषन्ति वै ।
विद्विषो मम ते ज्ञेयाः पिशाचपदगामिनः ॥
अध्यासतेऽन्धतामिस्रं मृतास्तेऽन्यत्र सन्ततम् ।
शिवनिन्दापरा ये च ये पाशुपतनिन्दकाः ॥
विद्विषो मम ते ज्ञेयाः पतन्तो नरकेऽशुचौ ।
अष्टाविंशतिकोटीषु नरकेषु क्रमेण हि ॥
कल्पं कल्पं वसेयुस्ते ये विश्वेश्वरनिन्दकाः ।
विश्वेशानुग्रहं प्राप्य मुनेऽहमपि मुक्तिदः ॥
मद्भक्तैस्तद्विशेषेण सेव्यो विश्वेश्वरोऽनिशम् ।
इयं वाराणसी ज्ञेया पशुपातरथस्थली[5] ॥

तन्त्रमहार्णवे—

रक्तनेत्रं हीनछाया रक्तं गात्रं तपस्विनः ।
मूर्तिः प्रसन्नवदना स्वल्पवाणी च कथ्यते ॥
चतुरशीतिसिद्धानां पूर्वादीनां दिशां न्यसेत् ।
एकविंशतिसङ्ख्याकं स्थानं नाम्नां च कथ्यते ॥
नवनाथा दिशो [6]ह्यष्टावेको मध्ये व्यवस्थितः ।
नवनाथस्थितिश्चैव सिद्ध्यागमेन कारयेत् ॥
गोरक्षनाथो वसेत्पूर्वे जगन्नाथवने स्थितः ।
कोशत्रये वसेन्नित्यमेको नाथः स उच्यते ॥
जालन्धरो वसेन्नित्यमुत्तरापथमाश्रितः ।
ज्वालामुखी पञ्चक्रोशवनमुत्तरमाश्रितः ॥

---

१. मित्री च शोदिशश्चैव चर्याख्यः कुम्भ०—पू० सं०
२. दिव्यविद्यामानवौघ—पू०सं० ।
३. प्राप्तः ।
४. संवैतांस्—पू० सं० ।
५. पाशुपत°—पू० सं० ।
६. दिशाद्यष्टा°—पू० सं० ।

नागार्जुनो महानाथो ज्वालायेशानसंश्रितः(१)।
सप्तक्रोशे वने चैव तपस्यति महातपः॥
सहस्रार्जुनो दक्षिणे च गोदावरीवने स्थितः।
दशक्रोशप्रमाणेन तपस्यति महातपः॥
दत्तात्रेयो महानाथ पश्चिमायां वसेद्दिशि।
सरस्वतीपश्चिमे च नवक्रोशं समाश्रितः॥
देवदत्तो वसेन्नित्यमग्निकोणं समाश्रितः।
पञ्चक्रोशसमाने तु वायव्यां भरतो जड़ः॥
सप्तक्रोशप्रमाणेन आदिनाथो वसेद्भुवि।
कुरुक्षेत्रे मध्यदेशे क्रोशत्रयवने स्थितः॥
नैर्ऋते तु दिशां भागे मत्स्येन्द्रस्त्वेव[१] वारिधेः।
नाथस्थानानि वक्ष्यामि महागोप्यं न कथ्यते॥

षोडशनित्यातन्त्रे—

कादिसंज्ञा भवेद्रूपा सा शक्तिः सर्वसिद्धये।
तया तैर्भुवने तन्त्रं कल्पे कल्पे विजृम्भते॥
अवसाने तु कल्पानां सा तैः सार्द्धं व्रजेत्समाम्।
नामपर्यायतोऽवाप्तं कालावाप्तमितिद्वयम्।
प्रसिद्धं बाह्यतो यच्च त्रीणि नामानि साधके॥
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे।
विद्यावतारसंसिद्ध्यै स्वीकृताऽनेकविग्रह॥
नवाय नवरूपाय परमार्थैकरूपिणे।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते॥
स्वतन्त्राय दयाशक्तिविग्रहाय रसात्मने।
परतन्त्राय शक्तानां भव्याय भव्यरूपिणे॥

रुद्रयामले रससाधनप्रकरणे—

शिवरात्रिदिने प्राप्ते आरभ्यं कार्यसाधकैः।
चतुःषष्टिप्रमाणेन कोष्ठं कृत्वा तु भैरवम्॥
पार्श्वयोर्मूर्तिमालाञ्च मध्ये मूर्तिञ्च विन्यसेत्।
तस्याग्रे जुहुयात्पश्चाद्धेमसिद्धिः प्रजायते॥
रक्तोपवीतवासस्तु दद्याद्वै द्विजपुङ्गवम्।
कोष्ठसङ्ख्या तदर्द्धार्द्धयोगिनीर्यत्र पूजयेत्॥
शृङ्गीनादेन ते सर्वे मनसाह्लादकारिणा।

१. मत्स्येन्दरस्तु--पू० सं०।

रक्तो नस्वहकः[१] श्रेष्ठः स्कन्धाग्रे शृङ्गमाश्रितः ॥
मुखं कमलया युक्तं नेत्रे कमलभूषणम् ।
पृष्ठे च कमलाकारं हंसगत्या विराजितम् ॥
रक्तवासोत्तरीयेन वरमन्त्रं पुरो न्यसेत् ।
रक्तचन्दनसंघृष्टमपूपस्योपरि न्यसेत् ।
स्वादयेत्पञ्चदिवसं[२] पश्चात्पुण्ये समर्पयेत् ।
रसायनी महाविद्या सिद्धिर्भवति निश्चितम् ॥

तारासूक्तौ—

प्रणवो निर्गुणः प्रोक्तः सर्वाद्यो वेदगोचरः ।
वेदमाता तु गायत्री तदाद्यः प्रणवः स्मृतः ॥

कुलार्णवतन्त्रे द्वादशोल्लासे—

श्रीनाथचरणाम्भोजं यस्यां दिशि विराजते ।
तस्यै दिशे नमस्कुर्याद् भक्त्या प्रतिदिनं प्रिये ॥
न पादुकापरो मन्त्रो न देवः श्रीगुरोः परः ।
नास्ति शाक्तात्परो मार्गो[३] न पुण्यं कुलपूजनात् ॥ (१२।११-१२)

वायुपुराणे शिवस्तोत्रे—

[४]अप्रमेयाय गोप्त्रे च निर्गुणाय गुणाय च ।
वादप्रियाय सभ्याय मुद्रामणिधराय च ॥ वायु० २४।१४९ ।
देशकाल उपायेन द्रव्यं श्रद्धासमन्वितम् ।
पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम् ॥
श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥
इज्याचारदमाहिंसादानस्वाध्यायकर्म्मणाम् ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥
चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा ।
सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः ॥

षट्शाम्भवरहस्ये—

पृथ्वी कर्त्री महादेवी नाथाः शास्त्रस्य बन्धकाः ।
ब्रह्मतत्त्वविदित्याद्याः शरभाद्यास्तु रक्षकाः ॥

---

१. नम्वहकः—पू० सं० । २. सप्तदिवसं—पू० सं० ।
३. नहि शाक्तात्परा दीक्षा—मु० पा० ।
४. अप्रमेयाय दीप्ताय दीप्तये निर्गुणाय च ।
नम प्रियाय वामाय मुद्रामणिधराय च ॥ —मु० पा० ।

नाथान्तो वा महेशानि[1] त्रितयं त्रितयं त्रिषु ।
ईशाख्यस्तु महेशानि केरलान्तर्गतो[2] भवेत् ॥

सूतसंहिताया यज्ञवैभवखण्डे द्वितीयेऽध्याये—

विष्ण्वादीनां तु देवानां ध्यानं चाधममिष्यते ।
अतो मोक्षार्थिभिः प्राज्ञैः शिव एकः शिवङ्करः ॥
ध्येयः सर्वं परित्यज्य शिवादन्यत्तु दैवतम् ।
अस्मिन्नर्थे श्रुतिः साध्वी समाप्ता वेदवित्तमाः ॥
अपक्वचित्तैर्मोक्षार्थं देवाविष्ण्वादयोऽपि च ।
ध्येयाः पक्वैः शिवो ध्येयः साक्षात्संसारमोचकः ॥
रुद्रं विश्वाधिकं विष्णुं ब्रह्माणं चान्यमेव च ।
समं चिन्तयतः साक्षात्संसारः[3] परिवर्त्तते ॥
महापापवतां पुंसां पूर्वजन्मसु सुव्रताः ।
विष्णुः सर्वाधिको भाति न साक्षात्परमेश्वरः[4] ॥
विष्णुः सर्वाधिको नान्य इति चिन्तयतां नृणाम् ।
नास्ति संसारविच्छित्तिः कल्पकोटिशतैरपि ॥
तेषां नैव च मोक्षाशा कल्पकोटिशतैरपि ।
ब्रह्मादिदेवतानां च विश्वाधिक्यं वदन्ति ये ।
अधोमुखोर्ध्वपादास्ते यास्यन्ति नरकार्णवम् ॥

(सू० सं० य० वै० खं० २।५३-६१)

आदिनाथसंहितायाम्—

कौलिकान्कुलमार्गं च कुलद्रव्यं कुलाङ्गनाः ।
ये द्विषन्ति जुगुप्सन्ते ये निन्दन्ति हसन्ति ये ॥
येऽसूयन्ते च शङ्कन्ते मिथ्येति प्रवदन्ति ये ।
ते शाकिनीमुखे यान्ति सदारसुतबान्धवाः ॥
पिबन्ति शोणितं तस्य चामुण्डा मांसमुत्त्वचः ।
अस्थिनी चर्वयन्त्यस्य योगिनीभैरवीगणाः ॥

---

१. वामदेशानि–पु० सं० ।
२. केरलान्तरतो–प० सं० । ३. संसारे–मु० पा० ।
४. अतः परं "विष्णुः सर्वाधिको भाति नारकी स न संशयः । इति पु० सं० अधिकः पाठः ।

का प्रयोग है यहाँ] । क्षेमम्—अव्ययम्, कल्याण को, मङ्गल को । वितन्वति-आवहति (सति), वितरित करते रहने पर । आचार्य मल्लिनाथ लिखते है— 'क्षेमङ्करे सति' अर्थात् कल्याणसाधक बने रहने पर (वि + तन् + शतृ, सप्तमी एकवचन) । अदेव-मातृका·—अवृष्ट्यम्बुजीविनः, वर्षाजल के भरोसे न रहने वाले । इन्द्र को वर्षा का देवता माना जाता है यदि प्राकृतिक वर्षा न हो तो कृषिकार्य का होना सर्वथा असम्भव हो जाता है । अतएव 'वर्षा का देवता' (इन्द्र या पर्जन्य) ही किसानो के लिए 'माता' के समान है । क्योकि माँ ममतामयी होती है, शिशु को भूखा मरता नही देख सकती । इस प्रकार वर्षा-देव ही जिनकी माँ हो उन किसानो को 'देवमातृक' कहा जायेगा और जो वृष्टिदेवता के भरोसे न रहकर स्वय खेतीबारी कर ले, राज-कीय सेचनसाधनो से वे 'अदेवमातृक' है । अमरकोष ऐसे प्रदेश को 'नदीमातृक' की सज्ञा देता है-'देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालित. । स्यान्नदीमातृको देवमातृ-कश्च यथाक्रमम् ।' यद्यपि देवमातृक प्रदेश नदीमातृक प्रदेशो से कही अधिक सुख-सम्पन्न होते है फिर भी सुयोधन ने अपने साम्राज्य मे सिचाई आदि का इतना सुखद प्रबन्ध किया है कि कुरुप्रदेश मे कोई कष्ट नही है । यह भी उसकी लोकप्रियता का परिचायक है । देव. वृष्टिरूप माता येषा ते देवमातृकाः (बहुव्रीहिसमास. समासान्त कप् प्रत्ययः) न देवमातृकाः इति अदेवमातृकाः (नञ् तत्पु०) । कुरव — कुरूणा निवासा· कुरवो जनपदविशेषा., सुयोधन द्वारा प्रशासित कुरुजाङ्गल-प्रदेश (कुरु + अण् + जनपदे लुप्) । अकृष्टपच्या इव— अयत्नपरिणताः इव कर्ष-णादि (जुताई) के बिना ही पकी हुई, (सस्यसम्पद का विशेषण) खेत की जुताई आदि करके जो फसल पकाई जाय, प्राप्त की जाय उसे 'कृष्टपच्या' कहते हैं—कृष्टेन (कृष् + क्त कर्मणि + टा) कर्षणेन पच्यन्ते इति कृष्टपच्या (कृष्ट + पच् + क्यप् कर्मकर्त्तरि—'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथा' सूत्र से निपात-नात् क्यप् प्रत्यय का प्रयोग । न कृष्टपच्या इति अकृष्टपच्याः (नञ् तत्पु०) । इव का प्रयोग उत्प्रेक्षा के अर्थ मे हुआ है । कृषीवलैः—कर्षकै इत्यर्थ. अर्थात् कृषकगणो द्वारा । जिनके पास खेतीबारी हो वे कृषीवल है—कृषि· अस्ति एषाम् इति कृषीवलाः (कृषि + वलच् प्रत्यय मत्वर्थीय), तैः कृषीवलैः (अनुक्ते कर्त्तरि तृतीया) मत्वर्थीय वलच् प्रत्यय यहाँ 'रज कृष्यासुतिपरिषदो वलच्' सूत्र से हुआ है । तात्पर्य है—रजस् कृषि, आसुति और परिषद्—इन शब्दो से मत्वर्थ मे वलच् प्रत्यय होता है । वस्तुत. इस नियम से भी रूप बनना चाहिये था—'कृषिवलैः' परन्तु कृषि का ह्रस्व इकार दीर्घ हो गया है 'वले' सूत्र से, जिसका अर्थ है—वलच् प्रत्यय परे रहने पर पूर्ववर्ती स्वर दीर्घ हो जाता है । कृषीवल का अर्थ है किसान—'क्षेत्राजीवः

कर्षकश्च कृषकश्च कृषीवल:' इत्यमर: । सुखेन लभ्या —बिना किसी आयास या क्लेश के प्राप्त होने योग्य । सुखेन अक्लेशेन लभ्या. (लभ् + यत् कर्मणि) लब्धुं शक्या. । 'प्रकृत्यादिभ्य' उपसख्यानम्' इस नियम से 'सुखेन' मे तृतीया विभक्ति । सस्यसम्पद.– सम्पन्नानि सस्यानि, अर्थात् कृषिसमृद्धियो को । सस्याना (सस् + क्यप्) सम्पद' इति सस्यसम्पदस्ता' (षष्ठी तत्पु०) ! 'वृक्षादीनां फलं सस्यम्' इत्यमर' । दधत धारयन्त:, धारण करने हुए (धा+लट्+शतृ प्रथमा बहुव०) चकासति—सर्वोत्कर्षेण वर्तन्ते अर्थात् शोभित हो रहे है (चकास्+लट लकार, प्रथमपुरुष बहुवचन) ।

ननु एव जनपदानुवर्तिन: कथमर्थलाभ इत्यत आह —

उदारकीर्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ॥१८॥

उदारेति । उदारकीर्तेर्महायशस । 'उदारो दातृमहतो:' इत्यमर: दयावत: परदु खप्रहाणेच्छो' अतएव प्रशान्तबाध प्रशमितोपद्रव यथा स्यात्तथेति क्रियाविशेषणम् उदयविशेषणम् वा । 'वा दान्तशान्त'—इत्यादिना शमिधातोर्ण्यन्तान्निष्ठान्तो निपात' । अभिरक्षया सर्वतस्त्राणेनोदय वृद्धि दिशत: सम्पादयतो वसूपमानस्य कुबेरोपमस्य । 'वसुर्मयूखाग्निधनाधिपेषु' इति विश्व:। अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्नुता द्राविता मेदिनो वसूनि धनानि । 'वसु तोये धने मणौ' इति वैजयन्ती। स्वय प्रदुग्धे अक्लेशेन दुह्यत इत्यर्थ. । दुहे कर्मकर्तरि लट् । 'न दुहस्नुनमा यक्चिणौ' इति यक्प्रतिषेध: यथा केनचिद्विदग्धेन नवप्रसूता रक्षिता च गौ. स्वय प्रदुग्धे तद्वदिति भाव' । अलकारस्तु–'विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्ति.' इनि सर्वस्वकार' । अत्र प्रतीयमानया गवा सह प्रकृताङ्गया भेदलक्षणातिशयोक्तिवशाद्दोह्यत्वेनोक्तिरिति सङ्क्षेप: ।।१८।।

श्लोकान्वय–उदारकीर्ते प्रशान्तबाधम् अभिरक्षया उदय दिशत' वसूपमानस्य अस्य गुणै: उपस्नुता मेदिनी वसूनि स्वय प्रदुग्धे ।

अनुवाद—महायशस्वी दयावान् निर्विघ्न प्रजासरक्षण द्वारा वृद्धि प्राप्त करने वाले, कुबेर के समान इस सुयोधन के गुणो से द्रवीभूत पृथ्वी स्वयमेव सम्पदाओ को प्रस्तुत कर रही है ।

बहिः सूत्रं त्यजेद्विद्वान् योगमुत्तममास्थितः ।
ब्रह्मभावमिदं सूत्रं धारयेद्यः सचेतनः ॥

धारणात्तस्य सूत्रस्य नोच्छिष्टो नाशुचिर्भवेत् ।
सूत्रमन्तर्गतं येषां ज्ञानयज्ञोपवीतिनाम् ॥

ते वै सूत्रविदो लोके ते च यज्ञोपवीतिनः ।
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुत्तमम् ॥

अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा ।
स शिखीत्युच्यते विद्वान्नेतरे केशधारिणः ॥

कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः ।
तै संधार्यमिदं सूत्रं क्रियाङ्गं तद्धि वै स्मृतम् ॥

शिखा ज्ञानमयी यस्य उपवीतं च तन्मयम् ।
ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः ॥

इदं यज्ञोपवीतं तु परमं यत्परायणम् ।
विद्वान् यज्ञोपवीती स्यात्स यज्ञः स च सर्ववित् ॥ इति ॥

(ई० अ०, पृ० १५१)

परमहंसोपनिषदि—

परमात्मात्मनोरेकत्वाज्ञानेन तयोर्भेद एक एव[1] विभग्नो या सा संध्या सर्वान् वा कामान्परित्यज्याद्वैते परमस्थितिः ।

ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते ।
काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः ॥
× × ×
स याति नरकान्घोरान्महारौरवमेव च ॥ इति ॥

(ई० अ० पृ० १५०)

शास्त्रोक्तविषयाभ्यासमजानन्तः केवलं शास्त्रपाठमात्रेणैवाभिमानिनस्तान्प्रति वाक्यमेतदित्याह—द्वादशवर्षो भूत्वा विद्याभ्यासमर्हति, ततश्च यावद्द्वादशवर्षं शब्दबोधार्थं व्याकरणशास्त्रमध्येतव्यं ततश्च यावत् द्वादशवर्षमर्थबोधार्थं न्यायशास्त्रमध्येतव्यं ततश्च यावत् द्वादशवर्षं वेदोऽध्येतव्यस्ततश्च षट्सु वर्षेषु वेदान्ताभ्यासः कर्तव्यः, एवं षट्सु वर्षेषु शास्त्रीयरीतिर्ज्ञातव्या । पुनरभ्यासश्च कर्तव्यः, एवमायुषोऽर्द्धं तु गतप्रायमेव । ततः पुनरिन्द्रियाणां शैथिल्येऽरिष्टे च सत्यभ्यासासक्तत्वं भवेत् । अतः प्रथमतः साक्षरतामात्रं पाण्डित्यमोपाद्य मनुष्यैर्योगाभ्यासः कर्तुमुचित इति ।

---

१. भेद एव—मु० पा० ।

ये त्वाचारबाहुल्यं दधतोऽपि वेश्या उपगम्य तत्सङ्गं कुर्वन्ति तान् प्रत्यस्माकमिदं कथनं बाह्यविषयिकामुज्ज्वलतां प्रदर्श्य मानसी मलिनता धार्यते। ततस्त्विदं श्रेयो यत् वेश्यासङ्गोऽपि न कर्तव्यो, [1]बह्माचारस्यापि प्रयोजनं नास्ति गौणोऽयमित्याचारं ज्ञात्वा तस्य त्यागोऽपि न कार्यः, यथायोग्यत्वेन विवेकपूर्वकं सेवनं चास्यकर्तव्यमिति।

भवेयं मनुष्यो यदैकस्तु राजा यदा जन्तुरेको भवेयं मृगेन्द्रः।
यदा शास्त्रमेकं तदा योगमेव यदा देव एकस्तदा नाथ एव॥

अस्मिन् मार्गे अद्वैतोपरिवर्त्ती नाथो देवता, प्राप्या निराकारज्योतिर्नाथो ध्येयः, साकारनाथ उपास्योऽथ च आदिगुरुः, साधनं योगः।

अत्याश्रमी योगी गुरुः, मुमुक्षुः साधकः अवधूतगुरोर्मुख्यं चिह्नं नादो मुद्रा भस्मशैली ऊर्णायज्ञोपवीतमित्यादि। शक्तिर्जगत्कर्त्री। शिवः पालकः। कालः संहारकः। नाथो मुक्तिदायकः। प्रणवो वेदः। नादः सन्तानं। नव नाथाः। बिन्दुः सन्तानमीश्वरः। मनः शरीरं। जीवो अनुभवः। चत्वारो गुरवः - मत्स्येन्द्र ईश्वरश्चतुरङ्गी गोरक्ष इति स्वरूपाः। अपक्षवास्तविकपक्षमङ्गीकृत्येतरकल्पितपरपक्षपाखण्डखण्डनमित्यादिविषयः परमहंस इति परमहंसं वदन्ति। तत्किम्, उत्कृष्टहंसोऽस्ति यतो निकृष्टहंसत्वं तु परमात्मा। उत्कृष्टहंसत्वं तु परमहंसस्य कुत आगत यदा ब्रह्मस्वरूपत्वं प्राप्तः। ब्रह्मस्वरूपत्वं च कुतः प्राप्तो यदि मायागुणरचितप्रारब्धकर्माणि मन्यते, एवं चायं तु निकृष्टहंस एव जीवोऽस्ति, ततश्चैतस्य हंसत्वं मरालत्वं कुतः किन्तु काकत्वमेव। यदि काकत्वं तर्ह्ययमेकाक्षो जातः। एकाक्षः को य एकेनैव चक्षुषा पश्यति। यद्ययं वर्णे तदा मायामेव मायादृशाऽपश्यत्[2] यदा चाश्रमी जातस्तदाद्वैतदृशैव पश्यन् वर्त्तते। इयमप्येकैव दृष्टिस्तया पश्यति। यतो महासिद्धैर्निश्चयः कृतोऽयं काकतुल्यो यदेवमेकाक्षः कर्त्तव्य।

सत्यं प्रपञ्चं कुर्वन्तो ब्रह्मणश्छादनं तथा।
केचिद्रजोदृशः प्राप्ता विषयासक्तमानसाः॥
मिथ्यामिथ्येति कुर्वन्तः केचिन्मायाविमोहिताः।
लयं सर्वस्य कुर्वन्त आगता विश्वनाशकाः॥
देदीप्यमानस्तत्त्वस्य कर्ता साक्षात्स्वयं शिवः।
संरक्षन्तो विश्वमेव धीराः सिद्धमताश्रयाः॥
तत्त्वं रक्षन्ति चाद्वैते द्वैते रक्षन्ति संसृतिम्।
एकीभावे ततो भिन्नं द्वैताद्वैतविवर्जितम्॥
मिथ्या वदन्ति यतयः सत्यं चापि विरागिणः।
सिद्धानामेव सिद्धान्तः सत्यमिथ्याविवर्जितः॥

---

१. बद्वाचार°—पू० सं०। २. पश्येत्—पू० सं०।

म्रियते चेत्कथं सत्यं वर्तते चेत्कथं वृथा ।
मृतिजीवनहीनं यत्कथं सत्यं कथं वृथा ॥
एककाले भवेत्सत्यमेककाले तथा वृथा ।
कालभेदाद् वृथा सत्यं नसत्यं न वृथा पृथक् ॥

मनोवागतीतो मनोवाङ्मयश्च नाथः १ । नाथः २ । शक्तिः ३ । कर्ता ४ । अकर्ता ५ । एतत्पञ्चकमिति, क्रमेणैतत्पञ्चकं स्तौति—

अवाच्यमुच्येत कथं पदं तदचिन्त्यमप्यस्ति कथं विचन्तयेत् ।
अतो यदस्त्येव तदस्ति तस्मै नमोऽस्तु कस्मै वत नाथतेजसे ॥
अकर्तृतत्कर्तृ च तत्परं पद वदन्ति योगामृततृप्तचेतसः ।
अकर्तृता कर्तृतया निरूप्यते न वास्तवी वस्तुनि तद्द्वयी कुतः ॥
अवाच्यरूपा सदसद्विलक्षणा विचक्षणा सा कृतलक्षणापि सा ।
नमामि तां शक्तिमकर्तृतामयीं स्वतः करोत्येव च कर्तृतामयीम् ॥
निजेच्छया काण्डसमुद्भवाप्ययाऽनुमानया दर्शितकर्तृतं शिवम् ।
नमाम्यभित्तावपि चित्रितं जगद्विचित्रमेतत्त्वनपेक्ष चेतरम् ॥
ममेदमस्याहमहं मदक्रियः[१] सदैव कर्त्रेत्यभिसंधिपूरितम् ।
करोत्यकर्त्तारमुदारलीलया य उच्यते नाथ इति श्रियेऽस्तु नः ॥
प्रसङ्गजं कर्त्तृपदं विहाय यः फणीव निर्मोकमना पदास्थितम् ।
नमाम्यकर्त्तारमकर्तृतामय यदस्तिसोऽस्मीत्यगुणः स्वयं स्थितः ॥

यस्य साक्षादनुभवः शास्त्रज्ञानेन तस्य किम् ।
चेष्टा स्वभावजा स्त्रीणां कविभिर्वर्ण्यते श्रमैः ॥
जातमात्रं पिबेद्वत्सो बालको वाप्यपाठितः ।
यथा मातुःस्तनं पक्षी न तथा पाठितोऽपि सन् ॥
पिबन्तोऽप्यमृतं नित्यममरा नामरा इह ।
सिद्धावधूता अमरा गृह्णन्तो विषया विषम् ॥
ज्ञानेन छिद्यमानं तु कर्माङ्कुरमुपाददे ।
तदेव योगच्छिन्नं तु यान्ति निर्मूलतां द्रुतम् ॥
संचितं क्रियमाणञ्च कर्म नश्यति तन्मते ।
प्रारब्धं न पुनस्तत्र प्रमाणं श्रुतिरुच्यते ॥
भूतकालोद्भवं कर्म भाट्टाः[२] सत्यं प्रकुर्वते ।
कालत्रितयजं कर्म त्यजत्यत्याश्रमी द्रुतम् ॥
पत्रं पुष्पं फलं शाखा छिद्यतेऽपि पुनः पुनः ।
न यावच्छिद्यते मूलं तावद्वृक्षः प्ररोहति ॥

१. महाक्रिय –पा० । २. भट्टा·–पू० सं० ।

पुन पुनर्भृतो वारा सूक्ष्मछिद्रेण संयुतः।
कलशो रिक्ततां याति विफलः श्रम एव सः ॥
यान्तु गङ्गां गयां यान्तु नमन्त्वश्ममयान् सुरान्।
कायालये विभात्येको जगदात्मा स विस्मृतः ॥

संन्यासिनो विजानन्तु कथयन्तु च पण्डिताः।
अवधूताः क्रियासिद्धास्तत्स्वरूपा निरञ्जनाः ॥
योगदेहं सृजत्येतं कालभीत्या त्ववत्ययम्।
हन्ति वैषयिकं देहं तन्नाथः को हरीश्वरः ॥

सृजत्यब्जो हरिः पाति हरः संहरते जगत्।
तेभ्योऽन्यो मुक्तिदस्तत्र संकेतः सिद्धयोगिनाम् ॥
चतुर्भिः पथिभिर्यान्ति चत्वारो ज्योतिरालये।
योगिनो वैदिका लोकास्तान्त्रिका व्यवहारिणः॥

योगिनो योगयज्ञेन केवलं ज्योतिरुत्तमम्।
इष्ट्वा यानीष्टमार्गेण द्रुतं तत्खेचरा इव ॥
स्ववर्णाश्रमधर्मेण वैदिका समुपास्य तत्।
निवृत्तिपरमा यान्ति तद्भूमाविव मानुषाः ॥

तान्त्रिकाः शुद्धविपणिं विषयान्परिहाय तत्।
दुर्गमेन पथा यान्ति जरा इव जने जनाः ॥
संसारिणस्तु संसारप्रलये प्राप्नुवन्ति तत्।
कृतयात्रमिवाधीशं सर्वे लोका निरर्गलाः ॥

न कुर्याद् बुद्धिमान् प्रीतिं वृथा वस्तुनि फल्गुनि।
मृगतृष्णामयं मायाजालं कि मन्यते यतः ॥
मोक्षशास्त्रकृतो नैव दृष्टा मुनिजना नृपाः।
नीतिशास्त्रकृतः कान्ताः शृङ्गारग्रन्थकारिकाः ॥
मूले मोक्षस्यावधूतो नीतिमूलं नराधिपः।
कान्ता शृङ्गारमूलं यद्वाचारम्भणमस्ति नः ॥

एवं ते त्रयोऽपि क्रियायामेव प्रसन्ना क्रियायुक्तेति कथनेनापि प्रसन्नाः, परन्तु न तु क्रियारहितकथनेत प्रसन्नास्त्रयेण त्रयोऽपि पुरुषाः स्वसङ्गवर्ज्जितास्तद्यथा अवधूत इति, विनानुभवेन शास्त्रारम्भकाः पुरुषा इति, राजनीतिकर्तव्यताहीना भृत्या इति, स्त्रीजन इति, पुरुषार्थहीनाः पुरुषा इति, तान्स्त्रीस्त्रयो हसन्ति, कथं एकेन केनापि पुरुषेण मन्दकामेन कस्यापि वैद्यस्य गृहे गत्वा तं प्रति स्वचेष्टोक्ता, तदा वैद्येनोक्तं यत्नं करिष्यामि इति। तस्य वैद्यस्य वधूः पार्श्ववर्तिनी सहासा जाता तस्या

अभिप्रायोऽयम्–अयं मम भर्त्ता वैद्यः स्वयमपि नपुंसकोऽन्यस्य कामोदययत्नं कथं करिष्यतीति, स्वयमसमर्थोऽन्यसामर्थ्योपायं करिष्यतीति प्रतारणमात्रमिति ।

ब्रह्माभूतो मुनिर्व्यासो मिथ्यामायोपदेशतः ॥
कृतानेकपुराणोऽभूत्तस्यै माये नमोस्तु ते ॥
वशिष्ठादिमुनिव्रातस्त्यागस्यैवोपदेशकृत् ॥
स्वयमङ्गीकृतस्त्रीकस्तस्मै भोगाय ते नमः ॥
दासाः प्रेमातुरा भक्तिं पुरुषार्थं वदन्त्यहो ॥
सशरीरे गते चित्ते भक्तिः प्रेम्णा समं गताः ॥
योगः स्मार्तो वैष्णवश्च धर्मा भूपास्त्रयस्त्विमे ॥
कर्मारिभ्यस्त्रिधाऽवन्ति स्वात्मदेशं त सुस्थितम् ॥
वैष्णवो नृपतिर्धर्मः सत्यं प्रारब्धमात्मगम् ॥
कर्मद्विषः समाश्रित्य पाति स्वं देशमात्मना ॥
स्मार्त्तस्तु नृपतिर्धर्मः सत्यं प्रारब्धमात्मगम् ॥
कर्मारिभ्यो बलिं दत्त्वा पाति स्वं देशमात्मना ॥
योगधर्मो नृपः सर्वान् जित्वा कर्मद्विषो[1] बली ॥
मनश्च किंकरं कृत्वा पाति स्वं देशमात्मना ॥

एतद्ग्रन्थे बहुशास्त्राणां प्रामाण्यं दीयते तत्तु अस्मदीयार्थं वा एतन्मार्गस्य शिष्याणां श्रद्धार्थं दीयत इति नास्ति । अस्मिन्नर्थे तु योगशास्त्रस्यैव प्रामाण्यमेतच्छास्त्रज्ञानेन पूर्णम्, परन्तु वादिनां हिताय भो अन्यग्रन्थान्तरेऽपि भवदीय नानामतान्तरेऽपि चायमेव मार्गः श्रेष्ठः सर्वस्य लक्ष्योऽवधूत एवेति हेतुर्न तु सिद्धान्तार्थः । अस्माकं त्वन्यप्रमाण उपेक्षेति ज्ञेयम् ।

अवधूतशिष्यं विनेतरसंप्रदायकशिष्या मुग्धा वर्त्तन्ते । अवधूतसंप्रदायस्येयं रीतिः—षट्त्रिंशल्लक्षणसंपन्नो गुरुर्द्वात्रिंशल्लक्षणसंपन्नः शिष्यस्ततश्चतुर्लक्षणन्यूनः । गुरुशिष्यलक्षणं च अधिकतत्त्वो गुरुर्न्यूनतत्त्वः शिष्यः । एतादृङ्न्यूनत्वं तु योग्यं न तु मूर्खशिष्योऽधिकलक्षणहीनो मोक्षभाग्भवेत् । पुराणे शौचक्रियादिकरणपर्यन्तक्रिया उपदिशतीति तन्महासिद्धा हसन्ति । अहो बुद्धिमन्तः शिष्यास्तान् गुरून् एतादृक्क्रिया अपि कथयन्ति । शिष्यस्य बुद्धेः परावधिरिति । एतादृशशिष्यकरणे गुरूणां दोषः प्रवर्त्तते । अत एव महासिद्धा बहून् दीक्षितान्न कुर्वन्ति । कथं ? बहवो विवेकिनो न भवन्ति । यतः स्त्रियां भ्रष्टायां पत्युर्लज्जा, तथा शिष्ये भ्रष्टे गुरूणां लज्जा निन्दा पातकं च प्रवर्तते । अत एव बहुदीक्षिता आचार्या गुरवः

१. धर्मद्विषो–पू० स० ।

स्त्याज्याः, महासिद्ध एव गुरुः कर्त्तव्यः, महासिद्धैरपि चतुर्लक्षणं न्यूनः शिष्यः कर्त्तव्यो बहवश्च शिष्या वर्ज्जनीयाः, इति सिद्धान्त·।

अथ पुरुषस्य द्वात्रिंशल्लक्षणानि लिख्यन्ते–प्रथमतो ज्ञानपरीक्षा—निरालम्बः १, निर्भ्रमः २, निवासी ३, निःशब्दः ४। विवेकपरीक्षा–निर्मोहः ५, निर्बन्धः ६, नि शङ्कः ७, निर्विषः ८। विचारपरीक्षा—सर्वांगी ९, सावधान· १०, सन् ११, सारग्राही १२। निरालम्बपरीक्षा–नि प्रपञ्च १३, निस्तरङ्ग १४, निर्द्वन्द्वः १५, निर्लेपः १६। संतोषपरीक्षा-अयाचकः १७, अवाञ्छकः १८, अमानः १९, अस्थिर· २०। शीलपरीक्षा–शुचिः २१, संयमी २२, शान्तः २३, श्रोता २४। सहजपरीक्षा–सुहृत् २५, शीतलः २६, सुखद· २७, स्वभावः २८। अष्टमे शून्यपरीक्षा–लयः २९, लक्ष्यं ३०, ध्यानं ३१, समाधि ३२। इति द्वात्रिंशल्लक्षणानि पुरुषस्य[1] समाप्तानि। [2][पुनरपि पुरुषस्य चत्वारि लक्षणान्येतानि, किमपि वस्तु नास्तीत्यनवरतबोधः ३३, एतानि लक्षणानि तदितराण्यलक्षणानि तेषामुभयेषामेकीकरणं ३४, एतद्द्वयोरैक्य यत्तत्तत्त्वमिति ३५, अत परमप्यस्तीत्यनुभव· ३६]।

अद्वैतोपरिवर्तिनाथ उदितो यत्र ध्वनिः सन्ततो
नाथो बिन्दुरुतापि शक्तिरुदिता सा चार्द्धमायात्मिका।
ऊरुद्रो हरिरो विधिर्मिति स मे ध्येयोऽस्तु नित्यं महा-
नोंकारोखिलशब्दबीजमबुधैरज्ञातरूपो मुदे॥

अयमोंकारो महासिद्धानां ध्येयस्तस्य स्वरूपम्—उकारोऽत्र रुद्रस्वरूपमर्द्धमात्रा शक्तिस्वरूपं बिन्दुर्नाथस्वरूपमर्द्धमात्राया जातोऽकारो विष्णुस्वरूपं बिन्दोर्जातो मकारो ब्रह्मस्वरूपं ध्वनिर्निराकारनाथस्वरूपं व्यापकं ध्वनिर्वर्णश्चोभयमपि मिलितं पूर्णं यद्द्वैताद्वैतविलक्षणं साकारनिराकारातीतमद्वैतोपरिवर्त्ति महानाथस्वरूपमिति। किंचात्रौंकारे उकारबिन्द्वर्द्धमात्रयोर्योगादेव। बिन्दुयोगान्मकारोऽर्द्धमात्रायोगादकार इति। तथा चौकारे नाथशिवशक्तिरूपप्राबल्यं विष्णुब्रह्मस्वरूपयोरप्राबल्यमत एवात्रैतद्देवतात्रयध्यानं महासिद्धैर्मुख्यत्वेन क्रियते, पुनर्ध्वनिर्निराकारनाथरूपं ध्वनिवर्णश्चोभयात्मकः पूर्णनाथस्तु सांप्रतमस्ति तथाऽप्येवेति ब्रह्मविष्णुध्यानतो नाथशिवशक्तीनां ध्यानमुत्तममुक्तं, तत्रापि नाथध्यानं बलिष्ठम्। उकारो यद्योंकारः स्यात्तदा मात्राशक्त्येव। उकारोपि यद्योंकारःस्यात्तर्हि बिन्दुशक्त्यैव, बिन्दुश्च यद्यपि वर्णस्तथापि तत्र स्वरस्याधिक्यम्, स्वरश्च वर्णापेक्षया बलवानेव। कथं? तत्र ध्वनिभागस्याधिक्यात्, ध्वनिश्च नाथरूपमेवातो नाथध्यानं बलिष्ठमित्युक्तम्। तदुक्तं योगशास्त्रे—

---

१. शिष्यस्येत्यर्थं।
२. [ ] अयमंशो नास्ति पूर्वं सस्करणे।
३. गुरोरित्यर्थ.।

टिप्पणी—न तेन—न (तो) सुयोधन द्वारा । क्वचित्—कुत्रापि, कहीं भी । सज्य धनु.—प्रत्यञ्चा या डोरी चढा हुआ धनुष् । ज्या का तात्पर्य है धनुष् की डोरी—'ज्यया मौर्व्या सह इति सज्यम्' (बहुव्रीहिः) तृतीयान्त शब्द के साथ तुल्ययोग होने पर 'सह' का बहुव्रीहि-समास होता है । सूत्र है—'तेन सहेति तुल्ययोगे ।' इस नियम से 'सज्यम्' मे बहुव्रीहि समास हुआ । समस्तपद मे 'सह' के स्थान पर 'स' आदेश हो गया है–'वोपसर्जनस्य' नियम से । 'मौर्वी ज्या शिञ्जिनी गुण.' इत्यमरः । सज्य 'धनुः' का विशेषण है–'धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इत्यमर. । उद्यतम्—ऊर्ध्वीकृतम् उत्तोलितम् अर्थात् उठाया गया । उद् + यम् + क्त कर्मणि । न वा—अथवा न ही । आननम्—वदनम्, मुख को । 'वक्त्रास्ये वदन तुण्डमानन लपन मुखम्' इत्यमर. । कोपविजिह्मम्—कोपेन कुटिलम् अर्थात् क्रोधवश विकृत । जिह्म का अर्थ है कुटिल (जिह्मस्तु कुटिल मन्दे–इतिकोशः) कोपेन (कुप् घञ्भावे + टा) विजिह्मम् (विशेषेण जिह्म = विजिह्मम् प्रादितत्पुरुष) इति कोपविजिह्मम् (तृतीया तत्पु०) । कृतम्—किया गया । गुणानुरागेण — दयादाक्षिण्यादिप्रेम्णा । सुयोधन के गुणो के प्रति अनुरागभाव होने के कारण । गुणेषु अनुराग. इति गुणानुराग तेन, हेतौ तृतीया (सप्तमी तत्पु०) । माला के पक्ष मे गुणानुराग का तात्पर्य होगा–गुण अर्थात् सूत्र मे अनुषङ्ग (प्रवेश) होने के कारण अथवा सौरभ्यगुण के अनुराग (लोभ) वश । नराधिपै:—भूपालैः राजाओं द्वारा । अस्य शासनम्--सुयोधनस्य आज्ञा । शासन (शास्+ल्युट् भावे) का अर्थ है आज्ञा, नियोग । सुयोधन की आज्ञा । माल्यमिव-मालेव माला की भाँति । माला एव माल्यम् (माला+ष्यञ् स्वार्थे) जैसे चातुर्वर्ण्य शब्द 'चतुर्वर्ण' के ही अर्थ मे ष्यञ् प्रत्यय से निष्पन्न होता है, ठीक वैसे ही 'माल्यम्' मे भी ष्यञ प्रत्यय स्वार्थ मे है–'चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्' । शिरोभिरुह्यते-शीर्षै धार्यते । अर्थात् सिर-माथे लगाई जाती है (वह + लट् = त कर्मणि) ।

'माल्यम् इव' अश मे 'इव' साधर्म्य (साम्य) प्रस्तुत करता है—माल्य तथा शासन के बीच । अतएव प्रस्तुत पद्य मे उपमालङ्कार मान्य है—'साधर्म्यं उपमाभेदे ।'

सम्प्रति अस्य धार्मिकत्वमाह —

स यौवराज्ये नवयौवनोद्धत

निधाय दुःशासनमिद्धशासनः ।

जातः। कथं ? एकैकगुणलक्षणहीनो ह्रासक्रमेण संभूतं सन्तानमेवेति मन्यते[१]। पथमतो गौणमुख्यप्रक्रिया कथिता। तत्र काचिदुत्पत्तिक्रमतो मुख्या गौणी वा ज्ञेया, काचिच्च फलवृक्षरीत्या मुख्या गौणी वेति ज्ञेयम्।

एकदा श्रीमहासिद्धविचारनाथेन भर्तृहरिनृपेण व्याकरणशास्त्रोपरि लक्ष-संख्याकाः कारिकाः कृता। नागेशेन ताः श्रुताः, तदा प्रसन्नो भूत्वा ब्रह्माण्डे विहरन् समागतो यस्तत्र स्थितो महावधूत आगत्य चादेशादि[२]व्यवहारकरणानन्तरं तेनोक्तम्—हे स्वामिन्नहं तुष्टोस्मि यतः कांचिद्याचनां कुरु, तदा महासिद्धेनोक्तं तव मिलने सुखं जातमन्यत्तु नास्त्यपेक्ष्यं कृतकृत्य एवास्मि, पुनः पुनस्तेन शेषेणोक्तं याचनीयमेवेति। तदा भर्तृहरिणोक्तं किं याचे यदैश्वर्येच्छा भवेत्तत् महाराज्यं त्यक्त्वावधूतो जातः। पुनर्मोक्षस्य यदि वाञ्छा भवेत्, सा तु अवधूतभावे सिद्ध्यत्येव संशयो नास्तीति। तदा शेषोऽसन्तुष्टो भूत्वा ममापमानः कृतो यतः शापं ददामि, भवदीयकारिकाः प्रसिद्धा न भविष्यन्तीति। तदावधूतेनाप्युक्त त्वदीयकृतव्याकरण-शास्त्रं कलौ वृत्त्यर्थं भविष्यति पुनर्यत्र कुत्रापि स्थले ससंशयं भविष्यति तदा मम-कारिकां विना निर्णयो न भविष्यतीति। एवं परस्परं शापो जातस्तेनाधुनिकसमये व्याकरणादिसाधनशास्त्रं परमार्थे न्यूनं भवति चातुर्यादि प्रकारं प्रायशो भवतीति।

आचार आचार इति वदन्ति। य आचारोऽत्याचारः सन् कथं निर्वहति ? भोजने यद्धृतं तत्तु चर्मपात्रेणैवायाति, गमने यत्पादत्राणं तदपि चर्मजमेव स्पृश्यते, शयने स्त्रीसंगो भवति तस्य कथैव का। प्रातःकाले यद्यपि शुद्ध्यर्थं स्नानं क्रियते तथापि चतुर्षु प्रहरेषु करादिकस्य मुखादिस्पर्शनं स्वभावत एव सर्वदा जायते। किं च सूर्यादिग्रहणे मृत्तिकापात्राणि जलं चाशुचित्वेन त्यज्यते न तु धान्यघृतादिकं वस्तु। तदा एवं ज्ञायते जलाशये जलं बहु लभ्यते कुलालानां गृहेषु मृत्पात्राणि चाल्प-व्ययेन लभ्यन्ते, तेन तदशुचित्वं कथं न क्रियते। घृतधान्यादिनिवारणे तु बहुद्रव्य-व्ययो भवेदित्याद्यनेकप्रकारकं किं किं लिख्यते। तस्मादाचारवस्तु कल्पितमेव तद् बुद्धिमन्तो जना न किंचिदपि वस्तु जानन्ति। विचार एव मुख्य इति सिद्धान्तः। तत्र चैवं न ज्ञेयमत्र सिद्धान्त आचारो नास्तीति। कथं ? आचारोऽस्माकं मते वर्त्तते, स च विचारपूर्वक इति। अन्य आचारं कुर्वन्ति तादृशस्तु क्रियत एव। नास्ति, यथायोग्यस्तु क्रियते च स चापि गौणं मत्वा क्रियते मुख्यस्तु तत्त्वविचार इति कृत्वायमपि व्यवहारः सर्वथा त्याज्यो नास्तीति।

आचारविधिः—

प्रातरुत्थाय गुरुस्मरणं कृत्वा अकालं स्मृत्वा शौचादिक्रियां दन्तधावनं स्नानं च कृत्वा नाथालये गत्वा पूजा कर्त्तव्या, पूजानन्तरं भोजनं कर्तव्य, सायंकाले च

१. मन्ये—पू० सं०। २. च देशादि—पू० स०।

(युवराज + ष्यञ् कर्मणि), तस्मिन् । युवराज शब्द ब्राह्मणादि गण मे पठित है, अत ष्यञ् प्रत्यय यहाँ 'गुणवचनब्राह्मणादिभ्य कर्मणि च' सूत्र से प्रयुक्त हुआ है। निधाय—नियुज्य, नियुक्त करके (नि + धा ल्यप्) । पुरोधसा—पुरोहित द्वारा। धार्मिक कार्यों मे अग्रेसर अथवा पुरोगामी जो हो वही पुरोधा या पुरोहित है—पुर धत्ते धीयते वा इति पुरोधा. (पुरस् + धा + असि कर्त्तरि कर्मणि वा) तेन पुरोधसा । 'पुरोधास्तु पुरोहित ' इत्यमरः (अनुक्ते कर्त्तरि तृतीया) । अनुमत - अनुज्ञात , अर्थात् अनुमोदित होकर, समर्थित होकर (अनु + मन् क्त कर्मणि) । अखिन्नः—अनलस , आलस्य अथवा श्रान्ति-विहीन होकर, अर्थात् सोत्साह । न खिन्नः (खिद् + क्त कर्त्तरि) इति अखिन्नः (नञ् तत्पु०) । मखेषु--क्रतुषु, यज्ञो मे । अमरकाषे—'यज्ञ सवोऽध्वरो याग सप्ततन्तुर्मख क्रतु.' । हव्यन--हविषा, पुरोडाशादि हवन सामग्री द्वारा । जिसका अग्नि मे हवन (दान) किया जाय वही हव्य है--हूयते भक्ष्यत्वेन दीयते इति हव्यम (हु + यत् कर्मणि), तेन । करणे तृतीया । हिरण्यरेतसम् —अनलम् । अग्निदेव को । हिरण्य अथवा स्वर्ण ही जिसका रेतस् हो वह । हिरण्य रेतो यस्य स. हिरण्यरेता , (बहु०) तम् अग्निम् । 'हिरण्यरेता हुतभुग्दहनो हव्यवाहन ' इत्यमर । धिनोति—प्रीणयति । प्रसन्न करता है (धिवि = धिन्व + लट् प्रथमपुरुष एकवचन)

धकार,शकार एव हकार की आवृत्तिवश अनुप्रास अलङ्कार द्रष्टव्य है । 'वर्णसाम्यमनुप्रासः' आदि लक्षण ।

स चेत् तादृश. उद्योगी तर्हि अस्माभिर्निरुद्योगैर्भाव्यमितिराशङ्क्य उद्योगाशा दर्शयति :—

प्रलीनभूपालमपि स्थिरायति,
प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यती-
रहो दुरन्ता बलवद्विरोधिता ।।२३।।

प्रलीनेति । स दुर्योधनः प्रलीनभूपालम् नि.सपत्नमित्यर्थ । स्थिरायति चिरस्थायीत्यर्थ. । भुवो मण्डलम् आवारिधेभ्य आवारिधि 'आङ् मर्यादाभिविध्यो इत्यव्ययोभाव । प्रशासदाशासयन्नपि । 'अभ्यस्तादय षट्' इत्यभ्यस्तसंज्ञा । 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेध । त्वत्त एष्यतीरागमिष्यतीः । धातूनामनेकार्थत्वादुक्तार्थसिद्धि. । अथवाङ्पूर्व. पाठ । 'एत्येधत्यूठ्सु' इति वृद्धि. । 'लृट. सद्वा' इति शतृप्रत्ययः । 'उगितश्च' इति ङीप् । 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभाव·

येन च प्रणवयोगेन स्वरूपानुभवः प्रकटितः सोऽप्रकटः कृतः। अध्यारोपापवादादि-प्रकारेण यद्मायिकवस्तु तत्र मिथ्याकल्पना बहुविधानेन कृता, मिथ्यैवाश्वो मिथ्यैवाश्ववारो मिथ्यैव धावनमिति किं प्रलप्यते। पङ्के हस्तनिमज्जनकरणानन्तरं पुनः प्रक्षाल्यते ततस्तु प्रथमं तत्र हस्तनिमज्जनमेव किमर्थमिति योगिनां सिद्धान्तो विस्मृत एव। एकदेवस्तुतावन्यदेवनिन्दा एकनिन्दायां चान्यदेवस्तुतिरित्यनया रीत्या धर्मोऽपि प्रवर्त्तित। स चान्योन्यविरुद्धस्तेन सर्वे जीवा भ्रमन्तः सन्तो बन्धकारका भवन्ति। तदुक्तं नाथसूत्रे—ब्राह्मणे वेदाः प्रवृत्ताः, न्यासिनि तीर्थानि प्रवृत्तानि न कोऽपि निर्वाणभावं प्राप्त इति। कथं सूक्ष्मप्राप्त्यर्थं तु एकाक्षरः प्रणवः सूक्ष्मवेद एव कृतः। पुन. सूक्ष्मैवाक्षरद्वयात्मिका गायत्री कृता। पुन' साकारः सन्नपि साकारत्वाभिमानराहित्येन निराकारतुल्यमेव सूक्ष्मं[1] नाथरूपं कृतवान्। तेनोपदेशः सूक्ष्म एव योगाभ्यासयोगः कृतः। तदुद्धारकः सूक्ष्म एवावधूतः कृतः। अथ मायाशबलस्थूलब्रह्मप्राप्त्यर्थमेकाक्षराद्वेदादनेकाक्षराः स्थूला वेदाः[2] कृता.। अक्षरद्वयात्मिकागायत्र्याश्चतुर्विंशत्यक्षरा गायत्री कृता। योगात् स्मृतिपुराणादीन्यनेकशास्त्राणि कृतानि, तदुद्धारका ब्राह्मणाः परमहंसादय इतर संसारिणोऽपि कृताः।

नाथसूत्रे—

एकवारं वचनं लुप्यते तेन युगे युगे लुप्यत इतिहेतोर्गुरुवचनं कदापि काले न लोपनीयं कर्तव्यमेव, ये पुरुषा अभ्यासहीना अभिमानेन सभायां यस्य कस्यापि देवस्य धर्मस्य वा पक्षं गृह्णन्ति। स पक्षः स्वार्थे त्यज्यते, तादृशः कथ मोक्षभाग्भवेत्। तादृशाश्च सद्गुरुभिरपि कथमङ्गीकरिष्यन्ते तेषामिष्टदेवोऽपि चाप्रसन्नो भवेत्, केनचित्कथ्यतेऽहं स्मार्तोऽहं वैष्णवोऽहं यः कश्चिद्। यदा मया कथ्यते त्वं स्मार्तोऽसि तर्हि स्मृत्युक्ताचरणं सर्वमपि त्वयि वर्तते ? तदा स कथयति सर्वाचरणं तु नास्ति, यदा मया कथ्यते स्मार्तोऽहमिति कथनमेवाचरणं तु नास्ति यतस्तद्धर्मानाचरणेन प्रत्यवायो न स्यात् पुनः मिथ्यादोषश्च न स्यात् तदा स कथयति अहं स्मार्तो नास्मि। यदा पुनर्मया कथ्यते स्मार्त्तकुलोत्पन्नः स्मार्तधर्मा न भवेत्तर्हि धर्मविरुद्धत्वमापतेदिति। तदा स कथयति यत्प्रारब्धं तत्तादृशोऽहम्। यदा मया कथ्यते प्रारब्धे श्रद्धास्थैर्यमागृह्णाति। कथं ? प्राणिनां यत्प्रारब्धं तथैव भवेत्, परन्तु प्रथमकथने तत्र धैर्यं नायाति, कस्यापि प्रारब्धं कूपे पतनं भविष्यतीतिरूपं, स चाज्ञतया पततु नाम परन्तु यदा ज्ञायते तदा तु तस्य निवृत्तेरिवोपायं करिष्यतीति। तेन हेतुना त्वदुक्तं यादृक् प्रारब्धं तादृशोऽहमस्मीति यत्तन्न भवत्येव। तदा स पुनः कथयति-यद्गुरुराज्ञापयति तत्करोमीति, यदा मया कथ्यते गुरुरुत्तमाधिकारी त्वं तु मन्दाधिकारी, गुरुवाक्ये तव विश्वासः स्यादिति तदा तेन नोक्तमितिरीत्या बहुधालापे किमपि चिह्नं वर्णरूपमाश्रमरूपं वा स्त्रीरूपं पुंरूपं वा नयतेऽव्यक्तलिङ्गत्वमत्या-

---

१. 'सूक्ष्म' इति नास्ति—पू० स०। २. स्थूलवेदा—पू० सं०।

श्रमित्वमेव स्थीयते, यतः किमर्थमसत्ये वस्तुनि कल्पना क्रियते महासत्यस्वरूपमेकमवधूतत्वमेव गृह्णीयादिति। पुनरपि सर्वाचरणं[1] नास्ति तदा स्मार्तोऽहमिति कथं कथ्यते, तदा स कथयति कश्चन स्मार्तो धर्मो मयि वर्त्तते, तदा मया कथ्यते कश्चन स्मार्त्तो धर्मस्तर्हि कश्चनान्यः कस्य धर्मस्तदा स कथयति—कश्चन मनोनुकूल एव धर्मस्तदा मया कथ्यते तव मनोनुकूलो भवतु नाम धर्मः परन्तु कस्यापि तु धर्म एव स भविष्यति, तथा च धर्मसकरोसीति। तदा स कथयति नाहं स्मार्त्तः। तदा मया कथ्यते स्मार्तकुलोत्पन्नत्वेन च यदि स्मार्तो न भविष्यति तर्हि समस्तमेव धर्मं भ्रष्टं भविष्यतीति, स कथयति तात्पर्यमिदमिदं कर्म ईदृशं वर्त्तते यत्तद्वत्रमिति, तदा-तत्करणं विना किं भवेत्। केवलज्ञानेन कथं सिद्धिः। ज्ञानमपि कर्मैव वर्त्तते अन्तःकरणस्य धर्मत्वात्तत्रापि करणं वर्त्तते एवेति।

द्वैतवादिनः कथयन्ति—अस्माभिः किं प्रेरकं प्रति कथ्यते द्वैतमिति नास्तीति, सत्यद्वैत एव परन्तु द्वैतं शरीरं, यतः शरीर-शरीरिभावेन सोऽपि द्वैत एवास्ति, इति कथ्यते। अद्वैतवादिनश्च किं कथयन्ति-अद्वैतमेवास्ति यच्छरीरं द्वैतं दृश्यते तत्तु मिथ्यैवेति। महासिद्धाः कथयन्ति-चैतन्य जडञ्च शरीरादि उभयमपि मिलित्वा एकमेव पूर्णं वस्तु, यतः परमाद्वैतं यत्किमपि नाथतेजस्तच्चक्रवर्त्ति सर्वोपरि वर्तते। केचित्कथयन्ति-ज्ञानिनो ज्ञानं निरपेक्षमेव कर्मणोऽपेक्षां पूर्वकालेऽपि न करोति तत्तु नास्त्येव। भवदीयमतानि सर्वाण्यपि शास्त्राण्यूर्द्ध्वबाहुतयैवमेव वदन्ति-कर्मणा चित्तशुद्धिः स्यादनन्तरं तत्त्यागस्त्यागाच्च ज्ञानप्राप्तिर्ज्ञानान्मुक्तिरियं घण्टाघोषवद्विद्यत इति।

गृहकर्म समासक्तमहं ब्रह्मेति वादिनम्।
कर्म-ब्रह्मोभयभ्रष्टं तं त्यज्येदन्त्यजं यथा इति॥

तदा कर्मनिरपेक्षं ज्ञानं कथं जातम्। सहस्रावधिस्थले त्वेवमेव कथितम् यदेकेन शाङ्करभाष्ये एकस्मिन् स्थले लिखनेन कथमप्रमाणं भविष्यतीति। वेदा गृहस्थधर्मं वर्णयन्ति तस्य रीतिर्मया कथ्यते। गार्हस्थ्यं विना स्त्रियं तु प्रवर्त्तत एव नहि, स्त्रीमूलकत्वादेव गार्हस्थ्यस्येति। पुनः कथ्यते मासे मासे रात्रित्रयमार्तवं तत्र सन्तानार्थमृतुदानं देयमन्यच्च सुखाय विषयसंभोगो न सेव्य इत्यपि तेषामुपदेश इति। यद्येवं तर्हि प्रथमं गृहे वासकरणं तत्राहारादिसेवनं तेन च शरीरे पुष्टिस्तत्क्रमेण शरीरे कामोद्रेकाभवनं नास्ति कदाचित्स्वशरीरं वशे क्रियते। तथापि तावत् स्त्रियाश्चित्तं तु विनाकामोपभोगं क्षणमपि न तुष्टं भवेत्। कथं तासां काम एवेष्टस्ततश्च तस्याः पोषणं विना तच्चित्ते व्यभिचार एव वसति। तेन पापेन सर्वं नष्टमेव भवेत्, लोके चोपहासो भवेत्। अतः कारणात् महासिद्धा गार्हस्थ्यं न कुर्वन्ति। सिद्धानामिष्टो नाथः, सोपि स्त्रियं नाङ्गीचकार। सर्वे ब्रह्मविष्णुरुद्रादयो देवाः शेषादयो नागा

१. सर्ववर्ण—पू० सं०।

मन्वादयो नरा अन्ये च पशुपक्षिणो यावज्जीवं सर्वे स्त्रीजिताः,एको नाथ एव मायाजेता। तदुक्तं महासिद्धश्रीविचारनाथेन भर्तृहरिणा—

शंभुस्वयम्भुहरयो हरिणेक्षणानां येनाक्रियन्त सततं गृहकर्मदासाः ॥
वाचामगोरचरित्रपवित्रिताय तस्मै नमो भगवते मकरध्वजाय ॥
(शृङ्गार शतक १)

अतः कारणाद् यदा गार्हस्थ्यं कृतं तदा स्त्रीपोषणमवश्यमेव कर्तव्यं यदा च विरागेच्छा तदात्ववधूतेनैव भाव्यमिति। परमहंसास्तु काम निषेधयन्ति स निषेधो न भवत्येव कथम् ?

तदुक्तं श्री मीननाथेन—

हरकोपानलेनैव भस्मीभूतः कृतः स्मरः।
अर्धगौरीशरीरो हि तेन तस्मै नमोस्तु ते ॥

अतो महासिद्धा विपयरीत्या तु त्यागमेव कुर्वन्ति। पुनः प्रकृतिरपि ब्रह्मैव वर्त्तते शिवशक्त्योरस्माकं मते ऐक्यमेव वर्त्तते। तदुक्तं—सिद्धसिद्धान्तपद्धतौ—

शिवस्याभ्यन्तरे शक्तिः शक्तेरभ्यन्तरे शिवः ॥
अन्तरं नैव जानीयाच्चन्द्रचन्द्रिकयोरिव ॥ (सि० ४।२६)
प्रसरं भाषयेच्छक्तिः संकोचं भासयेच्छिवः ॥
तयोर्योगस्य कर्त्ता यः स भवत्सिद्धयोगिराट् ॥ (सि० ६।६३)

एवं त ऐक्यं ज्ञात्वा काममपि भजन्त्येव। अत एवोक्तम्—

'क्वचिद्भोगी क्वचित्यागी' इत्यादि। त्यागिनामपेक्षया त्याग एव एतादृश एतैः क्रियते, यादृशस्त्यागिनामपि न भवेत्। कथं ? कर्मराहित्योपरि तु त्यागो नास्ति तदैतैः प्रारब्धमपि त्यज्यते। शून्ये लग्नैः प्रारब्धमपि त्यज्यते। यदा च भोगं कुर्वन्ति तदा संसारिणोऽपि यादृशं न कुर्वन्ति तादृशमेते कुर्वन्ति। कथं प्रकृतिलग्नाः एतदुभयं मिलित्वा पूर्णे लग्ना अतस्तेषां रीतिर्विलक्षणैव। भोगिभिस्तु भोग एवैकः क्रियते तेषां त्यागो न भवति।[१] [भोगिनां त्वेको भोग एव भवति न तु ते त्यागे समर्थाः।] पुनस्त्यागिनो ये भवन्ति तैः प्रथममेव त्यागः कृतोऽत एव त्यागिन इति येषां नाम तैः पुनर्भोगः कथं क्रियेत। करणे च सर्वमेव नष्टं स्यादिति। अथ चावधूतास्त्यागिनामपि लोके त्यागस्याधिक्यं दृष्टिगोचरं कृत्वा पुनः स्वेच्छया भोगमपि कदाचित्कुर्वन्ति तथापि तेषां भोगो बाधको न भवेत्। भोगिनो भोगमेव कुर्वन्त्येवं त्यागिनस्त्यागमेवेत्यवधूतानां तु त्यागभोगयोर्द्वयोरपि पदार्थयोः सामर्थ्यम्। त्यागं कया रीत्या कुर्वन्ति ? युगपर्यन्तमप्याहारादिकं न गृह्णन्त्येवं त्यागिनां न भवति।

---

१ [ ] नास्ति—पू० स०।

कथं ? ते देहेन विजिता एते तु देहाधीना सन्ति यत इति दिक्। अनया रीत्या-परमार्थस्तु प्रथममेव नष्टः। कथं ? यदा स्त्री गृहीता, पश्चादयं लोको नष्टः। कदा ? यदा स्त्रीग्रहणेन गार्हस्थं जातम् , तत्र च गृहस्थरीत्या प्रवृत्तो न। एवं च द्वावपि लोकौ नष्टौ, भोगोऽपि नास्ति मुक्तिरपि नास्ति। चञ्चलेन मनसा सर्वमपि नष्टीकृतम्। कथ गार्हस्थ्य त्यक्त्वा श्रमान्तरं गृह्णाति। तत्रापि पुनः श्रमेण कातरो भूत्वा दुःखेन सीदन्सन् प्रारब्धाङ्गीकारात् यद्यद्यथा प्रारब्धं तत्तत्सर्वमपि कर्म करोति, तदा कर्मणः साकुरत्वादेव कदापि काले मुक्तिभाग् न भवत्येव। यथा ग्रामे गर्द्दभा वने वा शूकरास्तथा विषयवशो वारं वारं जन्मादि गृह्णाति। पुनश्चञ्चलेन मनसा युक्तो हस्ती ग्रामाद्वनं गच्छति, किंचित् सुखं मे भविष्यतीति, वनात् शृगालो ग्राममागच्छति मृतकास्थ्यादिभक्षणार्थमिति निर्देशः इति। यथा राजस्त्रीगणोऽनेको स्वयन्तु राजा एक एव, स तासां समस्तानां कामवृत्तिं पूर्णां कथं कुर्यात्। स्वचित्तप्रसादेनैव यथेच्छं क्रीड़ति नाम यतस्तासां तु महत्तरं दुःखमेव स्यात् तेन दुःखजनितापध्यानेन राज्ञोऽकल्याणमेव भवेत्। अत एवोक्तं राज्यान्ते नरक इति। तथैवैतादृश एवाचार्य एक एव शिष्यास्तु बहवः कृतास्तेपु कस्य कस्य पापं संहरेत्। पापहरणासमर्थो बहूनां शिष्याणां पापेनाचार्योऽपि दुर्गतिमेव प्राप्नुयात्। तदुक्त सिद्धसिद्धान्तपद्धतौ आचार्या बहुदीक्षिता इत्यादि, ते तत्त्वतो वञ्चिता इत्यन्तम्। यदा तत्त्वतो वञ्चितास्तदा मुख्य ··· ·· नरकभाज एवेत्यर्थादागतम्। अतो हेतोर्बहुशिष्यकरण सिद्धानां मते वर्जितम्।

षट् पदार्थाः यत्र भवन्ति स भगवान्। के ते षट् पदार्थाः ? अमी—समग्रैश्वर्यं १ धर्म २ यशः ३ श्रीः ४ ज्ञानं ५ वैराग्यम् ६, इत्येषां मध्य एकोपि रुद्रविष्णवादिना भगवत्पदवाच्येषु न। प्रथमं तु समग्रमैश्वर्यं योगरूपं तदेव नास्ति, कथं ? सर्वं कामवशा स्त्रीसंगिनो यान् लोकाः योगिनो कथयन्ति तेषां स्त्रीसंग एतत्तु हास्यमेव। पुनः धर्मं यत्र यत्र स्थले छलः क्रियते तदा धर्मभाव· कथं ? छलस्तु नारदस्य वानरमुखकरणादिना विष्णोः प्रसिद्धमेवेति। पुनः यशस्तदपि कथं रावणवधे लोककल्याणे यशो जातं तथैव स्त्रीहरणेऽपयशोऽपि जातम्। कथ ? रावणस्य पामरस्य वधेन किं तस्य बालिवानरेण बन्धनं कृतं, सहस्रबाहुनार्जुनेन च बन्धनं कृतं, पुनः रामस्तु भगवानिति कथ्यते, जगत्कर्त्ता च कथ्यते, तस्य स्त्रीहरणमेतत्तु महदयशः। पुनः श्रीः यस्य परमार्थे मुक्तिर्नास्ति ऐहिके च यशो नास्ति तस्य श्रीः कथम्। पुनः ज्ञानं यदा ज्ञानस्वरूपास्ते तदा अज्ञानकार्ये संसारकार्ये किमर्थं प्रवृत्तास्ततो ज्ञानं कथम्। पुनः वैराग्यं तत्तु सर्वथैवैतत् कल्पितेष्वीश्वरेषु नैव नैवेति। कथं ? पुराणे एतेषां लौकिकया त्वेवमायास्यति तत्तु वक्तुमशक्यं दास्यां वेश्यायामासक्ता इत्यादि किं किं लिख्यते। तदा वैराग्यं कुत्र ? अतः कारणात् षडेव पदार्था नाथेष्वत एव तिष्ठन्ति। समग्रैश्वर्यं तु योगः, स तु सहजसिद्ध एव। पुनः धर्मोऽपि स

एव यो मुक्तिरूपः, एतद्व्यतिरिक्तस्मृत्यादिशास्त्राणि यं धर्मं वर्णयन्ति स त्वधर्म एव। पुनः यशोऽपि यो मुक्तरूपस्तस्यैव बन्धनरूपस्य कथं यशः। पुनः श्रीः शोभापि तस्यैव यो मुक्तो बन्धरूपस्य छविः कथं भवेत् यो लौकिकसुखदुःखे मग्नः। ज्ञानं तस्यैव ज्ञानं पुनः वैराग्यं तस्यैव वैराग्यमेवं च सर्वेषामाधारो नाथ एवातः कारणान्महासिद्धानां तात्पर्यं नाथपरमेवेति। कोऽपि कथयति–किं नाथ एव मुक्तिरूप एते ईश्वरा मुक्ता न सन्ति ? तत्तु प्रथममेवोक्तं ये स्त्रीसंयुक्ताः संसारकार्ये चासक्तास्ते कथं मुक्तरूपा इत्यत एवाग्रे एतेषां मुक्तिबन्धरूपत्वं कथयिष्यते। भगवच्छब्द-निर्णयोऽपि करिष्यते।

अस्माकं मते शक्तिः सृष्टिं करोति, शिवः पालनं करोति, कालः संहरति, नाथो मुक्तिं ददाति। ब्रह्मविष्ण्वोस्तु शिवशक्तिकालानामवान्तरभेदेन कर्तृत्वादि-शक्तिर्न तु स्वसत्तया। यदा शिवादयः संसारप्रवर्त्तका जातास्तदा बन्धरूपा एव भूताः। कथं ? जीवरूपेण बन्ध ईश्वररूपेणापि बन्धनं ददाति[1] भेदोऽतएव जीवात्मा परमात्मेति, परन्तु शुद्ध आत्मा नास्ति, स तु शुद्ध आत्मा नाथ एव। एते संसारमज्ञानं प्रवर्त्तयन्ति। नाथस्त्वज्ञानं निवर्त्तयति। नाथरूपेण सृष्टि-करण उपेक्षा। आचार्याणां तु खण्डेषु पाण्डित्यं वर्त्तते पूर्णो धर्मो नास्ति। संसार-प्रवृत्तिकरणरूपं वस्तु चैकं पूर्णो धर्मो न तु मोक्षधर्मो यथा राज्ञामेकं स्वार्थसम्पादकत्वमेव पूर्णं नत्वन्ये धर्माः। धर्माश्च ते के इति ? यज्ञो वैराग्यं तपस्तीर्थं व्रतं त्यागो ज्ञानं योग इत्यादयः, शौर्यमौदार्यं पुण्यं यशोभिलाषः शस्त्रधारणमित्यादयः। ब्रह्मचर्य्यं गृहीतं पुनर्गार्हस्थ्यं करोति पुनर्गार्हस्थ्यं किंचित्संसेव्य त्यागं करोत्यत एतदन्तरे यद्धर्मरहितत्वेन कालो जातस्तत्र धर्मो न्यून एव जायते तथाह्युपदिशति।

द्वैतवादिनः क्रियावद्ब्रह्मेति[2] कथयन्ति, अद्वैतवादिनो निष्क्रियं तदिति कथयन्ति तत्तु द्वयमपि निरन्तरं न भवति चाक्षरं न भवति [3][निश्चलं न भवति]। कथं सर्वदा क्रियैव न भवति सर्वदा ह्यक्रियैव च न भवति, यूयं वयं चापि गृहेषु प्रातःकालादौ स्नानभोजनादिक्रियां कुर्मो मध्याह्नादावक्रियावसरे स्वस्वचित्तेऽक्रियतयैव स्थीयते, पुन. कार्यावसरे क्रियाकरणमेव भवेत्। तथैवेश्वरोऽपि। क्रियाक्रिये द्वेऽपि शक्ती तत्स्थ एव। निरन्तरं निश्चलमक्षरं भवति न तु एकदिशा ब्रह्म पूर्णं भवति। तदुक्त-मवधूतगीतायाम्—

"अखण्डं यत्स्वाज्ञानेन खण्डयतीति। तदुक्तम् "अखण्डं खण्ड्यते कथम् ?" (अ० गी० १।१२)

अतो द्वैतवादिनां कैलासवैकुण्ठादिस्थानमद्वैतवादिनां मायाशबलं ब्रह्म च बन्धमुक्तिरहितपरमसिद्धान्तवादिनां योगिनां नित्यपिण्डावधूतानां तु

---

१. दत्तम्–पू०सं०। २. क्रिया ब्रह्मेति–पू० स०।

३. [ ] नास्ति–पू० स०।

स्थानं, बन्धमननानन्तर मुक्तिभवनादिति। योगिनां तु निर्गुणस्थानमथ निर्गुणसगुणातीतमद्वैतोपरिवर्ति यत्सर्वोपरिवर्त्त्येव स्थानं परमहंसाः कथयन्ति। अस्मदीयं निर्गुणस्थानं तत्त कथनमात्रमेव। कथं ? एते तु निर्गुणब्रह्मणि अमायिकब्रह्मणि[1]मायाया गुणानां च स्थापनं कुर्वन्ति पुनर्नानाप्रकारेण सृष्टिक्रियादि तत्रारोपयन्ति, अनेकस्तोत्रैः स्तुवन्ति च। तथा च तत्कथं निर्गुणममायिकं च जातम्? माहात्म्यार्थं स्वप्रशंसार्थं च कथने निर्गुणं ब्रह्म लक्ष्यं कथयन्ति नत्वाचरणे तद् दृश्यते। पुनः कथने निर्गुणं ब्रह्म इष्ट तथापि पूर्णता न भवति, यथा योगिनामिष्टे वर्त्तते तया रीत्या। कथं ? प्रथमं तु ब्रह्मशब्दस्य व्युत्पत्तिकरणमव स्थगितम्। ब्रह्म तु व्यापकं तन्निर्गुणं ब्रह्म सर्वव्यापकं न भवति कथं चैतन्यरूपेणैतद् व्यापकं कथ्यते तदा पञ्चभूतेषु व्यापकम्। पुनः निर्गुणं तु शक्तिरहितमेव। तदा व्यापकधर्म एव कथं कथ्यते। एतद्रीत्या निर्गुणमेव ब्रह्मेव द्वयमपि परात्परं ब्रह्म न भवति, तस्मात् परमहंसापेक्षयाप्यवधूता उत्तमाः। कथं ? परात्परः पूर्णो नाथो लक्ष्य इति।

अद्वैतोपरिवर्तिनिराकारसाकारातीतनाथात् निराकारज्योतिर्नाथो जातस्ततः साकारनाथो जातस्तदिच्छया सदाशिवो भैरवो जातस्ततश्च शक्तिर्भैरवी च जाता, तस्माद्विष्णुर्जातस्तस्माद् ब्रह्मा जातस्तेन सर्वा सृष्टिरुत्पन्ना। नाथाद् द्विप्रकारा सृष्टिर्जाता–नादरूपा बिन्दुरूपा च। नादरूपा शिष्यक्रमेण बिन्दुरूपा च पुत्रक्रमेण। नादान्नवनाथा जाताः, बिन्दुतः सदाशिवो भैरवो जातः। पुनः शब्दसृष्टिप्रकारमाह–एका सूक्ष्मरूपिणी द्वितीया स्थूलरूपिणी। सूक्ष्मरूपिणी प्रणवो महागायत्री योगशास्त्रमिति। स्थूलरूपिणी ब्रह्मगायत्री वेदत्रयीति। पुनः योगशास्त्रतस्तन्त्रशास्त्रं जातम्। वेदात्स्मृत्यादिशास्त्रं जातम्। पुनः नवनाथानां पश्चाद् द्वादशसिद्धाश्चतुरशीतिश्च, द्वादशपन्थानोऽनन्तसिद्धाश्च जाताः। सदाशिवभैरवाद्विष्णुर्ब्रह्मासूर्य्यश्चन्द्रइन्द्रादिदेवता जाताः। पुनः योगात् शेषयोगसांख्ययोगादयोऽनेकयोगा अनेकभेदैर्जातास्तेन यागेन ज्योतिषन्यायादिकं शास्त्रं श्रुतितः स्मृतिशास्त्रव्याकरणपुराणानेकेतिहासा जाता एवं विग्रहसृष्टिर्निवृत्तिप्रवृत्तिरूपिणी जाता। पुनः नादसृष्टिरपि सूक्ष्मस्थूलरूपिणी प्रकारद्वयात्मिका जाता।

मङ्गलश्लोकानां व्याख्या—

निर्गुणमिति। निर्गुणं ब्रह्म तद् यस्य सर्वोपरिवर्तिनाथस्य वामभागे एकव्यवहारे। वामभागेन कोऽर्थः ? यथेतरं शास्त्रं कथयति। कश्चित् पुरुष ऊर्द्ध्वगतिर्ब्रह्मपदं प्राप्तः तदा कथ्यते निर्गुणस्य सर्वव्यापकस्यैकरूपस्य ऊर्ध्वमध इति।

भागकल्पना कुत्र कस्यां वा दिशि कुतो वा वाग्रचना। तथा च कल्पनां विना व्यवहारो न सिद्धयेत्। तया रीत्या निर्गुणं वामभागे इति। तस्य साक्षात्स्वरूपस्य एकभाग एकव्यवहारे निर्गुणम्। पुनः सव्यभागे अद्भुता निजा च इच्छाशक्तिः

१. अमायि ब्र०–पू० सं०

सर्वसाकारब्रह्मकारणीभूता सव्यभागे एकभागे एकव्यवहार इत्यर्थः। सगुणब्रह्ममूलभूता सा यस्येति। पुनः मध्यभागे सर्वस्याधारो वा सर्वशिरोमणिर्यत्र निर्गुणसगुणमुभयमपि चैक्यं प्राप्नोति सत्यमसत्यं जडं चैतन्यं च सर्वमपि भावजात यत्र साम्यं प्राप्नोति द्वैताद्वैतभेदो यत्र दूरीभवति। यदैताहशः सर्वोपरिवर्त्ती वाङ्मनोगोचरो वाङ्मनोमयश्च द्वैताद्वैतविवर्जितः। पुनः याद्दश एव तादृश एवेति सर्वविलक्षण एवैतादृशो नाथो महासिद्धानां लक्ष्यः पूर्णः स मम श्रियेऽस्तु कल्याणं करोतु। मोक्षमार्गे दक्षभागतो वामभाग उत्तमोऽस्ति तस्माद्वामभागे निर्गुणमुक्तम्। पुनः जीवाः निर्गुणास्तत्त्वरूपा अद्वैतरूपा मुक्तास्ते चरणाग्रे रमन्ते, एतद्द्वये तु व्यावहारिकं दर्शितम्। तत्तु कल्पनामात्रमेवेति, वास्तविकं तु बन्धमुक्तिरहितम् इति। तत्त्वानुभाविकास्ते मुक्ता नाथस्य सर्वपिण्डे रमन्ति इति किं नाथरूपा एव न त्वन्ये। अग्रे उक्तं वामभागे स्थितः शंभुर्यो निर्गुणस्य ब्रह्मणोंऽशरूपः साकारतया संसारकल्याणार्थं जातः स शिवो वामभागे। पुनः मध्यभागे स्वयं पूर्णो निर्गुणसगुणातीतः सर्वशिरोमणिर्नाथस्तस्य यः साकाररूपो नाथो मध्यमभागे स नाथो ज्योतीरूपो मम हृदयान्धकारनिवर्तनं करोतु।

विश्वस्योत्पत्तिं करोति स्वस्याप्युत्पत्तिं कथयति। एवं ब्रह्मण इच्छया पुरुषो जातः स नर इति। तेन तपस्तप्तं, नरशरीराज्जलानि नारा इति जातास्तत्र तेन शयनं कृतं तेन नारायण इति संज्ञको जातः। पुनरस्यैवावान्तररूपाणि रामकृष्णादीनि जातानि तेषामपि रामनवमी जन्माष्टमी इत्यादि जन्मकर्मोत्सवा इति मन्यन्ते तथा च य उत्पत्तिवान् स नाशवान् पुनयत्र लोके गतास्ते पुनरायान्ति। कथं ? जयविजयौ शापादसुरौ जातौ तर्हि तेषां स्थानं निर्भयं कथम् ? अथ च विश्वस्योत्पत्तिकारणमेवोक्तं तनैवं ज्ञायतेऽन्यदेवापेक्षया संसारापेक्षया च सर्वोत्तमः शिव एव, परन्तु स्वस्मात्तु निकृष्ट एवेति कृत्वा मङ्गल तु नाथात्मकमेव कृतम्। आदिनाथो गोरक्षनाथश्चांशांशिभावेन वा स्वयमेक एव, परन्तु व्यवहारार्थमङ्गाङ्गिभावेन सेव्यसेवकभावेन नाथात्मकमेव मङ्गलं कृतम्। तेनैव सूचितं सर्वस्मादुत्तमः शिवः शिवादुत्तमो नाथ इति। योगे देवानामथ च संसारे सर्वोत्तमो नाथ इति संकेतरीत्या। नाथस्योत्पत्तिरेव योगशास्त्रे न[१] कथिता, यतो जन्मकर्मापि न गीयतेऽत एव सिद्धसिद्धान्तपद्धतौ—श्रीगोरक्षनाथेन विश्वस्य कर्तृत्वं शिवस्य लिखितं नाथस्य तु न लिखितम्। कथं ? विश्वकरणे सगुणत्वमायाति, सोपाधीश्वरत्वं चायाति, नाथस्तु निर्गुण एव निरुपाधिरूप एव, तस्य प्राकृतिककार्यकरणेन किं माहात्म्यं किं वा श्रीरिति। यदि पुनः शिव एव मुख्यो देवो भवेत्तर्हि मङ्गलं शिवात्मकं किमर्थं न कृतम्, एवंरीत्या कथनं महासिद्धानां सिद्धान्तो वर्त्तते न तु स्थूलरीत्या। प्रवृत्तिरीत्या कथन

---

१. योगशास्त्रेण—पृ० सं०।

रीतिः। कथमेते तु निर्गुणा ऐश्वर्यं बहुधा गुप्तं कुर्वन्ति, अन्ये त्वैश्वर्यं प्रकटीकुर्वन्ति। अहो अहो विपरीता वार्त्ता तस्याः श्रवणेऽपि ज्ञानेऽपि चाप्रियं भवति। अस्मिन्मते श्रुतिर्न साधिका वेति वार्ता। श्रुतिश्चास्माकं मते साधिका न भवेत्, भवेदपि चेत्तर्हि-मेरुः कम्पते पृथ्वी चलति? आकाशात्सर्वं जायते तत्तु पृथिव्या एव सर्वं जायते पितुः पुत्रो जायते स पिता पुत्राज्जायते चैवं सर्वमपि कार्यं विपरीतरीत्या भवेत्। यत एवं न वक्तव्यं यन्महासिद्धानां तात्पर्यं तदेव श्रुतिर्वक्तुमिच्छतीत्यूद्ध्र्वबाहुर्ध्वनिं चिकीर्षति, परन्तु नानाकर्मनिरूपणात्तत्त्वस्याप्यन्यथा कथनात् सूक्ष्मात्स्थूलरूपनिरूपणात्पातकिनी जाता भाराक्रान्ता च जाता तेन तत्तात्पर्यं वक्तुं न शक्यते। यदि किंचिद् वक्तुं शक्यते तन्महासिद्धानां तात्पर्यमेव वदेत्। या श्रुतिः प्रणवानुसारिणी सा त्वस्माकं मतानुसारिण्येव, या च प्रणवविरोधिनी श्रुतिः कर्मज्ञानप्रतिपादिका साम्माकं मतानुयायिनी मा भवतु नाम, किन्तु सूक्ष्मस्थूलस्य निरूपणम्। प्रथमत उक्तं श्रुतिरस्माक मते साधिका न साधिकेति द्वयमपि न स्यादिति। कथं? तदाह—न साधिका भवेत्तत्त्वेवमस्माकं तु प्रयोजनमेव नास्ति, कथम्? वयन्तु महावेदयोगमाश्रितास्तेन च न कस्याप्यपेक्षां कुर्मः, परन्तु येषां मते स्थूलवेदाः परमपदार्था इति मन्यन्ते ते च यदि साधका न भवेयुस्तदास्माकं मते दूषणारोपणं कुर्वन्ति, यथा स्त्रीजनो मुनीन् प्रति कथयति भो मुने भवान् सकाम[1] इति। एवं कथयन्मुनीनां तु सकामत्वं दूपणमेव परन्तु तस्य त्विष्टमेवेति कृत्वा मनसा तु मुनिस्तुष्यत्येव परंत तदभिप्रायेण यो बाह्यवृत्त्याऽतुष्ट एव भवेत्। कथं? यस्य यदि सङ्गः क्रियते तदा तु तस्योपयुक्तवार्त्ताकरणं विना यो भूषणोऽपि दूपणमारोपयति। यतो हेतोर्न साधिकेत्युक्तं तद्वर्जनं चैतद्रीत्येति। पुनः साधकत्वे को वा दोष इति चेत्, कथ्यते-साधिकेति तु ये कथयन्ति ते पुराणस्मृतिकिंकरा वयं तु स्थूलवेदानां पितृकारणस्य महावेदस्यानुसारिणो योगसिद्धान्तिनस्ते कथं तदाश्रित्य भवेमेति रीत्या साधकत्वमपिवर्जितम्। तत्र कथ्यते तृतीया वार्त्तैव क्रियते तदा कथ्यते पूर्वमप्युक्तमेव वयं तु महावेदयोगानुसारिण इति। अथ च श्रुतिर्यद्वदति तदस्माकं महासिद्धानां यन्मतं तदेव वदति, सकलाया अपि श्रुतेस्तात्पर्यं प्रणवयोगपरमेव तथा च याः श्रुतयः प्रणवानुसारिण्यस्ताः तु योगमेव वदन्ति ये च ये च श्रुत्यनुकूलास्ते ते प्रथममेव प्रयुक्ता इति। पुनः ब्रह्म वेदस्यैकोनविंशतिरुपनिषदो माण्डूक्यक्षुरिकाकैवल्यप्रभृतयः, छान्दोग्यबृहदारण्यमैत्रायण्यादयोऽन्यवेदस्यापि योगपरा एवैतास्तु सर्वाः प्रत्यक्षतः। पुनः, वेदवेदान्तादिः सर्वः परोक्षवादो यतो हेतोस्तात्पर्ये तात्पर्या रक्षति, प्रत्यक्षतः। कथं? तस्य तन्मर्यादा नास्ति यतो हेतोः कर्मोपासनां ज्ञानं च वर्णयति परन्तु क्रमतः सर्वस्य तात्पर्यं योग एवेति।

---

१. अकाम—पू० स०।

कैश्चित्कथ्यते ब्रह्मा विश्वं सृजति विष्णुः पालयति रुद्रः संहरति स त्वनुक्रमो नास्ति, योगस्य त्वनुक्रमो यो वर्त्तते स प्रथममुक्त एव, यदि चैतेषामेवानुक्रमो रक्षितस्तदा त्वयमपि चानुक्रमो व्यतिक्रम एव यदा भवेत्तदा कं वानुक्रमं करिष्यामि। कथं ? 'अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः' इत्यादौ। तेषां मध्ये भोक्ता तु रुद्र एवोक्त स एव बलिष्ठ एतौ तु भोज्यमिति। तथैव रुद्रः संहरतीत्यत्र महाप्राबल्येन नैर्गुण्येन नित्यमुक्तस्वरूपेण च तद्दोषाद्धारको न भवति तदन्यौ तु गुणपर्यवसानौ गुणावधीयत एतत्कार्यकरणं तद्बाधकमेव भवति।

बद्धास्तास्त्वग्रे वक्ष्यन्ते इति। सर्वे सम्प्रदायाः कथयन्ति सहस्रशो ग्रन्था जाता इति, तान्प्रति मया कथ्यते—यदि ममोपदेशो मन्यतां तर्हि सर्वे ग्रन्थाः कूपे निपात्यताम्। कथं? आधुनिकसमये स्वयमपि मुक्ता न भवन्ति तेह्यन्येषां मोक्षोपदेशे कथं समर्था भवेयुर्यतश्चातुर्यार्थमभिमानार्थं च जीविकार्थं च यस्य कस्याप्यभिलाषार्थं यत् शास्त्रं करोति तत्परमार्थिक[1]पुरुषाणामग्रे कथं शोभनीयं भवेत्, तदुक्तं श्रीगोरक्षनाथेन—शिलया किं परपारमित्यादि। अतः कारणादाधुनिका अयुक्तपुरुषास्तैः कृतानि सहस्रशः शास्त्राणि तानि त्याज्यानि, एतच्छास्त्रस्याभिमानो भवद्भिर्नरक्षणीय इति।

शङ्करसम्प्रदाये विद्यारण्यस्त्यागी जातः पश्चाद्वेदभाष्यं कृतं तदनन्तरं काशीं गत्वा कस्यापि पण्डितस्याग्रे स्वकृतभाष्यवार्त्ता कृता, तदा तेन स निन्दितः। कथं त्यागी भूत्वा पुनरपि व्यवहार उद्युक्तः ? तदा पुनः परमहंसेनोक्तम्—मदीयः श्रमस्त्ववलोकनीय इति। यदा पण्डितेन दृष्ट्वाऽशुद्धिबाहुल्यमित्युक्तं तदा परमहंसो विरागो जातः। पुनः कदाचिद्वनभ्रमणे कस्यचित् प्रेतस्य कृपया व्यास[2]मिलनं जातम्। तेन भाष्य कमण्डलौ धृत्वाऽशुद्धिर्दूरीकृता, इति वार्त्ता प्रसिद्धा। पुनः कौमुदीकारो भट्टोजिदीक्षितः, सोऽपि प्रेतत्वं गतः, पुनः वैष्णवसंप्रदाये ताताचार्येणाप्पय्यदीक्षितोपरि कोऽपि अभिचारः संचारितः, सतु तेन शिवभक्तेन शिवस्मरणे कृते तस्यैव मरणाय जातः। एवं यदा, तदा मया कथ्यते यादृशानि प्रेतरूपै प्रेतप्रसादाभिलाषिभिः पुरुषैः कृतानि शास्त्राणि मोक्षाय कथं भवेयुरित्यतः कारणात् महासिद्धानां मते विद्याभ्यासेन कोपि ग्रन्थं न करोति किंतु योगाभ्यासेन सिद्धो भूत्वा सिद्धत्वेन च शास्त्रं करोति, स स्वयमपि मुक्तोऽन्येषामपि मुक्तिं ददातीति सिद्धान्त इति। ग्रन्थस्य प्रकरणबन्धनमादिरन्तोऽपि च न क्रियते। कथम् ? इयमप्याशैव भवति नियमश्च भवति ज्ञाने तु क्षणस्यापि नास्ति तर्हि एतावत् सङ्कल्पः क्रियेत तस्याप्यहंकारविलसितत्वात्तद्रूपमपि कर्मैव लग्नं भवेत्। पुनः क्षणेन मरणे सत्यन्यत्कार्यं, तावन्मात्रस्तु बन्धो जात एव यस्माद्यत

---

१. धर्मार्थि–पू० सं०। २. 'व्यास' इति नास्ति–पू० स०।

आरम्भः कृतः स एवादिर्यन्नकृतं तत्रैव समाप्तिः । स्वतन्त्राणां पुरुषाणां क्षणमात्रमपि बन्धनं प्रियं न भवेत् । पुनः संस्कृतो वर्त्तते । सोऽप्यघटितपदार्थस्तु नास्ति सर्वव्यापकोऽपि नास्ति । कथं ? स्वभावकर्मापि नास्ति । तदा शिष्यते तदायाति । पुनः यश्च शब्दः सोऽघटितोऽस्ति, विनापि शिक्षां यत आयाति ंभेद् व्यापको नास्ति यत्परात्परमघटितस्वरूपं तथैव तदंश एष शब्द एवादिघटितो दृश्यते स एव ग्राह्य इति । अतः कारणादेव श्रीनाथेन शब्दमयी गिरेतिकृत्वा सर्वाभिरपि गिराभि सर्वाणि शास्त्राणि कृतानि, सा च संस्कृतप्राकृतनागरमागधीभाषाभिरथ च यवन-भाषापर्यन्ताभिरपि यत एतेन व्यवहारे तु सर्वज्ञत्वं सूचितं सिद्धान्ते शब्द एव मुख्य इति सूचितम् । योऽघटितपदार्थो विशेषव्यापक· स एव न तु संस्कृतो वा अन्योऽपि यः कश्चित् एकः साकेतिकभाषाशब्दः स एव सिद्धान्त इति न किन्तु शब्द एव सिद्धान्त इति, शब्दे ब्रह्मणि शुद्धत्वाशुद्धत्वेन स्वाऽव्यक्तलिङ्गोपर्येव तात्पर्यमिति यतस्तत्प्रकारेण सर्वमेकपदादेव चिन्तनोयम् । यदा देवश्चिन्तनीयः तदा तेषां शास्त्रपठनेनापि किं, तदुक्तं भर्तृहरिणा—

तार्किका घटपटेति रटेयुः शाब्दिकाः खफछठेति पठेयुः ॥
मादृशां तु सततं स्मरणीयौ चन्द्रचूडचरणौ रमणीयौ ॥ इति ।

पुनः अवधूतेषु [1]कैश्चिद्दोषारोपणं क्रियते निश्चितं तथा कुर्वन्तु नाम, ततो नावधूतानां मनोविकारस्तदुक्तं भर्तृहरिणा—

चाण्डाल·[2] किमयं द्विजातिरथवा शूद्रोऽथवा[3] तापस· ।
किं वा तत्त्वनिवेश[4] पेशलमतिर्योगीश्वर· कोऽपि किम् ॥

इत्युत्पन्नविकल्पजल्पमुखरैः संभाष्यमाणा जनै—
र्नो क्रुद्धाः पथि नैव तुष्टमनसो गच्छन्ति ते[5] योगिनः ॥ (वैराग्य श. ५५)

गालिप्रदानेऽपि नावधूतानां क्रोधादिरिति भर्तृहरिणोक्तमेव—

ददतु ददतु गालीर्गालिमन्तो भवन्तो
वयमिह तदभावाद्गालिदानेऽप्यशक्ताः ।
जगति विदितमेतद्दीयते विद्यमानं
न हि शशकविषाणं दीयते यद्वदान्यैः ।

पुनः क्रोधो न क्रियते, इदमपि नास्ति । कथं ? अक्रोधस्तु परमहंसानां धर्मः पुनः क्रोधकरणमिति गृहस्थानां धर्मः । अस्माकं तु द्वयमपि धर्म एवेत्यत एव ।

---

१. किंचिद्—पू० सं० ।
२. चण्डाल —प० स० ।
३. किं—मु. पा. ।
४. विवेक—मु० पा० ।
५. यान्ति स्वयं—मु० पा० ।

एकदा भर्तृहरिः स्वेच्छया सिद्धस्वरूपः कापोतीमाश्रित्य पण्यवीथिकायां कणानादाय चर्वन्नृपतिना विक्रमार्केण दृष्टः स ज्येष्ठो भ्रातैव तदापि सिद्धरूपस्तेनाज्ञातो यत उक्तम्—अहो अस्यापि जननी यथैतादृशः पुरुषो जनितो यश्च स्वोदरभरणेऽप्यसमर्थ इति। तच्छ्रुत्वा किमुक्तं सिद्धेन—अहो तस्यापि जननीं धिक् यः समर्थोऽपि परोपकारकरणेऽसमर्थ इति। यदा चैवं विवेकवचनं श्रुत्वा राजा महान् विचक्षणः स्वकीयं जेष्ठभ्रातरं परमं पुरुषं ज्ञात्वा स्वतः शीघ्रमेवावतीर्य्य तच्चरणे पतितस्तदा श्रीभर्तृहरिणोपदेशो दत्तस्तदनन्तरं परोपकारकरणे नृपतिः प्रवृत्तस्तेन च महाप्रतापवान् जातः। ततः कथ्यते महासिद्धा अकामिनोऽप्यक्रोधिनो जिताहंकारास्ते वचनसहनं कथं न कुर्वन्ति, परन्तु परमहंसरीत्येमेतु परमहंसा न सन्ति गृहस्था अपि न सन्ति, यथा काक उल्लूक इति। तयोरेकस्तु दिन एव पश्यति तदन्यो रात्रावेव पश्यतीमे तु योगिनो यौगिकपरमहंसा मराला दृष्टिद्वयेनापि पश्यन्तो मुक्तिमुक्ताफलं गृह्णन्ति शिवशक्त्योर्द्वयमपि चैकीकृत्य चरन्ति तेऽवधूतयोगिनो भवन्ति इति सिद्धान्तेन सर्वदा रमन्ते*। गृहस्थः क्रोध एवासक्तः परमहंसश्चाक्रोध एवासक्तो यत एतयोरेकैकस्मिल्लोकेऽवज्ञा भवेत्। गृहस्थस्य क्रोधादिकरणे परो लोको न सिध्येत्। परमहंसस्याक्रोधादिसेवनेनेहलोके सुखं न स्यात्। एते तु परमहंसाधिकाः क्रोधालोकदृष्टिगोचरा इतिकृत्यालौकिकसेवनादयं लोकोऽपि रक्षतेऽक्रोधादिना परलोकोऽपि साध्यते। परमावस्थायां भेदाभेदपरे द्वैताद्वैतपरे न कोऽप्ययं लोको न कोपि परो लोकोऽयं तु तेषां परमसिद्धान्त इति। वैदिकः स्मार्तस्तु कुमारीकन्या यस्योपरि चित्तमासज्येत तमेव वृणोति। अवधूतः परमहंसः शैवः शाक्तो वा यः कश्चित् स कथं इष्टो मुख्यतया न मतो यदि मुख्यतया मतो भवेत्तदा परिणीतः स्यात्। यदा ये तूपरिलिखितास्तेषां वेष आश्रितो भवेत्। पुनः अन्यस्येष्टोऽन्यस्य पतिर्न भवेत्, तदा स भ्रष्ट एव स्यात्। यथा पुरुषः कोऽपि यवनो भवेत्तदा केन वार्यते। पतञ्जलिना शास्त्राणि त्रीणि कृतानि—योगसूत्रं, व्याकरणभाष्यं, वैदि[द्य]कशास्त्रमिति[१]। तेन तच्छिष्याः प्रशंसां कुर्वन्ति अस्माकं गुरुणा शास्त्रत्रयेण त्रयाणां दोषा जिताः, योगेन मनसो मालिन्यम्, व्याकरणेन वाङ्मालिन्यमशुद्धता, वैदि[द्य]केन शरीरमालिन्यमनामयतेति। यदावधूतशिष्याः कथयन्ति शास्त्रत्रयेण त्रयाणां दोषा जिताः एतत्त्रयस्य प्रयासः कृतस्तर्ह्येकेन योगेनैव ते दोषा जिताः स्युस्तत्रैव किमर्थं न कृतः। कथं? योगेन मनोमालिन्यं दूरीभवति तत्तु तेनैवोक्तं, पुनः व्याकरणेन यदुक्तं तद्योगेन किं न भवति? यादृशं यद्योगे न स्यात्तादृशं त्वन्येन न भवत्येव। कथं? शब्दब्रह्मास्य योगिन इष्टमेव हि भवति, योगिनः सिद्धवाचो भवन्ति, यद्वदन्ति तदेव भवति। वैयाकरणो न कोऽपि दृष्टः सिद्धवागिति। पुनः वैदि[द्य]केन शरीररोगनिवर्त्तनं भवति तद्योगेन कथं न भवेत्। योगिनस्तु शरीरममृतं कुर्वन्ति,

* एतावदेव पूर्वसंस्करणे मुद्रितम्।

१. चरकाख्यमायुर्वेदशास्त्रमित्यर्थः।

असंख्ययुगकालपर्यन्तं शरीरं रक्षन्ति च, यदि शरीरं नीरोगं भवेत्तदा कथं तावत्तिष्ठति। एतादृग्वैदि[द्य]कं न किमपि दृष्टं येनैकयुगमपि शरीरं रक्ष्यते। तथा चावधूतशिष्य एव भवतु, तेनैकेन योगेनैव सर्वसिद्धिर्भवति। पुनः पुनर्योगः प्रशंस्यते, तत्तु प्रशंसनमनया रीत्या। कथं? योगपदार्थस्त्वात्मधर्मः कथं स्वदेहे न भवेत्। स्वतन्त्र एव, मुख्य एव, पुरुषार्थ एव च। कया? आसनप्राणायामध्यानधारणासमाधय एतेषां मध्ये इन्द्रियदमनं सहिष्णुता सत्यमिति सर्वेऽपि चागतास्ते सर्वे स्वत एव भवन्ति। अत आत्मधर्म एव स महाश्रेष्ठः। अन्यत्तु यज्ञादिकर्म द्रव्येण साध्यते। पुनः बहुपुरुषैर्मिलितैः साध्यते। पुनरन्यत्तीर्थाटनं व्रतं त्यागस्तपो विरागो ज्ञानमिति यद्यप्यात्मधर्म एव तथापि सुकरत्वात् संसारिभिरपि जनैः क्रियते, यतो बह्वो दृष्टिगोचराः। तीर्थयात्रिणो व्रतकारकास्त्यागिनश्च तस्मादेतेऽपि संबन्धधर्मतुल्या एव दृश्यन्ते, न त्वात्मधर्मस्तत्र दृश्यताम्। पाणिनीयव्याकरणाश्रितानां जनानां पण्डितानामग्रेऽपि दृष्टं किमप्येकं प्रमाणं नियतं नास्ति। वैष्णवा यया रीत्या व्याख्यां कुर्वन्ति तां तु स्मार्ताः कथयन्तीयं व्याकरणरीत्या शुद्धा नास्तीति। यद्वैकशास्त्रावलम्बिनां बहुधैकधर्मिणां पुरुषाणां मध्येऽपि चैवं भवेत्तर्हि मया तु सिद्धव्याकरणशैवव्याकरणावलम्बिनां तेषां धर्मतो भिन्नधर्मिणा तत्तत्कथनमेव किं गण्यते, तेषां भेदं दृष्ट्वा दृश्यते चेति। अर्जुनमिश्रकृतभारतटीकायाम्—

यान्युज्जहार माहेशाद्व्यासो व्याकरणार्णवात्।
तानि किं पदरत्नानि मान्ति पाणिनिगोष्पदे॥

भर्तृहरिर्वाक्यपदीये—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।
समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम्[१]॥ (वा० २।२३३)

नीत्युपाये यथा राज्ञां धर्माः शौर्यं तेजो बुद्धिर्भाग्यं स्वातन्त्र्यशक्तिरिति, एभ्यो यादृशी राज्यकार्येषु सिद्धिर्भवति, यज्ञाश्च भवन्ति, तथा मन्त्रिबुद्धितः सेनासंपत्तिः शत्रूणां द्रव्यसमाधानमित्यादेः संबन्धधर्मान्न भवति। एवं शृङ्गारेऽपि तारुण्येन, पराक्रमेण, रूपेण च यादृशं सुखं स्त्रीजनानां प्रीतिश्च भवति तादृगनेकभूषणेन द्रव्येण हर्म्यादिसामग्रीविशेषेणानेकगुणैरैश्वर्येण बुद्धिकुलीनतावेषरचनारागरचनादिभिश्चेत्यादिसंबन्धधर्मेण न भवति। यद्यपि सर्वेऽपि संबन्धधर्मा मिलिता अपि कार्यकरा भवन्ति इति विशेषः। एवं च योग एव श्रेष्ठ आत्मधर्मस्तद्वन्तं मुक्तिरङ्गीकरोति। यथा पूर्वोक्तशौर्यादिः श्रेष्ठ आत्मधर्मस्तद्वन्तं राजानं पृथ्वी अङ्गीकरोति, यथैव च पूर्वोक्ततारुण्यादिः श्रेष्ठ आत्मधर्मस्तद्वन्तं स्त्रीजनः शृङ्गारेऽङ्गीकरोति।

केचिन्नारायणात्सर्वोत्पत्तिं कथयन्ति। सा च तदधिकारिणामुपासकानामेवार्थे न तु मुख्यतया। तदुक्तं शिर उपनिषदि—

१. अनागमविकल्पा तु स्वयं विद्योपवर्त्तते—मु० पा०।

"अक्षरात्संजायते कालः कालाद्व्यापक उच्यते । व्यापको हि भगवान् रुद्रो भोगायमानो यदा शेते रुद्रस्तदा संहार्य्यते प्रजाः । उछ्वसिते तमो भवति तमस आपो अप्स्वङ्गुल्या मथिते मथितं शिशिरे शिशिरं मथ्यमानं फेनो भवति फेनादण्डं भवति । अण्डाद् ब्रह्मा भवति ब्रह्मणो वायुर्वायोरोंकार ॐकारात्सावित्री सावित्र्या गायत्री गायत्र्या लोका भवन्ति ।" (अथर्वशिर उ० ६, ई० अ० उ० पृ० १५७)

अत्र तु विष्णोर्नामगणनापि नास्ति । कथं ? स तु रुद्रस्यांशावतारगणनेऽपि तदवान्तरत्वेनोक्त इति । विशेषरीतिस्तु शिवरहस्ये सविस्तरं लिखिता—

सर्ववेदानां सर्वसंसारिणामपि च गुरुर्नाथ एव सर्वशास्त्रप्रसिद्धोऽत एव तन्त्रोक्तेऽपि गुरुकवचे गुरुमण्डल निरूपणे मुख्यतया नाथस्यैव गुरुत्वमुक्तं श्रीनाथादि गुरुत्रयमित्यादिना ।

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धेभ्यो बटुकत्रयं पदयुगं इतिक्रमं शोभनम् ।
वीरेशाष्टचतुष्टषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

महेशसंहितायाम्—

सत्यं केचित्प्रशंसन्ति तपः शौचमथापरे ।
क्षमां केचित्प्रशंसन्ति तथैव शममार्ज्जवम् ॥
केचिद्दानं प्रशंसन्ति पितृकर्म तथापरे ।
केचित्कर्म प्रशंसन्ति केचिद्वैराग्यमुत्तमम् ॥
केचिद्गृहस्थकर्माणि प्रशंसन्ति विचक्षणाः ।
अग्निहोत्रादिकं कर्म तथा केचित्परं विदुः ॥
एवमन्ये तु संचिन्त्य यथामति यथाश्रुतम् ।
निरीश्वरमिदं प्राहुश्चेश्वरं च जगत्पते ॥
वदन्ति त्रिविधा भेदैः सद्युक्त्या स्थितिकारकाः ।
एते चान्ये च मुनयः संज्ञाभेदात्पृथग्विधाः ॥
शास्त्रेषु कथिता ह्येते लोकव्यामोहकारकाः ।
एतद्विवादशीलानामलं वक्तुं न शक्यते ॥
भ्रमन्त्यस्मिन् जनाः सर्वे मुक्तमार्गवहिष्कृताः ।
आलोक्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥
इदमेकं सुनिष्पन्नं योगशास्त्रामृतं परम् ।
यस्मिञ्ज्ञाते सर्वमिदं ज्ञातं भवति निश्चितम् ॥
अस्मिन्परिश्रमः कार्यः किमन्यच्छास्त्रभाषितम् ।
योगशास्त्रमिदं गोप्यमस्माभिः परिभावितम् ॥

आचारस्य संस्कृतशब्दस्य प्रबन्धकरणस्य शुद्धशब्दस्य चेत्यादिं सर्वपदार्थानां निषेधकरणेनैवं वादिभिः कदाचिदपि न ज्ञायतां यदेतेषां मते त्वाचारो नास्ति, संस्कृतं शास्त्रं च नास्ति, प्रबन्धो वा नास्ति, शुद्धशब्दस्योच्चारणं नास्ति, इति। किंत्वस्माकं मते त्वाचार ईदृशो वर्त्तते यस्तु प्राणान्तेऽपि न त्यज्यत आचारः। अन्येषां तु मत एवमपि कथ्यते शरीरार्थं कदापि काले ह्यधर्ममपि ग्राह्यम् किमर्थं? यदिशरीरमरोगं भवति तदापुनरपि तेन धर्मं संपाद्य तमधर्मं निवर्त्त्य पुनर्धर्मं करिष्यते येन सर्वश्रेयो भविष्यतीति। अस्माकं तु मते यदा कष्टे विपत्तौ वा शरीरार्थमधर्मं गृह्णाति तदायं कीदृशो धर्मो यः कष्टे त्यजते धर्मस्तु स एव यः प्राणान्तेऽपि न त्यक्तो भवेदिति हेतोर्योगिनो योग एव सर्वदा तिष्ठन्ति क्षणमपि न योगं त्यजन्ति। अत्र योगेन योगाभ्यासो ग्राह्य इति। तत्कर्मैव कर्माचारं यन्न त्यज्यते।

ननु वेदेऽपि लिखितं यावज्जीवमग्निहोत्रं जुहोति, अहरहः सन्ध्यामुपासीतेत्यादि। पुनः संस्कृतशब्दरीतिस्त्वन्यैव। संस्कृतरीतिं रचयन्ति पुन. प्रबन्ध इति। प्रबन्धस्तु य एतादृशो यद्वाक्यं मेरुश्चलति तथापि तन्न चलति वाक्यम्। पुनः शुद्धमिति शुद्धमेतादृशं यच्छुद्धाशुद्धैकीकरणं तन्मोक्षरूपम्। शुद्धमेव स्यात्तच्च कदापि काले नाशुद्धं भवेदित्येतद्रीत्या ह्याचारादयः पदार्था एतैर्योगिभिरेतादृशाः क्रियन्ते यादृशा अन्यैः कर्त्तु न शक्यन्ते परं स्वयं सिद्धान्तो नास्तीति। आचारो ह्यनाचार इति संस्कृतमिति। प्रबन्धो प्रबन्ध इति। शुद्धमशुद्धमिति। द्वन्द्वमिलनेनैव सर्वं सिध्यति न त्वेकेनेति। एकेन तु ब्रह्मादयोऽपि किमपि कर्त्तुं न शक्नुवन्ति तच्च कदापि काले न भवत्येवेति। एतेन वारंवारमस्माभिरेवं प्रदर्श्यते। अव्यक्तलिङ्ग एव अघटितपदार्थ एव अत्याश्रम एव निश्चलो भवति नत्वितरकलितपदार्थो निश्चलः क्षणमपि दृश्यते। यद्वारंवारं कथनेनाव्यक्तलिङ्गस्यात्याश्रमस्येदंकरणं श्रोतारस्त्वैश्वर्येण मत्ता भूता एकदा लिखनेन जानन्त्यपरेषां मत एते यदा न भवन्त्येवेति तन्नास्ति सर्वस्मादप्येतेऽधिका भवन्ति निषेधकरणे न तु अव्यक्तलिङ्गे तात्पर्यमिति सिद्धं क्रियत इति। प्रथममुक्तेन योगेन योगाभ्यास उक्त इति। तदा कोऽपि जानीयात् योगाभ्यासो योगश्चेति कियदर्थद्वयमायातीति तत्र कथ्यते—योगस्तु जीवात्मपरमात्मनोरैक्यमेव योगाभ्यासस्तु तस्य योगस्य प्राप्त्यर्थं मानसप्राणायामाद्यभ्यासकरणमिति। पुनः प्रथमं यावज्जीवमग्निहोत्रीत्युक्तं तत्त्वन्यशास्त्रस्यापि रीतिरुक्ता नत्वेतदग्निहोत्रादि कर्म योगाभ्यासरूपं कर्मचैकमिति ज्ञेयं तत्तु निष्कर्म इदं तु महोत्तममिति। अत एव श्रीगोरक्षनाथेनोक्तं गोरक्षोपनिषदि—आदिब्राह्मण इति। को वा ब्राह्मण इति। ब्रह्म जानाति स ब्राह्मण इति। वैष्णवा ब्राह्मणाश्च रामकृष्णादयोऽपीतरं ब्रह्म। एवं जीवात्मापि चानुक्रमानुक्रमतो जीवो ब्रह्मेति कथनं भवतीति। एतया रीत्या अंशांशब्रह्म भजन्तस्ते मायाशबलं ब्रह्म पर्यायनारायणे समन्वयं व्रजन्ति। पुनः वैदिकाः परमहंसाश्च ये ते मायाशबलब्रह्म भजंतो निर्गुणब्रह्मणि समन्वयं व्रजन्तीत्येवं भवतु मा भवतु परन्त्वेवं

ते कथयन्ति। महासिद्धास्तु निर्गुणं भजन्तो निर्गुणातीते पूर्णे नाथे समन्वयं व्रजन्ति। अथो त्रयमप्येतत्केन मार्गेण व्रजन्ति, तत्राह—वैष्णवा. पुराणपाञ्चरात्राद्यनुसारिणस्तदुक्तोपासनेन कर्मणा। वैदिकाश्च परमहंसाः स्थूलवेदानुसारिणो यज्ञादिकर्मकरणानन्तरत्यागज्ञानेन। महासिद्धाः सूक्ष्मवेदानुसारिणो योगकर्मणेति। एवं च यदा वैष्णवास्तु पुराणपाञ्चरात्रादीनां वेदमूलकत्वात् वैदिकब्राह्मणान्तर्भूता अतस्तेषां कथने किं प्रयोजनमथ च वैदिका ब्राह्मणाः परमहंसास्ते स्थूलवेदानुसारिणो मायाशबलं ब्रह्मोपास्य निर्गुणं ब्रह्म जानन्ति यतो हेतोर्ब्रह्म जानन्तीति ब्राह्मणा इति। पुनः महासिद्धाः सूक्ष्मवेदानुसारिणो निर्गुणब्रह्मभजनेन पूर्णं ब्रह्म जानन्ति यत एते आदिब्राह्मणा इति। ब्राह्मणा ब्राह्मणा वेदिका वैदिकाः कथ्यन्ते। यदेते किंतु ब्राह्मणा वैदिका न वर्त्तन्ते एते तु महाब्राह्मणा महावैदिकाः। अथ चैवं रीत्यास्माभिः कथ्यते तद्यथार्थमेव ज्ञेयं नत्वेते ज्ञातिब्राह्मणा ब्रह्म जानन्ति यतो ब्राह्मणा इति। एकदण्डिनः परमहंसास्त्रिदण्डिनश्च परमहंसाः क्रियावद्ब्रह्मेति दृष्ट्वा एकयैव दृष्ट्या पश्यति। एकदण्डिनो निष्क्रियं ब्रह्मेत्येकयैव दृष्ट्या पश्यन्ति। यदा एकयैव दृष्ट्या। एकयैव व्यवस्थयात बहुबारमुक्तं चञ्चलत्वमेव तिष्ठति नतु निश्चलत्वं याति तदा मोक्ष भाक्त्वं न भवेत्तेषां च बन्धनमेव वर्त्तेत तदा गर्भो नरकश्च कथम्[१] ··· ··· ।

१. पुर्वमुद्रितात्संस्करणादेतावन्ति पत्राण्यधिकान्युपलभ्यापि ग्रन्थोऽयमपूर्ण एव प्रतिभाति।

ॐ

उद्धृतग्रन्थानुक्रमणी

ख

उद्धृतनामानुक्रमणी

॥ लक्ष्मीवेङ्कटेश्वराय नमः ॥

अथ

गोरक्षपद्धतिः ।

राजधानी-टीहरी जिला—गढवालनिवासि-
पण्डितमहीधरशर्मकृतभाषानुवादसहिता.

सा च

शास्त्रिभिः शोधयित्वा

श्रीकृष्णदासात्मज—गंगाविष्णुना
स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणागारे
मुद्रयित्वा प्रकाशिता ।

संवत् १९५५, शके १८२०.

कल्याण—मुंबई.

गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" छापाखाना, कल्याण-मुंबई.

Gangavishnu Shrikrishnadass
LAXMI-VENKATESHWAR PRESS,
KALYAN-BOMBAY.

प्रस्तावना.

समस्त साधनाओंका मूल योग है. तप, जप, संन्यास उपनिषत् ज्ञानआदि मोक्षहेतु अनेक हैं किंच सर्वोत्कृष्ट योगही है इसीके प्रभावसे शिव सर्वसामर्थ्य, ब्रह्मा कर्त्ता, विष्णु पालक है. इसके मुख्य-कर्त्ता शिवजीने पार्वतीजीसे कहा ब्रह्माजीके सेवन करनेपर योगियाज्ञवल्क्यस्मृति बनी है. विष्णु (श्रीकृष्णजी) ने गीता, एवं भागवतके ग्यारहवें स्कंधमें कहाहै. इसके मुख्यआचार्य्य आदिनाथ (शिवजी) हैं. इन्हींसे नाथसंप्रदाय प्रवृत्त भया. एक समय आदिनाथ किसी द्वीपमें पार्वतीको योग सुनारहेथे वह एक मछलीने सुनकरही दिव्यज्ञान तथा दिव्यदेह पाया यही मत्स्येंद्रनाथ भये और मत्स्येंद्रनाथ शाबरनाथ (जिन्होंने साबरग्रंथ देशभाषामें बनाये हैं) आनंदभैरवनाथ, चौरंगी आदियोंसे योग पाय यथेच्छ विचरतेथे कि, एक स्थानमें हातपाँव कटेहुये चोरको देखा. उक्त महात्माओंके कृपावलोकनसे उसके हातपाँव उगआये तथा ज्ञानभी होगया मत्स्येंद्रनाथके कृपासे योग पायकर चौरंगिया नाम योगी सिद्ध विख्यात भया और मीननाथ, गोरक्षनाथ, विरूपाक्ष, बिलेशय, मंथानभैरव, सिद्धबुद्ध, कंथडी, कोरंटक, सुरानंद, सिद्धपाद, चर्पटी, कानेरी, पूज्यपाद, नित्यानंद, निरंजन, कपाली, बिंदुनाथ, काकचंडीश्वर, अल्लाम, प्रभुदेव, घोडाचोली, टिंटिणी, भानुकी, नारदेव, खंड, कापालिक, तारानाथ इत्यादि योगसिद्धि पायकर योगाचार्य हुए हैं. योगहीके प्रभावसे महासिद्ध अखंडऐश्वर्यवान् होकर मृत्युको जीत ब्रह्मानंदमें मग्न रह ब्रह्मांडमें विचरतेहैं. इनमेंसे मुख्य मत्स्येंद्रनाथ गोरक्षनाथ योगविद्याके आचार्य भये. गोरक्षनाथने मुमुक्षुजनोंके उपकारार्थ राजयोग, हठयोग आदि बहुविस्तार एवं बहुसाधनासाध्य जानकर, "यह गोरक्षपद्धति" नामा ग्रंथ २०० श्लोकमें सर्वसमुच्चय सारभूत प्रकट किया सर्वसाधारणके सुबोधार्थ महीधरशर्मा राजधानी टीहरी जिला गढवालनिवासीने इसका भाषानुवाद करके प्रकाशित किया.

इस ग्रंथके प्रथम मंगलाचरणसे (५) श्लोकमें विषयप्रयोजन संबंध अधिकारी कहेहैं. (१) में योगाभ्यासका फल, (१) में षडंगके नाम, (५) में आसन, (१२) में षट्चक्रनिरूपण, (८)

में दशनाडी स्थानोंसहित, (१४) में दशवायु, (१०) में शक्तिचालन, (२६) में महामुद्राआदि, (७) में प्रणवाभ्यास, प्राणायामप्रशंसा, (४) में प्राणायामका प्रकार, (८) में नाडीशोधन, इतने विषय पूर्वशतकमें. तथा (२१) में प्राणायामका विस्तार, (३०) में प्रत्याहारविधि, (९) में धारणा, (२४) में ध्यान, (१३) में समाधि, (४) में मुक्तिसोपान, योगशास्त्राभ्यासका फल इतने विषय उत्तरशतकमें कहे हैं. ऐसी यह गोरक्षपद्धति योगमार्ग जाननेवालोंको अतिउत्तम तथा सुगम है. योगमार्गका प्रयोजन सभी शास्त्रोंमें पडताहै. विशेषतः संध्या, पूजनआदि द्विजन्माओंके नित्यकर्मभी विना इसके सिद्ध नहीं होते जैसे संध्यामें प्रथम "बद्धपद्मासनो मौनी प्राणायामत्रयं चरेत्" तथा पूजनमें "स्नातः शुचिः प्राङ्मुखोपविश्य प्राणानायम्य" इत्यादि सर्वत्र विधिवचन है. यदि योग न जाने तो प्राणायाम पद्मासनआदि कहांसे जाने. इनके न जाननेसे समस्त संध्यावंदनादिसाधन निरर्थक हैं. इस समयमें बहुधा लोक नाकपर हाथ लगानेको प्राणायाम समझते हैं. पद्मासनादियोंका तो नामभी नहीं है. तब कहांसे सिद्धि होवे इसी हेतु नास्तिकलोग असिद्ध तथा पोप (ठग) आदि निंद्यशब्दोंसे अपने मुखविवरोंको दूषित करते हैं यदि योगाभ्यास करें तो सिद्धि प्रत्यक्ष होकर अपना उद्धार हो तथा दूषकोंके उन विवरोंमें मिट्टी पडे. और योगग्रंथ बहुत तथा कठिन हैं. ये २ शतक थोडेहीमें ज्ञान देते हैं इस हेतु मैंने भाषाटीका की है कि सभी सज्जन इसे देख थोडाही गुरूपदिष्ट होकर सर्वार्थसाधनयोगमार्गकी महिमा जानजायँगे. पाठकोंके सुबोधार्थ मैंने अनेक प्रसिद्ध योगग्रंथोंसे इसे बढाकर गोरक्षपद्धति करदिया. और यह ग्रंथ "लक्ष्मीवेङ्कटेश्वर" छापेखानेके अधिकारी-गंगाविष्णु श्रीकृष्णदासजीको सर्व हक्कसहित देदियाहै जो यह उन्होंने आपके छापाखानेमें छापकर प्रसिद्ध किया है.

मही-

श्रीगणेशाय नमः ।

अथ

भाषानुवादसहिता

गोरक्षपद्धतिः ।

श्रीआदिनाथं स्वगुरुं हरिं मुनिं
गोरक्षशास्त्रस्य प्रणम्य योगिनम् ।
भाषाविवृत्तिं कुरुते महीधरो
योगे सुबोधः खलु जायते यया ॥ १ ॥

श्री आदिनाथ (शिवजी) तथा निजगुरु, हरिमुनि योगीको प्रणाम करके महीधरनामा गोरक्षयोगशास्त्र जो योगींद्रगोरक्षनाथने दो शतकमें शिष्योपकारार्थ बनाया है. उसकी भाषाटीका करता है. जिससे योगमार्गमें सभीको सुगमतासे बोध होता है. योगपदका अर्थ मेल है जैसे 'ह' का अर्थ सूर्य्य 'ठ' का चंद्रमा है इनके योग (मेल) को हठयोग कहतेहैं. इसीको राजयोगभी कहतेहैं, प्राण, अपानवायु जिनकी सूर्यचंद्रमा संज्ञा है, इनका ऐक्य करनेवाला जो प्राणायाम उसे हठयोग कहतेहैं ॥ १ ॥

श्रीगुरुं परमानन्दं वन्दे स्वानन्दविग्रहम् ।
यस्य सान्निध्यमात्रेण चिदानन्दायते तनुः ॥ २ ॥

शिष्यको आत्माके तत्त्वबोधनिमित्त गुरुस्वरूप धारणकर परमगुरु श्रीपरमात्माको सहस्रदलकमलमें भावनापूर्वक प्रथम ग्रंथारंभमें विघ्नविघातार्थ प्रणाम करतेहैं, कि जीवब्रह्मकी ऐक्यता योगशास्त्रका प्रयोजन है. सद्गुरुके समीप भक्तिपूर्वक रहनेसे शिष्यका पांचभौतिक शरीरभी आनंदमय होजाताहै. आनंदही परब्रह्मका रूप है जैसे श्रुतिभी कहतीहै कि "आनन्दो ब्रह्मणो रूपम्" यदि ऐसा न हो तो उसकी पहछानभी नहीं होसके क्यों कि "न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा" इत्यादि गीता । एवं वेदांतग्रंथोंमें लिखाहै कि उसका रूप तथा जन्म, मरण, मध्य और रंग चिह्न मूर्त्तिआदि कुछ नहीं है. केवल आनंदमय स्वयंप्रकाशमान है. तथा निर्विकल्प आनंदमय होजानेकोही मुक्ति कहतेहैं. ऐसे परमआनंदस्वरूप परब्रह्मको (जिसका शरीरभी आनंदही है) वंदना करके ग्रंथारंभ करते हैं जिसके सांनिध्य (सम्मुख) होनेसे, अर्थात् (केवलानुभवानंद) वह आनंदात्मा परमात्मा केवल मनके मनन अनुभव विचार करनेसे अपनेही बीच पाया जाता है. न कि इतस्ततः तीर्थयात्रादि फिरनेसे, यह अनुभव केवल योगहीसे साध्य है. यह ज्ञानकी प्रथम भूमिका है. नाडीशोधन, वायुशोधन, ध्यान, धारणा आदि विना एवं गुरुकृपा विना नहीं मिलता. विना ज्ञानके मुक्ति नहीं मिलती श्रुतिभी कहतीहै कि "ऋते ज्ञानान्न मुक्तिः" मुक्तिपदार्थ वही आनंदमय होजाताहै. योगसे ज्ञान पायके जीवपरमात्माका एकभाव होनेमें वह आनंदस्वरूप पर-

ब्रह्म साक्षात्कार होताहै इस ज्ञानगम्यके प्रत्यक्षमात्र होनेहीसे परमचिदानंदमय आपही योगी होजाताहै. जैसे ज्ञानकी सात भूमिका हैं. ज्ञानभूमि १ विचारणा २ तनुमानसा ३ सत्त्वापत्ति ४ संसक्तिनामिका ५ पदार्थाभाविनी ६ तुर्यगा ७ ये सात हैं. विवेक वैराग्य हैं प्रथम जिसमें ऐसी तीव्र मुमुक्षारूप पहिली. श्रवणमननरूपा दूसरी. मनमें अनेक अर्थ संकल्प विकल्प उत्पन्न तथा नाश होतेहैं. इन सभीको छोडके, सत् एकार्थमें वृत्ति होनी. तनुमानसा तीसरी. ये तीन साधनभूमियें हैं इनसे जब अंतःकरण शुद्ध हो तब "अहं ब्रह्मास्मि" मैं ब्रह्म हूं ऐसा योगी कहताहै. समस्त साधन पूजनजपादिकमें "अहं ब्रह्मास्मीति चिरं भावयेत्" लिखाहै, यह भावनाविना उक्त तीन भूमिका साधे होतेही नहीं हैं इसलिये विना मार्गके कुछभी साधन नहीं होता है चौथी, सत्त्वापत्ति ज्ञानभूमि यही फलभूमि है इसमें जब योगी प्राप्त होवे तब ब्रह्मवित् कहाता है. इसी सत्त्वापत्तिभूमिमें समीपही वहीं जो सिद्धि उसमें आसक्त न होना, इसे असंसक्तिनाम पांचवीं ज्ञानभूमि कहतेहैं. इसमें जब योगी प्राप्त होवे तो उसे ब्रह्मविद्वर कहतेहैं. जिसमें परब्रह्मसे व्यतिरिक्त अर्थको भावना न करे वह पदार्थाभाविनी छठी ज्ञानभूमि है इसमें जब योगी प्राप्त होता है तो वह दूसरेके बोधन करनेसे मात्र प्रबुद्ध होता है. नहीं तो एकाग्रशून्याकारही रहता है उसे ब्रह्मविद्वरीयान् कहते हैं. तुर्यगा नाम सातवीं भूमि है इसमें योगी प्राप्त होनेसे ब्रह्मविद्वरिष्ठ कहते हैं. इतने साधनाओंसे स्वात्माराम,

चिदानंद, परमानंद, चिन्मय आदियोगी आपही होजाता है. कालरहित होता है. "अन्तर्निश्चलितात्मदीपकलिकास्वाधारबन्धादिभिर्यो योगी युगकल्पकालकलनात्तत्त्वं च जेगीयते । ज्ञानामोदमहोदधिः समभवद्यत्रादिनाथः स्वयं व्यक्ताव्यक्तगुणाधिकं तमनिशं श्रीमीननाथं भजे" जो मीननाथयोगीश्वर मूलाधारबंध, उड्डीयानबंध, जालंधरबंध आदि योगाभ्याससे हृदयकमलमें निश्चलदीपककी ज्योतिसरीखी परमात्माकी कला साक्षात्कार करके श्वास, पल, घटी, प्रहर, दिन, मास, ऋतु, अयन, वर्ष, युग, मन्वंतर, कल्प आदि निरंतर पुनः पुनः फिरनेवाला है स्वरूप जिसका ऐसे कालको तथा जलादि २५ तत्त्वोंको पहचानके योगाभ्याससे जीतता है तथा ज्ञानानंदरूपी समुद्र होकर गुप्तप्रकट अर्थात् सगुण निर्गुण होनेकी सामर्थ्य रखनेवाला आदिनाथ शिवस्वरूपकी भावना नित्य करनेके अभ्याससे; आपही साक्षात् शिव हो गया है. ऐसे योगीश्वर श्रीमीननाथको दिनरात नमस्काररूप सेवन करताहूं ॥ २ ॥

नमस्कृत्य गुरुं भक्त्या गोरक्षो ज्ञानमुत्तमम् ।
अभीष्टं योगिनां ब्रूते परमानन्दकारकम् ॥ ३ ॥

योगी गोरक्षनाथ भक्तिपूर्वक गुरुको प्रणाम करके पूर्वजन्मके योगसेवनसे इस जन्ममें पूर्णयोगमार्गका बोध देनेवाला योगशास्त्र कहते हैं. जिससे योगियोंको अभीष्ट (मनोवांछित) मिल-

ता है तथा परमयोगानंद यद्वा ब्रह्मानंद होता है. कर्म और भक्तिसे जब चित्त शुद्ध होवे तब योगशास्त्रमें अधिकारी होताहै ॥ ३ ॥

गोरक्षसंहितां वक्ति योगिनां हितकाम्यया ।
ध्रुवं यस्यावबोधेन जायते परमं पदम् ॥ ४ ॥

योगिजनोंके हितके लिये योगींद्र गोरक्षनाथ गोरक्षसंहिता नाम योगशास्त्र कहता है,जिसका बोध होनेसे योगीको (परमपद) जीवन्मुक्ति होती है यद्वा वह मिलता है जिसमें पहुँचकर पुनरावृत्ति फिर लौट आना नहीं होता ॥ ४ ॥

एतद्विमुक्तिसोपानमेतत्कालस्य वञ्चनम् ।
यद्व्यावृत्तं मनो भोगादासक्तं परमात्मनि ॥ ५ ॥

जब योगाभ्याससे मन विषयभोगोंसे हटजानेपर परमात्मा (ईश्वर) में आसक्त हो जावे तब योगी काल तथा मृत्युको जीतकर जरा (बुढापा) मृत्यु (मरण) को जीतता है मुक्तिका सोपान (सीढी) यही कर्म है, और कालकी वंचनाभी यही है ५

द्विजसेवितशाखस्य श्रुतिकल्पतरोः फलम् ॥
शमनं भवतापस्य योगं भजत सत्तमाः ॥ ६ ॥

सज्जनको संबोधन करके, गोरक्षनाथ कहते हैं कि हे सत्तम श्रेष्ठजनो ! वेदरूपी कल्पवृक्षके फल इस योगशास्त्रका सेवन करो जिसके शाखा (टहनियां) योगिरूपी द्विज (पक्षी) अथवा मुनिजनोंसे सेवित हैं और संसारके तीन प्रकारके ताप (क्लेशों) को शमन करताहैं ॥ ६ ॥

आसनं प्राणसंरोधः प्रत्याहारश्च धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि वदन्ति षट् ॥ ७ ॥

प्रथम आसन सिद्ध करके क्रमशः प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधिका अभ्यास करना ये योगके छः अंग हैं इनके पृथक् विस्तार आगे कहेंगे. यमनियमसंपन्न योगीको क्रमपूर्वक अभ्यासकरके समाधिका लाभ होता है जिससे निर्विकल्प समाधिसे राजयोग सिद्ध होता है. तव चिदानंदस्वरूप आपही होके योगानंदको प्राप्त होता है ॥ ७ ॥

अथासनानि ।

आसनानि च तावन्ति यावन्तो जीवजन्तवः ।
एतेषामखिलान् भेदान् विजानाति महेश्वरः ॥ ८ ॥

आसनोंका विस्तार कहते हैं कि जितने जीवमात्र अर्थात् चौराशी लक्ष योनि हैं उतनेही आसनभी उन्हींके शरीरचेष्टानुसार हैं इनके प्रत्येक भेदोंके जाननेहारे केवल शिवजी मात्र हैं और कोई नहीं जानता ॥ ८ ॥

चतुराशीतिलक्षाणामेकैकं समुदाहृतम् ।
ततः शिवेन पीठानां षोडशोनं शतं कृतम् ॥ ९ ॥

चौराशी लक्ष आसनोंके भेद मनुष्योंसे न जाने जायंगे इस प्रकार जानकर करुणामय शिवजीने सर्वसाधारणके उपकारहेतु चौराशी (८४) मात्र आसन योगशास्त्रमें प्रगट किये. यही सबमें सार हैं ॥ ९ ॥

आसनेभ्यः समस्तेभ्यो द्वयमेतदुदाहृतम् ।
एकं सिद्धासनं प्रोक्तं द्वितीयं कमलासनम् ॥ १० ॥

इन ८४ आसनोंमेंभी बहुतविस्तार होनेसे योगधारण करनेवालोंके उपकारहेतु दोही आसन मुख्य कहेहैं. इससे इस ग्रंथमें सुगमताके लिये सर्वसंमत एक सिद्धासन दूसरा पद्मासन सविस्तार कहा जाताहै ॥ १० ॥

योनिस्थानकमंघ्रिमूलघटितं कृत्वा दृढं विन्यसे-
न्मेढ्रे पादमथैकमेव हृदये कृत्वा हनुं सुस्थिरम् ।
स्थाणुः संयमितेन्द्रियो चलदृशा पश्येद्भ्रुवोरन्तरं
ह्येतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते ॥११॥

सर्वोत्कृष्ट दो आसनोंमेंसे प्रथम सिद्धासनकी विधि कहतेहैं कि, गुदा और लिंगके बीचमें योनि (कुंडलिनीका) स्थान है इसको वामपादकी एडीसे दृढ पीडन (दबाव) करे दाहिने पैरकी एडी लिंगके ऊपर लगाकर दबावे दोनों पैरोंकी एडियां नीचे ऊपर बराबर होजाती हैं तथा दोनों पैरोंके अंगुष्ठ जंघा और गुल्फोंके बीच नीचे छिपजाते हैं इनके दबावसे योनिस्थानके तले ऊपरके दो इंद्रिय गुदा, उपस्थ रुकजातेहैं. तदनंतर हृदयके चार अंगुल ऊपर चिबुक (ठोडी) स्थिर करे और समस्तइंद्रियोंसे हटाकर एकाग्र चित्त करे तथा दोनों नेत्रोंसे अचलदृष्टि कर भृकुटि (भ्रूमध्य) देखतारहे यह मोक्षरूपी द्वार (दरवाजे) के कपाट (किंवाड) को खोलकर मोक्षमार्ग दि-

खाताहै. यद्वा जो कुंडलिनीसे रुकाहुआ सुषुम्णाद्वार उसे खोलकर मोक्षमार्ग (सुषुम्णा) के द्वारा मोक्षस्थान सहस्रदलकमकर्णिकांतर्गत परमात्मामें पहुँचानेका यत्न करता है यह सिद्धासन है ॥ ११ ॥

वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अंगुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविकारनाशनकरं पद्मासनं प्रोच्यते ॥१२॥

बाये ऊरु (जानुमूल) में दाहिना पैर उत्तान करके तथा दक्षिण ऊरु (जानुमूल) में वामपाद वैसेही स्थापन करके दाहिने हाथको पीठपीछे घुमायके दाहिने पैरके अँगूठेको ग्रहण करे तथा बाये हाथको पीठपीछे घुमायके दाहिने हाथ ऊपरसे लेजायकर बांये पैरके अंगुष्ठको ग्रहण करे. तब चिबुक (ढोडी)को छातीसे लगाय, दोनों नेत्रोंसे नासिकाका अग्रभाग निरंतर देखतारहे. यह योगियोंके समस्तरोगविकार नाश करनेवाला बद्धपद्मासन है ॥ १२ ॥

'प्रकारांतरसेभी पद्मासन कहाहै इसलिये मैं ग्रंथांतरमतसे मत्स्येंद्रनाथके मतकाभी लिखताहूं'—

"उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ ॥ १ ॥
नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया ।
उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः ॥ २ ॥

इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनम् ।
दुर्लभं येन केनापि धीमता लभ्यते बुधैः ॥३॥ "

ऊरु (जानुमूल) में पूर्वोक्तप्रकारसे चरण (जैसे दक्षिण ऊरुमें वाम, वाममें दक्षिणचरण, उत्तान अर्थात्, पैरोंके पीठ जानुपर लगी रहें.) स्थापन करके दोनों हाथ सीधे एडियोंके ऊपर नीचे वाम ऊपर दक्षिणहस्त रखके दृष्टि नासिकाके अग्रभागपर निश्चल रक्खे तदनंतर राजदंत (डाढों) के मूल दक्षिण वाम दोनों में जिह्वा कर ऊर्ध्वस्तंभन करे (यह जिह्वाबंध गुरुमुखसे जानना चाहिये जिह्वाबंध मूलबंधका विस्तार ५७ । ५८ श्लोकमें कहेंगे) तथा चिबुक (ढोडी) को चार अंगुल अंतर छोडकर छातीसे लगाय मंद मंद वायुको उठावे. यह मूलबंध है. (यहभी गुरुमुखबोध्य हैं) यह पद्मासन मत्स्येन्द्रनाथके मतका है. संपूर्णरोगोंको नष्ट करताहैं. जो संसारमें भाग्यहीन हैं. उनको दुर्लभ है. बुद्धिमान् एवं पुण्यवान् पुरुषोंको गुरुकृपासे मिलताहै । १ । २ । ३ ।

अथ षट्चक्रनिरूपणम् ।

षट्चक्रं षोडशाधारं द्विलक्ष्यं व्योमपञ्चकम् ।
स्वदेहे ये न जानन्ति कथं सिद्ध्यन्ति योगिनः १३॥

विषमवासनासे मन चंचल रहताहै रोकेसे रुकता नहीं विना मन रोके योगसिद्धि नहीं होती. मन रोकनेके लिये कुछ निमित्त (अवलंबन) अवश्य होना चाहिये. इस हेतु छः चक्र, सोलह आधार, दो लक्ष्य, पांच आकाश, ये चार प्रकार भेद (सर्व उन-

तीस) कहते हैं, कि मूलाधार, स्वाधिष्ठान, मणिपूर, अनाहत, विशुद्ध, आज्ञा ये छः चक्र हैं इनका विस्तार आगे कहेंगे आधार सोलह हैं इनके विशेषविस्तार अतिगुह्य होनेसे श्रीगोरक्षनाथने यहां प्रगट नहीं कहे और इनके प्रकटताविना सर्वसाधारणको बोध होना असंभव है इसलिये जैसा गुरुकृपासे जाना. यहां ग्रंथान्तरीयमतसे प्रकट करता हूं.प्रथम आधार पादांगुष्ठ है इसपर एकाग्रदृष्टि करके ज्योति चैतन्य करे इससे दृष्टि स्थिर होतीहै १। दूसरा आधार मूलाधार. इसे पावोंकी एडीसे अचेतन करना इससे अग्नि दीप्त होतीहै २। तीसरा गुह्याधार. इसके संकोचविकाशके अभ्यास करनेसे अपना वायु फिरके वज्रगर्भनाडीमें प्रवेश कर बिंदुचक्रमें जाताहै इससे शुक्रस्तंभन एवं (वज्रोली) रेत योनिमें पात न करके पुनः आकोचनक्रमसे वज्रनाडीद्वारा बिंदुस्थानमें प्राप्त करनेकी सामर्थ्य होती है ३।४। पंचम उड्डीयानबंध आधार है. पश्चिमतान आसन बांधके गुदाको संकोचन करे इससे मल मूत्र कृमिका नाश होताहै ५। छठा नाभिमंडलाधार. जिसमें चैतन्य ज्योतिःस्वरूपका ध्यान करनेसे एवं प्रणवके जपसे नाद उत्पन्न होता है ६। सातवां हृदयाधार. इसमें प्राणवायुको रोध करनेसे हृदयकमल विकासित होता है ७। आठवां कंठाधार. इसमें ढोडी हृदयपर दृढ लगायके ध्यान करे तो इडा पिंगलामें वहताहुआ वायु स्थिर होता है ८। नवम क्षुद्रघंटीकाधार. कंठमूल है इसमें जो दो लिंगाकार ऊपरसे लटकती हैं उनतक जिह्वा पहुंचावे तो ब्रह्मरंध्रमें चंद्रमंडलसे वहताहुआ अमृतरस मिलता है ९। दशम

जिह्वामूलाधार. इसमें खेचरीमुद्राके प्रकारसे जिह्वाग्रसे मथन करे तो खेचरीसिद्धि होती है १०। ग्यारहवां जिह्वाका अधोभागाधार. जिसमें जिह्वाग्रसे मथन करके दिव्यकविताशक्ति होतीहै ११। बारहवां ऊर्ध्वदंत मूलाधार. जिसमें जिह्वाग्रस्थापनके अभ्याससे रोगशांति होती है १२। तेरहवां नासिकाग्राधार. जिसमें दृष्टि स्थिर करनेसे मन स्थिर होता है १३। चौदहवां नासिकामूलाधार. जिसमें दृष्टि स्थिर करनेसे छः महीनेके निरंतर अभ्यासकरके ज्योति प्रत्यक्ष होती है १४। पंद्रहवां भ्रूमध्याधार. जिसमें दृष्टि अचलदृष्टिके अभ्यास करके सूर्यकिरणोंके समान ज्योति प्रकाश होती है इसी अभ्यासके दृढ होनेपर सूर्य्याकाशमें मनका लय होता है १५। सोलहवां नेत्राधार. जिनके मूलमें अंगुलिसे मीचनेमें वर्तुलाकार बिंदुसमान इंद्रधनुषके समान रंगकी ज्योति है इस ज्योतिके देखनेका अभ्यासकरके ज्योति प्रत्यक्ष होतीहै १६ ये सोलह आधार हैं. अथवा मूलाधार १ स्वाधिष्ठान २ मणिपूर ३ अनाहत ४ विशुद्ध५ आज्ञाचक्र ६ बिंदु ७ अर्द्धेंदु ८ रोधिनी ९ नाद १० नादांत ११ शक्ति १२ व्यापिका १३ समनी १४ रोधिनी१५ध्रुवमंडल १६ ये सोलह (१६) आधार हैं ब्रह्म तथा अपनेमें अभेद समझकर भावना करनेसे सिद्धि होती है अब दो लक्ष्य कहते हैं ये दो प्रकार बाह्य आभ्यंतरीय हैं देखनेके उपयोगी नासिका तथा भ्रूमध्य इत्यादि बाह्यलक्ष्य हैं मूलाधारचक्र, हृदयकमल इत्यादि आभ्यंतरलक्ष्य हैं. अथ पांच आकाश इस प्रकार

हैं कि प्रथम श्वेतवर्ण ज्योतिरूप आकाश है इसके भीतर रक्तवर्ण ज्योतिरूप प्रकाश है इसके भीतर धूम्रवर्ण ज्योतिरूप महाकाश है इसके भीतर नीलवर्ण ज्योतिस्वरूप तत्त्वाकाश है इसके भीतर विद्युत् (बिजुली) के वर्णका ज्योतिस्वरूप सूर्याकाश है ये पांच आकाश हैं इतने ६ चक्र १६ आधार ३ लक्ष्य ५ आकाश शरीरमें हैं इन्हें जो योगी नहीं पहचानता उसको योगसिद्धि नहीं होती ॥ १३ ॥

एकस्तम्भं नवद्वारं गृहं पञ्चाधिदैवतम् ।
स्वदेहे ये न जानन्ति कथं सिद्ध्यन्ति योगिनः ॥१४॥

शरीरस्तंभरूपी गृह है इसमें सकलवासनाओंका आश्रय मन है यही खंभारूप होकर समस्तशरीरको थामे रहताहै जिसके मुख १ नेत्र २ नासिका २ कर्ण २ गुह्य १ लिंग १ ये ९ द्वार हैं तथा पृथ्वी, जल, तेज, वायु, आकाश पंचतत्त्वोंके ब्रह्मा, विष्णु, रुद्र, ईश्वर, सदाशिव अधिदेवता हैं ऐसे शरीररूपी गृहको जो योगाभ्यासी नहीं जानता वह योगसिद्धि कैसे पासकताहै ॥ १४ ॥

चतुर्दलं स्यादाधारं स्वाधिष्ठानं च षड्दलम् ।
नाभौ दशदलं पद्मं सूर्यसंख्यादलं हृदि ॥ १५ ॥
कण्ठे स्यात् षोडशदलं भ्रूमध्ये द्विदलं तथा ।
सहस्रदलमाख्यातं ब्रह्मरन्ध्रे महापथे ॥ १६ ॥

षट्चक्रोंके पृथक् वर्णन है कि प्रथम मूलाधारचक्र गुदद्वारमें

पीले वर्णका अधोमुख कमल है जिसके ४ दलोंमें व, श, ष, स; बीज शोभित हैं आठों दिशामें आठ शूलोंसे वेष्टित पीतवर्ण मध्य कर्णिकामें चतुष्कोण भूमंडलके भीतर, हाथीके ऊपर आरूढ जिसके पार्श्व (बगल) में (लं) बीज है और चार हाथ चार मुखका ब्रह्मा कोटिसूर्य्यसमान प्रकाशमान एवं डाकिनीशक्तिसे युक्त है वहीं देदीप्यमान त्रिकोणाकार कामाख्य पीठ है तिसके मध्य-में पश्चिममुख स्वयंभू लिंग है उसके बीचमें बिजुली समान च-मकवाली साढे तीन फेरे (वृत्त) से वेष्टित होकर, सुषुम्णाके द्वा-रको रोकके सोया हुआ सर्प जैसी कुण्डलिनी महाशक्ति है जैसे पृथ्वीका आधार शेष तैसेही शरीरका आधार यह है विना इसके जागे और उपाय योगके व्यर्थ हैं. इसलिये प्रथम इसका बोधन करना मुख्य है १ । दूसरा स्वाधिष्ठानचक्र. लिंगमूलमें रक्तवर्ण ऊर्ध्वमुख षड्दल ब, भ, म, य, र, ल इन ६ वर्णोंसे शोभित कमल है शुक्रवर्ण कर्णिकामें अर्द्धचंद्राकार जलमंडल है इसके बीचमें (वं) बीज है जिसके पार्श्व (बगल) में श्रीवत्सकौस्तुभ पीतांबर वनमालाओंसे शोभित चतुर्भुज विष्णु शाकिनशिक्ति-सहित हैं २।तीसरा मणिपूरचक्र. नाभिमूलमें नीलवर्ण ऊर्ध्वमुख दशदल कमल ड, ढ, ण, त, थ, द, ध, न, प, फ इन १० व-र्णोंसे शोभित है मध्यकर्णिकामें स्वस्तिकाकार तेजोमंडल है. इसके मध्यमें सूर्यके समान तेजधारी मेषवाहन (रं) बीज चतुर्भु-ज है इसके पार्श्वमें रक्तवर्ण विभूतिभूषित, नीलवर्ण, चतुर्भुज लाकिनीशक्तिसहित महारुद्र हैं ३। चौथा अनाहतचक्र. हृदयमें

द्वादशदलकमल ऊर्ध्वमुख क, ख, ग, घ, ङ, च, छ, ज, झ, ञ ट, ठ इन १२ बीजोंसे शोभित है उसके कर्णिकामें धूम्रवर्ण, षट्कोण वायुमंडलके मध्यमें धूम्रवर्ण, चतुर्बाहु, कृष्णमृगवाहन (यं) बीज है. इसके पार्श्वमें अभयमुद्रा धारण करके काकिनीशक्तिसहित ईश्वर हैं कर्णिकाके त्रिकोणमें सुवर्णवर्ण बाणालिंग है यह पूर्णागिरि पीठ कहाता है ४। पांचवां विशुद्धचक्र. कंठस्थानमें रक्तवर्ण, ऊर्ध्वमुख, षोडशदलकमल अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, ओ, औ, अं, अः इन १६ वर्णोंसे शोभित है स्फटिकवर्णकर्णिकामें वर्तुलाकार आकाशमंडल जिसमें निष्कलंक पूर्णचंद्रमा है इसके मध्यमें श्वेतहाथी वाहन, पाश, अभय, वर, अंकुश, धारण करता आकाश बीज (हं) इसके पार्श्वमें शाकिनीशक्तिसहित सदाशिव हैं यह जालंधरपीठ कहाता है ५। छठा आज्ञाचक्र. भ्रूमध्यमें श्वेतवर्ण ऊर्ध्वमुख द्विदल ह, क्ष, इन २ बीजोंसे शोभित कमल है इसके कर्णिकामें हाकिनीशक्तिसहित शिव है कर्णिकाके त्रिकोणमें, इतरलिंग नामा शिवलिंग है यही मनका स्थान है उड्डीयानभी इसीको कहते हैं ६। इसके ऊपर सहस्रदलकमल ब्रह्मरंध्रमें श्वेतवर्ण पूर्णचंद्रसमान मुख परमानंदस्वरूप ह, ळ, क्ष इन ३ वर्णोंसे शोभित है त्रिकोणकर्णिकामें पूर्णचंद्रमंडल जिसके मध्यमें बिजुलीके समान चमकीला परमानंदरूप देदीप्यमान ज्योति है इसमें चिदानंदस्वरूप परमशिव विराजमान हैं इनके पार्श्वमें सहस्रसूर्यके समान तेजधारी प्रबोधस्वरूप अर्धचंद्राकार निर्वाणकला

विराजमान है. इसके बीचमें कोटिसूर्यसमान तेजधारी रोमसमान सूक्ष्म निर्वाणशक्ति विराजमान है इनके मध्यमें मन तथा वचनसे अगम्य केवल योगसे गम्य चिदानंदस्वरूपसे पर क्या अतिपर परम शिवपद है जिसको परब्रह्मपद कहते हैं विराजमान हैं जिसके निमेषोन्मेष अर्थात् पलक खोलने मीचनेमें सृष्टि उत्पन्न और नष्ट होती है ॥ १५ ॥ १६ ॥

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ।
योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ॥ १७ ॥

पहिला मूलाधार स्वाधिष्ठान इन दो चक्रोंके बीचमें योनिस्थान है यही कामरूप पीठ है. अर्थात् मूलाधारके कर्णिकामें कामरूप पीठ है ॥ १७ ॥

आधाराख्ये गुदस्थाने पङ्कजं च चतुर्दलम् ।
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता१८॥

मूलाधार (गुदा) में जो चतुर्दलकमल विख्यात है उसके मध्यमें त्रिकोणाकार योनि है जिसकी वंदना समस्त सिद्धजन करते हैं पंचाशत् वर्णसे बनी हुई कामाख्या पीठ कहाती है॥ १८॥

योनिमध्ये महालिङ्गं पश्चिमाभिमुखस्थितम् ।
मस्तके मणिवद्बिम्बं यो जानाति स योगवित्॥१९॥

पूर्वोक्त त्रिकोणाकारयोनिमें सुषुम्णाद्वारके संमुख स्वयंभू नाम करके जो महालिंग है उसके शिरमें मणिके समान देदीप्यमान बिंब है यही कुंडलिनी जीवाधार शरीराधार मोक्षद्वार है इसे जो सम्यक् प्रकारसे जानता है उसे योगवित् कहते हैं॥ १९॥

तप्तचामीकराभासं तडिल्लेखेव विस्फुरत् ।
त्रिकोणं तत्पुरं वह्नेरधो मेढ्रात्प्रतिष्ठितम् ॥ २० ॥

मेढ्र (लिंगस्थान) से नीचे मूलाधारकर्णिकामें रहता तपे हुए सुवर्णके समान वर्ण, एवं बिजुलीके समान चमकदमकवाला जो त्रिकोण है वही कालाग्निका स्थान है ॥ २० ॥

यत्समाधौ परं ज्योतिरनन्तं विश्वतोमुखम् ।
तस्मिन् दृष्टे महायोगे यातायातान्न विन्दते ॥ २१ ॥

इसी त्रिकोणविषय समाधिमें अनंत विश्व (संसार) में व्याप्त होनेहारी परमज्योति प्रकट होती है वही कालाग्निका रूप है जब योगी ध्यान, धारणा, समाधिकरके उक्त ज्योतिको देखने लगता है तो उसको जन्ममरण नहीं होते अर्थात् अजरामर हो जाता है ॥ २१ ॥

स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयः ।
स्वाधिष्ठानाश्रयादस्मान्मेढ्रमेवाभिधीयते ॥ २२ ॥

स्वशब्द प्राण (हंस) का बोधक है इसका आश्रय स्वाधिष्ठान (लिंगमूल) है प्राणका अधिष्ठान होनेसे इसेही मेढ्र कहा जाता है ॥२२॥

तन्तुना मणिवत्प्रोतो यत्र कन्दः सुषुम्णया ।
तन्नाभिमण्डलं चक्रं प्रोच्यते मणिपूरकम् ॥ २३ ॥

नाभिमें एक कंद है. जिससे सर्वांगव्यापिनी सिरा (नसें) निकली हैं जैसे १० नसें ऊपरको हैं जो शब्द, रस, गंध, श्वास, जृंभा, क्षुधा, तृषा, डकार, नेत्रदृष्टि, धारणा (मगजशक्ति)

इन दश कामोंको अपने २ स्थानोंमें दीपन करती हैं तथा १० नसें नीचेको हैं वात, मूत्र, मल, शुक्र, अन्न, पान, रसको नीचे पहुँचाना इनका काम है और चार जिनकी तिर्छी गति है. दो दाहिने बगल दो बायें बगल होकर अगणित सूक्ष्मशाखा बनके सर्वांगमें जालेके नाईं रोमरोम प्रति पूरित हैं उन्हींके मुखोंसे प्रस्वेद देहके बाहर रोमोंमें होके आता है. तथा उन्हींके मार्गोंसे लेप, मर्दनादि पदार्थ भीतर प्रवेश करते हैं. इस प्रकारका नाभिकंद जैसे सूत्रमें मणि पिरोया रहता है ऐसेही सुषुम्णानाडीमें पिरोया है इसे नाभिमंडलस्थ मणिपूरचक्र कहते हैं ॥ २३ ॥

द्वादशारे महाचक्रे पुण्यपापविवर्जिते ।
तावज्जीवो भ्रमत्येव यावत्तत्त्वं न विन्दति ॥ २४ ॥

हृदयमें द्वादशदल अनाहत चक्र है जिसमें तत्त्वातीत (सत्त्वरजस्तमोगुणरहित) जीव है गुणातीत होनेसे पुण्यपापसेभी रहित है परंतु जब तत्त्वकी पहिचान योगाभ्याससे हो जावे तब ये गुण जीवमें आते हैं विना तत्त्वज्ञान जीव संसृतिमें भ्रमणही करता रहता है ॥ २४ ॥

अथ दशनाडीवर्णनम् ।

ऊर्ध्वं मेढ्रादधो नाभेः कन्दो योनिः खगाण्डवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः ॥ २५ ॥

लिंगमूलसे ऊपर नाभिके कुछ नीचे कंदके सदृश समस्त नाडियोंका मूल (उत्पत्तिस्थान) पक्षिके अंडेके समान आकार-

वाला है इससे बहत्तर (७२) हजार नाडी ऊपर नीचे तिर्छी होकर सर्वांग व्याप्त है ॥ २५ ॥

तेषु नाडीसहस्रेषु द्विसप्ततिरुदाहृताः ।
प्रधानाः प्राणवाहिन्यो भूयस्तासु दश स्मृताः॥२६॥

उक्त ७२ हजार नाडियोंमें मुख्य बहत्तरही हैं इनमेंभी प्राणवाहिनी (वायु चलानेहारी) प्रधान दशही नाडी हैं॥२६॥

इडा च पिङ्गला चैव सुषुम्णा च तृतीयका ।
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ॥२७॥
अलम्बुषा कुहूश्चैव शङ्खिनी दशमी स्मृता ।
एतन्नाडीमयं चक्रं ज्ञातव्यं योगिभिः सदा ॥ २८ ॥

इडा १ पिंगला २ सुषुम्णा ३ गांधारी ४ हस्तिजिह्वा ५ पूषा ६ यशस्विनी ७ अलंबुषा ८ कुहू ९ शंखिनी १० ये उक्त मुख्यनाडियोंके नाम हैं. यह नाडीमय चक्र योगाभ्यासीको अवश्य जानने योग्य है तदनंतर इन नाडियोंमें चलनेवाले वायुको जानना तब प्राणायामसे नाडीशोधन होता है॥२७॥२८॥

इडा वामे स्थिता भागे पिङ्गला दक्षिणे स्थिता ।
सुषुम्णा मध्यदेशे तु गान्धारी वामचक्षुषि ॥ २९ ॥
दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे ।
यशस्विनी वामकर्णे ह्यानने चाप्यलम्बुषा ॥ ३० ॥

नासिकाके वामभागमें इडा, दक्षिणभागमें पिंगला नाडी वहती है इनके मध्यमें सुषुम्णा नाडी रहती है इन तीनोंकी जड

मूलाधारचक्रकी कर्णिकाका त्रिकोण है. जिसके वामकोणसे इडा, दक्षिणकोणसे पिंगला और पश्चिमकोणसे सुषुम्णा नाडी उत्पन्न हुई है ये तीनों नाडी उक्तचक्रको अंकमाल किये हैं अपने २ ओरके नासिका छिद्रसे वहती है मध्य सुषुम्णा मूलाधारसे ब्रह्मरंध्रपर्यंत है अन्य नाडी उक्तचक्रके कंदसे उत्पन्न होकर प्रत्येक रंध्रमें है जैसे वामनेत्रमें गांधारी, दक्षिण नेत्रमें हस्तिजिह्वा, दक्षिणकर्णमें पूषा, वामकर्णमें यशस्विनी, मुखमें अलंबुषा हैं ॥ २९ ॥ ३० ॥

कुहूश्च लिङ्गदेशे तु मूलस्थाने च शङ्खिनी ।
एवं द्वारं समाश्रित्य तिष्ठन्ति दश नाडयः ॥ ३१ ॥

लिंगदेशमें कुहू, मूलस्थानमें शंखिनी ये दो उस कंदसे अधोमुख होकर नीचेको गई है और ऊर्ध्वमुख होकर ऊपरको हैं इस प्रकार ये दश नाडी प्राणवायुके एक एक मार्गमें आश्रय करके स्थित हैं ॥ ३१ ॥

इडापिङ्गलासुषुम्णाः प्राणमार्गे समाश्रिताः ।
सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ॥ ३२ ॥

चंद्रमा, सूर्य और अग्नि हैं देवता जिनके ऐसी इडा, पिंगला, सुषुम्णा ये तीन नाडी प्राणवायुके मार्ग हैं ॥ ३२ ॥

अथ दश वायवः ।

प्राणोपानः समानश्चोदानव्यानौ च वायवः ।
नागः कूर्मोऽथ कृकलो देवदत्तो धनंजयः ॥ ३३ ॥

प्राण १ अपान २ समान ३ उदान ४ व्यान ५ नाग ६ कूर्म ७ कृकल ८ देवदत्त ९ धनंजय १० ये दश वायु शरीरमें हैं ॥ ३३ ॥

हृदि प्राणो वसेन्नित्यमपानो गुदमण्डले ।
समानो नाभिदेशे तु उदानः कण्ठमध्यतः ॥ ३४ ॥
व्यानो व्यापी शरीरेषु प्रधानाः पञ्च वायवः ।
प्राणाद्याः पञ्च विख्याता नागाद्याः पञ्च वायवः॥३५॥

प्राणवायु हृदयमें रहकर श्वास बाहर भीतर निकलता तथा अन्नपानादिकोंका परिपाक करता है १ अपानवायु मूलाधारमें मलमूत्र बाहर निकालनेका काम करता है २ समानवायु नाभिमें रसको शुष्क अर्थात् यथास्थान रखनेका काम करता है ३ उदानवायु कंठमें रहकर शरीरकी वृद्धि करता है ४ व्यानवायु सर्वशरीरमें लेना, छोडनाआदि अंगधर्म कराता है ५ वायु तो १० हैं परंतु इनमें प्रधान ये पांचहीं हैं शिवयोगशास्त्रके मतसे मुख, नासिका, हृदय, नाभिमें कुंडलिनीके चारों ओर तथा पादांगुष्ठमें सर्वदा प्राणवायु रहता है १ गुह्य, लिंग, ऊरु, जानु, उदर, पेडू, कटि, नाभि इनमें अपानवायु रहता है २ कर्ण, नेत्र, कंठ, नाक, मुख, कपोल, मणिबंधमें व्यानवायु रहता है ३ सर्वसंधि तथा हाथ पैरोंमें उदानवायु रहता है ४ उदराग्निके कलाको लेकर सर्वांगमें समानवायु रहता है ५ इस कारणसे प्राणादि पांच वायु प्रधान हैं नागादि पांच वायुका कर्म जो चर्म एवं हड्डीमें रहकर जो करते हैं आगे कहते हैं॥ ३४ ॥ ३५॥

उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः ।
कृकरः क्षुतकृज्ज्ञेयो देवदत्तो विजृम्भणे ॥ ३६ ॥

उद्गार (डकार) निकालना नागवायुका कर्म है नेत्रोंके पलक लगाना खोलना कूर्मवायुका तथा छींक करना कृकरवायुका, जृंभा देवदत्तवायुका कर्म है ॥ ३६ ॥

न जहाति मृतं चापि सर्वव्यापि धनंजयः ।
एते सर्वासु नाडीषु भ्रमन्ते जीवरूपिणः ॥ ३७ ॥

और धनंजयवायु सर्वशरीरमें व्याप्त रहता है मृतशरीरमेंभी रहता है अर्थात् मरेमेंभी चार घटीपर्यंत यह शरीरहीमें रहता है इस प्रकार ये दश वायु आपही जीवके अभ्याससे कल्पित होकर सुखदुःखका संबंध जीवको कराते हैं मैं सुखी हूं उत मैं दुःखी हूं इत्यादि व्यवहारमय जीवकी उपाधि लिंगशरीरमें होनेसे आपही जीवरूप होकर समस्त नाडियोंमें फिरता रहता है यद्यपि अविद्यावच्छिन्न चैतन्य जीवही है तो इसका घूमना फिरना असंभव है तथापि जैसे चंद्रमा तो कंपायमान नहीं है परंतु उसका प्रतिबिंब जलमें जिस समय हो उस समय उस जलको हिलाया जाय तो चंद्रबिंब हिलता दीख पडता है ऐसेही व्यवहारसे दश वायुओंका घूमना तथा इनहीकी उपाधि जीवचैतन्यमें आरोपित करते हैं ॥ ३७ ॥

आक्षिप्तो भुजदण्डेन यथोच्छलति कन्दुकः ।
प्राणापानसमाक्षिप्तस्तथा जीवो न तिष्ठति ॥ ३८ ॥

जैसे कंदुक (गेंद) हाथसे भूमिपर ताडनकरके स्वतः उछलता है, तैसेही प्राणवायुके स्थान (हृदय) में अपानवायु तथा अपानवायुके स्थान (गुदा) में प्राणवायुके प्राप्त होनेमें अपानवायु जीवको आकर्षण करके एकत्र स्थित नहीं रहने देता जैसे गेंद खेलनेवालेके वशमें गेंद रहता है ऐसेही अविद्या (माया)-के वशमें जीव रहता है ॥ ३८ ॥

प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च धावति ।
वामदक्षिणमार्गेण चञ्चलत्वान्न दृश्यते ॥ ३९ ॥

जीवकारणसे जीवात्मा प्राणअपानवायुके आधीन है उसी कारणसे इडा और पिंगला नाडीके द्वारा गिरके नीचे मूलाधार-पर्यंत ऊपर मुख नासिकाछिद्रपर्यंत फिरताही रहता है इसके अतिचंचल होनेसे इतना कठिन है कि प्राणापानवायुके साधनविना वायु नहीं जीता जाता इसके जीते विना हृदयकमलमें ध्यान नहीं होता ॥ ३९ ॥

रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥ ४० ॥

जैसे बाजपक्षीके पैरमें डोरी बांधके हिलाके छोड देनेपर उडजाता एवं खींचनेपर फिर हाथमें आ जाता है ऐसेही मायाके अंश सत्त्वरजतमोगुणके वासनासे बँधा हुआ जीव बुद्धिकी लीन हुएमें उपाधिरहित शुद्धब्रह्म हो गया हो तौभी प्राणापानवायुकरके फिर खींचा जाता है जाग्रत्अवस्थामें फिर प्रबुद्ध हुएकी वृत्ति विषयमें पुनः जीवभावको प्राप्त किया जाता है॥ ४०॥

अपानः कर्षति प्राणं प्राणोपानं च कर्षति ।
ऊर्ध्वाधः संस्थितावेतौ संयोजयति योगवित् ॥ ४१ ॥

ऊपरसे आज्ञाचक्रगत प्राणवायु नीचे मूलाधारस्थित अपानवायुको तथा मूलाधारगत अपानवायु आज्ञाचक्रस्थ प्राणवायुको परस्पर अपने २ ओर आकर्षण करते हैं योगाभ्यासी पुरुष प्राणायामसे इनहींको जोडकर योग (जोडना) कहते हैं इसी योग जोडनेको हठयोग कहते हैं जो सूर्यचंद्रमा ऐक्य कहाते हैं॥ ४१॥

हकारेण बहिर्याति सकारेण विशेत्पुनः ।
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ॥ ४२ ॥
षट् शतानि त्वहोरात्रे सहस्राण्येकविंशतिः ।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा ॥ ४३ ॥

प्राणवायु सारूप्यको प्राप्त हो रहा चिदाभास जीव हकारकरके स्वाधिष्ठानचक्रसे उत्पन्न होता है और सकारकरके मूलाधारादि चक्रमें प्रवेश करता है एवंप्रकार ' हंस ' मंत्र (अजपागायत्री) का जप जीव नित्य करताही रहता है अर्थात् श्वास बाहर निकलनेमें हकार भीतर प्रवेश होनेमें सकार उच्चारण होता है सूर्य्योदयसे पुनः सूर्यास्तपर्यंत ६० घटीमें इस मंत्रकी जपसंख्या२१६०० होती है इतना जप जीव स्वतः करता है ॥ ४२ ॥ ४३ ॥

अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अस्याः संकल्पमात्रेण सर्वपापैः प्रमुच्यते ॥ ४४ ॥

अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥ ४५ ॥

यह योगियोंको मोक्ष देनेवाली अजपा नाम गायत्री है इसके संकल्पमात्रसे योगी समस्तपापोंसे छूट जाता है संकल्पकी विधि यह है कि सूर्योदयसे पहिलेही शयनसे उठकर शुद्धवस्त्र पहन हाथ, पैर, मुख प्रक्षालन कर शुद्धआसनमें बैठ आचमन करके संकल्पकल्पना इस प्रकार करना कि अद्येह पूर्वेद्युरहोरात्रचरितनासापुटनिःसृतोच्छ्वासनिःश्वासात्मकषट्शताधिकैकविंशतिसहस्रसंख्याकाजपागायत्रीजपं मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाचक्रब्रह्मरन्ध्रस्थितेभ्यो गणपतिब्रह्मविष्णुरुद्रजीवगुरुपरमात्मभ्यः सिद्धिसरस्वतीलक्ष्मीगौरीप्राणशक्तिज्ञानशक्तिचिच्छक्तिसमेतेभ्यो यथासंख्यं षट्शतं, षट्सहस्रं, षट्सहस्रं, सहस्रमेकं, सहस्रमेकं, सहस्रमेकम् अजपागायत्रीजपं प्रत्येकं निवेदयामि इति निवेद्य । पुनरद्य प्रातःकालमारभ्य द्वितीयप्रातःकालपर्यन्तं नासापुटनिःसृतोच्छ्वासनिःश्वासात्मकं षट्शताधिकैकविंशतिसहस्रसंख्याकमजपागायत्रीजपमहोरात्रेणाहं करिष्ये इति जायमानजपसंकल्पं कृत्वा स्वकृत्यमाचरेत् इस अजपाके समान जीवब्रह्मका अभेद कहनेवाला और कोई मंत्र नहीं है यह अल्पश्रममें उत्तम फल देनेवाला है इसके समान और जप नहीं. क्योंकि प्रातःकाल संकल्पमात्र करना है उपरांत खाते पीते चलते उठते बैठते सोते सर्वदा सब अवस्थाओंमें उक्त जप आपसे होताही रहता है और अद्वैतानुभव करानेवाला उसके

समान अन्य कोई ज्ञानशास्त्र पहिलेभी नहीं था और पीछे होनेवालाभी नहीं है ॥ ४४ ॥ ४५ ॥

कुण्डलिन्यां समुद्भूता गायत्री प्राणधारिणी ।
प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित् ॥ ४६ ॥

कुंडलिनी महाशक्तिसे उत्पन्न हो रही. तथा प्राणवायुको धारण करनेवाली यही अजपा गायत्री है. जीवात्माकी शक्ति प्राणविद्यास्वरूपभी यही है इसी कारण महाविद्याभी इसको कहते हैं इसे जो योगी पहिचान सके वही योगशास्त्राभ्यासका तात्पर्य जानता है ॥ ४६ ॥

अथ शक्तिचालनम् ।

कन्दोर्ध्वे कुण्डली शक्तिरष्टधा कुण्डलाकृतिः ।
ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति ॥ ४७ ॥

अब कुंडलिनीके भेद खोलने निमित्त एवं उसकी अधिकता प्रकट करनेके लिये कुंडलिनीका और प्रकारभी स्थान कहते हैं कि समस्त ७२००० नाडियोंका उत्पत्तिस्थान पूर्वोक्त कंद है इसके ऊपर मणिपूरचक्र कर्णिकामें आठ वृतकरके वेष्टित हो रही कुंडलिनीशक्ति ब्रह्मरंध्रद्वारके मुखको रोकके सर्वदा रहती है ॥ ४७ ॥

येन द्वारेण गन्तव्यं ब्रह्मद्वारमनामयम् ।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥ ४८ ॥
प्रबुद्धा बुद्धियोगेन मनसा मरुता सह ।
सूचीवं गुणमादाय व्रजत्यूर्ध्वं सुषुम्णया ॥ ४९ ॥

जिस मार्ग (सुषुम्णा) करके जन्ममरणके दुःख हरण करनेवाला अखंड ब्रह्मानंदपंद मिलता है उस मार्गको रोकके सोई हुई कुंडलिनी प्राणवायुके धौंकने (उत्तेजन करने) से कालाग्निके ज्योतिके संबंधसे प्रबुद्ध (जाग्रत) होकर मन एवं प्राणवायुके सहित होके सुषुम्णानामा मध्यनाडीसे ऊपरको जाती है जैसे सूची (सुई) अपनेपर पिरोये तागेसहित होनेसे वस्त्रके अनेक सूत्रोंके मध्यमें प्राप्त होती है. तैसे आपही सृष्टि उत्पन्न करके षट्चक्र तथा उनके देवताप्रभृति सकलप्रपंचको उल्लंघन करके ऊपर सहस्रदलकमलके सन्मुख होकर जाती है ॥ ४८ ॥ ४९ ॥

प्रसुप्तभुजगाकारा पद्मतन्तुनिभा शुभा ।
प्रबुद्धा वह्नियोगेन व्रजत्यूर्ध्वं सुषुम्णया ॥ ५० ॥

सोते सर्पके समान कुंडलिनी अपानवायुसे धमित (धौंकी गयी) जो मूलाधारमें रहनेवाली कालाग्निज्योतिके संबंधसे प्रबोध पायके अतिवेग (जोर) से चलते हुए सर्पके समान कुटिलगति होकर कमलनालके तंतु (सूत्र) समान सूक्ष्म ज्योतिर्मयस्वरूप होकर सुषुम्णामार्गसे ऊपरको जाती है ॥ ५० ॥

उद्घाटयेत्कपाटं तु यथा कुञ्चिकया हठात् ।
कुण्डलिन्या तथा योगी मोक्षद्वारं प्रभेदयेत् ॥ ५१ ॥

जैसे कूंची (चावी) से ताला खुलकर कपाट (कवाड) खुल जाते हैं तैसेही कुंडलिनीकरके मोक्षद्वार सुषुम्णाके मुखको

योगी अभ्याससे खोले जिससे कि कुंडलिनीके प्रबोधविना कुंडलिनीका द्वार खुलता नहीं ॥ ५१ ॥

कृत्वा सम्पुटितौ करौ दृढतरं बध्वा तु पद्मासनम् ।
गाढं वक्षसि सन्निधाय चिबुकं ध्यानं च तच्चेतसि ॥
वारंवारमपानमूर्ध्वमनिलं प्रोच्चारयेत्पूरितम् ।
मुञ्चन्प्राणमुपैति बोधमतुलं शक्तिप्रभावादतः ॥५२॥

दोनों हाथ संपुटित करके (अंजली बांधके) दोनों कूर्पर (बाहुमध्यभाग) हृदयमें दृढ स्थापन करके पद्मासन करे चिबुक (ठोडी) हृदयमें दृढतर लगायके अर्थात् जालंधरबंध करके ज्योतिःस्वरूपका ध्यान करे केवल कुंभकप्राणायाम अधोद्वार रोकके करे प्राणायामसे कुंभितवायुको अपानवायुसे एकत्व करके यथाशक्ति कुंभक करे पुनः रेचकप्राणायाम (जिसमें वायु अतिमंद २ निकला) करे इस प्रकारसे कुंडलिनीका बोध होता है तथा योगीको अपरिमित ज्ञान मिलता है. कुंडलिनीको प्रबोध करनेवाली शक्ति चालनमुद्रा यही होती है परंतु प्राणायामके अभ्याससे प्राणापानवायुको वशवर्ती करके इस मुद्राका बहुत कालपर्यंत अभ्यास करना होता है ॥ ५२ ॥

अङ्गानां मर्दनं कृत्वा श्रमसञ्जातवारिणा ।
कट्वम्ललवणत्यागी क्षीरभोजनमाचरेत् ॥ ५३ ॥
ब्रह्मचारी मिताहारी त्यागी योगपरायणः ।
अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्य्या विचारणा ॥५४॥

स्वशब्देन भवेत् प्राणः स्वाधिष्ठानं तदाश्रयः ।
स्वाधिष्ठानात् पदादस्मान्मेढ्रमेवाभिधीयते ॥ २२॥

तन्तुना मणिवत् प्रोतो यत्र कन्दः सुषुम्णया ।
तन्नाभिमण्डलं चक्रं प्रोच्यते मणिपूरकम् ॥ २३॥

द्वादशारे महाचक्रे पुण्यपापविवर्जिते ।

तावज् जीवो भ्रमत्येव यावत् तत्त्वं न विन्दति ॥ २४॥

ऊर्ध्वं मेढ्राद् अधो नाभेः कन्दयोनिः खगाण्डवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः ॥ २५॥

तेषु नाडिसहस्रेषु द्विसप्ततिरुदाहृताः ।
प्रधानं प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ॥ २६॥

इडा च पिङ्गला चैव सुषुम्णा च तृतीयका ।
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ॥ २७॥

अलम्बुषा कुहूश् चैव शङ्खिनी दशमी स्मृता ।
एतन् नाडिमयं चक्रं ज्ञातव्यं योगिभिः सदा ॥ २८॥

इडा वामे स्थिता भागे पिङ्गला दक्षिणे तथा ।
सुषुम्णा मध्यदेशे तु गान्धारी वामचक्षुषि ॥ २९॥

दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे ।
यशस्विनी वामकर्णे चासने वाप्यलम्बुषा ॥ ३०॥

कुहूश्च लिङ्गदेशे तु मूलस्थाने च शङ्खिनी ।
एवं द्वारमुपाश्रित्य तिष्ठन्ति दशनाडिकाः ॥ ३१॥

इडापिङ्गलासुषुम्णा च तिस्रो नाड्युदाहृताः ।
सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ॥ ३२॥

प्राणोऽपानः समानश् चोदानो व्यानौ च वायवः ।
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥ ३३॥

हृदि प्राणो वसेन् नित्यं अपानो गुदमण्डले ।
समानो नाभिदेशे स्यादुदानः कण्ठमध्यगः ॥ ३४॥

उद्गारे नागाख्यातः कूर्म उन्मीलने स्मृतः ।
कृकरः क्षुतकृज्ज्ञेयो देवदत्तो विजृम्भणे ॥ ३५॥

न जहाति मृतं चापि सर्वव्यापि धनञ्जयः ।
एते सर्वासु नाडीषु भ्रमन्ते जीवरूपिणः ॥ ३६॥

आक्षिप्तो भुजदण्डेन यथोच्चलति कन्दुकः ।
प्राणापानसमाक्षिप्तस्तथा जीवो न तिष्ठति ॥ ३८॥

प्राणापानवशो जीवो ह्यधश् चोर्ध्वं च धावति ।
वामदक्षिणमार्गेण चञ्चलत्वान् न दृश्यते ॥ ३९॥

रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते ।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥ ४०॥

अपानः कर्षति प्राणः प्राणोऽपानं च कर्षति ।
ऊर्ध्वाधः संस्थितावेतौ संयोजयति योगवित् ॥ ४१॥

हकारेण बहिर्याति सकारेण विशेत्पुनः ।
हंसहंसेत्यमुम मन्त्रं जीवो जपति सर्वदा ॥ ४२॥

षट्शतानित्वहोरात्रे सहस्राण्येकविंशतिः ।
एतत्सङ्ख्यान्वितं मन्त्र जीवो जपति सर्वदा ॥ ४३॥

अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अस्याः सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते ॥ ४४॥

अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥ ४५॥

कुन्दलिन्याः समुद्भूता गायत्री प्राणधारिणी ।
प्राणविद्या महाविद्या यस्तां वेत्ति स योगवित् ॥ ४६॥

कन्दोर्ध्वं कुण्डली शक्तिरष्टधा कुण्डलाकृति ।
ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति ॥ ४७॥

येन द्वारेण गन्तव्यं ब्रह्मस्थानमनामयम् ।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥ ४८॥

प्रबुद्धा वह्नियोगेन मनसा मारुता हता ।
सूचीवद् गुणमादाय व्रजत्यूर्ध्वं सुषुम्णया ॥ ४९॥

प्रस्फुरद्भुजगाकारा पद्मतन्तुनिभा शुभा ।
प्रबुद्धा वह्नियोगेन व्रजति ऊर्ध्वं सुषुम्णया ॥ ५०॥

उद्घटयेत्कपातं तु यथा कुञ्चिकया हठात् ।
कुण्डलिन्या तथा योगी मोक्षद्वारं प्रभेदयेत् ॥ ५१॥

कृत्वा सम्पुटितौ करौ दृढतरं बद्ध्वातु पद्मासनं
गाढं वक्षसि सन्निधाय चिबुकं ध्यात्वा तत्प्रेक्षितम् ।
वारं वारमपानमूर्ध्वमनिलं प्रोच्चारयेत्पूरितं
मुञ्चन्प्राणमुपैति बोधमतुलं शक्तिप्रबोधान्नरः ॥ ५२॥

अङ्गानां मर्दनं कुर्याच्छ्रमजातेन वारिणा ।
कट्वाम्ललवणत्यागी क्षीरभोजनमाचरेत् ॥ ५३॥

ब्रह्मचारी मिताहारी त्यागी योगपरायणः ।
अब्दादुर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा ॥ ५४॥

सुस्निग्धं मधुराहारं चतुर्थांशविवर्जितम् ।
भुज्यते सुरसम्प्रीत्यै मिताहारः स उच्यते ॥ ५५॥

कन्दोर्ध्वं कुण्डली शक्तिरष्टधा कुण्डलाकृतिः ।
बन्धनाय च मूढानां योगिनां मोक्षदा स्मृता ॥ ५६॥

महामुद्रां नमोमुद्रामुड्डियानं जलन्धरम् ।
मूलबन्धं च यो वेत्ति स योगी सिद्धिभाजनम् ॥ ५७॥

शोधनं नाडिजालस्य चालनं चन्द्रसूर्ययोः ।
रसानां शोषणं चैव महामुद्राभिधीयते ॥ ५८॥

वक्षोन्यस्तहनुर्निपीड्य सुचिरं योनिं च वामाङ्घ्रिणा
हस्ताभ्यामवधारितं प्रसरितं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगलं बद्ध्वा शनै रेचयेद्
एषा पातकनाशिनी सुमहती मुद्रा नृणां प्रोच्यते ॥ ५९॥

चन्द्राङ्गेन समभ्यस्य सूर्याङ्गेनाभ्यसेत् पुनः ।
यावत् तुल्या भवेत्सङ्ख्या ततो मुद्रां विसर्जयेत् ॥ ६०॥

न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः ।
अपि मुक्तं विषं घोरं पीयूषमपि जीर्यते ॥ ६१॥

क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः ।
रोगास्तस्य क्षयं यान्ति महामुद्रां तु योऽभ्यसेत् ॥ ६२॥

कथितेयं महामुद्रा महासिद्धिकरा नृणाम् ।

गोपनीया प्रयत्नेन न देया यस्य कस्यचित् ॥ ६३॥

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ६४॥

न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा ।
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥ ६५॥

पीड्यते न स रोगेण लिप्यते न च कर्मणा ।
बाध्यते न स कालेन यो मुद्रां वेत्ति खेचरीम् ॥ ६६॥

चित्तं चरति खे यस्माज्जिह्वा चरति खे गता ।
तेनैषा खेचरी नाम मुद्रा सिद्धैर्निरूपिता ॥ ६७॥

बिन्दुमूलं शरीरं तु शिरास्तत्र प्रतिष्ठिताः ।
भावयन्ति शरीरं या आपादतलमस्तकम् ॥ ६८॥

खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।
न तस्य क्षरते बिन्दुः कामिन्यालिङ्गितस्य च ॥ ६९॥

यावद्बिन्दुः स्थितो देहे तावत्कालभयं कुतः ।
यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति ॥ ७०॥

चलितोऽपि यदा बिन्दुः सम्प्राप्तश्च हुताशनम् ।
व्रजत्यूर्ध्वं हृतः शक्त्या निरुद्धो योनिमुद्रया ॥ ७१॥

स पुनर्द्विविधो बिन्दुः पण्डुरो लोहितस्तथा ।
पाण्डुरं शुक्रमित्याहुर्लोहितं तु महाराजः ॥ ७२॥

सिन्दूरद्रवसङ्काशं रविस्थाने स्थितं रजः ।
शशिस्थाने स्थितो बिन्दुस्तयोरैक्यं सुदुर्लभम् ॥ ७३॥

बिन्दुः शिवो रजः शक्तिर्बिन्दुमिन्दू रजो रविः ।
उभयोः सङ्गमादेव प्राप्यते परमं पदम् ॥ ७४॥

वायुना शक्तिचारेण प्रेरितं तु महारजः ।
बिन्दुनैति सहैकत्वं भवेद्दिव्यं वपुस्तदा ॥ ७५॥

शुक्रं चन्द्रेण संयुक्तं रजः सूर्येण संयुतम् ।
तयोः समरसैकत्वं योजानाति स योगवित् ॥ ७६॥

उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः ।
उड्डीयानं तदेव स्यात्तव बन्धोऽभिधीयते ॥ ७७॥

उदरात्पश्चिमे भागे ह्यधो नाभेर्निगद्यते ।
उड्डीयानस्य बन्धोऽयं तत्र बन्धो विधीयते ॥ ७८॥

बध्नाति हि सिराजालमधोगामि शिरोजलम् ।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः ॥ ७९॥

जालन्धरे कृते बन्धे कण्ठसंकोचलक्षणे ।
पीयूषं न पतत्यग्नौ न च वायुः प्रकुप्यति ॥ ८०॥

पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम् ।
अपानमूर्ध्वमाकृष्य मूलबन्धोऽभिधीयते ॥ ८१॥

अपानप्राणयोरैक्यात् क्षयान्मूत्रपुरीषयोः ।
युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ॥ ८२॥

पद्मासनं समारुह्य समकायशिरोधरः ।
नासाग्रदृष्टिरेकान्ते जपेदोङ्कारमव्ययम् ॥ ८३॥

भूर्भुवः स्वरिमे लोकाः सोमसूर्याग्निदेवताः ।
यस्या मात्रासु तिष्ठन्ति तत्परं ज्योतिरोमिति ॥ ८४॥

त्रयःकालास्त्रयो वेदास्त्रयो लोकास्त्रयः स्वेराः ।
त्रयोदेवाः स्थिता यत्र तत्परं ज्योतिरोमिति ॥ ८५॥

क्रिया चेच्छा तथा ज्ञानाब्राह्मीरौद्रीश्च वैष्णवी ।
त्रिधाशक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति ॥ ८६॥

आकाराश्च तथोकारोमकारो बिन्दुसंज्ञकः ।
तिस्रोमात्राः स्थिता यत्र तत्परं ज्योतिरोमिति ॥ ८७॥

वचसा तज्ञयेद्बीजं वपुषा तत्समभ्यसेत् ।
मनसा तत्स्मरेन्नित्यं तत्परं ज्योतिरोमिति ॥ ८८॥

शुचिर्वाप्यशुचिर्वापि यो जपेत्प्रणवं सदा ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ ८९॥

चले वाते चलो बिन्दुर्निश्चले निश्चलो भवेत् ।
योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् ॥ ९०॥

यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ।
मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् ॥ ९१॥

यावद्बद्धो मरुद्देहे यावच्चित्तं निराकुलम् ।
यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः ॥ ९२॥

अतः कालभयाद् ब्रह्मा प्राणायामपरायणः ।
योगिनो मुनयश्चैव ततो वायुं निरोधयेत् ॥ ९३॥

षट्त्रिंशदङ्गुलोहंसः प्रयाणं कुरुते बहिः ।
वामदक्षिणमार्गेण ततः प्राणोऽभिधीयते ॥ ९४॥

शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम् ।
तदैव जायते योगी प्राणसंग्रहणे क्षमः ॥ ९५॥

बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ।
धारयित्वा यथाशक्ति भूयः सूर्येण रेचयेत् ॥ ९६॥

अमृतं दधिसङ्काशं गोक्षीररजतोपमम् ।
ध्यात्वा चन्द्रमसो बिम्बं प्राणायामी सुखी भवेत् ॥ ९७॥

दक्षिणो श्वासमाकृष्य पूरयेदुदरं शनैः ।
कुम्भयित्वा विधानेन पुरश्चन्द्रेण रेचयेत् ॥ ९८॥

प्रज्वलज्ज्वलनज्वालापुञ्जमादित्यमण्डलम् ।
ध्यात्वा नाभिस्थितं योगी प्राणायामे सुखी भवेत् ॥ ९९॥

प्राणं चोदिडया पिबेन्परिमितं भूयोऽन्यया रेचयेत्
पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया ।
सूर्यचन्द्रमसोरनेन विधिना बिम्बद्वयं ध्यायतः
शुद्धा नाडिगणा भवन्ति यमिनो मासत्रयादूर्ध्वतः ॥ १००॥

यथेष्टं धारणं वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥ १०१॥

॥ इति श्री गोरक्षनाथप्रणीतः गोरक्षशतकं सम्पूर्णम् ॥

http://yogaclassics.org/ Briggs 1938

Proofread by DPD

.. GorakShashatakam 2 ..
was typeset using XƎLaTeX 0.99996
on May 3, 2017

Please send corrections to *sanskrit@cheerful.com*

॥ गोरक्षशतकम् १ ॥

.. GorakShashatakam 1 ..

sanskritdocuments.org

August 2, 2016

.. GorakShashatakam 1 ..

॥ गोरक्षशतकम् १ ॥

Document Information

Text title : gorakShashatakam 1
File name : gorakShashatakam1.itx
Category : shataka
Location : doc_yoga
Language : Sanskrit
Subject : philosophy/hinduism/religion
Proofread by : DPD
Description-comments : From Kuvalayananda Shukla
Latest update : March 29, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

August 2, 2016

sanskritdocuments.org

॥ गोरक्षशतकम् १ ॥

ॐ परमगुरवे गोरक्षनाथाय नमः ।

ॐ गोरक्षशतकं वक्ष्ये भवपाशविमुक्तये ।
आत्मबोधकरं पुंसां विवेकद्वारकुञ्चिकाम् ॥ १॥

एतद्विमुक्तिसोपानमेतत्कालस्य वञ्चनम् ।
यद्व्यावृत्तं मनो मोहादासक्तं परमात्मनि ॥ २॥

द्विजसेवितशाखस्य श्रुतिकल्पतरोः फलम् ।
शमनं भवतापस्य योगं भजति सज्जनः ॥ ३॥

आसनं प्राणसंयामः प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥ ४॥

आसनानि तु तावन्ति यावत्यो जीवजातयः ।
एतेषामखिलान्भेदान्विजानाति महेश्वरः ॥ ५॥

चतुराशीतिलक्षाणां एकमेकमुदाहृतम् ।
ततः शिवेन पीठानां षोडेशानं शतं कृतम् ॥ ६॥

आसनेभ्यः समस्तेभ्यो द्वयमेव विशिष्यते ।
एकं सिद्धासनं प्रोक्तं द्वितीयं कमलासनम् ॥ ७॥

योनिस्थानकमंघ्रिमूलघटितं कृत्वा दृढं विन्यसे-
न्मेढ्रे पादमथैकमेव नियतं कृत्वा समं विग्रहम् ।
स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्यन्भ्रुवोरन्तरं
एतन्मोक्षकवाटभेदजनकं सिद्धासनं प्रोच्यते ॥ ८॥

वामोरूपरि दक्षिणं हि चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविकारहारि यमिनां पद्मासनं प्रोच्यते ॥ ९॥

आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ।
योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ॥ १०॥

आधाराख्ये गुदस्थाने पङ्कजं यच्चतुर्दलम् ।
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता ॥ ११॥

योनिमध्ये महालिङ्गं पश्चिमाभिमुखं स्थितम् ।
मस्तके मणिवद्भिन्नं यो जानाति स योगवित् ॥ १२॥

तप्तचामीकराभासं तडिल्लेखेव विस्फुरत् ।
चतुरस्रं पुरं वह्नेरधोमेढ्रात्प्रतिष्ठितम् ॥ १३॥

स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयः ।
स्वाधिष्ठानाख्यया तस्मान्मेढ्रवाभिधीयते ॥ १४॥

तन्तुना मणिवत्प्रोतो यत्र कन्दः सुषुम्णया ।
तन्नाभिमण्डलं चक्रं प्रोच्यते मणिपूरकम् ॥ १५॥

ऊर्ध्वं मेढ्रादधो नाभेः कन्दयोनिः स्वगाण्डवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः ॥ १६॥

तेषु नाडिसहस्रेषु द्विसप्ततिरुदाहृताः ।
प्राधान्यात्प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ॥ १७॥

इडा च पिङ्गला चैव सुषुम्णा च तृतीयका ।
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ॥ १८॥

अलम्बुषा कुहूश्चैव शङ्खिनी दशमी स्मृता ।
एतन्नाडिमयं चक्रं ज्ञातव्यं योगिभिः सदा ॥ १९॥

इडा वामे स्थिता भागे पिङ्गला दक्षिणे तथा ।
सुषुम्णा मध्यदेशे तु गान्धारी वामचक्षुषि ॥ २०॥

दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे ।
यशस्विनी वामकर्णे चासने वाप्यलम्बुषा ॥ २१॥

कूहुश्च लिङ्गदेशे तु मूलस्थाने च शङ्खिनी ।
एवं द्वारमुपाश्रित्य तिष्ठन्ति दश नाडिकाः ॥ २२॥

सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ।
इडापिङ्गलासुषुम्णा च तिस्रो नाड्य उदाहृताः ॥ २३॥

प्राणापानौ समानश्च ह्युदानो व्यान एव च ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ॥ २४॥

नागाद्याः पञ्च विख्याताः प्राणाद्याः पञ्च वायवः ।
एते नाडिसहस्रेषु वर्तन्ते जीवरूपिणः ॥ २५॥

प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च धावति ।
वामदक्षिणमार्गेण चञ्चलत्वान्न दृश्यते ॥ २६॥

आक्षिप्तो भुवि दण्डेन यथोच्चलति कन्दुकः ।
प्राणापानसमाक्षिप्तस्तथा जीवोऽनुकृष्यते ॥ २७॥

रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते ।

गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥ २८॥

अपानः कर्षति प्राणः प्राणोऽपानं च कर्षति ।
ऊर्ध्वाधः संस्थितावेतौ यो जानाति स योगवित् ॥ २९॥

कन्दोर्ध्वे कुण्डलीशक्तिरष्टधा कुण्डलीकृता ।
ब्रह्मद्वारमुखं नित्यं मुखेनावृत्य तिष्ठति ॥ ३०॥

प्रबुद्धा वह्नियोगेन मनसा मारुता हता ।
प्रजीवगुणमादाय व्रजत्यूर्ध्वं सुषुम्णया ॥ ३१॥

महामुद्रां नमोमुद्रामुड्डियानं जलन्धरम् ।
मूलबन्धं च यो वेत्ति स योगी सिद्धिभाजनम् ॥ ३२॥

वक्षोन्यस्तहनुर्निपीड्य सुचिरं योनिं च वामांघ्रिणा
हस्ताभ्यामवधारितं प्रसरितं पादं तथा दक्षिणम् ।
आपूर्य श्वसनेन कुक्षियुगलं बद्ध्वा शनै रेचयेद्
एषा पातकनाशिनी सुमहती मुद्रा नृणां प्रोच्यते ॥ ३३॥

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ३४॥

ऊर्ध्वं मेढ्रादधो नाभेरुड्डियानं प्रचक्षते ।
उड्डियानजयो बन्धो मृत्युमातङ्गकेसरी ॥ ३५॥

जालन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे ।
न पीयूषं पतत्यग्नौ न च वायुः प्रकुप्यति ॥ ३६॥

पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम् ।
अपानमूर्ध्वमाकृष्य मूलबन्धो निगद्यते ॥ ३७॥

यतः कालभयात् ब्रह्मा प्राणायामपरायणः ।
योगिनो मुनयश्चैव ततः प्राणं निबन्धयेत् ॥ ३८॥

चले वाते चलं सर्वं निश्चले निश्चलं भवेत् ।
योगी स्थाणुत्वमाप्नोति ततो वायुं निबन्धयेत् ॥ ३९॥

षट्त्रिंशदङ्गुलं हंसः प्रयाणं कुरुते बहिः ।
वामदक्षिणमार्गेण ततः प्राणोऽभिधीयते ॥ ४०॥

बद्धपद्मासनो योगी नमस्कृत्य गुरुं शिवम् ।
नासाग्रदृष्टिरेकाकी प्राणायामं समभ्यसेत् ॥ ४१॥

प्राणो देहस्थितो वायुरायामस्तन्निबन्धनम् ।
एकश्वासमयी मात्रा तद्योगो गगनायते ॥ ४२॥

बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ।
धारयित्वा यथाशक्ति भूयः सूर्येण रेचयेत् ॥ ४३॥

अमृतोदधिसङ्काशं क्षीरोदधवलप्रभम् ।
ध्यात्वा चन्द्रमयं बिम्बं प्राणायामे सुखी भवेत् ॥ ४४॥

प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः ।
कुम्भयित्वा विधानेन भूयश्चन्द्रेण रेचयेत् ॥ ४५॥

प्रज्वलज्ज्वलन ज्वाला पुञ्जमादित्यमण्डलम् ।
ध्यात्वा नाभिस्थितं योगी प्राणायामे सुखी भवेत् ॥ ४६॥

रेचकः पूरकश्चैव कुम्भकः प्रणवात्मकः ।
प्राणायामो भवेत्त्रेधा मात्रा द्वादशसंयुतः ॥ ४७॥

द्वादशाधमके मात्रा मध्यमे द्विगुणास्ततः ।
उत्तमे त्रिगुणा मात्राः प्राणायामस्य निर्णयः ॥ ४८॥

अधमे च घनो घर्मः कम्पो भवति मध्यमे ।
उत्तिष्ठत्युत्तमे योगी बद्धपद्मासनो मुहुः ॥ ४९॥

अङ्गानां मर्दनं शस्तं श्रमसंजातवारिणा ।
कट्वम्ललवणत्यागी क्षीरभोजनमाचरेत् ॥ ५०॥

मन्दं मन्दं पिबेद्वायुं मन्दं मन्दं वियोजयेत् ।
नाधिकं स्तम्भयेद्वायुं न च शीघ्रं विमोचयेत् ॥ ५१॥

ऊर्ध्वमाकृष्य चापानं वातं प्राणे नियोजयेत् ।
मूर्धानं नीयते शक्त्या सर्वपापैः प्रमुच्यते ॥ ५२॥

प्राणायामो भवत्येवं पातकेन्धनपातकः ।
एनोम्बुधिमहासेतुः प्रोच्यते योगिभिः सदा ॥ ५३॥

आसनेन रुजो हन्ति प्राणायामेन पातकम् ।
विकारं मानसं योगी प्रत्याहारेण सर्वदा ॥ ५४॥

चन्द्रामृतमयीं धारां प्रत्याहारति भास्करः ।
तत्प्रत्याहरणं तस्य प्रत्याहारः स उच्यते ॥ ५५॥

एका स्त्री भुज्यते द्वाभ्यामागता सोममण्डलात् ।
तृतीयो यो भवेत्ताभ्यां स भवत्यजरामरः ॥ ५६॥

नाभिदेशे भवत्येको भास्करो दहनात्मकः ।
अमृतात्मा स्थितो नित्यं तालुमूले च चन्द्रमाः ॥ ५७॥

वर्षत्यधोमुखश्चन्द्रो ग्रसत्यूर्ध्वमुखो रविः ।
ज्ञातव्यं करणं तत्र येन पीयूषमाप्यते ॥ ५८॥

ऊर्ध्वनाभिरधस्तालु ऊर्ध्वभानुरधः शशी ।
करणं विपरीताख्यं गुरुवक्त्रेण लभ्यते ॥ ५९॥

त्रिधा बद्धो वृषो यत्र रौरवीति महास्वनम् ।
अनाहतं च तच् चक्रं हृदये योगिनो विदुः ॥ ६०॥

अनाहतमतिक्रम्य चाक्रम्य मणिपूरकम् ।
प्राप्ते प्राणं महापद्मं योगित्वममृतायते ॥ ६१॥

विशब्दः संस्मृतो हंसो निर्मलः शुद्ध उच्यते ।
अतः कण्ठे विशुद्धाख्ये चक्रं चक्रविदो विदुः ॥ ६२॥

विशुद्धे परमे चक्रे धृत्वा सोमकलाजलम् ।
मासेन न क्षयं याति वञ्चयित्वा मुखं रवेः ॥ ६३॥

सम्पीड्य रसनाग्रेण राजदन्तबिलं महत् ।
ध्यात्वामृतमयीं देवीं षण्मासेन कविर्भवेत् ॥ ६४॥

अमृतापूर्णदेहस्य योगिनो द्वित्रिवत्सरात् ।
ऊर्ध्वं प्रवर्तते रेतोऽप्यणिमादिगुणोदयः ॥ ६५॥

इन्धनानि यथा वह्निस्तैलवर्ति च दीपकः ।
तथा सोमकलापूर्णं देही देहं न मुञ्चति ॥ ६६॥

आसनेन समायुक्तः प्राणायामेन संयुतः ।
प्रत्याहारेण संयुक्तो धारणां च समभ्यसेत् ॥ ६७॥

हृदये पञ्चभूतानां धारणाश्च पृथक् पृथक् ।
मनसो निश्चलत्वेन धारणा च विधीयते ॥ ६८॥

या पृथ्वी हरितालदेशरुचिरा पीता लकारान्विता
संयुक्ता कमलासनेन हि चतुष्कोणा हृदि स्थायिनी ।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वितं धारयेद्
एषा स्तम्भकरी सदा क्षितिजयं कुर्याद्ध्रुवो धारणा ॥ ६९॥

अर्धेन्दुप्रतिमं च कुन्दधवलं कण्ठेऽम्बुतत्त्वं स्थितं
यत्पीयूषवकारबीजसहितं युक्तं सदा विष्णुना ।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वितं धारयेद्
एषा दुर्वहकालकूटजरणा स्याद्वारिणी धारणा ॥ ७०॥

यत्तालस्थितमिन्द्रगोपसदृशं तत्त्वं त्रिकोणोज्ज्वलं

तेजोरेफमयं प्रवालरुचिरं रुद्रेण यत्सङ्गतम् ।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वितं धारये
एषा वह्निजयं सदा विदधते वैश्वानरी धारणा ॥ ७१॥

यद्भिन्नाञ्जनपुञ्जसान्निभमिदं तत्त्वं भ्रुवोरन्तरे
वृत्तं वायुमयं यकारसहितं यत्रेश्वरो देवता ।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वितं धारयेद्
एषा खे गमनं करोति यमिनां स्याद्वायवी धारणा ॥ ७२॥

आकाशं सुविशुद्धवारिसदृशं यद्ब्रह्मरन्ध्रे स्थितं
तत्राद्येन सदाशिवेन सहितं शान्तं हकाराक्षरम् ।
प्राणं तत्र विनीय पञ्चघटिकाश्चित्तान्वितं धारयेद्
एषा मोक्षकवाटपाटनपटुः प्रोक्ता नभोधारणा ॥ ७३॥

स्तम्भनी द्रावणी चैव दहनी भ्रामणी तथा ।
शोषणी च भवन्त्येवं भूतानां पञ्चधारणाः ॥ ७४॥

कर्मणा मनसा वाचा धारणाः पञ्च दुर्लभाः ।
विधाय सततं योगी सर्वपापैः प्रमुच्यते ॥ ७५॥

सर्वं चिन्तासमावर्ति योगिनो हृदि वर्तते ।
यत्तत्त्वे निश्चितं चेतस्तत्तु ध्यानं प्रचक्षते ॥ ७६॥

द्विधा भवति तद्ध्यानं सगुणं निर्गुणं तथा ।
सगुणं वर्णभेदेन निर्गुणं केवलं विदुः ॥ ७७॥

आधारं प्रथमं चक्रं तप्तकाञ्चनसन्निभम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा मुञ्चति किल्बिषम् ॥ ७८॥

स्वाधिष्ठानं द्वितीयं तु सन्माणिक्यसुशोभनम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा मुञ्चति पातकम् ॥ ७९॥

तरुणादित्यसंकाशं चक्रं च मणिपूरकम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा संक्षोभयेज्जगत् ॥ ८०॥

[verse missing]
विद्युत्प्रभावं हृत्पद्मे प्राणायामविभेदनैः ।
नासाग्रे दृष्टिमादाय ध्यात्वा ब्रह्ममयो भवेत् ॥ ८२॥

सन्ततं घण्टिकामध्ये विशुद्धं चामृतोद्भवम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा ब्रह्ममयो भवेत् ॥ ८३॥

भ्रुवोर्मध्ये स्थितं देवं स्निग्धमौक्तिकसन्निभम् ।
नासाग्रे दृष्टिमादाय ध्यात्वाऽनन्दमयो भवेत् ॥ ८४॥

निर्गुणं च शिवं शान्तं गगने विश्वतोमुखम् ।
नासाग्रे दृष्टिमादाय ध्यात्वा दुःखाद्विमुच्यते ॥ ८५॥

गुदं मेढ्रं च नाभिं च हृत्पद्मे च तदूर्ध्वतः ।
घण्टिकां लम्पिकास्थानं भ्रूमध्ये परमेश्वरम् ॥ ८६ ॥

निर्मलं गगनाकारं मरीचिजलसन्निभम् ।
आत्मानं सर्वगं ध्यात्वा योगी योगमवाप्नुयात् ॥ ८७॥

कथितानि यथैतानि ध्यानस्थानानि योगिनाम् ।
उपाधितत्त्वयुक्तानि कुर्वन्त्यष्टगुणोदयम् ॥ ८८॥

उपाधिश्च तथा तत्त्वं द्वयमेवमुदाहृतम् ।
उपाधिः प्रोच्यते वर्णस्तत्त्वमात्माभिधीयते ॥ ८९॥

उपाधिरन्यथाज्ञानं तत्त्वं संस्थितमन्यथा ।
समस्तोपाधिविध्वंसि सदाभ्यासेन योगिनाम् ॥ ९०॥

आत्मवर्णेन भेदेन दृश्यते स्फाटिको मणिः ।
मुक्तो यः शक्तिभेदेन सोऽयमात्मा प्रशस्यते ॥ ९१॥

निरातङ्कं निरालम्बं निष्प्रपञ्चं निराश्रयम् ।
निरामयं निराकारं तत्त्वं तत्त्वविदो विदुः ॥ ९२॥

शब्दाद्याः पञ्च या मात्रा यावत् कर्णादिषु स्मृताः ।
तावदेव स्मृतं ध्यानं तत्समाधिरतः परम् ॥ ९३॥

यदा संक्षीयते प्राणो मानसं च विलीयते ।
तदा समरसैकत्वं समाधिरभिधीयते ॥ ९४॥

[verse missing]
धारणाः पञ्चनाड्यस्तु ध्यानं च षष्ठिनाडिकाः ।
दिनद्वादशकेनैव समाधिः प्राणसंयमः ॥ ९६॥

न गन्धं न रसं रूपं न स्पर्शं न च निःस्वनम् ।
आत्मानं न परं वेत्ति योगी युक्तः समाधिना ॥ ९७॥

खाद्यते न च कालेन बाध्यते न च कर्मणा ।
साध्यते न च केनापि योगी युक्तः समाधिना ॥ ९८॥

निर्मलं निश्चलं नित्यं निष्क्रियं निर्गुणं महत् ।
व्योमविज्ञानमानन्दं ब्रह्म ब्रह्मविदो विदुः ॥ ९९॥

दुग्धे क्षीरं धृते सर्पिरग्नौ वह्निरिवार्पितः ।

अद्वयत्वं व्रजेन्नित्यं योगवित्परमे पदे ॥ १००॥

भवभयवने वह्निर्मुक्तिसोपानमार्गतः ।
अद्वयत्वं व्रजेन्नित्यं योगवित्परमे पदे ॥ १०१॥

॥ इति श्री गोरक्षनाथप्रणीतः गोरक्षशतकं समाप्तम् ॥

http://yogaclassics.org/ Swami Kuvalayananda and S. A.Shuklas

Proofread by DPD

.. GorakShashatakam 1 ..
was typeset on August 2, 2016

॥ ॐ ॥

गोरक्षसिद्धान्तसंग्रहः

(भाषाटीका सहित.)

प्रकाशक—

श्रीमत्पूज्यपादवोहराधिपतियोगीन्द्र

श्री १०८ श्रीमहन्तपूर्णनाथ जी

(कैसरेहिन्द) गोल्डमेडलिस्ट

प्रोविन्शियल दरबारी

टीकाकार—

सर्वतन्त्रस्वतन्त्रव्याकरणवेदान्ताचार्य

श्री पं० द्रव्येश झा शास्त्री

टीका संशोधक

श्री पं० ज्ञानिराम शास्त्री

प्रथमावृत्ति ०००

सन् १९३८ ई०

मूल्य २)

ॐ

गोरक्षसिद्धान्तसंग्रहः

(भाषाटीका सहित)

प्रकाशक—

श्रीमत्पूज्यपादवोहराधिपतियोगीन्द्र

श्री १०८ श्रीमहन्तपूर्णनाथ जी

(कैसरेहिन्द) गोल्डमेडलिस्ट

ऑफिशियल दरबारी

टीकाकार—

सर्वतन्त्रस्वतन्त्रव्याकरणवेदान्ताचार्य

श्री पं० द्रव्येश झा शास्त्री

टीका संशोधक

श्री पं० ज्ञानिराम शास्त्री

प्रथमावृत्ति 1000 | सन् १९१८ ई० | मूल्य [illegible])

ॐ

भूमिका

नमोगुरुभ्योगुरुपादुकाभ्यो नमः शिवेभ्यः शिवपादुकाभ्यः।
गोरक्षमत्स्येन्द्रजलन्धरेभ्योनमोनमस्तच्छ्रुतपादुकाभ्यः॥

इहचेदवेदीदथसत्यमस्ति। नचेदिहावेदीन्महतीविनष्टिः।

सजातोयेन जातेन यातिवंशः समुन्नतिम्।
परिवर्तिनि संसारे मृतः कोवानजायते॥

सकललोकतन्त्र प्रसिद्ध दोलक्ष्य समस्त प्राणियों के लिए निश्चित हैं प्रथम स्वदेश जाति की उन्नति करना दूसरा परमात्मज्ञान द्वारा नित्य मोक्ष धाम को प्राप्त करना। जो इन दोनों को पूर्ण करता है वह तो मनुष्य जन्म को पूर्ण सफल बनाता है इन में एक लक्ष्य को सिद्ध करने वाले का भी जन्म अंशतः सफल ही कहाता है किन्तु जो दोनों से वञ्चित है उस का जन्म तो नहीं के ही बराबर माना जाता है। इसलिए दोनों लक्ष्यों का मार्ग दिखाने वाली इस पुस्तक का प्रकाश होना साधु और सज्जन पुरुषों के लिए नाथ जी का ही अवतार

होना माननीय है। अत जनता के लाभ के लिए इसका प्रकाशन परमावश्यक है—

यह ग्रन्थ अनेक श्रुति स्मृति तन्त्र पुराण आदिओं से संगृहीत है। इसका संग्रह किसने किया इस विषय का कोई निश्चय नहीं है। यह हस्तलिखित पुस्तक महामहोपाध्याय श्रीमान् गोपीनाथ कविराज जी एम० ए० प्रिन्सिपल क्वीन्स कालेज काशी के पास मे है। उन्होंने उस बृहत् संगृहीत पुस्तक से संक्षेप करके सन् १६२५ ई० मे इसका प्रकाश सरस्वती भवन द्वारा करा दिया है। इसमे प्रधान रूप से अत्याश्रमियों का निरूपण किया गया है, जो कि अवधूत योगी कहाते हैं। चतुर्थाश्रम जो सन्यास है वह साधनावस्था है, उसमे तत्त्वज्ञान के सम्पादक यम नियम प्राणायाम उपासना आदि कर्मों का अनुष्ठान करना ही मुख्य धर्म है जबकि उस साधन को पूर्ण होने से योगी सिद्ध हो जाता है तब उस अनुष्ठान की भी आवश्यकता नहीं रहती है। जैसे जब तक चावल रोटी असिद्ध रहते हैं तब तक अग्नि आदि का व्यापार करना आवश्यक रहता है। जब सिद्ध हो जाते हैं फिर उन व्यापारों की कोई आवश्यकता नहीं रहती है। उसी सिद्धावस्था

को प्राप्त किए हुए योगी अत्याश्रमी अवधूत कहाते हैं। अब उनकी आश्रम में गणना नहीं रहती। आश्रम से अतीत हो जाते हैं उन में सर्वकर्त्तव्यता का निषेध ही वैदिक सिद्धान्त है।

इस अवस्था के निरूपण करने का प्रकार निषेधात्मक है। जैसे सर्वातीत ब्रह्म के उपदेश का प्रकार नेति नेति निषेधरूप है। इसलिए परमार्थरूप से अन्य धर्मों का निषेध अवधूत के लिए किया जाता है न कि व्यावहारिक जनों के लिए। वास्तविक में तो साधनावस्था तक अवधूत योगियों के लिए भी संन्यास आश्रम में कहे हुये यमनियमादि धर्मों का पालन करना ही कहा गया है और यही विशेष सिद्धान्त योगियो के मत में है कि विना सिद्धि किये साधन का त्याग नहीं करना। केवल शाब्दिक अहंब्रह्मास्मि जान कर उतने ही से तुष्ट होकर कृतकृत्य अपने को नहीं मानना। और जो लोग व्यावहारिक हैं उनके लिए श्रुतिस्मृति प्रतिपादित समस्त सनातन धर्म का आचरण करना ही कहा गया है। देवतावाद, मूर्तिपूजा, वर्णाश्रम, इत्यादि सब धर्मों का उल्लेख करके प्रमाणित किया गया है। इसमें तो इतने जोरों से प्रतिपादन किया गया है कि सना-तन धर्म के प्रत्येक सिद्धान्त प्रत्यक्ष सिद्ध हैं योगी लोग इत्या-

मलक की तरह दिखा सकते हैं। और सब दर्शनों से ... सिद्धान्त सर्वोच्च है। किन्तु किसी दर्शन का खण्डन न किया गया है कि अमुक मत ठीक नहीं प्रत्युत उसको दिखाकर प्रमाणित करके उससे भी आगे बढ़कर अपने सि... की सप्रमाण उच्चता दिखाई गई है। उसको अपना अंग लिया है। यह चमत्कार अनुभवी दार्शनिक पुरुषों के ... पर बड़ा प्रभाव डालता है। इसीसे प्रभावित होकर सर्व . दायवलम्बी सज्जनों का हित इस ग्रन्थ से देख कर योगिराज कविराज जी ने इसको प्रकाशित कर दिया है ।

इस योगाश्रम महाविद्यालय के जन्मदाता महन्त श्रीपूर्णनाथ जी महाराज हैं। आप वास्तविक में एक अद्भुत महापुरुष हैं जो पक्षपात छोड़ कर आपकी कृति का अन्वालोचन करेंगे उनका अन्तःकरण ही स्वयं इनके अद्भुत महत्व को स्वीका किए बिना नहीं रहेगा ? आप जब से इस गद्दी पर विराजमा हुए हैं तब से यह स्थान चारों तरफ से चमक उठा। प्रधा स्थान बोहर में है वहां अन्नक्षेत्र (जो कोई आवे सबको भोज देना) यद्यपि स्थान के निर्माण समय से ही है परन्तु यहा से उसका बहुत नियत ठोस प्रबन्ध कर दिया है । जिस

उसमें आगे किसी प्रकार से संकट आने की आशंका नहीं रही। बीकानेर पेड़ी ग्राम में गोशाला की भी वृद्धि कर दी है। बोहर और रोहतक में कितने विशाल भवन किले के समान बनवा दिए हैं। चमत्कार यह है कि इतने काम करते हुए भी आर्थिक उन्नति अर्थात् कईएक लाखों की स्थायी सम्पत्ति करदी है। आपके गुरु महन्त श्री चेतनाथ जी महाराजा बड़े धुरन्धर संस्कृत के विद्वान् थे उनकी इस सम्प्रदाय में संस्कृत विद्या की जागृति के लिए बड़ी अभिलाषा थी। और इसके लिए उद्योग भी करते थे। वर्त्तमान महन्त जो उस समय मे विद्याध्ययन करते थे। इनके हृदय पर संस्कृत विद्या और धर्म के रस ने प्रगाढ़ रूप धारण कर लिया था। मैं अनुभव और परीक्षा करके सच्चे दिल से लिखता हूं कि जिस प्रकार संस्कृत विद्या का अनुराग इनमें देखा। वैसा न मैं अपने में अथवा किसी अन्य में देखता हूं। इसका परिणाम यह हुआ कि गद्दी पर बैठते ही आपने बोहर में पाठशाला खोल दी और नाथों के पढ़ने का अत्यन्त सराहनीय प्रबन्ध कर दिया। फिर पीछे विचार हुआ कि यहां विद्यालय रहने पर जनता जितना लाभ उठाती है

मलक की तरह दिखा सकते हैं। और सब दर्शनों से इस सिद्धान्त सर्वोच्च है। किन्तु किसी दर्शन का खण्डन किया गया है कि अमुक मत ठीक नहीं प्रत्युत उसको दिखाकर प्रमाणित करके उससे भी आगे बढ़कर अपने सिद्धान्त की सप्रमाण उच्चता दिखाई गई है। उसको अपना अंग बना लिया है। यह चमत्कार अनुभवी दार्शनिक पुरुषों के हृदय पर बड़ा प्रभाव डालता है। इसीसे प्रभावित होकर सर्व सम्प्रदायवलम्बी सज्जनों का हित इस ग्रन्थ से देख कर योगिराज कविराज जी ने इसको प्रकाशित कर दिया है।

इस योगाश्रम महाविद्यालय के जन्मदाता महन्त श्रीपूर्णनाथ जी महाराज हैं। आप वास्तविक में एक अद्भुत महापुरुष हैं जो पक्षपात छोड़ कर आपकी कृति का अन्वालोचन करेंगे उनका अन्तःकरण ही स्वयं इनके अद्भुत महत्व को स्वीकार किए बिना नहीं रहेगा? आप जब से इस गद्दी पर विराजमान हुए हैं तब से यह स्थान चारों तरफ से चमक उठा। प्रधान स्थान बोहर में है यहां अन्नक्षेत्र (जो कोई आवे सबको भोजन देना) यद्यपि स्थान के निर्माण समय से ही है परन्तु पहले से उसका बहुत नियत ठोस प्रबन्ध कर दिया है। जिसने

उसमें आगे किसी प्रकार से संकट आने की आशंका नहीं रही। बीकानेर पेडी ग्राम में गोशाला की भी वृद्धि कर दी है। बोहर और रोहतक में कितने विशाल भवन किले के समान बनवा दिए हैं। चमत्कार यह है कि इतने काम करते हुए भी आर्थिक उन्नति अर्थात् कईएक लाखों की स्थायी सम्पत्ति करदी है। आपके गुरु महन्त श्री चेतनाथ जी महाराजा बड़े धुरन्धर संस्कृत के विद्वान् थे उनकी इस सम्प्रदाय में संस्कृत विद्या की जागृति के लिए बड़ी अभिलाषा थी। और इसके लिए उद्योग भी करते थे। वर्त्तमान महन्त जो उस समय में विद्याध्ययन करते थे। इनके हृदय पर संस्कृत विद्या और धर्म के रस ने प्रगाढ़ रूप धारण कर लिया था। मैं अनुभव और परीक्षा करके सच्चे दिल से लिखता हूं कि जिस प्रकार संस्कृत विद्या का अनुराग इनमें देखा। वैसा न मैं अपने में अथवा किसी अन्य में देखता हूं। इसका परिणाम यह हुआ कि गद्दी पर बैठते ही आपने बोहर में पाठशाला खोल दी और नाथों के पढ़ने का अत्यन्त सराहनीय प्रबन्ध कर दिया। फिर पीछे विचार हुआ कि यहां विद्यालय रहने पर जनता जितना लाभ उठाती है

इससे कहीं अधिक लाभ तीर्थक्षेत्र में रहने से उठा सकेगी। और हमारे बारहों पंथ के नाथ तथा इतर साधु और गृहस्थी सब लाभ उठायेंगे इसलिए हरद्वार में यहां जमीन खरीद करके सवालाख के करीब लागत लगाकर इस विशाल भवन योगाश्रम का निर्माण करवाया। और इसकी स्थायिता के लिए एक लाख की जमींदारी (यहां से ५ माइल पर इब्राहीमपुर) खरीद कर के इसके नाम से अर्पण कर दी जो विद्यालय आज महा-विद्यालय रूप में परिणत है २० वर्ष के अन्दर हजारों छात्र पढ़कर इससे निकले हैं और सैकड़ों शास्त्री और आचार्य होकर अनेक स्थानों में अध्यापन और धर्मप्रचार कार्य कर रहे हैं। आश्चर्य यह है कि निज भुजबल से इस महाविद्यालय का जन्म और पालन दोनों ही अकेले कर रहे हैं न कि किसी की सहा-यता से हां इसके कार्य्यक्रम से संतुष्ट होकर गवर्नमेन्ट सौ रुपये मासिक सहायता देती है। साथ २ प्रधान बोहर स्थान में भी आर्थिक कोष उन्नत कर दिया है। और सम्राट् से भी सत्कार प्राप्त किया जो कि कैसरे हिन्द पद से विभूषित हैं। इसी से सज्जन पुरुष जान सकते हैं कि इस भारत माता ने ऐसे सुपुत्र एक महन्त जी को उत्पन्न करके जनता का कितना महोपकार

किया है। संस्कृत माता और उसके सेवक छात्र तथा विद्वान् लोग तो आजन्म इसके ऋणी रहेंगे। जो कि इस घोर विपत्ति में संस्कृत की इतनी बड़ी सेवा कर रहे हैं साधु समाज का भी मुख उज्ज्वलित कर दिया है नाथ सम्प्रदाय के लिए तो कहना ही क्या है। इस अमर वाणी अमृत से मूर्छित को सचेत कर दिया है यह कहना अत्युक्त नहीं होगा। इस विद्यालय में प्राचीन पुस्तक का प्रकाश करना और अन्वेषण करना यह विभाग रक्खा है जिससे साधु तथा जनता का उपकार हो। इसलिए इस पुस्तक से सर्वसाधारण लाभ उठा सके अतः इसकी हिन्दी भाषा करके प्रकाश किया जाय। और इस कुम्भ महोत्सव पर अनेक स्थानों से आए हुए सज्जन साधु महात्माओं की सेवा में उपस्थित (अर्पण) किया जाय ऐसा विचार करके अपने पास से सब व्यय भार उठा कर इसका प्रकाश महन्त जी ने करवाया। इन शुभ कर्मों के लिये महाराज जी का सहस्रशः धन्यवाद भी थोड़ा ही है परमेश्वर से प्रार्थना है कि महाराज जी की यह कीर्ति आसूर्य चन्द्रमा संसार में विद्यमान रहे। किन्तु अल्प समय करीब एक महीना में ही इस समुद्र रूप मन्थरत्न को निकालना पड़ा इसलिए पाठक महानुभावों

से प्रार्थना है कि सज्जन पुरुष हंस की तरह गुण मात्र पर ध्यान देंगें। जिनका अभ्यास है कि नित्यप्रति दूसरे के दोषों को ही चुनना उनके प्रति दोषोद्घाटन करने के लिए ही मेरी प्रार्थना है क्यों कि उनकी गालियां ही मेरे सिद्धान्त को ईश्वर-वादत्व सिद्ध करेंगी। अन्त में उनका भी उपकार भार मेरे ऊपर है जिन्होंने इस कार्य में बड़ी सहायता की है इसलिए पं० श्री ज्ञानीराम शास्त्री को भी धन्यवाद देता हूं। वैद्यराज श्री श्रेयोनाथ जी को भी धन्यवाद है जिनके प्रोत्साहन से यह शुभ कार्य अल्प दिनों में सफल हुआ है। इति शिवम्।

श्री मदादिनाथपदपद्मेषु ग्रन्थकुसुमं समर्प्यते।

इति विबुध विधेयस्य झोपाह्व द्रव्येशस्य ॥

श्री

गोरक्षसिद्धान्तसंग्रहः

मंगलम्

ओं जालन्धरनाथाय नमः ।

निर्गुणं वामभागे च सव्यभागेऽद्भुता निजा ।
मध्यभागे स्वयं पूर्णस्तस्मै नाथाय ते नमः ॥ १ ॥

अलि कुला कुल गण्डक मंडलम् ।
अरुण बिन्दु सुमंडित भालकम् ॥
निखिल सिद्धिकरं गिरिजा सुतम् ।
बहु नमामि शिवाय गजाननम् ॥ १ ॥

भा० टी०—हे स्वात्मानन्द परिपूर्ण सर्वशक्तिमान् नाथ जी आपके वाम भाग में निर्गुण, और अद्भुत आपकी शक्ति दक्षिण भाग में है, अर्थात् निर्गुण और शक्ति दोनों आप में स्थित हैं। आप इन दोनों पर शासन करते हुए इनके मध्य भाग में विराजमान हैं, ऐसे आपको मैं सादर प्रणाम करता हूँ ॥१॥

मुक्ताः स्तुवन्ति पादाग्रे नखाग्रे जीव जातयः।
मुक्तामुक्तगतेर्मुक्तः सर्वत्र रमते स्थिरः ॥२॥

भा० टी०—आपके चरणों के अग्रभाग में स्थित होकर मुक्त और नखों के अग्र भाग में प्राणी समूह (अर्थात् समस्त संसार के प्राणि) आपकी स्तुति करते हैं। आप मुक्त और अमुक्त गति से स्वतन्त्र होकर कूटस्थ गति से सब जगह रमण करते हैं ॥ २ ॥

वामभागे स्थितः शम्भुः सव्ये विष्णु स्तथैव च।
मध्ये नाथः परं ज्योति स्तज्ज्योतिर्मेत्तमो हरम् ॥३॥

भा० टी०—वह नाथ स्वरूप परम ज्योति, मेरे हृदय में फैले हुए अन्धकार को नष्ट करे, जिसके वाम भाग में शम्भु, और दक्षिण भाग में विष्णु विराजमान है ॥ ३ ॥

अस्मिन् मार्गे सर्वश्रेयोमूलभूतो गुरुरेव।
सचाऽवधूत एव नान्यः। स कोऽवधूत इत्यपेक्षायामाह

भा० टी०—इस मार्ग में समस्त कल्याणों का मूल गुरु ही है, और वह गुरु भी अवधूत ही होना चाहिये, अन्य नहीं। वह अवधूत कौन है इसका उत्तर नीचे के श्लोकों से मिलता है—

नोट—यहाँ पर इस प्रथम श्लोक का अर्थ संक्षेप से लिखा गया है, जो पाठक महानुभाव इसका विस्तृत अर्थ देखना चाहें वह ग्रन्थ के अन्त में देखें।

वचने वचने वेदा स्तीर्थानि च पदे पदे ।
दृष्टौ दृष्टौ च कैवल्यं सोऽवधूतः श्रियेस्तु नः ॥४॥
एकहस्ते धृतस्त्यागो भोगश्चैककरे स्वयम् ।
अलिप्तस्त्यागभोगाभ्यां सोऽवधूतः श्रियेस्तु नः ॥५॥

भा० टी०—जिसका प्रत्येक वचन वेद है, अर्थात् ज्ञान से भरा हुआ है। जिसका प्रत्येक चरण तीर्थ है, अर्थात् जिसमें दूसरों को तारने की शक्ति है, और जिसकी दया दृष्टि में कैवल्य है। अर्थात् जिनकी दया दृष्टि पड़ते ही शिष्य के सब दुःख दूर हो जाते हैं। वह अवधूत हमको कल्याण का मार्ग दिखाए। जिसके एक हाथ में त्याग और एक हाथ में भोग है, अर्थात् जिसकी दया दृष्टि से सब कुछ प्राप्त होता है परन्तु आप दोनों से निर्लेप हैं, वह अवधूत हमें कल्याण का रास्ता दिखावे ॥ ४, ५ ॥

उक्तंहिसिद्धसिद्धान्तपद्धतौ—
सर्वान् प्रकृतिविकारानवधुनोतीत्यवधूतः ।

भा०—जो समस्त प्रकृति विकारों से भिन्न है वह अवधूत है। ऐसा सिद्धसिद्धान्तपद्धति में कहा है।

प्रसरं भासयेच्छक्तिः संकोचं भासयेच्छिवः ।
तयोर्योगस्य कर्ता यः स भवेद् सिद्धयोगिराट् ॥६॥

यह सृष्टि संकोच और विकास का खेल है। शक्ति के कारण यह सृष्टि फैलती है और शिव इसको सकुचित अर्थात् अपने में लीन कर लेता है, तात्पर्य यह है कि—जब शक्ति प्रबल होती है तब बहिर्मुख होकर संसार को रचती है। और शिव, प्रबल हो कर शक्ति को जब अपने में लीन कर लेता है। तब प्रलय होता है। इस संकोच-विकास अर्थात् सृष्टि और प्रलय रूप योगका जो कर्ता है वही सिद्धयोगिराजों में उत्तम है ॥ ६ ॥

अवधूतगीतायामुक्तम्—

आब्रह्मस्तम्बपर्यन्तं सम्पूर्णं परमात्मनि ।
भिन्नाऽभिन्नं न पश्यामि तस्याहं पंचमाश्रमी ॥ ७ ॥

ब्रह्मा से लेकर जड़वर्गपर्यन्त सृष्टि को उस सर्वाधार प्रभु से न मैं भिन्न देखता हूं न अभिन्न, मैं उसी का रूप हूं और वर्णाश्रम से अतीत हूं ॥ ७ ॥

सूतसंहितायाम्—

अति वर्णाश्रमी प्रोक्तो गुरुःसर्वाधिकारिणाम् ।
न कस्यापि भवेच्छिष्यो यथाऽहं पुरुषोत्तमः ॥ ८ ॥

यथाह पुरुषोत्तम इति विष्णुं प्रति शिववचनम्,

अतिवर्णाश्रमी साक्षाद् गुरूणां गुरुरुच्यते ।
न तत्समो नाधिकश्चास्मिल्लोकेऽस्त्येव न संशयः ॥९॥

सूत संहिता में वर्णन किया है कि सब वर्णों और आश्रमों से जो अतीत है वही सब वर्णों और आश्रमों का गुरु है। यह

किसी का शिष्य नहीं है। जैसा कि मैं पुरुषोत्तम किसी का शिष्य नहीं हूँ। यह वचन शिवजी महाराज ने विष्णु जी से कहा है। ८ ॥

जो वर्णाश्रम के अभिमान से मुक्त हो गया है। यह गुरुओं का भी गुरु है, उसके बराबर या उससे बढ़ कर संसार में कोई नहीं है। इस में किसी को सन्देह न करना चाहिये। ६ ॥

• उक्तं ब्रह्मबिन्दूपनिषदि—

पक्षपातविनिर्मुक्तं ब्रह्म सम्पद्यते तदा ।
स्वरेण साधयेद् योगमस्वरं भावयेत् परम् ॥
अस्वरेण हि भावेन भावो नाऽऽभाव इष्यते ।
तदेवनिष्कलं ब्रह्म निर्विकल्पं निरंजनम् ॥
तद् ब्रह्माऽहमिति ज्ञात्वा ब्रह्म सम्पद्यते ध्रुवम् ।

योगी, स्वर से योग को सिद्ध करे। यहां योग पद का अर्थ समाधि है, और स्वर पद के अनेक अर्थ हैं, नाक से जो श्वास बाहर निकलता है और भीतर जाता है वह स्वर कहलाता है जैसे कि 'शिव स्वरोदय, में कहा है, उसके द्वारा अर्थात् रेचक पूरक द्वारा कुम्भक रूप समाधि को सिद्ध करे। अथवा स्वर इस पद का 'नादलय' अर्थ भी हो सकता है। परन्तु उसकी प्रक्रिया कठिन है अतः उसका यहां लिखना उपयुक्त नहीं। अथवा स्वर से ओंकारादि निज २ गुरुओं के प्रसाद मंत्रों से। यहां पर स्वर पद साधन है इस से सिद्ध होता है कि सिद्ध

करने योग्य शुद्ध सच्चिदानन्द इस स्वरपद से अभिन्न है उसी की भावना करे। इस में किसी को सन्देह हो कि स्वर से रहित हो जाने पर शून्य हो जायेगा, इस सन्देह को हटाने के लिये कहते हैं-वह अभाव शून्य नहीं है किन्तु भाव रूप है उसका किस प्रकार ध्यान करे सो कहते हैं वह ब्रह्म सब प्रकार के भेद धर्म अधर्म संकल्प विकल्प इत्यादि संसार के व्यवहार से रहित है, वही मैं हूं। इस प्रकार अभेद भावना करे, ऐसी दृढ़ भावना हो जाने पर योगी अवश्य सच्चिदानन्द रूप हो जाता है।

तत्राऽऽशङ्कते—पक्षपात क इति, देहाभिमान एव सः। सोपि क इति। ब्राह्मणोऽहं क्षत्रियोऽहं वैश्योऽहं शूद्रोऽहं पुनरन्त्यजोऽहं ब्रह्मचारी अहं गृहस्थोऽहं वानप्रस्थोऽहं संन्यास्यहमुत्तमोऽहं मध्यमोऽहमधम इत्यादि। संकल्प एव सः। तं संकल्पं विहाय सर्वव्यापकं परमनाथं याथातथ्येन पश्यत्यथ मुक्तो भवति तादृश एव स्यादिति। तथा च वर्णाश्रमादिव्यवहारमतीत्य नाथं साक्षात्कुर्वतो मुक्तिरिति।

यहां कोई शंका करता है कि पक्षपात से क्या तात्पर्य है? देहाभिमान ही पक्षपात है। देहाभिमान क्या है? मैं ब्राह्मण हूं, मैं क्षत्रिय हूं मैं वैश्य हूं शूद्र हूं अंत्यज हूं ब्रह्मचारी गृहस्थ वान-

प्रस्थ या संन्यासी हूँ, अथवा मैं उत्तम मध्यम और अधम हूं, यही देहाभिमान और संकल्प है इस संकल्प को छोड़ कर सर्वव्यापक परमनाथ के दर्शन जब यथार्थ रूप से कर लेता है तब वह वैसा ही होजाता है। तात्पर्य यह है किवर्णाश्रम के व्यवहार से अतीत होने पर श्री नाथजी के साक्षात् कार से मुक्ति प्राप्त होती है।

यदि कोपि वदेद् वर्णाश्रमाचार व्यवहारं त्यक्तवतः परम योगिनो मुक्तिर्भवतु नाम। वर्णाश्रमाचारवतः सा कथं न भवेत्? "कर्मणैव हि संसिद्धिमास्थिता जनकादय" इत्यादीनि कानिचिच्छास्त्रवाक्यान्यवलम्ब्य वदन्ति चा-मुको गृहस्थो मुक्तश्चामुको भिक्षुरिति। तत्रोच्यते—गुणा-नतीत्यैव मुक्तो भवेन्न तु गुणाभिमानीति सम्मतः सिद्धान्तो भवत्येव। वर्णव्यवहारे तु न सम्भवति गुणातीतत्वम् कथं? वर्णमात्रस्यापि गुणनिर्मितत्वादिति। उक्तंच गीतायाम्—"चातुर्वर्ण्यं मया सृष्टं गुण कर्म विभागशः। तस्य कर्तारमपि मां विध्यकर्तारमव्ययम्" तथा च गुण सत्वे न मुक्तिरिति।

तत्र वादी वदति—वर्णाभिमानिनः किं न त्यजन्ति गुणानिति, यदि गुणां स्त्यजेयुस्तर्हि कथं वर्णसद्भावः, गुणमूलकत्वादेव वर्णत्वस्य। तथा चाऽऽश्रमिरं स्यात्। तदा

वादी वदति भवद्भिस्त्वाश्रमिणोपि गुणातीतत्वाभावान्मु-क्तिर्नेत्युच्यते साच भवद्वचनक्रमेणाप्यायास्याति तत्र किमुत्तरामिति।

उच्यते—नैवमाश्रमिणो मुक्तिरायाता, कथम्?

आश्रमाणामपि गुणमूलकत्वात्।

प्रथमतो वर्णव्यवहारेण गुणभजनम्॥

गुणवृत्तिषु च सत्वगुणवृत्तयः उत्तमाः,

रजस्तमो वृत्तयस्ततोनिकृष्टा इति कृत्वा गुणेष्वयुत्त-मादित्वंस्यात्। परन्तु गुणवृत्तित्वं तु सर्वसाधारणम्। अतो नास्ति गुणवृत्तीनां मुक्तिसाधकत्वम्। तत्र दृष्टान्तो यथा—द्वे स्त्रियौ रूपवत्यौ भवतस्तयोर्द्वयोरपि संयोगे न भवेद् गर्भोत्पत्तिः। किन्तु तद्धर्मभिन्नत्वेन पुरुषेणैव सा भवेत्।

किंच सौन्दर्यतारतम्येनैकस्या अपरा अधिका न्यूना वा भवतु नाम, परन्तु भोक्ता तु तयोरपि पुरुष एव। नास्ति तयो रन्योन्यं भोक्तृभोग्यत्वम्। तथा नास्ति वर्णानां साक्षान्मुक्तिविषयेऽन्योन्यंगुरुशिष्यत्वम् किंच, आश्रमिणोपि प्रथमतो वर्णाभिमानेन गुणभाज एव। ते चोत्तरत्रापि प्रारब्धमभिमत्य भोगभाजो भवन्ति, तेन

च प्रारब्ध कर्मणां भोगोऽवश्य इतिकृत्वा कर्मणां सत्यत्वं तावद् दर्शयति, यतो गुणलेश एतेषामपि न निवृत्तो यतो मुक्तत्वपुरुषार्थविहीनास्तेपि नपुंसकप्रायाःसन्तो न मुक्तिश्रियमर्हन्ति । यद्यपि नपुंसकाः पुरुषवेषिणो वर्तन्ते तथापि पुरुषत्वेन सन्ततिसम्पादका न भवन्ति । एवं वेष मात्रेणाश्रमिणोपि सम्मानपूजाद्यर्हन्तु नाम गुरुत्वम् । अतोगुणातीतत्वेन अत्याश्रमिण एव मुक्तिप्रदगुरुत्वम् । नाऽन्यस्य कस्यापीति बहुधा शास्त्रे निरूपितम्

भा० टी—यहां कोई शंका करता है कि वर्णाश्रमों के आचार और व्यवहार को त्यागने वाले परमयोगी को यदि आप मुक्ति का अधिकारी मानते हैं तो यह ठीक है, परन्तु वर्णाश्रमों के आचार का परित्याग किये बिना मुक्ति नहीं होती, यह कैसे हो सकता है। 'जनकादि कर्म से ही सिद्धि को प्राप्त हुए, इत्यादि शास्त्र वाक्यों का आश्रय लेकर बहुत से कहते हैं, कि यह गृहस्थ मुक्त हो गया, वह संन्यासी मुक्त होगया, इसका उत्तर यह है कि-गुणातीत होकर ही मुक्त होता है । गुणाभिमानी मुक्त का अधिकारी नहीं है ! यह सर्व सम्मत सिद्धान्त है ही, और वर्ण व्यवहार में गुणातीत होना सम्भव ही नहीं क्यों कि वर्णों का तो निर्माण गुणों के आधार पर हुआ है ।

जैसा कि गीता में कहा है–मैंने गुण कर्म के विभाग से चारों वर्ण उत्पन्न किये हैं। मैं यद्यपि विकार रहित अकर्ता हूं तथापि चारों वर्णों का निर्माता तू मुझे ही समझ।

इसलिए गुणों के रहते हुए मुक्ति कहाँ ?

वादी फिर शङ्का करता है कि वर्णाभिमानी क्या गुणों को नही छोड़ते ? यदि वे गुणों को छोड दें तो उस २ वर्ण वाले कहला ही कैसे सकते हैं। क्योंकि वर्ण-व्यवहार का मूल कारण ही गुण है इसी प्रकार आश्रमवादी भी, गुणातीत न होने के कारण मुक्ति भागी नहीं हो सकते।

यहां फिर वादी कहता है कि आप तो आश्रम वालों को भी गुणातीत न होने के कारण मुक्ति का अधिकारी नहीं मानते, परन्तु आपने वर्णों को गुण मूलक बताया है आश्रमों को नहीं। इस लिए आपके ही वचन से आश्रम वाले भी मुक्ति प्राप्त कर सकते हैं। इसका क्या उत्तर है ? सुनिये आश्रम वालों का भी मुक्त होना हमारे वचन से सिद्ध नहीं होता क्योंकि आश्रम भी गुणों के आधार पर ही निर्मित हुए हैं। पहले तो वर्णों के अभिमान में गुणों का सेवन होता है। बाद में वर्ण व्यवहार से आश्रम का अभिमान होने पर गुण सम्बन्ध नहीं छूटता। कोई कहे कि रजोगुण तमोगुण निकृष्ट हैं इस लिए ये बन्धन श्रेणी में माने जाय किन्तु सत्वगुण को तो सभी उत्तम मानते हैं उसको आप क्यों बन्धन कोटि में गिनते

हैं। इसका उत्तर यह है कि गुणों की वृत्तियों में भी सत्वगुण की वृत्तियां उत्तम हैं, रजोगुण और तमोगुण की वृत्तियां निकृष्ट हैं। इस प्रकार गुणों की वृत्तियों में उत्तम, मध्यम और अधमपना है। यद्यपि सत्वगुण उत्तम है परन्तु गुण वृत्तिपना उस में भी है इसलिए गुणों की वृत्तियां मुक्ति का प्राप्त स्वरूप नहीं हैं। इस बारे में एक दृष्टान्त दिया जाता है। जैसे दो स्त्रियाँ चाहे कितनी भी रूपवती हों पर उनके संयोग से गर्भोत्पत्ति नहीं हो सकती। वह तो उनसे भिन्न धर्म वाले पुरुष से ही हो सकता है। सौन्दर्य की न्यूनता या अधिकता से उनमें कोई कम या ज्यादा हो, पर भोक्ता उनका पुरुष ही है। उनका आपस में भोक्तृ भोग्य सम्बन्ध नहीं हो सकता, इसी से वर्णाभिमानियों का मुक्ति विषय में आपस में गुरु शिष्य सम्बन्ध नहीं है। आश्रम वालों में भी वर्ण का अभिमान होता है। इसलिए वे भी गुणों की ही सेवा करने वाले हैं, अगले जन्म में भी प्रारब्ध कर्म का फल उन्हें भोगना पड़ेगा, क्योंकि किये हुए कर्मों का भोग आवश्यक है इस प्रकार वे कर्मों को सत्य मानते हैं। इसलिए आश्रमवालों में गुण लेश रहने के कारण मुक्ति योग्य पुरुषार्थ से रहित वे नपुंसकों की तरह मुक्तिरूप सौभाग्य को प्राप्त करने योग्य नहीं हैं। नपुंसक यद्यपि पुरुष वेष में पुरुष जैसा प्रतीत होता है, पर सन्तान तो उत्पन्न नहीं कर सकता, इसी तरह वेष के कारण आश्रम वालों का भी

सम्मान पूजा योग्य गुरुत्व चाहे हो तथापि गुणातीत होने के कारण मुक्ति देने वाला गुरु तो वर्णाश्रमातीत अवधूत ही हो सकता है, और कोई नहीं इसका शास्त्रों में बहुत कथन किया गया है।

उक्तं च कैवल्योपनिषदि—

मू०—विविक्तदेशे च सुखासनस्थः शुचिः समग्रीव शिरः शरीरः। अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य।

भा० टी० जैसा कि कैवल्योपनिषद् में कहा है—

भक्ति पूर्वक गुरु को प्रणाम कर एकान्त स्थान में सुखासन लगाकर गर्दन और शिर और समस्त शरीर को ठीक सीधा करके आश्रम के अभिमान को छोड़ सब इन्द्रियों को रोक कर पवित्र मन से अवधूत ध्यान करे।

तेजोबिन्दूपनिषदि—

मू० लोभं मोहं भयंदर्पं कामं क्रोधं च किल्बिषम्।
शीतोष्णे क्षुत्पिपासे च किल्बिषम्।
न ब्रह्मकुलदर्पं च न मुक्तिग्रन्थिसंचयम्।
न भयं सुखदुःखं च तथा मानाऽपमानयोः॥
एतद्भावविनिर्मुक्तं तद्ग्राह्यं ब्रह्म तत्परम्।

भा० टी०—तेजोपनिषद् में भी कहा है—

लोभ मोह भय दर्प काम क्रोध पाप शीत गर्मी भूख प्यास संकल्प विकल्प सब को त्यागदे। ब्राह्मण कुल का अभिमान

तथा मुक्ति का ग्रन्थि संचय अर्थात् काम क्रोधादि का समूह, भय और मानापमान इन से उत्पन्न सुख दुःख जिसने छोड़ दिया वह ब्रह्म स्वरूप होजाता है, क्योंकि ब्रह्म भी इन सब भावों से रहित है।

अमनस्केऽपि लिखितम्—

मू० कुलाचारविहीनस्तु गुरुरेको हि दुर्लभः।

वर्णाश्रमिष्वमुक्तं नास्ति वर्णाश्रमाचारे सर्वारम्भ परित्याग इति।

पुनरेवं चावधूत एव सन्मार्गदर्शनशीलो भवति, स एव गुरुर्मुमुक्षुभिः कर्तव्यः।

फलितानेकपुण्यानां मुमुक्षूणां हितावहम्॥

साधनं साधनश्रेष्ठमाह योगमतः परम्॥

भा०—अमनस्क नामक ग्रंथ में लिखा है कि वह गुरु अति दुर्लभ है, जिसको कुलाचार का अभिमान नहो, गुरु सर्वारम्भ परित्यागी होना चाहियें, वर्णाश्रमियों में यह बात नहीं हो सकती, इसलिए अवधूत ही सच्चा मार्ग दिखा सकता है,

मुक्ति के चाहने वालों को यही गुरु बनाना चाहिये।

पूर्वजन्मार्जितपुण्य के प्रभाव से मुक्ति की इच्छा करने वाले सब साधनों में श्रेष्ठ परमसाधन योग है।

सिद्धसिद्धान्तपद्धतौ

सन्मार्गश्च योगमार्गस्तदितरस्तु पापण्डमार्गः।

तदुक्तमादिनाथेन—

'योगमार्गेषु तंत्रेषु दीक्षिता स्तांस्तु दूषकाः।
ते हि पापण्डिनः प्रोक्ता स्तथा तैः सहवासिनः॥
योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौस्मृतौ।
शास्त्रेष्वन्येषु सर्वेषु शिवेन कथितं पुरा॥

भा०—सिद्धसिद्धान्तपद्धति में कहा है कि योगमार्ग ही सच्चा मार्ग है बाकी सब पाखण्ड मार्ग है। यही आदिनाथ जी ने भी कहा है कि योगामार्ग में दीक्षित अर्थात् योग मार्गावलम्बियों की जो निन्दा करते हैं। वे सब दूषक और पाखण्डी हैं, और जो उनके साथ रहते हैं, वे भी पाखण्डी हैं। योगमार्ग से उत्तम मार्ग श्रुति स्मृति तथा अन्य शास्त्रों में नहीं है, ऐसा शिव जी ने कहा है।

विवेक मार्त्तण्डे—

योगशास्त्रं पठेन्नित्यं किमन्यैः शास्त्रविस्तरैः।
यत्स्वयं चादि नाथस्य निर्गतं वदनाम्बुजात् ॥

भा०—विवेक मार्तण्ड में भी कहा है—

योगशास्त्र को नित्य पढ़े अन्य वृथा विस्तृत शास्त्रों से क्या लाभ, क्योंकि शास्त्र स्वयं आदिनाथ जी के मुखकमल से निकला है।

ध्यान बिन्दूपनिषदि—

यदि शैलसमं पापं विस्तीर्णं योजनाद्वह, ।
भिद्यतेध्यानयोगेन नान्यो भेदः कदाचन ॥
वर्णाश्रमाभिमानेन वर्तते श्रुतिकिङ्करः।
अभिमानविहीनस्तु वर्तते श्रुतिमूर्धनि ॥
उत्सृज्यसर्वशास्त्राणि जपहोमादि कर्म च।
धर्माधर्म विनिर्मुक्तो योगी योगं समभ्यसेत् ॥
न वेदो वेद इत्याहुर्वेदा वेदो निगद्यते।
परात्मा विद्यते येन स वेदो वेद उच्यते ॥
वर्णधर्मं च सन्ध्या विहिता तस्मान्निरूपकमाह—

जाता है, अंगिरस ने शौनक से कहा–ब्रह्मवादी लोग कहते हैं कि दो विद्याएं जाननी चाहिए परा और अपरा, जिन से ऋग्वेद यजुर्वेद सामवेद अथर्ववेद शिक्षा कल्प निरुक्त छंद ज्योतिष इतिहास पुराण न्याय मीमांसा धर्म शास्त्र यह सब अपरा विद्या है। और परा विद्या वह है जिस से उस अविनाशी ब्रह्म का ज्ञान होता है।

यहां जिस से अक्षर ब्रह्म का ज्ञान हो वह परा विद्या ऐसा कहा गया है सो यह योगविद्या ही है, क्योंकि श्रुति स्मृति पुराणादि सब विद्याएं तो अपरा विद्या में गिनाई गई हैं। परन्तु योगविद्या नहीं गिनाई गई है, इस लिये इन पूर्वोक्त विद्याओं से अलग योग विद्या का परा विद्या होना साफ २ जाहिर होता है।

मू० तदुक्तमात्मोपनिषदि—

अथ परमात्मा नाम यथाक्षरमुपासनीयः।

सच प्राणायामप्रत्याहारसमाधियोगाऽनुमानाध्यात्मचिन्तकं वटकणिकं श्यामाकतंडुलवालाग्रशतसहस्रकल्पनादिभिर्न लभ्यते न जायते न म्रियते न शुष्यते न दह्यते न कम्पते निर्गुणः साक्षीभूतः। शुद्धो निरवयवात्मा केवलः सूक्ष्मो निष्कलो निरंजनो निरभिमानः शब्द स्पर्श

रूप रस गन्ध वर्जितो निर्विकल्पो निराकांक्षः सर्वव्यापी सोऽचिन्त्योऽवर्ण्यश्च पुनात्यशुद्धान्यपूतानि निष्क्रियः संस्कारो नास्ति संस्कारो नास्तीत्येप परमात्मेति।

भा० टी०—आत्मोपनिषद् में भी कहा है-परमात्मा की अक्षरों के अनुसार उपासना करनी चाहिये, उस परमात्मा को प्रत्याहार समाधि योग और अनुमान यथा सम्भव इन सबकी सहायता से आत्मचिन्तन करने वाला धन्य के बीज जैसा साँवक के बीज जैसा बाल की नोंक के सौवें हिस्से जैसा इत्यादि कल्पनाओं से नहीं जाना जा सकता, वह न उत्पन्न होता है। न मरता न सूखता न जलता और न काँपता है। वह निर्गुण साक्षीभूत है, वह शुद्ध निरवयव केवल सूक्ष्म कलारहित अव्यक्त निरभिमान शब्द स्पर्श रूप रस गन्ध इत्यादिकों से रहित निर्विकल्प निराकांक्ष सर्व व्यापक अचिन्त्य और वर्णनातीत है।

पतित पावन क्रियाओं तथा संस्कारों से रहित जो है सो परमात्मा है।

मू०—तं च अमृतनादोपनिषदि स्पष्टमाह—

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत्॥

ब्रह्मपद को ढूंढने वाला रुद्र के ध्यान में संलग्न साधक ओंकाररूपी रथ पर चढ़ कर और विष्णु को सारथी बना जहां तक रथ से जाना चाहिये वहां तक रथ से जाय फिर ठीक स्थान पर रथ को खड़ा कर और उसे छोड़ आगे जाता है।

ओंकार में अ-उ-म् ये तीन मात्रा हैं इनके अध्यक्ष भी विराट् १ हिरण्यगर्भ २ और माया सहित ईश्वर ये तीन हैं, इन तीनों की भावना छोड़ कर केवल ब्रह्म रूप से भावना करे उस भावना का फल अकारादि स्वर और ककारादि व्यञ्जनों से रहित विशुद्ध ब्रह्म पद प्राप्त होना है।

शब्दादि पांच विषय और अतिचंचल मन इनको रोक कर आत्मा के प्रकाश का ध्यान करे इसको प्रत्याहार कहते हैं।

प्रत्याहार ध्यान प्राणायाम और धारणा तर्क तथा समाधि यह षडंग योग कहा जाता है। इस प्रकार समाप्ति तक योग का वर्णन है।

उक्तं च मनुस्मृतौ—

मू०—क्षरन्तिसर्वावैदिक्योजुहोतियजतिक्रियाः।

अक्षरं दुष्करं ज्ञेयं ब्रह्म चैव प्रजापतिः॥

भा०टी०—इत्यादि जितनी वैदिक क्रियाएं हैं वे सब नष्ट होने वाली हैं, अतः इन से उस प्रजापति अक्षर का ज्ञान होना

असम्भव है किन्तु प्रजाओं का अधिष्ठान परब्रह्मस्वरूप ओंकार ही ब्रह्म की प्राप्ति का मुख्य साधन है।

उत्तरगीतायाम्—

यथा घृतेन तृप्तस्य पयसा किं प्रयोजनम्।
एवं तत्पदे प्राप्ते वेदे नास्ति प्रयोजनम्॥
पुराणं भारतं वेदा धर्मशास्त्राण्यनेकशः।
पुत्रदारादिसंसारो योगमार्गस्य विघ्नकृत्॥
मुहूर्तमपि योगस्थो नासाग्रे मनसा अपि।
सर्वं तरति पापं च तस्य जन्म शतार्जितम्॥
अश्वमेधसहस्राणि वाजपेयशतानि च।
एकस्य ध्यानयोगस्य कलां नार्हन्ति षोडशीम्॥

ऋचो यजूंषि सामानि वेदोपनिषदस्तथा ।
योगज्ञानादवाप्नोति ब्राह्मणोऽध्यात्मचिन्तकः ॥

भा० टी०—वायु पुराण में कहा है—
ऋग्वेद यजुर्वेद सामवेद और उपनिषद् इन सबको आत्मचिन्तक ब्रह्मज्ञानी योगज्ञान से प्राप्त कर लेता है।

मू०—मार्कण्डेय पुराणेऽप्युक्तम्—
एतत्ते कथितं ज्ञानं योगं चेमं निबोध मे ।
यं प्राप्य ब्राह्मणो योगी शाश्वतीं मान्यतां व्रजेत् ॥
एवं बहुधा शास्त्रेषु योगस्य प्रशंसा विदितैव ।
तस्या दिङ्मात्रमिदं दर्शितम् ।

भा० टी०—मार्कण्डेय पुराण में कहा है—
यह ज्ञान आप से कहा-अब तू मुझ से योग को समझ जिस को प्राप्त कर के योगी अनन्त प्रतिष्ठा को प्राप्त हो जाता है।

इस प्रकार शास्त्रों में योग की प्रशंसा सब जगह विदित है, यहां तो केवल दिग्दर्शन मात्र किया गया है।

मू०—तस्य योगस्य लक्षणं तु विवेकमार्तण्ड उक्तम्—

योगं चात्र प्रवक्ष्यामि योगं चाऽष्टांगसंयुतम् ।
संयोगं योगमित्याहुः क्षेत्रज्ञपरमात्मनोः ॥
एतस्यैव योगादीन्यङ्गानीति ज्ञेयम् ।
सन्मार्गत्वेन योगस्तु सेव्यो हित्वान्यसाधनम् ।
मुमुक्षुभिर्यतस्तेषां पदप्राप्तिः परा भवेत् ॥
योगिनो वीतसंकल्पा निर्द्वन्द्वाः पुण्यदर्शनाः ।
योगरत्नकरण्डास्ते जघन्यविधिगोचराः ॥

भा० टी०—उस योग का लक्षण विवेक मार्तण्ड में कहा है—

अब योग का वर्णन किया जाता है । योग आठ अंगों से युक्त है । जीवात्मा परमात्मा के संयोग (एक हो जाने को) योग कहते हैं । इस अभेद के योगइत्यादि बहुत से अंग हैं । ऐसा जानना, और साधनों को छोड़ कर मुमुक्षु लोगों को योग का ही सेवन करना चाहिये, यही सर्वोत्तम श्रेष्ठ मार्ग है ।

वे योगी सर्वश्रेष्ठ हैं जो संकल्प विकल्प काम क्रोधादि तथा शीतोष्ण सुख दुःखादि रूप द्वन्द्वों से रहित हैं जिन के ऊपर वेद विधि का अनुशासन नहीं है । योगरूपी रत्नों की खान हैं तथा जिन के दर्शन मात्र से मनुष्य पवित्र हो जाता है ।

भू० तद्भक्तामेव परमपदप्राप्तिरिति तेषां स्वरूपं प्रशंसां चाह कैवल्योपनिषदि—

विविक्तदेशे च सुखासनस्थः शुचिःसमग्रीवशिरः शरीरः। अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥

हृत्पुण्डरीकं विरजं विशुद्धंविचिंत्य मध्येविशदं विशोकम्, अनन्तमव्यक्तमचिंत्य रूपं शिवं प्रशान्तममृतंब्रह्मयोनिम् ॥

तमादिमध्यान्तविहीनमेकंविभुंचिदानन्दमरूप मद्भुतम्। उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशान्तम्।

ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ स ब्रह्मा स शिवः सोऽक्षरः परमः स्वराट्, स एव विष्णुः स प्राणः स आत्मा परमेश्वरः। स एव सर्वं यद्भूतं यच्चभव्यंसनातनंज्ञात्वातंमृत्युमत्येति नान्यः पंथा विमुक्तये ॥

सब रूप सब से विलक्षण और पृथक् होता है। इस प्रकार जहां तहां सिद्धसिद्धान्तपद्धति आदि योगग्रन्थों में वर्णन किया गया है। अधिक जानने वालों को वहीं देखना चाहिए विस्तार होजाने के भय से यहां अधिक नहीं लिखा जाता। इस प्रकार मुक्ति के सब साधनों में सर्वोत्तम योग की मूर्ति अवधूत ही परम पुरुषार्थ में निपुण होते हैं वेही सब के शिरोमणि हैं, उनकी जय होती है।

मोक्ष मार्ग के साधक वर्णाश्रम परिपाटी की परवाह न करने वाले अवधूत योगियों का संक्षेप से वर्णन किया गया है।

मू०—परमः पुरुषार्थस्तु मुक्तिरुक्ता ह्यतस्तु सा। निरूप्यतेऽवधूतानां योगसाधनजं फलम् ॥ परमपुरुषार्थस्तु मुक्तिरित्युक्तम्। सा च नाथस्वरूपेणाऽवस्थानम्।

तत्स्वरूपन्तु गोरक्षोपनिषदि अद्वैतोपरि सदानन्ददेवता ब्रह्मोपनिषदि—स्वयममनस्कमश्रोत्रपाणिपादं ज्योतिर्विदं तत्र लोका न लोका वेदा न वेदा देवा न देवा यज्ञा न यज्ञा माता न माता पिता न पिता स्नुषा न स्नुषा चाण्डालो न चाण्डालः पौल्कसो न पौल्कसः श्रमणो न श्रमणः, पशवो न पशवः तापसो न तापस इत्येकमेव परमिति।

ब्रह्म विन्दौ च—

नैवाचिन्त्यं नचाऽचिन्त्य मचिन्त्यंचिन्त्यमेव च इत्यादि ।

सर्वोपनिषत्सारे—

कथं बन्धः कथं मोक्ष, इत्यादि प्रश्ने अनात्मनो देहादीना रमत्वेनाभिमन्यते सोभिमानआत्मनोबन्धस्तन्निवृत्ति मोक्ष इत्य नेन स्वरूपेणाऽवस्थान मिति सिद्धम् ।

भा० टी० पहले कहा जा चुका है कि परम पुरुषार्थ तो मुक्ति है अतः यही अवधूतों के योग साधन से उत्पन्न होने वाला फल है, उस का निरूपण किया जाता है, यह मुक्ति क्या है ? नाथ रूप से स्थिति का ही मुक्ति कहते हैं । जैसा कि गोरक्षोपनिषद् में कहा है—

अद्वैत के ऊपर सदानन्द देवता है । ब्रह्मोपनिषद् मे भी जो बिना कारण के स्वयं है तथा मन श्रोत्र हाथ पैर इन से रहित प्रकाश स्वरूप है वहां लोक लोक नहीं, वहां वेद वेद नहीं देव देव नहीं, यज्ञ यज्ञ नहीं, माता माता नहीं, पिता पिता नहीं, पुत्र वधू पुत्र वधू नहीं, चांडाल चांडाल नहीं, अन्त्यज अन्त्यज नहीं, भिक्षु भिक्षु नहीं, पशु पशु नहीं, तापस तापस नहीं केवल एक पररूप ही होता है ।

ब्रह्मविन्दूपनिषद् में भी कहा है—

कि यह न सोचने योग्य न विचारने योग्य है विचार योग्य न

होते हुए भी विचार योग्य है, इत्यादि ।

सर्वोपनिषत् सार में कैसे बन्ध और कैसे मोक्ष होता है इत्यादि प्रश्न करके देहादि अनात्मवस्तुओं में आत्मापने का अभिमान ही बन्ध है, और उसकी निवृत्ति ही मोक्ष है । इससे यह सिद्ध हुआ कि आत्मा की अपने रूपस्थिति ही मोक्ष है ।

उक्तंचाऽमनस्के—

भावाभावविनिर्मुक्तं नाशोत्पत्तिविवर्जितम् ।
सर्वसंकल्पनातीतं परब्रह्म तदुच्यते ॥

अवधूतगीतायां च—

अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।
समं तत्त्वंनविन्दन्ति द्वैताऽद्वैतविलक्षणम् ॥
यदि सर्वगतो देवः स्थिरः पूर्णो निरन्तरः ।
अहो माया महामोहो द्वैताद्वैतविकल्पना ॥

श्रीनित्यनाथकृतसिद्धसिद्धान्तपद्धतौ—

न ब्रह्मा विष्णुरुद्रौ, न सुरपतिसुरा नैव पृथ्वी न चापो ।
नैवाग्निर्नापि वायु र्नैव गगनतलं नोदिशो नैव कालः ॥
नो वेदा नैव यज्ञा न च रविशशिनौ नो विधि र्नैव कल्पाः ।
स्वज्योतिः सत्यमेकं जयति तवपदं सच्चिदानन्दमूर्ते ॥

तत्पदेनाऽवस्थानं मुक्तिरिति ।

भा० टी०—अमनस्क में जो भावअभाव से विलक्षण नाश और उत्पत्ति से रहित सब कल्पनाओं से परे है वही परब्रह्म कहा जाता है।

अवधूतगीता में भी कहा है, कि कोई अद्वैत की और कोई द्वैतकी इच्छा करते हैं परन्तु वे सब द्वैताद्वैत विलक्षण समतत्व को नही प्राप्त कर सकते। जबकी परब्रह्म बिना भेद के स्थिर पूर्ण और सर्व व्यापक है तब बड़ा आश्चर्य है कि माया मोह के वशीभूत होकर लोग उस में भी द्वैताद्वैत कल्पना करते हैं। श्री नित्यनाथ कृत सिद्धसिद्धान्त पद्धति में कहा गया है कि हे सच्चिदान्द स्वयं प्रकाश भगवान्? आपके आद्वितीय स्वरूप की जय हो। जहां न ब्रह्मा न विष्णु न रुद्र न इन्द्र और न देव गण हैं। न पृथिवी है न जल है न अग्नि न वायु न आकाश न दिशाएं न काल है, न वेद हैं न यज्ञ अव्यक्त सच्चिदानन्द नाथ रूप में न चन्द्र न सूर्य न विधि और न कल्प हैं ऐसे उस परमात्मा में लीन हो जाना ही मुक्ति है।

मू०नाथस्य लक्षणं राजगुह्ये—

नाकारोऽनादिरूपं थकारः स्थाप्यते सदा।

काष्ठ में लगी हुई अग्नि की ज्वालाएं काष्ठ को भस्म करके स्वयं शान्त होती हैं, वैसे ही नाद में युक्त हुआ चित्त नाद में संयुक्त होकर नाद के साथ ही लय को प्राप्त होता है। नाद में आसक्त मनको तभी छेड़ना चाहिए, जब कि प्राणवायु रूप बाण का सन्धान करना जानता हो। आशय यह है कि अन्तःकरण रूपी मृग के नाद में आसक्त और निश्चल होने में भी हित देखे और उसे प्राण में तभी योजित करे, जबकि प्राणवायु का सुषुम्ना में प्रविष्ट करने में प्रवीणता प्राप्त करले। इस प्रकार मन-प्राण को ब्रह्मरन्ध्र में पहुँचा देना ही अन्तःकरण रूपी मृग पर शर-सन्धान करना है।

व्यापक आत्मा का परम पद वर्णन

अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्लते।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यांतर्गतं मनः।
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ॥१००॥

टीका—अनाहत शब्द की जिस ध्वनि की प्रतीति होती है, उसी के अन्तर्गत ज्ञेय है और ज्ञेय के अन्तगत मन है। वह जहाँ लय को प्राप्त होता है, वह विष्णु का परम पद है ॥१००॥

व्याख्या—ज्ञेय रूप प्रकाशमान चैतन्य बिना ताड़न के उत्पन्न होने वाली शब्द-ध्वनि में रहता है और ज्ञेय में अन्तःकरण रूपी मन का निवास है अर्थात् मन का लय ज्ञेय में होता है और वह ज्ञेय ही सर्व वृत्तियों से शून्य होकर संस्कार मात्र शेष रहने वाल विष्णु का परमपद है।

विष्णु का अर्थ है व्यापक। यहाँ जो परम पद बताया, उसे व्यापक आत्मा का ही परम स्थान समझना चाहिए। इस प्रकार नाद में ज्ञेय रूप चैतन्य आत्मा और ज्ञेय में मन का विलय कहने का अभिप्राय यही है मन का लय आत्मा में ही होता है।

तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्तते।
निःशब्द तत्परं ब्रह्म परमात्मेति गीयते ॥१०१॥
यत्किंचिन्नादरूपेण श्रूयते शक्तिरेव सा।
यस्तत्त्वांतो निराकारः स एव परमेश्वरः ॥१०२॥

टीका—आकाश को तब तक कल्पना होती है, जब तक कि शब्दों का प्रवर्तन होता है तथा शब्द से ही निःशब्द परब्रह्म परमात्मा का मान होता है। नाद रूप से जहाँ जो कुछ सुना जाता है, वह सब शक्ति ही है। जिसमें तत्वों का अन्त होता है, वही निराकार परमेश्वर है ॥१०१—१०२॥

अर्थात्—अनाहत ध्वनि स्वरूप शब्द जब तक श्रवण में आते हैं, तब तक आकाश की कल्पना की जाती है, क्योंकि शब्द

स्वयं ही आकाश स्वरूप है। जब मन के सहित शब्द लय को प्राप्त होता है, तब शब्द-रहित परब्रह्म को ही 'परमात्मा' शब्द से पुकारते हैं। अभिप्राय यह है कि सभी वृत्तियाँ जब विलय को प्राप्त हो जाती है, तब जो स्वरूप से विद्यमान रहे उसी को परमात्मा समझना चाहिए।

नादरूप से अनाहत ध्वनि के रूप में जो कुछ भी सुनाई देता है, वह शक्ति के अतिरिक्त और कुछ नहीं है। अर्थात् नाद शक्ति है और जहाँ तत्व लय होते हैं, वह निराकार अर्थात् रूप-रहित ब्रह्म है। क्योंकि सभी तत्वों का लय परब्रह्म परमेश्वर में ही होता है।

सर्वे हठलयोपाया राजयोगस्य सिद्धये।
राजयोगसमारूढ़ः पुरुषः कालवंचकः ॥१०३॥
तत्त्वं बीजं हठः क्षेत्रमौदासीन्य जलं त्रिभिः।
उन्मनी कल्पलतिका सद्य एव प्रवर्तते ॥१०४॥

टीका—हठ और लय के सभी उपाय राजयोग से सिद्ध हो सकते हैं और जो पुरुष राजयोग पर समारूढ़ हो जाता है, वह काल की वचना करने में समर्थ होता है। तत्व बीज है और हठ क्षेत्र है तथा उदासीनता जल है, इन तीनों से उन्मनी कल्पलता शीघ्र उत्पन्न होकर प्रवृत्त होती है ॥१०३—१०४॥

व्याख्या—यहाँ तत्व का अर्थ चित्त है, उसी को बीज कहा गया है। क्योंकि उन्मनी अस्वथा रूपी अंकुर के आकार द्वारा चित्त ही परिणाम को प्राप्त हो सकता है। हठ की क्रिया है प्राण-अपान ऐक्य होना, उसी हठयोग को क्षेत्र की संज्ञा दी गई है, क्योंकि क्षेत्र के समान जो प्राणायाम होता है, उसी में उन्मनी अवस्था रूपी कल्पना की उत्पत्ति होती है। विषयों से

उदासीनता रूपी परम वैराग्य को जल के समान माना है, क्योंकि उन्मनी रूपी कल्पलता की उत्पत्ति और वृद्धि उदासीनता अर्थात् वैराग्य रूपी जल से हो हो सकती है। इस प्रकार वैराग्य रूपी जल का हेतु चित्त का विशेष संस्कार साधक की तन्मयता रूप समाधि का ही स्वरूप समझना चाहिए। अभिप्राय यह है कि क्रमशः चित्त, हठ और उदासीनता रूपी बीज, क्षेत्र (खेत) और जल इन तीनों के द्वारा असंप्रज्ञात समाधि रूपी उन्मनी कल्पलता की उत्पत्ति शीघ्र हो जाती है। 'विरामप्रत्ययाभ्यास-पूर्वः संस्कार शेषोऽन्यः' (योग दर्शन १।१८) अर्थात्—'जिसकी पूर्व अवस्था विराम प्रत्यय है और जिसमें चित्त की स्थिति संस्कार मात्र में शेष रह जाती है वह असंप्रज्ञात समाधि है।'

परन्तु पूर्व श्लोक में ग्रन्थकार का यह कथन भी अल्प महत्व का नहीं है कि हठ और लय के सभी उपायों की सिद्धि राजयोग से ही सम्भव है, क्योंकि राजयोग का साधक मृत्यु को भी जीत लेता है।

सदा नादानुसंधानात्क्षीयन्ते पापसंचयाः।
निरन्जने विलीयेते निश्चितं चित्तमारुतौ ॥१०५॥

टीका—नाद के अनुसन्धान से सदा संचित पापों का क्षय होता है और चित्त तथा वायु दोनों अवश्य ही लय को प्राप्त होते हैं ॥१०५॥

व्याख्या—जो योगी नाद के अनुसन्धान में लगा रहता है उसके सब प्रकार के पाप निर्मूल होकर चित्त और प्राणवायु दोनों ही ब्रह्मरन्ध्र में विलीन हो जाते हैं। इस कथन से नाद की महिमा और उत्कृष्टता व्यक्त होती है।

उन्मनी अवस्था में चेष्टा रहितता

शंखदुन्दुभिनाद च न शृणोति कदाचन ।
काष्ठवज्जायते देह उन्मन्यावस्थया ध्रुवम् ॥१०६॥

टीका—वह योगी शंख, दुन्दुभी के नाद को कभी नहीं सुनता तथा उन्मनी अवस्था के कारण शरीर काष्ठ के समान हो जाता है, यह निश्चय है ॥१०६॥

व्याख्या—नाद के अनुसन्धान में लगा हुआ योगी जब उन्मनी अवस्था को प्राप्त हो जाता है तब वह काष्ठ के साथ चेष्टा-रहित हो जाता है, क्योंकि उस अवस्था में मन और प्राण का लय होने पर किसी प्रकार की चेष्टा या संज्ञा नहीं रहती और न उसे शंख, दुंदुभी आदि किसी प्रकार का भी शब्द सुनाई नहीं देता। यहाँ शख, दुंदुभी आदि का तात्पर्य शब्द मात्र से है, इसलिए किसी प्रकार का भी शब्द न सुनाई देना समझना चाहिए।

सर्वावस्थाविनिर्मुक्तः सर्वचिंताविवर्जितः ।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः ॥१०७॥

टीका—उस समय वह सभी अवस्थाओं से मुक्त और सभी चिन्ताओं से रहित हो जाता है तथा मृतक के समान अवस्थित रहता हुआ मुक्त ही हो जाता है, इसमें संशय नहीं है ॥१०७॥

व्याख्या—व्युत्थानावस्था पाँच मानी जाती हैं—जाग्रत्, स्वप्न, सुषुप्ति, मूर्च्छा और मरण, साधक उन सभी अवस्थाओं से छुटकारा प्राप्त कर लेता है, तथा उसे किसी भी प्रकार की

चिन्ता न रहने से सभी वृत्तियों के निरोध रूप योग में स्थिति हो जाती है। तब वह मृतक के समान निश्चेष्ट होकर जीवन्मुक्त हो जाता है। 'तदा द्रष्टुः स्वरूपेऽवस्थानम्' (योगदर्शन १।३) अर्थात् 'उस समय द्रष्टा (आत्मा) की अपने स्वरूप में ही अवस्थिति हो जाती है।

खाद्यते न च कालेन बाध्यते न कर्मणा।
साध्यते न स केनापि योगी मुक्तः समाधिना ॥१०८॥

टीका—उसको काल भी नहीं खा सकता, उसे कर्म की भी बाधा नहीं होती। समाधि में अवस्थित वह योगी किसी प्रकार भी साध्य नहीं होता ॥१०८॥

व्याख्या— मृत्यु भी समाधि में युक्त हुए योगी का भक्षण नहीं कर सकती। उसे किसी प्रकार का शुभ-अशुभ कर्म बाधा नहीं पहुँचा सकता और न उस योगी को पुरुष यन्त्र, मन्त्र, तन्त्र, आयुध आदि किसी उपाय से साध्य कर सकता है अर्थात् दबा नहीं सकता। इस प्रकार समाधिस्थ योगी सभी क्लेशों से मुक्त हो जाता है।

न गंधं न रसं रूपं न च स्पर्शं न निःस्वनम्।
नात्मानं न परं वेत्ति योगी युक्तः समाधिना ॥१०९॥

टीका—उस समाधि में युक्त योगी के लिए गंध, रस, रूप स्पर्श, नाद तथा अपने-पराये का ज्ञान भी नहीं रहता ॥१०९॥

व्याख्या— गन्ध दो प्रकार की है—सुगन्ध और दुर्गन्ध। रस छः प्रकार का है—मधुर, अम्ल, कटु, तिक्त, कषाय और लवण। रूप के सात प्रकार हैं—शुक्ल, पीत, नील हरित, लोहित कपिश और चित्र। स्पर्श के तीन भेद हैं—शीत, उष्ण

और अनुष्णाशीत और शब्द के शंख, दुन्दुभी, वीणा, मेघ, समुद्र आदि बाह्य शब्द और नाद रूप आन्तरिक शब्द, इनमें से किसी का भी ज्ञान समाधि में स्थित पुरुष को नहीं रहता। यही नहीं, उस समय वह अपने पराये को भी नहीं जानता।

चित्तं न सुप्तं नो जाग्रत्स्मृतिविस्मृतिवर्जितम् ।
न चास्तमेति नोदेति यस्यासौ मुक्त एव सः ॥११०॥

टीका—जिसका चित्त न सोता है, न जागता और न उसमें स्मति या विस्मृति ही रहती है तथा उसमें वृति का भाव-अभाव ही हो, वह योगी निश्चय ही मुक्त है ॥११०॥

व्याख्या—चित्त के सोने का अभिप्राय आच्छादक तमोगुण का अभाव होना है, क्योंकि त्रिगुणात्मक अन्त.करण में जब सत्व, रज की न्यूनता और तमोगुण को अधिकता होती है, तब अन्तःकरण का परिणामरूप विकार न होने से सुप्तावस्था होती है तथा इन्द्रियों के द्वारा बिषयों का ग्रहण होता है वह जाग्रत अवस्था है। योगी के चित्त पर इन दोनों में से किसी भी अवस्था का प्रभाव नहीं रहता, इसीलिए उसका सुप्त और जाग्रत अवस्थाओं से रहित होना कहा है।

सम्पूर्ण वृत्तियों का अभाव अथवा उद्‌बोध का भाव से स्मृति-राहित्य और स्मृति के जनक संस्कार का अभाव विस्मृति-राहित्य होता है। यह दोनों भी समाधि में स्थित योगी के चित्त में नहीं होते तथा शेष रहे संस्कारों के कारण न उसके चित्त का नाश होता है और न वृत्तियों की उत्पत्ति के अभाव से चित्त का उदय ही होता है, और ऐसा होने से वह योगी मुक्त ही माना जाता है।

न विजानाति शीतोष्णं न दुःखं न सुखं तथा ।
न मानं तापमानं च योगी युक्तः समाधिना ॥१११॥

टीका—समाधि में स्थित योगी शीत, उष्ण, दुःख, सुख, मान, अपमान को भी नहीं जानता ॥१११॥

व्याख्या—समाधि की अवस्था में अवस्थित हुए योगी को शीतादि का मान नहीं होता। वह किसी प्रकार के दुःख से दुःखी और सुख से सुखी नहीं होता। उसे इसकी भी चिन्ता नहीं होती कि कोई उसका सम्मान करता है अथवा अपमान। उसकी ऐसी विकार रहित स्थिति होती है ।

स्वस्थो जाग्रदवस्थायां सुप्तवद्योऽवतिष्ठते ।
निःश्वासोच्छ्वासहीनश्च निश्चितं मुक्त एव सः॥११२॥

टीका—जो योगी स्वस्थ अवस्था में और जाग्रत अवस्था में भी सुप्त के समान अवस्थित रहता हुआ श्वास-उच्छवास से भी रहित हो जाता है, वह निश्चित रूप से मुक्त ही है।॥११२॥

व्याख्या—स्वस्थ अवस्था में इन्द्रियों और अन्तःकरण में प्रसन्नता रहती है तथा जाग्रत अवस्थामें जो इन्द्रियोंका व्यापार होता है, उस सबको त्याग देने के कारण वह योगी सोते हुए के समान हो जाता है और तब न तो वह श्वास लेता और न श्वास छोड़ता है। इस प्रकार निश्चल रूप से स्थित हुआ योगी मुक्त ही है। योगचूडामण्युपनिषत् में भी कहा है—

समाधौ परमंज्योतिरनन्तं विश्वतोमुखम् ।
तस्मिन्दृष्टे क्रियाकर्म यातायातो न विद्यते ॥

अर्थात्—समाधि होने पर जो परमज्योति, अनन्त और विश्वतोमुख का भाव होता है, उससे योगी क्रिया, कर्म और आवागमन से छूट जाता है।

योगी की सर्वथा अवध्यता वर्णन

अवध्यः सर्वशस्त्राणामशक्यः सर्वदेहिनाम् ।
अग्राह्यो मंत्रयंत्राणां योगी युक्तः समाधिना ॥११३॥

टीका—समाधि में युक्त योगी सब प्रकार के शस्त्रों से अवध्य तथा सभी शरीर धारियों के सामर्थ्य से बाहर होता है। वह किसी मन्त्र और यन्त्र से भी ग्रहण करने के योग्य नहीं होता ॥११३॥

व्याख्या—समाधि में अवस्थित हुए योगी को कोई भी मनुष्य किसी भी प्रकार के शस्त्र से नहीं मार सकता और न उसे कोई शरीर धारी अपने वश में ही कर सकता है। वह वह यन्त्र, मन्त्र, मारण, उच्चाटन, वशीकरण आदि के द्वारा भी प्रभावित नहीं किया जा सकता। अभिप्राय यह है कि उसके लिए कोई विघ्न बाधा स्वरूप नहीं हो सकता।

यावन्नैव प्रविशति चरन्मारुतो मध्यमार्गे
यावद्बिंदुर्न भवति दृढप्राणवातप्रबंधात् ।
यावद्ध्याने सहजसदृशं जायते नैव तत्त्वं ॥
तावज्ज्ञानं वदति तदिदं दंभमिथ्याप्रलापः ॥११४॥

टीका—जब तक मध्य मार्ग से चढ़ता हुआ प्राणवायु ब्रह्मरन्ध्र में स्थिर नहीं होता, जब तक प्राणवायु के दृढ़ बन्धन से बिन्दु स्थिर नहीं होता और जब तक ध्यान में सहज रूप से तत्त्वरूपता प्राप्त नहीं होती तब तक ज्ञान के दम्भ का प्रलाप मिथ्या ही है ।।११४।।

व्याख्या—मध्य मार्ग अर्थात् सुषुम्ना नाड़ी में प्रविष्ट हुआ प्राणावायु जब ब्रह्मरन्ध्र में पहुँच कर स्थिर होता है, तभी साधक का बिन्दु भी स्थिरता को प्राप्त हो जाता है। क्योंकि सुषुम्ना में न पहुँचा हुआ प्राणवायु असिद्ध होता है। बिन्दु की स्थिरता भी कुम्भक के दृढ़ करने से ही सिद्ध हो सकती है। इसे पहले बता चुके हैं और अब पुनः बताते हैं कि मन की स्थिरता से वायु स्थिर होता है, वायु की स्थिरता से बिन्दु की स्थिरता होती है और इनको अस्थिरता हो तो योगसिद्धि सम्भव नहीं।

इससे समझना चाहिए कि प्राण और बिन्दु के स्थिर होने पर ही ध्यान में एक रूपता हो सकती है और वह एक रूपता ही तत्व रूपता अर्थात् जीवात्मा-परमात्मा के ऐक्य में सिद्धि प्राप्त करा सकती है। महर्षि पतंजलि का कथन है—'पुरुषार्थ शून्यानां गुणानां प्रति प्रसवः कैवल्यं स्वरूप प्रतिष्ठा वा चिति-शक्तेरिति' (यो. द. ४।३४) अर्थात् 'पुरुषार्थ से शून्य हुए गुणों का अपने कारण में लय हो जाना अथवा चितिशक्ति का अपने रूप में अवस्थित हो जाना कैवल्य है।'

श्लोक में 'यावद्ध्याने सहज सदृशं जायते नैव तत्वं' इत्यादि कह कर ध्यान के अनन्तर सहज रूप से तत्व अर्थात् आत्मा की प्राप्ति नहीं हो जाती' तब तक ज्ञान हुआ कहना दम्भ और मिथ्या प्रलाप मात्र माना है और यह ठीक भी है, क्योंकि मनको विषयों से खींच चैतन्य में स्थिर करना ध्यान और ध्यान को भी भूल जाना समाधि है। यथा 'सर्वशरीरेषु चैतन्यैकतानता ध्यानम् ध्यान विस्मृतिः समाधिः' (मण्डलब्राह्मणोपनिषत् १)।

इस प्रकार ध्यान को भी भूल जाने से आत्मतत्व का दर्शन हो सकता है। जब तक वैसी स्थिति न हो तब तक ज्ञान का दम्भ करना व्यर्थ का प्रलाप ही है।

॥ हठयोग प्रदीपिका का चतुर्थ उपदेश समाप्त ॥

॥ हठयोग प्रदीपिका सम्पूर्ण ॥

T. P. H. Oriental Series No. 15

हठयोगप्रदीपिका

HAṬHA-YOGA-PRADĪPIKĀ

स्वात्मारामयोगीन्द्रविरचिता

ब्रह्मानन्दकृतज्योत्स्नाभिधया टीकया समलंकृता

PART II

THEOSOPHICAL PUBLISHING HOUSE
ADYAR, MADRAS, INDIA
1933

श्रीः

हठयोगप्रदीपिका

सटीका ।

प्रथमोपदेशः ।

श्रीगणेशाय नमः ।

गुरुं नत्वा शिवं साक्षाद्ब्रह्मानन्देन तन्यते ।
हठप्रदीपिकाज्योत्स्ना योगमार्गप्रकाशिका ॥ १ ॥
इदानींतनानां सुबोधार्थमस्याः
सु विज्ञाय गोरक्षसिद्धान्तहार्दम् ।
मया मेरुशास्त्रिप्रमुख्याभियोगा-
त्स्फुटं कथ्यतेऽत्यन्तगूढोऽपि भावः ॥ २ ॥

श्रीआदिनाथाय नमोऽस्तु तस्मै
येनोपदिष्टा हठयोगविद्या ।
विभ्राजते प्रोन्नतराजयोग-
मारोढुमिच्छोरधिरोहिणीव ॥ १ ॥

मुमुक्षुजनहितार्थं राजयोगद्वारा कैवल्यफलां हठप्रदीपिकां विधित्सुः परमकारुणिकः स्वात्मारामयोगीन्द्रस्तत्प्रत्यूहनिवृत्तये हठयोगप्रवर्तकश्रीमदादिनाथनमस्कारलक्षणं मङ्गलं तावदाचरति— श्रीआदिनाथायेत्यादिना । तस्मै श्रीआदिनाथाय नमोऽस्त्वित्यन्वयः । आदिश्चासौ नाथश्च आदिनाथः, सर्वेश्वरः शिव इत्यर्थः । श्रीमान् आदिनाथः तस्मै श्रीआदिनाथाय । श्रीशब्द आदिर्यस्य स श्रीआदिः, श्रीआदिश्चासौ नाथश्च श्रीआदिनाथः, तस्मै श्रीआदिनाथाय, श्रीनाथाय विष्णव इति वाऽर्थः । श्रीआदिनाथायेत्यत्र यणभावस्तु ‘ अपि माषं मषं कुर्याच्छन्दोभङ्गं त्यजेद्गिराम् ’ इति च्छन्दोविदां संप्रदायादुच्चारणसौष्ठवाच्चेति बोध्यम् । वस्तुतस्तु, असंहितपाठस्वीकारापेक्षया श्रीआदिनाथायेति पाठस्वीकारेऽप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वेन परिनिष्ठितत्वसंभवात् , संप्रत्युदाहृतदृष्टान्तद्वयस्यापीदृग्विषयवैषम्यात् , नित्यसाहित्यभङ्गजनितदोषस्य शाब्दिकाननुमतत्वाच्चासंमृष्टविधेयांशतारूपदोषस्य साहित्यकारैरुक्तत्वेऽपि क्वचित्तैरपि स्वीकृतत्वेन शाब्दिकाचार्यैरेकाजित्यादौ

कर्मधारयस्वीकारेण सर्वथाऽनादृतत्वाच्च लाघवातिशय इति सुधियो विभावयन्तु । नमः प्रह्वीभावोऽस्तु । प्रार्थनायां लोट् । तस्मै कस्मै इत्यपेक्षायामाह—येनेति । येन आदिनाथेन उपदिष्टा गिरिजायै हठयोगविद्या हश्च ठश्च हठौ सूर्यचन्द्रौ, तयोर्योगो हठयोगः । एतेन हठशब्दवाच्ययोः सूर्यचन्द्राख्ययोः प्राणापानयोरैक्यलक्षणः प्राणायामो हठयोग इति हठयोगस्य लक्षणं सिद्धम् । तथा चोक्तं गोरक्षनाथेन सिद्धसिद्धान्तपद्धतौ—"हकारः कीर्तितः सूर्यष्ठकारश्चन्द्र उच्यते । सूर्याचन्द्रमसोर्योगाद्धठयोगो निगद्यते ॥" इति । तत्प्रतिपादिका विद्या हठयोगविद्या, हठयोगशास्त्रमिति यावत् । गिरिजायै आदिनाथकृतो हठविद्योपदेशो महाकालयोगशास्त्रादौ प्रसिद्धः । प्रकर्षेण उन्नतः प्रोन्नतः । मन्त्रयोगहठयोगादीनामधरभूमीनामुत्तरभूमित्वाद्राजयोगस्य प्रोन्नतत्वम् । राजयोगश्च सर्ववृत्तिनिरोधलक्षणोऽसंप्रज्ञातयोगः । तमिच्छोर्मुमुक्षोरधिरोहिणीव, अधिरुह्यतेऽनयेत्यधिरोहिणी, निःश्रेणीव विभ्राजते विशेषेण भ्राजते शोभते । यथा प्रोन्नतसौधमारोढुमिच्छोरधिरोहिण्यनायासेन सौधप्रापिका भवति, एवं हठदीपिकाऽपि प्रोन्नतराजयोगमारोढुमिच्छोरनायासेन राजयोगप्रापिका भवतीति । उपमालंकारः । इन्द्रवज्राख्यं वृत्तम् ॥ १ ॥

प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठविद्योपदिश्यते ॥ २ ॥

एवं परमगुरुनमस्कारलक्षणं मङ्गलं कृत्वा विघ्नबाहुल्ये मङ्गलबाहुल्यस्याप्यपेक्षितत्वात्स्वगुरुनमस्कारात्मकं मङ्गलमाचरन्नस्य ग्रन्थस्य विषयप्रयोजनादीन्प्रदर्शयति— प्रणम्येति । श्रीमन्तं गुरुं श्रीगुरुं नाथं श्रीगुरुनाथम् , स्वगुरुमिति यावत् । प्रणम्य प्रकर्षेण भक्तिपूर्वकं नत्वा स्वात्मारामेण योगिना योगोऽस्यास्तीति तेन । केवलं राजयोगाय केवलं राजयोगार्थं हठविद्योपदिश्यत इत्यन्वयः । हठविद्याया राजयोग एव मुख्यं फलं न सिद्धय इति केवलपदस्याभिप्रायः । सिद्धयस्त्वानुषङ्गिक्यः । एतेन राजयोगफलसहितो हठयोगोऽस्य ग्रन्थस्य विषयः । राजयोगद्वारा कैवल्यं चास्य फलम् । तत्कामश्चाधिकारी । ग्रन्थविषययोः प्रतिपाद्यप्रतिपादकभावः संबन्धः । ग्रन्थस्य कैवल्यस्य च प्रयोज्यप्रयोजकभावः संबन्धः । ग्रन्थाभिधेयस्य सफलयोगस्य कैवल्यस्य च साध्यसाधनभावः संबन्ध इत्युक्तम् ॥ २ ॥

भ्रान्त्या बहुमतध्वान्ते राजयोगमजानताम् ।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥ ३ ॥

ननु मन्त्रयोगसगुणध्याननिर्गुणध्यानमुद्रादिभिरेव राजयोगसिद्धौ किं हठविद्योपदेशेनेत्याशङ्क्य व्युत्थितचित्तानां

मन्त्रयोगादिभिः राजयोगासिद्धेर्हठयोगादेव राजयोगसिद्धिं वदन् ग्रन्थं प्रतिजानीते—भ्रान्त्येति । मन्त्रयोगादिबहुमतरूपे ध्वान्ते गाढान्धकारे या भ्रान्तिर्भ्रमस्तया । तैस्तैरुपायै राजयोगार्थं प्रवृत्तस्य तत्र तत्र तदलाभात् । वक्ष्यति च— 'राजयोगं विना-' इत्यादिना । तथा राजयोगमजानतां न जानन्तीत्यजानन्तः तेषामजानतां पुंसाम्, राजयोगज्ञानमिति शेषः । करोतीति करः कृपायाः करः कृपाकरः कृपाया आकर इति वा तादृशः । अनेन हठप्रदीपिकाकरणे अज्ञानुकम्पैव हेतुरित्युक्तम् । स्वात्मन्यारमत इति स्वात्मारामः । हठस्य हठयोगस्य प्रदीपिकेव प्रकाशकत्वात् हठप्रदीपिका ताम् । अथ वा हठ एव प्रदीपिका राजयोगप्रकाशकत्वात्, तां धत्ते विधत्ते, करोतीति यावत् । स्वात्माराम इत्यनेन ज्ञानस्य सप्तमभूमिकां प्राप्तो ब्रह्मविद्वरिष्ठ इत्युक्तम् । तथा च श्रुतिः—'आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः' इति । सप्त भूमयश्चोक्ता योगवासिष्ठे—"ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता । विचारणा द्वितीया स्यात्तृतीया तनुमानसा ॥ सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका । परार्थाभाविनी षष्ठी सप्तमी तुर्यगा स्मृता ॥" इति । अस्यार्थः—शुभेच्छा इत्याख्या यस्याः सा शुभेच्छाख्या । विवेकवैराग्ययुता शमादिपूर्विका तीव्र-

मुमुक्षा प्रथमा ज्ञानस्य भूमिः भूमिका उदाहृता कथिता, योगिभिरिति शेषः । १ । विचारणा श्रवणमननात्मिका द्वितीया ज्ञानभूमिः स्यात् । २ । अनेकार्थग्राहकं मनो यदाऽनेकार्थान्परित्यज्य सदेकार्थवृत्तिप्रवाहवद्भवति तदा तनु मानसं यस्यां सा तनुमानसा निदिध्यासनरूपा तृतीया ज्ञानभूमिः स्यादिति शेषः । ३ । इमास्तिस्रः साधन-भूमिकाः । आसु भूमिषु साधक इत्युच्यते । तिसृ-भिर्भूमिकाभिः शुद्धसत्त्वेऽन्तःकरणेऽहं ब्रह्मास्मीत्याकारिकाऽप-रोक्षवृत्तिरूपा सत्त्वापत्तिनामिका चतुर्थी ज्ञानभूमिः स्यात् । चतुर्थीयं फलभूमिः । अस्यां योगी ब्रह्मविदित्युच्यते । इयं संप्रज्ञातयोगभूमिका । ४ । वक्ष्यमाणास्तिस्रोऽसंप्रज्ञात-योगभूमयः । सत्त्वापत्तेरनन्तरा सत्त्वापत्तिसंज्ञिकायां भूमा-वुपस्थितासु सिद्धिषु असंसक्तस्यासंसक्तिनामिका पञ्चमी ज्ञानभूमिः स्यात् । अस्यां योगी स्वयमेव व्युत्तिष्ठते । एतां भूमिं प्राप्तो ब्रह्मविद्वर इत्युच्यते । ५ । परब्रह्मातिरि-क्तमर्थं न भावयति यस्यां सा परार्थाभाविनी षष्ठी ज्ञानभूमिः स्यात् । अस्यां योगी परप्रबोधित एव व्युत्थितो भवति । एतां प्राप्तो ब्रह्मविद्वरीयानित्युच्यते । ६ । तुर्यगा नाम सप्तमी भूमिः स्मृता । अस्यां योगी स्वतः परतो वा न व्युत्थानं प्राप्नोति । एतां प्राप्तो ब्रह्मविद्वरिष्ठ इत्युच्यते । ७ ।

तत्र प्रमाणभूता श्रुतिरत्रैवोक्ता। पूर्वमयमेव जीवन्मुक्त इत्युच्यते, स एवात्र स्वात्मारामपदेनोक्त इत्यलं बहूक्तेन ॥ ३ ॥

हठविद्यां हि मत्स्येन्द्रगोरक्षाद्या विजानते।
स्वात्मारामोऽथ वा योगी जानीते तत्प्रसादतः ॥४॥

महत्सेवितत्वाद्धठविद्यां प्रशंसन्स्वस्यापि महत्सकाशाद्धठविद्यालाभाद्गौरवं द्योतयति—हठविद्यां हीति। हीति प्रसिद्धम्। मत्स्येन्द्रश्च गोरक्षश्च तौ आद्यौ येषां ते मत्स्येन्द्रगोरक्षाद्याः। आद्यशब्देन जालंधरनाथभर्तृहरिगोपीचन्दप्रभृतयो ग्राह्याः। ते हठविद्यां हठयोगविद्यां विजानते विशेषेण साधनलक्षणभेदफलैर्जानन्तीत्यर्थः। स्वात्मारामः स्वात्मारामनामा। अथ वा शब्दसमुच्चये। योगी योगवान् तत्प्रसादतः गोरक्षप्रसादाज्जानीत इत्यन्वयः। परममहता ब्रह्मणाऽपीयं विद्या सेवितेत्यत्र योगियाज्ञवल्क्यस्मृतिः—'हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः' इति। वक्तृत्वं च मानसव्यापारपूर्वकं भवतीति मानसो व्यापारोऽर्थादागतः। तथा च श्रुतिः---'यन्मनसा ध्यायति तद्वाचा वदति' इति। भगवतेयं विद्या भागवतानुद्धवादीन्प्रत्युक्ता। शिवस्तु योगी प्रसिद्ध एव। एवं च सर्वोत्तमैर्ब्रह्मविष्णुशिवैः सेवितेयं विद्या। न च ब्रह्मसूत्रकृता व्यासेन योगी निराकृत इति

शङ्कनीयम् । प्रकृतिस्वातन्त्र्यविद्भिर्भेदांशमात्रस्य निराकरणात् । न तु भावनाविशेषरूपयोगस्य । भावनायाश्च सर्वसंमतत्वात्तां विना सुखस्याप्यसंभवात् । तथोक्तं भगवद्गीतासु—' नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना । न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ' इति । नारायणतीर्थैरप्युक्तम्— " स्वातन्त्र्यसत्यत्वमुखं प्रधाने सत्यं च चिद्भेदगतं च वाक्यैः । व्यासो निराचष्ट न भावनाख्यं योगं स्वयं निर्मितब्रह्मसूत्रैः ॥ " इति । ' अपि चात्मप्रदं योगं व्याकरोन्मतिमान्स्वयम् । भाषादिषु ततस्तत्र आचार्यप्रमुखैर्मतः ॥ मतो योगो भगवता गीतायामधिकोऽन्यतः । कृतः शुकादिभिस्तस्मादत्र सन्तोऽतिसादराः ॥ ' इति । ' वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम् । अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम् ॥ ' इति भगवदुक्तेः । किं बहुना ? ' जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ' इति वदता भगवता योगजिज्ञासोरप्यौत्कृष्ट्यं वर्णितं किमुत योगिनः । नारदादिभक्तश्रेष्ठैर्याज्ञवल्क्यादिज्ञानिमुख्यैश्चास्याः सेवनाद्भक्तज्ञानिनामप्यविरुद्धेत्युपरम्यते ॥ ४ ॥

श्रीआदिनाथमत्स्येन्द्रशाबरानन्दभैरवाः ।

हठयोगे प्रवृत्तिं जनयितुं हठविद्यया प्राप्तैश्वर्यान्सिद्धानाह— श्रीआदिनाथेत्यादिना । आदिनाथः शिवः सर्वेषां नाथानां प्रथमो नाथः । ततो नाथसंप्रदायः प्रवृत्त इति नाथसंप्रदायिनो वदन्ति । मत्स्येन्द्राख्यश्च आदिनाथशिष्यः । अत्रैवं किंवदन्ती— कदाचिदादिनाथः कस्मिंश्चिद् द्वीपे स्थितः तत्र विजनमिति मत्वा गिरिजायै योगमुपदिष्टवान् । तीरसमीपनीरस्थः कश्चन मत्स्यः तं योगोपदेशं श्रुत्वा एकाग्रचित्तो निश्चलकायोऽवतस्थे । तं तादृशं दृष्ट्वाऽनेन योगः श्रुत इति तं मत्वा कृपालुरादिनाथो जलेन प्रोक्षितवान् । स च प्रोक्षणमात्राद्दिव्यकायो मत्स्येन्द्रः सिद्धोऽभूत् । तमेव मत्स्येन्द्रनाथ इति वदन्ति । शाबरनामा कश्चित्सिद्धः, आनन्दभैरवनामाऽन्यः । एतेषामितरेतरद्वन्द्वः । छिन्नहस्तपादं पुमांसं हिन्दुस्थानभाषायां चौरङ्गीति वदन्ति । कदाचिदादिनाथाल्लब्धयोगस्य भुवं पर्यटतो मत्स्येन्द्रनाथस्य कृपावलोकनमात्रात्कुत्रचिदरण्ये स्थितश्चौरङ्गचङ्कुरितहस्तपादो बभूव । स च तत्कृपया संजातहस्तपादोऽहमिति मत्वा तत्पादयोः प्रणिपत्य ममानुग्रहं कुर्विति प्रार्थितवान् । मत्स्येन्द्रोऽपि तमनुगृहीतवान् । तस्यानुग्रहाच्चौरङ्गीति प्रसिद्धः सिद्धः सोऽभूत् । मीनो मीननाथः, गोरक्षो गोरक्ष-नाथः, विरूपाक्षनामा, बिलेशयनामा च । चौरङ्गीप्रभृतीनां द्वन्द्वसमासः ॥ ५ ॥

मन्थानो भैरवो योगी सिद्धिर्बुद्धश्च कन्थडिः ।
कोरण्टकः सुरानन्दः सिद्धपादश्च चर्पटिः ॥ ६ ॥

मन्थानः, भैरवः, योगीति मन्थानप्रभृतीनां सर्वेषां विशेषणम् ॥ ६ ॥

कानेरी पूज्यपादश्च नित्यनाथो निरञ्जनः ।
कपाली बिन्दुनाथश्च काकचण्डीश्वराह्वयः ॥ ७ ॥

काकचण्डीश्वर इत्याह्वयो नाम यस्य स तथा । अन्ये स्पष्टाः ॥ ७ ॥

अल्लमप्रभुदेवश्च घोडाचोली च टिण्टिणिः ।
भानुकी नारदेवश्च खण्डः कापालिकस्तथा ॥ ८ ॥

तथाशब्दः समुच्चये ॥ ८ ॥

इत्यादयो महासिद्धा हठयोगप्रभावतः ।
खण्डयित्वा कालदण्डं ब्रह्माण्डे विचरन्ति ते ॥ ९ ॥

इति पूर्वोक्ता आदयो येषां ते तथा । आदिशब्देन तारानाथादयो ग्राह्याः । महान्तश्च ते सिद्धाश्च अप्रतिहतैश्वर्या इत्यर्थः । हठयोगस्य प्रभावात्सामर्थ्यादिति हठयोगप्रभावतः । पञ्चम्यास्तसिल् । कालो मृत्युः तस्य दण्डनं

मृत्युं जित्वेत्यर्थः । ब्रह्माण्डमध्ये विचरन्ति विशेषेणाव्याहतगत्या चरन्तीत्यर्थः । तदुक्तं भागवते—'योगेश्वराणां गतिमाहुरन्तर्बहिस्त्रिलोक्याः पवनान्तरात्मनाम्' इति ॥ ९ ॥

अशेषतापतप्तानां समाश्रयमठो हठः ।
अशेषयोगयुक्तानामाधारकमठो हठः ॥ १० ॥

हठस्याशेषतापनाशकत्वमशेषयोगसाधकत्वं च मठकमठरूपकेणाह—अशेषेति । अशेषाः आध्यात्मिकाधिभौतिकाधिदैविकभेदेन त्रिविधाः । तत्राध्यात्मिकं द्विविधं शारीरं मानसं च । तत्र शारीरं दुःखं व्याधिजम् । मानसं दुःखं कामादिजम् । आधिभौतिकं व्याघ्रसर्पादिजनितम् । आधिदैविकं ग्रहादिजनितम् । ते च ते तापाश्च तैस्तप्तानां संतप्तानां पुंसां हठो हठयोगः सम्यगाश्रीयत इति समाश्रयः आश्रयः आश्रयभूतो मठः मठ एव । तथा हठः अशेषयोगयुक्तानाम्, अशेषयोगयुक्ताः मन्त्रयोगकर्मयोगादियुक्तास्तेषामाधारभूतः कमठः । एवं त्रिविधतापतप्तानां पुंसामाश्रयो हठः । यथा च विश्वाधारः कमठः एवं निखिलयोगिनामाधारो हठ इत्यर्थः ॥ १० ॥

हठविद्या परं गोप्या योगिना सिद्धिमिच्छता ।
भवेद्वीर्यवती गुप्ता निर्वीर्या तु प्रकाशिता ॥ ११ ॥

अथाखिलविद्यापेक्षया हठविद्याया अतिगोप्यत्वमाह—हठविद्येति। सिद्धिमणिमाद्यैश्वर्यमिच्छता, यद्वा सिद्धिं कैवल्यसिद्धिमिच्छता वाञ्छता योगिना हठयोगविद्या परमत्यन्तं गोप्या गोपनीया गोपनार्हाऽस्तीति। तत्र हेतुमाह—यतो गुप्ता हठविद्या वीर्यवत्यप्रतिहतैश्वर्यजननसमर्था स्यात्। कैवल्यजननसमर्था कैवल्यसिद्धिजननसमर्था वा स्यात्। अथ योगाधिकारी। 'जिताक्षाय शान्ताय सक्ताय मुक्तौ विहीनाय दोषैरसक्ताय मुक्तौ। अहीनाय दोषेतरैरुक्तकर्त्रे प्रदेयो न देयो हठश्चेतरस्मै'। याज्ञवल्क्यः—'विध्युक्तकर्मसंयुक्तः कामसंकल्पवर्जितः। यमैश्च नियमैर्युक्तः सर्वसङ्गविवर्जितः'। 'कृतविद्यो जितक्रोधः सत्यधर्मपरायणः। गुरुशुश्रूषणरतः पितृमातृपरायणः। स्वाश्रमस्थः सदाचारो विद्वद्भिश्च सुशिक्षितः' इति। 'शिश्नोदररतायैव न देयं वेषधारिणे' इति कुत्रचित्। अत्र योगचिन्तामणिकाराः—यद्यपि 'ब्राह्मणक्षत्रियविशां स्त्रीशूद्राणां च पावनम्। शान्तये कर्मणामन्यद्योगान्नास्ति विमुक्तये ॥' इत्यादिपुराणवाक्येषु प्राणिमात्रस्य योगेऽधिकार उपलभ्यते, तथाऽपि मोक्षरूपकं फलं योगविरक्तस्यैव भवति। अतस्तस्यैव योगाधिकार उचितः। तथा च वायुसंहितायाम्—'दृष्टे तथाऽऽनुश्रविके विरक्तं विषये मनः। यस्य तस्याधि-

कारोऽस्मिन्योगे नान्यस्य कस्यचित्' । सुरेश्वराचार्याः— 'इहामुत्र विरक्तस्य संसारं प्रजिहासतः । जिज्ञासोरेव कस्यापि योगेऽस्मिन्नधिकारिता' इत्याहुः । वृद्धैरप्युक्तम्— 'नैतद्देयं दुर्विनीताय जातु ज्ञानं गुप्तं तद्धि सम्यक्फलाय । अस्थाने हि स्थाप्यमानैव वाचां देवी कोपान्निर्दहेन्नो चिराय ॥' इति ॥ ११ ॥

सुराज्ये धार्मिके देशे सुभिक्षे निरुपद्रवे ।
धनुःप्रमाणपर्यन्तं शिलाग्निजलवर्जिते ।
एकान्ते मठिकामध्ये स्थातव्यं हठयोगिना ॥ १२ ॥

अथ हठाभ्यासयोग्यं देशमाह सार्धेन—सुराज्य इति । राज्ञः कर्म भावो वा राज्यं तच्छोभनं यस्मिन्स सुराज्यस्तस्मिन्सुराज्ये । 'यथा राजा तथा प्रजाः' इति महदुक्तेः राज्ञः शोभनत्वात्प्रजानामपि शोभनत्वं सूचितम् । धार्मिके धर्मवति । अनेन हठाभ्यासिनोऽनुकूलाहारादिलाभः सूचितः । सुभिक्ष इत्यनेनानायासेन तल्लाभः सूचितः । निरुपद्रवे चौरव्याघ्राद्युपद्रवरहिते । एतेन देशस्य दीर्घकालवासयोग्यता सूचिता । धनुषः प्रमाणं धनुःप्रमाणं चतुर्हस्तमात्रं तत्पर्यन्तं शिलाग्निजलवर्जिते शिला प्रस्तरः अग्निर्वह्निः जलं तोयं तैर्वर्जिते रहिते । यत्रासनं ततश्चतुर्हस्तमात्रे शिलाग्निजलानि

न स्युरित्यर्थः। तेन शीतोष्णादिविकाराभावः सूचितः। एकान्ते विजने। अनेन जनसमागमाभावात्कलहाद्यभावः सूचितः। जनसंमर्दे तु कलहादिकं स्यादेव। तदुक्तं भागवते—'वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि' इति। तादृशे मठिकामध्ये। अल्पो मठो मठिका। अल्पीयसि कन्। तस्या मध्ये हठयोगिना हठाभ्यासी योगी हठयोगी तेन। शाकपार्थिवादिवत्समासः। स्थातव्यं स्थातुं योग्यम्। मठिकामध्य इत्यनेन शीतातपादिजनितक्लेशाभावः सूचितः। अत्र 'युक्ताहारविहारेण हठयोगस्य सिद्धये' इत्यर्धं केनचित्क्षिप्तत्वान्न व्याख्यातम्, मूलश्लोकानामेव व्याख्यानात्। एवमग्रेऽपि ये मया न व्याख्याताः श्लोका हठप्रदीपिकाया-मुपलभ्येरंस्ते सर्वे क्षिप्ता इति बोद्धव्यम् ॥ १२ ॥

अल्पद्वारमरन्ध्रगर्तविवरं नात्युच्चनीचायतं
सम्यग्गोमयसान्द्रलिप्तममलं निःशेषजन्तूज्झितम्।
बाह्ये मण्डपवेदिकूपरुचिरं प्राकारसंवेष्टितं
प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः॥

अथ मठलक्षणमाह—अल्पद्वारमिति। अल्पं द्वारं यस्मि-स्तत्तादृशम्। रन्ध्रो गवाक्षादिः गर्तो निम्नप्रदेशः विवरो मूषकादिबिलं ते न सन्ति यस्मिंस्तत्तादृशम्। अत्युच्चं

च तन्नीचं चात्युच्चनीचं तच्च तदायतं चात्युच्चनीचायतम् । 'विशेषणं विशेष्येण बहुलम्' इत्यत्र बहुलग्रहणाद्विशेषणानां कर्मधारयः । ननूच्चनीचायतशब्दानां भिन्नार्थकानां कथं कर्मधारयः 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इति तल्लक्षणादिति चेन्न । मठे तेषां सामानाधिकरण्यासंभवात् । न चात्युच्चनीचायतं नात्युच्चनीचायतं नशब्देन समासान्नलोपाभावः, नेति पृथक्पदं वा । अत्युच्चे आरोहणे श्रमः स्यादतिनीचेऽवरोहणे श्रमो भवेत् । अत्यायते दूरं दृष्टिर्गच्छेत्तन्निराकरणार्थमुक्तं नात्युच्चनीचायतमिति । सम्यक्समीचीनतया गोमयेन गोपुरीषेण सान्द्रं यथा भवति तथा लिप्तम् । अमलं निर्मलं निःशेषा निखिला ये जन्तवो मशकमत्कुणाद्यास्तैरुज्झितं त्यक्तं रहितम् । बाह्ये मठाद्बहिःप्रदेशे मण्डपः शालाविशेषः, वेदिः परिष्कृता भूमिः, कूपो जलाशयविशेषः, तैः रुचिरं रमणीयम् । प्राकारेण वरणेन सम्यग्वेष्टितं परितो भित्तियुक्तमित्यर्थः । हठाभ्यासिभिः हठयोगाभ्यसनशीलैः सिद्धैः । इदं पूर्वोक्तमल्पद्वारादिकं योगमठस्य लक्षणं स्वरूपं प्रोक्तं कथितम् । नन्दिकेश्वरपुराणे त्वेवं मठलक्षणमुक्तम्—'मन्दिरं रम्यविन्यासं मनोज्ञं गन्धवासितम् । धूपामोदादिसुरभि कुसुमोत्करमण्डितम् ॥ मुनितीर्थनदीवृक्षपद्मिनीशैलशोभितम् । चित्रकर्मनिबद्धं च चित्रभेदविचित्रितम् ॥

कुर्याद्योगगृहं धीमान्सुरम्यं शुभवर्त्मना। दृष्ट्वा चित्रगताञ्शान्तान्मुनीन्याति मनः शमम् ॥ सिद्धान्दृष्ट्वा चित्रगतान्मतिरभ्युद्यमे भवेत्। मध्ये योगगृहस्याथ लिखेत्संसारमण्डलम् ॥ श्मशानं च महाघोरं नरकांश्च लिखेत्क्वचित्। तान्दृष्ट्वा भीषणाकारान्संसारे सारवर्जिते ॥ अनवसादो भवति योगी सिद्ध्यभिलाषुकः। पश्यंश्च व्याधिताञ्जन्तून्नतान्मत्तांश्चलद्व्रणाम्" ॥ १३ ॥

एवंविधे मठे स्थित्वा सर्वचिन्ताविवर्जितः।
गुरूपदिष्टमार्गेण योगमेव सदाऽभ्यसेत् ॥ १४ ॥

मठलक्षणमुक्त्वा मठे यत्कर्तव्यं तदाह—एवंविध इति। एवं पूर्वोक्ता विधा प्रकारो यस्य स तथा पूर्वोक्तलक्षण इत्यर्थः। तस्मिन् स्थित्वा स्थितिं कृत्वा सर्वा याश्चिन्तास्ताभिर्विशेषेण वर्जितो रहितोऽशेषचिन्तारहितः। गुरुणोपदिष्टो यो मार्गः हठाभ्यासप्रकाररूपस्तेन सदा नित्यं योगमेवाभ्यसेत्। एवशब्देनाभ्यासान्तरस्य योगे विघ्नकरत्वं सूचितम्। तदुक्तं योगभीजे—"मरुज्जयो यस्य सिद्धस्तं सेवेत गुरुं सदा। गुरुवक्त्रप्रसादेन कुर्यात्प्राणजयं बुधः"। राजयोगे—"वेदान्ततर्कोक्तिभिरागमैश्च नानाविधैः शास्त्रकदम्बकैश्च। ध्यानादिभिः सत्करणैर्न गम्यश्चिन्तामणिर्ह्येकगुरुं

विहाय" । स्कन्दपुराणे—"आचार्याद्योगसर्वस्वमवाप्य स्थिरधीः स्वयम् । यथोक्तं लभते तेन प्राप्नोत्यपि च निर्वृतिम्" ॥ सुरेश्वराचार्यः—"गुरुप्रसादाल्लभते योगमष्टाङ्गसंयुतम् । शिवप्रसादाल्लभते योगसिद्धिं च शाश्वतीम्" ॥ श्रुतिश्च—"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥" इति, 'आचार्यवान्पुरुषो वेद' इति च ॥ १४ ॥

अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।
जनसङ्गश्च लौल्यं च षड्भिर्योगो विनश्यति ॥१५॥

अथ योगाभ्यासप्रतिबन्धकानाह—अत्याहार इति । अतिशयित आहारोऽत्याहारः, क्षुधापेक्षयाऽधिकभोजनम् । प्रयासः श्रमजननानुकूलो व्यापारः । प्रकृष्टो जल्पः प्रजल्पो बहुभाषणम् । शीतोदकेन प्रातःस्नाननक्तभोजनफलाहारादिरूपनियमस्य ग्रहणं नियमग्रहः । जनानां सङ्गो जनसङ्गः । कामादिजनकत्वात् । लोलस्य भावः लौल्यं चाञ्चल्यम् । षड्भिरत्याहारादिभिरभ्यासप्रतिबन्धात् योगो विनश्यति विशेषेण नश्यति ॥ १५ ॥

उत्साहात्साहसाद्धैर्यात्तत्त्वज्ञानाच्च निश्चयात् ।
जनसङ्गपरित्यागात्षड्भिर्योगः प्रसिध्यति ॥ १६ ॥

अथ योगसिद्धिकरानाह—उत्साहादिति। विषयप्रवणं चित्तं निरोत्स्याम्येवेत्युद्यम उत्साहः। साध्यत्वासाध्यत्वे अपरिभाव्य सहसा प्रवृत्तिः साहसम्। यावज्जीवनं सेत्स्यत्येवेत्यखेदो धैर्यम्। विषया मृगतृष्णाजलवदसन्तः ब्रह्मैव सत्यमिति वास्तविकं ज्ञानं तत्त्वज्ञानम्, योगानां वास्तविकं ज्ञानं वा। शास्त्रगुरुवाक्येषु विश्वासो निश्चयः श्रद्धेति यावत्। जनानां योगाभ्यासप्रतिकूलानां यः सङ्गस्तस्य परित्यागात्। षड्भिरेभिर्योगः प्रकर्षेणाविलम्बेन सिध्यतीत्यर्थः ॥ १६ ॥

[अथ यमनियमाः—

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः।
दयाऽऽर्जवं मिताहारः शौचं चैव यमा दश ॥
तपः संतोष आस्तिक्यं दानमीश्वरपूजनम्।
सिद्धान्तवाक्यश्रवणं ह्रीमती च तपो हुतम्।
नियमा दश संप्रोक्ता योगशास्त्रविशारदैः ॥]
हठस्य प्रथमाङ्गत्वादासनं पूर्वमुच्यते।
कुर्यात्तदासनं स्थैर्यमारोग्यं चाङ्गलाघवम् ॥ १७ ॥

आदावासनकथने संगतिं सामान्यतस्तत्फलं चाह—हठस्येति। हठस्य "आसनं कुम्भकं चित्रं मुद्राख्यं करणं तथा। अथ नादानुसंधानम्" इति वक्ष्यमाणानि चत्वार्यङ्गानि।

प्रत्याहारादिसमाध्यन्तानां नादानुसंधानेऽन्तर्भावः । तन्मध्ये आसनस्य प्रथमाङ्गत्वात्पूर्वमासनमुच्यत इति संबन्धः । तदासनं स्थैर्यं देहस्य मनसश्चाञ्चल्यरूपरजोधर्मनाशकत्वेन स्थिरतां कुर्यात् । 'आसनेन रजो हन्ति' इति वाक्यात् । आरोग्यं चित्तविक्षेपकरोगाभावः । रोगस्य चित्तविक्षेपकत्वमुक्तं पातञ्जलसूत्रे—'व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः' इति । अङ्गानां लाघवं लघुत्वम् । गौरवरूपतमोधर्मनाशकत्वमप्येतेनोक्तम् । चकारात्क्षुद्वृद्ध्यादिकमपि बोध्यम् ॥ १७ ॥

वसिष्ठाद्यैश्च मुनिभिर्मत्स्येन्द्राद्यैश्च योगिभिः ।
अङ्गीकृतान्यासनानि कथ्यन्ते कानिचिन्मया ॥१८॥

वसिष्ठादिसंमतासनमध्ये श्रेष्ठानि मयोच्यन्त इत्याह—वसिष्ठाद्यैरिति । वसिष्ठ आद्यो येषां याज्ञवल्क्यादीनां तैर्मुनिभिर्मननशीलैः । चकारान्मन्त्रादिपरैः । मत्स्येन्द्र आद्यो येषां जालंधरनाथादीनां तैः । योगिभिः हठाभ्यासिभिः । चकारान्मुद्रादिपरैः । अङ्गीकृतानि चतुरशीत्यासनानि तन्मध्ये कानिचित् श्रेष्ठानि मया कथ्यन्ते । यद्यप्युभयोरपि मननहठाभ्यासौ स्तस्तथाऽपि वसिष्ठादीनां मननं मुख्यं मत्स्येन्द्रादीनां हठाभ्यासो मुख्य इति पृथग्ग्रहणम् ॥ १८ ॥

जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ।
ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते ॥ १९ ॥

तत्र सुकरत्वात्प्रथमं स्वस्तिकासनमाह—जानूर्वोरिति । जानु च ऊरुश्च । अत्र जानुशब्देन जानुसंनिहितो जङ्घाप्रदेशो ग्राह्यः । जङ्घोर्वोरिति पाठस्तु साधीयान् । तयोरन्तरे मध्ये उभे पादयोस्तले तलप्रदेशौ कृत्वा ऋजुकायः समकायः यत्र समासीनो भवेत्तदासनं स्वस्तिकं स्वस्तिकाख्यं प्रचक्षते वदन्ति, योगिन इति शेषः । श्रीधरेणोक्तम्—"ऊरुजङ्घान्तराधाय प्रपदे जानुमध्यगे । योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः" ॥ १९ ॥

सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखाकृति ॥२०॥

गोमुखासनमाह—सव्य इति । सव्ये वामे पृष्ठस्य पार्श्वे संप्रदायात्कटेरधोभागे दक्षिणं गुल्फं नितरां योजयेत् । गोमुखस्याकृतिर्यस्य तत्तादृशं गोमुखसंज्ञकमासनं भवेत् ॥२०॥

एकं पादं तथैकस्मिन्विन्यसेदूरुणि स्थितम् ।
इतरस्मिंस्तथा चोरुं वीरासनमितीरितम् ॥ २१ ॥

वीरासनमाह—एकमिति । एकं दक्षिणं पादम् । तथा पादपूरणे । एकस्मिन्वामोरुणि स्थितं विन्यसेत् । इतर-

स्मिन्वामे पादे ऊरुं दक्षिणं विन्यसेत् । तद्वीरासनमितीरितं कथितम् ॥ २१ ॥

गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ।
कूर्मासनं भवेदेतदिति योगविदो विदुः ॥ २२ ॥

कूर्मासनमाह—गुदमिति । गुल्फाभ्यां गुदं निरुध्य नियम्य व्युत्क्रमेण यत्र सम्यगाहितः स्थितो भवेत् , एतत्कूर्मासनं भवेत् , इति योगविदो विदुरित्यन्वयः ॥ २२ ॥

पद्मासनं तु संस्थाप्य जानूर्वोरन्तरे करौ ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम् ॥

कुक्कुटासनमाह—पद्मासनं त्विति । पद्मासनं तु ऊर्वोरुपरि उत्तानचरणस्थापनरूपं सम्यक् स्थापयित्वा । जानुपदेन जानुसंनिहितो जङ्घाप्रदेशः । तच्च ऊरुश्च जानूरू, तयोरन्तरे मध्ये करौ निवेश्य भूमौ संस्थाप्य । करावित्यत्रापि संबध्यते । व्योमस्थं खस्थं पद्मासनसदृशं यत्तत्कुक्कुटासनम् ॥ २३ ॥

कुक्कुटासनबन्धस्थो दोर्भ्यां संबध्य कंधराम् ।
भवेत्कूर्मवदुत्तान एतदुत्तानकूर्मकम् ॥ २४ ॥

उत्तानकूर्मासनमाह—कुक्कुटासनेति । कुक्कुटासनस्य यो बन्धः पूर्वश्लोकोक्तस्तस्मिन् स्थितः दोर्भ्यां बाहुभ्यां कंधरां

ग्रीवां संबध्य कूर्मवदुत्तानो यस्मिन्भवेदेतदासनमुत्तानकूर्मकं नाम ॥ २४ ॥

पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षणं कुर्याद्धनुरासनमुच्यते ॥ २५ ॥

धनुरासनमाह—पादाङ्गुष्ठौ त्विति । पाणिभ्यां पादयोरङ्गुष्ठौ गृहीत्वा श्रवणावधि कर्णपर्यन्तं धनुष आकर्षणं यथा भवति तथा कुर्यात् । गृहीताङ्गुष्ठमेकं पाणिं प्रसारितं कृत्वा गृहीताङ्गुष्ठमितरं पाणिं कर्णपर्यन्तमाकुञ्चितं कुर्यादित्यर्थः । एतद्धनुरासनमुच्यते ॥ २५ ॥

वामोरुमूलार्पितदक्षपादं जानोर्बहिर्वेष्टितवामपादम् ।
प्रगृह्य तिष्ठेत्परिवर्तिताङ्गः श्रीमत्स्यनाथोदितमासनं स्यात् ॥

मत्स्येन्द्रासनमाह—वामोरुमूलेऽर्पितः स्थापितो यो दक्षपादः तं संप्रदायात्पृष्ठतोगतवामपाणिना गुल्फस्योपरिभागे परिगृह्य । जानोर्दक्षिणपादजानोर्बहिःप्रदेशे वेष्टितो यो वामपादस्तं वामपादजानोर्बहिर्वेष्टितदक्षिणपाणिनाऽङ्गुष्ठे प्रगृह्य । परिवर्तिताङ्गः वामभागेन पृष्ठतो मुखं यथा स्यादेवं परिवर्तितं परावर्तितमङ्गं येन स तथा तादृशो यत्र तिष्ठेत् स्थितिं कुर्यात्तदासनं मत्स्येन्द्रनाथेनोदितं कथितं स्यात् । तदुदि-

तत्वात्तन्नामकमेव वदन्ति । एवं दक्षोरुमूलार्पितवामपादं पृष्ठतोगतदक्षिणपाणिना प्रगृह्य वामजानोर्बहिर्वेष्टितदक्षपादं दक्षिणपादजानोर्बहिर्वेष्टितवामपाणिना प्रगृह्य दक्षभागेन पृष्ठतो मुखं यथा स्यादेवं परिवर्तिताङ्गश्चाभ्यसेत् ॥ २६ ॥

मत्स्येन्द्रपीठं जठरप्रदीप्तिं
प्रचण्डरुग्मण्डलखण्डनास्त्रम् ।
अभ्यासतः कुण्डलिनीप्रबोधं
चन्द्रस्थिरत्वं च ददाति पुंसाम् ॥ २७ ॥

मत्स्येन्द्रासनस्य फलमाह—मत्स्येन्द्रेति । प्रचण्डं दुःसहं रुजां रोगाणां मण्डलं समूहः तस्य खण्डने च्छेदनेऽस्त्रमस्त्रमिव तादृशं मत्स्येन्द्रपीठं मत्स्येन्द्रासनम् अभ्यासतः प्रत्यहमावर्तनरूपादभ्यासात् पुंसां जठरस्य जठराग्नेः प्रकृष्टां दीप्तिं वृद्धिं ददाति । तथा कुण्डलिन्या आधारशक्तेः प्रबोधं निद्राभावं तथा चन्द्रस्य तालुन उपरिभागे स्थितस्य नित्यं क्षरतः स्थिरत्वं क्षरणाभावं च ददातीत्यर्थः ॥ २७ ॥

प्रसार्य पादौ भुवि दण्डरूपौ
दोर्भ्यां पदाग्रद्वितयं गृहीत्वा ।
जानूपरि न्यस्तललाटदेशो
वसेदिदं पश्चिमतानमाहुः ॥ २८ ॥

पश्चिमतानासनमाह— प्रसार्येति । भुवि भूमौ दण्डस्य रूपमिव रूपं ययोस्तौ दण्डाकारौ श्लिष्टगुल्फौ प्रसार्य प्रसारितौ कृत्वा । दोर्भ्यामाकुञ्चिततर्जनीभ्यां भुजाभ्यां पदोः पदयोश्चाग्रेऽग्रभागौ तयोर्द्वितयं द्वयमङ्गुष्ठप्रदेशयुग्मं बलादाकर्षणपूर्वकं यथा जान्वधोभागस्य भूमेरुत्थानं न स्यात्तथा गृहीत्वा जानोरुपरि न्यस्तो ललाटदेशो येन तादृशो यत्र वसेत् इदं पश्चिमताननामकमासनमाहुः ॥ २८ ॥

इति पश्चिमतानमासनाग्र्यं
पवनं पश्चिमवाहिनं करोति ।
उदयं जठरानलस्य कुर्या-
दुदरे कार्श्यमरोगतां च पुंसाम् ॥ २९ ॥

अथ तत्फलम्—इतीति । इति पूर्वोक्तमासनेष्वग्र्यं मुख्यं पश्चिमतानं पवनं प्राणं पश्चिमवाहिनं पश्चिमेन पश्चिममार्गेण सुषुम्णामार्गेण वहतीति पश्चिमवाही तं तादृशं करोति । जठरानलस्य जठरे योऽनलोऽग्निस्तस्योदयं वृद्धिं कुर्यात् । उदरे मध्यप्रदेशे कार्श्यं कृशत्वं कुर्यात् । अरोगतामारोग्यं चकारान्नाडीवलनादिसाम्यं कुर्यात् ॥ २९ ॥

धरामवष्टभ्य करद्वयेन

उच्चासनो दण्डवदुत्थितः स्या-
न्मयूरमेतत्प्रवदन्ति पीठम् ॥ ३० ॥

अथ मयूरासनमाह—धरामिति । करद्वयेन करयोर्द्वयं युग्मं तेन धरां भूमिमवष्टभ्यावलम्ब्य, प्रसारिताङ्गुली भूमिसंलग्नतलौ संनिहितौ करौ कृत्वेत्यर्थः । तस्य करद्वयस्य कूर्परयोर्भुजमध्यसंधिभागयोः स्थापिते धृते नाभेः पार्श्वे पार्श्वभागौ येन स उच्चासन उच्चमुन्नतमासनं यस्यैतादृशः खे शून्ये दण्डवद्दण्डेन तुल्यमुत्थित ऊर्ध्वं स्थितो यत्र भवति तन्मायूरं मयूरस्येदं तत्संबन्धित्वात्तन्नामकं प्रवदन्ति । योगिन इति शेषः ॥ ३० ॥

हरति सकलरोगानाशु गुल्मोदरादी-
नभिभवति च दोषानासनं श्रीमयूरम् ।
बहु कदशनभुक्तं भस्म कुर्यादशेषं
जनयति जठराग्निं जारयेत्कालकूटम् ॥ ३१ ॥

मयूरासनगुणानाह—हरतीति । गुल्मो रोगविशेषः उदरं जलोदरं ते आदी येषां प्लीहादीनां ते तथा तान्सकलरोगान् सकला ये रोगास्तानाशु झटिति हरति नाशयति । श्रीमयूरमासनमिति सर्वत्र संबध्यते । दोषान्वातपित्तकफानालस्यदांश्चाभिभवति तिरस्करोति । बह्वतिशयितं कदशनं कदन्नं

यद्भुक्तं तदशेषं समस्तं भस्म कुर्यात्पाचयेदित्यर्थः । जठराग्निं जठरानलं जनयति प्रादुर्भावयति । कालकूटं विषम् । कालकूटशब्दः कालकूटवदपकारकान्नपरः । तं जारयेज्जीर्णं कुर्यात्पाचयेदित्यर्थः ॥ ३१ ॥

उत्तानं शववद्भूमौ शयनं तच्छवासनम् ।
शवासनं श्रान्तिहरं चित्तविश्रान्तिकारकम् ॥ ३२ ॥

शवासनमाहार्धेन—उत्तानमिति । शवेन मृतशरीरेण तुल्यं शववदुत्तानं भूमिसंलग्नं पृष्ठं यथा स्यात्तथा शयनं निद्रायामिव संनिवेशो यत्तच्छवासनं शवाख्यमासनम् । शवासनप्रयोजनमाह—उत्तरार्धेन । शवासनं श्रान्तिहरं श्रान्तिं हठाभ्यासश्रमं हरतीति श्रान्तिहरं चित्तस्य विश्रान्तिर्विश्रामस्तस्याः कारकम् ॥

चतुरशीत्यासनानि शिवेन कथितानि च ।
तेभ्यश्चतुष्कमादाय सारभूतं ब्रवीम्यहम् ॥ ३३ ॥

वक्ष्यमाणासनचतुष्टयस्य श्रेष्ठत्वं वदन्नाह—चतुरशीतीति । शिवेनेश्वरेण चतुरधिकाशीतिसंख्याकान्यासनानि कथितानि, चकाराच्चतुरशीतिलक्षाणि च । तदुक्तं गोरक्षनाथेन—"आसनानि च तावन्ति यावन्त्यो जीवजातयः । एतेषामखिलान्भेदान्विजानाति महेश्वरः ॥ चतुरशीतिलक्षाणि एकैकं समुदाहृतम् । ततः शिवेन पीठानां षोडशोनं शतं कृतम्" इति ॥

तेभ्यः शिवोक्तं चतुरशीतिलक्षासनानां मध्ये प्रशस्तानि यानि चतुरशीत्यासनानि तेभ्य आदाय गृहीत्वा सारभूतं श्रेष्ठभूतं चतुष्कमहं ब्रवीमीत्यन्वयः ॥ ३३ ॥

सिद्धं पद्मं तथा सिंहं भद्रं चेति चतुष्टयम् ।
श्रेष्ठं तत्रापि च सुखे तिष्ठेत्सिद्धासने सदा ॥ ३४ ॥

तदेव चतुष्कं नाम्ना निर्दिशति—सिद्धमिति । सिद्धं सिद्धासनम् । पद्मं पद्मासनम् । सिंहं सिंहासनम् । भद्रं भद्रासनम् । इति चतुष्टयं श्रेष्ठमतिशयेन प्रशस्यम्, तत्रापि चतुष्टये सुखे सुखकरे सिद्धासने सदा तिष्ठेत् । एतेन सिद्धासनं चतुष्टयेऽप्युत्कृष्टमिति सूचितम् ॥ ३४ ॥

तत्र सिद्धासनम्—

योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसे-
न्मेढ्रे पादमथैकमेव हृदये कृत्वा हनुं सुस्थिरम् ।
स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद् भ्रुवोरन्तरं
ह्येतन्मोक्षकपाटभेदजनकं सिद्धासनं प्रोच्यते ॥३५॥

आसनचतुष्टयेऽप्युत्कृष्टत्वात्प्रथमं सिद्धासनमाह—योनिस्थानकमिति । योनिस्थानमेव योनिस्थानकम् । स्वार्थे कप्रत्ययः । गुदोपस्थयोर्मध्यमप्रदेशे पदं योनिस्थानं तत् ।

अङ्घ्रिर्वामश्चरणस्तस्य मूलेन पार्ष्णिभागेन घटितं संलग्नं कृत्वा। स्थानान्तरम् एकं पादं दक्षिणं पादं मेढ्रेन्द्रियस्योपरिभागे दृढं यथा स्यात्तथा विन्यसेत् हृदये हृदयसमीपे हनुं चिबुकं सुस्थिरं सम्यक् स्थिरं कृत्वा हनुहृदययोश्चतुरङ्गुलमन्तरं यथा भवति तथा कृत्वेति रहस्यम्। संयमितानि विषयेभ्यः परावृत्तानीन्द्रियाणि येन स तथा। अचला या दृक् दृष्टिस्तया भ्रुवोरन्तरं मध्यं पश्येत्। हि प्रसिद्धं मोक्षस्य यत्कपाटं प्रतिबन्धकं तस्य भेदं नाशं जनयतीति तादृशं सिद्धानां योगिनाम्। आस्तेऽत्रास्यतेऽनेनेति वा आसनं सिद्धासननामकमिदं भवेदित्यर्थः॥ ३५॥

मतान्तरे तु—

मेढ्रादुपरि विन्यस्य सव्यं गुल्फं तथोपरि।
गुल्फान्तरं च निक्षिप्य सिद्धासनमिदं भवेत्॥ ३६॥

मत्स्येन्द्रसंमतं सिद्धासनमुक्त्वाऽन्यसंमतं वक्तुमाह—मतान्तरे त्विति। तदेव दर्शयति—मेढ्रादिति। मेढ्रादुपस्थादुपर्यूर्ध्वभागे सव्यं वामगुल्फं विन्यस्य तथा सव्यवदुपरि मुख्यपादस्योपरि न तु सव्यगुल्फस्य। गुल्फान्तरं दक्षिणगुल्फं च निक्षिप्य वसेदिति शेषः। इदं सिद्धासनं मतान्तराभिमतमित्यभेद इत्यर्थः॥ ३६॥

एतत्सिद्धासनं प्राहुरन्ये वज्रासनं विदुः ।
मुक्तासनं वदन्त्येके प्राहुर्गुप्तासनं परे ॥ ३७ ॥

तत्र प्रथमं महासिद्धसंमतमिति स्पष्टीकर्तुमस्यैव मत-भेदान्नामभेदानाह—एतदिति । एतत्पूर्वोक्तं सिद्धासनं सिद्धासननामकं प्राहुः । केचिदित्यध्याहारः । अन्ये वज्रासनं वज्रासनसंज्ञकं विदुः जानन्ति । एके मुक्तासनं मुक्तासनाभिधं वदन्ति । परे गुप्तासनं गुप्तासनाख्यं प्राहुः । अत्रासनाभिज्ञाः । यत्र वामपादपार्ष्णिं योनिस्थाने नियोज्य दक्षिणपाद-पार्ष्णिर्मेढ्रादुपरि स्थाप्यते तत्सिद्धासनम् । यत्र वामपादपार्ष्णिं योनिस्थाने नियोज्य दक्षिणपादपार्ष्णिर्मेढ्रादुपरि स्थाप्यते तद्वज्रासनम् । यत्र तु दक्षिणसव्यपार्ष्णिद्वयमुपर्यधोभागेन संयोज्य योनिस्थानेन संयोज्यते तन्मुक्तासनम् । यत्र च पूर्ववत्संयुक्तं पार्ष्णिद्वयं मेढ्रादुपरि निधीयते तद्गुप्ता-सनमिति ॥ ३७ ॥

यमेष्विव मिताहारमहिंसां नियमेष्विव ।
मुख्यं सर्वासनेष्वेकं सिद्धाः सिद्धासनं विदुः ॥ ३८ ॥

अथ सप्तभिः श्लोकैः सिद्धासनं प्रशंसति—यमेष्वि-त्यादिभिः । यमेषु मिताहारमिव । मिताहारो वक्ष्यमाणः ‘सुस्निग्धमधुराहारः’ इत्यादिना । नियमेषु अहिंसामिव ।

सर्वाणि यान्यासनानि तेषु सिद्धाः एकं सिद्धासनं मुख्यं विदुरिति संबन्धः ॥ ३८ ॥

चतुरशीतिपीठेषु सिद्धमेव सदाऽभ्यसेत् ।
द्वासप्ततिसहस्राणां नाडीनां मलशोधनम् ॥ ३९ ॥

चतुरशीतीति । चतुरधिकाशीतिसंख्याकानि यानि पीठानि तेषु सिद्धमेव सिद्धासनमेव सदा सर्वदाऽभ्यसेत् । सिद्धासनस्य सदाऽभ्यासे हेतुगर्भं विशेषणं द्वासप्ततिसहस्राणां नाडीनां मलशोधनं शोधकम् ॥ ३९ ॥

आत्मध्यायी मिताहारी यावद्द्वादशवत्सरम् ।
सदा सिद्धासनाभ्यासाद्योगी निष्पत्तिमाप्नुयात् ॥४०॥

आत्मध्यायीति । आत्मानं ध्यायतीत्यात्मध्यायी मिताहारोऽस्यास्तीति मिताहारी यावन्तो द्वादश वत्सराः यावद्द्वादशवत्सरम् । 'यावदवधारणे' इत्यव्ययीभावः समासः । द्वादशवत्सरपर्यन्तमित्यर्थः । सदा सर्वदा सिद्धासनस्याभ्यासाद्योगी योगाभ्यासी निष्पत्तिं योगसिद्धिमाप्नुयात्प्राप्नुयात् । योगान्तराभ्यासमन्तरेण सिद्धासनाभ्यासमात्रेण सिद्धिं प्राप्नुयादित्यर्थः ॥ ४० ॥

किमन्यैर्बहुभिः पीठैः सिद्धे सिद्धासने सति ।
प्राणानिले सावधाने बद्धे केवलकुम्भके ॥ ४१ ॥

किमन्यैरिति । सिद्धासने सिद्धे सत्यन्यैर्बहुभिः पीठैरासनैः किम् ? न किमपीत्यर्थः । सावधाने प्राणानिले प्राणवायौ केवलकुम्भके बद्धे सति ॥ ४१ ॥

उत्पद्यते निरायासात्स्वयमेवोन्मनी कला ।
तथैकस्मिन्नेव दृढे बद्धे सिद्धासने सति ।
बन्धत्रयमनायासात्स्वयमेवोपजायते ॥ ४२ ॥

उन्मनी उन्मन्यवस्था । सा कलेवाह्लादकत्वाच्चन्द्रलेखेव निरायासादनायासात्स्वयमेवोत्पद्यत उदेति । तथेति । तथोक्तप्रकारेणैकस्मिन्नेव सिद्धासने दृढे बद्धे सति बन्धत्रयं मूलबन्धोड्डीयानबन्धजालंधरबन्धरूपम् अनासायात् 'पार्ष्णिमार्गेण संपीड्य योनिमाकुञ्चयेद्गुदम्' इत्यादिवक्ष्यमाणमूलबन्धादिष्वायासस्तं विनैव स्वयमेवोपजायते स्वत एवोत्पद्यत इत्यर्थः ॥ ४२ ॥

नासनं सिद्धसदृशं न कुम्भः केवलोपमः ।
न खेचरीसमा मुद्रा न नादसदृशो लयः ॥ ४३ ॥

नासनमिति । सिद्धेन सिद्धासनेन सदृशमासनं नास्तीति शेषः । केवलेन केवलकुम्भकेनोपमीयत इति केवलोपमः कुम्भः कुम्भको नास्ति । खेचरीमुद्रासमा मुद्रा नास्ति । नादसदृशो लयो लयहेतुर्नास्ति ॥ ४३ ॥

अथ पद्मासनम्—

वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते ॥

अथासनं वक्तुमुपक्रमते—अथेति । पद्मासनमाह—वामोरूपरीति । वामो य ऊरुस्तस्योपरि दक्षिणम् । चकारः पादपूरणे । संस्थाप्य सम्यगुत्तानं स्थापयित्वा वामं सव्यं चरणं तथा दक्षिणचरणवद्दक्षो दक्षिणो य ऊरुस्तस्योपरि संस्थाप्य पश्चिमेन भागेन पृष्ठभागेनेति । विधिर्विधानं करयोरित्यर्थात् । तेन कराभ्यां हस्ताभ्यां दृढं यथा स्यात्तथा पादाङ्गुष्ठौ धृत्वा गृहीत्वा । दक्षिणं करं पृष्ठतः कृत्वा । वामोरुस्थितदक्षिणचरणाङ्गुष्ठं गृहीत्वा वामकरं पृष्ठतः कृत्वा । दक्षिणोरुस्थितवामचरणाङ्गुष्ठं गृहीत्वेत्यर्थः । हृदये हृदयसमीपे । सामीपिकाधारे सप्तमी । चिबुकं हनुं निधायोरसश्चतुरङ्गुलान्तरे चिबुकं निधायेति रहस्यम् । नासाग्रं नासिकाग्रमालोकयेत्पश्येद्यत्रैतद्यमिनां योगिनां व्याधेर्विनाशं करोतीति व्याधिविनाशकारि पद्मासनमेतन्नामकं प्रोच्यते । सिद्धैरिति शेषः ॥ ४४ ॥

मतान्तरे—

उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ ॥ ४५ ॥

मत्स्येन्द्रनाथाभिमतं पद्मासनमाह—उत्तानाविति । उत्तानौ ऊरुसंलग्नपृष्ठभागौ चरणौ पादौ प्रयत्नतः प्रकृष्टाद्यत्नादूरुसंस्थावूर्वोः सम्यक् तिष्ठत इत्यूरुसंस्थौ तादृशौ कृत्वा । ऊर्वोर्मध्ये ऊरुमध्ये । तथा चार्थे । पाणी करावुत्तानौ कृत्वा । ऊरुसंस्थोत्तानपादोभयपार्ष्णिसंलग्नपृष्ठं सव्यं पाणिमुत्तानं कृत्वा तदुपरि दक्षिणं पाणिं चोत्तानं कृत्वेत्यर्थः । ततस्तदनन्तरं दृशौ दृष्टी ॥ ४५ ॥

नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया ।
उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः ॥ ४६ ॥

नासाग्रे नासिकाग्रे विन्यसेद्विशेषेण निश्चलतया न्यसेदित्यर्थः । राजदन्तानां दंष्ट्राणां सव्यदक्षिणभागे स्थितानां मूले उभे मूलस्थाने जिह्वया उत्तम्भ्य ऊर्ध्वं स्तम्भयित्वा । गुरुमुखादवगन्तव्योऽयं जिह्वाबन्धः । चिबुकं वक्षसि निधायेति शेषः । शनैर्मन्दं मन्दं पवनं वायुमुत्थाप्य । अनेन मूलबन्धः प्रोक्तः । मूलबन्धोऽपि गुरुमुखादेवावगन्तव्यः । वस्तुतस्तु जिह्वाबन्धेनैवायं चरितार्थ इति हठरहस्यविदः ॥४६॥

इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनम् ।
दुर्लभं येन केनापि धीमता लभ्यते भुवि ॥ ४७ ॥

एवं यत्रास्यते तदिदं पद्मासनं पद्मासनाभिधानं प्रोक्तम् । आसनज्ञैरिति शेषः । कीदृशम् ? सर्वेषां व्याधीनां विशेषेण नाशनं येनकेनापि भाग्यहीनेन दुर्लभम् । धीमता भुवि भूमौ लभ्यते प्राप्यते ॥ ४७ ॥

कृत्वा संपुटितौ करौ दृढतरं बद्ध्वा तु पद्मासनं
गाढं वक्षसि संनिधाय चिबुकं ध्यायंश्च तच्चेतसि ।
वारं वारमपानमूर्ध्वमनिलं प्रोत्सारयन्पूरितं
न्यञ्चन्प्राणमुपैति बोधमतुलं शक्तिप्रभावान्नरः ॥४८॥

एतच्च महायोगिसंमतमिति स्पष्टयितुमन्यदपि पद्मासने कृत्यविशेषमाह—कृत्वेति । संपुटितौ संपुटीकृतौ करावुत्सङ्गस्थाविति शेषः । दृढतरमतिशयेन दृढं सुस्थिरं पद्मासनं बद्ध्वा कृत्वेत्यर्थः । चिबुकं हनुं गाढं दृढं यथा स्यात्तथा वक्षसि वक्षःसमीपे संनिधाय संनिहितं कृत्वा चतुरङ्गुलान्तरेणेति योगिसंप्रदायाज्ज्ञेयम् । जालंधरबन्धं कृत्वेत्यर्थः । तत्स्वस्वेष्टदेवतारूपं ब्रह्म वा, 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति भगवदुक्तेः । चेतसि चित्ते ध्यायन् चिन्तयन् । अपानमनिलमपानवायुमूर्ध्वं प्रोत्सारयन्मूलबन्धं

कृत्वा सुषुम्णामार्गेण प्राणमूर्ध्वं नयन् पूरितं पूरकेण अन्तर्धारितं प्राणं न्यञ्चन्नीचैरधोऽञ्चन् गमयन् । अन्तर्भावितण्यर्थोऽञ्चतिः । प्राणापानयोरैक्यं कृत्वेत्यर्थः । नरः पुमानतुलं बोधं निरुपमज्ञानं शक्तिप्रभावाच्छक्तिराधारशक्तिः कुण्डलिनी तस्याः प्रभावात्सामर्थ्यादुपैति प्राप्नोति । प्राणापानयोरैक्ये कुण्डलिनीबोधो भवति । कुण्डलिनीबोधे सुषुम्णामार्गेण प्राणो ब्रह्मरन्ध्रं गच्छति । तत्र गते चित्तस्थैर्यं भवति । चित्तस्थैर्ये संयमादात्मसाक्षात्कारो भवतीत्यर्थः ॥ ४८ ॥

पद्मासने स्थितो योगी नाडीद्वारेण पूरितम् ।
मारुतं धारयेद्यस्तु स मुक्तो नात्र संशयः ॥ ४९ ॥

पद्मासन इति । पद्मासने स्थितो यो योगी योगाभ्यासी पूरितं पूरकेणान्तर्नीतं मारुतं वायुम्, सुषुम्णामार्गेण मूर्धानं नीत्वेति शेषः । धारयेत्स्थिरीकुर्यात्स मुक्तः, अत्र संशयो नास्तीत्यन्वयः ॥ ४९ ॥

अथ सिंहासनम्—

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
दक्षिणे सव्यगुल्फं तु दक्षगुल्फं तु सव्यके ॥ ५० ॥

सिंहासनमाह—गुल्फौ चेति । वृषणस्याधः अधोभागे सीवन्याः पार्श्वयोः सीवन्या उभयभागयोः क्षिपेत्प्रेरयेत्, स्था-

पयेदिति यावत् । गुल्फस्थापनप्रकारमेवाह—दक्षिण इति । सीवन्या दक्षिणे भागे सव्यगुल्फं स्थापयेत् । सव्यके सीवन्याः सव्यभागे दक्षिणगुल्फं स्थापयेत् ॥ ५० ॥

हस्तौ तु जान्वोः संस्थाप्य स्वाङ्गुलीः संप्रसार्य च ।
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ॥ ५१ ॥

हस्ताविति । जान्वोरुपरि हस्तौ तु संस्थाप्य सम्यग् जानुसंलग्नतलौ यथा स्यातां तथा स्थापयित्वा । स्वाङ्गुलीः हस्ताङ्गुलीः संप्रसार्य सम्यक् प्रसार्य व्यात्तवक्त्रः संप्रसारितलल्जिह्वमुखः सुसमाहितः एकाग्रचित्तः नासाग्रं नासिकाग्रं यस्मिन्निरीक्षेत ॥ ५१ ॥

सिंहासनं भवेदेतत्पूजितं योगिपुंगवैः ।
बन्धत्रितयसंधानं कुरुते चासनोत्तमम् ॥ ५२ ॥

एतत्सिंहासनं भवेत् । कीदृशम्? योगिपुंगवैः योगिश्रेष्ठैः पूजितं प्रस्तुतमासनेषूत्तमं सिंहासनं बन्धानां मूलबन्धादीनां त्रितयं तस्य संधानं संनिधानं कुरुते ॥ ५२ ॥

अथ भद्रासनम्—

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
सव्यगुल्फं तथा सव्ये दक्षगुल्फं तु दक्षिणे ॥ ५३ ॥

भद्रासनमाह—

गुल्फाविति । वृषणस्याधः सीवन्याः पार्श्वयोः सीवन्या उभयतः गुल्फौ पादग्रन्थी क्षिपेत् । क्षेपणप्रकारमेवाह—सव्यगुल्फमिति । सव्ये सीवन्याः पार्श्वे सव्यगुल्फं क्षिपेत् । तथा पादपूरणे । दक्षगुल्फं तु दक्षिणे सीवन्याः पार्श्वे क्षिपेत् ॥ ५३ ॥

पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलम् ।
भद्रासनं भवेदेतत्सर्वव्याधिविनाशनम् ॥ ५४ ॥

पार्श्वपादौ च पार्श्वसमीपगतौ पादौ पाणिभ्यां भुजाभ्यां दृढं बद्ध्वा । परस्परसंलग्नाङ्गुलिभ्यामुदरसंलग्नतलाभ्यां पाणिभ्यां बद्ध्वेत्यर्थः । एतद्भद्रासनं भवेत् । कीदृशम्? सर्वेषां व्याधीनां विशेषेण नाशनम् ॥ ५४ ॥

गोरक्षासनमित्याहुरिदं वै सिद्धयोगिनः ।
एवमासनबन्धेषु योगीन्द्रो विगतश्रमः ॥ ५५ ॥

गोरक्षेति । सिद्धाश्च ते योगिनश्च सिद्धयोगिनः इदं भद्रासनं गोरक्षासनमित्याहुः । गोरक्षेण प्रायशोऽभ्यस्तत्वाद्गोरक्षासनमिति वदन्ति । आसनान्युक्तानि । तेषु यत्कर्तव्यं तदाह—एवमिति । एवमुक्तेष्वासनबन्धेषु बन्धनप्रकारेषु विगतः

श्रमो यस्य स विगतश्रम आसनानां बन्धेषु श्रमरहितः। योगिनामिन्द्रो योगीन्द्रः ॥ ५५ ॥

अभ्यसेन्नाडिकाशुद्धिं मुद्रादिपवनक्रियाम्।
आसनं कुम्भकं चित्रं मुद्राख्यं करणं तथा ॥ ५६ ॥

नाडिकानां नाडीनां शुद्धिम्। 'प्राणं चेदिडया पिबेन्नियमितम्' इति वक्ष्यमाणरूपा मुद्रा आदिर्यस्याः सूर्यभेदादेस्तादृशीम्। पवनस्य प्राणवायोः क्रियां प्राणायामरूपां चाभ्यसेत्। अथ हठाभ्यसनक्रममाह—आसनमिति। आसनमुक्तलक्षणं चित्रं नानाविधं कुम्भकम् 'सूर्यभेदनमुज्जायी' इत्यादि वक्ष्यमाणम्। मुद्रा इत्याख्या यस्य तन्मुद्राख्यम्। महामुद्रादिरूपं करणं हठसिद्धौ प्रकृष्टोपकारकम्। तथा चार्थे ॥ ५६ ॥

अथ नादानुसंधानमभ्यासानुक्रमो हठे।
ब्रह्मचारी मिताहारी त्यागी योगपरायणः।
अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा ॥ ५७ ॥

अथैतत्त्रयानुष्ठानानन्तरं नादस्यानाहतध्वनेरनुसंधानमनुचिन्तनं हठे हठयोगेऽभ्यासोऽभ्यसनं तस्यानुक्रमः पौर्वापर्यक्रमः। हठसिद्धेरवधिमाह—ब्रह्मचारीति। ब्रह्मचर्यवान् मिताहारो वक्ष्यमाणः सोऽस्यास्तीति मिताहारी त्यागी

दानशीलो विषयपरित्यागी वा योगपरायणः योगाभ्यसनपरः । अब्दाद्वर्षादूर्ध्वं सिद्धः सिद्धहठो भवेत् । अत्रोक्तेऽर्थे विचारणा स्यान्न वेति संशयप्रयुक्ता न कार्या । एतन्निश्चितमेवेत्यर्थः ॥ ५७ ॥

सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः ।
भुज्यते शिवसंप्रीत्यै मिताहारः स उच्यते ॥ ५८ ॥

पूर्वश्लोके मिताहारीत्युक्तं तत्र योगिनां कीदृशो मिताहार इत्यपेक्षायामाह—सुस्निग्धेति । सुस्निग्धोऽतिस्निग्धः स चासौ मधुरश्च तादृश आहारश्चतुर्थांशविवर्जितश्चतुर्थभागरहितः । तदुक्तमभियुक्तैः—"द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् । वायोः संचरणार्थाय चतुर्थमवशेषयेत् ॥" इति । शिवो जीवः ईश्वरो वा, 'भोक्ता देवो महेश्वरः' इति वचनात् । तस्य संप्रीत्यै सम्यक्प्रीत्यर्थं यो भुज्यते स मिताहार इत्युच्यते ॥ ५८ ॥

कट्वम्लतीक्ष्णलवणोष्णहरीतशाक-
सौवीरतैलतिलसर्षपमद्यमत्स्यान् ।
आजादिमांसदधितक्रकुलत्थकोल-
पिण्याकहिङ्गुलशुनाद्यमपथ्यमाहुः ॥ ५९ ॥

अथ योगिनामपथ्यमाह द्वाभ्याम्—कट्विति। कटु कारवेल्ल इत्यादि, अम्लं चिञ्चाफलादि, तीक्ष्णं मरीचादि, लवणं प्रसिद्धम्, उष्णं गुडादि, हरीतशाकं पत्रशाकम्, सौवीरं काञ्जिकम्, तैलं तिलसर्षपादिस्नेहः, तिलाः प्रसिद्धाः, सर्षपाः सिद्धार्थाः, मद्यं सुरा, मत्स्यो झषः। एषामितरेतरद्वन्द्वः। एतानपथ्यानाहुः। अजस्येदमाजं तदादिर्यस्य सौकरादेस्तदाजादि तच्च तन्मांसं चाजादिमांसम्, दधि दुग्धपरिणामविशेषः, तक्रं गृहीतसारं दधि, कुलत्थो द्विदलविशेषः, कोलं कोल्याः फलं बदरम्। 'कर्कन्धूर्बदरी कोलिः' इत्यमरः। पिण्याकं तिलपिण्डम्, हिङ्गु रामठम्, लशुनम्। एषामितरेतरद्वन्द्वः। एतान्याद्यानि यस्य तत्तथा। आद्यशब्देन पलाण्डुगृञ्जनमादकद्रव्यमाषान्नादिकं ग्राह्यम्। अपथ्यमहितम्। योगिनामिति शेषः। आहुर्योगिन इत्यध्याहारः॥ ५९ ॥

भोजनमहितं विद्यात्पुनरस्योष्णीकृतं रूक्षम्।
अतिलवणमम्लयुक्तं कदशनशाकोत्कटं वर्ज्यम्॥ ६०॥

भोजनमिति। पश्चादग्निसंयोगेनोष्णीकृतं यद्भोजनं सूपौदनरोटिकादि रूक्षं घृतादिहीनम् अतिशयितं लवणं यस्मिंस्तदतिलवणं यद्वा लवणमतिक्रान्तमतिलवणं चाकूवा इति लोके प्रसिद्धं शाकं यवक्षारादिकं च। लवणस्य सर्वथा वर्जनी-

यत्वादुत्तरपक्षः साधुः । तथा च दत्तात्रेयः—"अथ वर्ज्यानि वक्ष्यामि योगविघ्नकराणि च । लवणं सर्षपं चाम्लमुग्रं तीक्ष्णं च रूक्षकम् । अतीव भोजनं त्याज्यमतिनिद्राऽतिभाषणम् ॥" इति ॥ स्कन्दपुराणेऽपि—"त्यजेत्कट्वम्ललवणं क्षीरभोजी सदा भवेत्" इति । अम्लयुक्तमम्लद्रव्येण युक्तमपि त्याज्यं किमुत साक्षादम्लम् । अत्र तृतीयपादम् 'पललं वा तिलपिण्डम्' इति केचित्पठन्ति । तस्यायमर्थः—पललं मांसं तिलपिण्डं पिण्याकं कदशनं कदन्नं यावनालकोद्रवादि शाकं विहितेतरशाकमात्रम् उत्कटं विदाहि मिरचीति लोके प्रसिद्धम् । मिरचा इति हिन्दुस्थानभाषायाम् । कदशनादीनां समाहारद्वन्द्वः । अतिलवणादिकं वर्ज्यं वर्जनार्हम् । दुष्टमिति पाठे दुष्टं पूतिपर्युषितादि । अहितमिति योजनीयम् ॥ ६० ॥

वह्निस्त्रीपथिसेवानामादौ वर्जनमाचरेत् ।

तथा हि गोरक्षवचनम्—

वर्जयेद् दुर्जनप्रान्तं वह्निस्त्रीपथिसेवनम् ।
प्रातःस्नानोपवासादि कायक्लेशविधिं तथा ॥ ६१ ॥

एवं योगिनां सदा वर्ज्यान्युक्त्वाऽभ्यासकाले वर्ज्यान्याहार्धेन—वह्नीति । वह्निश्च स्त्री च पन्थाश्च तेषां सेवा वह्निसेवनस्त्रीसङ्गतीर्थयात्रागमनादिरूपास्तासां वर्जनमादावभ्यास-

काल आचरेत्। सिद्धेऽभ्यासे तु कदाचित्। शीते वह्निसेवनं गृहस्थस्य ऋतौ स्वभार्यागमनं तीर्थयात्रादौ मार्गगमनं च न निषिद्धमित्यादिपदेन सूच्यते। तत्र प्रमाणं गोरक्षवचनमवतारयति—तथा हीति। तत्पठति—वर्जयेदिति। दुर्जनप्रान्तं दुर्जनसमीपवासम्। 'दुर्जनप्रीतिम्' इति क्वचित्पाठः। वह्निस्त्रीपथिसेवनं व्याख्यातम्, प्रातःस्नानमुपवासश्चादिर्यस्य फलाहारादेः तच्च तयोः समाहारद्वन्द्वः। प्रथमाभ्यासिनः प्रातःस्नाने शीतविकारोत्पत्तेः, उपवासादिना पित्ताद्युत्पत्तेः। कायक्लेशविधिं कायक्लेशकरं विधिं क्रियां बहुसूर्यनमस्कारादिरूपां बहुभारोद्वहनादिरूपां च। तथा समुच्चये। अत्र प्रतिपदं वर्जयेदिति क्रियासंबन्धः॥ ६१॥

गोधूमशालियवषाष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि।
शुण्ठीपटोलकफलादिकपञ्चशाकं
मुद्गादिदिव्यमुदकं च यमीन्द्रपथ्यम्॥ ६२॥

अथ योगिपथ्यमाह—गोधूमेत्यादिना। गोधूमाश्च शालयश्च यवाश्च षाष्टिकाः षष्ट्या दिनैर्ये पच्यन्ते तन्दुलविशेषास्ते शोभनमन्नं पवित्रान्नं श्यामाकनीवारादि तच्चैतेषां समाहारद्वन्द्वः। क्षीरं दुग्धमाज्यं घृतं खण्डः शर्करा नवनीतं मथितदधिसारः सिता तीव्रपदी खण्डशर्करेति लोके प्रसिद्धा,

मिसरीति हिन्दुस्थानभाषायाम्। मधु क्षौद्रम्, एषामितरेतरद्वन्द्वः। शुण्ठी प्रसिद्धा पटोलकफलं परवर इति भाषायां प्रसिद्धं शाकं तदादिर्यस्य कोशातक्यादेस्तत्पटोलकफलादिकम्। 'शेषाद्विभाषा' इति कप्रत्ययः। पञ्चानां शाकानां समाहारः पञ्चशाकम्। तदुक्तं वैद्यके—"सर्वशाकमचाक्षुष्यं चाक्षुष्यं शाकपञ्चकम्। जीवन्तीवास्तुमूल्याक्षी मेघनादपुनर्नवा॥" इति। मुद्गा द्विदलविशेषा आदिर्यस्य तन्मुद्गादि। आदिपदेन आढकी ग्राह्या। दिव्यं निर्दोषमुदकं जलम्। यम एषामस्तीति यमिनः तेष्विन्द्रो देवश्रेष्ठो यो योगीन्द्रस्तस्य पथ्यं हितम्॥ ६२॥

पुष्टं सुमधुरं स्निग्धं गव्यं धातुप्रपोषणम्।
मनोभिलषितं योग्यं योगी भोजनमाचरेत्॥ ६३॥

अथ योगिनो भोजननियममाह—पुष्टमिति। पुष्टं देहपुष्टिकरमोदनादि सुमधुरं शर्करादिसहितं स्निग्धं सघृतं गव्यं गोदुग्धघृतादियुक्तं गव्यालाभे माहिषं दुग्धादि ग्राह्यम्। धातुप्रपोषणं लड्डुकापूपादि। मनोभिलषितं पुष्टादिषु यन्मनोरुचिकरं तदेव योगिना भोक्तव्यम्। मनोभिलषितमपि किमविहितं भोक्तव्यं नेत्याह—योग्यमिति। विहितमेवेत्यर्थः। योगी भोजनं पूर्वोक्तविशेषणविशिष्टमाचरेत्कुर्यादित्यर्थः। न तु सक्तुभर्जितान्नादिना निर्वाहं कुर्यादिति भावः॥ ६३॥

युवा वृद्धोऽतिवृद्धो वा व्याधितो दुर्बलोऽपि वा ।
अभ्यासात्सिद्धिमाप्नोति सर्वयोगेष्वतन्द्रितः ॥६४॥

योगाभ्यासिनो वयोविशेषारोग्याद्यपेक्षा नास्तीत्याह—युवेति । युवा तरुणः वृद्धो वृद्धावस्थां प्राप्तः अतिवृद्धोऽतिवार्द्धकं गतो वा । अभ्यासादासनकुम्भकादीनामभ्यसनात्सिद्धिं समाधितत्फलरूपामाप्नोति । अभ्यासप्रकारमेव वदन्विशिनष्टि—सर्वयोगेष्विति । सर्वेषु योगेषु योगाङ्गेष्वतन्द्रितोऽनलसः । योगाङ्गाभ्यासात्सिद्धिमाप्नोतीत्यर्थः । जीवनसाधने कृषिवाणिज्यादौ जीवनशब्दप्रयोगवत्साक्षात्परम्परया वा योगसाधनेषु योगाङ्गेषु योगशब्दप्रयोगः ॥ ६४ ॥

क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत् ।
न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते ॥ ६५ ॥

अभ्यासादेव सिद्धिर्भवतीति द्रढयन्नाह द्वाभ्याम्—क्रियायुक्तस्येति । क्रिया योगाङ्गानुष्ठानरूपा तया युक्तस्य सिद्धिर्योगसिद्धिः स्यात् । अक्रियस्य योगाङ्गानुष्ठानरहितस्य कथं भवेन्न कथमपीत्यर्थः । ननु योगशास्त्राध्ययनेन योगसिद्धिः स्यान्नेत्याह—नेति । शास्त्रस्य योगशास्त्रस्य पाठमात्रेण केवलेन पाठेन योगस्य सिद्धिर्न प्रजायते नैव जायत इत्यर्थः ॥ ६५ ॥

न वेषधारणं सिद्धेः कारणं न च तत्कथा ।
क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः ॥ ६६ ॥

नेति । वेषस्य काषायवस्त्रादेः धारणं सिद्धेर्योगसिद्धेः कारणं न । तस्य योगस्य कथा वा कारणं न । किं तर्हि सिद्धेः कारणमित्यत आह—क्रियैवेति ॥ ६६ ॥

पीठानि कुम्भकाश्चित्रा दिव्यानि करणानि च ।
सर्वाण्यपि हठाभ्यासे राजयोगफलावधि ॥ ६७ ॥

योगाङ्गानुष्ठानस्यावधिमाह—पीठानीति । पीठान्यासनानि चित्रा अनेकविधाः कुम्भकाः सूर्यभेदादयः दिव्यान्युत्कृष्टानि करणानि महामुद्रादीनि । हठसिद्धौ प्रकृष्टोपकारकत्वं करणत्वम् । हठाभ्यासे सर्वाणि पीठकुम्भककरणानि राजयोगफलावधि राजयोग एव फलं तदवधि तत्पर्यन्तं कर्तव्यानीति शेषः ॥ ६७ ॥

इति श्रीसहजानन्दसंतानचिन्तामणिस्वात्मारामयोगीन्द्रविरचितायां हठप्रदीपिकायामासनविधिकथनं नाम प्रथमोपदेशः ।

इति श्रीहठप्रदीपिकायां ज्योत्स्नाभिधायां ब्रह्मानन्दकृतायां प्रथमोपदेशः ।

द्वितीयोपदेशः ।

अथासने दृढे योगी वशी हितमिताशनः ।
गुरूपदिष्टमार्गेण प्राणायामान्समभ्यसेत् ॥ १ ॥

अथासनोपदेशानन्तरं प्राणायामान्वक्तुमुपक्रमते—अथेति । अथेति मङ्गलार्थः । आसने दृढे सति वशी जिताक्षः हितं पथ्यं च तन्मितं च पूर्वोपदेशोक्तलक्षणं तत्तादृशमशनं यस्य स हितमिताशनः गुरुणोपदिष्टो यो मार्गः प्राणायामाभ्यासप्रकारस्तेन प्राणायामान् वक्ष्यमाणान्सम्यगुत्साहसाहसधैर्यादिभिरभ्यसेत् । दृढे स्थिरे कुक्कुटादिविवर्जिते सिद्धासनादाविति वा योजना ॥ १ ॥

चले वाते चलं चित्तं निश्चले निश्चलं भवेत् ।
योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् ॥ २ ॥

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति महदुक्तेः प्रयोजनाभावे प्रवृत्त्यभावात्प्राणायामप्रयोजनमाह—चले वात इति । वाते चले सति चित्तं चलं भवेत्, निश्चले वाते

निश्चलं भवेत्, चित्तमित्यत्रापि संबध्यते। वाते चित्ते च निश्चले योगी स्थाणुत्वं स्थिरदीर्घजीवित्वमिति यावत्। ईशत्वं वाऽऽप्नोति। ततस्तस्माद्वायुं प्राणं निरोधयेत्कुम्भयेत् ॥ २ ॥

यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते।
मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् ॥ ३ ॥

यावदिति। देहे शरीरे यावत्कालं वायुः प्राणः स्थितः तावत्कालपर्यन्तं जीवनमुच्यते लोकैः, देहप्राणसंयोगस्यैव जीवनपदार्थत्वात्। तस्य प्राणस्य निष्क्रान्तिर्देहाद्वियोगो मरणमुच्यते। ततस्तस्माद्वायुं निरोधयेत् ॥ ३ ॥

मलाकुलासु नाडीषु मारुतो नैव मध्यगः।
कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत् ॥ ४ ॥

मलशुद्धेर्हठसिद्धिजनकत्वं व्यतिरेकेणाह—मलाकुलास्विति। नाडीषु मलैराकुलासु व्याप्तासु सतीषु मारुतः प्राणो मध्यगः सुषुम्णामार्गवाही नैव स्यात्। अपि तु शुद्धमलास्वेव मध्यगो भवतीत्यर्थः। उन्मनीभाव उन्मन्या भावो भवनं कथं स्यान्न कथमपीत्यर्थः। कार्यस्य कैवल्यरूपस्य सिद्धिर्निष्पत्तिः कथं भवेन्न कथंचिदपीत्यर्थः ॥ ४ ॥

शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम्।
तदैव जायते योगी प्राणसंग्रहणे क्षमः ॥ ५ ॥

अन्वयेनापि मलशुद्धेर्हठसिद्धिहेतुत्वमाह —शुद्धिमेतीति । यदा यस्मिन्काले मलैराकुलं व्याप्तं सर्वं समस्तं नाडीनां चक्रं समूहः शुद्धिं मलराहित्यमेति प्राप्नोति तदैव तस्मिन्नेव काले योगी योगाभ्यासी प्राणस्य संग्रहणे क्षमः समर्थो जायते ॥ ५ ॥

प्राणायामं ततः कुर्यान्नित्यं सात्त्विकया धिया ।
यथा सुषुम्णानाडीस्था मलाः शुद्धिं प्रयान्ति च ॥ ६ ॥

मलशुद्धिः कथं भवतीत्याकाङ्क्षायां तच्छोधकं प्राणायाममाह—प्राणायाममिति । यतो मलशुद्धिं विना प्राणसंग्रहणे क्षमो न भवति ततस्तस्मादीश्वरप्रणिधानोत्साहसाहसादिप्रयत्नाभिभूतविक्षेपालस्यादिराजसतामसधर्मया सात्त्विकया प्रकाशप्रसादशीलया धिया बुद्ध्या नित्यं प्राणायामं कुर्यात् । यथा येन प्रकारेण सुषुम्णानाड्यां स्थिता मलाः शुद्धिमपगमं प्रयान्ति नश्यन्तीत्यर्थः ॥ ६ ॥

बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ।
धारयित्वा यथाशक्ति भूयः सूर्येण रेचयेत् ॥ ७ ॥

मलशोधकप्राणायामप्रकारमाह द्वाभ्याम्—बद्धपद्मासन इति । बद्धं पद्मासनं येन तादृशो योगी प्राणं प्राणवायुं चन्द्रेण चन्द्रनाड्येडया पूरयेत् । शक्तिमनतिक्रम्य यथाशक्ति

धारयित्वा कुम्भयित्वा। भूयः पुनः सूर्येण सूर्यनाड्या पिङ्गलया रेचयेत्। बाह्यवायोः प्रयत्नविशेषादुपादानं पूरकः। जालंधरादिबन्धपूर्वकं प्राणनिरोधः कुम्भकः। कुम्भितस्य वायोः प्रयत्नविशेषाद्गमनं रेचकः। प्राणायामाङ्गरेचकपूरकयोरेवेमे लक्षणे इति। 'भस्त्रावल्लोहकारस्य रेचपूरौ ससंभ्रमौ' इति गौणरेचकपूरकयोर्नाव्याप्तिः, तयोर्लक्ष्यत्वाभावात् ॥ ७ ॥

प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः।
विधिवत्कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत् ॥ ८ ॥

प्राणमिति। सूर्येण सूर्यनाड्या पिङ्गलया प्राणमाकृष्य गृहीत्वा शनैर्मन्दमन्दमुदरं जठरं पूरयेत्। विधिवद्बन्धपूर्वकं कुम्भकं कृत्वा पुनर्भूयश्चन्द्रेणेडया रेचयेत् ॥ ८ ॥

येन त्यजेत्तेन पीत्वा धारयेदतिरोधतः।
रेचयेच्च ततोऽन्येन शनैरेव न वेगतः ॥ ९ ॥

उक्ते प्राणायामे विशेषमाह—येनेति। येन चन्द्रेण सूर्येण वा त्यजेद्रेचयेत्तेन पीत्वा तेनैव पूरयित्वा। अतिरोधतोऽतिशयितेन रोधेन स्वेदकम्पादिजननपर्यन्तेन। सार्वविभक्तिकस्तसिल्। येन पूरकस्ततोऽन्येन शनै रेचयेन्न तु वेगतः। वेगाद्रेचने बलहानिः स्यात्। येन पूरकः कृतस्तेन रेचको न

कर्तव्यः । येन रेचकः कृतस्तेनैव पूरकः कर्तव्य इति भावः ॥ ९ ॥

प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यया रेचये-
त्पीत्वा पिङ्गलया समीरणमथो बद्ध्वा त्यजेद्वामया ।
सूर्याचन्द्रमसोरनेन विधिनाऽभ्यासं सदा तन्वतां
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः ॥१०॥

बद्धपद्मासन इत्याद्युक्तमर्थं पिण्डीकृत्यानुवदन् प्राणायामस्यावान्तरफलमाह—प्राणमिति । चेदिडया वामनाड्या प्राणं पिबेत्पूरयेत्तर्हि नियमितं कुम्भितं प्राणं भूयः पुनरन्यया पिङ्गलया रेचयेत् । पिङ्गलया दक्षनाड्या समीरणं वायुं पीत्वा पूरणानन्तरं बद्ध्वा कुम्भयित्वा वामयेडया त्यजेद्रेचयेत् । सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ तयोः । 'देवताद्वन्द्वे च' इत्यानङ् । अनेनोक्तेन विधिना प्रकारेण सदा नित्यमभ्यासं चन्द्रेणापूर्य कुम्भयित्वा सूर्येण रेचयेत्सूर्येणापूर्य कुम्भयित्वा चन्द्रेण रेचयेदित्याकारकं तन्वतां विस्तारयतां यमिनां यमवतां नाडीगणा नाडीसमूहा मासत्रयादूर्ध्वतो मासानां त्रयं तस्मादुपरि शुद्धा मलरहिता भवन्ति ॥ १० ॥

प्रातर्मध्यंदिने सायमर्धरात्रे च कुम्भकान् ।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥ ११ ॥

अथ प्राणायामाभ्यासकालं तदवधिं चाह—प्रातरिति । प्रातररुणोदयमारभ्य सूर्योदयाद्धटिकात्रयपर्यन्ते प्रातःकाले मध्यंदिने मध्याह्ने पञ्चधा विभक्तस्य दिनस्य मध्यभागे सायंसंध्या त्रिनाडीप्रमितार्कास्तादधस्तादूर्ध्वं चेत्युक्तलक्षणे संध्याकाले रात्रेरर्धमर्धरात्रं तस्मिन्नर्धरात्रे रात्रेर्मध्ये मुहूर्तद्वये च शनैरशीतिपर्यन्तमशीतिसंख्यावधि चतुर्वारं वारचतुष्टयम् । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । चतुर्षु कालेष्वेकैकस्मिन्कालेऽशीतिप्राणायामाः कार्याः । अर्धरात्रे कर्तुमशक्तश्चेत्त्रिसंध्यं कर्तव्या इति संप्रदायः । चतुर्वारं कृताश्चेद्दिने दिने (३२०) विंशत्यधिकशतत्रयपरिमिताः प्राणायामा भवन्ति । वारत्रयं कृताश्चेत् (२४०) चत्वारिंशदधिकशतद्वयपरिमिता भवन्ति ॥ ११ ॥

कनीयसि भवेत्स्वेदः कम्पो भवति मध्यमे ।
उत्तमे स्थानमाप्नोति ततो वायुं निबन्धयेत् ॥ १२ ॥

कनिष्ठमध्यमोत्तमानां प्राणायामानां क्रमेण व्यापकविशेषमाह—कनीयसीति । कनीयसि कनिष्ठे प्राणायामे स्वेदः प्रस्वेदो भवेद्भवति । स्वेदानुमेयः कनिष्ठः । मध्यमे प्राणायामे कम्पो भवति । कम्पानुमेयो मध्यमः । उत्तमे प्राणायामे स्थानं ब्रह्मरन्ध्रमाप्नोति । स्थानप्राप्त्यनुमेय उत्तमः ।

ततस्तस्माद्वायुं प्राणं निबन्धयेन्नितरां बन्धयेत् । कनिष्ठादीनां लक्षणमुक्तं लिङ्गपुराणे—" प्राणायामस्य मानं तु मात्राद्वादशकं स्मृतम् । नीचो द्वादशमात्रस्तु सकृदुद्धात ईरितः ॥ मध्यमस्तु द्विरुद्धातश्चतुर्विंशतिमात्रकः । मुख्यस्तु यस्त्रिरुद्धातः षट्त्रिंशन्मात्र उच्यते ॥ प्रस्वेदकम्पनोत्थानजनकश्च यथाक्रमम् । आनन्दो जायते चात्र निद्रा घूमस्तथैव च ॥ रोमाञ्चो ध्वनिसंविज्ञिरङ्गमोटनकम्पनम् । भ्रवणस्वेदजल्पाद्यं संविन्मूर्च्छा जयेद्यदा । तदोत्तम इति प्रोक्तः प्राणायामः सुशोभनः ॥ " इति । घूमश्चित्तान्दोलनम् । गोरक्षोऽपि—" अधमे द्वादश प्रोक्ता मध्यमे द्विगुणाः स्मृताः । उत्तमे त्रिगुणा मात्राः प्राणायामे द्विजोत्तमैः " । उद्धातलक्षणं तु—" प्राणेनोत्सार्यमाणेन अपानः पीड्यते यदा । गत्वा चोर्ध्वं निवर्तेत एतदुद्धातलक्षणम् ' । मात्रामाह याज्ञवल्क्यः—" अङ्गुष्ठाङ्गुलिमोक्षं त्रिस्त्रिर्जानुपरिमार्जनम् । तालत्रयमपि प्राज्ञा मात्रासंज्ञां प्रचक्षते " । स्कन्दपुराणे—" एकश्वाससमयी मात्रा प्राणायामो निगद्यते " । एतद्व्याख्यातं योगचिन्तामणौ—' निद्रावशं गतस्य पुंसो यावता कालेनैकः श्वासो गच्छत्यागच्छति च तावत्कालः प्राणायामस्य मात्रेत्युच्यते ' इति । अर्धश्वासाधिकद्वादशश्वासावच्छिन्नः कालः प्राणायामकालः । षड्भिः श्वासैरेकं पलं भवति । एवं च सार्धश्वासपलद्वयात्मकः

कालः प्राणायामकालः सिद्धः । सार्धद्वादशमात्रामितः प्राणायामो यः स एवोत्तमः प्राणायाम इत्युच्यते । न च पूर्वोदाहृतलिङ्गपुराणगोरक्षवाक्यविरोधः, तत्र द्वादशमात्रकस्य प्राणायामस्याधमत्वोक्तेरिति शङ्कनीयम् । "जानुं प्रदक्षिणीकुर्यान्न द्रुतं न विलम्बितम् । प्रदद्याच्छोटिकां यावत्तावन्मात्रेति गीयते" इति स्कन्दपुराणात् । "अङ्गुष्ठाङ्गुलिमोक्षं च जानोश्च परिमार्जनम् । प्रदद्याच्छोटिकां यावत्तावन्मात्रेति गीयते ॥" इति च स्कन्दपुराणात् । अङ्गुष्ठो मात्रा संख्यायते तदेति दत्तात्रेयवचनाच्च । लिङ्गपुराणगोरक्षादिवाक्येष्वेकच्छोटिकावच्छिन्नस्य कालस्य मात्रात्वेन विवक्षितत्वात् । याज्ञवल्क्यादिवाक्येषु च्छोटिकात्रयावच्छिन्नस्य कालस्य मात्रात्वेन विवक्षणात् त्रिगुणस्याधमस्योत्तमत्वं तत्राप्युक्तमित्यविरोधः । सर्वेषु योगसाधनेषु प्राणायामो मुख्यस्तत्सिद्धौ प्रत्याहारादीनां सिद्धेः, तदसिद्धौ प्रत्याहाराद्यसिद्धेश्च । वस्तुतस्तु प्राणायाम एव प्रत्याहारादिशब्दैर्निगद्यते । तथा चोक्तं योगचिन्तामणौ—'प्राणायाम एवाभ्यासक्रमेण वर्धमानः प्रत्याहारध्यानधारणासमाधिशब्दैरुच्यते' इति । तदुक्तं स्कन्दपुराणे — "प्राणायामद्विषट्केन प्रत्याहार उदाहृतः । प्रत्याहारद्विषट्केन धारणा परिकीर्तिता ॥ भवेदीश्वरसंगत्यै ध्यानं द्वादशधारणम् । ध्यानद्वादशकेनैव समाधिरभिधीयते ॥

यत्समाधौ परं ज्योतिरनन्तं स्वप्रकाशकम् । तस्मिन्दृष्टे क्रियाकाण्डयातायातं निवर्तते ॥" इति, तथा "धारणा पञ्चनाडीभिर्ध्यानं स्यात्षष्टिनाडिकम् । दिनद्वादशकेन स्यात्समाधिः प्राणसंयमात् ॥" इति च । गोरक्षादिभिरप्येवमेवोक्तम् । अत्रैवं व्यवस्था । किंचिदूनद्विचत्वारिंशद्विपलात्मकः कनिष्ठप्राणायामकालः । अयमेवैकच्छोटिकावच्छिन्नस्य कालस्य मात्रात्वविवक्षया द्वादशमात्रकः कालः । किंचिदूनचतुरशीतिविपलात्मको मध्यमप्राणायामकालः । अयमेकच्छोटिकावच्छिन्नस्य कालस्य मात्रात्वविवक्षया चतुर्विंशतिमात्रकः । पञ्चविंशत्युत्तरशतविपलात्मक उत्तमः प्राणायामकालः । अयमेकच्छोटिकावच्छिन्नस्य कालस्य मात्रात्वविवक्षया षट्त्रिंशन्मात्रकः कालः । छोटिकात्रयावच्छिन्नस्य कालस्य मात्रात्वविवक्षया तु द्वादशमात्रक एव । बन्धपूर्वकं पञ्चविंशत्युत्तरशतविपलपर्यन्तं यदा प्राणायामस्थैर्यं भवति, तदा प्राणो ब्रह्मरन्ध्रं गच्छति । ब्रह्मरन्ध्रं गतः प्राणो यदा पञ्चविंशतिपलपर्यन्तं तिष्ठति तदा प्रत्याहारः । यदा पञ्चघटिकापर्यन्तं तिष्ठति तदा धारणा । यदा षष्टिघटिकापर्यन्तं तिष्ठति तदा ध्यानम् । यदा द्वादशदिनपर्यन्तं तिष्ठति तदा समाधिर्भवतीति सर्वं रमणीयम् ॥१२॥

जलेन श्रमजातेन गात्रमर्दनमाचरेत् ।
दृढता लघुता चैव तेन गात्रस्य जायते ॥ १३ ॥

प्राणायामानभ्यसतः स्वेदे जाते विशेषमाह—जलेनेति। श्रमात्प्राणायामाभ्यासश्रमाज्जातं तेन जलेन प्रस्वेदेन गात्रस्य शरीरस्य मर्दनं तैलाभ्यङ्गवदाचरेत्कुर्यात्। तेन मर्दनेन गात्रस्य दृढता दार्ढ्यं लघुता जाड्याभावो जायते प्रादुर्भवति ॥ १३ ॥

अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनम्।
ततोऽभ्यासे दृढीभूते न तादृङ् नियमग्रहः ॥ १४ ॥

अथ प्रथमोत्तराभ्यासयोः क्षीरादिनियमानाह—अभ्यासकाल इति। क्षीरं दुग्धमाज्यं घृतं तद्युक्तं भोजनं क्षीराज्यभोजनम्। शाकपार्थिवादिवत्समासः। केवले कुम्भके सिद्धेऽभ्यासो दृढो भवति। स्पष्टमन्यत् ॥ १४ ॥

यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः।
तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥ १५ ॥

सिंहादिवच्छनैरेव प्राणं वशयेन्न सहसेत्याह—यथेति। यथा येन प्रकारेण सिंहो मृगेन्द्रो गजो वनहस्ती व्याघ्रः शार्दूलः शनैः शनैरेव वश्यः स्वाधीनो भवेन्न सहसा यथैव तेनैव प्रकारेण सेवितोऽभ्यस्तो वायुः प्राणो वश्यो भवेत्। अन्यथा सहसा गृह्यमाणः साधकमभ्यासिनं हन्ति सिंहादिवत् ॥ १५ ॥

यत्समाधौ परं ज्योतिरनन्तं स्वप्रकाशकम् । तस्मिन्दृष्टे क्रियाकाण्डयातायातं निवर्तते ॥" इति, तथा "धारणा पञ्चनाडीभिर्ध्यानं स्यात्षष्टिनाडिकम् । दिनद्वादशकेन स्यात्समाधिः प्राणसंयमात् ॥" इति च । गोरक्षादिभिरप्येवमेवोक्तम् । अत्रैवं व्यवस्था । किंचिदूनद्विचत्वारिंशद्विपलात्मकः कनिष्ठप्राणायामकालः । अयमेवैकच्छोटिकावच्छिन्नस्य कालस्य मात्रात्वविवक्षया द्वादशमात्रकः कालः । किंचिदूनचतुरशीतिविपलात्मको मध्यमप्राणायामकालः । अयमेकच्छोटिकावच्छिन्नस्य कालस्य मात्रात्वविवक्षया चतुर्विंशतिमात्रकः । पञ्चविंशत्युत्तरशतविपलात्मक उत्तमः प्राणायामकालः । अयमेकच्छोटिकावच्छिन्नस्य कालस्य मात्रात्वविवक्षया षट्त्रिंशन्मात्रकः कालः । छोटिकात्रयावच्छिन्नस्य कालस्य मात्रात्वविवक्षया तु द्वादशमात्रक एव । बन्धपूर्वकं पञ्चविंशत्युत्तरशतविपलपर्यन्तं यदा प्राणायामस्थैर्यं भवति, तदा प्राणो ब्रह्मरन्ध्रं गच्छति । ब्रह्मरन्ध्रं गतः प्राणो यदा पञ्चविंशतिपलपर्यन्तं तिष्ठति तदा प्रत्याहारः । यदा पञ्चघटिकापर्यन्तं तिष्ठति तदा धारणा । यदा षष्टिघटिकापर्यन्तं तिष्ठति तदा ध्यानम् । यदा द्वादशदिनपर्यन्तं तिष्ठति तदा समाधिर्भवतीति सर्वं रमणीयम् ॥१२॥

जलेन श्रमजातेन गात्रमर्दनमाचरेत् ।
दृढता लघुता चैव तेन गात्रस्य जायते ॥ १३ ॥

प्राणायामानभ्यसतः स्वेदे जाते विशेषमाह—जलेनेति। श्रमात्प्राणायामाभ्यासश्रमाज्जातं तेन जलेन प्रस्वेदेन गात्रस्य शरीरस्य मर्दनं तैलाभ्यङ्गवदाचरेत्कुर्यात्। तेन मर्दनेन गात्रस्य दृढता दार्ढ्यं लघुता जाड्याभावो जायते प्रादुर्भवति ॥ १३ ॥

अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनम्।
ततोऽभ्यासे दृढीभूते न तादृङ् नियमग्रहः॥ १४ ॥

अथ प्रथमोत्तराभ्यासयोः क्षीरादिनियमानाह—अभ्यासकाल इति। क्षीरं दुग्धमाज्यं घृतं तद्युक्तं भोजनं क्षीराज्यभोजनम्। शाकपार्थिवादिवत्समासः। केवले कुम्भके सिद्धेऽभ्यासो दृढो भवति। स्पष्टमन्यत् ॥ १४ ॥

यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः।
तथैव सेवितो वायुरन्यथा हन्ति साधकम् ॥ १५ ॥

सिंहादिवच्छनैरेव प्राणं वशयेन्न सहसेत्याह—यथेति। यथा येन प्रकारेण सिंहो मृगेन्द्रो गजो वनहस्ती व्याघ्रः शार्दूलः शनैः शनैरेव वश्यः स्वाधीनो भवेन्न सहसा यथैव तेनैव प्रकारेण सेवितोऽभ्यस्तो वायुः प्राणो वश्यो भवेत्। अन्यथा सहसा गृह्यमाणः साधकमभ्यासिनं हन्ति सिंहादिवत् ॥ १५ ॥

प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् ।
अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः ॥ १६ ॥

युक्तायुक्तयोः फलमाह—प्राणायामेनेति । आहारादियुक्तिपूर्वको जालंधरादिबन्धयुक्तिविशिष्टः प्राणायामो युक्त इत्युच्यते । तेन सर्वरोगक्षयः सर्वेषां रोगाणां क्षयो नाशो भवेत् । अयुक्त उक्तयुक्तिरहितो योऽभ्यासस्तद्युक्तेन प्राणायामेन सर्वरोगसमुद्भवः सर्वेषां रोगाणां सम्यगुद्भव उत्पत्तिर्भवेत् ॥ १६ ॥

हिक्का श्वासश्च कासश्च शिरःकर्णाक्षिवेदनाः ।
भवन्ति विविधा रोगाः पवनस्य प्रकोपतः ॥ १७ ॥

अयुक्तेन प्राणायामेन के रोगा भवन्तीत्यपेक्षायामाह—हिक्केति । हिक्काश्वासकासा रोगविशेषाः । शिरश्च कर्णौ चाक्षिणी च शिरःकर्णाक्षि शिरःकर्णाक्षिणि वेदनाः शिरःकर्णाक्षिवेदनाः । विविधा नानाविधा रोगा ज्वरादयः । पवनस्य वायोः प्रकोपतो भवन्ति ॥ १७ ॥

युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च पूरयेत् ।
युक्तं युक्तं च बध्नीयादेवं सिद्धिमवाप्नुयात् ॥१८॥

यतः पवनस्य प्रकोपतो विविधा रोगा भवन्त्यतः । युक्तं युक्तमिति । वायुं प्राणं युक्तं युक्तं त्यजेत् । रेचनकाले

शनैः शनैरेव रेचयेन्न वेगत इत्यर्थः । युक्तं युक्तं च न चाल्पं नाधिकं च पूरयेत् । युक्तं युक्तं च जालंधरबन्धादियुक्तं बध्नीयात्कुम्भयेत् । एवमभ्यसेच्चेत्सिद्धिं हठसिद्धिमवाप्नुयात् ॥ १८ ॥

यदा तु नाडीशुद्धिः स्यात्तथा चिह्नानि बाह्यतः ।
कायस्य कृशता कान्तिस्तदा जायेत निश्चितम् ॥

युक्तं प्राणायाममभ्यसतो जायमानाया नाडीशुद्धेर्लक्षणमाह द्वाभ्याम्—यदा त्विति । यदा तु यस्मिन्काले तु नाडीनां शुद्धिर्मलराहित्यं स्यात्तदा बाह्यतो बाह्यानि । सार्वविभक्तिकस्तसिः । चिह्नानि लक्षणानि तथाशब्देनान्तराण्यपि चिह्नानि भवन्तीत्यर्थः । तान्येवाह—कायस्येति । कायस्य देहस्य कृशता कार्श्यं कान्तिः सुरुचिर्निश्चितं जायेत ॥ १९ ॥

यथेष्टं धारणं वायोरनलस्य प्रदीपनम् ।
नादाभिव्यक्तिरारोग्यं जायते नाडिशोधनात् ॥२०॥

वायोः प्राणस्य यथेष्टं बहुवारं धारणं कुम्भकेषु । अनलस्य जठराग्नेः प्रदीपनं प्रकृष्टा दीप्तिर्नादस्य ध्वनेरभिव्यक्तिः प्राकट्यमारोग्यमारोगता नाडिशोधनान्नाडीनां शोधनान्मलराहित्याज्जायते ॥ २० ॥

मेदःश्लेष्माधिकः पूर्वं षट् कर्माणि समाचरेत् ।
अन्यस्तु नाचरेत्तानि दोषाणां समभावतः ॥ २१ ॥

मेदआद्याधिक्ये उपायान्तरमाह—मेदःश्लेष्माधिक इति। मेदश्च श्लेष्मा च मेदःश्लेष्माणौ तावधिकौ यस्य स तादृशः पुरुषः। पूर्वं प्राणायामाभ्यासात्प्राङ् न तु प्राणायामाभ्यास-काले षट् कर्माणि वक्ष्यमाणानि समाचरेत्सम्यगाचरेत्। अन्यस्तु मेदःश्लेष्माधिक्यरहितस्तु तानि षट् कर्माणि नाचरेत्। तत्र हेतुमाह—दोषाणां वातपित्तकफानां समस्य भावः समभावः समत्वं तस्माद्दोषाणां समत्वादित्यर्थः ॥ २१ ॥

धौतिर्वस्तिस्तथा नेतिस्त्राटकं नौलिकं तथा।
कपालभातिश्चैतानि षट् कर्माणि प्रचक्षते ॥ २२ ॥

षट्कर्माण्युपदिशति—धौतिरिति। स्पष्टम् ॥ २२ ॥

कर्मषट्कमिदं गोप्यं घटशोधनकारकम्।
विचित्रगुणसंधायि पूज्यते योगिपुंगवैः ॥ २३ ॥

इदं रहस्यमित्याह—कर्मषट्कमिति। घटस्य शरीरस्य शोधनं मलापनयनं करोतीति घटशोधनकारकमिदमुद्दिष्टं कर्मणां षट्कं धौत्यादिकं गोप्यं गोपनीयम्। यतः। विचित्रगुण-संधायीति। विचित्रं विलक्षणं गुणं षट्कर्मरूपं संधातुं कर्तुं शीलमस्येति विचित्रगुणसंधायि योगिपुंगवैर्योगिश्रेष्ठैः पूज्यते सत्क्रियते। गोपनाभावे तु षट्कर्मकमन्यैरपि विहितं स्यादिति योगिनः पूज्यत्वाभावः प्रसज्येतेति भावः। एतेनेदमेव कर्म-

षट्कस्य मुख्यं फलमिति सूचितम्, मेदःश्लेष्मादिनाशस्य प्राणायामैरपि संभवात्। तदुक्तम्—'षट्कर्मयोगमाप्नोति पवनाभ्यासतत्परः' इति, पूर्वोत्तरग्रन्थस्याप्येवमेव स्वारस्याच्च ॥२३॥

तत्र धौतिः—

चतुरङ्गुलविस्तारं हस्तपञ्चदशायतम् ।
गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत् ।
पुनः प्रत्याहरेच्चैतदुदितं धौतिकर्म तत् ॥ २४ ॥

धौतिकर्माह—चतुरङ्गुलेति । चतुर्णामङ्गुलानां समाहारश्चतुरङ्गुलं विस्तारो यस्य तादृशं हस्तानां पञ्चदशैरायतं दीर्घं सिक्तं जलार्द्रं किंचिदुष्णं वस्त्रं पटं तच्च सूक्ष्मं नूतनोष्णीषादेः खण्डं ग्राह्यम् । गुरुणोपदिष्टो यो मार्गो वस्त्रग्रसनप्रकारस्तेन शनैर्मन्दं मन्दं किंचित्किंचिद् ग्रसेत् । द्वितीये दिने हस्तद्वयं तृतीये दिने हस्तत्रयम् । एवं दिनवृद्धया हस्तमात्रमधिकं ग्रसेत् । तस्य प्रान्तं राजदन्तमध्ये हठे संलग्नं कृत्वा नौलिकर्मणोदरस्थवस्त्रं सम्यक् चालयित्वा । पुनः शनैः प्रत्याहरेच्च तद्वस्त्रमुद्गिरेन्निष्कासयेच्च । तद्धौतिकर्मोदितं कथितं सिद्धैः ॥ २४ ॥

कासश्वासप्लीहकुष्ठं कफरोगाश्च विंशतिः ।
धौतिकर्मप्रभावेण प्रयान्त्येव न संशयः ॥ २५ ॥

धौतिकर्मणः फलमाह—कासश्वासेति । कासश्च श्वासश्च प्लीहश्च कुष्ठं च । समाहारद्वन्द्वः । कासादयो रोगविशेषाः विंशतिसंख्याकाः कफरोगाश्च धौतिकर्मणः प्रभावेण गच्छन्त्येव न संशयः, निश्चितमेतदित्यर्थः ॥ २५ ॥

नाभिदघ्नजले पायौ न्यस्तनालोत्कटासनः ।
आधाराकुञ्चनं कुर्यात्क्षालनं वस्तिकर्म तत् ॥ २६ ॥

अथ वस्तिकर्माह—नाभिदघ्नेति । नाभिपरिमाणं नाभिदघ्नम् । परिमाणे दघ्नच् प्रत्ययः । तस्मिन्नाभिदघ्ने नाभिपरिमाणे जले नद्यादितोये पायुर्गुदं तस्मिन्न्यस्तो नालो वंशनालो येन कनिष्ठिकाप्रवेशयोग्यरन्ध्रयुक्तं षडङ्गुलदीर्घं वंशनालं गृहीत्वा चतुरङ्गुलं पायौ प्रवेशयेत् । अङ्गुलिद्वयमितं बहिः स्थापयेत् । उत्कटमासनं यस्य स उत्कटासनः । पार्ष्णिद्वये स्फिचौ विन्यस्य पादाङ्गुलिभिः स्थितिरुत्कटासनम् । आधारस्याकुञ्चनं यथा जलमन्तः प्रविशेत्तथा संकोचनं कुर्यात् । अन्तः प्रविष्टं जलं नौलिककर्मणा चालयित्वा त्यजेत् । क्षालनं वस्तिकर्मोच्यते । धौतिवस्तिकर्मद्वयं भोजनात्प्रागेव कर्तव्यम् । तदनन्तरं भोजने विलम्बोऽपि न कार्यः । केचित्तु पूर्वं मूलाधारेण वायोराकर्षणमभ्यस्य जले स्थित्वा पायौ नालप्रवेशनमन्तरेणैव वस्तिकर्माभ्यसन्ति । तथा करणे सर्वं जलं

बहिर्नायाति । अतो नानारोगधातुक्षयादिसंभवाच्च तथा वस्तिकर्म नैव विधेयम् । किमन्यथा स्वात्मारामः पायौ न्यस्तनाल इति ब्रूयात् ॥ २६ ॥

गुल्मप्लीहोदरं चापि वातपित्तकफोद्भवाः ।
वस्तिकर्मप्रभावेण क्षीयन्ते सकलामयाः ॥ २७ ॥

वस्तिकर्मगुणानाह द्वाभ्याम्—गुल्मप्लीहोदरमिति । गुल्मश्च प्लीहश्च रोगविशेषावुदरं जलोदरं च तेषां समाहारद्वन्द्वः । वातश्च पित्तं च कफश्च तेभ्य उद्भवा एकैकस्माद्द्वाभ्यां सर्वेभ्यो वा जाताः सकलाः सर्व आमया रोगा वस्तिकर्मणः प्रभावः सामर्थ्यं तेन क्षीयन्ते नश्यन्ति ॥ २७ ॥

धात्विन्द्रियान्तःकरणप्रसादं
दद्याच्च कान्तिं दहनप्रदीप्तिम् ।
अशेषदोषोपचयं निहन्या-
दभ्यस्यमानं जलवस्तिकर्म ॥ २८ ॥

धात्विति । अभ्यस्यमानमनुष्ठीयमानं जले वस्तिकर्म जलवस्तिकर्म कर्तृ दद्यादनुष्ठातुरिति शेषः । धातवः 'रसासृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः' इत्युक्ताः, इन्द्रियाणि वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि च, अन्तःकरणानि मनोबुद्धि-

चित्ताहंकाररूपाणि, तेषां परितापविक्षेपशोकमोहगौरवावरण-दैन्यादिराजसतामसधर्मविनिवर्तनेन सुखप्रकाशलाघवादिसात्त्विक-धर्माविर्भावः प्रसादस्तं कान्तिं द्युतिं दहनस्य जठराग्नेः प्रदीप्तिं प्रकृष्टां दीप्तिं च । तथा । अशेषाः समस्ता ये दोषा वातपित्तकफास्तेषामुपचयम् । एतदपचयस्याप्युपलक्षणम् । उपचयापचयौ निहन्यान्नितरां हन्यात् । दोषसाम्यरूपमारोग्यं कुर्यादित्यर्थः ॥ २८ ॥

अथ नेतिः—

सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् ।
मुखान्निर्गमयेच्चैषा नेतिः सिद्धैर्निगद्यते ॥ २९ ॥

अथ नेतिकर्माह—सूत्रमिति । वितस्ति वितस्तिमितं वितस्तिरित्युपलक्षणमधिकस्यापि । यावता सूत्रेण सम्यङ् नेतिकर्म भवेत्तावद् ग्राह्यम् । सुस्निग्धं सुष्ठु स्निग्धं ग्रन्थ्यादि-रहितं सूत्रम् । तच्च नवधा दशधा पञ्चदशधा वा गुणितं सुदृढं ग्राह्यम् । नासा नासिका सैव नालः सच्छिद्रत्वा-त्तस्मिन्प्रवेशयेत् । मुखान्निर्गमयेन्निष्कासयेत् । तत्प्रकारस्त्वेवम्—सूत्रप्रान्तं नासानाले प्रवेश्येतरनासापुटमङ्गुल्या निरुध्य पूरकं कुर्यात् । पुनश्च मुखेन रेचयेत् । पुनः पुनरेवं कुर्वतो मुखे सूत्रप्रान्तमायाति । तत्सूत्रप्रान्तं नासाबहिःस्थसूत्रप्रान्तं च

गृहीत्वा शनैश्चालयेदिति । चकारादेकस्मिन्नासानाले प्रवेश्येतरस्मिन्निर्गमयेदित्युक्तम् । तत्प्रकारस्त्वेकस्मिन्नासानाले सूत्रप्रान्तं प्रवेश्येतरनासापुटमङ्गुल्या निरुध्य पूरकं कुर्यात्पश्चादितरनासानालेन रेचयेत् । पुनः पुनरेवं कुर्वत इतरनासानाले सूत्रप्रान्तमायाति । तस्य पूर्ववच्चालनं कुर्यादिति । अयं प्रकारस्तु बहुवारं कुर्वतः कदाचिद्भवति । एषोक्ता सिद्धैरणिमादिगुणसंपन्नैः । तदुक्तम्—" अवाप्ताष्टगुणैश्वर्याः सिद्धाः सद्भिर्निरूपिताः " इति । नेतिर्निगद्यते नेतिरिति कथ्यते ॥ २९ ॥

कपालशोधिनी चैव दिव्यदृष्टिप्रदायिनी ।
जत्रूर्ध्वजातरोगौघं नेतिराशु निहन्ति च ॥ ३० ॥

नेतिगुणानाह—कपालशोधिनीति । कपालं शोधयति शुद्धं मलरहितं करोतीति कपालशोधिनी । चकारान्नासानालादीनामपि । एवशब्दोऽवधारणे । दिव्यां सूक्ष्मपदार्थग्राहिणीं दृष्टिं प्रकर्षेण ददातीति दिव्यदृष्टिप्रदायिनी नेतिक्रिया । जत्रुणोः स्कन्धसंध्योरूर्ध्वमुपरिभागे जातो जत्रूर्ध्वजातः, स चासौ रोगाणामोघश्च तमाशु झटिति निहन्ति—चकारः पादपूरणे । 'स्कन्धो भुजशिरोंऽसोऽस्त्री संधी तस्यैव जत्रुणी' इत्यमरः ॥ ३० ॥

चित्ताहंकाररूपाणि, तेषां परितापविक्षेपशोकमोहगौरवावरण-दैन्यादिराजसतामसधर्मविनिवर्तनेन सुखप्रकाशलाघवादिसात्त्विक-धर्माविर्भावः प्रसादस्तं कान्तिं द्युतिं दहनस्य जठराग्नेः प्रदीप्तिं प्रकृष्टां दीप्तिं च । तथा । अशेषाः समस्ता ये दोषा वातपित्तकफास्तेषामुपचयम् । एतदपचयस्याप्युपलक्षणम् । उपचयापचयौ निहन्यान्नितरां हन्यात् । दोषसाम्यरूपमारोग्यं कुर्यादित्यर्थः ॥ २८ ॥

अथ नेतिः—

सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् ।
मुखान्निर्गमयेच्चैषा नेतिः सिद्धैर्निगद्यते ॥ २९ ॥

अथ नेतिकर्माह—सूत्रमिति । वितस्ति वितस्तिमितं वितस्तिरित्युपलक्षणमधिकस्यापि । यावता सूत्रेण सम्यङ् नेतिकर्म भवेत्तावद् ग्राह्यम् । सुस्निग्धं सुष्ठु स्निग्धं ग्रन्थ्यादि-रहितं सूत्रम् । तच्च नवधा दशधा पञ्चदशधा वा गुणितं सुदृढं ग्राह्यम् । नासा नासिका सैव नालः सच्छिद्रत्वा-त्तस्मिन्प्रवेशयेत् । मुखान्निर्गमयेन्निष्कासयेत् । तत्प्रकारस्त्वेवम्—सूत्रप्रान्तं नासानाले प्रवेश्येतरनासापुटमङ्गुल्या निरुध्य पूरकं कुर्यात् । पुनश्च मुखेन रेचयेत् । पुनः पुनरेवं कुर्वतो मुखे सूत्रप्रान्तमायाति । तत्सूत्रप्रान्तं नासाबहिःस्थसूत्रप्रान्तं च

गृहीत्वा शनैश्चालयेदिति । चकारादेकस्मिन्नासानाले प्रवेश्येतरस्मिन्निर्गमयेदित्युक्तम् । तत्प्रकारस्त्वेकस्मिन्नासानाले सूत्रप्रान्तं प्रवेश्येतरनासापुटमङ्गुल्या निरुध्य पूरकं कुर्यात्पश्चादितरनासानालेन रेचयेत् । पुनः पुनरेवं कुर्वत इतरनासानाले सूत्रप्रान्तमायाति । तस्य पूर्ववच्चालनं कुर्यादिति । अयं प्रकारस्तु बहुवारं कुर्वतः कदाचिद्भवति । एषोक्ता सिद्धैरणिमादिगुणसंपन्नैः । तदुक्तम्—"अवाप्ताष्टगुणैश्वर्याः सिद्धाः सद्भिर्निरूपिताः" इति । नेतिर्निगद्यते नेतिरिति कथ्यते ॥ २९ ॥

कपालशोधिनी चैव दिव्यदृष्टिप्रदायिनी ।
जत्रूर्ध्वजातरोगौघं नेतिराशु निहन्ति च ॥ ३० ॥

नेतिगुणानाह—कपालशोधिनीति । कपालं शोधयति शुद्धं मलरहितं करोतीति कपालशोधिनी । चकारान्नासानालादीनामपि । एवशब्दोऽवधारणे । दिव्यां सूक्ष्मपदार्थग्राहिणीं दृष्टिं प्रकर्षेण ददातीति दिव्यदृष्टिप्रदायिनी नेतिक्रिया । जत्रुणोः स्कन्धसंध्योरूर्ध्वमुपरिभागे जातो जत्रूर्ध्वजातः, स चासौ रोगाणामोघश्च तमाशु झटिति निहन्ति—चकारः पादपूरणे । 'स्कन्धो भुजशिरोऽसोऽस्त्री संधी तस्यैव जत्रुणी' इत्यमरः ॥ ३० ॥

अथ त्राटकम्—

निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः ।
अश्रुसंपातपर्यन्तमाचार्यैस्त्राटकं स्मृतम् ॥ ३१ ॥

त्राटकमाह—निरीक्षेदिति । समाहितः एकाग्रचित्तः निश्चला चासौ दृक् च दृष्टिस्तया सूक्ष्मं च तल्लक्ष्यं च सूक्ष्मलक्ष्यमश्रूणां सम्यक् पातः पतनं तत्पर्यन्तम् । अनेन निरीक्षणस्यावधिरुक्तः । निरीक्षेत्पश्येत् । आचार्यैर्मत्स्येन्द्रादिभिरिदं त्राटकं त्राटककर्म स्मृतं कथितम् ॥ ३१ ॥

मोचनं नेत्ररोगाणां तन्द्रादीनां कपाटकम् ।
यत्नतस्त्राटकं गोप्यं यथा हाटकपेटकम् ॥ ३२ ॥

त्राटकगुणानाह—मोचनमिति । नेत्रस्य रोगा नेत्ररोगास्तेषां मोचनं नाशकम्, तन्द्रा आदिर्येषामालस्यादीनां तेषां कपाटकं कपाटवदन्तर्धायकमभिभावकमित्यर्थः । तन्द्रा तामसश्चित्तवृत्तिविशेषः । त्राटकं त्राटकाख्यं कर्म यत्नतः प्रयत्नतः प्रयत्नाद्गोप्यं गोपनीयम् । गोपने दृष्टान्तमाह—यथेति । हाटकस्य सुवर्णस्य पेटकं पेटी इति लोके प्रसिद्धं यथा येन प्रकारेण गोप्यते तद्वत् ॥ ३२ ॥

अथ नौलिः—

अमन्दावर्तवेगेन तुन्दं सव्यापसव्यतः ।
नतांसो भ्रामयेदेषा नौलिः सिद्धैः प्रचक्ष्यते ॥३३॥

नौलिकर्माह—अमन्देति । नतौ नम्रीभूतावंसौ स्कन्धौ यस्य स नतांसः पुमानमन्दोऽतिशयितो य आवर्तस्तस्येव जलभ्रमस्येव वेगो जवस्तेन तुन्दमुदरम् । 'पिचण्डकुक्षी जठरोदरं तुन्दं स्तनौ कुचौ' इत्यमरः । सव्यं चापसव्यं च सव्यापसव्ये दक्षिणवामभागौ तयोः सव्यापसव्यतः । सप्तम्यर्थे तसिः । भ्रामयेद् भ्रमन्तं प्रेरयेत् । सिद्धैरेषा नौलिः प्रचक्ष्यते कथ्यते ॥ ३३ ॥

मन्दाग्निसंदीपनपाचनादि-
संधापिकाऽऽनन्दकरी सदैव ।
अशेषदोषामयशोषणी च
हठक्रियामौलिरियं च नौलिः ॥ ३४ ॥

नौलिगुणानाह—मन्दाग्नीति । मन्दश्चासावग्निर्जठराग्निस्तस्य संदीपनं सम्यग् दीपनं च पाचनं च भुक्तान्नपरिपाकश्च मन्दाग्निसंदीपनपाचने ते आदिनी यस्य तन्मन्दाग्निसंदीपनपाचनादि तस्य संधापिका विधात्री । आदिशब्देन मलशुद्ध्यादि । सदैव सर्वदैवानन्दकरी सुखकरी । अशेषाः

समस्ताश्च ते दोषाश्च वातादय आमयाश्च रोगास्तेषां शोषणी शोषणकर्त्री हठस्य क्रियाणां धौत्यादीनां मौलिर्मौलिरिवोत्तमा धौतिवस्त्योर्नौलिसापेक्षत्वात् । इयमुक्ता नौलिः ॥ ३४ ॥

भस्त्रावल्लोहकारस्य रेचपूरौ ससंभ्रमौ ।
कपालभातिर्विख्याता कफदोषविशोषणी ॥ ३५ ॥

कपालभातिं तद्गुणं चाह—भस्त्रावदिति । लोहकारस्य भस्त्राऽग्नेर्धमनसाधनीभूतं चर्म तद्वत्संभ्रमेण सह वर्तमानौ ससंभ्रमावमन्दौ यौ रेचपूरौ रेचकपूरकौ कपालभातिरिति विख्याता । कीदृशी ? कफदोषविशोषणी । कफस्य दोषा विंशतिभेदभिन्नाः । तदुक्तं निदाने—'कफरोगाश्च विंशतिः' इति । तेषां विशोषणी विनाशिनी ॥ ३५ ॥

षट्कर्मनिर्गतस्थौल्यकफदोषमलादिकः ।
प्राणायामं ततः कुर्यादनायासेन सिध्यति ॥ ३६ ॥

षट्कर्मणां प्राणायामत्वोपकारकत्वमाह—षट्कर्मेति । षट्कर्मभिर्धौतिप्रभृतिभिर्निर्गताः । स्थौल्यं स्थूलस्य भावः स्थूलत्वम् । कफदोषा विंशतिसंख्याकाः, मलादयश्च यस्य स तथा । 'शेषाद्विभाषा' इति कप्रत्ययः । आदिशब्देन पित्तादयः । प्राणायामं कुर्यात् । ततस्तस्मात्षट्कर्मपूर्वकात्प्राणा-

ादनायासेनाश्रमेण सिध्यति योग इति शेषः । षट्कर्मा-
णे तु प्राणायामे श्रमाधिक्यं स्यादिति भावः ॥ ३६ ॥

प्राणायामैरेव सर्वे प्रशुष्यन्ति मला इति ।
आचार्याणां तु केषांचिदन्यत्कर्म न संमतम् ॥३७॥

मतभेदेन षट्कर्मणामनुपयोगमाह—प्राणायामैरिति । प्रा-
ामैरेव । एवशब्दः षट्कर्मव्यवच्छेदार्थः । सर्वे मलाः
ष्यन्ति । मला इत्युपलक्षणं स्थौल्यकफपित्तादीनाम् । इति
ः केषांचिदाचार्याणां याज्ञवल्क्यादीनामन्यत्कर्म षट्कर्म
संमतं नाभिमतम् । आचार्यलक्षणमुक्तं वायुपुराणे—
आचिनोति च शास्त्रार्थमाचारे स्थापयेदपि । स्वयमाचरते
ादाचार्यस्तेन चोच्यते ॥" इति ॥ ३७ ॥

उदरगतपदार्थमुद्वमन्ति
पवनमपानमुदीर्य कण्ठनाले ।
क्रमपरिचयवश्यनाडिचक्रा
गजकरणीति निगद्यते हठज्ञैः ॥ ३८ ॥

गजकरणीमाह—उदरगतमिति । अपानं पवनमपानवायुं
ठनाले कण्ठो नाल इव कण्ठनालस्तस्मिन्नुदीर्योत्क्षिप्योदरे
प्राप्तः स चासौ पदार्थश्च भुक्तपीतान्नजलादिस्तं
ोद्वमन्त्युद्गिरन्ति यया योगिन इत्यध्याहारः । क्रमेण

यः परिचयोऽभ्यासस्तेनावश्यं स्वाधीनं नाडीनां चक्रं यस्यां सा तथा । सा क्रिया हठज्ञैर्हठयोगाद्यभिज्ञैर्गजकरणीति निगद्यते कथ्यते । 'क्रमपरिचयवश्यनाडिमार्गा' इति क्वचित्पाठः । तस्यायमर्थः—क्रमपरिचयेन वश्यो नाड्याः शङ्खिन्या मार्गः कण्ठपर्यन्तो यस्यां सा तथा ॥ ३८ ॥

ब्रह्मादयोऽपि त्रिदशाः पवनाभ्यासतत्पराः ।
अभूवन्नन्तकभयात्तस्मात्पवनमभ्यसेत् ॥ ३९ ॥

प्राणायामोऽवश्यमभ्यसनीयः सर्वोत्तमैरभ्यस्तत्वान्महाफलत्वाच्चेति सूचयन्नाह चतुर्भिः—ब्रह्मादय इति । ब्रह्मा आदिर्येषां ते ब्रह्मादयस्तेऽपि किमुतान्य इत्यर्थः । त्रिदशा देवाः अन्तयतीत्यन्तकः कालस्तस्माद्भयमन्तकभयं तस्मात्पवनस्य प्राणवायोरभ्यासो रेचकपूरककुम्भकभेदभिन्नप्राणायामानुष्ठानरूपस्तस्मिंस्तत्परा अवहिता अभूवन्नासन् । तस्मात्पवनमभ्यसेत्प्राणमभ्यसेत् ॥ ३९ ॥

यावद्बद्धो मरुद्देहे यावच्चित्तं निराकुलम् ।
यावद् दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः ॥ ४० ॥

यावदिति । यावद्यावत्कालपर्यन्तं मरुत्प्राणानिलो देहे शरीरे बद्धः श्वासोच्छ्वासक्रियाशून्यः । यावच्चित्तमन्तःकरणं निराकुलमविक्षिप्तं समाहितम् । यावद्भ्रुवोर्मध्ये दृष्टिरन्तः-

करणवृत्तिः । दृशिरत्र ज्ञानसामान्यार्थः । तावत्कालपर्यन्तं कलयतीति कालोऽन्तकस्तस्माद्भयं कुतः न कुतोऽपीत्यर्थः । तथा च वक्ष्यति—"खाद्यते न च कालेन बाध्यते न च कर्मणा । साध्यते न स केनापि योगी युक्तः समाधिना ॥" इति । स्वाधीनो भवतीत्यर्थः ॥ ४० ॥

विधिवत्प्राणसंयामैर्नाडीचक्रे विशोधिते ।
सुषुम्णावदनं भित्त्वा सुखाद्विशति मारुतः ॥ ४१ ॥

विधिवदिति । विधिवत्प्राणसंयामैरासनजालंधरबन्धादिविधियुक्तप्राणायामैर्नाडीचक्रे नाडीनां चक्रं समूहस्तस्मिन्विशोधिते निर्मले सति मारुतो वायुः सुषुम्णा इडापिङ्गलयोर्मध्यस्था नाडी तस्या वदनं मुखं भित्त्वा सुखादनायासाद्विशति सुषुम्णान्तरिति शेषः ॥ ४१ ॥

मारुते मध्यसंचारे मनःस्थैर्यं प्रजायते ।
यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी ॥४२॥

मारुत इति । मध्ये सुषुम्णामध्ये संचारः सम्यक् चरणं गमनं मूर्धपर्यन्तं यस्य स मध्यसंचारस्तस्मिन्सति मनसः स्थैर्यं ध्येयाकारवृत्तिप्रवाहो जायते प्रादुर्भवति । यो मनसः सुस्थिरीभावः सुष्ठु स्थिरीभवनं सैव मनोन्मन्यवस्था । मनोन्मनीशब्द

उन्मनीपर्यायः । तथाऽग्रे वक्ष्यति—'राजयोगः समाधिश्च' इत्यादिना ॥ ४२ ॥

तत्सिद्धये विधानज्ञाश्चित्रान्कुर्वन्ति कुम्भकान् ।
विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धिमाप्नुयात् ॥

विचित्रेषु कुम्भकेषु प्रवृत्तिं जनयितुं तेषां मुख्यफलमवान्तरफलं चाह— तत्सिद्धय इति । विधानं कुम्भकानुष्ठानप्रकारस्तज्जानन्तीति विधानज्ञास्तत्सिद्धय उन्मन्यवस्थासिद्धये चित्रान्सूर्यभेदनादिभेदेन नानाविधान्कुम्भकान्कुर्वन्ति विचित्राश्च ते कुम्भकाश्च विचित्रकुम्भकास्तेषामभ्यासादनुष्ठानाद्विचित्रामणिमादिभेदेन नानाविधां विलक्षणां वा जन्मौषधिमन्त्रतपोजाताम् । तदुक्तं भागवते—"जन्मौषधितपोमन्त्रैर्यावतीरिह सिद्धयः । योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ॥" इति । आप्नुयात्प्रत्याहारादिपरम्परयेति भावः ॥ ४३ ॥

अथ कुम्भकभेदाः—

सूर्यभेदनमुज्जायी सीत्कारी शीतली तथा ।
भस्त्रिका भ्रामरी मूर्च्छा प्लाविनीत्यष्ट कुम्भकाः ॥

अथाष्ट कुम्भकान्नामभिर्निर्दिशति — सूर्यभेदनमिति । स्पष्टम् ॥ ४४ ॥

पूरकान्ते तु कर्तव्यो बन्धो जालंधराभिधः ।
कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियानकः ॥ ४५ ॥

अथ हठसिद्धावनन्यसिद्धां पारमहंसीं सर्वकुम्भकसाधारणयुक्तिमाह त्रिभिः—पूरकान्त इति । जालंधर इत्यभिधा नाम यस्य स जालंधराभिधो बन्धो बध्नाति प्राणवायुमिति बन्धः कण्ठाकुञ्चनपूर्वकं चिबुकस्य हृदि स्थापनं जालंधरबन्धः पूरकान्ते पूरकस्यान्ते पूरकानन्तरं झटिति कर्तव्यः । तुशब्दात्कुम्भकादावुड्डियानकस्तु कुम्भकान्ते कुम्भकस्यान्ते किंचित्कुम्भकशेषे रेचकस्यादौ रेचकादौ रेचकात्पूर्वं कर्तव्यः । प्रयत्नविशेषेण नाभिप्रदेशस्य पृष्ठत आकर्षणमुड्डियानबन्धः ॥ ४५ ॥

अधस्तात्कुञ्चनेनाशु कण्ठसंकोचने कृते ।
मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः ॥ ४६ ॥

अधस्तादिति । कण्ठस्य संकोचनं कण्ठसंकोचनं तस्मिन्कृते सति जालंधरबन्धे कृते सतीत्यर्थः । आश्वव्यवहितोत्तरमेवाधस्तादधःप्रदेशादाकुञ्चनेनाधाराकुञ्चनेन मूलबन्धेनेत्यर्थः । मध्ये नाभिप्रदेशे पश्चिमतः पृष्ठतस्तानंताननमाकर्षणं तेनोड्डियानबन्धेनेत्यर्थः । उक्तरीत्या कृतेन बन्धत्रयेण प्राणो वायुर्ब्रह्मनाडीं सुषुम्णां गच्छतीति ब्रह्मनाडिगः सुषुम्णानाडिगामी स्यादित्यर्थः । अत्रेदं रहस्यम् । यदि श्रीगुरुमुखाज्जिह्वाबन्धः

सम्यक्परिज्ञातस्तर्हि जिह्वाबन्धपूर्वकेण जालंधरबन्धेनैव प्राणायामः सिध्यति। वायुप्रकोपेनैवमधातुवपुःकृशत्वं ? वदने प्रसन्नतेत्यादीनि सर्वाणि लक्षणानि जायन्त इति मूलबन्धोड्डियानबन्धौ नोपयुक्तौ। तयोर्जिह्वाबन्धपूर्वकेण जालंधरबन्धेनान्यथा सिद्धत्वात्। जिह्वाबन्धो न विदितश्चेत् 'अधस्तात्कुञ्चनेन' इति श्लोकोक्तरीत्या प्राणायामाः कर्तव्याः। त्रयोऽपि बन्धा गुरुमुखाज्ज्ञातव्याः। मूलबन्धस्तु सम्यगज्ञातो नानारोगोत्पादकः। तथा हि—यदि मूलबन्धे कृते धातुक्षयो विष्टम्भोऽग्निमान्द्यं नादमान्द्यं गुटिकासमूहाकारमजस्येव पुरीषं स्यात्तदा मूलबन्धः सम्यङ् न ज्ञात इति बोध्यम्। यदि तु धातुपुष्टिः सम्यङ् मलशुद्धिरग्निदीप्तिः सम्यङ् नादाभिव्यक्तिश्च स्यात्तदा ज्ञेयं मूलबन्धः सम्यग्जात इति ॥ ४६ ॥

अपानमूर्ध्वमुत्थाप्य प्राणं कण्ठादधो नयेत्।
योगी जराविमुक्तः सन्षोडशाब्दवया भवेत् ॥ ४७॥

अपानमिति। अपानमपानवायुमूर्ध्वमुत्थाप्याधाराकुञ्चनेन प्राणं प्राणवायुं कण्ठादधः अधोभागे नयेत्प्रापयेद्यः स योगी योगोऽस्यास्ति अभ्यस्यत्वेनेति योगी योगाभ्यासी जरया वार्धकेन विमुक्तो विशेषेण मुक्तः सन्। षोडशानामब्दानां समाहारः षोडशाब्दं षोडशाब्दं वयो यस्य स तादृशो भवेत्।

यद्यपि 'पूरकान्ते तु कर्तव्यः' इत्यादिना त्रयाणां श्लोकानामेक एवार्थः पर्यवस्यति तथाऽपि 'पूरकान्ते तु कर्तव्यः' इत्यनेन बन्धानां काल उक्तः। अधस्तात्कुञ्चनेनेत्यनेन बन्धानां स्वरूपमुक्तम्। अपानमूर्ध्वमुत्थाप्येत्यनेन बन्धानां फलमुक्तमिति विशेषः। जालंधरबन्धे मूलबन्धे च कृते नाभेरधोभाग आकर्षणाख्यो बन्ध उड्डियानबन्धो भवत्येवेत्यस्मिञ्श्लोके नोक्तः। तथा चोक्तं ज्ञानेश्वरेण गीताषष्ठाध्यायव्याख्यायाम्—'मूलबन्धे जालंधरबन्धे च कृते नाभेरधोभाग आकर्षणाख्यो बन्धः स्वयमेव भवति' इति॥ ४७॥

आसने सुखदे योगी बद्ध्वा चैवासनं ततः।
दक्षनाड्या समाकृष्य बहिःस्थं पवनं शनैः॥ ४८॥

"योगाभ्यासक्रमं वक्ष्ये योगिनां योगसिद्धये। उषःकाले समुत्थाय प्रातःकालेऽथ वा बुधः॥ १॥ गुरुं संस्मृत्य शिरसि हृदये स्वेष्टदेवताम्। शौचं कृत्वा दन्तशुद्धिं विदध्याद्भस्मधारणम्॥ २॥ शुचौ देशे मठे रम्ये प्रतिष्ठाप्यासनं मृदु। तत्रोपविश्य संस्मृत्य मनसा गुरुमीश्वरम्॥ ३॥ देशकालौ च संकीर्त्य संकल्प्य विधिपूर्वकम्। अद्येत्यादि श्रीपरमेश्वरप्रसादपूर्वकं समाधितत्फलसिद्ध्यर्थमासनपूर्वकान्प्राणायामादीन्

मणिभ्राजत्फणासहस्रविधृतविश्वंभरामण्डलायानन्ताय नागराजाय नमः। ततोऽभ्यसेदासनानि श्रमे जाते शवासनम्। अन्ते समभ्यसेत्तत्तु श्रमाभावे तु नाभ्यसेत् ॥ ५ ॥ करणीं विपरीताख्यां कुम्भकात्पूर्वमभ्यसेत्। जालंधरप्रसादार्थं कुम्भकात्पूर्वयोगतः ॥ ६ ॥ विधायाचमनं कृत्वा कर्माङ्गं प्राणसंयमम्। योगीन्द्रादीन्नमस्कृत्य कौर्माच्च शिववाक्यतः ॥ ७ ॥" कूर्मपुराणे शिववाक्यम्—"नमस्कृत्याथ योगीन्द्रान्सशिष्यांश्च विनायकम्। गुरुं चैवाथ मां योगी युञ्जीत सुसमाहितः ॥ ८ ॥ बद्ध्वाभ्यासे सिद्धपीठं कुम्भकाबन्धपूर्वकम्। प्रथमे दश कर्तव्याः पञ्चवृद्ध्या दिने दिने ॥ ९ ॥ कार्या अशीतिपर्यन्तं कुम्भकाः सुसमाहितैः। योगीन्द्रः प्रथमं कुर्यादभ्यासं चन्द्रसूर्ययोः ॥ १० ॥ अनुलोमविलोमाख्यमेतं प्राहुर्मनीषिणः। सूर्यभेदनमभ्यस्य बन्धपूर्वकमेकधीः ॥ ११ ॥ उज्जायिनं ततः कुर्यात्सीत्कारीं शीतलीं ततः। भस्त्रिकां च समभ्यस्य कुर्यादन्यान्न वा परान् ॥ १२ ॥ मुद्राः समभ्यसेद्बुद्ध्वा गुरुवक्त्राद्यथाक्रमम्। ततः पद्मासनं बद्ध्वा कुर्यान्नादानुचिन्तनम् ॥ १३ ॥ अभ्यासं सकलं कुर्यादीश्वरार्पणमादृतः। अभ्यासादुत्थितः स्नानं कुर्यादुष्णेन वारिणा ॥ १४ ॥ स्नात्वा समापयेन्नित्यं कर्म संक्षेपतः सुधीः। मध्याह्नेऽपि तथाऽभ्यस्य किंचिद्विश्रम्य भोजनम् ॥ १५ ॥ कुर्वीत योगिना

पथ्यमपथ्यं न कदाचन । एलां वापि लवङ्गं वा भोजनान्न च भक्षयेत् ॥ १६ ॥ केचित्कर्पूरमिच्छन्ति ताम्बूलं शोभनं तथा । चूर्णेन रहितं शस्तं पवनाभ्यासयोगिनाम् ॥ १७ ॥ इति चिन्तामणेर्वाक्यं स्वारस्यं भजते न हि । केचित्पदेन यस्मात्तु तयोः शीतोष्णहेतुना ॥ १८ ॥ भोजनानन्तरं कुर्यान्मोक्षशास्त्रावलोकनम् । पुराणश्रवणं वाऽपि नामसंकीर्तनं विभोः ॥१९॥ सायंसंध्याविधिं कृत्वा योगं पूर्ववदभ्यसेत् । यदा त्रिघटिकाशेषो दिवसोऽभ्यासमाचरेत् ॥ २० ॥ अभ्यासानन्तरं कार्या सायंसंध्या सदा बुधैः । अर्धरात्रे हठाभ्यासं विदध्यात्पूर्ववद्यमी ॥ २१ ॥ विपरीतां तु करणीं सायंकालार्धरात्रयोः । नाभ्यसेद्भोजनादूर्ध्वं यतः सा न प्रशस्यते " ॥ २२ ॥ अथोद्देशानुक्रमणं कुम्भकान्विवक्षुस्तत्र प्रथमोदितं सूर्यभेदनं तद्गुणांश्चाह त्रिभिः—आसन इति । सुखं ददातीति सुखदं तस्मिन्सुखदे । " शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ " इत्युक्तलक्षणे विविक्तदेशे सुखासनस्थः शुचिः 'समग्रीवशिरःशरीरः' इति श्रुतेश्च चैलाजिनकुशोत्तर आसने । आस्तेऽस्मिन्नित्यासनम्, आस्यतेऽनेनेति वा तस्मिन् योगी योगाभ्यासी । आसनं स्वस्तिकवीरसिद्धपद्माद्यन्यतमं मुख्यत्वात्सिद्धासनमेव वा बद्ध्वैव बन्धनेन संपाद्यैव कृत्वैवेत्यर्थः । तत आसनबन्धानन्तरं दक्षा

दक्षिणभागस्था या नाडी पिङ्गला तया बहिःस्थं देहाद्बहिर्वर्तमानं पवनं वायुं शनैर्मन्दं मन्दमाकृष्य पिङ्गलया मन्दं मन्दं पूरकं कृत्वेत्यर्थः ॥ ४८ ॥

आ केशादा नखाग्राच्च निरोधावधि कुम्भयेत् ।
ततः शनैः सव्यनाड्या रेचयेत्पवनं शनैः ॥ ४९ ॥

आ केशादिति । केशाना मर्यादीकृत्याकेशं तस्मान्नखाग्राना मर्यादीकृत्येत्यानखाग्रं तस्माच्च निरोधस्य वायोरवरोधस्यावधिर्मर्यादा यस्मिन्कर्मणि तत्तथा कुम्भयेत् । केशपर्यन्तं नखाग्रपर्यन्तं च वायोर्निरोधो यथा भवेत्तथाऽतिप्रयत्नेन कुम्भकं कुर्यादित्यर्थः । ननु "हठान्निरुद्धः प्राणोऽयं रोमकूपेषु निःसरेत् । देहं विदारयत्येष कुष्ठादि जनयत्यपि । ततः प्रत्यापितव्योऽसौ क्रमेणारण्यहस्तिवत् । वन्यो गजो गजारिर्वा क्रमेण मृदुतामियात् । करोति शास्तृनिर्देशान्न च तं परिलङ्घयेत् । तथा प्राणो हृदिस्थोऽयं योगिनां क्रमयोगतः । गृहीतः सेव्यमानस्तु विस्रम्भमुपगच्छति ॥" इति वाक्यविरुद्धमिति प्रयत्नेन कुम्भकं कुर्यादिति कथमुक्तमिति चेन्न । 'हठान्निरुद्धः प्राणोऽयम्' इति वाक्यस्य बलादचिरेण प्राणजयं करिष्यामीति बुद्ध्याऽऽरम्भः । एवं च बह्वभ्यासासक्तपरत्वात्क्रमेणारण्यहस्तिवदिति दृष्टान्तस्वारस्याच्च । अत

एव सूर्याचन्द्रमसोरभ्यासे धारयित्वा यथाशक्ति निधारयेदिति निरोधत इति चोक्तं संगच्छते । तस्मात्कुम्भकस्त्वतिप्रयत्नपूर्वकं कर्तव्यः । यथा यथाऽतियत्नेन कुम्भकः क्रियते तथा तथा तस्मिन्गुणाधिक्यं भवेत् । यथा यथा च शिथिलः कुम्भकः स्यात्तथा तथा गुणाल्पत्वं स्यात् । अत्र योगिनामनुभवोऽपि मानम् । पूरकस्तु शनैः शनैः कार्यः, वेगाद्वा कर्तव्यः, वेगादपि कृते पूरके दोषाभावात् । रेचकस्तु शनैः शनैरेव कर्तव्यः । वेगात्कृते रेचके बलहानिप्रसङ्गात् । ततः शनैः शनैरेव रेचयेन्न तु वेगतः । इत्याद्यनेकधा ग्रन्थकारोक्तेश्च । ततो निरोधावधिकुम्भकानन्तरं शनैः शनैर्मन्दं मन्दं सव्ये वामभागे स्थिता नाडी सव्यनाडी तया सव्यनाड्या इडया पवनं वायुं रेचयेद्बहिर्निःसारयेत् । पुनः शनैरित्युक्तिस्तु शनैरेव रेचयेदित्यवधारणार्था । तदुक्तम्—" विस्मये च विषादे च दैन्ये चैवावधारणे । तथा प्रसादने हर्षे वाक्यमेकं द्विरुच्यते ॥ " इति ॥४९॥

कपालशोधनं वातदोषघ्नं कृमिदोषहृत् ।
पुनः पुनरिदं कार्यं सूर्यभेदनमुत्तमम् ॥ ५० ॥

कपालशोधनमिति । कपालस्य मस्तकस्य शोधनं शुद्धिकरं वातजा दोषा वातदोषा अशीतिप्रकारास्तान्हन्तीति वातदोषघ्नं कृमीणामुदरे जातानां दोषो विकारस्तं हरतीति कृमिदोषहृत् ।

पुनः पुनर्भूयो भूयः कार्यम् । सूर्येणापूर्य कुम्भयित्वा चन्द्रेण रेचनमिति रीत्येदमुत्तममुत्कृष्टं सूर्यभेदनं सूर्यभेदनाख्यमुक्तं योगिभिरिति शेषः ॥ ५० ॥

अथोज्जायी—

मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः ।
यथा लगति कण्ठात्तु हृदयावधि सस्वनम् ।
पूर्ववत्कुम्भयेत्प्राणं रेचयेदिडया ततः ॥ ५१ ॥

उज्जायिनमाह सार्धेन—मुखमिति । मुखमास्यं संयतं कृत्वा मुद्रयित्वेत्यर्थः । कण्ठात्तु कण्ठादारभ्य हृदयावधि हृदयमवधिर्यस्मिन्कर्मणि तत्तथा स्वनेन सहितं यथास्यात्तथा । उभे क्रियाविशेषणे । लगति श्लिष्यति पवन इत्यर्थात् । तथा तेन प्रकारेण नाडीभ्यामिडापिङ्गलाभ्यां पवनं वायुं शनैर्मन्दमाकृष्याकृष्टं कृत्वा पूरयित्वेत्यर्थः । प्राणं पूर्ववत्पूर्वेण सूर्यभेदनेन तुल्यं पूर्ववत् । 'आ केशादा नखाग्राच्च निरोधावधि कुम्भयेत्' इत्युक्तरीत्या कुम्भयेद्रोधयेत् । ततः कुम्भकानन्तरमिडया वामनाड्या रेचयेत्त्यजेत् ॥ ५१ ॥

श्लेष्मदोषहरं कण्ठे देहानलविवर्धनम् ।
नाडीजलोदराधातुगतदोषविनाशनम् ।
गच्छता तिष्ठता कार्यमुज्जाय्याख्यं तु कुम्भकम् ॥

उज्जायिगुणानाह सार्धश्लोकेन—श्लेष्मदोषहरमिति । कण्ठे कण्ठप्रदेशे श्लेष्मणो दोषाः श्लेष्मदोषाः कासादयस्तान् हरतीति श्लेष्मदोषहरस्तं देहानलस्य देहे मध्यगतानलस्य जाठरस्य विवर्धनं विशेषेण वर्धनं दीपनमित्यर्थः । नाडीति । नाडी सिरा जलं पीतमुदकमुदरं तुन्दमा समन्ताद्देहे वर्तमाना धातव आधातवः । एषामितरेतरद्वन्द्वः । तेषु गतः प्राप्तो यो दोषो विकारस्तं विशेषेण नाशयतीति नाडीजलोदराधातुगतदोषविनाशनम् । गच्छता गमनं कुर्वता तिष्ठता स्थितेन वाऽपि पुंसा उज्जाय्याख्यमुज्जायीत्याख्या यस्य तत् । तु इत्यनेनास्य वैशिष्ट्यं द्योतयति । कार्यं कर्तव्यम् । उज्जापीति क्वचित्पाठः । गच्छता तिष्ठता तु बन्धरहितः कर्तव्यः । कुम्भकशब्दस्त्रिलिङ्गः । पुंलिङ्गपाठे तु विशेषणेष्वपि पुंलिङ्गः पाठः कार्यः ॥ ५२ ॥

अथ सीत्कारी—

सीत्कां कुर्यात्तथा वक्त्रे घ्राणेनैव विजृम्भिकाम् ।
एवमभ्यासयोगेन कामदेवो द्वितीयकः ॥ ५३ ॥

सीत्कारीकुम्भकमाह—सीत्कामिति । वक्त्रे मुखे सीत्कां सीदेव सीत्का सीदिति शब्दः सीत्कारस्तां कुर्यात् । ओष्ठयोरन्तरे संलग्नया जिह्वया सीत्कारपूर्वकं मुखेन पूरकं

कुर्यादित्यर्थः । घ्राणेनैव नासिकयैवेत्यनेनोभाभ्यां नासापुटाभ्यां रेचकः कार्य इत्युक्तम् । एवशब्देन वक्रस्य व्यवच्छेदः । वक्त्रेण वायोर्निःसारणं त्वभ्यासानन्तरमपि न कार्यम्, बलहानिकरत्वात् । विजृम्भिकां रेचकं कुर्यादित्यत्रापि संबध्यते । कुम्भकस्त्वनुक्तोऽपि सीत्कार्याः कुम्भकत्वादेवावगन्तव्यः । अथ सीत्कार्याः प्रशंसा— एवमुक्तप्रकारेणाभ्यासः पौनःपुन्येनानुष्ठानं स एव योगः योगसाधनत्वात्तेन द्वितीय एव द्वितीयकः कामदेवः कंदर्पः । रूपलावण्यातिशयेन कामदेवसादृश्यात् ॥ ५३ ॥

योगिनीचक्रसामान्यः सृष्टिसंहारकारकः ।
न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते ॥ ५४ ॥

योगिनीनां चक्रं योगिनीचक्रं योगिनीसमूहः । तस्य सामान्यः संसेव्यः । सृष्टिः प्रपञ्चोत्पत्तिः संहारस्तल्लयः तयोः कारकः कर्ता । क्षुधा भोक्तुमिच्छा न । तृषा जलपानेच्छा न । निद्रा सुषुप्तिर्न । आलस्यं कायचित्तगौरवात्प्रवृत्त्यभावः । कायगौरवं कफादिना चित्तगौरवं तमोगुणेन । नैव प्रजायते नैव प्रादुर्भवति । एवमभ्यासयोगेनेति प्रजायत इति च प्रतिवाक्यं संबध्यते ॥ ५४ ॥

भवेत्सत्त्वं च देहस्य सर्वोपद्रववर्जितः ।
अनेन विधिना सत्यं योगीन्द्रो भूमिमण्डले ॥५५॥

भवेदिति । देहस्य शरीरस्य सत्त्वं बलं च भवेत् । अनेनोक्तेन विधिनाऽभ्यासविधिना योगीन्द्रो योगिनामिन्द्र इव योगीन्द्रो भूमिमण्डले सर्वैरुपद्रवैर्वर्जितः सर्वोपद्रववर्जितो भवेत्सत्यम्, 'सर्वं वाक्यं सावधारणम्' इति न्यायात् । यदुक्तं फलं तत्सत्यमेवेत्यर्थः ॥ ५५ ॥

अथ शीतली—

जिह्वया वायुमाकृष्य पूर्ववत्कुम्भसाधनम् ।
शनकैर्घ्राणरन्ध्राभ्यां रेचयेत्पवनं सुधीः ॥ ५६ ॥

शीतलीकुम्भकमाह—जिह्वयेति । जिह्वयोष्ठयोर्बहिर्निर्गतया विहंगमाधरचञ्चुसदृशया वायुमाकृष्य शनैः पूरकं कृत्वेत्यर्थः । पूर्ववत्सूर्यभेदनवत्कुम्भस्य कुम्भकस्य साधनं विधानं कृत्वेत्यध्याहारः । सुधीः शोभना धीर्यस्य सः घ्राणस्य रन्ध्रे ताभ्यां नासापुटविवराभ्यां शनकैः शनैरेव । 'अव्ययसर्वनाम्नाम्—' इत्यकच् । पवनं वायुं रेचयेत् ॥ ५६ ॥

गुल्मप्लीहादिकान्रोगाञ्ज्वरं पित्तं क्षुधां तृषाम् ।
विषाणि शीतलीनाम कुम्भिकेयं निहन्ति हि ॥५७॥

शीतलीगुणानाह—गुल्मश्च प्लीहश्च गुल्मप्लीहौ रोगविशेषावादी येषां ते गुल्मप्लीहादिकास्तान् रोगानामयान् ज्वरं

ज्वराख्यं रोगं पित्तं पित्तविकारं क्षुधां भोक्तुमिच्छां तृषां जलपानेच्छां विषाणि सर्पादिविषजनितविकारान्। शीतली नामेति प्रसिद्धार्थकमव्ययम्। इयमुक्ता कुम्भिका निहन्ति नितरां हन्ति। कुम्भशब्दः स्त्रीलिङ्गोऽपि। तथा च श्रीहर्षः—'उदस्य कुम्भीरथ शातकुम्भजाः' इति ॥ ५७ ॥

अथ भस्त्रिका—

ऊर्वोरुपरि संस्थाप्य शुभे पादतले उभे।
पद्मासनं भवेदेतत्सर्वपापप्रणाशनम् ॥ ५८ ॥

भस्त्राकुम्भकस्य पद्मासनपूर्वकमेवानुष्ठानात्तदादौ पद्मासनमाह—ऊर्वोरिति। उपर्युत्ताने शुभे शुद्धे उभे द्वे पादयोस्तले अधःप्रदेशौ ऊर्वोः संस्थाप्य सम्यक् स्थापयित्वा वसेत्। एतत्पद्मासनं भवेत्। कीदृशम्? सर्वेषां पापानां प्रकर्षेण नाशनम्। अत्रोपरीत्यव्ययमुत्तानवाचकम्। तथा च कारकेषु मनोरमायाम् 'उपर्युपरिबुद्धीनाम्' इत्यत्रोपरिबुद्धीनामित्यस्योत्तानबुद्धीनामिति व्याख्यानं कृतम् ॥ ५८ ॥

सम्यक्पद्मासनं बद्ध्वा समग्रीवोदरं सुधीः।
मुखं संयम्य यत्नेन प्राणं घ्राणेन रेचयेत् ॥ ५९ ॥

भस्त्रिकाकुम्भकमाह—सम्यगिति। ग्रीवा च उदरं च ग्रीवोदरम्। प्राण्यङ्गत्वादेकवद्भावः। समं ग्रीवोदरं यस्य स

समग्रीवोदरः सुस्थिता धीर्यस्य स सुधीः पद्मासनं सम्यक् स्थिरं बद्ध्वा मुखं संयम्य संयतं कृत्वा यत्नेन प्रयत्नेन घ्राणेन घ्राणस्यैकतरेण रन्ध्रेण प्राणं शरीरान्तः स्थितं वायुं रेचयेत् ॥ ५९ ॥

यथा लगति हृत्कण्ठे कपालावधि सस्वनम् ।
वेगेन पूरयेच्चापि हृत्पद्मावधि मारुतम् ॥ ६० ॥

रेचकप्रकारमाह—यथेति । हृच्च कण्ठश्च हृत्कण्ठं तस्मिन् हृत्कण्ठे । समाहारद्वन्द्वः । कपालावधि कपालपर्यन्तं स्वनेन सहितं सस्वनं यथा स्यात्तथा येन प्रकारेण लगति प्राण इति शेषः । तथा रेचयेत् । हृत्पद्ममवधिर्यस्मिन् कर्मणि तत् हृत्पद्मावधि वेगेन तरसा मारुतं वायुं पूरयेत् । चापीति पादपूरणार्थम् ॥ ६० ॥

पुनर्विरेचयेत्तद्वत्पूरयेच्च पुनः पुनः ।
यथैव लोहकारेण भस्त्रा वेगेन चाल्यते ॥ ६१ ॥

पुनरिति । तद्वत्पूर्ववत्पुनर्विरेचयेत्पुनः पुनः पूरयेच्चेत्यन्वयः । उक्तेऽर्थे दृष्टान्तमाह—यथैवेति । लोहकारेण लोहविकाराणां कर्त्रा भस्त्राऽग्नेर्धमनसाधनीभूतं चर्म यथैव येन प्रकारेण वेगेन चाल्यते ॥ ६१ ॥

तथैव स्वशरीरस्थं चालयेत्पवनं धिया ।
यदा श्रमो भवेद्देहे तदा सूर्येण पूरयेत् ॥ ६२ ॥
यथोदरं भवेत्पूर्णमनिलेन तथा लघु ।

तथैव तेनैव प्रकारेण स्वशरीरस्थं स्वशरीरे स्थितं पवनं प्राणं धिया बुद्ध्या चालयेत् । रेचकपूरकयोर्निरन्तरावर्तनेन चालनस्यावधिमाह—यदा श्रम इति । यदा यस्मिन्काले देहे शरीरे श्रमो रेचकपूरकयोर्निरन्तरावर्तनेनायासो भवेत्तदा तस्मिन्काले । यथा येन प्रकारेण पवनेन वायुना लघु क्षिप्रमेवोदरं पूर्णं भवेत्तथा तेन प्रकारेण सूर्यनाड्या पूरयेत् । ‘ लघु क्षिप्रमरं द्रुतम् ’ इत्यमरः ॥ ६२ ॥

धारयेन्नासिकां मध्यातर्जनीभ्यां विना दृढम् ॥६३॥

पूरकानन्तरं यत्कर्तव्यं तदाह—धारयेदिति । मध्यातर्जनीभ्यां मध्यमातर्जनीभ्यां विनाऽङ्गुष्ठानामिकाकनिष्ठिकाभिर्नासिकां दृढं धारयेत् । अङ्गुष्ठेन दक्षिणनासापुटं निरुध्यानामिकाकनिष्ठिकाभ्यां वामनासापुटं निरुध्य नासिकां दृढं गृह्णीयादित्यर्थः ॥ ६३ ॥

विधिवत्कुम्भकं कृत्वा रेचयेदिडयाऽनिलम् ।
वातपित्तश्लेष्महरं शरीराग्निविवर्धनम् ॥ ६४ ॥

विधिवदिति। बन्धपूर्वकं कुम्भकं कृत्वेडया चन्द्र-नाड्याऽनिलं वायुं रेचयेत्। भस्त्राकुम्भकस्येयं परिपाटी। वामनासिकापुटं दक्षिणभुजानामिकाकनिष्ठिकाभ्यां निरुध्य दक्षिणनासिकापुटेन भस्त्रावद्वेगेन रेचकपूरकाः कार्याः। श्रमे जाते तेनैव नासापुटेन पूरकं कृत्वाऽङ्गुष्ठेन दक्षिणं नासापुटं निरुध्य यथाशक्ति कुम्भकं धारयेत्। पश्चादिडया रेचयेत्। पुनर्दक्षिणनासापुटमङ्गुष्ठेन निरुध्य वामनासिकापुटेन भस्त्रा-वज्झटिति रेचकपूरकाः कर्तव्याः। श्रमे जाते तेनैव नासिकापुटेन पूरकं कृत्वाऽनामिकाकनिष्ठिकाभ्यां वामनासिका-पुटं निरुध्य यथाशक्ति कुम्भकं कृत्वा पिङ्गलया रेचयेदित्येका रीतिः। वामनासिकापुटमनामिकाकनिष्ठिकाभ्यां दक्षिण-नासिकापुटेन पूरकं कृत्वा झटित्यङ्गुष्ठेन निरुध्य वामनासा-पुटेन रेचयेत्। एवं शतधा कृत्वा श्रमे जाते तेनैव पूरयेत्। बन्धपूर्वकं कृत्वेडया रेचयेत्। पुनर्दक्षिणनासापुटमङ्गुष्ठेन निरुध्य वामनासापुटेन पूरकं कृत्वा झटिति वामनासिका-पुटमनामिकाकनिष्ठिकाभ्यां निरुध्य पिङ्गलया रेचयेद्भस्त्रावत्। पुनः पुनरेवं कृत्वा रेचकपूरकावृत्तिश्रमे जाते वामनासापुटेन पूरकं कृत्वाऽनामिकाकनिष्ठिकाभ्यां धृत्वा कुम्भकं कृत्वा पिङ्गलया रेचयेदिति द्वितीया रीतिः। भस्त्रिकागुणानाह—वातपित्तेति। वातश्च पित्तं च श्लेष्मा च वातपित्तश्लेष्माणस्तान्

हरतीति तादृशं शरीरे देहे योऽग्निर्जठरानलस्तस्य विशेषेण वर्धनं दीपनम् ॥ ६४ ॥

कुण्डलीबोधकं क्षिप्रं पवनं सुखदं हितम् ।
ब्रह्मनाडीमुखेसंस्थकफाद्यर्गलनाशनम् ॥ ६५ ॥

क्षिप्रं शीघ्रं कुण्डल्याः सुप्ताया बोधकं बोधकर्तृ पुनातीति पवनं पवित्रकारकं सुखं ददातीति सुखदं हितं त्रिदोषहरत्वात्सर्वेषां हितं सर्वदा च हितं सर्वेषां कुम्भकानां सर्वदा हितत्वेऽपि सूर्यभेदनोज्जायिनावुष्णौ प्रायेण शीते हितौ । सीत्कारीशीतल्यौ शीतले प्रायेणोष्णे हिते । भस्त्राकुम्भकः समशीतोष्णः सर्वदा हितः सर्वेषां कुम्भकानां सर्वरोगहरत्वेऽपि सूर्यभेदनं प्रायेण वातहरम् । उज्जायी प्रायेण श्लेष्महरः । सीत्कारीशीतल्यौ प्रायेण पित्तहरे । भस्त्राख्यः कुम्भकः त्रिदोषहर इति बोध्यम् । ब्रह्मनाडी सुषुम्णा ब्रह्मप्रापकत्वात् । तथा च श्रुतिः—“ शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभि निःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ” । तस्य मुखेऽग्रभागे संस्थः सम्यक् स्थितो यः कफादिरूपोऽर्गलः प्राणगतिप्रतिबन्धकस्तस्य नाशनं नाशकर्तृ ॥ ६५ ॥

सम्यग्गात्रसमद्भूतग्रन्थित्रयविभेदकम् ।
विशेषेणैव कर्तव्यं भस्त्राख्यं कुम्भकं त्विदम् ॥६६॥

सम्यग्दृढीभूतं गात्रं गात्रमध्ये सुषुम्णायामेव सम्यगुद्भूतं समुद्भूतं जातं यद्ग्रन्थीनां त्रयं ग्रन्थित्रयं ब्रह्मग्रन्थिविष्णुग्रन्थिरुद्रग्रन्थिरूपं तस्य विशेषेण भेदजनकम्। अत एव इदं भस्त्रा इत्याख्या यस्येति भस्त्राख्यं कुम्भकं तु विशेषेणैव कर्तव्यम्, अवश्यकर्तव्यमित्यर्थः। सूर्यभेदनादयस्तु यथासंभवं कर्तव्याः ॥ ६६ ॥

अथ भ्रामरी—

वेगाद्घोषं पूरकं भृङ्गनादं
भृङ्गीनादं रेचकं मन्दमन्दम्।
योगीन्द्राणामेवमभ्यासयोगा-
च्चित्ते जाता काचिदानन्दलीला ॥ ६७ ॥

भ्रामरीकुम्भकमाह—वेगादिति। वेगात्तरसा घोषं सशब्दं यथा स्यात्तथा भृङ्गस्य भ्रमरस्य नाद इव नादो यस्मिन्कर्मणि तत्तथा पूरकं कृत्वा। भृङ्ग्यो भ्रमर्यस्तासां नाद इव नादो यस्मिंस्तत्तथा मन्दं मन्दं रेचकं कुर्यात्। पूरकानन्तरं कुम्भकस्तु भ्रामर्याः कुम्भकत्वादेव सिद्धो विशेषाच्च नोक्तः। पूरकरेचकयोस्तु विशेषोऽस्तीति तावेवोक्तौ। एवमुक्तरीत्याऽभ्यसनमभ्यासस्तस्य योगो युक्तिस्तस्माद्योगीन्द्राणां चित्ते काचिदनिर्वाच्या आनन्दे लीला क्रीडा आनन्दलीला जातोत्पन्ना भवति ॥ ६७ ॥

अथ मूर्च्छा—

पूरकान्ते गाढतरं बद्ध्वा जालंधरं शनैः ।
रेचयेन्मूर्च्छनाख्येयं मनोमूर्च्छा सुखप्रदा ॥ ६८ ॥

मूर्च्छाकुम्भकमाह—पूरकान्त इति । पूरकस्यान्तेऽवसानेऽतिशयेन गाढतरं जालंधराख्यं बन्धं बद्ध्वा शनैर्मन्दं मन्दं रेचयेत् । इयं कुम्भिका मूर्च्छनाख्या मूर्च्छना इत्याख्या यस्या इति मूर्च्छनाख्या । कीदृशी ? मनो मूर्च्छयतीति मनोमूर्च्छा । एतेन मूर्च्छनाया विग्रहदर्शनपूर्वकं फलमुक्तम् । पुनः कीदृशी ? सुखप्रदा सुखं प्रददातीति सुखप्रदा ॥ ६८ ॥

अथ प्लाविनी—

अन्तःप्रवर्तितोदारमारुतापूरितोदरः ।
पयस्यगाधेऽपि सुखात्प्लवते पद्मपत्रवत् ॥ ६९ ॥

प्लाविनीकुम्भकमाह—अन्तरिति । अन्तः शरीरान्तः प्रवर्तितः पूरित उदारोऽतिशयितो यो मारुतः समीरस्तेना समन्तात्पूरितमुदरं येन स पुमानगाधेऽप्यतलस्पर्शेऽपि पयसि जले पद्मपत्रवत्पद्मपत्रेण तुल्यं सुखादनायासात् प्लवते तरति गच्छति ॥ ६९ ॥

प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥ ७० ॥

अथ प्राणायामभेदानाह—प्राणायाम इति। प्राणस्य शरीरान्तःसंचारिवायोरायमनं निरोधनमायामः प्राणायामः। प्राणायामलक्षणमुक्तं गोरक्षनाथेन—'प्राणः स्वदेहजो वायुरायामस्तन्निरोधनम्' इति। रेचकश्च पूरकश्च कुम्भकश्च तैर्भेदैस्त्रिधा त्रिप्रकारकः रेचकप्राणायामः पूरकप्राणायामः कुम्भकप्राणायामश्चेति। रेचकलक्षणमाह याज्ञवल्क्यः—'बहिर्यद्रेचनं वायोरुदराद्रेचकः स्मृतः' इति। रेचकप्राणायामलक्षणम्—'निष्क्रम्य नासाविवरादशेषं प्राणं बहिः शून्यमिवानिलेन। निरुध्य संतिष्ठति रुद्धवायुः स रेचको नाम महानिरोधः'। पूरकलक्षणम्—'बाह्यादापूरणं वायोरुदरे पूरको हि सः'। पूरकप्राणायामलक्षणम्—'बाह्ये स्थितं प्राणपुटेन वायुमाकृष्य तेनैव शनैः समन्तात्। नाडीश्च सर्वाः परिपूरयेद्यः स पूरको नाम महानिरोधः'। कुम्भकलक्षणम्—'संपूर्य कुम्भवद्वायोर्धारणं कुम्भको भवेत्'। अयं कुम्भकस्तु पूरकप्राणायामादभिन्नः। भिन्नस्तु—'न रेचको नैव च पूरकोऽत्र नासापुटे संस्थितमेव वायुम्। सुनिश्चलं धारयते क्रमेण कुम्भाख्यमेतत्प्रवदन्ति तज्ज्ञाः'। अथ प्रकारान्तरेण प्राणायामं विभजते—सहित इति। कुम्भको द्विविधः सहितः केवलश्चेति। मतोऽभिमतो योगिनामिति शेषः। तत्र सहितो द्विविधः—रेचकपूर्वकः कुम्भकपूर्वकश्च। तदुक्तम्—'आरे-

च्यापूर्य वा कुर्यात्स वै सहितकुम्भकः'। तत्र रेचकपूर्वको रेचकप्राणायामादभिन्नः। पूरकपूर्वकः कुम्भकः पूरकप्राणायामादभिन्नः। केवलकुम्भकः कुम्भकप्राणायामादभिन्नः। प्रागुक्ताः सूर्यभेदनादयः पूरकपूर्वकस्य कुम्भकस्य भेदा ज्ञातव्याः ॥७०॥

यावत्केवलसिद्धिः स्यात्सहितं तावदभ्यसेत्।
रेचकं पूरकं मुक्त्वा सुखं यद्वायुधारणम् ॥ ७१ ॥

सहितकुम्भकाभ्यासस्यावधिमाह—यावदिति। केवलस्य केवलकुम्भकस्य सिद्धिः केवलसिद्धिर्यावत्पर्यन्तं स्यात्तावत्पर्यन्तं सहितकुम्भकं सूर्यभेदादिकमभ्यसेदनुतिष्ठेत्। सुषुम्णाभेदानन्तरं यदा सुषुम्णान्तर्घटशब्दा भवन्ति तदा केवलकुम्भकः सिध्यति। तदनन्तरं सहितकुम्भका दश विंशतिर्वा कार्याः। अशीतिसंख्यापूर्तिः केवलकुम्भकैरेव कर्तव्या। सति सामर्थ्ये केवलकुम्भका अशीतेरधिकाः कार्याः। केवलकुम्भकस्य लक्षणमाह—रेचकमिति। रेचकं पूरकं मुक्त्वा त्यक्त्वा सुखमनायासं यथा स्यात्तथा वायोर्धारणं वायुधारणं यत् ॥ ७१ ॥

प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः।
कुम्भके केवले सिद्धे रेचपूरकवर्जिते ॥ ७२ ॥

स वा इति। मिश्रितः केवलकुम्भकः प्राणायाम इत्ययमुक्तः। केवलं प्रशंसन्ति—केवल इति। रेचो रेचकः रेचश्च

पूरकश्च रेचपूरकौ ताभ्यां वर्जिते रहिते केवले कुम्भके सिद्धे सति ॥ ७२ ॥

न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ।
शक्तः केवलकुम्भेन यथेष्टं वायुधारणात् ॥ ७३ ॥

नेति । तस्य योगिनस्त्रिषु लोकेषु दुर्लभं दुष्प्रापं किंचित्किमपि यथेष्टं यथेच्छं वायोर्धारणं वाऽपि न विद्यते तस्य सर्वं सुलभमित्यर्थः । शक्त इति । केवलकुम्भकेन कुम्भकाभ्यासेन शक्तः समर्थो यथेष्टं यथेच्छं वायोर्धारणं तस्माद्वायुधारणात् ॥ ७३ ॥

राजयोगपदं चापि लभते नात्र संशयः ।
कुम्भकात्कुण्डलीबोधः कुण्डलीबोधतो भवेत् ॥ ७४ ॥

राजयोगपदं राजयोगात्मकं पदं लभते । अत्र संशयो न । निश्चितमेतदित्यर्थः । कुम्भकाभ्यासस्य परम्परया कैवल्यहेतुत्वमाह—कुम्भकादिति । कुम्भकात्कुम्भकाभ्यासात्कुण्डल्याधारशक्तिस्तस्या बोधो निद्राभङ्गो भवेत् । कुण्डल्या बोधः कुण्डलीबोधस्तस्मात्कुण्डलीबोधतः ॥ ७४ ॥

अनर्गला सुषुम्णा च हठसिद्धिश्च जायते ।
हठं विना राजयोगो राजयोगं विना हठः ।
न सिध्यति ततो युग्ममा निष्पत्तेः समभ्यसेत् ॥ ७५ ॥

सुषुम्णा मध्यनाड्यनर्गला कफाद्यर्गलरहिता भवेत् । हठस्य हठाभ्यासस्य सिद्धिः प्रत्याहारादिपरम्परया कैवल्यरूपा सिद्धिर्जायते । हठयोगराजयोगसाधनयोः परस्परोपकार्योपकारकत्वमाह—हठं विनेति । हठं हठयोगं विना राजयोगो न सिध्यति राजयोगं विना हठो न सिध्यति ततोऽन्यतरस्य सिद्धिर्नास्ति । तस्मान्निष्पत्तिं राजयोगसिद्धिमा मर्यादीकृत्य या निष्पत्तिस्तस्या राजयोगसिद्धिपर्यन्तं युग्मं हठयोगराजयोगद्वयमभ्यसेदनुतिष्ठेत् । हठातिरिक्ते साक्षात्परम्परया वा राजयोगसाधनेऽत्र राजयोगशब्दः, जीवनसाधने लाङ्गले जीवनशब्दप्रयोगवत् । राजयोगसाधनं चतुर्थोपदेशे वक्ष्यमाणमुन्मनीशांभवीमुद्रादिरूपमपरोक्षानुभूतावुक्तं पञ्चदशाङ्गरूपं दशाङ्गरूपं च, वाक्यसुधायामुक्तं दृश्यानुविद्धादिरूपं च ॥ ७५ ॥

कुम्भकप्राणरोधान्ते कुर्याच्चित्तं निराश्रयम् ।
एवमभ्यासयोगेन राजयोगपदं व्रजेत् ॥ ७६ ॥

हठाभ्यासाद्राजयोगप्राप्तिप्रकारमाह—कुम्भकेति । कुम्भकेन प्राणस्य यो रोधस्तस्यान्ते मध्ये चित्तमन्तःकरणं निराश्रयं कुर्यात् । संप्रज्ञातसमाधौ जातायां ब्रह्माकारस्थितेः परं वैराग्येण विलयं कुर्यादित्यर्थः । एवमुक्तरीत्याऽभ्यासस्य योगो युक्तिस्तेन ।

'योगः संनहनोपायध्यानसंगतियुक्तिषु' इति कोशः । राजयोगपदं राजयोगात्मकं पदं व्रजेत्प्राप्नुयात् ॥ ७६ ॥

वपुःकृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्मले ।
अरोगता बिन्दुजयोऽग्निदीपनं
नाडीविशुद्धिर्हठसिद्धिलक्षणम् ॥ ७७ ॥

हठसिद्धिज्ञापकमाह—वपुःकृशत्वमिति । वपुषो देहस्य कृशत्वं कार्श्यं वदने मुखे प्रसन्नता प्रसादो नादस्य ध्वनेः स्फुटत्वं प्राकट्यं नयने नेत्रे सुष्ठु निर्मले अरोगस्य भावोऽरोगता आरोग्यं बिन्दोर्धातोर्जयः क्षयाभावरूपः अग्नेरुदर्यस्य दीपनं दीप्तिर्नाडीनां विशेषेण शुद्धिर्मलापगमः एतद्धठस्य हठाभ्याससिद्धेर्भाविन्या लक्ष्यतेऽनेनेति लक्षणम् ॥ ७७ ॥

इति हठप्रदीपिकायां द्वितीयोपदेशः ॥ २ ॥

इति श्रीहठप्रदीपिकाव्याख्यायां ज्योत्स्नाभिधायां
ब्रह्मानन्दकृतायां द्वितीयोपदेशः ॥ २ ॥

P.V.S.

तृतीयोपदेशः ।

सशैलवनधात्रीणां यथाऽऽधारोऽहिनायकः ।
सर्वेषां योगतन्त्राणां तथाऽऽधारो हि कुण्डली ॥ १ ॥

अथ कुण्डल्याः सर्वयोगाश्रयत्वमाह—सशैलेति । शैलश्च वनानि च शैलवनानि तैः सह वर्तमानाः सशैलवनास्ताश्च ता धात्र्यश्च भूमयस्तासाम् । धात्र्या एकत्वेऽपि देशभेदाद्भेदमादाय बहुवचनम् । अहीनां सर्पाणां नायको नेताऽहिनायकः शेषो यथा यद्वदाधार आश्रयस्तथा तद्वत् सर्वेषां योगस्य तन्त्राणि योगतन्त्राणि योगोपायास्तेषां कुण्डल्याधारशक्तिराश्रयः । कुण्डलीबोधं विना सर्वयोगोपायानां वैयर्थ्यादिति भावः ॥ १ ॥

सुप्ता गुरुप्रसादेन यदा जागर्ति कुण्डली ।
तदा सर्वाणि पद्मानि भिद्यन्ते ग्रन्थयोऽपि च ॥२॥

कुण्डलीबोधस्य फलमाह द्वाभ्याम्—सुप्तेति । सुप्ता कुण्डली गुरोः प्रसादेन यदा जागर्ति बुध्यते तदा सर्वाणि

पद्मानि षट्चक्राणि भिद्यन्ते भिन्नानि भवन्ति । ग्रन्थयोऽपि च ब्रह्मग्रन्थिविष्णुग्रन्थिरुद्रग्रन्थयो भिद्यन्ते भेदं प्राप्नुवन्तीत्यन्वयः ॥ २ ॥

प्राणस्य शून्यपदवी तदा राजपथायते ।
तदा चित्तं निरालम्बं तदा कालस्य वञ्चनम् ॥ ३ ॥

प्राणस्येति । तदा शून्यपदवी सुषुम्णा प्राणस्य वायो राज्ञां पन्था राजपथं राजपथमिवाचरति राजपथायते राजमार्गायते । सुखेन गमनसंभवात् । तदा चित्तमालम्बनमाश्रयस्तस्मान्निर्गतं निरालम्बं निर्विषयं भवति । तदा कालस्य मृत्योर्वञ्चनं प्रतारणं भवति ॥ ३ ॥

सुषुम्णा शून्यपदवी ब्रह्मरन्ध्रं महापथः ।
श्मशानं शांभवी मध्यमार्गश्चेत्येकवाचकाः ॥ ४ ॥

सुषुम्णापर्यायानाह—सुषुम्णेति । इत्युक्ताः शब्दा एकस्य एकार्थस्य वाचकाः एकवाचकाः । पर्याया इत्यर्थः । स्पष्टः श्लोकार्थः ॥ ४ ॥

तस्मात्सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम् ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ॥ ५ ॥

तस्मादिति । यस्मात्कुण्डलीबोधेनैव षट्चक्रभेदादिकं भवति तस्मात्सर्वप्रयत्नेन सर्वेण प्रयत्नेन ब्रह्म सच्चिदानन्दलक्षणं तस्य

द्वारं प्राप्त्युपायः सुषुम्णा तस्या मुखेऽग्रभागे मुखेन सुषुम्णाद्वारं पिधाय सुप्तामीश्वरीं कुण्डलीं प्रबोधयितुं प्रकर्षेण बोधयितुं मुद्राणां महामुद्रादीनामभ्यासमावृत्तिं समाचरेत्सम्यगाचरेत् ॥५॥

महामुद्रा महाबन्धो महावेधश्च खेचरी ।
उड्यानं मूलबन्धश्च बन्धो जालंधराभिधः ॥ ६ ॥
करणी विपरीताख्या वज्रोली शक्तिचालनम् ।

मुद्रा उद्दिशति—महामुद्रेत्यादिना सार्धेन । सार्धार्थः स्पष्टः ॥ ६ ॥

इदं हि मुद्रादशकं जरामरणनाशकम् ॥ ७ ॥

मुद्राफलमाह सार्धद्वाभ्याम्—इदमिति । इदमुक्तं मुद्राणां दशकं जरा च मरणं च जरामरणे तयोर्नाशनं निवारकम् ॥७॥

आदिनाथोदितं दिव्यमष्टैश्वर्यप्रदायकम् ।
वल्लभं सर्वसिद्धानां दुर्लभं मरुतामपि ॥ ८ ॥

आदिनाथेन शंभुनोदितं कथितम् । दिवि भवं दिव्यमुत्तमम् अष्टौ च तान्यैश्वर्याणि चाष्टैश्वर्याणि अणिममहिमगरिमलघिमप्राप्तिप्राकाम्येशतावशिताख्यानि । तत्राणिमा संकल्पमात्रेण प्रकृत्यपगमे परमाणुवद्देहस्य सूक्ष्मता । १ । महिमा प्रकृत्यापूरेणाकाशादिवन्महद्भावः । २ । गरिमा

लघुतरस्यापि तूलादेः पर्वतादिवद्गुरुभावः । ३ । लघिमा गुरुतरस्यापि पर्वतादेस्तूलादिवल्लघुभावः । ४ । प्राप्तिः सर्वभावसांनिध्यम् । यथा भूमिस्थ एवाङ्गुल्यग्रेण स्पृशति चन्द्रमसम् । ५ । प्राकाम्यमिच्छानभिघातः । यथा उदक इव भूमौ निमज्जत्युन्मज्जति च । ६ । ईशता भूतभौतिकानां प्रभवाप्ययसंस्थानविशेषसामर्थ्यम् । ७ । वशित्वं भूतभौतिकानां स्वाधीनकरणम् । ८ । तेषां प्रदायकं प्रकर्षेण ददातीति तथा तं सर्वे च ते सिद्धाश्च कपिलादयस्तेषां वल्लभं प्रियं मरुतां देवानामपि दुर्लभं दुष्प्रापं किमुतान्येषामित्यर्थः ॥ ८ ॥

गोपनीयं प्रयत्नेन यथा रत्नकरण्डकम् ।
कस्यचिन्नैव वक्तव्यं कुलस्त्रीसुरतं यथा ॥ ९ ॥

गोपनीयमिति । प्रयत्नेन प्रकृष्टेन यत्नेन गोपनीयम् । गोपनीयत्वे दृष्टान्तमाह—यथेति । रत्नानां हीरकादीनां करण्डकं रत्नकरण्डकं यथा येन प्रकारेण गोप्यते तद्वत् । कस्यापि जनमात्रस्य यद्वा कस्यापि ब्रह्मणोऽपि नैव वाच्यं किमुतान्यस्य । तत्र दृष्टान्तः—कुलस्त्रियाः सुरतं कुलस्त्रीसुरतं संगमनं यथा यद्वत् ॥

अथ महामुद्रा—

पादमूलेन वामेन योनिं संपीड्य दक्षिणम् ।
प्रसारितं पदं कृत्वा कराभ्यां धारयेद् दृढम् ॥१०॥

मुद्रादिषु प्रथमोद्दिष्टत्वेन महामुद्रां तावदाह—पादमूलेनेति। वामेन सव्येन पादस्य मूलं पादमूलं पार्ष्णिस्तेन पादमूलेन वामपादपार्ष्णिनेत्यर्थः। योनिं योनिस्थानं गुदमेढ्रयोर्मध्यभागं संपीड्याकुञ्चितवामपादपार्ष्णिना योनिस्थानं दृढं संयोज्येत्यर्थः। दक्षिणं सव्येतरं पदं चरणं प्रसारितं भूमिसंलग्नपार्ष्णिकमूर्ध्वाङ्गुलिकं दण्डवत्कृत्वा कराभ्यां संप्रदायाकुञ्चितकरतर्जनीभ्यां दृढं गाढं धारयेदङ्गुष्ठप्रदेशे गृह्णीयात् ॥ १० ॥

कण्ठे बन्धं समारोप्य धारयेद्वायुमूर्ध्वतः।
यथा दण्डहतः सर्पो दण्डाकारः प्रजायते ॥ ११ ॥

कण्ठे कण्ठदेशे बन्धनं सम्यगारोप्य कृत्वा। जालंधरबन्धं कृत्वेत्यर्थः। वायुं पवनमूर्ध्वत उपरि सुषुम्णायां धारयेत्। अनेन मूलबन्धः सूचितः। स तु योनिसंपीडनेन जिह्वाबन्धनेन चरितार्थ इति सांप्रदायिकाः। यथा दण्डेन हतस्ताडितो दण्डहतः सर्पः कुण्डली दण्डाकारः दण्डस्याकार इवाकारो यस्य स तादृशः। कुण्डलाकारं त्यक्त्वा सरल इत्यर्थः। प्रकर्षेण जायते भवति ॥ ११ ॥

ऋज्वीभूता तथा शक्तिः कुण्डली सहसा भवेत्।
तदा सा मरणावस्था जायते द्विपुटाश्रया ॥ १२ ॥

तथा कुण्डल्याधारशक्तिः सहसा शीघ्रमेव ऋज्वी संपद्यते तथाभूता ऋज्वीभूता सरला भवेत् । तदा सेति । द्वे पुटे इडापिङ्गले आश्रयो यस्याः सा मरणावस्था जायते । कुण्डलीबोधे सति सुषुम्णायां प्रविष्टे प्राणे द्वयोः प्राणवियोगात् ॥ १२ ॥

ततः शनैः शनैरेव रेचयेन्नैव वेगतः ।
इयं खलु महामुद्रा महासिद्धैः प्रदर्शिता ॥ १३ ॥

ततस्तदनन्तरं शनैः शनैरेव रेचयेत् । वायुमिति संबध्यते । वेगतस्तु वेगान्न रेचयेत् । वेगतो रेचने बलहानिप्रसङ्गात् । खल्विति वाक्यालंकारे । इयं महामुद्रा महासिद्धैरादिनाथादिभिः प्रदर्शिता प्रकर्षेण दर्शिता ॥ १३ ॥

महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः ।
महामुद्रां च तेनैव वदन्ति विबुधोत्तमाः ॥ १४ ॥

महामुद्राया अन्वर्थत्वमाह—महान्तश्च ते क्लेशाश्च महाक्लेशा अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च त आदयो येषां ते तत्कार्याणां शोकमोहादीनां ते दोषाः क्षीयन्ते । मरणमादिर्येषां जरादीनां तेऽपि च क्षीयन्ते नश्यन्ति । यतस्तेनैव हेतुना विशिष्टा बुधा विबुधास्तेषूत्तमा विबुधोत्तमा महामुद्रां वदन्ति । महाक्लेशान्मरणादींश्च दोषान्मुद्रयति शमयतीति महामुद्रेति व्युत्पत्तेरित्यर्थः ॥ १४ ॥

चन्द्राङ्गे तु समभ्यस्य सूर्याङ्गे पुनरभ्यसेत् ।
यावत्तुल्या भवेत्संख्या ततो मुद्रां विसर्जयेत् ॥१५॥

महामुद्राभ्यासक्रममाह—चन्द्राङ्ग इति । चन्द्रेण चन्द्रनाड्योपलक्षितमङ्गं चन्द्राङ्गं तस्मिन् चन्द्राङ्गे वामाङ्गे । तुशब्दः पादपूरणे । सम्यगभ्यस्य सूर्येण पिङ्गलयोपलक्षितमङ्गं सूर्याङ्गं तस्मिन् सूर्याङ्गे दक्षाङ्गे पुनर्वामाङ्गाभ्यासानन्तरं यावद्यावत्कालपर्यन्तं तुल्या वामाङ्गे कुम्भकाभ्याससंख्यासमा संख्या भवेत्तावदभ्यसेत् । ततः संख्यासाम्यानन्तरं मुद्रां महामुद्रां विसर्जयेत् । अत्रायं क्रमः—आकुञ्चितवामपादपार्ष्णिं योनिस्थाने संयोज्य प्रसारितदक्षिणपादाङ्गुष्ठमाकुञ्चिततर्जनीभ्यां गृहीत्वाऽभ्यासो वामाङ्गेऽभ्यासः । अस्मिन्नभ्यासे पूरितो वायुर्वामाङ्गे तिष्ठति । आकुञ्चितदक्षपादपार्ष्णिं योनिस्थाने संयोज्य प्रसारितवामपादाङ्गुष्ठमाकुञ्चिततर्जनीभ्यां गृहीत्वाऽभ्यासो दक्षाङ्गेऽभ्यासः । अस्मिन्नभ्यासे पूरितो वायुर्दक्षाङ्गे तिष्ठति ॥ १५ ॥

न हि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः ।
अपि भुक्तं विषं घोरं पीयूषमिव जीर्यति ॥ १६ ॥

महामुद्रागुणानाह त्रिभिः—न हीति । हि यस्मान्महामुद्राभ्यासिन इत्यध्याहारः । पथ्यमपथ्यं वा न । पथ्यापथ्य-

विचारो नास्तीत्यर्थः। तस्मात्सर्वे भुक्ता रसाः कट्वम्लादयो जीर्यन्त इति विभक्तिविपरिणामेनान्वयः। नीरसा निर्गतो रसो येभ्यस्ते यातयामाः पदार्था जीर्यन्ते। घोरमिति दुर्धरं भुक्तमन्नं विषं क्ष्वेडमपि पीयूषमिवामृतमिव जीर्यति जीर्णं भवति। किमुतान्यदिति भावः॥ १६॥

क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः।
तस्य दोषाः क्षयं यान्ति महामुद्रां तु योऽभ्यसेत्॥

यः पुमान् महामुद्रामभ्यसेत्तस्य क्षयो राजरोगः कुष्ठगुदावर्तगुल्मा रोगविशेषाः। अजीर्णं भुक्तान्नापरिपाकस्तानि पुरोगमान्यग्रेसराणि येषां महोदरज्वरादीनां तथा तादृशा दोषा दोषजनिता रोगाः क्षयं नाशं यान्ति प्राप्नुवन्ति॥ १७॥

कथितेयं महामुद्रा महासिद्धिकरी नृणाम्।
गोपनीया प्रयत्नेन न देया यस्य कस्यचित्॥ १८॥

महामुद्रामुपसंहरन् तस्या गोप्यत्वमाह—कथितेति। इयमेषा महामुद्रा कथितोक्ता। मयेति शेषः। कीदृशी? नृणामभ्यसतां नराणां महत्यश्च ताः सिद्धयश्चाणिमाद्यास्तासां करी कर्त्रीयम्। प्रकृष्टो यत्नः प्रयत्नस्तेन प्रयत्नेन गोपनीया गोपनार्हा यस्य कस्यचिद्यस्य कस्याप्यनधिकारिणः। संबन्धसामान्ये षष्ठी। न देया दातुं योग्या न भवतीत्यर्थः॥ १८॥

अथ महाबन्धः—

पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत् ।
वामोरूपरि संस्थाप्य दक्षिणं चरणं तथा ॥ १९ ॥

महाबन्धमाह—पार्ष्णिमिति । वामस्य सव्यस्य पादस्य चरणस्य पार्ष्णिं गुल्फयोरधोभागम् । 'तद्ग्रन्थी गुल्फौ पुमान् पार्ष्णिस्तयोरधः' इत्यमरः । योनिस्थाने गुदमेढ्रयोरन्तराले नियोजयेन्नितरां योजयेत् । वामः सव्यो य ऊरुस्तस्योपरि दक्षिणं चरणं पादं संस्थाप्य सम्यक् स्थापयित्वा । तथाशब्दः पादपूरणे ॥ १९ ॥

पूरयित्वा ततो वायुं हृदये चुबुकं दृढम् ।
निष्पीड्य वायुमाकुञ्च्य मनोमध्ये नियोजयेत् ॥२०॥

पूरयित्वेति । ततस्तदनन्तरं वायुं पूरयित्वा हृदये चुबुकं दृढं निष्पीड्य गाढं संस्थाप्य । एतेन जालंधरबन्धः प्रोक्तः । योनिं गुदमेढ्रयोरन्तरालमाकुञ्च्य । अनेन मूलबन्धः सूचितः । स तु जिह्वाबन्धेन गतार्थत्वान्न कर्तव्यः । मनः स्वान्तं मध्ये मध्यनाड्यां नियोजयेत्प्रवर्तयेत् ॥ २० ॥

धारयित्वा यथाशक्ति रेचयेदनिलं शनैः ।
सव्याङ्गे तु समभ्यस्य दक्षाङ्गे पुनरभ्यसेत् ॥ २१ ॥

धारयित्वेति । शक्तिमनतिक्रम्य यथाशक्ति धारयित्वा कुम्भयित्वा शनैर्मन्दं मन्दमनिलं वायुं रेचयेत् । सव्याङ्गे वामाङ्गे समभ्यस्य सम्यगावर्त्य दक्षाङ्गे दक्षिणाङ्गे पुनर्यावत्तुल्या-मेव संख्यां तावदभ्यसेत् ॥ २१ ॥

मतमत्र तु केषांचित्कण्ठबन्धं विवर्जयेत् ।
राजदन्तस्थजिह्वायां बन्धः शस्तो भवेदिति ॥ २२ ॥

अथ जालंधरबन्धे कण्ठसंकोचस्यानुपयोगमाह—मतमिति । केषांचित्त्वाचार्याणामिदं मतम् । किं तदित्याह—अत्र जालं-धरबन्धे कण्ठस्य बन्धनं बन्धः । संकोचस्तं विवर्जयेद्विशेषेण वर्जयेत् । कुतः ? यतो दन्तानां राजानो दन्तराजाः राजदन्ताः, राजदन्तेषु तिष्ठन्तीति राजदन्तस्था राजदन्तस्था चासौ जिह्वा च तस्यां राजदन्तस्थजिह्वायां बन्धस्तदुपरिभागस्य संबन्धः शस्तः । कण्ठाकुञ्चनापेक्षया प्रशस्तो भवेदिति हेतोः ॥ २२ ॥

अयं तु सर्वनाडीनामूर्ध्वगतिनिरोधकः ।
अयं खलु महाबन्धो महासिद्धिप्रदायकः ॥ २३ ॥

अयं त्विति । अयं तु राजदन्तस्थजिह्वायां बन्धस्तु सर्वाश्च ता नाड्यश्च सर्वनाड्यो द्वासप्ततिसहस्रसंख्याकास्तासां सुषु-म्णातिरिक्तानामूर्ध्वमुपरि वायोर्गतिरूर्ध्वगतिस्तस्या निरोधकः प्रतिबन्धकः । एतेन ‘ बध्नाति हि सिराजालम् ’ इति जालंधरोक्तं

फलमनेनैव सिद्धमिति सूचितम् । महाबन्धस्य फलमाह—अयं खल्विति । अयमुक्तः खलु प्रसिद्धः महासिद्धीः प्रकर्षेण ददातीति तथा ॥ २३ ॥

कालपाशमहाबन्धविमोचनविचक्षणः ।
त्रिवेणीसंगमं धत्ते केदारं प्रापयेन्मनः ॥ २४ ॥

कालस्य मृत्योः पाशो वागुरा तेन यो महाबन्धो बन्धनं तस्य विशेषेण मोचने मोक्षणे विचक्षणः प्रवीणः । तिसृणां नदीनां वेणी समुदायः स एव संगमः प्रयागस्तं धत्ते विधत्ते । केदारं भ्रुवोर्मध्ये शिवस्थानं केदारशब्दवाच्यम् । तं मनः स्वान्तं प्रापयेत् । 'गतिबुद्धि—' इत्यादिना अणौ कर्तुर्मनसो णौ कर्मत्वम् ॥ २४ ॥

रूपलावण्यसंपन्ना यथा स्त्री पुरुषं विना ।
महामुद्रामहाबन्धौ निष्फलौ वेधवर्जितौ ॥ २५ ॥

महावेधं वक्तुमादौ तस्योत्कर्षं तावदाह—रूपेति । रूपं सौन्दर्यं चक्षुःप्रियो गुणो,लावण्यं कान्तिविशेषः । तदुक्तम्—
'मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरम् । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥' इति । ताभ्यां संपन्ना विशिष्टा स्त्री युवती पुरुषं भर्तारं विना यथा यादृशी निष्फला तथा महामुद्रा च महाबन्धश्च तौ वेधेन महावेधेन, विनाऽपि

"प्रत्ययपूर्वोत्तरपदयोर्लोपो वक्तव्यः" इति भाष्यकारोक्तेर्म-हच्छब्दस्य लोपः। वर्जितौ रहितौ निष्फलौ व्यर्थावित्यर्थः ॥ २५ ॥

अथ महावेधः—

महाबन्धस्थितो योगी कृत्वा पूरकमेकधीः।
वायूनां गतिमावृत्य निभृतं कण्ठमुद्रया ॥ २६ ॥

महावेधमाह—महाबन्धेति। महाबन्धे महाबन्धमुद्रायां स्थितो महाबन्धस्थितः, एका एकाग्रा धीर्यस्य स एकाग्रधीर्योगी योगाभ्यासी पूरकं नासापुटाभ्यां वायोर्ग्रहणं कृत्वा कण्ठे मुद्रा कण्ठमुद्रा तया जालंधरमुद्रया वायूनां प्राणादीनां गतिमूर्ध्वाधोगमनादिरूपां निभृतं निश्चलं यथा भवति तथाऽऽवृत्य निरुध्य कुम्भकं कृत्वेत्यर्थः ॥ २६ ॥

समहस्तयुगो भूमौ स्फिचौ संताडयेच्छनैः।
पुटद्वयमतिक्रम्य वायुः स्फुरति मध्यगः ॥ २७ ॥

समहस्तेति। भूमौ भुवि हस्तयोर्युगं हस्तयुगं समं हस्तयुगं यस्य स समहस्तयुगः भूमिसंलग्नतलौ सरलौ हस्तौ यस्य तादृशः सन्नित्यर्थः। स्फिचौ कटिप्रोथौ। 'स्त्रियां स्फिचौ कटिप्रोथौ' इत्यमरः। भूमिसंलग्नतलयोर्हस्तयोरवलम्बनेन

योनिस्थानसंलग्नपार्ष्णिना वामपादेन सह भूमेः किंचिदुत्थापितौ शनैर्मन्दं संताडयेत्सम्यक्ताडयेत्। भूमावेव पुटयोर्द्वयमिडापिङ्गलयोर्युग्ममतिक्रम्योल्लङ्घ्य मध्ये सुषुम्णामध्ये गच्छतीति मध्यगो वायुः स्फुरति ॥ २७ ॥

सोमसूर्याग्निसंबन्धो जायते चामृताय वै।
मृतावस्था समुत्पन्ना ततो वायुं विरेचयेत् ॥ २८ ॥

सोमश्च सूर्यश्चाग्निश्च सोमसूर्याग्नयः सोमसूर्याग्निशब्दैस्तदधिष्ठिता नाड्य इडापिङ्गलासुषुम्णा ग्राह्यास्तेषां संबन्धः। तद्वायुसंबन्धात्तेषां संबन्धः, अमृताय मोक्षाय जायते। वै इति निश्चयेऽव्ययम्। मृतस्य प्राणवियुक्तस्यावस्था मृतावस्था समुत्पन्ना भवति। इडापिङ्गलयोः प्राणसंचाराभावात्। ततस्तदनन्तरं वायुं विरेचयेन्नासिकापुटाभ्यां शनैस्त्यजेत् ॥ २८ ॥

महावेधोऽयमभ्यासान्महासिद्धिप्रदायकः।
वलीपलितवेपघ्नः सेव्यते साधकोत्तमैः ॥ २९ ॥

महावेध इति। अयं महावेधोऽभ्यासात्पुनः पुनरावर्तनान्महासिद्धयोऽणिमाद्यास्तासां प्रदायकः प्रकर्षेण समर्पकः। वली जरया चर्मसंकोचः पलितं जरसा केशेषु शौक्ल्यं वेपः

कम्पस्तान्हन्तीति वलीपलितवेपघ्नः । अत एव साधकेष्वभ्यासिषूत्तमाः साधकोत्तमास्तैः सेव्यतेऽभ्यस्यत इत्यर्थः ॥२९॥

एतत्त्रयं महागुह्यं जरामृत्युविनाशनम् ।
वह्निवृद्धिकरं चैव ह्यणिमादिगुणप्रदम् ॥ ३० ॥

महामुद्रादीनां तिसृणामतिगोप्यत्वमाह—एतदिति । एतत्त्रयं महामुद्रादित्रयं महागुह्यमतिरहस्यम् । अत्र हेतुगर्भाणि विशेषणानि—हि यस्माज्जरा वार्द्धकं मृत्युश्चरमः प्राणदेहवियोगः तयोर्विशेषेण नाशनं वह्नेर्जाठरस्य वृद्धिर्दीप्तिस्तस्याः करं कर्तृ अणिमा आदिर्येषां तेऽणिमादयस्ते च ते गुणाश्च तान्प्रकर्षेण ददातीत्यणिमादिगुणप्रदम् । चकार आरोग्यबिन्दुजयादिसमुच्चयार्थः । एवशब्दोऽवधारणार्थः ॥ ३० ॥

अष्टधा क्रियते चैव यामे यामे दिने दिने ।
पुण्यसंभारसंधायि पापौघभिदुरं सदा ।
सम्यक्शिक्षावतामेवं स्वल्पं प्रथमसाधनम् ॥ ३१ ॥

अथैतत्त्रयस्य पृथक्साधनविशेषमाह—अष्टधेति । दिने दिने प्रतिदिनम् । यामे यामे प्रहरे प्रहरे । पौनःपुन्ये द्विर्वचनम् । अष्टभिः प्रकारैरष्टधा क्रियते । चशब्दोऽवधारणे । एतत्त्रयमित्यत्रापि संबध्यते । कीदृशम् ? पुण्यानां संभारः समूहस्तस्य

संधायि विधायि। पुनः कीदृशम्? पापानामोघः पूरः समूह इति यावत्। तस्य भिदुरं कुलिशमिव नाशनं सदा सर्वदा यदाऽभ्यस्तं तदैव पापनाशनम्। सम्यक् सांप्रदायिकी शिक्षा गुरूपदेशो विद्यते येषां ते तथा। एवं दिने दिने यामे यामेऽष्टधेत्युक्त-रीत्या पूर्वसाधनं स्वल्पस्वल्पमेव कार्यम् ॥ ३१ ॥

अथ खेचरी—

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ३२ ॥

खेचरीं विवक्षुरादौ तत्स्वरूपमाह—कपालेति। कपाले मूर्ध्नि कुहरं सुषिरं तस्मिन्कपालकुहरे विपरीतं प्रतीपं गच्छतीति विपरीतगा पराङ्मुखीभूता जिह्वा रसना स्यात्। भ्रुवोरन्तर्गता भ्रुवोर्मध्ये प्रविष्टा दृष्टिर्दर्शनं स्यात्। सा खेचरीमुद्रा भवति। कपालकुहरे जिह्वाप्रवेशपूर्वकं भ्रुवोरन्तर्दर्शनं खेचरीति लक्षणं सिद्धम् ॥ ३२ ॥

छेदनचालनदोहैः कलां क्रमेणाथ वर्धयेत्तावत्।
सा यावद् भ्रूमध्यं स्पृशति तदा खेचरीसिद्धिः ॥

खेचरीसिद्धेर्लक्षणमाह—छेदनेति। छेदनमनुपदमेव वक्ष्य-माणम्। चालनं हस्तयोरङ्गुष्ठतर्जनीभ्यां रसनां गृहीत्वा

सव्यापसव्यतः परिवर्तनम् । दोहः करयोरङ्गुष्ठतर्जनीभ्यां गोदोहनवत्तद्दोहनम् । तैः कलां जिह्वां तावद्वर्धयेद्दीर्घां कुर्यात् । तावत् । कियत् ? यावत्सा कला भ्रूमध्यं बहिर्भ्रुवोर्मध्यं स्पृशति । यदा तदा खेचर्याः सिद्धिः खेचरीसिद्धिर्भवति ॥२३॥

स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् ।
समादाय ततस्तेन रोममात्रं समुच्छिनेत् ॥ ३४ ॥

तत्साधनमाह—स्नुहीति । स्नुही गुडा तस्याः पत्रं दलं स्नुहीपत्रेण सदृशं स्नुहीपत्रनिभं सुतीक्ष्णमतितीक्ष्णं स्निग्धं च तन्निर्मलं च स्निग्धनिर्मलं शस्त्रं छेदनसाधनं समादाय सम्यगादाय गृहीत्वा ततः शस्त्रग्रहणानन्तरं तेन शस्त्रेण रोमप्रमाणं रोममात्रं समुच्छिनेत्सम्यगुच्छिनेच्छिन्द्यात् । रसना-मूलसिरामिति कर्माध्याहारः । 'मिश्रेयाऽप्यथ सीहुण्डो वज्रः स्नुक् स्त्री स्नुही गुडा' इत्यमरः ॥ ३४ ॥

ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रघर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥ ३५ ॥

ततश्छेदनानन्तरं चूर्णिताभ्यां चूर्णीकृताभ्यां सैन्धवं सिन्धु-देशोद्भवं लवणं पथ्यं हरीतकी ताभ्यां प्रघर्षयेत्प्रकर्षेण घर्षये-च्छिन्नं सिराप्रदेशम् । सप्तदिनपर्यन्तं छेदनं सैन्धवपथ्याभ्यां घर्षणं च सायंप्रातर्विधेयम् । योगाभ्यासिनो लवणनिषे-

धात्वदिरपथ्याचूर्णं गृह्णन्ति । मूले सैन्धवोक्तिस्तु हठाभ्यासात्पूर्वं खेचरीसाधनाभिप्रायेण । सप्तानां दिनानां समाहारः सप्तदिनं तस्मिन् प्राप्ते गते सति अष्टमे दिन इत्यर्थात् । ये प्राप्त्यर्थास्ते गत्यर्थाः । पूर्वं छेदनापेक्षयाऽधिकं रोममात्रं समुच्छिनेत् ॥ ३५ ॥

एवं क्रमेण षण्मासं नित्यं युक्तः समाचरेत् ।
षण्मासाद्रसनामूलसिराबन्धः प्रणश्यति ॥ ३६ ॥

एवमिति । एवं क्रमेण पूर्वं रोममात्रच्छेदनं सप्तदिनपर्यन्तं तावदेव सायंप्रातश्छेदनं घर्षणं च । अष्टमे दिनेऽधिकं छेदनमित्युक्तक्रमेण षण्मासं षण्मासपर्यन्तं नित्यं युक्तः सन् समाचरेत्सम्यगाचरेत् । छेदनघर्षणे इति कर्माध्याहारः । षण्मासादनन्तरं रसना जिह्वा तस्या मूलमधोभागो रसनामूलं तत्र या सिरा कपालकुहररसनासंयोगप्रतिबन्धकीभूता नाडी तया बन्धो बन्धनं प्रणश्यति प्रकर्षेण नश्यति ॥ ३६ ॥

कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत् ।
सा भवेत्खेचरी मुद्रा व्योमचक्रं तदुच्यते ॥ ३७ ॥

छेदनादिना जिह्वावृद्धौ यत्कर्तव्यं तदाह—कलामिति । कलां जिह्वां पराङ् मुखमास्यं यस्याः सा तथा तां पराङ्मुखीं

प्रत्यङ्मुखीं कृत्वा तिसृणां नाडीनां पन्थाः त्रिपथस्तस्मिन् त्रिपथे कपालकुहरे परियोजयेत्संयोजयेत् । सा त्रिपथे परियोजनरूपा खेचरी मुद्रा तद्व्योमचक्रमित्युच्यते व्योम-चक्रशब्देनोच्यते ॥ ३७ ॥

रसनामूर्ध्वगां कृत्वा क्षणार्धमपि तिष्ठति ।
विषैर्विमुच्यते योगी व्याधिमृत्युजरादिभिः ॥ ३८ ॥

अथ खेचरीगुणाः—रसनामिति । ऊर्ध्वं तालूपरि विवरं गच्छतीति तां तादृशीं रसनां जिह्वां कृत्वा क्षणार्धं क्षणस्य मुहूर्तस्य अर्धं क्षणार्धं घटिकामात्रमपि खेचरी मुद्रा तिष्ठति चेत्तर्हि योगी विषैः सर्पवृश्चिकादिविषैर्विमुच्यते विशेषेण मुच्यते । व्याधिर्धातुवैषम्यं मृत्युश्चरमः प्राणदेहवियोगो जरा वृद्धावस्था ता आदयो येषां वल्यादीनां तैश्च विमुच्यते । 'उत्सवे च प्रकोष्ठे च मुहूर्ते नियमे तथा । क्षणशब्दो व्यवस्थायां समयेऽपि निगद्यते ॥' इति नानार्थः ॥ ३८ ॥

न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा ।
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ॥

न रोग इति । यः खेचरीं मुद्रां वेत्ति तस्य रोगो न मरणं न तन्द्रा तामसान्तःकरणवृत्तिविशेषः न निद्रा न

क्षुधा न तृषा पिपासा न मूर्च्छा चित्तस्य तमसाऽभिभूतावस्थाविशेषश्च न भवेत् ॥ ३९ ॥

पीड्यते न स रोगेण लिप्यते न च कर्मणा ।
बाध्यते न स कालेन यो मुद्रां वेत्ति खेचरीम् ॥

पीड्यत इति । यः खेचरीं मुद्रां वेत्ति स रोगेण ज्वरादिना न योज्यते ॥ ४० ॥

चित्तं चरति खे यस्माज्जिह्वा चरति खे गता ।
तेनैषा खेचरी नाम मुद्रा सिद्धैर्निरूपिता ॥ ४१ ॥

चित्तमिति । यस्माद्धेतोश्चित्तमन्तःकरणं खे भ्रुवोरन्तरवकाशे चरति जिह्वा खे तत्रैव गता सती चरति । तेन हेतुना एषा कथिता मुद्रा खेचरी नाम खेचरीति प्रसिद्धा । नामेति प्रसिद्धावव्ययम् । सिद्धैः कपिलादिभिर्निरूपिता । खे भ्रुवोरन्तर्व्योम्नि चरति गच्छति चित्तं जिह्वा च यस्यां सा खेचरीत्यवयवशः सा व्युत्पादिता । उक्तेषु त्रिषु श्लोकेषु व्याध्यादीनां पुनरुक्तिस्तु तेषां श्लोकानां संगृहीतत्वान्न दोषाय ॥ ४१ ॥

खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।
न तस्य क्षरते बिन्दुः कामिन्याऽऽश्लेषितस्य च ॥

खेचर्येति । येन योगिना खेचर्या मुद्रया लम्बिकाया ऊर्ध्वमिति लम्बिकोर्ध्वतः । 'सार्वविभक्तिकस्तसिः' । लम्बिका तालु तस्या ऊर्ध्वत उपरिभागे स्थितं विवरं छिद्रं मुद्रितं पिहितम् । कामिन्या युवत्याऽऽश्लेषितस्यालिङ्गितस्यापि । चशब्दोऽप्यर्थे । तस्य बिन्दुर्वीर्यं न क्षरते न स्खलति ॥ ४२ ॥

चलितोऽपि यदा बिन्दुः संप्राप्तो योनिमण्डलम् ।
व्रजत्यूर्ध्वं हृतः शक्त्या निबद्धो योनिमुद्रया ॥४३॥

चलित इति । चलितोऽपि स्खलितोऽपि बिन्दुर्यदा यस्मिन् काले योनिमण्डलं योनिस्थानं संप्राप्तः संगतस्तदैव योनिमुद्रया मेढ्राकुञ्चनरूपया । एतेन वज्रोली मुद्रा सूचिता । निबद्धो नितरां बद्धः शक्त्याऽऽकर्षणशक्त्या हृतः प्रकृष्ट ऊर्ध्वं व्रजति । सुषुम्णामार्गेण बिन्दुस्थानं गच्छति ॥ ४३ ॥

ऊर्ध्वजिह्वः स्थिरो भूत्वा सोमपानं करोति यः ।
मासार्धेन न संदेहो मृत्युं जयति योगवित् ॥ ४४ ॥

ऊर्ध्वजिह्व इति । ऊर्ध्वा लम्बिकोर्ध्वविवरोन्मुखा जिह्वा यस्य स ऊर्ध्वजिह्वः स्थिरो निश्चलो भूत्वा । सोमस्य लम्बिकोर्ध्व-विवरगलितचन्द्रामृतस्य पानं सोमपानं यः पुमान् करोति । योगं वेत्तीति योगवित् स मासस्यार्धं मासार्धं तेन मासार्धेन

पक्षेण मृत्युं मरणं जयति अभिभवति। न संदेहः, निश्चितमेतदित्यर्थः ॥ ४४ ॥

नित्यं सोमकलापूर्णं शरीरं यस्य योगिनः।
तक्षकेणापि दष्टस्य विषं तस्य न सर्पति ॥ ४५ ॥

नित्यमिति। यस्य योगिनः शरीरं नित्यं प्रतिदिनं सोमकलापूर्णं चन्द्रकलामृतपूर्णं तस्य तक्षकेण सर्पविशेषेणापि दष्टस्य दंशितस्य योगिनः शरीरे विषं गरलं तज्जन्यं दुःखं न सर्पति न प्रसरति ॥ ४५ ॥

इन्धनानि यथा वह्निस्तैलवर्त्तिं च दीपकः।
तथा सोमकलापूर्णं देही देहं न मुञ्चति ॥ ४६ ॥

यथा वह्निः इन्धनानि काष्ठादीनि न मुञ्चति दीपको दीपः तैलवर्त्तिं च तैलयुक्तां वर्त्तिं न मुञ्चति। तथा सोमकलापूर्णं चन्द्रकलामृतापूर्णं देहं शरीरं देही जीवो न मुञ्चति न त्यजति ॥ ४६ ॥

गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम्।
कुलीनं तमहं मन्य इतरे कुलघातकाः ॥ ४७ ॥

गोमांसमिति। गोमांसं पारिभाषिकं वक्ष्यमाणं यो भक्षयेन्नित्यं प्रतिदिनममरवारुणीमपि वक्ष्यमाणां पिबेत्तं योगिनम्। अहमिति ग्रन्थकारोक्तिः। कुले जातः कुलीनः तं

सत्कुलोत्पन्नं मन्ये । तदुक्तं ब्रह्मवैवर्ते—'कृतार्थौ पितरौ तेन धन्यो देशः कुलं च तत् । जायते योगवान् यत्र दत्तमक्षय्यतां व्रजेत् ॥ दृष्टः संभाषितः स्पृष्टः पुंप्रकृत्योर्विवेकवान् । भवकोटिशतापातं पुनाति वृजिनं नृणाम्' । ब्रह्माण्डपुराणे—'गृहस्थानां सहस्रेण वानप्रस्थशतेन च । ब्रह्मचारिसहस्रेण योगाभ्यासी विशिष्यते' । राजयोगे वामदेवं प्रति शिववाक्यम्—'राजयोगस्य माहात्म्यं को विजानाति तत्त्वतः । तज्ज्ञानी वसते यत्र स देशः पुण्यभाजनम् ॥ दर्शनादर्चनादस्य त्रिसप्तकुलसंयुताः । अज्ञा मुक्तिपदं यान्ति किं पुनस्तत्परायणाः ॥ अन्तर्योगं बहिर्योगं यो जानाति विशेषतः । त्वया मयाऽप्यसौ बन्धः शेषैर्वन्द्यस्तु किं पुनः ॥' इति । कूर्मपुराणे—'एककालं द्विकालं वा त्रिकालं नित्यमेव वा । ये युञ्जते महायोगं विज्ञेयास्ते महेश्वराः ॥' इति । इतरे वक्ष्यमाणगोमांसभक्षणामरवारुणीपानरहिता अयोगिनस्ते कुलघातकाः कुलनाशकाः, सत्कुले जातस्य जन्मनो वैयर्थ्यात् ॥ ४७ ॥

गोशब्देनोदिता जिह्वा तत्प्रवेशो हि तालुनि ।
गोमांसभक्षणं तत्तु महापातकनाशनम् ॥ ४८ ॥

गोमांसशब्दार्थमाह—गोशब्देनेति । गोशब्देन गोइत्याकारकेण शब्देन गोपदेनेत्यर्थः । जिह्वा रसनोदिता कथिता ।

तालुनीति सामीपिकाधारे सप्तमी। तालुसमीपोर्ध्वविवरे तस्या जिह्वायाः प्रवेशो गोमांसभक्षणं गोमांसभक्षणशब्दवाच्यं तत्तु तादृशं गोमांसभक्षणं तु महापातकानां स्वर्णस्तेयादीनां नाशनम् ॥ ४८ ॥

जिह्वाप्रवेशसंभूतवह्निनोत्पादितः खलु।
चन्द्रात्स्रवति यः सारः सा स्यादमरवारुणी ॥ ४९ ॥

अमरवारुणीशब्दार्थमाह—जिह्वेति। जिह्वायाः प्रवेशो लम्बिकोर्ध्वविवरे प्रवेशनं तस्मात्संभूतो यो वह्निरूष्मा तेनोत्पादितो निष्पादितः। अत्र वह्निशब्देनौष्ण्यमुपलक्ष्यते। यः सारः चन्द्राद् भ्रुवोरन्तर्वामभागस्थात्सोमात्स्रवति गलति सा अमरवारुणी स्यादमरवारुणीपदवाच्या भवेत् ॥ ४९ ॥

चुम्बन्ती यदि लम्बिकाग्रमनिशं जिह्वारसस्यन्दिनी
सक्षारा कटुकाम्लदुग्धसदृशी मध्वाज्यतुल्या तथा।
व्याधीनां हरणं जरान्तकरणं शस्त्रागमोदीरणं
तस्य स्यादमरत्वमष्टगुणितं सिद्धाङ्गनाकर्षणम् ॥५०॥

चुम्बन्तीति। यदि चेल्लम्बिकाग्रं लम्बिकोर्ध्वविवरं चुम्बन्ती स्पृशन्ती। अनिशं निरन्तरम्। अत एव रसस्य सोमकलामृतस्य स्यन्दः स्यन्दनं प्रस्रवणमस्यामस्तीति रसस्यन्दिनी यस्य जिह्वा। क्षारेण लवणरसेन सहिता सक्षारा कटुकं मरिचादि

अम्लं चिञ्चाफलादि दुग्धं पयस्तैः सदृशी समाना। मधु क्षौद्रमाज्यं घृतं ताभ्यां तुल्या समा। तथाशब्दः समुच्चये। एतैर्विशेषणै रसस्यानेकरसत्वान्मधुरत्वात्स्निग्धत्वाच्च जिह्वाया अपि रसस्यन्दने तथात्वमुक्तम्। तर्हि तस्य व्याधीनां रोगाणां हरणमपगमो जराया वृद्धावस्थाया अन्तकरणं नाशनं शस्त्राणामायुधानामागमः स्वाभिमुखागमनं तस्योदीरणं निवारणम्। अष्टौ गुणा अणिमादयस्ते अस्य संजाता इत्यष्टगुणितममरत्वममरभावः सिद्धानामङ्गनाः सिद्धाङ्गनाः सिद्धाश्च ता अङ्गनाश्चेति वा तासामाकर्षणमाकर्षणशक्तिः स्यात् ॥ ५० ॥

मूर्ध्नः षोडशपत्रपद्मगलितं प्राणादवाप्तं हठा-
दूर्ध्वास्यो रसनां नियम्य विवरे शक्तिं परां चिन्तयन्।
उत्कल्लोलकलाजलं च विमलं धारामयं यः पिबे-
न्निर्व्याधिः स मृणालकोमलवपुर्योगी चिरं जीवति॥

मूर्ध्न इति। रसनां जिह्वां विवरे कपालकुहरे नियम्य संयोज्य। उर्ध्वमुत्तानमास्यं यस्य सः। ऊर्ध्वास्य इत्यनेन विपरीतकरणी सूचिता। परां शक्तिं कुण्डलिनीं चिन्तयन् ध्यायन्सन् प्राणात्साधनभूतात्। षोडश पत्राणि दलानि यस्य तत् षोडशपत्रं तच्च तत्पद्मं कण्ठस्थाने वर्तमानं तस्मिन् गलितं हठाद्धठयोगादवाप्तं प्राप्तं विमलं निर्मलं धारामयं

धारारूपमुत्कल्लोलमुत्तरङ्गं च तत्कलाजलं सोमकलारसं यः पुमान् पिबेत् धयेत्स योगी निर्गता व्याधयो ज्वरादयो यस्मात्स निर्व्याधिः सन् यद्वा निर्गता विविधा आधिर्मानसी व्यथा यस्मात्स तादृशः सन् मृणालं बिसमिव कोमलं मृदु वपुः शरीरं यस्य स मृणालकोमलवपुश्च सन् चिरं दीर्घकालं जीवति प्राणान्धारयति । हठाद्धठयोगात् । प्राणात्साधनभूता-द्वाप्तमिति वा योजना । प्राणैरिति क्वचित्पाठः ॥ ५१ ॥

यत्प्रालेयप्रहितसुषिरं मेरुमूर्धान्तरस्थं
तस्मिंस्तत्त्वं प्रवदति सुधीस्तन्मुखं निम्नगानाम् ।
चन्द्रात्सारः स्रवति वपुषस्तेन मृत्युर्नराणां
तद्बध्नीयात्सुकरणमतो नान्यथा कायसिद्धिः ॥५२॥

यत्प्रालेयेति । मेरुवत्सर्वोन्नता सुषुम्णा मेरुस्तस्य मूर्धो-परिभागस्तस्यान्तरे मध्ये तिष्ठतीति मेरुमूर्धान्तरस्थं यत्प्रालेयं सोमकलाजलं प्रहितं निहितं यस्मिंस्तत्तथा तच्च तत्सुषिरं विवरम् , तस्मिन्विवरे सुधीः शोभना रजस्तमोभ्यामनभिभूतसत्त्वा धीर्बुद्धिर्यस्य सः । तत्त्वमात्मतत्त्वं प्रवदति प्रकर्षेण वदति । 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः' इति श्रुतेः । आत्मनो विभुत्वे खेचरीमुद्रायां तत्राभिव्यक्तिस्तस्मिंस्तत्त्व-मित्युक्तम् । निम्नगानां गङ्गायमुनासरस्वतीनर्मदादिशब्दवाच्या-

नामिडापिङ्गलासुषुम्णागांधारीप्रभृतीनां तत्तस्मिन्विवरे तत्समीपे मुखमग्रमस्ति चन्द्रात्सोमाद्वपुषः शरीरस्य सारः स्रवति क्षरति तेन चन्द्रसारक्षरणेन नराणां मनुष्याणां मृत्युर्मरणं भवति । अतो हेतोस्तत्पूर्वोदितं सुकरणं शोभनं करणं खेचरीमुद्राख्यं बध्नीयात् । सुकरणे बद्धे चन्द्रसारस्रवणाभावान्मृत्युर्न स्यादिति भावः । अन्यथा सुकरणबन्धनाभावे कायस्य देहस्य सिद्धी रूपलावण्यबलवज्रसंहननरूपा न स्यात् ॥ ५२ ॥

सुषिरं ज्ञानजनकं पञ्चस्रोतःसमन्वितम् ।
तिष्ठते खेचरी मुद्रा तस्मिञ्शून्ये निरञ्जने ॥ ५३ ॥

सुषिरमिति । पञ्च यानि स्रोतांसीडादीनां प्रवाहास्तैः समन्वितं सम्यगनुगतम् । सप्तस्रोतःसमन्वितमिति क्वचित्पाठः । ज्ञानजनकमलौकिकबोधितात्मसाक्षात्कारजनकं यत्सुषिरं विवरं तस्मिन्सुषिरेऽञ्जनमविद्या तत्कार्यं शोकमोहादि च निर्गतं यस्मात्त-न्निरञ्जनं तस्मिन्निरञ्जने शून्ये सुषिरावकाशे खेचरी मुद्रा तिष्ठते स्थिरीभवति । 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम् ॥५३॥

एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी ।
एको देवो निरालम्ब एकाऽवस्था मनोन्मनी ॥५४॥

एकमिति । सृष्टिमयं सृष्टिरूपं प्रणवाख्यं बीजमेकं मुख्यम् । तदुक्तं माण्डूक्योपनिषदि—'ओमित्येतदक्षरमिदं

सर्वम्' इति। खेचरी मुद्रा एका मुख्या। निरालम्ब आलम्बनशून्य एको मुख्यो देवः, आलम्बनपरित्यागेनात्मनः स्वरूपावस्थानात्। उन्मन्यवस्थैका मुख्या। 'एके मुख्यान्यकेवलाः' इत्यमरः। बीजादिषु प्रणवादिवन्मुद्रासु खेचरी मुख्येत्यर्थः ॥ ५४ ॥

अथोड्डीयानबन्धः—

बद्धो येन सुषुम्णायां प्राणस्तूड्डीयते यतः।
तस्मादुड्डीयनाख्योऽयं योगिभिः समुदाहृतः ॥५५॥

उड्डीयानबन्धं विवक्षुस्तावदुड्डीयानशब्दार्थमाह—बद्ध इति। यतो यस्माद्धेतोर्येन बन्धेन बद्धो निरुद्धः प्राणः सुषुम्णायां मध्यनाड्यामुड्डीयते सुषुम्णां विहायसा गच्छति तस्मात्कारणादयं बन्धो योगिभिर्मत्स्येन्द्रादिभिरुड्डीयनमाख्याऽभिधा यस्य स उड्डीयनाख्यः समुदाहृतः सम्यग्व्युत्पत्त्योदाहृतः कथितः। सुषुम्णायामुड्डीयतेऽनेन बद्धः प्राण इत्युड्डीयनम्। उत्पूर्वात् 'डीङ् विहायसा गतौ' इत्यस्मात्करणे ल्युट् ॥ ५५ ॥

उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः।
उड्डीयानं तदेव स्यात्तत्र बन्धोऽभिधीयते ॥ ५६ ॥

उड्डीनमिति। महांश्चासौ खगश्च महाखगः प्राणः। सर्वदा देहावकाशे गतिमत्त्वात्। यस्माद्बन्धादविश्रान्तं यथा स्यात्तथोड्डीनं विहंगमगतिं कुरुते। सुषुम्णायामित्यध्याहार्यम्। तदेव बन्धविशेषमुड्डीयाननामकं स्यात्। तत्र तस्मिन्विषये बन्धोऽभिधीयते बन्धस्वरूपं कथ्यते मयेति शेषः ॥ ५६ ॥

उदरे पश्चिमं तानं नाभेरूर्ध्वं च कारयेत्।
उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेसरी ॥ ५७ ॥

उड्डीयानबन्धमाह—उदर इति। उदरे तुन्दे नाभेरूर्ध्वं चकारादधः उपरिभागेऽधोभागे च पश्चिमं तानं पश्चिममाकर्षणं नाभेरूर्ध्वाधोभागौ यथा पृष्ठसंलग्नौ स्यातां तथा तानंताननं नामाकर्षणं कारयेत्कुर्यात्। णिजर्थोऽविवक्षितः। असौ नाभेरूर्ध्वाधोभागयोस्ताननरूप उड्डीयान उड्डीयानाख्यो बन्धः। कीदृशः? मृत्युरेव मातङ्गो गजस्तस्य केसरी सिंहः सिंह इव निवर्तकः ॥ ५७ ॥

उड्डीयानं तु सहजं गुरुणा कथितं सदा।
अभ्यसेत्सततं यस्तु वृद्धोऽपि तरुणायते ॥ ५८ ॥

उड्डीयानं त्विति। गुरुर्हितोपदेष्टा तेन गुरुणा उड्डीयानं

सर्वदा सर्वस्यैव जायमानत्वात् । यस्तु यः पुरुषस्तु सततं निरन्तरमभ्यसेत् । उड्डीयानमित्यत्रापि संबध्यते । स तु वृद्धोऽपि स्थविरोऽपि तरुणायते तरुण इवाचरति तरुणायते ॥

नाभेरूर्ध्वमधश्चापि तानं कुर्यात्प्रयत्नतः ।
षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः ॥ ५९ ॥

नाभेरिति । नाभेरूर्ध्वमुपरिभागेऽधश्चाप्यधोभागेऽपि प्रयत्नतः प्रकृष्टो यत्नः प्रयत्नस्तस्मात्प्रयत्नतः । यत्नविशेषात्तानं पश्चिमतानं कुर्यात् । पूर्वार्धेनोड्डीयानस्वरूपमुक्तम् । अथ तत्प्रशंसा । षण्मासं षण्मासपर्यन्तम् । उड्डीयानमित्यध्याहारः । अभ्यसेत्पुनः पुनरनुतिष्ठेत् । स मृत्युं जयत्येव संशयो न । अत्र संदेहो नास्तीत्यर्थः ॥ ५९ ॥

सर्वेषामेव बन्धानामुत्तमो ह्युड्डियानकः ।
उड्डियाने दृढे बन्धे मुक्तिः स्वाभाविकी भवेत् ॥६०॥

सर्वेषामिति । सर्वेषां बन्धानां मध्ये उड्डियानकः उड्डियानबन्ध एव । स्वार्थे कप्रत्ययः । उत्तमः उत्कृष्टः हि यस्मादुड्डियाने बन्धे दृढे सति स्वाभाविकी स्वभावसिद्धैव मुक्तिर्भवेत् । उड्डियानबन्धे कृते विहंगमगत्या सुषुम्णायां प्राणस्य मूर्ध्नि गमनात् ‘ समाधौ मोक्षमाप्नोति ’ इति वाक्यात्सहजैव मुक्तिः स्यादिति भावः ॥ ६० ॥

अथ मूलबन्धः—

पार्ष्णिभागेन संपीड्य योनिमाकुञ्चयेद् गुदम् ।
अपानमूर्ध्वमाकृष्य मूलबन्धोऽभिधीयते ॥ ६१ ॥

मूलबन्धमाह—पार्ष्णिभागेनेति । पार्ष्णेर्भागो गुल्फयोरधः-प्रदेशस्तेन योनिं योनिस्थानं गुदमेढ्रयोर्मध्यभागं संपीड्य सम्यक् पीडयित्वा गुदं पायुमाकुञ्चयेत् । अपानमधोगतिं वायुमूर्ध्वमुपर्याकृष्याकृष्टं कृत्वा मूलबन्धोऽभिधीयते कथ्यते । पार्ष्णिभागेन योनिस्थानसंपीडनपूर्वकं गुदस्याकुञ्चनं मूलबन्ध इत्युच्यत इत्यर्थः ॥ ६१ ॥

अधोगतिमपानं वा ऊर्ध्वगं कुरुते बलात् ।
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिनः ॥ ६२ ॥

अधोगतिमिति । यः अधोगतिमधोऽर्वाग्गतिर्यस्य स तथा तमपानमपानवायुमाकुञ्चनेन मूलाधारस्य संकोचनेन बलाद्धठादूर्ध्वं गच्छतीत्यूर्ध्वगस्तमूर्ध्वगं सुषुम्णायामूर्ध्वगमनशीलं कुरुते । वै इति निश्चयेऽव्ययम् । योगिनो योगाभ्यासिनस्तं मूलबन्धं मूलस्य मूलस्थानस्य बन्धनं मूलबन्धस्तं मूलबन्धमित्यन्वर्थं प्राहुः । अनेन मूलबन्धशब्दार्थ उक्तः । पूर्वश्लोकेन तु तस्य बन्धनप्रकार

गुदं पार्ष्ण्या तु संपीड्य वायुमाकुञ्चयेद्बलात् ।
वारं वारं यथा चोर्ध्वं समायाति समीरणः ॥ ६३ ॥

अथ योगबीजोक्तरीत्या मूलबन्धमाह—गुदमिति । पार्ष्ण्यो-र्गुल्फयोरधोभागेन गुदं वायुं संपीड्य सम्यक् पीडयित्वा संयोज्येत्यर्थः । तुशब्दः पूर्वस्मादस्य विशेषत्वद्योतकः । यथा येन प्रकारेण समीरणो वायुरूर्ध्वं सुषुम्णाया उपरिभागे याति गच्छति तथा तेन प्रकारेण बलाद्धठाद्वारं वारं पुनःपुनर्वायुम-पानमाकुञ्चयेद्गुदस्याकुञ्चनेनाकर्षयेत् । अयं मूलबन्ध इति वाक्याध्याहारः ॥ ६३ ॥

प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् ।
गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः ॥६४॥

अथ मूलबन्धगुणानाह—प्राणापानाविति । प्राणश्चापानश्च प्राणापानावूर्ध्वाधोगती वायू । नादोऽनाहतध्वनिः बिन्दुरनु-स्वारस्तौ मूलबन्धेनैकतां गत्वैकीभूय योगस्य संसिद्धिः सम्यक् सिद्धिस्तां योगसिद्धिं यच्छतो ददतः । अभ्यासिन इति शेषः । अत्रास्मिन्नर्थे संशयो न, संदेहो नास्तीत्यर्थः । अयं भावः—मूलबन्धे कृतेऽपानः प्राणेन सहैकीभूय सुषुम्णायां प्रविशति । ततो नादाभिव्यक्तिर्भवति । ततो नादेन सह

प्राणापानौ हृदयोपरि गत्वा नादस्य बिन्दुना सहैक्यं बिन्दुनाऽऽधाय मूर्ध्नि गच्छतः । ततो योगसिद्धिः ॥ ६४ ॥

अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः ।
युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ॥ ६५ ॥

अपानप्राणयोरिति । सततं मूलबन्धनान्मूलबन्धमुद्राकरणादपानप्राणयोरैक्यं भवति । मूत्रपुरीषयोः संचितयोः क्षयः पतनं भवति । वृद्धोऽपि स्थविरोऽपि युवा तरुणो भवति ॥ ६५ ॥

अपान ऊर्ध्वगे जाते प्रयाते वह्निमण्डलम् ।
तदाऽनलशिखा दीर्घा जायते वायुनाऽऽहता ॥६६॥

अपान इति । मूलबन्धनादपाने अधोगमनशीले वायौ ऊर्ध्वगे ऊर्ध्वं गच्छतीत्यूर्ध्वगस्तस्मिंस्तादृशे सति वह्निमण्डलं वह्नेर्मण्डलं त्रिकोणं नाभेरधोभागेऽस्ति । तदुक्तं याज्ञवल्क्येन— 'देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम् । त्रिकोणं तु मनुष्याणां चतुरस्रं चतुष्पदाम् ॥ मण्डलं तु पतङ्गानां सत्यमेतद्ब्रवीमि ते । तन्मध्ये तु शिखा तन्वी सदा तिष्ठति पावके ॥' इति । तदा तस्मिन् काले वायुना अपानेनाहता संगता सत्यनलशिखा जठराग्निशिखा दीर्घा आयता जायते ।

ततो यातो वह्न्यपानौ प्राणमुष्णस्वरूपकम् ।
तेनात्यन्तप्रदीप्तस्तु ज्वलनो देहजस्तथा ॥ ६७ ॥

तत इति । ततस्तदनन्तरं वह्निश्चापानश्च वह्न्यपानौ । उष्णं स्वरूपं यस्य स तथा तमनलं शिखादैर्घ्यादुष्णस्वरूपं प्राणमूर्ध्वगतिमनिलं यातो गच्छतः । ततोऽनलशिखादैर्घ्या-दुष्णस्वरूपकादिति वा योजना । तेन प्राणसंगमनेन देहे जातो देहजो ज्वलनोऽग्निरत्यन्तमधिकं दीप्तो भवति । तथेति पादपूरणे । अपानस्योर्ध्वगमने दीप्त एव ज्वलनः प्राण-संगत्याऽत्यन्तं प्रदीप्तो भवतीत्यर्थः ॥ ६७ ॥

तेन कुण्डलिनी सुप्ता संतप्ता संप्रबुध्यते ।
दण्डाहता भुजंगीव निःश्वस्य ऋजुतां व्रजेत् ॥ ६८ ॥

तेनेति । तेन ज्वलनस्यात्यन्तं प्रदीपनेन संतप्ता सम्यक् तप्ता सती सुप्ता निद्रिता कुण्डलिनी शक्तिः संप्रबुध्यते सम्यक् प्रबुद्धा भवति । दण्डेनाहता दण्डाहता चासौ भुजंगीव सर्पिणीव निःश्वस्य निःश्वासं कृत्वा ऋजुतां सरलतां व्रजेद्गच्छेत् ॥ ६८ ॥

बिलं प्रविष्टेव ततो ब्रह्मनाड्यन्तरं व्रजेत् ।
तस्मान्नित्यं मूलबन्धः कर्तव्यो योगिभिः सदा ॥

बिलं प्रविष्टेति । ततः ऋजुताप्राप्त्यनन्तरं बिलं विवरं प्रविष्टा भुजंगीव ब्रह्मनाडी सुषुम्णा तस्या अन्तरं मध्यं

गच्छेत्तस्माद्धेतोर्योगिभिर्योगाभ्यासिभिर्मूलबन्धो नित्यं प्रतिदिनं सदा सर्वस्मिन्काले कर्तव्यः कर्तुं योग्यः ॥ ६९ ॥

अथ जालंधरबन्धः—

कण्ठमाकुञ्च्य हृदये स्थापयेच्चुबुकं दृढम् ।
बन्धो जालंधराख्योऽयं जरामृत्युविनाशकः ॥ ७० ॥

जालंधरबन्धमाह—कण्ठमिति । कण्ठे गले बिलमाकुञ्च्य हृदये वक्षःसमीपे चतुरङ्गुलान्तरितप्रदेशे चुबुकं हनुं दृढं स्थिरं स्थापयेत् स्थितं कुर्यात् । अयं कण्ठाकुञ्चनपूर्वकं चतुरङ्गुलान्तरितहृदयसमीपेऽधोनमनयत्नपूर्वकं चुबुकस्थापनरूपो जालंधर इत्याख्या यत इति जालंधराख्यो जालंधरनामा बन्धः । कीदृशः ? जरा वृद्धावस्था मृत्युर्मरणं तयोर्विनाशको विशेषेण नाशयतीति विनाशको विनाशकर्ता ॥ ७० ॥

बध्नाति हि सिराजालमधोगामि नभोजलम् ।
ततो जालंधरो बन्धः कण्ठदुःखौघनाशनः ॥ ७१ ॥

जालंधरपदस्यार्थमाह—बध्नातीति । हि यस्मात्सिराणां नाडीनां जालं समुदायं बध्नाति । अधो गन्तुं शीलमस्येत्यधोगामी नभसः कपालकुहरस्य जलममृतं च बध्नाति प्रतिबध्नाति । ततस्तस्माज्जालंधरो जालंधरनामकोऽन्वर्थो बन्धः जालं दशाजालं जलानां समूहो जालं धरतीति जालंधरः । कीदृशः ?

कण्ठे गलप्रदेशे यो दुःखौघो विकारजातो दुःखसमूहस्तस्य नाशनो नाशकर्ता ॥ ७१ ॥

जालंधरे कृते बन्धे कण्ठसंकोचलक्षणे ।
न पीयूषं पतत्यग्नौ न च वायुः प्रकुप्यति ॥ ७२ ॥

जालंधरगुणानाह—जालंधर इति । कण्ठस्य गलबिलस्य संकोचनं संकोच आकुञ्चनं तदेव लक्षणं स्वरूपं यस्य स कण्ठसंकोचलक्षणः तस्मिन् तादृशे जालंधरे जालंधरसंज्ञके बन्धे कृते सति पीयूषममृतमग्नौ जाठरेऽनले न पतति न सरति । वायुश्च प्राणश्च न कुप्यति नाड्यन्तरे वायोर्गमनं प्रकोपस्तं न करोतीत्यर्थः ॥ ७२ ॥

कण्ठसंकोचनेनैव द्वे नाड्यौ स्तम्भयेद् दृढम् ।
मध्यचक्रमिदं ज्ञेयं षोडशाधारबन्धनम् ॥ ७३ ॥

कण्ठसंकोचनेनेति । दृढं गाढं कण्ठसंकोचनेनैव कण्ठसंकोचनमात्रेण द्वे नाड्यौ इडापिङ्गले स्तम्भयेदयं जालंधर इति कर्तृपदाध्याहारः । इदं कण्ठस्थाने स्थितं विशुद्ध्याख्यं चक्रं मध्यचक्रं मध्यमं चक्रं ज्ञेयम् । कीदृशम् ? षोडशाधारबन्धनं षोडशसंख्याका ये आधारा अङ्गुष्ठाधारादिब्रह्मरन्ध्रान्तास्तेषां बंन्धनं बन्धनकारकम् । ‘ अङ्गुष्ठगुल्फजानूरुसीवनीलिङ्गनाभयः । हृद् ग्रीवा कण्ठदेशश्च लम्बिका नासिका तथा ॥

भ्रूमध्यं च ललाटं च मूर्धा च ब्रह्मरन्ध्रकम् । एते हि षोडशाधाराः कथिता योगिपुंगवैः ' ॥ तेष्वाधारेषु धारणायाः फलविशेषस्तु गोरक्षसिद्धान्तादवगन्तव्यः ॥ ७३ ॥

मूलस्थानं समाकुञ्च्य उड्डियानं तु कारयेत् ।
इडां च पिङ्गलां बद्ध्वा वाहयेत्पश्चिमे पथि ॥७४॥

उक्तस्य बन्धत्रयस्योपयोगमाह—मूलस्थानमिति । मूलस्थानमाधारभूतमाधारस्थानं समाकुञ्च्य सम्यगाकुञ्च्य उड्डियानं नाभेः पश्चिमतानरूपं बन्धं कारयेत्कुर्यात् । णिजर्थोऽविवक्षितः । इडां पिङ्गलां गङ्गां यमुनां च बद्ध्वा । जालंधरबन्धेनेत्यर्थः, 'कण्ठसंकोचनेनैव द्वे नाड्यौ स्तम्भयेत्' इत्युक्तेः । पश्चिमे पथि सुषुम्णामार्गे वाहयेद्गमयेत्प्राणमितिशेषः ॥ ७४ ॥

अनेनैव विधानेन प्रयाति पवनो लयम् ।
ततो न जायते मृत्युर्जरारोगादिकं तथा ॥ ७५ ॥

अनेनेति । अनेनैवोक्तेनैव विधानेन पवनः प्राणो लयं स्थैर्यं प्रयाति । गत्यभावपूर्वकं रन्ध्रे स्थितिः प्राणस्य लयः । ततः प्राणस्य लयान्मृत्युर्जरारोगादिकम् । तथा चार्थे । न जायते नोद्भवति । आदिपदेन वलीपलिततन्द्रालस्यादिकं ग्राह्यम् ॥ ७५ ॥

बन्धत्रयमिदं श्रेष्ठं महासिद्धैश्च सेवितम् ।
सर्वेषां हठतन्त्राणां साधनं योगिनो विदुः ॥ ७६ ॥

बन्धत्रयमिति । इदं पूर्वोक्तं बन्धत्रयं श्रेष्ठं षोडशाधार-बन्धेऽतिप्रशस्तं महासिद्धैर्मत्स्येन्द्रादिभिश्चकाराद्वसिष्ठादिमुनिभिः सेवितं सर्वेषां हठतन्त्राणां हठोपायानां साधनं सिद्धिजनकं योगिनो गोरक्षाद्या विदुर्जानन्ति ॥ ७६ ॥

यत्किंचित्स्रवते चन्द्रादमृतं दिव्यरूपिणः ।
तत्सर्वं ग्रसते सूर्यस्तेन पिण्डो जरायुतः ॥ ७७ ॥

विपरीतकरणीं विवक्षुस्तदुपोद्घातत्वेन पिण्डस्य जराकरणं तावदाह—यत्किंचिदिति । दिव्यमुत्कृष्टं सुधामयं रूपं यस्य स तथा तस्माद्दिव्यरूपिणश्चन्द्रात्सोमात्तालुमूलस्थाद्यत्किंचिद्यत्कि-मप्यमृतं पीयूषं स्रवते पतति सत्सर्वं सर्वं तत्पीयूषं सूर्यो नाभिस्थोऽनलात्मकः ग्रसते ग्रासीकरोति। तदुक्तं गोरक्षनाथेन—'नाभिदेशे स्थितो नित्यं भास्करो दहनात्मकः । अमृतात्मा स्थितो नित्यं तालुमूले च चन्द्रमाः ॥ वर्षत्यधोमुखश्चन्द्रो ग्रसत्यूर्ध्वमुखो रविः । करणं तच्च कर्तव्यं येन पीयूषमाप्यते ॥' इति । तेन सूर्यकर्तृकामृतग्रसनेन पिण्डो देहो जरायुतः जरसा युक्तो भवति ॥ ७७ ॥

तत्रास्ति करणं दिव्यं सूर्यस्य मुखवञ्चनम् ।
गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः ॥ ७८ ॥

तत्रेति । तत्र तद्विषये सूर्यस्य नाभिस्थानलस्य मुखं वञ्च्यतेऽनेनेति तादृशं दिव्यमुत्तमं करणं वक्ष्यमाणमुद्राख्यमस्ति । तद्गुरूपदेशतः गुरूपदेशाज्ज्ञेयं ज्ञातुं शक्यम् । शास्त्रार्थानां कोटिभिः न तु नैव ज्ञातुं शक्यम् ॥ ७८ ॥

ऊर्ध्वनाभेरधस्तालोरूर्ध्वं भानुरधः शशी ।
करणी विपरीताख्या गुरुवाक्येन लभ्यते ॥ ७९ ॥

विपरीतकरणीमाह—ऊर्ध्वनाभेरिति । ऊर्ध्वमुपरिभागे नाभिर्यस्य स ऊर्ध्वनाभिस्तस्योर्ध्वनाभेरधः अधोभागे तालु तालुस्थानं यस्य सोऽधस्तालुस्तस्याधस्तालोर्योगिन ऊर्ध्वमुपरिभागे भानुर्दहनात्मकः सूर्यो भवति । अधः अधोभागे शश्यमृतात्मा चन्द्रो भवति । प्रथमान्तपाठे तु यदा ऊर्ध्वनाभिरधस्तालुर्योगी भवति तदोर्ध्वं भानुरधः शशी भवति । यदातदापदयोरध्याहारेणान्वयः । इयं विपरीताख्या विपरीतनामिका करणी ऊर्ध्वाधःस्थितयोश्चन्द्रसूर्ययोरधऊर्ध्वकरणेनान्वर्था गुरुवाक्येन गुरोर्वाक्येनैव लभ्यते प्राप्यते नान्यथा ॥

नित्यमभ्यासयुक्तस्य जठराग्निविवर्धिनी ।
आहारो बहुलस्तस्य संपाद्यः साधकस्य च ॥८०॥

नित्यमिति । नित्यं प्रतिदिनमभ्यासोऽभ्यसनं तस्मिन् युक्तस्यावहितस्य जठराग्निरुदराग्निस्तस्य विवर्धिनी विशेषेण वर्धिनीति विपरीतकरणीविशेषणम् । तस्य साधकस्य विपरीतकरण्यभ्यासिन आहारो भोजनं बहुलो यथेच्छः संपाद्यः संपादनीयः । च पादपूरणे ॥ ८० ॥

अल्पाहारो यदि भवेदग्निर्दहति तत्क्षणात् ।
अधःशिराश्चोर्ध्वपादः क्षणं स्यात्प्रथमे दिने ॥ ८१ ॥

अल्पाहार इति । यद्यल्पाहारः अल्पो भोक्तुमिष्टान्नस्याहारो भोजनं यस्य तादृशो भवेत्स्यात्तदाऽग्निर्जठरानलो देहं क्षणमात्राद्दहेत् । शीघ्रं दहेदित्यर्थः । ऊर्ध्वाधःस्थितयोश्चन्द्रसूर्ययोरधऊर्ध्वकरणक्रियामाह—अधःशिरा इति । अधः अधोभागे भूमौ शिरो यस्य सोऽधःशिराः कराभ्यां कटिप्रदेशमवलम्ब्य बाहुमूलादारभ्य कूर्परपर्यन्ताभ्यां बाहुभ्यां स्कन्धाभ्यां गलपृष्ठभागशिरःपृष्ठभागाभ्यां च भूमिमवष्टभ्याधःशिरा भवेत् । ऊर्ध्वमुपर्यन्तरिक्षे पादौ यस्य स ऊर्ध्वपादः प्रथमदिने आरम्भदिने क्षणं क्षणमात्रं स्यात् ॥ ८१ ॥

क्षणाच्च किंचिदधिकमभ्यसेच्च दिने दिने ।
वलितं पलितं चैव षण्मासोर्ध्वं न दृश्यते ।

दिने दिने प्रतिदिनं क्षणात्किंचिदधिकं द्विक्षणं त्रिक्षणं एकदिनवृद्ध्याऽभ्यसेदभ्यासं कुर्यात्। विपरीतकरणीगुणानाह—वलितमिति। वलितं चर्मसंकोचः पलितं केशेषु शौक्ल्यं च, षण्णां मासानां समाहारः षण्मासं तस्मादूर्ध्वमुपरि नैव दृश्यते नैवावलोक्यते। साधकस्य देह इति वाक्याध्याहारः। यस्तु साधको याममात्रं प्रहरमात्रं नित्यमभ्यसेत्स तु कालजित्कालं मृत्युं जयतीति कालजिन्मृत्युजेता भवेत्। एतेन योगस्य प्रारब्धकर्मप्रतिबन्धकत्वमपि सूचितम्। तदुक्तं विष्णुधर्मे—'स्वदेहारम्भकस्यापि कर्मणः संक्षयावहः। यो योगः पृथिवीपाल शृणु तस्यापि लक्षणम्॥' इति। विद्यारण्यैरपि जीवन्मुक्तावुक्तम्—'यथा प्रारब्धकर्म तत्त्वज्ञानात्प्रबलं तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलः। अत एव योगिनामुद्दालकवीतहव्यादीनां स्वेच्छया देहत्याग उपपद्यते' इति। भागवतेऽप्युक्तम्—'देहं जह्यात्समाधिना' इति॥ ८२॥

अथ वज्रोली—

स्वेच्छया वर्तमानोऽपि योगोक्तैर्नियमैर्विना।
वज्रोलीं यो विजानाति स योगी सिद्धिभाजनम्॥

वज्रोल्यां प्रवृत्तिं जनयितुमादौ तत्फलमाह—स्वेच्छयेति। योऽभ्यासी वज्रोलीं वज्रोलीमुद्रां विजानाति विशेषेण

स्वानुभवेन जानाति स योगी योगे योगशास्त्रे उक्ता योगोक्तास्तैर्योगोक्तैर्नियमैर्ब्रह्मचर्यादिभिर्विना ऋते स्वेच्छया निजेच्छया वर्तमानोऽपि व्यवहरन्नपि सिद्धिभाजनं सिद्धीनामणिमादीनां भाजनं पात्रं भवति ॥ ८३ ॥

तत्र वस्तुद्वयं वक्ष्ये दुर्लभं यस्य कस्यचित् ।
क्षीरं चैकं द्वितीयं तु नारी च वशवर्तिनी ॥ ८४ ॥

तत्साधनोपयोगि वस्तुद्वयमाह—तत्रेति । तत्र वज्रोल्यभ्यासे वस्तुनोर्द्वयं वक्ष्ये कथयिष्ये । कीदृशं वस्तुद्वयम्? यस्य कस्यचित् यस्य कस्यापि धनहीनस्य दुर्लभं दुःखेन लब्धुं शक्यं दुःखेनापि लब्धुमशक्यमिति वा, 'दुः स्यात्कष्टनिषेधयोः' इति कोशात् । किं तद्वस्तुद्वयमित्यपेक्षायामाह—क्षीरमिति । एकं वस्तु क्षीरं पानार्थं मेहनानन्तरमिन्द्रियनैर्बल्यात्तद्बलार्थं क्षीरपानं युक्तम् । केचित्तु अभ्यासकाले आकर्षणार्थमित्याहुः । तस्यान्तर्गतस्य घनीभावे निर्गमनासंभवात्तदयुक्तम् । द्वितीयं तु वस्तु वशवर्तिनी स्वाधीना नारी वनिता ॥ ८४ ॥

मेहनेन शनैः सम्यगूर्ध्वाकुञ्चनमभ्यसेत् ।
पुरुषोऽप्यथ वा नारी वज्रोलीसिद्धिमाप्नुयात् ॥

वज्रोलीमुद्राप्रकारमाह—मेहनेनेति । मेहनेन स्त्रीसङ्गानन्तरं बिन्दोः क्षरणेन साधनभूतेन पुरुषः पुमानथ वा नार्यपि

योषिदपि शनैर्मन्दं सम्यक् यत्नपूर्वकमूर्ध्वाकुञ्चनमूर्ध्वमुपर्याकुञ्चनं मेढ्राकुञ्चनेन बिन्दोरुपर्याकर्षणमभ्यसेद्वज्रोलीमुद्रासिद्धिमाम्नयात्सिद्धिं गच्छेत् ॥ ८५ ॥

यत्नतः शस्तनालेन फूत्कारं वज्रकंदरे ।
शनैः शनैः प्रकुर्वीत वायुसंचारकारणात् ॥ ८६ ॥

अथ वज्रोल्याः पूर्वाङ्गप्रक्रियामाह—यत्नत इति । शस्तः प्रशस्तो यो नालस्तेन शस्तनालेन सीसकादिनिर्मितेन नालेन शनैः शनैर्मन्दं मन्दं यथाऽग्नेर्धमनार्थं फूत्कारः क्रियते तादृशं फूत्कारं वज्रकंदरे मेढ्रविवरे वायोः संचारः सम्यग्वज्रकंदरे चरणं गमनं तत्कारणात्तद्धेतोः प्रकुर्वीत प्रकर्षेण पुनः पुनः कुर्वीत । अथ वज्रोलीसाधनप्रक्रिया—सीसकनिर्मितां स्निग्धां मेढ्रप्रवेशयोग्यां चतुर्दशाङ्गुलमात्रां शलाकां कारयित्वा तस्या मेढ्रे प्रवेशनमभ्यसेत् । प्रथमदिने एकाङ्गुलमात्रां प्रवेशयेत् । द्वितीयदिने द्व्यङ्गुलमात्रां तृतीयदिने त्र्यङ्गुलमात्राम् । एवं क्रमेण वृद्धौ द्वादशाङ्गुलमात्रप्रवेशे मेढ्रमार्गः शुद्धो भवति । पुनस्तादृशीं चतुर्दशाङ्गुलमात्रां द्व्यङ्गुलमात्रवक्रामूर्ध्वमुखां कारयित्वा तां द्वादशाङ्गुलमात्रां प्रवेशयेत् । वक्रमूर्ध्वमुखं द्व्यङ्गुलमात्रं बहिः स्थापयेत् । ततः सुवर्णकारस्य अग्निधमनसाधनीभूतनालसदृशं नालं गृहीत्वा तदग्रं मेढ्र-

प्रवेशितद्वादशाङ्गुलस्य नालस्य वक्रोर्ध्वमुखद्व्यङ्गुलमध्ये प्रवेश्य फूत्कारं कुर्यात् । तेन सम्यक् मार्गशुद्धिर्भवति । ततो जलस्य मेढ्रेणाकर्षणमभ्यसेत् । जलाकर्षणे सिद्धे पूर्वोक्तश्लोकरीत्या बिन्दोरूर्ध्वाकर्षणमभ्यसेत् । बिन्द्वाकर्षणे सिद्धे वज्रोलीमुद्रासिद्धिः । इयं जितप्राणस्यैव सिध्यति नान्यस्य । खेचरीमुद्राप्राणजयोभयसिद्धौ तु सम्यग् भवति ॥ ८६ ॥

नारीभगे पतद्बिन्दुमभ्यासेनोर्ध्वमाहरेत् ।
चलितं च निजं बिन्दुमूर्ध्वमाकृष्य रक्षयेत् ॥ ८७ ॥

एवं वज्रोल्यभ्यासे सिद्धे तदुत्तरं साधनमाह—नारीभग इति । नारीभगे स्त्रीयोनौ पततीति पतन् पतंश्चासौ बिन्दुश्च पतद्बिन्दुस्तं पतद्बिन्दुं रतिकाले पतन्तं बिन्दुमभ्यासेन वज्रोलीमुद्राभ्यासेनोर्ध्वमुपर्याहरेदाकर्षयेत् । पतनात्पूर्वमेव । यदि पतनात्पूर्वं बिन्दोराकर्षणं न स्यात्तर्हि पतितमाकर्षयेदित्याह—चलितं चेति । चलितं नारीभगे पतितं निजं स्वकीयं बिन्दुं चकारात्तद्रजः ऊर्ध्वमुपर्याकृष्याहृत्य रक्षयेत् स्थापयेत् ॥ ८७ ॥

एवं संरक्षयेद्बिन्दुं मृत्युं जयति योगवित् ।
मरणं बिन्दुपातेन जीवनं बिन्दुधारणात् ॥ ८८ ॥

वज्रोलीगुणानाह—एवमिति । एवमुक्तरीत्या बिन्दुं यः संरक्षयेत् सम्यग् रक्षयेत् स योगविद्योगाभिज्ञो मृत्युं

जयत्यभिभवति । यतो बिन्दोः शुक्रस्य पातेन पतनेन मरणं भवति । बिन्दोर्धारणं बिन्दुधारणं तस्माद्बिन्दुधारणाज्जीवनं भवति । तस्माद्बिन्दुं संरक्षयेदित्यर्थः ॥ ८८ ॥

सुगन्धो योगिनो देहे जायते बिन्दुधारणात् ।
यावद्बिन्दुः स्थिरो देहे तावत्कालभयं कुतः ॥ ८९ ॥

सुगन्ध इति । योगिनो वज्रोल्यभ्यासिनो देहे बिन्दोः शुक्रस्य धारणं बिन्दुधारणं तस्मात्सुगन्धः शोभनो गन्धो जायते प्रादुर्भवति । देहे यावद्बिन्दुः स्थिरस्तावत्कालभयं मृत्युभयं कुतः । न कुतोऽपीत्यर्थः ॥ ८९ ॥

चित्तायत्तं नृणां शुक्रं शुक्रायत्तं च जीवितम् ।
तस्माच्छुक्रं मनश्चैव रक्षणीयं प्रयत्नतः ॥ ९० ॥

चित्तायत्तमिति । हि यस्मान्नृणां शुक्रं वीर्यं चित्तायत्तं चित्ते चले चलत्वाच्चित्ते स्थिरे स्थिरत्वाच्चित्ताधीनम् । जीवितं जीवनं शुक्रायत्तं शुक्रे स्थिरे जीवनाच्छुक्रे नष्टे मरणाच्छुक्राधीनम् । तस्माच्छुक्रं बिन्दुं मनश्च मानसं च प्रकृष्टाद्यत्नादिति प्रयत्नतः रक्षणीयमेव । अवश्यं रक्षणीयमित्यर्थः । एवशब्दो भिन्नक्रमः ॥ ९० ॥

ऋतुमत्या रजोऽप्येवं बीजं बिन्दुं च रक्षयेत् ।

ऋतुमत्या इति । एवं पूर्वोक्तेनाभ्यासेन ऋतुर्विद्यते यस्याः सा ऋतुमती तस्या ऋतुमत्या ऋतुस्नातायाः स्त्रियो रेतः निजं स्वकीयं बिन्दुं च रक्षयेत् । पूर्वोक्ताभ्यासं दर्शयति—मेढ्रेणेति । अभ्यासो वज्रोल्यभ्यासः स एव योगो योगसाधनत्वात्तं वेत्तीत्यभ्यासयोगवित् मेढ्रेण गुह्येन्द्रियेण सम्यग्यत्नपूर्वकमूर्ध्वमुपर्याकर्षयेत् । रजो बिन्दुं चेति कर्माध्याहारः । अयं श्लोकः क्षिप्तः ॥ ९१ ॥

अथ सहजोली—

सहजोलिश्चामरोलिर्वज्रोल्या भेद एकतः ।
जलेषु भस्म निक्षिप्य दग्धगोमयसंभवम् ॥ ९२ ॥

सहजोल्यमरोल्यौ विवक्षुस्तयोर्वज्रोलीविशेषत्वमाह—सहजोलिश्चेति । वज्रोल्या भेदो विशेषः सहजोलिरमरोलिश्च । तत्र हेतुः एकतः एकत्वादेकफलत्वादित्यर्थः । एकशब्दाद्भावप्रधानात्पञ्चम्यास्तसिः । सहजोलिमाह—जलेष्विति । गोः पुरीषाणि गोमयानि दग्धानि च तानि गोमयानि च दग्धगोमयानि तेषु संभव उत्पत्तिर्यस्य तद्दग्धगोमयसंभवं शोभनं भस्म विभूतिः तत् जले तोये निक्षिप्य तोयमिश्रं कृत्वोत्तर उत्तरश्लोकेनान्वेति ॥ ९२॥

वज्रोलीमैथुनादूर्ध्वं स्त्रीपुंसोः स्वङ्गलेपनम् ।
आसीनयोः सुखेनैव मुक्तव्यापारयोः क्षणात् ॥९३॥

वज्रोलीति । वज्रोलीमुद्रार्थं मैथुनं तस्मादूर्ध्वमनन्तरं सुखेनैवानन्देनैवासीनयोरुपविष्टयोः क्षणाद्रत्युत्सवान्मुक्तस्त्यक्तो व्यापारो रतिक्रिया याभ्यां तौ मुक्तव्यापारौ तयोर्मुक्तव्यापारयोः स्त्री च पुमांश्च स्त्रीपुंसौ तयोः स्त्रीपुंसोः स्वङ्गलेपनं शोभनान्यङ्गानि स्वङ्गानि मूर्धललाटनेत्रहृदयस्कन्धभुजादीनि तेषु लेपनम् ॥ ९३ ॥

सहजोलिरियं प्रोक्ता श्रद्धेया योगिभिः सदा ।
अयं शुभकरो योगो भोगयुक्तोऽपि मुक्तिदः ॥९४॥

सहजोलिरिति । इयमुक्ता क्रिया सहजोलिरिति प्रोक्ता कथिता योगिभिर्मत्स्येन्द्रादिभिः । कीदृशी ? सदा श्रद्धेया सर्वदा श्रद्धातुं योग्या । अयं सहजोल्याख्यो योग उपायः शुभकरः शुभं श्रेयः करोतीति शुभकरः, 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इत्यभिधानात् । कीदृशो योगः ? भोगेन युक्तोऽपि मुक्तिदो मोक्षदः ॥ ९४ ॥

अयं योगः पुण्यवतां धीराणां तत्त्वदर्शिनाम् ।
निर्मत्सराणां सिध्येत न तु मत्सरशालिनाम् ॥९५॥

अयं योग इति। अयमुक्तो योगः पुण्यं विद्यते येषां ते पुण्यवन्तः सुकृतिनस्तेषां पुण्यवतां धीराणां धैर्यवतां तत्त्वं वास्तविकं पश्यन्तीति तत्त्वदर्शिनस्तेषां तत्त्वदर्शिनां मत्सरान्निष्क्रान्ता निर्मत्सरास्तेषां निर्मत्सराणामन्यगुणद्वेषरहितानाम्। 'मत्सरोऽन्यगुणद्वेषः' इत्यमरः। तादृशानां पुंसां सिध्येत सिद्धिं गच्छेत्। मत्सरशालिनां मत्सरवतां तु न सिध्येत्॥९५॥

अथामरोली—

पित्तोल्बणत्वात्प्रथमाम्बुधारां
विहाय निःसारतयाऽन्त्यधाराम्।
निषेव्यते शीतलमध्यधारा
कापालिके खण्डमतेऽमरोली॥ ९६॥

अमरोलीमाह—पित्तोल्बणत्वादिति। पित्तेनोल्बणोत्कटा पित्तोल्बणा तस्या भावः पित्तोल्बणत्वं तस्मात्। यथा प्रथमा पूर्वा याऽम्बुनः शिवाम्बुनो धारा तां विहाय शिवाम्बुनिर्गमनसमये किंचित्पूर्वां धारां त्यक्त्वा। निर्गतः सारो यस्याः सा निःसारा तस्या भावो निःसारता तया निःसारतया निःसारत्वेनान्त्यधारा अन्त्या चरमा या धारा तां विहाय किंचिदन्त्यां धारां त्यक्त्वा। शीतला पित्तादिदोषसारत्वरहिता या मध्यधारा मध्यमा धारा सा निषेव्यते नितरां सेव्यते।

खण्डो योगविशेषो मतोऽभिमतो यस्य स खण्डमतस्तस्मिन् खण्डमते कापालिकस्यायं कापालिकस्तस्मिन् कापालिके खण्डकापालिकसंप्रदाय इत्यर्थः । अमरोली प्रसिद्धेति शेषः ॥

अमरीं यः पिबेन्नित्यं नस्यं कुर्वन्दिने दिने ।
वज्रोलीमभ्यसेत्सम्यक्साऽमरोलीति कथ्यते ॥ ९७ ॥

अमरीमिति । अमरीं शिवाम्बु यः पुमान् नित्यं पिबेत् । नस्यं कुर्वन् श्वासेनामर्या घ्राणान्तर्ग्रहणं कुर्वन् सन् दिने दिने प्रतिदिनं वज्रोलीम् 'मेहनेन शनैः' इति श्लोकेनोक्तां सम्यगभ्यसेत्साऽमरोलीति कथ्यते । कापालिकैरिति शेषः । अमरी पीताऽमरी । नस्यपूर्विका वज्रोल्यमरोलीशब्देनोच्यत इत्यर्थः ॥

अभ्यासान्निःसृतां चान्द्रीं विभूत्या सह मिश्रयेत् ।
धारयेदुत्तमाङ्गेषु दिव्यदृष्टिः प्रजायते ॥ ९८ ॥

अभ्यासादिति । अभ्यासादमरोल्यभ्यासान्निःसृतां निर्गतां चान्द्रीं चन्द्रस्येयं चान्द्री तां चान्द्रीं सुधां विभूत्या भस्मना सह साकं मिश्रयेत्संयोजयेत् । उत्तमाङ्गेषु शिरःकपालनेत्रस्कन्धकण्ठहृदयभुजादिषु धारयेत् । भस्ममिश्रितां चान्द्रीमिति शेषः । दिव्या अतीतानागतवर्तमानव्यवहितविप्रकृष्टपदार्थदर्शनयोग्या दृष्टिर्यस्य स दिव्यदृष्टिर्दिव्यदृक् प्रजायते प्रकर्षेण जायते । अमरीसेवनप्रकारविशेषाः शिवाम्बुकल्पादवगन्तव्याः ॥

पुंसो बिन्दुं समाकुञ्च्य सम्यगभ्यासपाटवात् ।
यदि नारी रजो रक्षेद्वज्रोल्या साऽपि योगिनी ॥

पुंसो वज्रोलीसाधनमुक्त्वा नार्यास्तदाह—पुंसो बिन्दुमिति। सम्यगभ्यासस्य सम्यगभ्यसनस्य पाटवं पटुत्वं तस्मात्पुंसः पुरुषस्य बिन्दुं वीर्यं समाकुञ्च्य सम्यगाकृष्य नारी स्त्री यदि रजो वज्रोल्या वज्रोलीमुद्रया रक्षेत्, सापि नारी योगिनी प्रशस्तयोगवती ज्ञेया। पुंसो बिन्दुसमायुक्तमिति पाठे तु एतद्रजसो विशेषणम् ॥ ९९ ॥

तस्याः किंचिद्रजो नाशं न गच्छति न संशयः ।
तस्याः शरीरे नादश्च बिन्दुतामेव गच्छति ॥१००॥

नारीकृताया वज्रोल्याः फलमाह—तस्या इति। तस्या वज्रोल्यभ्यसनशीलाया नार्या रजः किंचित् किमपि स्वल्पमपि नाशं न गच्छति नष्टं न भवति पतनं न प्राप्नोतीत्यर्थः। अत्र संशयो न संदेहो न। तस्या नार्याः शरीरे नादश्च बिन्दुतामेव गच्छति मूलाधारादुत्थितो नादो हृदयोपरि बिन्दुभावं गच्छति। बिन्दुना सहैकीभवतीत्यर्थः। अमृत-सिद्धौ—'बीजं च पौरुषं प्रोक्तं रजश्च स्त्रीसमुद्भवम्। अनयोर्बाह्ययोगेन सृष्टिः संजायते नृणाम् ॥ यदाऽभ्यन्तरयोगः स्यात्तदा योगीति गीयते। बिन्दुश्चन्द्रमयः प्रोक्तो रजः

सूर्यमयं तथा ॥ अनयोः संगमादेव जायते परमं पदम् । स्वर्गदो मोक्षदो बिन्दुर्धर्मदोऽधर्मदस्तथा । तन्मध्ये देवताः सर्वास्तिष्ठन्ते सूक्ष्मरूपतः ॥' इति ॥ १०० ॥

स बिन्दुस्तद्रजश्चैव एकीभूय स्वदेहगौ ।
वज्रोल्यभ्यासयोगेन सर्वसिद्धिं प्रयच्छतः ॥१०१॥

बिन्दुरिति । स पुंसो बिन्दुस्तद्रजो नार्या रजश्चैव वज्रोलीमुद्राया अभ्यासो वज्रोल्यभ्यासः स एव योगस्तेनैकीभूय मिलित्वा स्वदेहगौ स्वदेहे गतौ सर्वसिद्धिं प्रयच्छतः दत्तः ॥ १०१ ॥

रक्षेदाकुञ्चनादूर्ध्वं या रजः सा हि योगिनी ।
अतीतानागतं वेत्ति खेचरी च भवेद् ध्रुवम् ॥१०२॥

रक्षेदिति । या नार्याकुञ्चनाद्योनिसंकोचनादूर्ध्वमुपरि स्थाने नीत्वा रजो रक्षेत् । हीति प्रसिद्धं योगशास्त्रे । सा योगिन्यतीतानागतं भूतं भविष्यं च वस्तु वेत्ति जानाति ध्रुवमिति निश्चितं खेऽन्तरिक्षे चरतीति खेचर्यन्तरिक्षचरी भवेत् ॥१०२॥

देहसिद्धिं च लभते वज्रोल्यभ्यासयोगतः ।
अयं पुण्यकरो योगो भोगे भुक्तेऽपि मुक्तिदः ॥१०३॥

देहसिद्धिमिति । वज्रोल्या अभ्यासस्य योगो युक्तिस्तस्माद्देहस्य सिद्धिं रूपलावण्यबलवज्रसंहननत्वरूपां लभते ।

अयं योगो वज्रोल्यभ्यासयोगः पुण्यकरोऽदृष्टविशेषजनकः । कीदृशो योगः ? भुज्यत इति भोगो विषयस्तस्मिन् भुक्तेऽपि मुक्तिदो मोक्षदः ॥ १०३ ॥

अथ शक्तिचालनम्—

कुटिलाङ्गी कुण्डलिनी भुजंगी शक्तिरीश्वरी ।
कुण्डल्यरुन्धती चैते शब्दाः पर्यायवाचकाः ॥१०४॥

शक्तिचालनं विवक्षुस्तदुपोद्धाततया कुण्डलीपर्यायान् तया मोक्षद्वारविभेदनादिकं चाह सप्तभिः—कुटिलाङ्गीति । कुटिलाङ्गी १ कुण्डलिनी २ भुजंगी ३ शक्तिः ४ ईश्वरी ५ कुण्डली ६ अरुन्धती ७ चैते सप्त शब्दाः पर्यायवाचका एकार्थवाचकाः ॥ १०४ ॥

उद्घाटयेत्कपाटं तु यथा कुञ्चिकया हठात् ।
कुण्डलिन्या तथा योगी मोक्षद्वारं विभेदयेत् ॥१०५॥

उद्घाटयेदिति । यथा येन प्रकारेण पुमान् कुञ्चिकया कपाटार्गलोत्सारणसाधनीभूतया हठाद्बलात्कपाटमररमुद्घाटयेदुत्सारयेत् । हठादिति देहलीदीपन्यायेनोभयत्र संबध्यते । तथा तेन प्रकारेण योगी हठाद्धठाभ्यासात्कुण्डलिन्या शक्त्या मोक्षद्वारं मोक्षस्य द्वारं प्रापकं सुषुम्णामार्गं विभेदयेद्विशेषेण भेदयेत्, 'तयोर्ध्वमायन्नमृतत्वमेति' इति श्रुतेः ॥ १०५ ॥

येन मार्गेण गन्तव्यं ब्रह्मस्थानं निरामयम् ।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥ १०६ ॥

येनेति । आमयो रोगजन्यं दुःखं दुःखमात्रोपलक्षणं तस्मान्निर्गतं निरामयं दुःखमात्ररहितं ब्रह्मस्थानं ब्रह्माविर्भावजनकं स्थानं ब्रह्मस्थानं ब्रह्मरन्ध्रम्, 'तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः' इति श्रुतेः । येन मार्गेण सुषुम्णामार्गेण गन्तव्यं गमनार्हमस्ति तद्द्वारं तस्य मार्गस्य द्वारं प्रवेशमार्गं मुखेनास्येनाच्छाद्य रुद्ध्वा परमेश्वरी कुण्डलिनी प्रसुप्ता निद्रिताऽस्ति ॥ १०६ ॥

कंदोर्ध्वे कुण्डली शक्तिः सुप्ता मोक्षाय योगिनाम् ।
बन्धनाय च मूढानां यस्तां वेत्ति स योगवित् ॥१०७॥

कंदोर्ध्व इति । कुण्डली शक्तिः कंदोर्ध्वे कंदस्योपरिभागे योगिनां मोक्षाय सुप्ता, मूढानां बन्धनाय सुप्ता । योगिनस्तां चालयित्वा मुक्ता भवन्ति, मूढास्तदज्ञानाद्बद्धास्तिष्ठन्तीति भावः । तां कुण्डलिनीं यो वेत्ति स योगवित् । सर्वेषां योगतन्त्राणां कुण्डल्याश्रयत्वादित्यर्थः ॥ १०७ ॥

कुण्डली कुटिलाकारा सर्पवत्परिकीर्तिता ।
सा शक्तिश्चालिता येन स युक्तो नात्र संशयः ॥१०८॥

कुण्डलीति । कुण्डली शक्तिः सर्पवद्भुजंगवत्कुटिल आकारः स्वरूपं यस्याः सा कुटिलाकारा परिकीर्तिता कथिता योगिभिः । सा कुण्डली शक्तिर्येन पुंसा चालिता मूलाधारादूर्ध्वं नीता स मुक्तोऽज्ञानबन्धान्निवृत्तः । अत्रास्मिन्नर्थे संशयो न संदेहो नास्तीत्यर्थः, 'तयोर्ध्वमायन्नमृतत्वमेति' इति श्रुतेः ॥ १०८ ॥

गङ्गायमुनयोर्मध्ये बालरण्डां तपस्विनीम् ।
बलात्कारेण गृह्णीयात्तद्विष्णोः परमं पदम् ॥१०९॥

गङ्गायमुनयोरिति । गङ्गायमुनयोराधाराधेयभावेन तयोर्भावनाद्गङ्गायमुनयोरभेदेन भावनाद्वा गङ्गायमुने इडापिङ्गले तयोर्मध्ये सुषुम्णामार्गे तपस्विनीं निरशनस्थितेः, बालरण्डां बालरण्डाशब्दवाच्यां कुण्डलीं बलात्कारेण हठेन गृह्णीयात् । तत्तस्या गङ्गायमुनयोर्मध्ये ग्रहणं विष्णोर्हरेर्व्यापकस्यात्मनो वा परमं पदं परमपदप्रापकम् ॥ १०९ ॥

इडा भगवती गङ्गा पिङ्गला यमुना नदी ।
इडापिङ्गलयोर्मध्ये बालरण्डा च कुण्डली ॥ ११० ॥

गङ्गायमुनादिपदार्थमाह—इडेति । इडा वामनिःश्वासा नाडी भगवत्यैश्वर्यादिसंपन्ना गङ्गा गङ्गापदवाच्या, पिङ्गला दक्षिणनिःश्वासा यमुना यमुनाशब्दवाच्या नदी । इडापिङ्गलयोर्मध्ये

मध्यगता या कुण्डली सा बालरण्डा बालरण्डाशब्द-वाच्या ॥ ११० ॥

पुच्छे प्रगृह्य भुजगीं सुप्तामुद्बोधयेच्च ताम् ।
निद्रां विहाय सा शक्तिरूर्ध्वमुत्तिष्ठते हठात् ॥१११॥

शक्तिचालनमाह—पुच्छ इति । सुप्तां निद्रितां भुजगीं तां कुण्डलिनीं पुच्छे प्रगृह्योद्बोधयेत्प्रबोधयेत्सा शक्तिः कुण्डली निद्रां विहाय हठादूर्ध्वं तिष्ठत इत्यन्वयः । एतद्रहस्यं तु गुरुमुखादवगन्तव्यम् ॥ १११ ॥

अवस्थिता चैव फणावती सा
प्रातश्च सायं प्रहरार्धमात्रम् ।
प्रपूर्य सूर्यात्परिधानयुक्त्या
प्रगृह्य नित्यं परिचालनीया ॥ ११२ ॥

अवस्थितेति । अवस्थिताऽवाक् स्थिता मूलाधारस्थिता फणावती भुजंगी सा कुण्डली सूर्यादापूर्य सूर्यात्पूरणं कृत्वा परिधाने युक्तिस्तया परिधानयुक्त्या प्रगृह्य गृहीत्वा । सायं सूर्यास्तसमये प्रातः सूर्योदयवेलायां नित्यमहरहः प्रहरस्य यामस्यार्धं प्रहरार्धं प्रहरार्धमेव प्रहरार्धमात्रं मुहूर्तद्वयमात्रं परिचालनीया परितश्चालयितुं योग्या । परिधानयुक्तिर्देशिका-द्बोध्या ॥ ११२ ॥

ऊर्ध्वं वितस्तिमात्रं तु विस्तारं चतुरङ्गुलम् ।
मृदुलं धवलं प्रोक्तं वेष्टिताम्बरलक्षणम् ॥ ११३ ॥

कंदसंपीडनेन शक्तिचालनं विवक्षुरादौ कंदस्य स्थानं स्वरूपं चाह—ऊर्ध्वमिति । मूलस्थानाद्वितस्तिमात्रं वितस्तिप्रमाणमूर्ध्वमुपरि नाभिमेढ्रयोर्मध्ये । एतेन कंदस्य स्थानमुक्तम् । तथा चोक्तं गोरक्षशतके—'ऊर्ध्वं मेढ्रादधो नाभेः कंदयोनिः खगाण्डवत् । तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः ॥' इति । याज्ञवल्क्यः—'गुदात्तु द्व्यङ्गुलादूर्ध्वं मेढ्रात्तु द्व्यङ्गुलादधः । देहमध्यं तनोर्मध्यं मनुजानामितीरितम् ॥ कंदस्थानं मनुष्याणां देहमध्यान्नवाङ्गुलम् । चतुरङ्गुलविस्तारमायामं च तथाविधम् ॥ अण्डाकृतिवदाकारभूषितं च त्वगादिभिः । चतुष्पदां तिरश्चां च द्विजानां तुन्दमध्यगम् ॥' इति । गुदाद् द्व्यङ्गुलोपर्येकाङ्गुलं मध्यं तस्मान्नवाङ्गुलं कंदस्थानं मिलित्वा द्वादशाङ्गुलप्रमाणं वितस्तिमात्रं जातम् । चतुर्णामङ्गुलीनां समाहारश्चतुरङ्गुलं चतुरङ्गुलप्रमाणं विस्तारम् । विस्तारो दैर्घ्यस्याप्युपलक्षणम् । चतुरङ्गुलं दीर्घं च मृदुलं कोमलं धवलं शुभ्रं वेष्टितं वेष्टनाकारीकृतं यदम्बरं वस्त्रं तस्य लक्षणं स्वरूपमिव लक्षणं स्वरूपं यस्य तादृशं प्रोक्तं कथितम् । कंदस्वरूपं योगिभिरिति शेषः ॥ ११३ ॥

सति वज्रासने पादौ कराभ्यां धारयेद् दृढम् ।
गुल्फदेशसमीपे च कंदं तत्र प्रपीडयेत् ॥ ११४ ॥

सतीति । वज्रासने कृते सति कराभ्यां हस्ताभ्यां गुल्फौ पादग्रन्थी तयोर्देशौ प्रदेशौ तयोः समीपे गुल्फाभ्यां किंचिदुपरि । 'तद्ग्रन्थी घुटिके गुल्फौ' इत्यमरः । पादौ चरणौ दृढं गाढं धारयेत् गृह्णीयात् । चकाराद्धृताभ्यां पादाभ्यां तत्र कंदस्थाने कंदं प्रपीडयेत्प्रकर्षेण पीडयेत् । गुल्फादूर्ध्वं कराभ्यां पादौ गृहीत्वा नाभेरधोभागे कंदं पीडयेदित्यर्थः ॥ ११४ ॥

वज्रासने स्थितो योगी चालयित्वा च कुण्डलीम् ।
कुर्यादनन्तरं भस्त्रां कुण्डलीमाशु बोधयेत् ॥ ११५ ॥

वज्रासन इति । वज्रासने स्थितो योगी कुण्डलीं चालयित्वा शक्तिचालनमुद्रां कृत्वेत्यर्थः । अनन्तरं शक्तिचालनानन्तरं भस्त्रां भस्त्राख्यं कुम्भकं कुर्यात् । एवंरीत्या कुण्डलीं शक्तिमाशु शीघ्रं बोधयेत्प्रबुद्धां कुर्यात् । वज्रासने शक्तिचालनस्य पूर्वं विधानेऽपि पुनर्वज्रासनोपपादनं शक्तिचालनानन्तरं भस्त्रायां वज्रासनमेव कर्तव्यमिति नियमार्थम् ॥ ११५ ॥

भानोराकुञ्चनं कुर्यात्कुण्डलीं चालयेत्ततः ।
मृत्युवक्त्रगतस्यापि तस्य मृत्युभयं कुतः ॥ ११६ ॥

भानोरिति । भानोर्नाभिदेशस्थस्य सूर्यस्याकुञ्चनं कुर्यात् । नाभेराकुञ्चनेनैवास्याकुञ्चनं भवति । ततो भानोराकुञ्चनात्कुण्डलीं शक्तिं चालयेत् । मृत्योर्वक्त्रं मुखं गतस्यापि प्राप्तास्यापि तस्य पुंसो मृत्युभयं कालभयं कुतः । न कुतोऽपीत्यर्थः ॥ ११६ ॥

मुहूर्तद्वयपर्यन्तं निर्भयं चालनादसौ ।
ऊर्ध्वमाकृष्यते किंचित्सुषुम्णायां समुद्गता ॥११७॥

मुहूर्तद्वयमिति । मुहूर्तयोर्द्वयं युग्मं घटिकाचतुष्टयात्मकं तत्पर्यन्तं तदवधि निर्भयं निःशङ्कं चालनादसौ शक्तिः सुषुम्णायां समुद्गता सती किंचिदूर्ध्वमाकृष्यते आकृष्टा भवति ॥ ११७ ॥

तेन कुण्डलिनी तस्याः सुषुम्णाया मुखं ध्रुवम् ।
जहाति तस्मात्प्राणोऽयं सुषुम्णां व्रजति स्वतः ॥११८॥

तेनेति । तेनोर्ध्वमाकर्षणेन कुण्डलिनी तस्याः प्रसिद्धायाः सुषुम्णाया मुखं प्रवेशमार्गं ध्रुवं निश्चितं जहाति त्यजति । तस्मान्मार्गत्यागादयं प्राणवायुः स्वतः स्वयमेव सुषुम्णां व्रजति गच्छति । सुषुम्णामुखात्प्रागेव कुण्डलिन्या निर्गतत्वादिति भावः ॥ ११८ ॥

तस्मात्संचालयेन्नित्यं सुखसुप्तामरुन्धतीम् ।
तस्याः संचालनेनैव योगी रोगैः प्रमुच्यते ॥११९॥

तस्मादिति । यस्माच्छक्तिचालनेन प्राणः सुषुम्णां व्रजति तस्मात्सुखेन सुप्ता सुखसुप्ता तां सुखसुप्तामरुन्धतीं शक्तिं नित्यं प्रतिदिनं संचालयेत्सम्यक् चालयेत् । तस्याः शक्तेः संचालनेनैव संचालनमात्रेण योगी रोगैः कासश्वासजरादिभिः प्रमुच्यते प्रकर्षेण मुक्तो भवति ॥ ११९ ॥

येन संचालिता शक्तिः स योगी सिद्धिभाजनम् ।
किमत्र बहुनोक्तेन कालं जयति लीलया ॥ १२० ॥

येनेति । येन योगिना शक्तिः कुण्डली संचालिता स योगी सिद्धीनामणिमादीनां भाजनं पात्रं भवति । अत्रास्मिन्नर्थे बहुनोक्तेन बहुप्रशंसनेन किम् ? न किमपीत्यर्थः । कालं मृत्युं लीलया क्रीडयाऽनायासेनैव जयत्यभिभवतीत्यर्थः ॥ १२० ॥

ब्रह्मचर्यरतस्यैव नित्यं हितमिताशिनः ।
मण्डलाद् दृश्यते सिद्धिः कुण्डल्यभ्यासयोगिनः ॥

ब्रह्मचर्येति । ब्रह्मचर्यं श्रोत्रादिभिः सहोपस्थसंयमस्तस्मिन् रतस्य तत्परस्य नित्यं सर्वदा हितं पथ्यं मितं चतुर्थांशवर्जितमश्नातीति तस्य कुण्डल्यभ्यासः शक्तिचालनाभ्यासः स एव योगः सोऽस्यास्तीति स तथा, तस्य मण्डलाच्चत्वारिंशद्दिनात्मकादनन्तरं सिद्धिः प्राणायामसिद्धिर्दृश्यते । 'नासादक्षिणमार्गवाहिपवनात्प्राणोऽतिदीर्घीकृतश्चन्द्राभः परिपूरितामृत-

तनुः प्राग्घण्टिकायास्ततः। छित्त्वा कालविशालवह्निवशगं भ्रूरन्ध्रनाडीगतं तत्कायं कुरुते पुनर्नवतरं छिन्नं ध्रुवं स्कन्धवत्' ॥ १२१ ॥

कुण्डलीं चालयित्वा तु भस्त्रां कुर्याद्विशेषतः।
एवमभ्यसतो नित्यं यमिनो यमभीः कुतः ॥ १२२ ॥

कुण्डलीमिति। कुण्डलीं चालयित्वा शक्तिचालनं कृत्वा। अथानन्तरमेव भस्त्रां भस्त्राख्यं कुम्भकं कुर्यात्। नित्यं प्रतिदिनम्। एवमुक्तप्रकारेणाभ्यसतो यमिनो योगिनो यमभीर्यमाद्भयं कुतः ? न कुतोऽपीत्यर्थः। योगिनो देहत्यागस्य स्वाधीनत्वादिति तात्पर्यम् ॥ १२२ ॥

द्वासप्ततिसहस्राणां नाडीनां मलशोधने।
कुतः प्रक्षालनोपायः कुण्डल्यभ्यसनादृते ॥ १२३ ॥

द्वासप्ततीति। द्वाभ्यामधिका सप्ततिः द्वासप्ततिसंख्याकानि सहस्राणि द्वासप्ततिसहस्राणि तेषां तत्संख्याकानां नाडीनां मलशोधने कर्तव्ये सति कुण्डल्यभ्यसनाच्छक्तिचालनाभ्यासादृते विना कुतः प्रक्षालनोपायः ? न कुतोऽपि। शक्तिचालनाभ्यासेनैव सर्वासां नाडीनां मलशोधनं भवतीत्यभिप्रायः ॥ १२३ ॥

इयं तु मध्यमा नाडी दृढाभ्यासेन योगिनाम् ।
आसनप्राणसंयाममुद्राभिः सरला भवेत् ॥ १२४ ॥

इयं त्विति । इयं मध्यमा नाडी सुषुम्णा योगिनां दृढाभ्यासेनासनं स्वस्तिकादि प्राणसंयामः प्राणायामः मुद्रा महामुद्रादिका तैः सरला ऋज्वी भवेत् ॥ १२४ ॥

अभ्यासे तु विनिद्राणां मनो धृत्वा समाधिना ।
रुद्राणी वा यदा मुद्रा भद्रां सिद्धिं प्रयच्छति ॥१२५॥

अभ्यास इति । समाधिनेतरवृत्तिनिरोधरूपेणैकाग्र्येण मनो धृत्वाऽन्तःकरणं धारणानिष्ठं कृत्वाऽभ्यासे मनःस्थितौ यत्ने विगता निद्रा येषां ते तथा तेषाम् । निद्रापदमालस्योपलक्षणम् । अनलसानामित्यर्थः । रुद्राणी शांभवी मुद्रा वा अथ वा पराऽन्या उन्मन्यादिका भद्रा शुभां सिद्धिं योगसिद्धिं प्रयच्छति ददाति । एतेन हठयोगोपकारको राजयोगः प्रोक्तः ॥ १२५ ॥

राजयोगं विना पृथ्वी राजयोगं विना निशा ।
राजयोगं विना मुद्रा विचित्राऽपि न शोभते ॥१२६॥

राजयोगं विना आसनादीनां वैयर्थ्यमौपचारिकश्लेषेणाह— राजयोगमिति । वृत्त्यन्तरनिरोधपूर्वकात्मगोचरधारावाहिकनिर्वि-

कल्पकवृत्ती राजयोगः। हठं विना राजयोग इत्यत्र सूचितस्तत्साधनाभ्यासो वा तं विना तमृते। पृथ्वीशब्देन स्थैर्यगुणः राजयोगादासनं लक्ष्यते। राजयोगं विना परमपुरुषार्थफलासिद्धेरिति हेतुरग्रेऽपि योजनीयः। राजयोगं विना निशेव निशा कुम्भको न राजते निशायां प्रायेण राजजनसंचाराभावात्। निशाशब्देन प्राणसंचाराभावलक्षणः कुम्भको लक्ष्यते। राजयोगं विना मुद्रा महामुद्रादिरूपा विचित्राऽपि विविधाऽपि विलक्षणाऽपि वा न राजते न शोभते। पक्षान्तरे। राज्ञो नृपस्य योगो राजयोगो राजसंबन्धस्तं विना पृथ्वी भूमिर्न राजते, शास्तारं विना भूमौ नानोपद्रवसंभवात्। राजा चन्द्रः, 'सोमोऽस्माकं ब्राह्मणानां राजा, इति श्रुतेः। तस्य योगं संबन्धं विना निशा रात्रिर्न राजते। राजयोगं विना नृपसंबन्धं विना मुद्रा राजभिः पत्रेषु क्रियमाणश्चिह्नविशेषः। विचित्राऽपि। पृथ्वीपक्षे रत्नादिजनकत्वेन विलक्षणाऽपि, निशापक्षे ग्रहनक्षत्रादिभिर्विचित्राऽपि, मुद्रापक्षे रेखाभिर्विचित्राऽपि न राजते ॥ १२६ ॥

मारुतस्य विधिं सर्वं मनोयुक्तं समभ्यसेत्।
इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा ॥ १२७ ॥

मारुतस्येति। मारुतस्य वायोः सर्वं विधिं कुम्भकमुद्राविधानं मनोयुक्तं मनसा युक्तं समभ्यसेत्सम्यगभ्यसेत्। मनीषिणा बुद्धिमता पुंसा इतरत्र मारुतस्य विधेरन्यस्मिन्विषये मनोवृत्तिर्मनसो वृत्तिः प्रवृत्तिर्न कर्तव्या न कार्या॥ १२७॥

इति मुद्रा दश प्रोक्ता आदिनाथेन शंभुना।
एकैका तासु यमिनां महासिद्धिप्रदायिनी॥१२८॥

मुद्रा उपसंहरति—इतीति। आदिनाथेन सर्वेश्वरेण शंभुना शं सुखं भवत्यस्मादिति शंभुस्तेन। इत्युक्तरीत्या दश दशसंख्याका मुद्राः प्रोक्ताः कथिताः। तासु मुद्रासु मध्ये एकैकाऽपि प्रत्येकमपि या काचन मुद्रा यमिनां यमवतां योगिनां महासिद्धिप्रदायिन्यणिमादिप्रदात्री वा॥ १२८॥

उपदेशं हि मुद्राणां यो दत्ते सांप्रदायिकम्।
स एव श्रीगुरुः स्वामी साक्षादीश्वर एव सः॥१२९॥

मुद्रोपदेष्टारं गुरुं प्रशंसति—उपदेशमिति। यः पुमान्मुद्राणां महामुद्रादीनां संप्रदायाद्योगिनां गुरुपरम्परारूपादागतं सांप्रदायिकमुपदेशं दत्ते ददाति, स एव स पुमानेव श्रीगुरुः श्रीमान् गुरुः सर्वगुरुभ्यः श्रेष्ठ इत्यर्थः। स्वामी प्रभुः स एव साक्षात्प्रत्यक्ष ईश्वर एव सः। ईश्वराभिन्न एव

तस्य वाक्यपरो भूत्वा मुद्राभ्यासे समाहितः ।
अणिमादिगुणैः सार्धं लभते कालवञ्चनम् ॥१३०॥

तस्येति । तस्य मुद्राणामुपदेष्टुर्गुरोर्वाक्यपरो वाक्यमासनकुम्भकाद्यनुष्ठानविषयकं युक्ताहारविहारचेष्टादिविषयकं च तस्मिन् परस्तत्परः तत्परश्चादरवान् । आदरश्च विहिततपःकरणम् । भूत्वा संभूय मुद्राणां महामुद्रादीनामभ्यासः पौनःपुन्येनावर्तनं तस्मिन् मुद्राभ्यासे समाहितः सावधानः पुरुषोऽणिमादिगुणैरणिमादिसिद्धिभिः सार्धं साकं कालस्य मृत्योर्वञ्चनं प्रतारणं लभते प्राप्नोति ॥ १३० ॥

इति श्रीस्वात्मारामयोगीन्द्रविरचितायां हठप्रदीपिकायां मुद्राविधानं नाम तृतीयोपदेशः ॥ ३ ॥

इति श्रीहठप्रदीपिकाव्याख्यायां ब्रह्मानन्दकृतायां ज्योत्स्नाभिधायां मुद्राकथनं नाम तृतीयोपदेशः ॥ ३ ॥

P.V.S

चतुर्थोपदेशः।

नमः शिवाय गुरवे नादबिन्दुकलात्मने।
निरञ्जनपदं याति नित्यं यत्र परायणः॥ १ ॥

प्रथमद्वितीयतृतीयोपदेशोक्तानामासनकुम्भकमुद्राणां फलभूतं राजयोगं विवक्षुः स्वात्मारामः श्रेयांसि बहुविघ्नानीति तत्र विघ्नबाहुल्यस्य संभवात्तन्निवृत्तये शिवाभिन्नगुरुनमस्कारात्मकं मङ्गलमाचरति—नम इति। शिवाय सुखरूपायेश्वराभिन्नाय वा। तदुक्तम्—'नमस्ते नाथ भगवञ्शिवाय गुरुरूपिणे' इति। गुरवे देशिकाय, यद्वा गुरवे सर्वान्तर्यामितया निखिलोपदेष्ट्रे शिवायेश्वराय। तथा च पातञ्जलसूत्रम्—'स पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इति। नमः प्रह्वीभावोऽस्तु। कीदृशाय शिवाय? गुरवे नादबिन्दुकलात्मने। कांस्यघण्टानिर्ह्रादवदनुरणनं नादः। बिन्दुरनुस्वारोत्तरभावी ध्वनिः। कला नादैकदेशः ता आत्मा स्वरूपं यस्य स तथा तस्मै। नादबिन्दुकलात्मना वर्तमानायेत्यर्थः। तत्र नादबिन्दुकलात्मनि शिवे गुरौ नित्यं प्रतिदिनं परायणोऽवहितः पुमान्।

एतेन नादानुसंधानपरायण इत्युक्तम् । पूर्वपादेन गुरुशिवयोरभेदश्च सूचितः । अञ्जनं मायोपाधिस्तद्रहितं निरञ्जनं शुद्धं पद्यते गम्यते योगिभिरिति पदं ब्रह्म याति प्राप्नोति । तथा च वक्ष्यति—नादानुसंधानसमाधिभाजमित्यादिना ॥ १ ॥

अथेदानीं प्रवक्ष्यामि समाधिक्रममुत्तमम् ।
मृत्युघ्नं च सुखोपायं ब्रह्मानन्दकरं परम् ॥ २ ॥

समाधिक्रमं प्रतिजानीते—अथेति । अथासनकुम्भकमुद्राकथनानन्तरमिदानीमस्मिन्नवसरे समाधिक्रमं प्रत्याहारादिरूपं प्रवक्ष्यामि प्रकर्षेण विविच्य वक्ष्यामीत्यन्वयः । कीदृशं समाधिक्रमम् ? उत्तमं श्रीआदिनाथोक्तसंपादनकोटिसमाधिप्रकारेषूत्कृष्टम् । पुनः कीदृशम् ? मृत्युं कालं हन्ति निवारयतीति मृत्युघ्नं स्वेच्छया देहत्यागजनकं तत्त्वज्ञानोदयमनोनाशवासनाक्षयैः सुखस्य जीवन्मुक्तिसुखस्योपायं प्राप्तिसाधनम् । पुनः कीदृशम् ? परं ब्रह्मानन्दकरं प्रारब्धकर्मक्षये सति जीवब्रह्मणोरभेदेनात्यन्तिकब्रह्मानन्दप्राप्तिरूपविदेहमुक्तिकरम् । तत्र निरोधः समाधिना चित्तस्य ससंस्काराशेषवृत्तिनिरोधे शान्तघोरमूढावस्थानिवृत्तौ ‘ जीवन्नेवेह विद्वान् हर्षशोकाभ्यां विमुच्यते ’ इत्यादिश्रुत्युक्तनिर्विकारस्वरूपावस्थितिरूपा जीवन्मुक्तिर्भवति । परममुक्तिस्तु प्राप्तभोगान्तेऽन्तःकरणगुणानां प्रतिप्रसवेनौपाधिक-

रूपात्यन्तिकनिवृत्तावात्यन्तिकं स्वरूपावस्थानं प्रतिप्रसवसिद्धम् । व्युत्थाननिरोधसमाधिसंस्कारा मनसि लीयन्ते । मनोऽस्मितायामस्मिता महति महान् प्रधान इति चित्तगुणानां प्रतिप्रसवः प्रतिसर्गः स्वकारणे लयः । ननु जीवन्मुक्तस्य व्युत्थाने ब्राह्मणोऽहं मनुष्योऽहमित्यादिव्यवहारदर्शनाच्चित्तादिभिरौपाधिकभावजननादम्लेन दुग्धस्येव स्वरूपच्युतिः स्यादिति चेन्न । संप्रज्ञातसमाधावनुभूतात्मसंस्कारस्य तात्त्विकत्वनिश्चयात् । अतात्त्विकान्यथाभावस्याविकारित्वाप्रयोजकत्वात् । अम्लेन दुग्धस्य दधिभावस्तु तात्त्विक इति दृष्टान्तवैषम्याच्च । पुरुषस्य त्वन्तःकरणोपाधिकोऽहं ब्राह्मण इत्यादिव्यवहारः स्फटिकस्य जपाकुसुमसंनिधानोपाधिरूपक एव न तात्त्विकः । जपाकुसुमापगमे स्फटिकस्य स्वस्वरूपस्थितिवदन्तःकरणस्य सकलवृत्तिनिरोधे स्वरूपावस्थितिरच्युतैव पुरुषस्य ॥ २ ॥

राजयोगसमाधिश्च उन्मनी च मनोन्मनी ।
अमरत्वं लयस्तत्त्वं शून्याशून्यं परं पदम् ॥ ३ ॥
अमनस्कं तथाऽद्वैतं निरालम्बं निरञ्जनम् ।
जीवन्मुक्तिश्च सहजा तुर्या चेत्येकवाचकाः ॥ ४ ॥

समाधिपर्यायान्विशेषेणाह—राजयोग इत्यादिना श्लोकद्वयेन । स्पष्टम् ॥ ३, ४ ॥

सलिले सैन्धवं यद्वत्साम्यं भजति योगतः ।
तथाऽऽत्ममनसोरैक्यं समाधिरभिधीयते ॥ ५ ॥
यदा संक्षीयते प्राणो मानसं च प्रलीयते ।
तदा समरसत्वं च समाधिरभिधीयते ॥ ६ ॥
तत्समं च द्वयोरैक्यं जीवात्मपरमात्मनोः ।
प्रणष्टसर्वसंकल्पः समाधिः सोऽभिधीयते ॥ ७ ॥

त्रिभिः समाधिमाह—सलिल इति । यद्वद्यथा सैन्धवं सिन्धुदेशोद्भवं लवणं सलिले जले योगतः संयोगात्साम्यं सलिलसाम्यं सलिलैक्यं भजति प्राप्नोति, तथा तद्वदात्मा च मनश्चात्ममनसी तयोरात्ममनसोरैक्यमेकाकारता । आत्मनि धारितं मन आत्माकारं सदात्मसाम्यं भजति तादृशमात्ममनसोरैक्यं समाधिरभिधीयते समाधिशब्देनोच्यत इत्यर्थः ॥ ५—७ ॥

राजयोगस्य माहात्म्यं को वा जानाति तत्त्वतः ।
ज्ञानं मुक्तिः स्थितिः सिद्धिर्गुरुवाक्येन लभ्यते ॥

अथ राजयोगप्रशंसा—राजयोगस्येति । राजयोगस्यानन्तरमेवोक्तस्य माहात्म्यं प्रभावं तत्त्वतो वस्तुतः को वा जानाति ? न कोऽपि जानातीत्यर्थः । तत्त्वतो वक्तुमशक्यत्वेऽप्येकदेशेन राजयोगप्रभावमाह—ज्ञानं स्वस्वरूपापरो-

क्षानुभवो मुक्तिर्विदेहमुक्तिः स्थितिर्निर्विकारस्वरूपावस्थितिरूपा जीवन्मुक्तिः सिद्धिरणिमादिर्गुरुवाक्येन गुरुवचसा लभ्यते। राजयोगादिति शेषः ॥ ८ ॥

दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम्।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥ ९ ॥

दुर्लभ इति। विशेषेण सिण्वन्त्यवबध्नन्ति प्रमातारं स्वसङ्गेनेति विषया ऐहिका दारादय आमुष्मिकाः सुधादयस्तेषां त्यागो भोगेच्छाभावो दुर्लभः। तत्त्वदर्शनमात्मापरोक्षानुभवः दुर्लभं सहजावस्था तुर्यावस्था सद्गुरोः 'दृष्टिः स्थिरा यस्य विनैव दृश्यम्' इति वक्ष्यमाणलक्षणस्य करुणां दयां विनेति सर्वत्र संबध्यते। दुर्लभा लब्धुमशक्या। 'दुः स्यात्कष्टनिषेधयोः' इति कोशः। गुरुकृपया तु सर्वं सुलभमिति भावः ॥ ९ ॥

विविधैरासनैः कुम्भैर्विचित्रैः करणैरपि।
प्रबुद्धायां महाशक्तौ प्राणः शून्ये प्रलीयते ॥ १० ॥

विविधैरिति। विविधैरनेकविधैरासनैर्मत्स्येन्द्रादिपीठैर्विचित्रैर्नानाविधैः कुम्भकैः। विचित्रैरिति काकाक्षिगोलकन्यायेनोभयत्र संबध्यते। विचित्रैरनेकप्रकारकैः करणैर्हठसिद्धौ प्रकृष्टोपकारकैर्महामुद्रादिभिर्महाशक्तौ कुण्डलिन्यां प्रबुद्धायां गत-

निद्रायां सत्यां प्राणो वायुः शून्ये ब्रह्मरन्ध्रे प्रलीयते प्रलयं प्राप्नोति । व्यापाराभावः प्राणस्य प्रलयः ॥ १० ॥

उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः ।
योगिनः सहजावस्था स्वयमेव प्रजायते ॥ ११ ॥

उत्पन्नेति । उत्पन्नो जातः शक्तिबोधः कुण्डलीबोधो यस्य तस्य त्यक्तानि परिहृतानि निःशेषाणि समग्राणि कर्माणि येन तस्य योगिनः । आसनेन कायिकव्यापारे त्यक्ते प्राणेन्द्रियेषु व्यापारस्तिष्ठति । प्रत्याहारधारणाध्यानसंप्रज्ञातसमाधिभिर्मानसिकव्यापारे त्यक्ते बुद्धौ व्यापारस्तिष्ठति । 'असङ्गो ह्ययं पुरुषः' इति श्रुतेरपरिणामी शुद्धपुरुषः सत्त्वगुणात्मिका परिणामिनी बुद्धिरिति ॥ ११ ॥

सुषुम्णावाहिनि प्राणे शून्ये विशति मानसे ।
तदा सर्वाणि कर्माणि निर्मूलयति योगवित् ॥१२॥

परवैराग्येण दीर्घकालसंप्रज्ञाताभ्यासेनैव वा बुद्धिव्यापारे परित्यक्ते निर्विकारस्वरूपावस्थितिर्भवति । सैव सहजावस्था तुर्यावस्था जीवन्मुक्तिः स्वयमेव प्रयत्नान्तरं विनैव प्रजायते प्रादुर्भवति, 'येन त्यजसि तत्त्यज' इति 'निःसङ्गः प्रज्ञया भवेत्' इति च श्रुतेः । सुषुम्णेति । प्राणे वायौ सुषुम्णावाहिनि मध्यनाडीप्रवाहिनि सति मानसेऽन्तःकरणे शून्ये देशकालवस्तु-

परिच्छेदहीने ब्रह्मणि विशति सति तदा तस्मिन् काले योगविच्चित्तवृत्तिनिरोधज्ञः सर्वाणि कर्माणि समारब्धानि निर्मूलानि करोति निर्मूलयति। निर्मूलशब्दात् 'तत्करोति' इति णिच्॥ १२॥

अमराय नमस्तुभ्यं सोऽपि कालस्त्वया जितः।
पतितं वदने यस्य जगदेतच्चराचरम्॥ १३॥

समाध्यभ्यासेन प्रारब्धकर्मणोऽप्यभिभवाज्जितकालं योगिनं नमस्करोति—अमरायेति। न म्रियत इत्यमरः तस्मा अमराय चिरंजीविने तुभ्यं योगिने नमः। सोऽपि दुर्वारोऽपि कालो मृत्युस्त्वया योगिना जितोऽभिभूतः। इदं वाक्यं नमस्करणे हेतुः। स कः? यस्य कालस्य वदने मुखे एतद् दृश्यमानं चराचरं स्थावरजङ्गमं जगत्संसारः पतितः। सोऽपि जगद्भक्षकोऽपीत्यर्थः॥ १३॥

चित्ते समत्वमापन्ने वायौ व्रजति मध्यमे।
तदाऽमरोली वज्रोली सहजोली प्रजायते॥ १४॥

पूर्वोक्तममरोल्यादिकं समाधिसिद्धावेव सिध्यतीति समाधिनिरूपणानन्तरं समाधिसिद्धौ तत्सिद्धिरित्याह—चित्त इति। चित्तेऽन्तःकरणे समत्वं ध्येयाकारवृत्तिप्रवाहत्वम् आपन्ने प्राप्ते सति वायौ प्राणे मध्यमे सुषुम्णायां व्रजति सतीति चित्तसमत्वे

हेतुः । तदा तस्मिन् काले अमरोली वज्रोली सहजोली च पूर्वोक्ताः प्रजायन्ते । नाजितप्राणस्य न चाजितचित्तस्य सिध्यन्तीति भावः ॥ १४ ॥

ज्ञानं कुतो मनसि संभवतीह ताव-
त्प्राणोऽपि जीवति मनो म्रियते न यावत् ।
प्राणो मनो द्वयमिदं विलयं नयेद्यो
मोक्षं स गच्छति नरो न कथंचिदन्यः ॥ १५ ॥

हठाभ्यासं विना ज्ञानं मोक्षश्च सिध्यतीत्याह— ज्ञानमिति । यावत्प्राणो जीवति । अपि शब्दादिन्द्रियाणि जीवन्ति न तु म्रियन्ते । यावन्मनो न म्रियते किं तु जीवत्येव । इडापिङ्गलाभ्यां वहनं प्राणस्य जीवनं स्वस्वविषयग्रहणमिन्द्रियाणां जीवनं नानाविषयाकारवृत्त्युत्पादनं मनसो जीवनं तत्तद्भावतत्तन्मरणमत्र विवक्षितम् । ननु स्वरूपतस्तेषां नाशस्तावन्मनस्यन्तःकरणे ज्ञानमात्मापरोक्षानुभवः कुतः संभवति न । कर्ताऽपि प्राणेन्द्रियमनोवृत्तीनां ज्ञानप्रतिबन्धकत्वादिति भावः । प्राणो मनः इदं द्वयं यो योगी विलयं नाशं नयेत्स मोक्षमात्यन्तिकस्वरूपावस्थानलक्षणं गच्छति प्राप्नोति । ब्रह्मरन्ध्रे निर्व्यापारस्थितिः प्राणस्य लयः, ध्येयाकारावेशात् । विषयान्तरेणापारेण मनसो लयोऽन्यः । अलीनप्राणोऽलीन-

मनाश्च कथंचिदुपायशतेनापि न मोक्षं प्राप्नोतीत्यर्थः । तदुक्तं योगबीजे—' नानाविधैर्विचारैस्तु न साध्यं जायते मनः । तस्मात्तस्य जयः प्रायः प्राणस्य जय एव हि ॥ ' इति, नानामार्गैः सुखदुःखप्रायं कैवल्यं परमं पदं सिद्धमार्गेण लभ्येत नान्यथा शिवभाषितमिति च । सिद्धमार्गो योगमार्गः । एतेन योगं विना ज्ञानं मोक्षश्च न सिध्यतीति सिद्धम् । श्रुतिस्मृतीतिहासपुराणादिषु चेदं प्रसिद्धम् । तथा हि—' अथ तद्दर्शनाभ्युपायो योगः ' इति । तद्दर्शनमात्मदर्शनम् । ' अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ' इति । ' श्रद्धाभक्तिध्यानयोगादवेहि ' इति । ' यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम् । तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् । अप्रमत्तस्तदा भवति ' इति । ' यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दयोपमेनेह युक्तः प्रपश्येत् । अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ' । ' ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीत ' इति । ' त्रिरुन्नतः स्थाप्य समशरीरः हृदीन्द्रियाणि मनसा संनिवेश्य । ब्रह्माहृयेन प्रतरेत विद्वान् स्रोतांऽसि सर्वाणि भयावहानि ' इति । ' ओमित्येवं ध्यायथ आत्मानम् ' इत्याद्याः श्रुतयः । यतिधर्मप्रकरणे मनुः—' भूतभाव्यानवेक्षेत योगेन परमात्मनः । देहद्वयं विहायाशु मुक्तो भवति बन्धनात् ' । याज्ञ-

वल्क्यस्मृतौ—'इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्'। महर्षिमातङ्गः—'अग्निष्टोमादिकान्सर्वान्विहाय द्विजसत्तमः। योगाभ्यासरतः शान्तः परं ब्रह्माधिगच्छति'। 'ब्राह्मणक्षत्रियविशां स्त्रीशूद्राणां च पावनम् । शान्तये कर्मणामन्यद्योगान्नास्ति विमुक्तये'। दक्षस्मृतौ व्यतिरेकमुखेणोक्तम्—'स्वसंवेद्यं हि तद्ब्रह्म कुमारी स्त्रीसुखं यथा । अयोगी नैव जानाति जात्यन्धो हि यथा घटम्' इत्याद्याः स्मृतयः । महाभारते योगमार्गे व्यासः—'अपि वर्णावकृष्टस्तु नारी वा धर्मकाङ्क्षिणी । तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥ यदि वा सर्वधर्मज्ञो यदि वाऽप्यकृती पुमान् । यदि वा धार्मिकः श्रेष्ठो यदि वा पापकृत्तमः ॥ यदि वा पुरुषव्याघ्रो यदि वा क्लैब्यधारकः । नरः सेव्य महादुःखं जरामरणसागरम् । अपि जिज्ञासमानोऽपि शब्दब्रह्मातिवर्तते ॥' इति । भगवद्गीतायाम्—'युञ्जन्नेवं सदाऽऽत्मानं योगी नियतमानसः । शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति । यत्सांख्यैः प्राप्यते स्थानम्' इत्यादि च । आदित्यपुराणे—'योगात्संजायते ज्ञानं योगो मय्येकचित्तता'। स्कान्दपुराणे—'आत्मज्ञानेन मुक्तिः स्यात्तच्च योगादृते न हि । स च योगश्चिरं कालमभ्यासादेव सिध्यति'। कूर्मपुराणे शिववाक्यम्—'अतः परं प्रवक्ष्यामि

योगं परमदुर्लभम् । येनात्मानं प्रपश्यन्ति भानुमन्तमिवेश्वरम् ॥ योगाग्निर्दहति क्षिप्रमशेषं पापपञ्जरम् । प्रसन्नं जायते ज्ञानं ज्ञानान्निर्वाणमृच्छति' । गरुडपुराणे—'तथा यतेत मतिमान्यथा स्यान्निर्वृत्तिः परा । योगेन लभ्यते सा तु न चान्येन तु केनचित् ॥ भवतापेन तप्तानां योगो हि परमौषधम् । परावरप्रसक्ता धीर्यस्य निर्वेदसंभवा ॥ स च योगाग्निना दग्धसमस्तक्लेशसंचयः । निर्वाणं परमं नित्यं प्राप्नोत्येव न संशयः ॥ संप्राप्तयोगसिद्धिस्तु पूर्णो यस्त्वात्मदर्शनात् । न किंचिद् दृश्यते कार्यं तेनैव सकलं कृतम् ॥ आत्मारामः सदा पूर्णः सुखमात्यन्तिकं गतः । अतस्तस्यापि निर्वेदः परानन्दमयस्य च ॥ तपसा भावितात्मानो योगिनः संयतेन्द्रियाः । प्रतरन्ति महात्मानो योगेनैव महार्णवम्' ॥ विष्णुधर्मेषु—'यच्छ्रेयः सर्वभूतानां स्त्रीणामप्युपकारकम् । अपि कीटपतङ्गानां तन्नः श्रेयः परं वद ॥ इत्युक्तः कपिलः पूर्वं देवैर्देवर्षिभिस्तथा । योग एव परं श्रेयस्तेषामित्युक्तवान् पुरा' ॥ वासिष्ठे—'दुःसहा राम संसारविषवेगविषूचिका । योगगारुडमन्त्रेण पावनेनोपशाम्यति' ॥ ननु तत्त्वमस्यादिवाक्यैरप्यपरोक्षप्रमाणं भवतीति किमर्थमतिश्रमसाध्ये योगे प्रयासः कार्यः । न च वाक्यजन्यज्ञानस्यापरोक्षत्वे प्रमाणासंभव

अपरोक्षविषयकत्वात् चाक्षुषघटादिप्रत्यक्षवदित्यनुमानस्य प्रमाणत्वात् । न च विषयगतापरोक्षत्वस्य नीरूपत्वाद्धेत्वसिद्धिरिति वाच्यम् । अज्ञानविषयचित्त्वतत्तादात्म्यापन्नत्वान्यतररूपस्य तस्य सुनिरूपत्वात् । यथा हि घटादौ चक्षुःसंनिकर्षेणान्तःकरणवृत्तिदशायां तदधिष्ठानचैतन्यज्ञाननिवृत्तौ तच्चैतन्यस्याज्ञानविषयता तद्धटस्याज्ञानविषयचैतन्यतादात्म्यापन्नत्वं चापरोक्षत्वम्, तथा तत्त्वमस्यादिवाक्येन शुद्धचैतन्याकारान्तःकरणवृत्त्युत्थापने सति तदज्ञानस्य निवृत्तत्वेनैव तत्त्वस्याज्ञानविषयत्वाच्चैतन्यस्यापरोक्षत्वमिति न हेत्वसिद्धिः । न चाप्रयोजकत्वं ज्ञानगम्यत्वापरोक्षत्वं प्रत्यक्षपरोक्षविषयकत्वेन प्रयोजकत्वात् । न त्विन्द्रियजन्यत्वं मनस इन्द्रियत्वाभावेन सुखादिपरत्वे व्यभिचारात् । अथ वाऽभिव्यक्तचैतन्याभिन्नतयाऽऽभासमानत्वं विषयस्यापरोक्षत्वम् । अभिव्यक्तत्वं च निवृत्तावरणकत्वं परोक्षवृत्तिस्थले वाऽऽवरणनिवृत्त्यभावान्नातिव्याप्तिः । सर्पादिभ्रमजनकदोषवतस्तु नायं सर्पः किं तु रज्जुरिति वाक्येन जायमाना वृत्तिस्तु नावरणं निवर्तयतीति तत्र परोक्ष एव विषयः । वेदान्तवाक्यजन्यं च ज्ञानमावरणनिवर्तकत्वादपरोक्षमेव । तन्मननादेः पूर्वमुत्पन्नम्, ज्ञाननिवर्तकप्रमाणासंभावनादिदोषसामान्याभावविशिष्टस्यैव तस्याज्ञाननिवर्तकत्वात् । किं च 'तं त्वौपनिषदं पुरुषं

पृच्छामि ' इति श्रुतिप्रतिपन्नमुपनिषन्मात्रगम्यत्वं योगगम्यत्वेनोपपन्नं स्यात् । तस्मात्तत्त्वमस्यादिवाक्यादेवापरोक्षमिति चेन्न । अनुमानस्याप्रयोजकत्वात् । न च प्रत्यक्षं प्रति निरुक्ताक्षसामान्यं प्रतीन्द्रियत्वेन कारणतया तज्जन्यत्वस्यैव प्रयोजकत्वान्नित्यानित्यसाधारणप्रत्यक्षत्वे तु न किंचित्प्रयोजकत्वमिति तन्मते तु प्रत्यक्षविशेषे इन्द्रियं कारणं तद्विशेषे च शब्दविशेष इत्येवं कार्यकारणभावद्वयं स्यात् । न च मनसोऽनिन्द्रियत्वं मनस इन्द्रियत्वे बाधकाभावादिन्द्रियाणां मनो नाथ इति मनुष्यमिवोद्दिश्य मनुष्याणामयं राजेत्यादिवदिन्द्रियेष्वेव किंचिदुत्कर्षं ब्रवीति । न तु तस्याप्यनिन्द्रियत्वं तत्त्वं च षट्स्वखण्डोपाधिविशेष एव । अत एव ' कर्मेन्द्रियं तु पाय्वादि मनोनेत्रादि धीन्द्रियम् ' इति ' प्रत्यक्षं स्यादैन्द्रियकमप्रत्यक्षमतीन्द्रियम् ' इति च शक्तिप्रमाणभूतकोशेऽपीन्द्रियाप्रमाणकज्ञानस्याप्रत्यक्षत्वं वदन् मनस इन्द्रियत्वज्ञापकत्वं संगच्छते । ' इन्द्रियाणि दशैकं च ' इति गीतावचनं मनस इन्द्रियत्वे प्रमाणम् । किं च तत्त्वमस्यादिवाक्यजन्यं ज्ञानं शाब्दम्, शब्दजन्यत्वाद्यजेतेत्यादिवाक्यज्ञानवदित्यनेनापरोक्षविरोधिशाब्दत्वसाधकत्वे सत्प्रतिपक्षः । न चेदमप्रयोजकम्, शाब्दं प्रत्येव शब्दस्य जनकत्वेन लाघवमूलकानुकूलतर्कात् । त्वन्मते तु शब्दादपि प्रत्यक्षस्वीकारेण

कार्यकारणभावद्वयकल्पने गौरवम्। अपि च मनननिदिध्यासनाभ्यां पूर्वमप्युत्पन्नम्। तव मते परोक्षमपि नाज्ञाननिवर्तकमित्यज्ञाननिवृत्तिं प्रति बाधज्ञानत्वेनैव हेतुत्वमिति गौरवम्। मम तु समाध्यभ्यासपरिपाकेणासंभावनादिसकलमलरहितेनान्तःकरणेनात्मनि दृष्टे सति दर्शनमात्रादेवाज्ञाने निवृत्ते न कश्चिद्गौरवावकाशः। 'एषु सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः'॥ 'यच्छेद्वाङ्मनसी प्राज्ञः' इत्यारभ्याज्ञाननिवृत्त्यर्थकेन 'मृत्युमुखात्प्रमुच्यते' इत्यन्तेन कठवल्लीस्थमृत्यूपदेशेन संमतोऽयमर्थ इति न कश्चिदत्र विवाद इति। यदि तु मननादेः पूर्वमुत्पन्नं ज्ञानं परोक्षमेवेति न प्रतिबद्धत्वकृतगौरवमिति मतमाद्रियते तदपि श्रवणादिभिर्मनःसंस्कारे सिद्धेऽव्यवहितोत्तरमात्मदर्शनसंभवात्तदुत्तरं वाक्यस्मरणादिकल्पनं महद्गौरवापादकमेव। ननु न वयं केवलेन तर्केण शब्दजन्यज्ञानस्यापरोक्षत्वं वदामः किं तु श्रुत्याऽपि। तथा हि—तं त्वौपनिषदं पुरुषं पृच्छामि' इति श्रुत्या चौपनिषदत्वं पुरुषस्य नोपनिषज्जन्यबुद्धिविषयत्वमात्रं प्रत्यक्षादिगम्येऽप्यौपनिषदत्वव्यवहारापत्तेः। यथा हि द्वादशकपालेऽष्टानां कपालानां सत्त्वेऽपि द्वादशकपालसंस्कृते नाष्टाकपालादिव्यवहारः यथा द्विपुत्रादावेकपुत्रादिव्यहारः, तथाऽत्रापि नान्यत्र तथा

व्यवहार इति । उपनिषन्मात्रगम्यत्वमेव प्रत्ययार्थः । तच्च मनोगम्यत्वेऽनुपपन्नमिति चेन्न । न हि प्रत्ययेनोपनिषद्भिन्नं सर्वं कारणत्वेन व्यावर्त्यते । शब्दापरोक्षवादिना त्वयाऽप्यात्मापरोक्षे मनआदीनां करणत्वस्याङ्गीकारात् । किं तु पुराणादिशब्दान्तरमेव 'श्रोतव्यः श्रुतिवाक्येभ्यः' इति स्मरणात्स चार्थो ममापि संमत इति न किंचिदेतत् । प्रमाणान्तरव्यावृत्तौ तात्पर्यकल्पनं चात्मापरोक्षे शब्दस्य प्रमाणत्वे सिद्ध एव वक्तुमुचितम् । शब्दान्तरव्यावृत्तितात्पर्यं तु श्रुत्यादिसंमतत्वात्कल्पयितुमुचितमेव। एवं स्थिते 'मनसैवानुद्रष्टव्यम्' 'मनसैवेदमाप्तव्यम्' इत्यादिश्रुतयोऽप्याञ्जस्येन प्रतिपादिता भवेयुः । यत्तु कैश्चिदुक्तं दर्शनवृत्तिं प्रति मनोमात्रस्योपादानत्वपरायत्ताः श्रुतयो न विरुध्यन्त इति तदतीव विचारासहम् । यतः प्रमाणाकाङ्क्षायां प्रवृत्तास्ताः कथमुपादानपरा भवेयुः । 'कामः संकल्पो विचिकित्सा—' इत्यादिश्रुत्या सावधारणया सर्वासां वृत्तीनां मनोमात्रोपादानकत्वे बोधिते आकाङ्क्षाभावेनोपादानतात्पर्यकत्वेन वर्णयितुं कथं शक्येरन् । पूर्वं द्वितीयवल्ल्यां प्रणवस्य ब्रह्मबोधकत्वेनोक्तेस्तस्याप्यपरोक्षहेतुत्वमिति शङ्कां निवारयितुं मनसैवानुद्रष्टव्यमित्यादि सावधारणवाक्यानीत्येव वर्णयितुं शक्यानि स्युरित्यलमतिवाग्जालेन । वस्तुतस्तु योगिनां समाधौ दूरविप्रकृष्टपदार्थज्ञानं सर्वशास्त्रप्रसिद्धं न परोक्षम्,

तदानीं परोक्षसामग्र्यभावात् । नापि स्मरणं तेषां पूर्वं विशिष्यानुभवात् । नापि सुखादिज्ञानवत्साक्षिरूपम्, अपसिद्धान्तात् । नाप्यप्रमाणकं प्रमासामान्ये कारणनियमात् । नापि चक्षुरादिजन्यं तेषामसंनिकर्षात् । तस्मान्मानसिकी प्रमैव सा वाच्येति मनस इन्द्रियत्वं प्रमाणत्वं च दूरापह्नवमेवेति । येऽपि योगश्रुत्योः समुच्चयं कल्पयन्ति तेषामपि पूर्वोक्तदूषणगणस्तदवस्थ एव । तस्माद्योगजन्यसंस्कारसचिवमनोमात्रगम्य आत्मेति सिद्धम् । न च कामिनीं भावयतो व्यवहितकामिनीसाक्षात्कारस्येव भावनाजन्यत्वेनात्मसाक्षात्कारस्याप्रमाणत्वप्रसङ्गः, अबाधितविषयत्वाद्दोषजन्यत्वाभावाच्च । कामिनीसाक्षात्कारस्य तु बाधितविषयत्वाद्दोषजन्यत्वाच्चाप्रामाण्यं न भावनाजन्यत्वात् । न च भावनासमाधेर्ज्ञापकत्वे प्रमाणान्तरापातः । तस्या मनःसहकारित्वात्प्रमाणनिरूपणानिपुणैर्नैयायिकादिभिरपि योगजप्रत्यक्षस्यालौकिकप्रत्यक्षेऽन्तर्भावः कृतः । योगजालौकिकसंनिकर्षेण योगिनो व्यवहितविप्रकृष्टसूक्ष्मार्थमात्मानमपि यथार्थं पश्यन्ति । तथा च पातञ्जले सूत्रे—'ऋतंभरा तत्र प्रज्ञा । श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ।' तत्र समाधौ या प्रज्ञाऽस्याः श्रुतं श्रवणं शाब्दबोधः, अनुमननमनुमानं यौक्तिकज्ञानं तद्रूपप्रज्ञाभ्यामन्यविषया विषयाः । कुतः ? विशेषार्थत्वात् । विशेषो निर्वि-

कल्पोऽर्थो विषयो यस्याः सा तथा तस्या भावस्तथात्वं तस्माच्छब्दस्यापदार्थतावच्छेदकपुरस्कारेणैवानुमानस्य व्यापकत्वावच्छेदकपुरस्कारेणैव धीजनकत्वनियमेन तद्ग्रहणे योग्यविशेष्यमात्रपरत्वादित्यर्थः। अत्र बादरायणकृतं भाष्यम्— श्रुतमागमविज्ञानं तत्सामान्यविषयं न ह्यागमेन शक्यो विशेषोऽभिधातुं कस्मान्न हि विशेषेण कृतसंकेतः शब्द इत्यारभ्य समाधिप्रज्ञानिर्ग्राह्य एव सविशेषो भूतसूक्ष्मगतो वा पुरुषगतो वेति। योगबीजे—'ज्ञाननिष्ठो विरक्तोऽपि धर्मज्ञोऽपि जितेन्द्रियः। विना योगेन देवोऽपि न मोक्षं लभते प्रिये'॥ किं च, 'तदेव सक्तः सह कर्मणेति। लिङ्गं मनो यत्र निषिक्तमस्य' इति श्रुतेः, 'कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु' इति स्मृतेश्च देहावसानसमये यत्र रागाद्युद्बुद्धो भवति तामेव योनिं जीवः प्राप्नोतीति योगहीनस्य जन्मान्तरं स्यादेव मरणसमये समुद्भूतवैक्लव्यस्यायोगिना वारायितुमशक्यत्वात्। तदुक्तं योगबीजे—'देहावसानसमये चित्ते यद्यद्विभावयेत्। तत्तदेव भवेज्जीव इत्येवं जन्मकारणम्॥ देहान्ते किं भवेज्जन्म तन्न जानन्ति मानवाः। तस्माज्ज्ञानं च वैराग्यं जपश्च केवलं श्रमः॥ पिपीलिका यदा लग्ना देहे ज्ञानाद्विमुच्यते। असौ किं वृश्चिकैर्दष्टो

ध्यात्मभावनया मोक्ष एवेति न स्याज्जन्मान्तरम्। तदुक्तं भगवता—'प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव' इत्यादिना। 'शतं चैका च हृदयस्य नाड्यः' इत्यादि श्रुतेश्च। न च तत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानजनकत्वे तद्विचारस्य वैयर्थ्यमेवेति शङ्क्यम्, वाक्यविचारजन्यज्ञानस्य योगद्वाराऽपरोक्षज्ञानसाधनत्वात्। अत्र च योगबीजे गौरीश्वरसंवादो महानस्ति ततः किंचिल्लिख्यते। देव्युवाच—'ज्ञानिनस्तु मृता ये वै तेषां भवति कीदृशी। गतिः कथय देवेश कारुण्यामृतवारिधे'॥ ईश्वर उवाच—'देहान्ते ज्ञानिना पुण्यात्पापात्फलमवाप्यते। यादृशं तु भवेत्तत्तद्भुक्त्वा ज्ञानी पुनर्भवेत्॥ पश्चात्पुण्येन लभते सिद्धेन सह सङ्गतिम्। ततः सिद्धस्य कृपया योगी भवति नान्यथा॥ ततो नश्यति संसारो नान्यथा शिवभाषितम्'॥ देव्युवाच—'ज्ञानादेव हि मोक्षं च वदन्ति ज्ञानिनः सदा। न कथं सिद्धयोगेन योगः किं मोक्षदो भवेत्'॥ ईश्वर उवाच—'ज्ञानेनैव हि मोक्षो हि तेषां वाक्यं तु नान्यथा। सर्वे वदन्ति खड्गेन जयो भवति तर्हि किम्॥ विना युद्धेन वीर्येण कथं जयमवाप्नुयात्। तथा योगेन रहितं ज्ञानं मोक्षाय नो भवेत्'। ननु जनकादीनां योगमन्तरेणाप्यप्रतिबद्धज्ञानमोक्षयोः श्रवणात्कथं योगादेवाप्रति-

बद्धज्ञानं मोक्षश्चेति चेत्। उच्यते—तेषां पूर्वजन्मानुष्ठितयोगजसंस्काराज्ज्ञानप्राप्तिरिति पुराणादौ श्रूयते। तथा हि—'जैगीषव्यो यथा विप्रो यथा चैवासितादयः। क्षत्रिया जनकाद्यास्तु तुलाधारादयो विशः॥ संप्राप्ताः परमां सिद्धिं पूर्वाभ्यस्तस्वयोगतः। धर्मव्याधादयः सप्त शूद्राः पैलवकादयः॥ मैत्रेयी सुलभा शार्ङ्गी शाण्डिली च तपस्विनी। एते चान्ये च बहवो नीचयोनिगता अपि। ज्ञाननिष्ठां परां प्राप्ताः पूर्वाभ्यस्तस्वयोगतः॥' इति। किं च पूर्वजन्मानुष्ठितयोगाभ्यासपुण्यतारतम्येन केचिद्ब्रह्मत्वं केचिद्ब्रह्मपुत्रत्वं केचिद्देवर्षित्वं केचिद्ब्रह्मर्षित्वं केचिन्मुनित्वं केचिद्भक्तत्वं च प्राप्ताः सन्ति। तत्रोपदेशमन्तरेणैवात्मसाक्षात्कारवन्तो भवेयुः। तथा हि—हिरण्यगर्भवसिष्ठनारदसनत्कुमारवामदेवशुकादयो जन्मसिद्धा इत्येव पुराणादिषु श्रूयते। यत्तु ब्राह्मण एव मोक्षाधिकारीति श्रूयते पुराणादौ तदयोगिपरम्। तदुक्तं गरुडपुराणे—'योगाभ्यासो नृणां येषां नास्ति जन्मान्तरादृतः। योगस्य प्राप्तये तेषां शूद्रवैश्यादिकक्रमः॥ स्त्रीत्वाच्छूद्रत्वमभ्येति ततो वैश्यत्वमाप्नुयात्। ततश्च क्षत्रियो विप्रः क्रुपाहीनस्ततो भवेत्॥ अनूचानः स्मृतो यज्वा कर्मन्यासी ततः परम्। ततो ज्ञानित्वमभ्येति योगी मुक्तिं क्रमाल्लभेत्॥' इति।

योगे सर्वाधिकारश्रवणाद्योगोत्पन्नतत्त्वज्ञानेन सर्व एव मुच्यन्त इति सिद्धम् । योगिनस्तु भ्रष्टस्यापि न शूद्रादिक्रमः । 'शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते । अथ वा योगिनामेव' इत्यादिभगवद्वचनादित्यलम् ॥ १५ ॥

ज्ञात्वा सुषुम्णासद्भेदं कृत्वा वायुं च मध्यगम् ।
स्थित्वा सदैव सुस्थाने ब्रह्मरन्ध्रे निरोधयेत् ॥१६॥

प्राणमनसोर्लयं विना मोक्षो न सिध्यतीत्युक्तम् । तत्र प्राणलयेन मनसोऽपि लयः सिध्यतीति तल्लयरीतिमाह— ज्ञात्वेति । सदैव सर्वदैव सुस्थाने शोभने स्थाने 'सुराज्ये धार्मिके देशे' इत्याद्युक्तलक्षणे स्थित्वा स्थितिं कृत्वा वसतिं कृत्वेत्यर्थः । सुषुम्णा मध्यनाडी तस्याः सद्भेदं शोभनं भेदनप्रकारं ज्ञात्वा गुरुमुखाद्विदित्वा वायुं प्राणं मध्यगं मध्यनाडीसंचारिणं कृत्वा ब्रह्मरन्ध्रे मूर्धावकाशे निरोधयेन्नितरां रुद्धं कुर्यात् । प्राणस्य ब्रह्मरन्ध्रे निरोधो लयः प्राणलये जाते मनोऽपि लीयते । तदुक्तं वासिष्ठे—'अभ्यासेन परिस्पन्दे प्राणानां क्षयमागते । मनः प्रशममायाति निर्वाणमवशिष्यते ॥' इति । प्राणमनसोर्लये सति भावनाविशेषरूपसमाधिसहकृतेनान्तःकरणेनाबाधितात्मसाक्षात्कारो भवति, तदा जीवन्नेव मुक्तः पुरुषो भवति ॥ १६ ॥

सूर्याचन्द्रमसौ धत्तः कालं रात्रिंदिवात्मकम् ।
भोक्त्री सुषुम्णा कालस्य गुह्यमेतदुदाहृतम् ॥ १७ ॥

प्राणलये कालजयो भवतीत्याह—सूर्याचन्द्रमसाविति। सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ। 'देवताद्वन्द्वे च' इत्यानङ्। रात्रिश्च दिवा च रात्रिंदिवम्। 'अचतुर—' इत्यादिना निपातितः। रात्रिंदिवमात्मा स्वरूपं यस्य स रात्रिंदिवात्मकस्तं रात्रिंदिवात्मकं कालं समयं धत्तो विधत्तः कुरुतः। सुषुम्णा सरस्वती कालस्य सूर्याचन्द्रमोभ्यां कृतस्य रात्रिंदिवात्मकस्य समयस्य भोक्त्री भक्षिका विनाशिका। एतद्गुह्यं रहस्यमुदाहृतं कथितम्। अयं भावः—सार्धं घटिकाद्वयं सूर्यो वहति सार्धं घटिकाद्वयं चन्द्रो वहति। यदा सूर्यो वहति तदा दिनमुच्यते। यदा चन्द्रो वहति तदा रात्रिरुच्यते। पञ्चघटिकामध्ये रात्रिंदिवात्मकः कालो भवति। लौकिकाहोरात्रमध्ये योगिनां द्वादशाहोरात्रात्मकः कालव्यवहारो भवति। तादृशकालमानेन जीवानामायुर्मानमस्ति। यदा सुषुम्णामार्गेण वायुर्ब्रह्मरन्ध्रे लीनो भवति तदा रात्रिंदिवात्मकस्य कालस्याभावादुक्तं भोक्त्री सुषुम्णा कालस्येति। यावद्ब्रह्मरन्ध्रे वायुर्लीयते तावद्योगिन आयुर्वर्धते। दीर्घकालाभ्यस्तसमाधिर्योगी पूर्वमेव मरणकालं ज्ञात्वा ब्रह्मरन्ध्रे वायुं नीत्वा कालं निवारयति स्वेच्छया देहत्यागं च करोतीति ॥ १७ ॥

द्वासप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ।
सुषुम्णा शांभवी शक्तिः शेषास्त्वेव निरर्थकाः ॥१८॥

द्वासप्ततीति । पञ्जरे पञ्जरवत्सिरास्थिभिर्बद्धे शरीरे द्वाभ्यामधिका सप्ततिः द्वासप्ततिः द्वासप्ततिसंख्याकानि सहस्राणि नाडीनां सिराणां द्वाराणि वायुप्रवेशमार्गाः सन्ति । सुषुम्णा मध्या नाडी शांभवी शक्तिरस्ति । शं सुखं भवत्यस्माद्भक्तानामिति शंभुरीश्वरस्तस्येयं शांभवी, ध्यानेन शंभुप्रापकत्वात् , शंभोराविर्भावजनकत्वाद्वा शांभवी । यद्वा शं सुखरूपो भवति तिष्ठतीति शंभुरात्मा तस्येयं शांभवी । चिदभिव्यक्तिस्थानत्वाद्ध्यानेनात्मसाक्षात्कारहेतुत्वाच्च । शेषा इडापिङ्गलादयस्तु निरर्थका एव निर्गतोऽर्थः प्रयोजनं यासां ता निरर्थकाः, पूर्वोक्तप्रयोजनाभावात् ॥ १८ ॥

वायुः परिचितो यस्मादग्निना सह कुण्डलीम् ।
बोधयित्वा सुषुम्णायां प्रविशेदनिरोधतः ॥ १९ ॥

वायुरिति । यस्मात्परिचितोऽभ्यस्तो वायुस्तस्मादग्निना जठराग्निना सह कुण्डलीं शक्तिं बोधयित्वा अनिरोधतोऽप्रतिबन्धात्सुषुम्णायां सरस्वत्यां प्रविशेत् वायोः सुषुम्णाप्रवेशार्थमभ्यासः कर्तव्य इत्यर्थः ॥ १९ ॥

सुषुम्णावाहिनि प्राणे सिध्यत्येव मनोन्मनी ।
अन्यथा त्वितराभ्यासाः प्रयासायैव योगिनाम् ॥

सुषुम्णेति । प्राणे सुषुम्णावाहिनि सति मनोन्मनी उन्मन्यवस्था सिध्यत्येव । अन्यथा प्राणे सुषुम्णावाहिन्यसति तु इतराभ्यासाः सुषुम्णेतराभ्यासाः योगिनां योगाभ्यासिनां प्रयासायैव श्रमायैव भवन्तीत्यर्थः ॥ २० ॥

पवनो बध्यते येन मनस्तेनैव बध्यते ।
मनश्च बध्यते येन पवनस्तेन बध्यते ॥ २१ ॥

पवन इति । येन योगिना पवनः प्राणवायुर्बध्यते बद्धः क्रियते तेनैव योगिना मनो बध्यते । येन मनो बध्यते तेन पवनो बध्यते । मनःपवनयोरेकतरे बद्धे उभयं बद्धं भवतीत्यर्थः ॥ २१ ॥

हेतुद्वयं तु चित्तस्य वासना च समीरणः ।
तयोर्विनष्ट एकस्मिंस्तौ द्वावपि विनश्यतः ॥ २२ ॥

हेतुद्वयं तु चित्तस्येति । चित्तस्य प्रवृत्तौ हेतुद्वयं कारणद्वयमस्ति, किं तदित्याह । वासना भावनाख्यः संस्कारः समीरणः प्राणवायुश्च तयोर्वासनासमीरणयोरेकस्मिन्विनष्टे सति क्षीणे सति तौ द्वावपि विनश्यतः । अयमाशयः—वासनाक्षये समीरणचित्ते क्षीणे भवतः । समीरणे क्षीणे चित्त-

वासने क्षीणे भवतः। चित्ते क्षीणे समीरणवासने क्षीणे भवतः। तदुक्तं वासिष्ठे—'द्वे बीजे राम चित्तस्य प्राणस्पन्दनवासने। एकस्मिंश्च तयोर्नष्टे क्षिप्रं द्वे अपि नश्यतः॥' तत्रैव व्यतिरेकेणोक्तम्—'यावद्विलीनं न मनो न तावद्वासनाक्षयः। न क्षीणा वासना यावच्चित्तं तावन्न शाम्यति॥ न यावद्याति विज्ञानं न तावच्चित्तसंक्षयः। यावन्न चित्तोपशमो न तावत्तत्त्ववेदनम्॥ यावन्न वासनानाशस्तावत्तत्त्वागमः कुतः। यावन्न तत्त्वसंप्राप्तिर्न तावद्वासनाक्षयः॥ तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च। मिथः कारणतां गत्वा दुःसाध्यानि स्थितान्यतः॥ त्रय एते समं यावन्न स्वभ्यस्ता मुहुर्मुहुः। तावन्न तत्त्वसंप्राप्तिर्भवत्यपि समाश्रितैः'॥ २२॥

मनो यत्र विलीयेत पवनस्तत्र लीयते।
पवनो लीयते यत्र मनस्तत्र विलीयते॥ २३॥

मन इति। यत्र यस्मिन्नाधारे मनो लीयते तत्र तस्मिन्नाधारे पवनो विलीयत इत्यन्वयः॥ २३॥

दुग्धाम्बुवत्संमिलितावुभौ तौ
तुल्यक्रियौ मानसमारुतौ हि।
यतो मरुत्तत्र मनःप्रवृत्ति-
र्यतो मनस्तत्र मरुत्प्रवृत्तिः॥ २४॥

दुग्धाम्बुवदिति । दुग्धाम्बुवत्क्षीरनीरवत्संमिलितौ सम्यक् मिलितौ तावुभौ द्वावपि मानसमारुतौ मानसं च मारुतश्च मानसमारुतौ चित्तप्राणौ तुल्यक्रियौ तुल्या समा क्रिया प्रवृत्तिर्ययोस्तादृशौ भवतः । तुल्यक्रियत्वमेवाह—यत इति । यतः यत्र । सार्वविभक्तिकस्तसिः । यस्मिन् चक्रे मरुद्वायुः प्रवर्तते तत्र तस्मिन् चक्रे मनःप्रवृत्तिः मनसः प्रवृत्तिर्भवति । यतो यस्मिन् चक्रे मनः प्रवर्तते तत्र तस्मिन् चक्रे मरुत्प्रवृत्तिः वायोः प्रवृत्तिर्भवतीत्यर्थः । तदुक्तं वासिष्ठे—'अविनाभाविनी नित्यं जन्तूनां प्राणचेतसी । कुसुमामोदवन्मिश्रे तिलतैले इवास्थिते । कुरुतश्च विनाशेन कार्यं मोक्षाख्यमुत्तमम् ॥' इति ॥ २४ ॥

तत्रैकनाशादपरस्य नाश
एकप्रवृत्तेरपरप्रवृत्तिः ।
अध्वस्तयोश्चेन्द्रियवर्गवृत्तिः
प्रध्वस्तयोर्मोक्षपदस्य सिद्धिः ॥ २५ ॥

तत्रेति । तत्र तयोर्मानसमारुतयोर्मध्ये एकस्य मानसस्य मारुतस्य वा नाशाल्लयादपरस्यान्यस्य मारुतस्य मानसस्य वा नाशो लयो भवति । एकप्रवृत्तेरेकस्य मानसस्य मारुतस्य वा प्रवृत्तेर्व्यापारादपरप्रवृत्तिरपरस्य मारुतस्य मानसस्य वा प्रवृत्ति-

र्व्यापारो भवति। अध्वस्तयोरलीनयोर्मानसमारुतयोः सतो-रिन्द्रियवर्गवृत्तिरिन्द्रियसमुदायस्य स्वस्वविषये प्रवृत्तिर्भवति। प्रध्वस्तयोः प्रलीनयोस्तयोः सतोर्मोक्षपदस्य मोक्षाख्यपदस्य सिद्धिर्निष्पत्तिर्भवति। तयोर्लये पुरुषस्य स्वरूपेऽवस्थानादि-त्यर्थः। 'तत्रापि साध्यः पवनस्य नाशः षडङ्गयोगादिनि-षेवणेन। मनोविनाशस्तु गुरोः प्रसादान्निमेषमात्रेण सुसाध्य एव॥' योगबीजे मूलश्लोकस्यायमुत्तरः श्लोकः॥ २५॥

रसस्य मनसश्चैव चञ्चलत्वं स्वभावतः।
रसो बद्धो मनो बद्धं किं न सिध्यति भूतले॥२६॥

रसस्येति। रसस्य पारदस्य मनसो मानसस्य स्वभावतः स्वभावाच्चञ्चलत्वं चाञ्चल्यमस्ति। रसः पारदो बद्धश्चेन्मनश्चित्तं बद्धं भवति। ततो भूतले पृथिवीतले किं न सिध्यति? सर्वं सिध्यतीत्यर्थः॥ २६॥

मूर्च्छितो हरते व्याधीन्मृतो जीवयति स्वयम्।
बद्धः खेचरतां धत्ते रसो वायुश्च पार्वति॥ २७॥

तदेवाह—मूर्च्छित इति। ओषधिविशेषयोगेन गतचापलो रसो मूर्च्छितः कुम्भकान्ते रेचकनिवृत्तो वायुर्मूर्च्छित इत्युच्यते। हे पार्वतीति पार्वतीसुबोधायेश्वरवाक्यम्। मूर्च्छितो रसः पारदो वायुः प्राणश्च व्याधीन् रोगान् हरते नाशयति।

भस्मीभूतो रसो ब्रह्मरन्ध्रे लीनो वायुश्च मृतः स्वयमात्मना स्वसामर्थ्येनेत्यर्थः । जीवयति दीर्घकालं जीवनं करोति । क्रियाविशेषेण गुटिकाकारकृतो रसः बद्धो भ्रूमध्यादौ धारणाविशेषेण धृतो वायुश्च बद्धः खेचरतामाकाशगतिं धत्ते विधत्ते करोतीत्यर्थः । तदुक्तं गोरक्षकशतके—'यद्भिन्नाञ्जनपुञ्जसंनिभमिदं वृत्तं भ्रुवोरन्तरे तत्त्वं वायुमयं यकारसहितं तत्रेश्वरो देवता । प्राणं तत्र विलाप्य पञ्चघटिकं चित्तान्वितं धारयेदेषा खे गमनं करोति यमिनां स्याद्वायुना धारणा ॥' इति ॥२७॥

मनःस्थैर्ये स्थिरो वायुस्ततो बिन्दुः स्थिरो भवेत् ।
बिन्दुस्थैर्यात्सदा सत्त्वं पिण्डस्थैर्यं प्रजायते ॥ २८ ॥

मनःस्थैर्य इति । मनसः स्थैर्ये सति वायुः प्राणः स्थिरो भवेत् । ततो वायुस्थैर्याद्बिन्दुर्वीर्यं स्थिरो भवेत् । बिन्दोः स्थैर्यात्सदा सत्त्वं बलं पिण्डस्थैर्यं देहस्थैर्यं प्रजायते ॥ २८ ॥

इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः ।
मारुतस्य लयो नाथः स लयो नादमाश्रितः ॥२९॥

इन्द्रियाणामिति । इन्द्रियाणां श्रोत्रादीनां मनोऽन्तःकरणं नाथः प्रवर्तकः । मनोनाथो मनसो नाथो मारुतः प्राणः । मारुतस्य प्राणस्य लयो मनोविलयो नाथः । स लयो मनोलयः नादमाश्रितो नादे मनो लीयत इत्यर्थः ॥ २९ ॥

सोऽयमेवास्तु मोक्षाख्यो माऽस्तु वाऽपि मतान्तरे ।
मनःप्राणलये कश्चिदानन्दः संप्रवर्तते ॥ ३० ॥

सोऽयमिति । सोऽयमेव चित्तलय एव मोक्षाख्यो मोक्ष-पदवाच्यः । मतान्तरेऽन्यमते माऽस्तु वा । चित्तलयस्य सुषुप्तावपि सत्त्वान्मनःप्राणयोर्लये सति कश्चिदनिर्वाच्य आनन्दः संप्रवर्तते सम्यक् प्रवृत्तो भवति । अनिर्वाच्यानन्दाविर्भावे जीवन्मुक्तिसुखं भवत्येवेति भावः ॥ ३० ॥

प्रणष्टश्वासनिःश्वासः प्रध्वस्तविषयग्रहः ।
निश्चेष्टो निर्विकारश्च लयो जयति योगिनाम् ॥३१॥

प्रणष्टेति । श्वासश्च निःश्वासश्च श्वासनिःश्वासौ प्रणष्टौ लीनौ श्वासनिःश्वासौ यस्मिन् स तथा बाह्यवायोरन्तः प्रवेशनं श्वासः अन्तः स्थितस्य वायोर्बहिर्निःसरणं निःश्वासः । प्रध्वस्तः प्रकर्षेण ध्वस्तो नष्टो विषयाणां शब्दादीनां ग्रहो ग्रहणं यस्मिन् निर्गता चेष्टा कायक्रिया यस्मिन् निर्गतो विकारोऽन्तः-करणक्रिया यस्मिन् एतादृशो योगिनां लयोऽन्तःकरणवृत्तेर्ध्येया-कारा वृत्तिर्जयति सर्वोत्कर्षेण वर्तते ॥ ३१ ॥

उच्छिन्नसर्वसंकल्पो निःशेषाशेषचेष्टितः ।
स्वावगम्यो लयः कोऽपि जायते वागगोचरः ॥३२॥

उच्छिन्नेति । उच्छिन्ना नष्टाः सर्वे संकल्पा मनःपरिणामा यस्मिन् स तथा, निर्गतः शेषो यस्मात्तानि निःशेषाण्यशेषाणि चेष्टितानि यस्मिन् स तथा, स्वेनैवावगन्तुं बोद्धुं शक्यः स्वावगम्यः वाचामगोचरोऽविषयः कोऽपि विलक्षणो लयः जायते योगिनां प्रादुर्भवति ॥ ३२ ॥

यत्र दृष्टिर्लयस्तत्र भूतेन्द्रियसनातनी ।
सा शक्तिर्जीवभूतानां द्वे अलक्ष्ये लयं गते ॥ ३३ ॥

यत्र दृष्टिरिति । यत्र यस्मिन्विषये ब्रह्मणि दृष्टिरन्तःकरण-वृत्तिस्तत्रैव लयो भवति । भूतानि पृथिव्यादीनि इन्द्रियाणि श्रोत्रादीनि सनातनानि शाश्वतानि यस्यां सा सत्कार्यवादेऽवि-द्यायां कार्यजातस्य सत्त्वात् । जीवभूतानां प्राणिनां शक्तिर्विद्या इमे द्वे अलक्ष्ये ब्रह्मणि लयं गते योगिनामिति शेषः ॥ ३३ ॥

लयो लय इति प्राहुः कीदृशं लयलक्षणम् ।
अपुनर्वासनोत्थानाल्लयो विषयविस्मृतिः ॥ ३४ ॥

लय इति । लय इति प्राहुर्वदन्ति बहवः । लयस्य लक्षणं लयस्वरूपं कीदृशमिति प्रश्नपूर्वकं लयस्वरूपमाह— अपुनरिति । अपुनर्वासनोत्थानात्पुनर्वासनोत्थानाभावाद्विषय-विस्मृतिर्विषयाणां शब्दादीनां ध्येयाकारस्य विषयस्य वा विस्मृ-

वेदशास्त्रपुराणानि सामान्यगणिका इव ।
एकैव शांभवी मुद्रा गुप्ता कुलवधूरिव ॥ ३५ ॥

वेदेति । वेदाश्चत्वारः शास्त्राणि षट् पुराणान्यष्टादश सामान्या गणिका इव वेश्या इव, बहुपुरुषगम्यत्वात् । एका शांभवी मुद्रैव कुलवधूरिव कुलस्त्रीव गुप्ता, पुरुषविशेषगम्यत्वात् ॥ ३५ ॥

अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जिता ।
एषा सा शांभवी मुद्रा वेदशास्त्रेषु गोपिता ॥ ३६ ॥

चित्तलयाय प्राणलयसाधनीभूतां मुद्रां विवक्षुस्तत्र शांभवीं मुद्रामाह—अन्तर्लक्ष्यमिति । अन्तः आधारादिब्रह्मरन्ध्रान्तेषु चक्रेषु मध्ये स्वाभिमते चक्रे लक्ष्यमन्तःकरणवृत्तिः । बहिर्देहाद्बहिःप्रदेशे दृष्टिः? चक्षुःसंबन्धः । कीदृशी दृष्टिः? निमेषोन्मेषवर्जिता निमेषः पक्ष्मसंयोगः उन्मेषः पक्ष्मसंयोगविश्लेषः ताभ्यां वर्जिता रहिता चित्तस्य ध्येयाकारावेशे निमेषोन्मेषवर्जिता दृष्टिर्भवति । सोक्तैषा मुद्रा शांभवी शंभोरियं शांभवी शिवप्रिया शिवाविर्भावजनिका वा भवति । कीदृशी? वेदशास्त्रेषु गोपिता वेदेषु ऋगादिषु शास्त्रेषु सांख्यपातञ्जलादिषु गोपिता रक्षिता ॥ ३६ ॥

अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ।
मुद्रेयं खलु शांभवी भवति सा लब्धा प्रसादाद् गुरोः
शून्याशून्यविलक्षणं स्फुरति तत्त्वं परं शांभवम् ॥३७॥

शांभवीं मुद्रामभिनीय दर्शयति—अन्तर्लक्ष्येति । यदा यस्यामवस्थायामन्तः अनाहतपद्मादौ यल्लक्ष्यं सगुणेश्वरमूर्त्यादिकं तत्त्वमस्यादिवाक्यलक्ष्यं जीवेश्वराभिन्नमहं ब्रह्मास्मीति वाक्यार्थभूतं ब्रह्म वा तस्मिन्विलीनौ विशेषेण लीनौ चित्तपवनौ मनोमारुतौ यस्य स तथा योगी वर्तते निश्चलतारया निश्चला स्थिरा तारा कनीनिका यस्यां तादृश्या दृष्ट्या बहिर्देहाद्बहिःप्रदेशे पश्यन्नपि चक्षुःसंबन्धं कुर्वन्नपि अपश्यन् बाह्यविषयग्रहणमकुर्वन् वर्तते आस्ते । खल्विति वाक्यालंकारे । इयमुक्ता शांभवी मुद्रा शांभवीनामिका मुद्रयति क्लेशानिति मुद्रा गुरोर्देशिकस्य प्रसादात्प्रीतिपूर्वकादनुग्रहाल्लब्धा प्राप्ता चेत्तदिदमिति वक्तुमशक्यं शांभवं शांभवीमुद्रायां भासमानं पदं पद्यते गम्यते योगिभिरिति पदमात्मस्वरूपं शून्याशून्यविलक्षणं ध्येयाकारवृत्तेः सद्भावाच्छून्यविलक्षणं तस्या अपि भानाभावादशून्यविलक्षणं तत्त्वं वास्तविकं वस्तु स्फुरति प्रतीयते । तथा चोक्तम्—'अन्तर्लक्ष्यमनन्य-

धीरविरतं पश्यन्मुदा संयमी दृष्ट्युन्मेषनिमेषवर्जितमियं मुद्रा भवेच्छांभवी । गुप्तेयं गिरिशेन तन्त्रविदुषा तन्त्रेषु तत्त्वार्थिनामेषा स्याद्यमिनां मनोलयकरी मुक्तिप्रदा दुर्लभा । १ । ऊर्ध्वदृष्टिरधोदृष्टिरूर्ध्ववेधो ह्यधःशिराः । राधायन्त्रविधानेन जीवन्मुक्तो भवेत्क्षितौ ' । २ । ॥ ३७ ॥

श्रीशांभव्याश्च खेचर्या अवस्थाधामभेदतः ।
भवेच्चित्तलयानन्दः शून्ये चित्सुखरूपिणि ॥ ३८ ॥

श्रीशांभव्या इति । श्रीशांभव्याः श्रीमत्याः शांभवीमुद्रायाः खेचरीमुद्रायाश्चावस्थाधामभेदतः अवस्थाऽवस्थितिर्धाम स्थानं तयोर्भेदाच्छांभव्यां बहिर्दृष्ट्या बहिःस्थितिः खेचर्यां भ्रूमध्यदृष्ट्याऽवस्थितिः । शांभव्यां हृदयं भावनादेशः खेचर्यां भ्रूमध्य एव देशः । तयोर्भेदाभ्यां शून्ये देशकालवस्तुपरिच्छेदशून्ये सजातीयविजातीयस्वगतभेदशून्ये या चित्सुखरूपिणि चिदानन्दस्वरूपिण्यात्मनि चित्तलयानन्दो भवेत्स्यात् । श्रीशांभवीखेचर्योरवस्थाधामरूपसाधनांशे भेदः न तु चित्तलयानन्दरूपफलांश इति भावः ॥ ३८ ॥

तारे ज्योतिषि संयोज्य किंचिदुन्नमयेद् भ्रुवौ ।
पूर्वयोगं मनोयुञ्जन्नुन्मनीकारकः क्षणात् ॥ ३९ ॥

उन्मनीमुद्रामाह—तारे इति। तारे नेत्रयोः कनीनिके ज्योतिषि तारयोर्नासाग्रे योजनात्प्रकाशमाने तेजसि संयोज्य संयुक्ते कृत्वा भ्रुवौ किंचित्स्वल्पमुन्नयेदूर्ध्वं नयेत्। पूर्वः पूर्वोक्तोऽन्तर्लक्ष्यबहिर्दृष्टिरित्याकारको योगो युक्तिर्यस्मिन् तत्तादृशं मनोऽन्तःकरणं युञ्जन् युक्तं कुर्वन् योगी क्षणान्मुहूर्तादुन्मनीकारक उन्मन्यवस्थाकारको भवति॥ ३९॥

केचिदागमजालेन केचिन्निगमसंकुलैः।
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम्॥ ४०॥

उन्मनीमन्तराऽन्यस्तरणोपायो नास्तीत्याह—केचिदिति। केचिच्छास्त्रतन्त्रादिविदः आगच्छन्ति बुद्धिमारोहन्त्यर्था एभ्य इत्यागमाः शास्त्रतन्त्रादयस्तेषां जालैर्जालवद्बन्धनसाधनैस्तदुक्तैः फलैर्मुह्यन्ति मोहं प्राप्नवन्ति। तत्रासक्ता बध्यन्त इति भावः। केचिद्वैदिका निगमसंकुलैर्निगमानां निगमोक्तानां संकुलैः फलबाहुल्यैर्मुह्यन्ति। केचिद्वैशेषिकादयस्तर्केण स्वकल्पितयुक्तिविशेषेण मुह्यन्ति। तारयतीति तारकस्तं तारकं तरणोपायं नैव जानन्ति। उक्तोन्मन्येव तरणोपायस्तं न जानन्तीत्यर्थः॥

अर्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षण-
श्चन्द्रार्कावपि लीनतामुपनयन्निःस्पन्दभावेन यः।

ज्योतीरूपमशेषबीजमखिलं देदीप्यमानं परं
तत्त्वं तत्पदमेति वस्तु परमं वाच्यं किमत्राधिकम् ॥४१॥

अर्धोन्मीलितेति । अर्धमुन्मीलिते अर्धोन्मीलिते अर्धोन्मीलिते लोचने येन स अर्धोद्घाटितलोचन इत्यर्थः । स्थिरं निश्चलं मनो यस्य स स्थिरमनाः, नासाया नासिकाया अग्रेऽग्रभागे नासिकायां द्वादशाङ्गुलपर्यन्ते वा दत्ते प्रहिते ईक्षणे येन स नासाग्रदत्तेक्षणः । तथाऽऽह वसिष्ठः—'द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलेऽम्बरे । संविद्दृशोः प्रशाम्यन्त्योः प्राणस्पन्दो निरुध्यते ॥' इति । निःस्पन्दस्य निश्चलस्य भावो निःस्पन्दभावः कायेन्द्रियमनसां निश्चलत्वं तेन चन्द्रार्कौ चन्द्रसूर्यावपि लीनतां लीनस्य भावो लीनता लयस्तमुपनयन्प्रापयन् कायेन्द्रियमनसां निश्चलत्वेन प्राणसंचारमपि स्तम्भयन्नित्यर्थः । तदुक्तं प्राक् । मनो यत्र विलीयेतेत्यादिपूर्वोक्तविशेषणसंपन्नो योगी ज्योतिरिवाखिलप्रकाशकं रूपं यस्य स तथा तमशेषबीजमाकाशाद्युत्पत्तिद्वारा सर्वकारणमखिलं पूर्णं देदीप्यमानमतिशयेन दीप्यत इति देदीप्यमानं तत्तथा स्वप्रकाशं परं कायेन्द्रियमनसां साक्षिणं तत्त्वमनारोपितं वास्तविकमित्यर्थः । तदिदमिति वक्तुमशक्यं पद्यते गम्यते योगिभिरिति पदं परमं सर्वोत्कृष्टं वस्तु आत्मस्वरूपम् एति प्राप्नोति । उन्मन्य-

वस्थायां स्वस्वरूपावस्थितो योगी भवतीत्यर्थः । अत्राधिकं किं वाच्यम् ? अपरं वस्तु प्राप्नोतीत्यत्र किं वक्तव्यमित्यर्थः ॥४१॥

दिवा न पूजयेल्लिङ्गं रात्रौ चैव न पूजयेत् ।
सर्वदा पूजयेल्लिङ्गं दिवारात्रिनिरोधतः ॥ ४२ ॥

उन्मनीभावनायाः कालनियमाभावमाह—दिवा नेति । दिवा सूर्यसंचारे लिङ्गं सर्वकारणमात्मानम्, 'एतस्मादात्मन आकाशः संभूतः' इत्यादिश्रुतेः । न पूजयेत् न भावयेत् । ध्यानमेवात्मपूजनम् । तदुक्तं वासिष्ठे—'ध्यानोपहार एवात्मा ध्यानमस्य महार्चनम् । विना तेनेतरेणायमात्मा लभ्यत एव नो ॥' इति । रात्रौ चन्द्रसंचारे च नैव पूजयेन्नैव भावयेत्, चन्द्रसूर्यसंचारे चित्तस्थैर्याभावात् । 'चले वाते चलं चित्तम्' इत्युक्तत्वात् । दिवारात्रिनिरोधतः सूर्यचन्द्रौ निरुध्य । ल्यब्लोपे पञ्चमी । तस्यास्तसिल् । सर्वदा सर्वस्मिन् काले लिङ्गम् आत्मानं पूजयेद्भावयेत् । सूर्यचन्द्रयोर्निरोधे कृते सुषुम्णान्तर्गते प्राणे मनःस्थैर्यात् । तदुक्तम्—'सुषुम्णान्तर्गते वायौ मनःस्थैर्यं प्रजायते' इति ॥ ४२ ॥

अथ खेचरी—

सव्यदक्षिणनाडिस्थो मध्ये चरति मारुतः ।
तिष्ठते खेचरी मुद्रा तस्मिन्स्थाने न संशयः ॥ ४३ ॥

खेचरीमाह—सव्येति । सव्यदक्षिणनाडिस्थो वामतदितरनाडिस्थो मारुतो वायुर्यत्र मध्ये चरति यस्मिन्मध्यप्रदेशे गच्छति तस्मिन् स्थाने तस्मिन् प्रदेशे खेचरी मुद्रा तिष्ठते स्थिरा भवति । 'प्रकाशनस्थेयाख्ययोश्च' इत्यात्मनेपदम् । न संशयः उक्तेऽर्थे संदेहो नास्तीत्यर्थः ॥ ४३ ॥

इडापिङ्गलयोर्मध्ये शून्यं चैवानिलं ग्रसेत् ।
तिष्ठते खेचरी मुद्रा तत्र सत्यं पुनः पुनः ॥ ४४ ॥

इडापिङ्गलयोरिति । इडापिङ्गलयोः सव्यदक्षिणनाड्योर्मध्ये यच्छून्यं खं कर्तृ अनिलं प्राणवायुं यत्र ग्रसेत् । शून्ये प्राणस्य स्थिरीभाव एव ग्रासः । तत्र तस्मिन् शून्ये खेचरी मुद्रा तिष्ठते । पुनः पुनः सत्यमिति योजना ॥ ४४ ॥

सूर्याचन्द्रमसोर्मध्ये निरालम्बान्तरे पुनः ।
संस्थिता व्योमचक्रे या सा मुद्रा नाम खेचरी ॥४५॥

सूर्याचन्द्रमसोरिति । सूर्याचन्द्रमसोरिडापिङ्गलयोर्मध्ये निरालम्बं यदन्तरमवकाशस्तत्र । पुनः पादपूरणे । व्योम्नां खानां चक्रे समुदाये । भ्रूमध्ये सर्वखानां समन्वयात् । तदुक्तं पञ्चस्रोतःसमन्वित इति । या संस्थिता सा मुद्रा खेचरी नाम ॥ ४५ ॥

सोमाद्यत्रोदिता धारा साक्षात्सा शिववल्लभा ।
पूरयेदतुलां दिव्यां सुषुम्णां पश्चिमे मुखे ॥ ४६ ॥

सोमादिति। सोमाच्चन्द्राद्यत्र यस्यां खेचर्यां धाराऽमृतधारा उदितोद्भूता सा खेचरी साक्षाच्छिववल्लभा शिवस्य प्रियेति पूर्वेणान्वयः। अतुलां निर्मलां निरुपमां दिव्यां सर्वनाड्युत्तमां सुषुम्णां पश्चिमे मुखे पूरयेत्। जिह्वयेति शेषः॥ ४६॥

पुरस्ताच्चैव पूर्येत निश्चिता खेचरी भवेत्।
अभ्यस्ता खेचरी मुद्राऽप्युन्मनी संप्रजायते॥ ४७॥

पुरस्ताच्चैवेति। पुरस्ताच्चैव पूर्वतोऽपि पूर्येत। सुषुम्णां प्राणेनेति शेषः। यदि तर्हि निश्चिताऽसंदिग्धा खेचरी खेचर्याख्या मुद्रा भवेदिति। यदि तु पुरस्तात्प्राणेन न पूर्येत जिह्वामात्रेण पश्चिमतः पूर्येत तर्हि मूढावस्थाजनिका। न निश्चिता खेचरी स्यादिति भावः। खेचरीमुद्राऽप्यभ्यस्ता सती उन्मनी संप्रजायते चित्तस्य ध्येयाकारावेशात्तुर्याऽवस्था भवतीत्यर्थः॥ ४७॥

भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते।
ज्ञातव्यं तत्पदं तुर्यं तत्र कालो न विद्यते॥ ४८॥

भ्रुवोरिति। भ्रुवोर्मध्ये भ्रुवोरन्तराले शिवस्थानं शिवस्येश्वरस्य स्थानं शिवस्य सुखरूपस्यात्मनोऽवस्थानमिति शेषः। तत्र तस्मिन् शिवे मनो लीयते। शिवाकारवृत्तिप्रवाहवद्भवति तच्चित्तलयरूपं तुर्यं पदं जाग्रत्स्वप्नसुषुप्तिभ्यश्चतुर्थकाख्यं

बाह्यवायुर्यथा लीनस्तथा मध्यो न संशयः ।
स्वस्थाने स्थिरतामेति पवनो मनसा सह ॥ ॥५१॥

बाह्येति । बाह्यो देहाद्बहिर्भवो वायुर्यथा लीनो भवति खेचर्याम् । तस्यान्तः प्रवृत्त्यभावात् । तथा मध्यो देहमध्यवर्ती वायुर्लीनो भवति । तस्य बहिः प्रवृत्त्यभावात् । न संशयः । अस्मिन्नर्थे संदेहो नास्तीत्यर्थः । स्थीयते स्थिरीभूयतेऽस्मिन्निति स्थानं स्वस्य प्राणस्य स्थानं स्थैर्याधिष्ठानं ब्रह्मरन्ध्रं तत्र मनसा चित्तेन सह पवनः प्राणः स्थिरतां निश्चलतामेति प्राप्नोति ॥ ५१ ॥

एवमभ्यसमानस्य वायुमार्गे दिवानिशम् ।
अभ्यासाज्जीर्यते वायुर्मनस्तत्रैव लीयते ॥ ५२ ॥

एवमुक्तप्रकारेण वायुमार्गे प्राणमार्गे सुषुम्णायामित्यर्थः । दिवानिशं रात्रिंदिवमभ्यसमानस्याभ्यासं कुर्वतो योगिनोऽभ्यासाद्यत्र यस्मिन्नाधारे वायुः प्राणो जीर्यते क्षीयते लीयते इत्यर्थः । तत्रैव वायोर्लयाधिष्ठाने मनश्चित्तं लीयते जीर्यत इत्यर्थः ॥ ५२ ॥

अमृतैः प्लावयेद्देहमापादतलमस्तकम् ।
सिध्यत्येव महाकायो महाबलपराक्रमः ॥ ५३ ॥
इति खेचरी ।

ज्ञातव्यम् । तत्र तस्मिन् पदे कालो मृत्युर्न विद्यते । यद्वा सूर्यचन्द्रयोर्निरोधादायुःक्षयकारकः कालः समयो न विद्यत इत्यर्थः । तदुक्तम्—'भोक्त्री सुषुम्णा कालस्य' इति ॥४८॥

अभ्यसेत्खेचरीं तावद्यावत्स्याद्योगनिद्रितः ।
संप्राप्तयोगनिद्रस्य कालो नास्ति कदाचन ॥ ४९ ॥

अभ्यसेदिति । तावत्खेचरीं मुद्रामभ्यसेत् । यावद्योग-निद्रितः, योगः सर्ववृत्तिनिरोधः सैव निद्रा योगनिद्राऽस्य संजाता इति योगनिद्रितः तादृशः स्यात् । संप्राप्ता योगनिद्रा येन स संप्राप्तयोगनिद्रस्तस्य कदाचन कस्मिंश्चिदपि समये कालो मृत्युर्नास्ति ॥ ४९ ॥

निरालम्बं मनः कृत्वा न किंचिदपि चिन्तयेत् ।
स बाह्याभ्यन्तरे व्योम्नि घटवत्तिष्ठति ध्रुवम् ॥५०॥

निरालम्बमिति । यो निरालम्बमालम्बशून्यं मनः कृत्वा किंचिदपि न चिन्तयेत् खेचरीमुद्रायां जायमानायां ब्रह्मा-कारामपि वृत्तिं परवैराग्येण परित्यजेदित्यर्थः । स योगी बाह्यभ्यन्तरे बाह्ये बहिर्भवे आभ्यन्तरेऽभ्यन्तर्भवे च व्योम्नचाकाशे घटवत्तिष्ठति । ध्रुवं निश्चितमेतत् । यथाऽऽकाशे घटो बहिरन्तश्चाकाशपूर्णो भवति तथा खेचर्यामालम्बन-परित्यागेन योगी ब्रह्मणा पूर्णस्तिष्ठतीत्यर्थः ॥ ५० ॥

बाह्यवायुर्यथा लीनस्तथा मध्यो न संशयः ।
स्वस्थाने स्थिरतामेति पवनो मनसा सह ॥ ॥५१॥

बाह्येति । बाह्यो देहाद्बहिर्भवो वायुर्यथा लीनो भवति खेचर्याम् । तस्यान्तः प्रवृत्त्यभावात् । तथा मध्यो देहमध्यवर्ती वायुर्लीनो भवति । तस्य बहिः प्रवृत्त्यभावात् । न संशयः । अस्मिन्नर्थे संदेहो नास्तीत्यर्थः । स्थीयते स्थिरीभूयतेऽस्मिन्निति स्थानं स्वस्य प्राणस्य स्थानं स्थैर्याधिष्ठानं ब्रह्मरन्ध्रं तत्र मनसा चित्तेन सह पवनः प्राणः स्थिरतां निश्चलतामेति प्राप्नोति ॥ ५१ ॥

एवमभ्यसमानस्य वायुमार्गे दिवानिशम् ।
अभ्यासाज्जीर्यते वायुर्मनस्तत्रैव लीयते ॥ ५२ ॥

एवमुक्तप्रकारेण वायुमार्गे प्राणमार्गे सुषुम्णायामित्यर्थः । दिवानिशं रात्रिंदिवमभ्यसमानस्याभ्यासं कुर्वतो योगिनोऽभ्यासाद्यत्र यस्मिन्नाधारे वायुः प्राणो जीर्यते क्षीयते लीयते इत्यर्थः । तत्रैव वायोर्लयाधिष्ठाने मनश्चित्तं लीयते जीर्यत इत्यर्थः ॥ ५२ ॥

अमृतैः प्लावयेद्देहमापादतलमस्तकम् ।
सिध्यत्येव महाकायो महाबलपराक्रमः ॥ ५३ ॥
इति खेचरी ।

अमृतैरिति । अमृतैः सुषिरनिर्गतैः पादतलं च मस्तकं च पादतलमस्तकम् । 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्येकवद्भावः । पादतलमस्तकमभिव्याप्येत्यापादतलमस्तकं देहमाप्लावयेदाप्लावितं कुर्यात् । महानुत्कृष्टः कायो यस्य स महाकायः महान्तौ बलपराक्रमौ यस्येत्येतादृशो योगी सिध्यत्येव । अमृताप्लावनेन सिद्धो भवत्येव ॥ ५३ ॥

शक्तिमध्ये मनः कृत्वा शक्तिं मानसमध्यगाम् ।
मनसा मन आलोक्य धारयेत्परमं पदम् ॥ ५४ ॥

शक्तिरिति । शक्तिः कुण्डलिनी तस्या मध्ये मनः कृत्वा तस्यां मनो धृत्वा तदाकारं मनः कृत्वेत्यर्थः । शक्तिं मानसमध्यगां कृत्वा । शक्तिध्यानावेशाच्छक्तिं मनस्येकीकृत्य तेन कुण्डलीं बोधयित्वेति यावत् । 'प्रबुद्धा वह्नियोगेन मनसा मरुता सह' इति गोरक्षोक्तेः । मनसाऽन्तःकरणेन मनः आलोक्य बुद्धिं मनसाऽवलोकनेन स्थिरीकृत्येत्यर्थः । परमं पदं सर्वोत्कृष्टं स्वरूपं धारयेद्धारणाविषयं कुर्यादित्यर्थः ॥ ५४ ॥

खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ।
सर्वं च खमयं कृत्वा न किंचिदपि चिन्तयेत् ॥५५॥

खमध्य इति । खमिव पूर्णं ब्रह्म खं तन्मध्ये आत्मानं स्वस्वरूपं कुरु । ब्रह्माऽहमिति भावयेत्यर्थः । आत्ममध्ये

स्वस्वरूपे च खं पूर्णं ब्रह्म कुरु। अहं ब्रह्मेति च भावयेत्यर्थः। सर्वं च खमयं कृत्वा ब्रह्ममयं विभाव्य किमपि न चिन्तयेत्। अहं ब्रह्मेति ध्यानमपि परित्यजेदित्यर्थः ॥ ५५ ॥

अन्तः शून्यो बहिः शून्यः शून्यः कुम्भ इवाम्बरे।
अन्तः पूर्णो बहिः पूर्णः पूर्णः कुम्भ इवार्णवे ॥५६॥

एवं समाहितस्य स्वरूपे स्थितिमाह—अन्तः शून्य इति। अन्तः अन्तःकरणे शून्यः। ब्रह्मातिरिक्तवृत्तेरभावाद्द्वितीयशून्यः। बहिरन्तःकरणाद्बहिरपि शून्यः, द्वितीयादर्शनात्। अम्बरे आकाशे कुम्भो घटो यथाऽन्तर्बहिःशून्यस्तद्वदन्तःकरणे हृदाकाशे वायुपूर्णः ब्रह्माकारवृत्तेः सद्भावाद्ब्रह्मवासत्वाद्वा। बहिः पूर्णोऽन्तःकरणाद्बहिर्हृदवकाशाद्बहिर्वा पूर्णः। सत्तया ब्रह्मातिरिक्तवृत्तेरभावाद्ब्रह्मपूर्णत्वाद्वा। अर्णवे समुद्रे कुम्भो घटो यथा सर्वतो जलपूर्णो भवत्येवं समाधिनिष्ठो योगी ब्रह्मपूर्णो भवतीत्यर्थः ॥ ५६ ॥

बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तनम्।
सर्वचिन्तां परित्यज्य न किंचिदपि चिन्तयेत् ॥५७॥

बाह्यचिन्तेति। समाहितेन योगिनेत्यध्याहारः। बाह्यचिन्ता बाह्यविषया चिन्ता न कर्तव्या। तथैव बाह्यचिन्ताकरणवदान्तरचिन्तनमान्तराणां मनसा परिकल्पितानामाशामोदक-

सौधवाटिकादीनां चिन्तनं न कर्तव्यमिति लिङ्गविपरिणामेनान्वयः। सर्वचिन्तां बाह्याभ्यन्तरचिन्तनं परित्यज्य किंचिदपि न चिन्तयेत्परवैराग्येणात्माकारवृत्तिमपि परित्यजेत्। तत्त्यागे स्वरूपावस्थितिरूपा जीवन्मुक्तिर्भवतीति भावः॥ ५७॥

संकल्पमात्रकलनैव जगत्समग्रं
संकल्पमात्रकलनैव मनोविलासः।
संकल्पमात्रमतिमुत्सृज निर्विकल्प-
माश्रित्य निश्चयमवाप्नुहि राम शान्तिम्॥५८॥

बाह्याभ्यन्तरचिन्तापरित्यागे शान्तिश्च भवतीत्यत्र वसिष्ठवाक्यं प्रमाणयति—संकल्पेति। संकल्पो मानसिको व्यापारः स एव संकल्पमात्रं तस्य कलनैव रचनैवेदं दृश्यमानं समग्रं जगत्। बाह्यप्रपञ्चो मनोमात्रकल्पित इत्यर्थः। मनसो मानसस्य विलासो नानाविषयाकारकल्पना आशामोदकसौधवाटिकादिकल्पनारूपो विलासः संकल्पमात्रकलनैव। मानसः प्रपञ्चोऽपि संकल्पमात्ररचनैवेत्यर्थः। संकल्पमात्रे बाह्याभ्यन्तरप्रपञ्चे या मतिः सत्यत्वबुद्धिस्तामुत्सृज। तर्हि किं कर्तव्यमित्यत आह—निर्विकल्पेति। विशिष्टः कल्पो विकल्पः। आत्मनि कर्तृत्वभोक्तृत्वसुखित्वसजातीयविजातीयस्वगतभेददेशकालवस्तुपरिच्छेदकल्पनारूपः, तस्मान्निष्क्रान्तो निर्विकल्पस्त-

मात्मानमाश्रित्य धारणादिविषयं कृत्वा हे राम निश्चयमसंदिग्धं शान्तिं परमोपरतिमवाप्नुहि। ततः सुखमपि प्राप्स्यसीति भावः। तदुक्तं भगवता व्यतिरेकेण—'न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्' इति ॥ ५८ ॥

कर्पूरमनले यद्वत्सैन्धवं सलिले तथा।
तथा संधीयमानं च मनस्तत्त्वे विलीयते ॥ ५९ ॥

कर्पूरमिति। यद्वद्यथाऽनलेऽग्नौ संधीयमानं संयोज्यमानं कर्पूरं विलीयते विशेषेण लीयते लीनं भवति अग्न्याकारं भवति। यथा सलिले जले संधीयमानं सैन्धवं लवणं विलीयते लवणाकारं परित्यज्य जलाकारं भवति तथा तद्वत्तत्त्वे आत्मनि संधीयमानं कार्यमाणं मनो विलीयते आत्माकारं भवति ॥ ५९ ॥

ज्ञेयं सर्वं प्रतीतं च ज्ञानं च मन उच्यते।
ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः ॥६०॥

मनसो विलये जाते द्वैतमपि लीयत इत्याह त्रिभिः—ज्ञेयमिति। सर्वं सकलं ज्ञेयं ज्ञानार्हं प्रतीतं च ज्ञातं च ज्ञानं च इदं सर्वं मन उच्यते। सर्वस्य मनःकल्पनामात्रत्वान्मनःशब्देनोच्यते। ज्ञानं ज्ञेयं च समं मनो विलीयते मनसा सार्धं नष्टं यदि तर्हि द्वितीयकः द्वितीय एव द्वितीयकः पन्था मनोविषयो नास्ति। द्वैतं नास्तीति फलितार्थः ॥ ६० ॥

मनोदृश्यमिदं सर्वं यत्किंचित्सचराचरम् ।
मनसो ह्युन्मनीभावाद् द्वैतं नैवोपलभ्यते ॥ ६१ ॥

मनोदृश्यमिति । इदमुपलभ्यमानं यत्किंचिद्यत्किमपि चरं जङ्गममचरं स्थावरं चरं चाचरं च चराचरे ताभ्यां सह वर्तत इति सचराचरं यज्जगत्तत्सर्वं मनोदृश्यं मनसा दृश्यम् । मन:संकल्पमात्रमित्यर्थः । मनःकल्पनासत्त्वे प्रतीतेस्तदभावे चाप्रतीतेर्भ्रम एव सर्वं जगत् , भ्रमस्य प्रातीतिकशरीरत्वात् । न च बौद्धमतप्रसङ्गः, भ्रमाधिष्ठानस्य ब्रह्मणः सत्यत्वाभ्युपगमात् । मनस उन्मनीभावाद्विलयाद् द्वैतं भेदः नैवोपलभ्यते नैव प्रतीयते, द्वैतभ्रमहेतोर्मन:संकल्पस्याभावात् । हि तद्धेतावव्ययम् ॥ ६१ ॥

ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम् ।
मनसो विलये जाते कैवल्यमवशिष्यते ॥ ६२ ॥

ज्ञेयेति । ज्ञेयं ज्ञानविषयो यद्वस्तु सर्वं चराचरं यद्दृश्यं तस्य परित्यागान्नामरूपात्मकस्य तस्य परिवर्जनाद्विलयं याति सच्चिदानन्दरूपात्माकारं भवति । मनसो विलये जाते सति कैवल्यं केवलस्यात्मनो भावः कैवल्यमवशिष्यते । अद्वितीयात्मस्वरूपमेव शिष्टं भवतीत्यर्थः ॥ ६२ ॥

एवं नानाविधोपायाः सम्यक्स्वानुभवान्विताः ।
समाधिमार्गाः कथिताः पूर्वाचार्यैर्महात्मभिः ॥ ६३ ॥

एवमिति । एवमन्तर्लक्ष्यं बहिर्दृष्टिरित्याद्युक्तप्रकारेण महान् समाधिपरिशीलनशुद्ध आत्माऽन्तःकरणं येषां ते महात्मानस्तैर्महात्मभिः पूर्वे च ते आचार्याश्च पूर्वाचार्या मत्स्येन्द्रादयस्तैः समाधेश्चित्तवृत्तिनिरोधस्य मार्गाः प्राप्त्युपायाः कथिताः । कीदृशाः समाधिमार्गाः ? नानाविधोपायाः नानाविधा उपायाः साधनानि येषां ते तथा सम्यक् समीचीनतया संशयविपर्ययराहित्येन यः स्वानुभव आत्मानुभवस्तेनान्विता युक्ताः ॥ ६३ ॥

सुषुम्णायै कुण्डलिन्यै सुधायै चन्द्रजन्मने ।
मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने ॥ ६४ ॥

सुषुम्णादिभ्यः कृतकृत्यस्ताः प्रणमति—सुषुम्णायै इति । सुषुम्णा मध्यनाडी तस्यै कुण्डलिन्यै आधारशक्त्यै चन्द्राद्भ्रूमध्यस्थाज्जन्म यस्यास्तस्यै सुधायै पीयूषायै मनोन्मन्यै तुर्यावस्थायै चिच्चैतन्यमात्मा स्वरूपं यस्याः सा तथा तस्यै महति जडानां कायेन्द्रियमनसां चैतन्यसंपादकत्वात्सर्वोत्तमा या शक्तिश्चिच्छक्तिः पुरुषरूपा तस्यै । तुभ्यमिति प्रत्येकं संबध्यते । नमः प्रह्वीभावोऽस्तु ॥ ६४ ॥

अशक्यतत्त्वबोधानां मूढानामपि संमतम् ।
प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते ॥ ६५ ॥

नानाविधान् समाध्युपायानुक्त्वा नादानुसंधानरूपं मुख्योपायं प्रतिजानीते—अशक्येति । अव्युत्पन्नत्वादशक्यस्तत्त्वबोधस्तत्त्वज्ञानं येषां ते तथा तेषां मूढानामनधीतानां संमतम् । अपिशब्दात्किमुताधीतानामिति गम्यते । गोरक्षनाथेन प्रोक्तमित्यनेन महदुक्तत्वादुपादेयत्वं गम्यते । नादस्यानाहतध्वनेरुपासनेऽनुसंधानरूपं सेवनमुच्यते कथ्यते ॥ ६५ ॥

श्रीआदिनाथेन सपादकोटि-
लयप्रकाराः कथिता जयन्ति ।
नादानुसंधानकमेकमेव
मन्यामहे मुख्यतमं लयानाम् ॥ ६६ ॥

श्रीआदिनाथेनेति । श्रीआदिनाथेन शिवेन कथिताः प्रोक्ताः पादेन चतुर्थांशेन सह वर्तमानाः कोटिसंख्याका लयप्रकाराश्चित्तलयसाधनभेदा जयन्त्युत्कर्षेण वर्तन्ते । वयं तु नादानुसंधानकं नादानुचिन्तनमेव एकं केवलं लयानां लयसाधनानां मध्ये मुख्यतममतिशयेन मुख्यं मन्यामहे जानीमहे । उत्कृष्टानां लयसाधनानां मध्ये उत्कृष्टतमत्वाद्गोरक्षाभिमतत्वाच्च नादानुसंधानमेव अवश्यं विधेयमिति भावः ॥ ६६ ॥

मुक्तासने स्थितो योगी मुद्रां संधाय शांभवीम् ।
शृणुयाद्दक्षिणे कर्णे नादमन्तःस्थमेकधीः ॥ ६७ ॥

शांभवीमुद्रया नादानुसंधानमाह—मुक्तासन इति । मुक्तासने सिद्धासने स्थितो योगी शांभवीं मुद्रामन्तर्लक्ष्यं बहिर्दृष्टिरित्यादिनोक्तां संधाय कृत्वा । एकधीरेकाग्रचित्तः सन् दक्षिणे कर्णेऽन्तःस्थसुषुम्णानाड्यां सन्तमेव नादं शृणुयात् । तदुक्तं त्रिपुरासारसमुच्चये—'आदौ मत्तालिमालाजनितरवसमस्तारसंस्कारकारी नादोऽसौ वांशिकस्यानिलभरितलसद्वंशनिःस्वानतुल्यः । घण्टानादानुकारी तदनु च जलधिध्वानधीरो गभीरो गर्जन्पर्जन्यघोषः पर इह कुहरे वर्तते ब्रह्मनाड्याः ॥' इति ॥६७॥

श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं कार्यम् ।
शुद्धसुषुम्णासरणौ स्फुटममलः श्रूयते नादः ॥६८॥

पराङ्मुखीमुद्रया नादानुसंधानमाह—श्रवणेति । श्रवणपुटे नयनयोर्नेत्रयोर्युगलं युग्मं घ्राणशब्देन घ्राणपुटे मुखमास्यम् । एषां द्वन्द्वे प्राण्यङ्गत्वादेकवद्भावे प्राप्तेऽपि सर्वस्यापि द्वन्द्वैकवद्भावस्य वैकल्पिकत्वान्न भवति । तेषां निरोधनं कराङ्गुलिभिः कार्यम् । निरोधनं चेत्थम्—'अङ्गुष्ठाभ्यामुभौ कर्णौ तर्जनीभ्यां च चक्षुषी । नासापुटौ तथाऽनाम्न्या प्रच्छाद्य करणानि च ॥' इति । चकारात्तदन्याभ्यां मुखं प्रच्छाद्येति समुच्चीयते । शुद्धा प्राणायामैर्मलरहिता या सुषुम्णासरणिः सुषुम्णापद्धतिस्तस्याममलो नादः स्फुटं व्यक्तं श्रूयते ॥ ६८ ॥

आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्वयोगेषु स्यादवस्थाचतुष्टयम् ॥ ६९ ॥

अथ नादस्य चतस्रोऽवस्थाः प्राह—आरम्भश्चेति । आरम्भावस्था घटावस्था परिचयावस्था निष्पत्त्यवस्था इति सर्वयोगेषु सर्वेषु चित्तवृत्तिनिरोधोपायेषु शांभव्यादिषु व्यवस्था-चतुष्टयं स्यात् । चचैवतथापिचाः पादपूरणार्थाः ॥६९ ॥

अथारम्भावस्था—

ब्रह्मग्रन्थेर्भवेद्भेदो ह्यानन्दः शून्यसंभवः ।
विचित्रः क्वणको देहेऽनाहतः श्रूयते ध्वनिः ॥ ७० ॥

तत्रारम्भावस्थामाह—ब्रह्मग्रन्थेरिति । ब्रह्मग्रन्थेरनाहतचक्रे वर्तमानाया भेदः प्राणायामाभ्यासेन भेदनं यदा भवेत्तदेति यत्तदोरध्याहारः । आनन्दयतीत्यानन्दः आनन्दजनकः शून्ये हृदाकाशे संभवतीति शून्यसंभवो हृदाकाशोत्पन्नो विचित्रो नानाविधः क्वणो भूषणनिनदः स एव क्वणकः । भूषणनिनद-सदृश इत्यर्थः । 'भूषणानां तु शिञ्जितम्' 'निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि' इत्यमरः । अनाहतो ध्वनिरनाहतो निर्ह्रादो देहे देहमध्ये श्रूयते श्रवणविषयो भवतीत्यर्थः ॥ ७० ॥

दिव्यदेहश्च तेजस्वी दिव्यगन्धस्त्वरोगवान् ।
संपूर्णहृदयः शून्य आरम्भे योगवान्भवेत् ॥ ७१ ॥

दिव्यदेह इति । शून्ये हृदाकाशे य आरम्भो नादारम्भस्तस्मिन्सति हृदाकाशविशुद्ध्याकाशभ्रूमध्याकाशाः शून्यातिशून्यमहाशून्यशब्दैर्व्यवह्रियन्ते योगिभिः । संपूर्णहृदयः प्राणवायुना सम्यक् पूर्णं हृदयं यस्य स तथा आनन्देन पूर्णे हृदये योगवान् योगी दिव्यो रूपलावण्यबलसंपन्नो देहो यस्य स दिव्यदेहः तेजस्वी प्रतापवान् दिव्यगन्धः दिव्य उत्तमो गन्धो यस्य स तथा अरोगवान् रोगरहितो भवेदिति संबन्धः ॥ ७१ ॥

अथ घटावस्था—

द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥ ७२ ॥

घटावस्थामाह—द्वितीयायामिति । द्वितीयायां घटावस्थायां वायुः प्राणः घटीकृत्य आत्मना सहापानं नादबिन्दू चैकीकृत्य मध्यगो मध्यचक्रगतः कण्ठस्थाने मध्यचक्रम् । तदुक्तमत्रैव जालंधरबन्धे—'मध्यचक्रमिदं ज्ञेयं षोडशाधारबन्धनम्' इति । यदा भवेदित्यध्याहारः । तदाऽस्यामवस्थायां योगी योगाभ्यासी दृढमासनं यस्य स दृढासनः स्थिरासनो ज्ञानी पूर्वापेक्षया कुशलबुद्धिर्देवसमो रूपलावण्याधिक्याद्देवतुल्यो भवेत् । तदुक्तमीश्वरोक्ते राजयोगे—'प्राणापानौ नादबिन्दू जीवात्मपरमात्मनोः । मिलित्वा घटते यस्मात्तस्मात्स घट उच्यते ॥' इति ॥ ७२ ॥

विष्णुग्रन्थेस्ततो भेदात्परमानन्दसूचकः ।
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत् ॥ ७३ ॥

विष्णुग्रन्थेरिति । ततो ब्रह्मग्रन्थिभेदनानन्तरं विष्णुग्रन्थेः कण्ठे वर्तमानाया भेदात्कुम्भकैर्भेदनात्परमानन्दस्य भाविनो ब्रह्मानन्दस्य सूचको ज्ञापकः अतिशून्ये कण्ठावकाशे विमर्दोऽनेकनादसंमर्दो भेर्याः शब्द इव शब्दो भेरीशब्दो भेरीनादश्च तदा तस्मिन्काले भवेत् ॥ ७३ ॥

तृतीयायां तु विज्ञेयो विहायोमर्दलध्वनिः ।
महाशून्यं तदा याति सर्वसिद्धिसमाश्रयम् ॥ ७४ ॥

परिचयावस्थामाह सार्धद्वाभ्याम्—तृतीयायां परिचयावस्थायां विहायोमर्दलध्वनिर्विहायसि भ्रूमध्याकाशे मर्दलस्य वाद्यविशेषस्य ध्वनिरिव ध्वनिर्विज्ञेयो विशेषेण ज्ञानार्हो भवति । तदा तस्यामवस्थायां सर्वसिद्धिसमाश्रयं सर्वासां सिद्धीनामणिमादीनां समाश्रयं स्थानम् । तत्र संयमादणिमादिप्राप्तेः महाशून्यं भ्रूमध्याकाशं याति गच्छति प्राण इति शेषः ॥७४॥

चित्तानन्दं तदा जित्वा सहजानन्दसंभवः ।
दोषदुःखजराव्याधिक्षुधानिद्राविवर्जितः ॥ ७५ ॥

चित्तानन्दमिति । चित्तानन्दं नादविषयान्तःकरणवृत्तिजन्यसुखं जित्वाऽभिभूय सहजानन्दसंभवः सहजानन्दः स्वाभावि-

कात्मसुखं तस्य संभव आविर्भावः स दोषा वातपित्तकफा दुःखं तज्जन्या वेदना आध्यात्मिकादि च जरा वृद्धावस्था व्याधिर्ज्वरादिः क्षुधा बुभुक्षा निद्रा स्वाप एतैर्विवर्जितो रहितस्तदा योगी भवतीति ॥ ७५ ॥

रुद्रग्रन्थि यदा भित्त्वा शर्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥७६॥

तदा, कदेत्यपेक्षायामाह—रुद्रेति । यदा रुद्रग्रन्थि भित्त्वा । आज्ञाचक्रे रुद्रग्रन्थिः शर्वस्येश्वरस्य पीठं स्थानं भ्रूमध्यं तत्र गतः प्राप्तोऽनिलः प्राणो भवति तदा निष्पत्त्यवस्थामाह—निष्पत्ताविति । निष्पत्तौ निष्पत्त्यवस्थायाम् । ब्रह्मरन्ध्रे गते प्राणे निष्पत्त्यवस्था भवति । वैणवः वेणोरयं वैणवो वंशसंबन्धी शब्दो निनादः क्वणन्ती शब्दायमाना या वीणा तस्याः क्वणः शब्दो भवेत् ॥ ७६ ॥

एकीभूतं तदा चित्तं राजयोगाभिधानकम् ।
सृष्टिसंहारकर्ताऽसौ योगीश्वरसमो भवेत् ॥ ७७ ॥

तदा तस्यामवस्थायां चित्तमन्तःकरणमेकीभूतमेकविषयीभूतम् । विषयविषयिणोरभेदोपचारात् । तद्राजयोगाभिधानकं राजयोग इत्यभिधानं यस्य तद्राजयोगाभिधानकं चित्तस्यैकाग्रतैव राजयोग इत्यर्थः । सृष्टिसंहारेति । असौ नादानुसंधानपरो

योगी सृष्टिसंहारकर्ता सृष्टिं संहारं च करोतीति तादृशः। अत एवेश्वरसम ईश्वरतुल्यो भवेत् ॥ ७७ ॥

अस्तु वा माऽस्तु वा मुक्तिरत्रैवाखण्डितं सुखम् ।
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते ॥ ७८ ॥
राजयोगमजानन्तः केवलं हठकर्मिणः ।
एतानभ्यासिनो मन्ये प्रयासफलवर्जितान् ॥ ७९ ॥

अस्तु वेति। राजयोगमिति। उभौ प्राग्व्याख्यातौ ॥ ७८ ॥ ७९ ॥

उन्मन्यवाप्तये शीघ्रं भ्रूध्यानं मम संमतम् ।
राजयोगपदं प्राप्तुं सुखोपायोऽल्पचेतसाम् ।
सद्यः प्रत्ययसंधायी जायते नादजो लयः ॥ ८० ॥

उन्मन्यवाप्तय इति। शीघ्रं त्वरितमुन्मन्या उन्मन्यवस्थाया अवाप्तये प्राप्त्यर्थं भ्रूध्यानं भ्रुवोर्ध्यानं भ्रूमध्ये ध्यानं मम स्वात्मारामस्य संमतम्। राजयोगो योगानां राजा तदेव पदं राजयोगपदं तुर्यावस्थाख्यं प्राप्तुं लब्धुं पूर्वोक्तभ्रूध्यानरूपः सुखोपायः सुखसाध्य उपायः सुखोपायः अल्पचेतसामल्पबुद्धीनामपि। किमुतान्येषामित्यभिप्रायः। नादजः नादाज्जातो लयश्चित्तविलयः सद्यः शीघ्रं प्रत्ययं प्रतीतिं संदधातीति प्रत्ययसंधायी प्रतीतिकरो जायते प्रादुर्भवति ॥ ८० ॥

नादानुसंधानसमाधिभाजां
योगीश्वराणां हृदि वर्धमानम् ।
आनन्दमेकं वचसामगम्यं
जानाति तं श्रीगुरुनाथ एकः ॥ ८१ ॥

नादानुसंधानेति । नादस्यानाहतध्वनेरनुसंधानमनुचिन्तनं तेन समाधिश्चित्तैकाग्र्यं तं भजन्तीति नादानुसंधानसमाधिभाजस्तेषां योगिषु योगयुक्तेष्वीश्वराः समर्थास्तेषां हृदि हृदये वर्धत इति वर्धमानस्तं वर्धमानं वचसां वाचामगम्यम् इदमिति वक्तुमशक्यं तं योगशास्त्रप्रसिद्धमेकं मुख्यमानन्दमाह्लादमेकोऽनन्यः श्रीगुरुनाथः श्रीमान् गुरुरेव नाथो जानाति वेत्ति । एतेन नादानुसंधानानन्दो गुरुगम्य एवेति सूचितम् ॥ ८१ ॥

कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः ।
तत्र चित्तं स्थिरीकुर्याद्यावत्स्थिरपदं व्रजेत् ॥ ८२ ॥

नादानुसंधानात्प्रत्याहारादिक्रमेण समाधिमाह— कर्णावित्यादिभिः । मुनिर्मननशीलो योगी हस्ताभ्यामित्यनेन हस्ताङ्गुष्ठौ लक्ष्येते । ताभ्यां कर्णौ श्रोत्रे पिधाय । हस्ताङ्गुष्ठौ श्रोत्रविवरयोः कृत्वेत्यर्थः । यं ध्वनिमनाहतनिःस्वनं शृणोत्याकर्णयति तत्र तस्मिन्ध्वनौ चित्तं स्थिरीकुर्यादस्थिरं स्थिरं संपद्यमानं कुर्यात् । यावत्स्थिरं पदं स्थिरपदं तुर्याख्यं गच्छेत् ।

तदुक्तम् —'तुर्यावस्थाचिदभिव्यञ्जकनादस्य वेदनं प्रोक्तम्' इति नादानुसंधानेन वायुस्थैर्यमणिमादयोऽपि भवन्ति। उक्तं च त्रिपुरासारसमुच्चये—'विजितो भवतीह तेन वायुः सहजो यस्य समुत्थितः प्रणादः। अणिमादिगुणा भवन्ति तस्यामितपुण्यं च महागुणोदयस्य॥ सुरराजतनूजवैरिरन्ध्रे विनिरुध्य स्वकराङ्गुलिद्वयेन। जलधेरिव धीरनादमन्तः प्रसरन्तं सहसा शृणोति मर्त्यः॥' इति। सुरराज इन्द्रस्तस्य तनूजोऽर्जुनस्तस्य वैरी कर्णस्तद्रन्ध्रे। स्पष्टमन्यत्॥ ८२॥

अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम्।
पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत्॥८३॥

अभ्यस्यमान इति। अभ्यस्यमानोऽनुसंधीयमानोऽयं नादोऽनाहताख्यो बाह्यं ध्वनिं वहिर्भवं शब्दमावृणुते श्रुत्योर्विषयम्। योगी नादाभ्यासी पक्षान्मासार्धादखिलं सर्वं विक्षेपं चित्तचाञ्चल्यं जित्वाऽभिभूय सुखी स्वानन्दो भवेत्॥ ८३॥

श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्।
ततोऽभ्यासे वर्धमाने श्रूयते सूक्ष्मसूक्ष्मकः॥ ८४॥

श्रूयत इति। प्रथमाभ्यासे पूर्वाभ्यासे नानाविधोऽनेकविधो महान् जलधिजीमूतभेर्यादिसदृशो नादोऽनाहतस्वनः श्रूयते आकर्ण्यते। ततोऽनन्तरमभ्यासे नादानुसंधानाभ्यासे वर्धमाने

सति सूक्ष्मसूक्ष्मकः सूक्ष्मः सूक्ष्म एव श्रूयते श्रवणविषयो भवति ॥ ८४ ॥

आदौ जलधिजीमूतभेरीझर्झरसंभवाः ।
मध्ये मर्दलशङ्खोत्था घण्टाकाहलजास्तथा ॥ ८५ ॥

नानाविधं नादमाह द्वाभ्याम्—आदाविति । आदौ वायोर्ब्रह्मरन्ध्रगमनसमये जलधिः समुद्रो जीमूतो मेघो भेरी वाद्यविशेषः । 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यमरः । झर्झरो वाद्यविशेषः । 'वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः । मर्दलः पणवोऽन्येऽपि' इत्यमरः । जलधिप्रमुखेभ्यः संभव इव संभवो येषां ते तथा मध्ये ब्रह्मरन्ध्रे वायोः स्थैर्यानन्तरं मर्दलो वाद्यविशेषः शङ्खो जलजस्ताभ्यामुत्था इव मर्दलशङ्खोत्थाः । घण्टाकाहलौ वाद्यविशेषौ ताभ्यां जाता इव घण्टाकाहलजाः ॥

अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनाः ।
इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः ॥ ८६ ॥

अन्ते त्विति । अन्ते तु प्राणस्य ब्रह्मरन्ध्रे बहुस्थैर्यानन्तरं तु किङ्किणी क्षुद्रघण्टिका वंशो वेणुः वीणा तन्त्री भ्रमरो मधुपः तेषां निःस्वना इति पूर्वोक्ता नानाविधा अनेकप्रकारका देहस्य मध्ये गताः प्राप्ताः श्रूयन्ते ॥ ८६ ॥

महति श्रूयमाणेऽपि मेघभेर्यादिके ध्वनौ ।
तत्र सूक्ष्मात्सूक्ष्मतरं नादमेव परामृशेत् ॥ ८७ ॥

महतीति । मेघश्च भेरी च ते आदी यस्य स मेघभेर्यादिकस्तस्मिन् । मेघभेरीशब्दौ तज्जन्यनिर्घोषपरौ । महति बहुले ध्वनौ निनादे श्रूयमाणे आकर्ण्यमाने सत्यपि तत्र तेषु नादेषु सूक्ष्मात्सूक्ष्मतरमतिसूक्ष्मं नादमेव परामृशेच्चिन्तयेत् । सूक्ष्मस्य नादस्य चिरस्थायित्वात्तत्रासक्तचित्तश्चिरं स्थिरमतिर्भवेदिति भावः ॥ ८७ ॥

घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने ।
रममाणमपि क्षिप्तं मनो नान्यत्र चालयेत् ॥ ८८ ॥

घनमिति । घनं महान्तं नादं मेघभेर्यादिकमुत्सृज्य घने वा नादे रममाणं घनसूक्ष्मान्यतरनादग्रहणपरित्यागाभ्यां क्रीडन्तमपि क्षिप्तं रजसाऽत्यन्तचञ्चलं मनोऽन्यत्र विषयान्तरे न चालयेन्न प्रेरयेत् । क्षिप्तं मनो विषयान्तरासक्तं न समाधीयते, नादेषु रममाणं तु समाधीयत इति भावः ॥ ८८ ॥

यत्र कुत्रापि वा नादे लगति प्रथमं मनः ।
तत्रैव सुस्थिरीभूय तेन सार्धं विलीयते ॥ ८९ ॥

यत्रेति । वा अथ वा यत्र कुत्रापि नादे यस्मिन्कस्मिंश्चिद्घने सूक्ष्मे वा नादे प्रथमं पूर्वं मनो लगति लग्नं भवति

तत्रैव तस्मिन्नेव नादे सुस्थिरीभूय सम्यक् स्थिरं भूत्वा तेन नादेन सार्धं साकं विलीयते लीनं भवतीत्यर्थः। अत्र पूर्ववाक्येन प्रत्याहारो द्वितीयेन धारणा तृतीयेन ध्यानद्वारा समाधिरुक्तः ॥ ८९ ॥

मकरन्दं पिबन्भृङ्गो गन्धं नापेक्षते यथा।
नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षते ॥९०॥

मकरन्दमिति। मकरन्दं पुष्परसं पिबन् धयन् भृङ्गो भ्रमरो गन्धं यथा नापेक्षते नेच्छति तथा नादासक्तं नाद आसक्तं चित्तमन्तःकरणं विषयान् विषिण्वन्त्यवबध्नन्ति प्रमातारं स्वसङ्गेनेति विषयाः स्रक्चन्दनवनितादयस्तान् न काङ्क्षते नेच्छति। हीति निश्चये ॥ ९० ॥

मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः।
नियमेन समर्थोऽयं निनादनिशिताङ्कुशः ॥ ९१ ॥

मन इति। विषयः शब्दादिरेवोद्यानं वनं तत्र चरतीति विषयोद्यानचारी तस्य मन एव मत्तगजेन्द्रो दुर्निवारत्वात्। तस्य निनाद एवानाहतध्वनिरेव निशिताङ्कुशः तीक्ष्णाङ्कुशः नियमेन परावर्तने समर्थः शक्तः। एतैः श्लोकैः। 'चरतां चक्षुरादीनां विषयेषु यथाक्रमम्। यत्प्रत्याहरणं तेषां प्रत्याहारः

प्रकीर्तितः ' ॥ इन्द्रियाणां विषयेभ्यः प्रत्याहरणं प्रत्याहार इत्युक्तलक्षणः प्रत्याहारः प्रोक्तः ॥ ९१ ॥

बद्धं तु नादबन्धेन मनः संत्यक्तचापलम् ।
प्रयाति सुतरां स्थैर्यं छिन्नपक्षः खगो यथा ॥ ९२ ॥

बद्धं त्विति । नाद एव बन्धः बध्यतेऽनेनेति बन्धः बन्धनसाधनं तेन स्वशक्त्या स्वाधीनकरणेन बद्धं बन्धनमिव प्राप्तम् । नादधारणादावासक्तमित्यर्थः । अत एव सम्यक् त्यक्तं चापलं क्षणे क्षणे विषयग्रहणपरित्यागरूपं येन तत्तथा मनः सुतरां स्थैर्यं प्रयाति नितरां धारणामेति । तत्र दृष्टान्तमाह— छिन्नौ पक्षौ यस्य तादृशः खे गच्छतीति खगः पक्षी यथा । एतेन । ' प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् । वशीकृत्य ततः कुर्याच्चित्तस्थैर्यं शुभाश्रये ' ॥ शुभाश्रये चित्तस्थापनं धारणेत्युक्तलक्षणा धारणा प्रोक्ता ॥ ९२ ॥

सर्वचिन्तां परित्यज्य सावधानेन चेतसा ।
नाद एवानुसंधेयो योगसाम्राज्यमिच्छता ॥ ९३ ॥

सर्वचिन्तामिति । सर्वेषां बाह्याभ्यन्तरविषयाणां या चिन्ता चिन्तनं तां परित्यज्य त्यक्त्वा सावधानेनैकाग्रेण चेतसा योगानां साम्राज्यं सम्राजो भावः । योगशब्दोऽर्शआद्यजन्तः । राज-

योगित्वमिति यावत् । इच्छता वाञ्छता पुंसा नाद एवानाहतध्वनिरेवानुसंधेयोऽनुचिन्तनीयः । नादाकारवृत्तिप्रवाहः कर्तव्य इत्यर्थः । एतेन । 'तद्रूपप्रत्ययैकाग्र्यसंततिश्चान्यनिस्पृहा । तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप' ॥ 'तत्र प्रत्ययैकतानता ध्यानम्' इत्युक्तलक्षणं ध्यानमुक्तम् ॥ ९३ ॥

नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते ।
अन्तरङ्गकुरङ्गस्य वधे व्याधायतेऽपि च ॥ ९४ ॥

नादोऽन्तरङ्गेति । नादः अन्तरङ्गं मन एव सारङ्गो मृगस्तस्य बन्धने चाञ्चल्यहरणे वागुरायते वागुरेवाचरति । वागुरा जालम् । यथा वागुरा बन्धनेन सारङ्गस्य चाञ्चल्यं हरति तथा नादोऽन्तरङ्गस्य स्वशक्त्या चाञ्चल्यं हरतीत्यर्थः । अन्तरङ्गं मन एव सारङ्गो हरिणस्तस्य बन्धने नानावृत्त्युत्पादनापनयनमेव मनसो बन्धस्तस्मिन् व्याधायते व्याध इवाचरति । यथा व्याधो वागुराबद्धं मृगं हन्ति एवं नादोऽपि स्वासक्तं मनो हन्तीत्यर्थः ॥ ९४ ॥

अन्तरङ्गस्य यमिनो वाजिनः परिघायते ।
नादोपास्तिरतो नित्यमवधार्या हि योगिना ॥ ९५ ॥

अन्तरङ्गस्येति । यमिनो योगिनोऽन्तरङ्गं मनस्तस्य चपलत्वाद्वाजिनोऽश्वस्य परिघायते वाजिशालाद्वारपरिघ इवा-

चरति नाद इति शेषः । यथा वाजिशालापरिघो वाजिनोऽन्यत्र गतिं रुणद्धि तथा नादोऽन्तरङ्गस्येत्यर्थः । अन्तःकरणाद्योगिना नादस्योपास्तिरुपासना नित्यं प्रत्यहमवधार्याऽवधारणीया । हीति निश्चयेऽव्ययम् ॥ ९५ ॥

बद्धं विमुक्तचाञ्चल्यं नादगन्धकजारणात् ।
मनःपारदमाप्नोति निरालम्बाख्यखेऽटनम् ॥ ९६ ॥

बद्धमिति । नाद एव गन्धक उपधातुविशेषस्तेन जारणं जारणीकरणं नादगन्धकसंबन्धेन चाञ्चल्यहरणं तस्माद्बद्धं नादैकासक्तं पक्षे गुटिकाकृतिं प्राप्तम् अत एव विमुक्तं त्यक्तं चाञ्चल्यमनेकविषयाकारपरिणामरूपं येन । पक्षे विमुक्त-लौल्यं मनःपारदं मन एव पारदं चञ्चलं निरालम्बं ब्रह्म तदेवाख्या यस्य तन्निरालम्बाख्यं तदेव खमपरिच्छिन्नत्वा-त्तस्मिन्नटनं गमनं तदाकारवृत्तिप्रवाहम् । पक्षे आकाशगमनं प्राप्नोति । यथा बद्धं पारदमाकाशगमनं करोति एवं बद्धं मनो ब्रह्माकारवृत्तिप्रवाहमविच्छिन्नं करोतीत्यर्थः ॥ ९६ ॥

नादश्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः ।
विस्मृत्य सर्वमेकाग्रः कुत्रचिन्न हि धावति ॥ ९७ ॥

नादेति । नादस्यानाहतस्वनस्य श्रवणतः श्रवणात् क्षिप्रं द्रुतमन्तरङ्गं मन एव भुजङ्गमः सर्पश्चपलत्वान्नादप्रियत्वाच्च

भुजङ्गमरूपत्वं मनसः। सर्वं विश्वं विस्मृत्य विस्मृतिविषयं कृत्वैकाग्रो नादाकारवृत्तिप्रवाहवान् सन्कुत्रापि विषयान्तरे न हि धावति नैव धावनं करोति। ध्यानोत्तरैः श्लोकैः 'तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्। मनसा ध्याननिष्पाद्यः समाधिः सोऽभिधीयते॥' इति विष्णुपुराणोक्त-लक्षणः 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः' इति पातञ्जलसूत्रोक्तलक्षणेन च संप्रज्ञातलक्षणः समाधिरुक्तः॥९७॥

काष्ठे प्रवर्तितो वह्निः काष्ठेन सह शाम्यति।
नादे प्रवर्तितं चित्तं नादेन सह लीयते॥ ९८॥

काष्ठ इति। काष्ठे दारुणि प्रवर्तितः प्रज्वालितो वह्निः काष्ठेन सह शाम्यति ज्वालारूपं परित्यज्य तन्मात्ररूपेणावतिष्ठते यथा तथा नादे प्रवर्तितं चित्तं नादेन सह लीयते। राजसतामस-वृत्तिनाशात्सत्त्वमात्रावशेषं संस्कारशेषं च भवति। तत्र च मैत्रा-यणीयमन्त्रः—'यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति। तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति॥' इति॥ ९८॥

घण्टादिनादसक्तस्तब्धान्तःकरणहरिणस्य।
प्रहरणमपि सुकरं स्याच्छरसंधानप्रवीणश्चेत्॥९९॥

घण्टादीति। घण्टा आदिर्येषां शङ्खमर्दलझर्झरदुन्दुभिजी-मूतादीनां ते घण्टादयस्तेषां नादस्तेषु सक्तः। अत एव

स्तब्धो निश्चलो योऽन्तःकरणमेव हरिणो मृगस्तस्य प्रहरणं नानावृत्तिप्रतिबन्धनमन्तःकरणपक्षे । हरिणपक्षे तु प्रहरणं हननमपि शरवद् द्रुतगामिनो वायोः संधानं सुषुम्णामार्गेण ब्रह्मरन्ध्रे निरोधनम्, पक्षे शरस्य बाणस्य संधानं धनुषि योजनं तस्मिन् प्रवीणः कुशलश्चेत्सुकरं सुखेन कर्तुं शक्यं स्यात् ॥ ९९ ॥

अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते ।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः ।
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ॥ १०० ॥

अनाहतस्येति । अनाहतस्य शब्दस्यानाहतस्वनस्य यो ध्वनिर्निर्ह्राद उपलभ्यते श्रूयते तस्य ध्वनेरन्तर्गतं ज्ञेयं ज्योतिः स्वप्रकाशचैतन्यं ज्ञेयस्यान्तर्गतं ज्ञेयाकारतामापन्नं मनोऽन्तःकरणं तत्र ज्ञेये मनो विलयं याति परवैराग्येण सकलवृत्तिशून्यं संस्कारशेषं भवति । तद्विष्णोर्विभोरात्मनः परममन्तःकरणवृत्त्युपाधिराहित्यान्निरुपाधिकं पद्यते गम्यते योगिभिरिति पदं स्वरूपम् ॥ १०० ॥

तावदाकाशसंकल्पो यावच्छब्दः प्रवर्तते ।
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते ॥ १०१ ॥

तावदिति । यावच्छब्दोऽनाहतध्वनिः प्रवर्तते श्रूयते तावदाकाशस्य सम्यक्कल्पनं भवति । शब्दस्याकाशगुणत्वाद्गुण-

गुणिनोर्भेदाद्वा मनसा सह शब्दस्य विलयान्निःशब्दं शब्दरहितं यत्परं ब्रह्म परब्रह्मशब्दवाच्यं परमात्मेति गीयते परमात्मशब्देन स उच्यते । सर्ववृत्तिविलये यः स्वरूपेणावस्थितः स एव परब्रह्मपरमात्मशब्दाभ्यामुच्यत इति भावः ॥ १०१ ॥

यत्किंचिन्नादरूपेण श्रूयते शक्तिरेव सा ।
यस्तत्त्वान्तो निराकारः स एव परमेश्वरः ॥ १०२ ॥
इति नादानुसंधानम् ।

यत्किंचिदिति । नादरूपेणानाहतध्वनिरूपेण यत्किंचिच्छ्रूयते आकर्ण्यते सा शक्तिरेव यस्तत्त्वान्तस्तत्त्वानामन्तो लयो यस्मिन् सः तथा निराकार आकाररहितः स एव परमेश्वरः सर्ववृत्तिक्षये स्वरूपावस्थितो यः स आत्मेत्यर्थः । 'काष्ठे प्रवर्तितो वह्निः' इत्यादिभिः श्लोकैः राजयोगापरपर्यायोऽसंप्रज्ञातः समाधिरुक्तः ॥ १०२ ॥

सर्वे हठलयोपाया राजयोगस्य सिद्धये ।
राजयोगसमारूढः पुरुषः कालवञ्चकः ॥ १०३ ॥

सर्वे इति । हठश्च लयश्च हठलयौ तयोरुपाया हठलयोपाया हठोपाया आसनकुम्भकमुद्रारूपा लयोपाया नादानुसंधानशांभवीमुद्रादयः । राजयोगस्य मनसः सर्ववृत्तिनिरोधलक्षणस्य

सिद्धये निष्पत्तये प्रोक्ता इति शेषः । राजयोगसमारूढः सम्यगारूढः प्राप्तवान् यः पुरुषः स कालवञ्चकः कालं मृत्युं वञ्चयति जयतीति तादृशः स्यादिति शेषः ॥ १०३ ॥

तत्त्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः ।
उन्मनी कल्पलतिका सद्य एव प्रवर्तते ॥ १०४ ॥

तत्त्वमिति । तत्त्वं चित्तं बीजं बीजवदुन्मन्यवस्थाङ्कुराकारेण परिणममानत्वात् । हठः प्राणापानयोरैक्यलक्षणः प्राणायामः क्षेत्रं क्षेत्रे इव प्राणायामे उन्मनीकल्पलतिकोत्पत्तेः । औदासीन्यं परवैराग्यं जलं तस्या उत्पत्तिकारणत्वात् । 'परवैराग्यहेतुकः संस्कारविशेषश्चित्तस्यासंप्रज्ञातः' इति तल्लक्षणात् । एतैस्त्रिभिरुन्मन्यसंप्रज्ञातावस्था सैव कल्पलतिका सकलेष्टसाधनत्वात्सद्य एव शीघ्रमेव प्रवर्तते प्रवृत्ता भवति उत्पन्ना भवति ॥ १०४ ॥

सदा नादानुसंधानात्क्षीयन्ते पापसंचयाः ।
निरञ्जने विलीयेते निश्चितं चित्तमारुतौ ॥ १०५ ॥

सदेति । सदा सर्वदा नादानुसंधानान्नादानुचिन्तनात्पापसंचयाः पापसमूहाः क्षीयन्ते नश्यन्ति । निरञ्जने निर्गुणे चैतन्ये निश्चितं ध्रुवं चित्तमारुतौ मनःप्राणौ विलीयेते विलीनौ भवतः ॥ १०५ ॥

शङ्खदुन्दुभिनादं च न शृणोति कदाचन।
काष्ठवज्जायते देह उन्मन्याऽवस्थया ध्रुवम् ॥१०६॥

उन्मन्यवस्थां प्राप्तस्य योगिनः स्थितिमाहाष्टभिः—शङ्खदुन्दुभीति। शङ्खो जलजो दुन्दुभिर्वाद्यविशेषस्तयोर्नादं घोषं कदाचन कस्मिंश्चिदपि समये न शृणोति। शङ्खदुन्दुभीत्युपलक्षणं नादमात्रस्य। उन्मन्याऽवस्थया देहो ध्रुवं काष्ठवज्जायते। निश्चेष्टत्वादित्यर्थः ॥ १०६ ॥

सर्वावस्थाविनिर्मुक्तः सर्वचिन्ताविवर्जितः।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः॥ १०७॥

जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणलक्षणाः पञ्च व्युत्थानावस्थाः। ताभिर्विशेषेण मुक्तो रहितः सर्वा याश्चिन्ताः स्मृतयस्ताभिर्विवर्जितो विरहितो यः योगः सकलवृत्तिनिरोधोऽस्यास्तीति योगी तुर्यावस्थावान् स मुक्तो जीवन्नेव मुक्तः। सकलवृत्तिनिरोधे आत्मनः स्वरूपावस्थानात्। तदुक्तं पातञ्जले सूत्रे—'तदा द्रष्टुः स्वरूपेऽवस्थानम्' इति। स्पष्टमन्यत् ॥ १०७ ॥

खाद्यते न च कालेन बाध्यते न च कर्मणा।
साध्यते न स केनापि योगी युक्तः समाधिना ॥१०८॥

खाद्यत इति। समाधिना युक्तो योगी कालेन मृत्युना न खाद्यते न भक्ष्यते न हन्यत इत्यर्थः। कर्मणा कृतेन

शुभेनाशुभेन वा न बाध्यते जन्ममरणादिजननेन न क्लेश्यते । तथा च समाधिप्रकरणे पातञ्जलसूत्रम्—'ततः क्लेशकर्मनिवृत्तिः' इति । केनापि पुरुषान्तरेण यन्त्रमन्त्रादिना वा न साध्यते साधयितुं शक्यते ॥ १०८ ॥

न गन्धं न रसं रूपं न च स्पर्शं न निःस्वनम् ।
नात्मानं न परं वेत्ति योगी युक्तः समाधिना ॥१०९॥

न गन्धमिति । समाधिना युक्तो योगी न गन्धं सुरभिमसुरभिं वा न रसं मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधं न रूपं शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं न स्पर्शं शीतमुष्णमनुष्णाशीतं वा न निःस्वनं शङ्खदुन्दुभिजलधिजीमूतादिनिनादं बाह्यमाभ्यन्तरं वा न आत्मानं देहं न परं पुरुषान्तरं वेत्तीति सर्वत्रान्वेति । 'आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि' इत्यमरः ॥ १०९ ॥

चित्तं न सुप्तं नो जाग्रत्स्मृतिविस्मृतिवर्जितम् ।
न चास्तमेति नोदेति यस्यासौ मुक्त एव सः ॥ ११० ॥

चित्तमिति । यस्य योगिनश्चित्तमन्तःकरणं न सुप्तम् । आवरकस्य तमसोऽभावात्त्रिगुणेऽन्तःकरणे यदा सत्त्वरजसी अभिभूय समस्तकरणावरकं तम आविर्भवति तदाऽन्तःकरणस्य विषयाकारपरिणामाभावात्तत्सुप्तमित्युच्यते । नो जाग्रत् इन्द्रियै-

रर्थग्रहणाभावात्। स्मृतिश्च विस्मृतिश्च स्मृतिविस्मृती ताभ्यां विवर्जितम्। वृत्तिसामान्याभावादुद्बोधकाभावाच्च स्मृतिवर्जितम्। विस्मृत्यनुकूलसंस्काराभावाद्विस्मृतिवर्जितम्। न चास्तं नाशमेति प्राप्नोति। संस्कारशेषस्य चित्तस्य सत्त्वात्। नोदेत्युद्भवति। वृत्त्यनुत्पादनात्। सोऽसौ मुक्त एव जीवन्मुक्त एव॥ ११०॥

न विजानाति शीतोष्णं न दुःखं न सुखं तथा।
न मानं नापमानं च योगी युक्तः समाधिना॥ १११॥

न विजानातीति। समाधिना युक्तो योगी शीतं च उष्णं च शीतोष्णम्। समाहारद्वन्द्वः। शीतमुष्णं वा पदार्थं न दुःखं दुःखजनकं परकृतं ताडनादिकं न सुखं सुखसाधनं सुरभिचन्दनाद्यनुलेपनादिकम्। तथा चार्थे। मानं परकृतं सत्कारं न अपमानमनादरं च न विजानातीति क्रियापदं प्रतिवाक्यमन्वेति॥ १११॥

स्वस्थो जाग्रदवस्थायां सुप्तवद्योऽवतिष्ठते।
निःश्वासोच्छ्वासहीनश्च निश्चितं मुक्त एव सः॥११२॥

स्वस्थ इति। स्वस्थः प्रसन्नेन्द्रियान्तःकरणः। एतेन तन्द्रा-मूर्च्छादिव्यावृत्तिः। जाग्रदवस्थायामित्यनेन स्वप्नसुषुप्त्योर्निवृत्तिः। सुप्तवत् सुप्तेन तुल्यं कायेन्द्रियव्यापारशून्यो यो योगी

अवतिष्ठते स्थितो भवति । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् । निःश्वासोच्छ्वासहीनः बाह्यवायोः कोष्ठे ग्रहणं निःश्वासः, कोष्ठस्थितस्य वायोर्बहिर्निःसारणमुच्छ्वासस्ताभ्यां हीनश्चावतिष्ठत इत्यत्रापि संबध्यते । स निश्चितं निःसंदिग्धं मुक्त एव । जीवन्मुक्तस्वरूपमुक्तं दत्तात्रेयेण—'निर्गुणध्यानसंपन्नः समाधिं च ततोऽभ्यसेत् । दिनद्वादशकेनैव समाधिं समवाप्नुयात् । वायुं निरुध्य मेधावी जीवन्मुक्तो भवेद् ध्रुवम् ॥' इति ॥ ११२ ॥

अवध्यः सर्वशस्त्राणामशक्यः सर्वदेहिनाम् ।
अग्राह्यो मन्त्रयन्त्राणां योगी युक्तः समाधिना ॥११३॥

अवध्य इति । समाधिना युक्तो योगी । सर्वशस्त्राणामिति संबन्धसामान्ये षष्ठी । सर्वशस्त्रैरित्यर्थः । अवध्यो हन्तुमशक्य इत्यर्थः । सर्वदेहिनामित्यत्रापि संबन्धमात्रविवक्षायां षष्ठी । अशक्यः सर्वदेहिभिः बलेन शक्यो न भवतीत्यर्थः । मन्त्रयन्त्राणां वशीकरणमारणोच्चाटनादिफलैर्मन्त्रयन्त्रैरग्राह्यः वशीकर्तुमशक्यः । एवं प्राप्तयोगस्य योगिनो विघ्ना बहवः समायान्ति । तन्निवारणार्थं तज्ज्ञानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते । दत्तात्रेयः 'आलस्यं प्रथमो विघ्नो द्वितीयस्तु प्रकथ्यते । पूर्वोक्तधूर्तगोष्ठी च तृतीयो मन्त्रसाधनम् । चतुर्थो धातुवादः स्यादिति योगविदो विदुः ॥' इति । मार्कण्डेयपुराणे—'उपसर्गाः प्रवर्तन्ते

दृष्टा ह्यात्मनि योगिनः । ये तांस्ते संप्रवक्ष्यामि समासेन निबोध मे ॥ काम्याः क्रियास्तथा कामान्मनुष्यो योऽभिवाञ्छति । स्त्रियो दानफलं विद्यां मायां कुप्यं धनं वसु ॥ देवत्वममरेशत्वं रसायनवयःक्रियाम् । मेरुं प्रयतनं यज्ञं जलाग्न्यावेशनं तथा ॥ श्राद्धानां शक्तिदानानां फलानि नियमास्तथा । तथोपवासात्पूर्ताच्च देवपित्रर्चनादपि ॥ अतिथिभ्यश्च कर्मभ्य उपसृष्टोऽभिवाञ्छति । विघ्नमित्थं प्रवर्तेत यत्नाद्योगी निवर्तयेत् । ब्रह्मासङ्गि मनः कुर्वन्नुपसर्गैः प्रमुच्यते ॥' इति । पद्मपुराणे—'यदैभिरन्तरायैर्न क्षिप्यतेऽस्य हि मानसम् । तदाऽग्रे समवाप्नोति परं ब्रह्मातिदुर्लभम्' । योगभास्करे—'सात्त्विकीं धृतिमालम्ब्य योगी सत्त्वेन सुस्थिरः । निर्गुणं मनसा ध्यायन्नुपसर्गैः प्रमुच्यते ॥ एवं योगमुपासीनः शक्रादिपदनिःस्पृहः । सिद्ध्यादिवासनात्यागी जीवन्मुक्तो भवेन्मुनिः ॥' इति । 'विस्तरस्य भिया नोक्ताः सन्ति विघ्ना ह्यनेकशः । ध्यानेन विष्णुहरयोर्वारणीया हि योगिना ॥' इति ॥ ११३ ॥

यावन्नैव प्रविशति चरन्मारुतो मध्यमार्गे
यावद्बिन्दुर्न भवति दृढः प्राणवातप्रबन्धात् ।
यावद्ध्याने सहजसदृशं जायते नैव तत्त्वं
तावज्ज्ञानं वदति तदिदं दम्भमिथ्याप्रलापः ॥११४॥

अयोगिनां ज्ञानं निराकुर्वन् योगिनामेव ज्ञानं भवतीत्याह—यावदिति । मध्यमार्गे सुषुम्णायां चरन् गच्छन् मारुतः प्राणवायुः यावत् यावत्कालपर्यन्तं न प्रविशति प्रकर्षेण ब्रह्मरन्ध्रपर्यन्तं न विशति । ब्रह्मरन्ध्रं गतस्य स्थैर्याद्ब्रह्मरन्ध्रं गत्वा न स्थिरो भवतीत्यर्थः । सुषुम्णायामसंचरन् वायुरसिद्ध इत्युच्यते । तदुक्तममृतसिद्धौ—'यावद्धि मार्गगो वायुर्निश्चलो नैव मध्यगः । असिद्धं तं विजानीयाद्वायुं कर्मवशानुगम् ॥' इति । प्राणयति जीवयतीति प्राणः स चासौ वातश्च प्राणवातः तस्य प्रबन्धात्कुम्भकेन स्थिरीकरणाद्बिन्दुर्वीर्यं दृढः स्थिरो न भवति प्राणवातस्थैर्ये बिन्दुस्थैर्यमुक्तमत्रैव प्राक्—'मनःस्थैर्ये स्थिरो वायुस्ततो बिन्दुः स्थिरो भवेत्' इति । तदभावे त्वसिद्धत्वं योगिनः । उक्तममृतसिद्धौ—'तावद्बद्धोऽप्यसिद्धोऽसौ नरः सांसारिको मतः । यावद्भवति देहस्थो रसेन्द्रो ब्रह्मरूपकः ॥ असिद्धं तं विजानीयान्नरमब्रह्मचारिणम् । जरामरणसंकीर्णं सर्वक्लेशसमाश्रयम् ॥' इति । यावत्तत्त्वं चित्तं ध्याने ध्येयचित्तं न सहजसदृशं स्वाभाविकध्येयाकारवृत्तिप्रवाहान्नैव जायते नैव भवति प्राणवातप्रबन्धादिति देहलीदीपन्यायेनात्रापि संबध्यते । वायुस्थैर्ये चित्तस्थैर्यमुक्तममृतसिद्धौ—'यदाऽसौ म्रियते वायुर्मध्यमां मध्ययोगतः । तदा बिन्दुश्च चित्तं च म्रियते वायुना सह' । तदभावे

ह्यसिद्धत्वमुक्तममृतसिद्धौ—'यावत्प्रस्यन्दते चित्तं बाह्याभ्यन्तरवस्तुषु। असिद्धं तद्विजानीयाच्चित्तं कर्मगुणान्वितम् ॥' इति। तावद्यज्ज्ञानं शाब्दं वदति कश्चित् तदिदं ज्ञानं कथं दम्भमिथ्याप्रलापः दम्भेन ज्ञानकथनेनाहं लोके पूज्यो भविष्यामीति धिया मिथ्याप्रलापो मिथ्याभाषणं दम्भपूर्वकं मिथ्याभाषणमित्यर्थः। प्राणबिन्दुचित्तानां जयाभावे ज्ञानस्याभावात्संसृतिर्दुर्वारा। तदुक्तममृतसिद्धौ—'चलत्येष यदा वायुस्तदा बिन्दुश्चलः स्मृतः। बिन्दुश्चलति यस्याङ्गे चित्तं तस्यैव चञ्चलम् ॥ चले बिन्दौ चले चित्ते चले वायौ च सर्वदा। जायते म्रियते लोकः सत्यं सत्यमिदं वचः ॥' इति। योगबीजेऽप्युक्तम्—'चित्तं प्रणष्टं यदि भासते वै तत्र प्रतीतो मरुतोऽपि नाशः। न वा यदि स्यान्न तु तस्य शास्त्रं नात्मप्रतीतिर्न गुरुर्न मोक्षः ॥' इति। एतेन प्राणबिन्दुमनसां जये तु ज्ञानद्वारा योगिनो मुक्तिः स्यादेवेति सूचितम्। तदुक्तममृतसिद्धौ—'यामवस्थां व्रजेद्वायुर्बिन्दुस्तामधिगच्छति। यथा हि साध्यते वायुस्तथा बिन्दुप्रसाधनम् ॥ मूर्च्छितो हरति व्याधिं वृद्धः खेचरतां नयेत्। सर्वसिद्धिकरो लीनो निश्चलो मुक्तिदायकः। यथाऽवस्था भवेद्बिन्दोश्चित्तावस्था तथा तथा ॥' ननु 'योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया। ज्ञानं कर्म च भक्तिश्च

नोपायोऽन्योऽस्ति कुत्रचित् ॥' इति भगवदुक्तास्त्रयो मोक्षोपायाः, तेषु सत्सु कथं योग एव मोक्षोपायत्वेनोक्त इति चेन्न, तेषां योगाङ्गेष्वन्तर्भावात् । तथा हि—'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुत्या परमपुरुषार्थसाधनात्मसाक्षात्कारहेतुतया श्रवणमनननिदिध्यासनान्युक्तानि । तत्र श्रवणमनने नियमान्तर्गते स्वाध्यायेऽन्तर्भवतः । स्वाध्यायश्च मोक्षशास्त्राणामध्ययनम् । स च तात्पर्यार्थनिर्णयपर्यवसायो ग्राह्यः । तात्पर्यार्थनिर्णयश्च श्रवणमननाभ्यां भवतीति श्रवणमननयोः स्वाध्यायेऽन्तर्भावः । नियमविवरणे याज्ञवल्क्येन 'सिद्धान्तश्रवणं प्रोक्तं वेदान्तश्रवणं बुधैः' इति स्पष्टमेव श्रवणस्य नियमान्तर्गतिरुक्ता । 'अधीतवेदं सूत्रं वा पुराणं सेतिहासकम् । पदेष्वध्ययनं यश्च सदाभ्यासो जपः स्मृतः' इति युक्तिभिरनवरतमनुचिन्तनलक्षणस्य सदाभ्यासरूपस्य मननस्यापि नियमान्तर्गतिरुक्ता । विजातीयप्रत्ययनिरोधपूर्वकसजातीयप्रत्ययप्रवाहरूपस्य निदिध्यासनस्य उक्तलक्षणे ध्यानेऽन्तर्भावः । तस्यापि तत्परिपाकरूपसमाधिनाऽऽत्मसाक्षात्कारद्वारा मोक्षहेतुत्वमीश्वरार्पणबुद्ध्या निष्कामकर्मानुष्ठानलक्षणस्य कर्मयोगस्य 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' इति पतञ्जलिप्रोक्ते नियमान्तर्गते क्रियायोगेऽन्तर्भावः । तत्र तप उक्तमीश्वर-

गीतायाम्—'उपवासपराकादिकृच्छ्रचान्द्रायणादिभिः । शरीरशोषणं प्राहुस्तापसास्तप उत्तमम् ॥' इति । स्वाध्यायोऽपि तत्रोक्तः—'वेदान्तशतरुद्रीयप्रणवादिजपं बुधाः । सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ॥' इति । ईश्वरप्रणिधानं च तत्रोक्तम्—'स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः । सुनिश्चला भवेद्भक्तिरेतदीश्वरपूजनम् ॥' इति । क्रियायोगश्च परम्परया समाधिनाऽऽत्मसाक्षात्कारद्वारैव मोक्षहेतुरिति समाधिभावनार्थः । 'क्लेशतनूकरणार्थश्च' इत्युत्तरसूत्रेण स्पष्टीकृतं पतञ्जलिना । भज्यते सेव्यते भगवदाकारमन्तःकरणं क्रियतेऽनयेति भक्तिरिति करणव्युत्पत्त्या 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥' इति नवधोक्ता साधनभक्तिरभिधीयते । तस्या ईश्वरप्रणिधानरूपे नियमेऽन्तर्भावः । तस्याश्च समाधिहेतुत्वं चोक्तं पतञ्जलिना—'ईश्वरप्रणिधानाद्वा' इति । ईश्वरविषयकात्प्रणिधानाद्भक्तिविशेषात्समाधिलाभः समाधिफलं भवतीति सूत्रार्थः । भजनमन्तःकरणस्य भगवदाकारतारूपं भक्तिरिति भावव्युत्पत्त्या फलभूता भक्तिरभिधीयते । सैव प्रेमभक्तिरित्युच्यते । तल्लक्षणमुक्तं नारायणतीर्थैः—'प्रेमभक्तियोगस्तु ईश्वरचरणारविन्दविषयकैकान्तिकात्यन्तिकप्रेमप्रवाहोऽविच्छिन्नः' इति । मधुसूदनसरस्वतीभिस्तु 'द्रवीभावपूर्विका मनसो भगव-

दाकारतारूपा सविकल्पकवृत्तिर्भक्तिः' इति । तस्यास्तु 'श्रद्धाभक्तिध्यानयोगादवेहि' इति श्रुतेः, 'भक्त्या मामभिजानाति' इति स्मृतेश्च आत्मसाक्षात्कारद्वारा मोक्षहेतुत्वम् । भक्तास्तु सुखस्यैव पुरुषार्थत्वाद्दुःखासंभिन्ननिरतिशयसुखधारारूपा प्रेमभक्तिरेव पुरुषार्थ इत्याहुः । तस्यास्तु संप्रज्ञातसमाधावन्तर्भावः । एवं च अष्टाङ्गयोगातिरिक्तं किमपि परमपुरुषार्थसाधनं नास्तीति सिद्धम् ॥ ११४ ॥

इति श्रीसहजानन्दसंतानचिन्तामणिस्वात्मारामयोगीन्द्रविरचितायां हठप्रदीपिकायां समाधिलक्षणं नाम चतुर्थोपदेशः ॥ ४ ॥
मूलश्लोकसंख्या ॥ ३९३ ॥ श्रीकृष्णार्पणमस्तु ॥

ग्राह्यमेव विदुषां हितं यतो भाषणं समयदर्श्यसंस्कृतम् ।
रक्ष गच्छति पयो न लेहितं ह्यम्ब इत्यभिहितं शिशोर्यथा ॥ १ ॥
सदर्थद्योतनकरी तमःस्तोमविनाशिनी ।
ब्रह्मानन्देन ज्योत्स्नेयं शिवाङ्घ्रियुगलेऽर्पिता ॥ २ ॥

इति श्रीहठप्रदीपिकाव्याख्यायां ब्रह्मानन्दकृतायां समाधिनिरूपणं नाम चतुर्थोपदेशः ॥ ४ ॥ टीकाग्रन्थसंख्या ॥ २४५० ॥

Printed by A. K. Sitarama Shastri, at the Vasanta Press, Adyar, Madras, India.

THE T.P.H. ORIENTAL SERIES

Sri Bhagavad-Gita: Sanskrit Text and English Translation by Dr. Annie Besant and S'rī Bhagavān Dās, M.A. This Edition contains a word for word translation and an introduction to Sanskrit Grammar. Indian Edition Rs. 2-8; Foreign Edition Rs. 3-8; Presentation Edition—Superior Leather Gilt Rs. 8.

The Yoga Sutras of Patanjali: Sanskrit Text and English Translation by Prof. M. N. Dvivedī. It contains also notes drawn from various authoritative sources, *viz.*, the Bhāṣyas of Vyāsa, Vācaspatimis'ra, Bhoja and Rāmānanda Sarasvatī, and the Yogavārttika of Vijñāna Bhikṣu; besides there is an introduction to its study by George C. Williams. Indian Edition Re. 1-4; Foreign Edition Re. 1-12.

The Twelve Principal Upanishads: Sanskrit Text, English Translation and notes from the commentaries of S'rī S'aṅkarācārya and the gloss of Ānandagiri in THREE Volumes.

Vol. I: Contains nine Upaniṣads, *viz.*, Īs'a, Kena, Kaṭha, Pras'na, Muṇḍaka, Māṇḍūkya, Taittirīya, Aitareya, and S'vetās'vatara Upaniṣads, translated by that eminent Orientalist, Dr. E. Roer. Prof. M. N. Dvivedī has contributed a scholarly preface to these volumes. Indian Edition Rs. 4; Foreign Edition Rs. 5.

Vol. II: Bṛhadāraṇyakopaniṣad, translated by Dr. E. Roer. Indian Edition Rs. 6; Foreign Edition Rs. 7.

Vol. III: Chāndogya and Kauṣītaki-Brāhmaṇa Upaniṣads: Text, translated by Rāja Rājendralāl Mitra and Prof. E. B. Cowell, M.A., respectively. Indian Edition Rs. 5; Foreign Edition Rs. 6.

Yogasarasangraha of Vijñānabhikṣu. Text in Devanāgarī, English Translation by Mahāmahopādhyāya Dr. Gaṅgānātha Jha, M.A., F.T.S. Revised Indian Edition Rs. 2-8; Ex. Edition Rs. 3-8.

Gheranda Samhita: A treatise on Haṭha Yoga. Text and Translation by Sris Candra Vasu. Indian Edition Rs. 2; Ex. Edition Rs. 2-8.

Brahmasutrabhashya of S'rī S'aṅkarācārya with Bhamati of Vācaspati Mis'ra for the Catussutri. (The first four of the Vedānta-sūtras of Bādarāyaṇa.) Text in Devanāgarī, English Translation with Introduction and Notes by Prof. S. S. Sūryanārāyaṇa S'āstrī, M.A., B.Sc. (Oxon.), Bar-at-Law, and Prof. C. Kunhan Rājā, M.A., D.Phil. (Oxon.) Indian Edition Rs. 8; Ex. Edition Rs. 10.

Hatha-Yoga Pradipika of Svātmārāma Svāmin with the commentary of Brahmānanda. Text and translation with Notes by Yogī Srinivasa Iyengar, B.A. Indian Edition Rs. 3; Ex. Edition Rs. 4.

Manameyodaya: A Primer on Mīmāṁsā by Nārāyaṇa Bhaṭṭa; Text in Devanāgarī, English translation, with Introduction and Notes by Prof. C. Kunhan Rājā, M.A., D.Phil. (Oxon.), Head of the Department of Sanskrit and Prof. S. S. Sūryanārāyaṇa S'āstrī, M.A., B.Sc. (Oxon.), Bar-at-Law, Head of the Department of Philosophy, University of Madras. Indian Edition Rs. 5; Ex. Edition Rs. 6.

THEOSOPHICAL PUBLISHING HOUSE

Adyar, Madras, India

हठयोग

एक ऐतिहासिक परिप्रेक्ष्य एवं हठयोग प्रदीपिका



सुरेन्द्र कुमार शर्मा

हठयोग—एक ऐतिहासिक परिप्रेक्ष्य
एवं
हठयोगप्रदीपिका

—सुरेन्द्र कुमार शर्मा

हठयोग—आत्मस्थिति रूप परम स्वरूप को प्राप्त करने के लिए भारत की प्राचीनतम साधना-पथ का प्रतिनिधित्व करता है। इसी कारण भारतीय दर्शन परम्परा में इसका अपना विशिष्ट स्थान है क्योंकि कायाघट के हठयोगाग्नि में तापन को परमशिवरूप जल की प्राप्ति का साधन माना गया है। इसी यौगिक प्रक्रिया के विभिन्न पक्षों (षट् कर्म, आसन, प्राणायाम, मुद्रा और कुण्डलिनी-जागरण इत्यादि) का विशद विश्लेषण हठयोग-प्रदीपिका का विषय है। प्रस्तुत पुस्तक महायोग और उसके विभिन्न पहलुओं पर प्रकाश डालते हुए हठयोगसम्बन्धी भ्रान्तियों को निरस्त करने का प्रयास है। हठयोग के घटक तत्त्वों का पर्यालोचन तथा मूल ग्रन्थ को उपस्थापित करने से पूर्व इस पर विकासात्मक दृष्टि से प्रकाश डाला गया है।

मूल्य : रु० ५०.००

हठयोग : एक ऐतिहासिक परिप्रेक्ष्य
एवं हठयोगप्रदीपिका

हठयोग : एक ऐतिहासिक परिप्रेक्ष्य
एवं
हठयोगप्रदीपिका

सुरेन्द्र कुमार शर्मा

ईस्टर्न बुक लिंकर्स
दिल्ली :: (भारत)

प्रकाशक :
ईस्टर्न बुक लिंकर्स
5825, न्यू चन्द्रावल, जवाहर नगर, दिल्ली-110007

प्रथम संस्करण : 1985

मूल्य : रु० 50.00

मुद्रक :
रूबी प्रिंटिंग सर्विस,
मोहन मार्किट, रोहतास नगर,
शाहदरा, दिल्ली-3

गृहस्थानां सहस्रेण वानप्रस्थशतेन च ।
ब्रह्मचारिसहस्रेण योगाभ्यासी विशिष्यते ।।

(ब्रह्माण्ड पुराण)

ज्ञाननिष्ठो विरक्तो वा धर्मज्ञोऽपि जितेन्द्रियः ।
विना योगेन देवोऽपि न मोक्षं लभते प्रिये ।।

(भगवान् शङ्कर)

पुरोवाक्

संस्कृत वाङ्मय विशाल होने के साथ ही साथ इतना विविध है कि इसमें न केवल मानव जीवन अपितु स्थावर जङ्गमात्मक इस विश्व का कोई भी अङ्ग इसके विवेचन से वञ्चित नहीं रहा है। इसके महनीय कलेवर में विकसित विद्याओं एवं कलाओं की संख्या अपरिगणनीय है। जीवन को बहुत सूक्ष्मता से देखने, समझने एवं उसको यथा-सम्भव परिपूर्ण बनाने के लिए प्राचीन भारतीय मनीषियों का योगदान सर्वथा अक्षुण्ण है। विद्याओं एवं कलाओं की विविधता में भी एकसूत्रता पाई जाती है और वह है अध्यात्मप्रवणता जहाँ आकर ही सभी स्रोतों का पर्यवसान होता है। सबका परम लक्ष्य यही है कि हम कौन हैं, हमारा स्वार्थ और परमार्थ क्या है तथा उनकी प्राप्ति हम किस प्रकार कर सकते हैं।

भवेद्वीर्यवती गुप्ता निर्वीर्या तु प्रकाशिता ।। 11 ।।

सुराज्ये धार्मिके देशे सुभिक्षे निरुपद्रवे ।।
धनुःप्रमाणपर्यन्तं शिलाग्निजलवर्जिते ।।
एकान्ते मठिकामध्ये स्थातव्यं हठयोगिना ।। 12 ।।

अल्पद्वारमरन्ध्रगर्तविवरं नात्युच्चनीचायतं
सम्यग्गोमयसान्द्रलिप्तममलं निःशेषजंन्तूज्झितम् ।।
बाह्ये मण्डपवेदिकूपरुचिरं प्राकारसंवेष्टितं
प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः ।। 13 ।।

एवंविधे मठे स्थित्वा सर्वचिन्ताविवर्जितः ।।
गुरूपदिष्टमार्गेण योगमेव समभ्यसेत् ।। 14 ।।

अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।।
जनसङ्गश्च लौल्यं च षड्भिर्योगो विनश्यति ।। 15 ।।

उत्साहोत्साहसाद्धैर्यात्तत्त्वज्ञानाच्च निश्चयात् ।।
जनसङ्गपरित्यागात्षड्भिर्योगः प्रसिद्ध्यति ।। 16 ।।

अथ यमनियमाः

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं क्षमा धृतिः ।।
दयार्जवं मिताहारः शौचं चैव यमा दश ।। 17 ।।

तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ।।
सिद्धान्तवाक्यश्रवणं ह्रीमती च तपो हुतम् ।।
नियमा दश सम्प्रोक्ता योगशास्त्रविशारदैः ।। 18 ।।

अथ आसनम्

हठस्य प्रथमाङ्गत्वादासनं पूर्वमुच्यते ।।
कुर्यात्तदासनं स्थैर्यमारोग्यं चाङ्गलाघवम् ।। 19 ।।

वसिष्ठाद्यैश्च मुनिभिर्मत्स्येन्द्राद्यैश्च योगिभिः ।।
अङ्गीकृतान्यासनानि कथ्यन्ते कानिचिन्मया ।। 20 ।।

जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे ।।
ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते ।। 21 ।।

सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे नियोजयेत् ।।
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखाकृति ।। 22 ।।

एकं पादं तथैकस्मिन्विन्यसेदूरुणि स्थितम् ।।
इतरस्मिंस्तथा चोरुं वीरासनमितीरितम् ।। 23 ।।

गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ।।
कूर्मासनं भवेदेतदिति योगविदो विदुः ।। 24 ।।

पद्मासनं तु संस्थाप्य जानूर्वोरन्तरे करौ ।।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम् ।। 25 ।।

कुक्कुटासनबन्धस्थो दोर्भ्यां सम्बध्य कन्धराम् ।।
भवेत्कूर्मवदुत्तान एतदुत्तानकूर्मकम् ।। 26 ।।

पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।।
धनुराकर्षणं कुर्याद्धनुरासनमुच्यते ।। 27 ।।

वामोरुमूलार्पितदक्षपादं जानोर्बहिर्वेष्टितवामपादम् ।।
प्रगृह्य तिष्ठेत्परिवर्तिताङ्गः श्रीमत्स्यनाथोदितमासनं स्यात् ।। 28 ।।

मत्स्येन्द्रपीठं जठरप्रदीप्तिं प्रचण्डरुग्मण्डलखण्डनास्त्रम् ।।
अभ्यासतः कुण्डलिनीप्रबोधं चन्द्रस्थिरत्वं च ददाति पुंसाम् ।।29।।

प्रसार्य पादौ भुवि दण्डरूपौ दोर्भ्यां पदाग्रद्वितयं गृहीत्वा ।।
जानूपरि न्यस्तललाटदेशो वसेदिदं पश्चिमतानमाहुः ।। 30 ।।

इति पश्चिमतानमासनाग्र्यं पवनं पश्चिमवाहिनं करोति ।।
उदयं जठरानलस्य कुर्यादुदरे कार्श्यमरोगतां च पुंसाम् 31 ।।

धरामवष्टभ्य करद्वयेन तत्कूर्परस्थापितनाभिपार्श्वः ।।
उच्चासनो दण्डतदुत्थितः स्यान्मयूरमेतत्प्रवदन्ति पीठम् ।। 32 ।।

हरति सकलरोगानाशु गुल्मोदरादीनभिभवति च दोषानासनं श्रीमयूरम् ।।
बहु कदशनभुक्तं भस्म कुर्यादशेषं जनयति जठराग्निं जारयेत्कालकूटम् ।। 33 ।।

उत्तानं शववद्भूमौ शयनं तच्छवासनम् ।।
शवासनं श्रान्तिहरं चित्तविश्रान्तिकारकम् ।। 34 ।।

चतुरशीत्यासनानि शिवेन कथितानि च ।।
तेभ्यश्चतुष्कमादाय सारभूतं ब्रवीम्यहम् ।। 35 ।।

सिद्धं पद्मं तथा सिंहं भद्रं चेति चतुष्टयम् ।।
श्रेष्ठं तत्रापि च सुखे तिष्ठेत्सिद्धासने सदा ।। 36 ।।

योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेत्
मेढ्रे पादमथैकमेव हृदये कृत्वा हनुं सुस्थिरम् ॥
स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद्भ्रुवोरन्तरं
ह्येतन्मोक्षकपाटभेदजननं सिद्धासनं प्रोच्यते ॥ 37 ॥

मतान्तरे तु

मेढ्रादुपरि विन्यस्य सव्यं गुल्फं तथोपरि ॥
गुल्फान्तरं च निक्षिप्य सिद्धासनमिदं भवेत् ॥ 38 ॥

एतत्सिद्धासनं प्राहुरन्ये वज्रासनं विदुः ॥
मुक्तासनं वदन्त्येके प्राहुर्गुप्तासनं परे ॥ 39 ॥

यमेष्विव मिताहारमहिंसां नियमेष्विव ॥
मुख्यं सर्वासनेष्वेकं सिद्धाः सिद्धासनं विदुः ॥ 40 ॥

चतुरशीतिपीठेषु सिद्धमेव सदाभ्यसेत् ॥
द्वासप्ततिसहस्राणां नाडीनां मलशोधनम् ॥ 41 ॥

आत्मध्यायी मिताहारी यावद्द्वादशवत्सरम् ॥
सदा सिद्धासनाभ्यासाद्योगी निष्पत्तिमाप्नुयात् ॥ 42 ॥

किमन्यैर्बहुभिः पीठैः सिद्धे सिद्धासने सति ॥
प्राणानिले सावधाने बद्धे केवलकुम्भके ॥ 43 ॥

उत्पद्यते निरायासात्स्वयमेवोन्मनी कला ।
तथैकस्मिन्नेव दृढे सिद्धे सिद्धासने सति ।
बन्धत्रयमनायासात्स्वयमेवोपजायते ॥ 44 ॥

नासनं सिद्धसदृशं न कुम्भः केवलोपमः ॥
न खेचरीसमा मुद्रा न नादसदृशो लयः ॥ 45 ॥

अथ पद्मासनम्

वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेत्
एतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते ॥ 46 ॥

उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ॥
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ ॥ 47 ॥

नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया ।।
उत्तम्भ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः ।। 48 ।।

इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनम् ।।
दुर्लभं येन केनापि धीमता लभ्यते भुवि ।। 49 ।।

कृत्वा सम्पुटितौ करौ दृढतरं बध्वा तु पद्मासनं
गाढं वक्षसि सन्निधाय चिबुकं ध्यायंश्च तच्चेतसि ।
वारं वारमपानमूर्ध्वमनिलं प्रोत्सारयन्पूरितं
न्यञ्चन्प्राणमुपैति बोधमतुलं शक्तिप्रभावान्नरः ।। 50 ।।

पद्मासने स्थितो योगी नाडीद्वारेण पूरितम् ।।
मारुतं धारयेद्यस्तु स मुक्तो नात्र संशयः ।। 51 ।।

अथ सिंहासनम्

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।।
दक्षिणे सव्यगुल्फं तु दक्षगुल्फं तु सव्यके ।। 52 ।।

हस्तौ तु जान्वोः संस्थाप्य स्वाङ्गुलीः सम्प्रसार्य च ।।
व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ।। 53 ।।

सिंहासनं भवेदेतत्पूजितं योगिपुङ्गवैः ।।
बन्धत्रितयसन्धानां कुरुते चासनोत्तमम् ।। 54 ।।

अथ भद्रासनम्

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।।
सव्यगुल्फं तथा सव्ये दक्षगुल्फं तु दक्षिणे ।। 55 ।।

पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चलम् ।।
भद्रासनं भवेदेतत्सर्वव्याधिविनाशनम् ।। 56 ।।

गोरक्षासनमित्याहुरिदं वै सिद्धयोगिनः ।।
एवमासनबन्धेषु योगीन्द्रो विगतश्रमः ।। 57 ।।

अभ्यसेन्नाडिकाशुद्धिं मुद्रादिपवनक्रियाम् ।।
आसनं कुम्भकं चित्रं मुद्राख्यं करणं तथा ।। 58 ।।

अथ नादानुसन्धानमभ्यासानुक्रमो हठे ।
ब्रह्मचारी मिताहारी त्यागी योगपरायणः ।
अब्दादूर्ध्वं भवेत्सिद्धो नात्र कार्या विचारणा ।। 59 ।।

सुस्निग्धमधुराहारश्चतुर्थांशविवर्जितः ।।
भुज्यते शिवसम्प्रीत्यै मिताहारः स उच्यते ।। 60 ।।

कट्वम्लतीक्ष्णलवणोष्णहरीतशाक-
सौवीरतैलतिलसर्षपमद्यमत्स्यान् ।
आजादिमांसदधितक्रकुलत्थकोल-
पिण्याकहिङ्गुलशुनाद्यमपथ्यमाहुः ।।61।।

भोजनमहितं विद्यात्पुनरस्योष्णीकृतं रुक्षम् ।।
अतिलवणमम्लयुक्तं कदशनशाकोत्कटं वर्ज्यम् ।।
वह्निस्त्रीपथिसेवानामादौ वर्जनमाचरेत् ।। 62 ।।

तथा हि गोरक्षवचनम्

वर्जयेद्दुर्जनप्रान्तं वह्निस्त्रीपथिसेवनम् ।।
प्रातःस्नानोपवासादि कायक्लेशविधिं तथा ।। 63 ।।

गोधूमशालियवषाष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि ।।
शुंठीपटोलकफलादिक पञ्च शाकम्
मुद्गादिदिव्यमुदकं च यमीन्द्रपथ्यम् ।। 64 ।।

पुष्टं सुमधुरं स्निग्धं गव्यं धातुप्रपोषणम् ।।
मनोभिलषितं योग्यं योगी भोजनमाचरेत् ।। 65 ।।

युवा वृद्धोऽतिवृद्धो वा व्याधितो दुर्बलोऽपि वा ।।
अभ्यासात्सिद्धिमाप्नोति सर्वयोगेष्वतन्द्रितः ।। 66 ।।

क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत् ।।
न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते ।। 67 ।।

न वेषधारणं सिद्धेः कारणं न च तत्कथा ।।
क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः ।। 68 ।।

पीटानि कुम्भकाश्चित्रा दिव्यानि करणानि च ।।
सर्वाण्यपि हठाभ्यासे राजयोगफलावधि ।। 69 ।।

इति हठयोगप्रदीपिकायां प्रथमोपदेशः ।।

द्वितीयोपदेशः ॥

अथासने दृढे योगी वशी हितमिताशनः ॥
गुरूपदिष्टमार्गेण प्राणायामान्समभ्यसेत् ॥ 1 ॥

चले वाते चलं चित्तं निश्चले निश्चलं भवेत् ॥
योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् ॥ 2 ॥

यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ॥
मरणं तस्य निश्क्रान्तिस्ततो वायुं निरोधयेत् ॥ 3 ॥

मलाकुलासु नाडीषु मारुतो नैव मध्यगः ॥
कथं स्यादुन्मनीभावः कार्यसिद्धिः कथं भवेत् ॥ 4 ॥

शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलम् ॥
तदैव जायते योगी प्राणसंग्रहणे क्षमः ॥ 5 ॥

प्राणायामं ततः कुर्यान्नित्यं सात्त्विकया धिया ॥
यथा सुषुम्नानाडीस्था मलाः शुद्धिं प्रयान्ति च ॥ 6 ॥

बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ॥
धारयित्वा यथाशक्ति भूयः सूर्येण रेचयेत् ॥ 7 ॥

प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः ॥
विधिवत्कुम्भकं कृत्वा पुनश्चन्द्रेण रेचयेत् ॥ 8 ॥

येन त्यजेत्तेन पीत्वा धारयेदतिरोधतः ॥
रेचयेच्च ततोऽन्येन शनैरेव न वेगतः ॥ 9 ॥

प्राणं चेदिडया पिबेन्नियमितं भूयोऽन्यया रेचयेत्
पीत्वा पिङ्गलया समीरणमथो बध्वा त्यजेद्वामया ॥
सूर्याचन्द्रमसोरनेन विधिनाभ्यासं सदा तन्वतां
शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः ॥10॥

प्रातर्मध्यन्दिने सायमर्धरात्रे च कुम्भकान् ।।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ।। 11 ।।

कनीयसि भवेत्स्वेदः कम्पो भवति मध्यमे ।।
उत्तमे स्थानमाप्नोति ततो वायुं निबन्धयेत् ।। 12 ।।

जलेन श्रमजातेन गात्रमर्दनमाचरेत् ।।
दृढता लघुता चैव तेन गात्रस्य जायते ।। 13 ।।

अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनम् ।।
ततोऽभ्यसेद् दृढीभूते न तादृङ्नियमग्रहः ।। 14 ।।

यथा सिंहो गजो व्याघ्रो भवेद्वश्यः शनैःशनैः ।।
तथैव सेवितो वायुरन्यथा हन्ति साधकम् ।। 15 ।।

प्राणायामादियुक्तेन सर्वरोगक्षयो भवेत् ।।
अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः ।। 16 ।।

हिक्का श्वासश्च कासश्च शिरःकर्णाक्षिवेदनाः ।।
भवन्ति विविधा रोगाः पवनस्य प्रकोपतः ।। 17 ।।

युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च पूरयेत् ।।
युक्तं युक्तं च बध्नीयादेवं सिद्धिमवाप्नुयात् ।। 18 ।।

यदा तु नाडीशुद्धिः स्यात्तथा चिह्नानि बाह्यतः ।।
कायस्य कृशता कान्तिस्तदा जायेत निश्चितम् ।। 19 ।।

यथेष्टधारणं वायोरनलस्य प्रदीपनम् ।।
नादाभिव्यक्तिरारोग्यं जायते नाडीशोधनम् ।। 20 ।।

मेदश्लेष्माधिकः पूर्वं षट्कर्माणि समाचरेत् ।।
अन्यस्तु नाचरेत्तानि दोषाणां समभावतः ।। 21 ।।

धौतिर्बस्तिस्तथा नेतिस्त्राटकं नौलिकं तथा ।।
कपालभातिश्चैतानि षट् कर्माणि प्रचक्षते ।। 22 ।।

कर्माष्टकमिदं गोप्यं घटशोधनकारकम् ।।
विचित्रगुणसन्धायि पूज्यते योगपुङ्गवैः ।। 23 ।।

तत्र धौतिः

चतुरङ्गुलविस्तारं हस्तपञ्चदशायतम् ।।
गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत् ।।
पुनः प्रत्याहरेच्चैतदुदितं धौतिकर्म तत् ।। 24 ।।

कासश्वासप्लीहकुष्टं कफरोगांश्च विंशतिः ।।
धौतिकर्मप्रभावेन प्रयान्त्येव न संशयः ।।25।।

नाभिदघ्नजले पायौ न्यस्तनालोत्कटासनः ।।
आधाराकुञ्चनं कुर्यात्क्षालनं बस्तिकर्म तत् ।।26।।

बस्तिकर्म

गुल्मप्लीहोदरं चापि वातपित्तकफोद्भवाः ।।
बस्तिकर्मप्रभावेन क्षीयन्ते सकलामयाः ।।27।।

धात्विन्द्रियान्तःकरणप्रसादं
दद्याच्च कान्ति दहनप्रदीप्तिम् ।।
अशेषदोषोपचयं निहन्या-
दभ्यस्यमानं जलबस्तिकर्म ।।28।।

अथ नेतिः

सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् ।
मुखान्निर्गमयेच्चैषा नेतिः सिद्धैर्निगद्यते ।।29।।

कपालशोधिनी चैव दिव्यदृष्टिप्रदायिनी ।।
जत्रूर्ध्वजातरोगौघं नेतिराशु निहन्ति च ।।30।।

अथ त्राटकम्

निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः ।।
अश्रुसम्पातपर्यन्तमाचार्यैस्त्राटकं स्मृतम् ।।31।।

मोचनं नेत्ररोगाणां तन्द्रादीनां कपाटकम् ।।
यत्नतस्त्राटकं गोप्यं यथा हाटकपेटकम् ।।32।।

अथ नौलिः

अमदावर्तवेगेन तुन्दं सव्यापसव्यतः ।।
नतांसो भ्रामयेदेषा नौलिः सिद्धैः प्रचक्ष्यते ।।33।।

मन्दाग्निसन्दीपनपाचनादि सन्धापिका नन्दकरी सदैव ।।
अशेषदोषामयशोषणी च हठक्रियामौलिरियं च नौलिः ।।34।।

अथ कपालभातिः

भस्त्रावल्लोहकारस्य रेचपूरौ ससंभ्रमौ ।।
कपालभातिर्विख्याता कफदोषविशोषणी ।।35।।

षट्कर्मनिर्गतस्थौल्यकफदोषमलादिकः ।।
प्राणायामं ततः कुर्यादनायासेन सिद्ध्यति ।।36।।

प्राणायामैरेव सर्वे प्रशुष्यन्ति मला इति ।।
आचार्याणां तु केषाञ्चिदन्यत्कर्म न सम्मतम् ।।37।।

अथ गजकरणी

उदरगतपदार्थमुद्वमन्ति पवनमपानमुदीर्य कण्ठनाले ।।
क्रमपरिचयवश्यनाडिचक्रा गजकरणीति निगद्यते हठज्ञैः ।।38।।

ब्रह्मादयोऽपि त्रिदशाः पवनाभ्यासतत्पराः ।।
अभूवन्नन्तकभयात्तस्मात्पवनमभ्यसेत् ।।39।।

यावद्बद्धो मरुद्देहे यावच्चित्तं निराकुलम् ।।
यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः ।।40।।

विधिवत्प्राणसंयामैर्नाडीचक्रे विशोधिते ।।
सुषुम्नावदनं भित्वा सुखाद्विशति मारुतः ।।41।।

अथ मनोन्मनी

मारुते मध्यसञ्चारे मनःस्थैर्यं प्रजायते ।।
यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी ।।42।।

तत्सिद्धये विधानज्ञाश्चित्रान्कुर्वन्ति कुम्भकान् ।।
विचित्रकुम्भकाभ्यासाद्विचित्रां सिद्धिमाप्नुयात् ।।43।।

अथ कुम्भकभेदाः

सूर्यभेदनमुज्जायी सीत्कारी सीतली तथा ।।
भस्त्रिका भ्रामरी मूर्च्छा प्लाविनीत्यष्ट कुम्भकाः ।।44।।

पूरकान्ते तु कर्तव्यो बन्धो जालन्धराभिधः ।।
कुम्भकान्ते रेचकादौ कर्तव्यस्तूड्डियानकः ।।45।।

अधस्तात्कुञ्चनेनाशु कण्ठसङ्कोचने कृते ।।
मध्ये पश्चिमतानेन स्यात्प्राणो ब्रह्मनाडिगः ।।46।।

आपानमूर्ध्वमुत्थाप्य प्राणं कण्ठादधो नयेत् ।।
योगी जराविमुक्तः सन् षोडशाब्दवयो भवेत् ।।47।।

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः । शिवसंहितायाम् अ० 3 श्लो० 7 ।

अथ सूर्यभेदनम्

आसने सुखदे योगी बद्ध्वा चैवासनं ततः ।।
दक्षनाड्या समाकृष्य बहिःस्थं पवनं शनैः ।।48।।

आकेशादानखाग्राच्च निरोधावधि कुम्भयेत् ।।
ततः शनैः सव्यनाड्या रेचयेत्पवनं शनैः ।।49।।

कपालशोधनं वातदोषघ्नं कृमिदोषहृत् ।।
पुनः पुनरिदं कार्यं सूर्यभेदनमुत्तमम् ।।50।।

योगाभ्यासक्रमं वक्ष्ये योगिनां योगसिद्धये ।
उषःकाले समुत्थाय प्रातःकालेऽथवा बुधः ।। 1 ।।

गुरुं संस्मृत्य शिरसि हृदये स्वेष्टदेवताम् ।
शौचं कृत्वा दन्तशुद्धिं विदध्याद् भस्मधारणम् ।। 2 ।।

शुचौ देशे मठे रम्ये प्रतिष्ठाप्यासनं मृदु ।
तत्रोपविश्य संस्मृत्य मनसा गुरुमीश्वरम् ।। 3।।

देशकालौ च संकीर्त्य संकल्प्य विधिपूर्वकम् ।
अद्येत्यादि श्रीपरमेश्वरप्रसादपूर्वकं समाधि-
तत्फलसिद्ध्यर्थमासनपूर्वकान् प्राणायामादीन् करिष्ये ।
अनन्तं प्रणमेद्देवं नागेशं पीठसिद्धये ।।4 ।।

मणिभ्रात्फणासहस्रविधृतविश्वम्भरा-
मण्डलायानन्ताय नागराजाय नमः ।
ततोऽभ्यसेदासनानि श्रमे जाते शवासनम् ।
अन्ते समभ्यसेत्तत्तु श्रमाभावे तु नाभ्यसेत् ।।5।।

करणीं विपरीताख्यां कुम्भकात्पूर्वमभ्यसेत् ।
जालन्धरप्रसादार्थे कुम्भकात्पूर्वयोगतः ।।6।।

विधायाचमनं कृत्वा कर्माङ्गं प्राणसंयमम् ।
योगीन्द्रादीन्नमस्कृत्य कौर्मीञ्च शिववाक्यतः ।।7।। कूर्मपुराणे ।

नमस्कृत्याथ योगीन्द्रान् सच्छिष्यान्च विनायकम्।
गुरुं चैवाथवा योगी युन्जीत सुसमाहितः ।।8।।

बद्धाभ्यासे सिद्धपीठं कुम्भकाबन्धपूर्वकम् ।
प्रथमे दश कर्तव्या पन्चवृद्ध्या दिने दिने ।। 9 ।।

कार्या अशीतिपर्यन्तं कुम्भकाः सुसमाहितैः।
योगीन्द्रः प्रथमं कुर्यादभ्यासं चन्द्रसूर्ययोः ।।10।।

अनुलोमविलोमाख्यमेतं प्राहुर्मनीषिणः।
सूर्यभेदनमभ्यस्य बन्धपूर्वकमेकधीः ।।11।।

उज्जायिनं ततः कुर्यात्सीत्कारीं शीतलीं ततः।
भस्त्रिकान्च समभ्यस्य कुर्यादन्यन्नवापरान् ।।12।।

मुद्राः समभ्यसेद्बद्धगुरुवक्त्राद् यथाक्रमम् ।
ततः पद्मासनं बद्ध्वा कुर्यान्नादानुचिन्तनम् ।।13।।

अभ्यासं सकलं कुर्यादीश्वरार्पणमादृतः।
अभ्यासादुत्थितः स्नानं कुर्यादुष्णेन वारिणा ।।14।।

स्नात्वा समापयेन्नित्यं कर्म संक्षेपतः सुधीः।
मध्याह्नेपि तथाभ्यस्य किञ्चिद्विश्रम्य भोजनम् ।।15।।

कुर्वीत योगिनां पथ्यमपथ्यन्न कदाचन ।।
एलां वापि लवङ्गं वा भोजनान्तं च भक्षयेत् ।।16।।

केचित्कर्पूरमिच्छन्ति ताम्बूलं शोभनं तथा ।
चूर्णेन रहितं शस्तं पवनाभ्यासयोगिनाम् ।।17।।

भोजनानन्तरं कुर्यान्मोक्षशास्त्रावलोकनम् ।
पुराणश्रवणं वापि नाम सङ्कीर्तनं विभोः ।।18।।

सायं सन्ध्याविधिं कृत्वा योगं पूर्ववदभ्यसेत् ।
यदा त्रिघटिकाशेषो दिवसोऽभ्यासमाचरेत् ।। 19 ।।

अभ्यासानन्तरं कार्या सायंसन्ध्या सदा बुधैः ।।
अर्धरात्रे हठाभ्यासं विदध्यात्पूर्ववद्यमी ।।20।

विपरीतां तु करणीं सायंकालार्धरात्रयोः ।
नाभ्यसेद्भोजनादूर्ध्वं यतः सा न प्रशस्यते ।। 21 ।।

अथोज्जायी ॥

मुखं संयम्य नाडीभ्यामाकृष्य पवनं शनैः ॥
यथा लगति कण्ठात्तु हृदयावधि सस्वनम् ॥ 51 ॥

पूर्ववत्कुम्भयेत्प्राणं रेचयेदिडया ततः ॥
श्लेष्मदोषहरं कण्ठे देहानलविवर्धनम् ॥ 52 ॥

नाडीजलोदराधातुगतदोषविनाशनम् ॥
गच्छता तिष्ठता कार्यमुज्जाय्याख्यं तु कुम्भकम् ॥ 53 ॥

अथ सीत्कारी ॥

सीत्कां कुर्यात्तथा वक्त्रे घ्राणेनैव विजृम्भिकाम् ॥
एवमभ्यासयोगेन कामदेवो द्वितीयकः ॥ 54 ॥

योगिनीचक्रसामान्यः सृष्टिसंहारकारकः ॥
न क्षुधा न तृषा निद्रा नैवालस्यं प्रजायते ॥ 55 ॥

भवेत्सत्त्वं च देहस्य सर्वोपद्रववर्जितः ॥
अनेन विधिना सत्यं योगीन्द्रो भूमिमण्डले ॥ 56 ॥

अथ शीतली ॥

जिह्वया वायुमाकृष्य पूर्ववत्कुम्भसाधनम् ॥
शनकैर्घ्राणरन्ध्राभ्यां रेचयेत्पवनं सुधीः ॥ 57 ॥

गुल्मप्लीहादिकान् रोगान् ज्वरं पित्तं क्षुधां तृषाम् ।
विषाणि शीतलीनाम कुम्भिकेयं निहन्ति हि ॥58॥

अथ भस्त्रिका ॥

ऊर्वोरुपरि संस्थाप्य शुभे पादतले उभे ।
पद्मासनं भवेदेतत्सर्वपापप्रणाशनम् ॥ 59 ॥

सम्यक् पद्मासनं बध्वा समग्रीवोदरं सुधीः ॥
मुखं संयम्य यत्नेन घ्राणं घ्राणेन रेचयेत् ॥ 60 ॥

यथा लगति हृत्कण्ठे कपालावधि सस्वनम् ॥
वेगेन पूरयेच्चापि हृत्पद्मावधि मारुतम् ॥ 61 ॥

पुनर्विरेचयेत्तद्वत्पूरयेच्च पुनः पुनः ॥
यथैव लोहकारेण भस्त्रा वेगेन चाल्यते ॥ 62॥

तथैव स्वशरीरस्थं चालयेत्पवनं धिया ।।
यदा श्रमो भवेद्देहे तदा सूर्येण पूरयेत् ।। 63 ।।

यथोदरं भवेत्पूर्णमनिलेन तथा लघु ।
धारयेन्नासिकां मध्यतर्जनीभ्यां विना दृढम् ।। 64 ।।

विधिवत्कुम्भकं कृत्वा रेचयेदिडयानिलम् ।
वातपित्तश्लेष्महरं शरीराग्निविवर्धनम् ।। 65 ।।

कुण्डलीबोधकं क्षिप्रं पवनं सुखदं हितम् ।
ब्रह्मनाडीमुखे संस्थकफाद्यर्गलनाशनम् ।। 66 ।।

सम्यग्गात्रसमुद्भूतग्रन्थित्रयविभेदकम् ।
विशेषेणैव कर्तव्यं भस्त्राख्यं कुम्भकं त्विदम् ।। 67 ।।

अथ भ्रामरी ।।

वेगाद्घोषं पूरकं भृङ्गनादं भृङ्गीनादं रेचकं मन्दमन्दम् ।।
योगीन्द्राणामेवमभ्यासयोगाच्चित्ते जाता काचिदानन्दलीला ।।68।।

अथ मूर्च्छा

पूरकान्ते गाढतरं बध्वा जालन्धरं शनैः ।।
रेचयेन्मूर्च्छनाख्येयं मनोमूर्च्छा सुखप्रदा ।। 69 ।।

अथ प्लाविनी ।।

अन्तः प्रवर्तितोदारमारुतापूरितोदरः ।
पयस्यगाधेऽपि सुखात्प्लवते पद्मपत्रवत् ।।70।।

प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ।।71।।

यावत्केवलसिद्धिः स्यात्सहितं तावदभ्यसेत् ।
रेचकं पूरकं मुक्त्वा सुखं यद्वायुधारणम् ।। 72 ।।

प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः ।
कुम्भके केवले सिद्धे रेचपूरकवर्जिते ।। 73 ।।

न तस्य दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते ।
शक्तः केवलकुम्भेन यथेष्टं वायुधारणात् ।। 74 ।।

राजयोगपदं चापि लभते नात्र संशयः ।
कुम्भकात्कुण्डलीबोधः कुण्डलीबोधतो भवेत् ।। 75 ।।

अनर्गला सुषुम्ना च हठसिद्धिश्च जायते ।
हठं विना राजयोगो राजयोगं बिना हठः ॥
न सिध्यति ततो युग्ममानिष्पत्तेः समभ्यसेत् ॥ 76 ॥

कुंभकप्राणरोधान्ते कुर्याच्चित्तं निराश्रयम् ।
एवमभ्यासयोगेन राजयोगपदं व्रजेत् ॥ 77 ॥

वपुः कृशत्वं वदने प्रसन्नता नादस्फुटत्वं नयने सुनिर्मले ।
अरोगता बिन्दुजयोऽग्निदीपनं नाडीविशुद्धिर्हठयोगलक्षणम् ॥78॥

इति हठयोगप्रदीपिकायां द्वितीयोपदेशः ॥ 2 ॥

तृतीयोपदेशः ।

सशैलवनधात्रीणां यथाधारोऽहिनायकः ।
सर्वेषां योगतन्त्राणां तथाधारो हि कुण्डली ॥ 1 ॥

सुप्ता गुरुप्रसादेन यदा जागर्ति कुंण्डली ।
तदा सर्वाणि पद्मानि भिद्यन्ते ग्रन्थयोऽपि च ॥2॥

प्राणस्य शून्यपदवी तथा राजपथायते ।
तदा चित्तं निरालम्बं तदा कालस्य वञ्चनम् ॥ 3 ॥

सुषुम्ना शून्यपदवी ब्रह्मरन्ध्रं महापथः ।
श्मशानं शाम्भवी मध्यमार्गश्चेत्येकवाचकाः ॥ 4 ॥

तस्मात्सर्वप्रयत्नेन प्रबोधयितुमीश्वरीम् ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ॥ 5 ॥

अथ मुद्राभेदाः

महामुद्रा महाबन्धो महावेधश्च खेचरी ।
उड्यानं मूलबन्धश्च बन्धो जालन्धराभिधः ॥ 6 ॥

करणी विपरीताख्या वज्रोली शक्तिचालनम् ।
इदं हि मुद्रादशकं जरामरणनाशनम् ॥ 7 ॥

आदिनाथोदितं दिव्यमष्टैश्वर्यप्रदायकम् ।
वल्लभं सर्वसिद्धानां दुर्लभं मरुतामपि ॥ 8 ॥

गोपनीयं प्रयत्नेन यथा रत्नकरण्डकम् ।
कस्यचिन्नैव वक्तव्यं कुलस्त्रीसुरतं यथा ॥ 9 ॥

अथ महामुद्रा ॥

पादमूलेन वामेन योनिं सम्पीड्य दक्षिणम् ।
प्रसारितं पदं कृत्वा कराभ्यां धारयेद्दृढम् ॥ 10 ॥

कण्ठे बन्धं समारोप्य धारयेद्वायुमूर्ध्वतः ॥
यथा दण्डहतः सर्पो दण्डाकारः प्रजायते ॥ 11 ॥

ऋज्वीभूता तथा शक्तिः कुण्डली सहसा भवेत् ॥
तदा सा मरणावस्था जायते द्विपुटाश्रया ॥ 12 ॥

ततः शनैः शनैरेव रेचयेन्नैव वेगतः ॥
महामुद्रां च तेनैव वदन्ति विबुधोत्तमाः ॥
इयं खलु महामुद्रा महासिद्धैः प्रदर्शिता ॥ 13 ॥

महाक्लेशादयो दोषाः क्षीयन्ते मरणादयः ॥
महामुद्रां च तेनैव वदन्ति विबुधोत्तमाः ॥ 14 ॥

चन्द्राङ्गे तु समभ्यस्य सूर्याङ्गे पुनरभ्यसेत् ॥
यावत्तुल्या भवेत्सङ्ख्या ततो मुद्रां विसर्जयेत् ॥ 15 ॥

नहि पथ्यमपथ्यं वा रसाः सर्वेऽपि नीरसाः ॥
अपि भुक्तं विषं घोरं पीयूषमपि जीर्यति ॥ 16 ॥

क्षयकुष्ठगुदावर्तगुल्माजीर्णपुरोगमाः ॥
तस्य दोषाः क्षयं यान्ति महामुद्रां तु योऽभ्यसेत् ॥17॥

कथितेयं महामुद्रा महासिद्धिकरा नृणाम् ॥
गोपनीया प्रयत्नेन न देया यस्य कस्यचित् ॥18॥

अथ महाबन्धः ॥

पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत् ॥
वामोरूपरि संस्थाप्य दक्षिणं चरणं तथा ॥ 19 ॥

पूरयित्वा ततो वायुं हृदये चुबुकं दृढम् ॥
निष्पीड्य वायुमाकुञ्च्य मनोमध्ये नियोजयेत् ॥20॥

धारयित्वा यथाशक्ति रेचयेदनिलं शनैः ॥
सव्याङ्गे तु समभ्यस्य दक्षाङ्गे पुनरभ्यसेत् ॥21॥

मतमत्र तु केषाञ्चित्कण्ठबन्धं विवर्जयेत् ॥
राजदन्तस्थजिह्वाया बन्धः शस्तो भवेदिति ॥22॥

अयं तु सर्वनाडीनामूर्ध्वं गतिनिरोधकः ।।
अयं खलु महाबन्धो महासिद्धिप्रदायकः ।।23।।

कालपाशमहाबन्धविमोचनविचक्षणः ।।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः ।।24।।

रूपलावण्यसम्पन्ना यथा स्त्री पुरुषं विना ।।
महामुद्रामहाबन्धौ निष्फलौ वेधवर्जितौ ।।25।।

अथ महावेधः ।।

महाबन्धस्थितो योगी कृत्वा पूरकमेकधीः ।।
वायूनां गतिमावृत्य निभृतं कण्ठमुद्रया ।।26।।

समहस्तयुगो भूमौ स्फिचौ सन्ताडयेच्छनैः ।।
पुटद्वयमतिक्रम्य वायुः स्फुरति मध्यगः ।।27।।

सोमसूर्याग्निसम्बन्धो जायते चामृताय वै ।।
मृतावस्था समुत्पन्ना ततो वायुं विरेचयेत् ।।28।।

महावेधोऽयमभ्यासान्महासिद्धिप्रदायकः ।।
वलीपलितवेपन्नः सेव्यते साधकोत्तमैः 29 ।।

एतत्त्रयं महागुह्यं जरामृत्युविनाशनम् ।।
वह्निवृद्धिकरं चैव ह्यिणमादिगुणप्रदम् ।।30।।

अष्टधा क्रियते चैव यामे यामे दिने दिने ।।
पुण्यसम्भारसन्धायि पापौघभिदुरं सदा ।।
सम्यक्शिक्षावतामेवं स्वल्पं प्रथमसाधनम् ।।31।।

अथ खेचरी ।।

कपालकुहरे जिह्वा प्रविष्टा विपरीतिगा ।।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ।।32।।

छेदनचालनदोहैः कलां क्रमेण वर्धयेत्तावत् ।।
सा यावद्भ्रूमध्यं स्पृशति तदा खेचरीसिद्धिः ।।33।।

स्नुहीपत्रनिभं शस्त्रं सुतीक्ष्णं स्निग्धनिर्मलम् ।।
समादाय ततस्तेन रोममात्रं समुच्छिनेत् ।।34।।

ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् ।।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ।।35।।

एवं क्रमेण षण्मासं नित्यं युक्तः समाचरेत् ।।
षण्मासाद्रसनामूलशिलाबन्धः प्रणश्यति ।।36।।

कलां पराङ्मुखीं कृत्वा त्रिपथे परियोजयेत् ।।
सा भवेत्खेचरी मुद्रा व्योमचक्रं तदुच्यते ।।37।।

रसनामूर्ध्वगां कृत्वा क्षणार्धमपि तिष्ठति ।।
विषैर्विमुच्यते योगी व्याधिमृत्युजरादिभिः ।।38।।

न रोगो मरणं तन्द्रा न निद्रा न क्षुधा तृषा ।।
न च मूर्च्छा भवेत्तस्य यो मुद्रां वेत्ति खेचरीम् ।।39।।

पीड्यते न स रोगेण लिप्यते न च कर्मणा ।।
बाध्यते न स कालेन यो मुद्रां वेत्ति खेचरीम् ।।40।।

चित्तं चरति खे यस्माज्जिह्वा चरति खे गता ।।
तेनैषा खेचरी नाम मुद्रा सिद्धैर्निरूपिता ।।41।।

खेचर्या मुद्रितं येन विवरं लम्बिकोर्ध्वतः ।।
न तस्य क्षरते बिन्दुः कामिन्याश्लेषितस्य च ।।42।।

ऊर्ध्वजिह्वः स्थिरो भूत्वा सोमपानं करोति यः ।।
मासार्धेन न सन्देहो मृत्युं जयति योगवित् ।।43।।

नित्यं सोमकलापूर्णं शरीरे यस्य योगिनः ।।
तक्षकेणापि दष्टस्य विषं तस्य न सर्पति ।।44।।

इन्धनानि यथा वह्निस्तैलवर्त्तिं च दीपकः ।।
तथा सोमकलापूर्णं देही देहं न मुञ्चति ।।45।।

गोमांसं भक्षयेन्नित्यं पिबेदमरवारुणीम् ।।
कुलीनं तमहं मन्ये इतरे कुलघातकाः ।।46।।

कृतार्थौ पितरौ तेन धन्यो देशः कुलं च तत् ।
जायते योगवान्यत्र दत्तमक्षय्यतां व्रजेत् ।।
दृष्टः सम्भाषितः स्पृष्टः पुम्प्रकृत्या विवेकवान् ।
पञ्चकोटिशतापातं पुनाति वृजिनं नृणाम् ।।
ब्रह्मवैवर्ते

गृहस्थानां सहस्रेण वानप्रस्थशतेन च ।
ब्रह्मचारिसहस्रेण योगाभ्यासी विशिष्यते ।।
ब्रह्माण्डे

राजयोगस्य माहात्म्यं को विजानाति तत्त्वतः ।
तज्ज्ञानी वसते यत्र सन्देशःपुण्यभाजनम् ।।
दर्शनादर्चनादस्य त्रिसप्तकुलसंयुताः ।
अज्ञा मुक्तिपदं यान्ति किं पुनस्तत्परायणाः ।।
अन्तर्योगं बहिर्योगं यो जानाति विशेषतः
त्वया मयाप्यसौ बन्द्यः शेषैर्वन्द्यस्तु का पुनः ।।
राजयोग, कूर्म्मपुराणे

एककालं द्विकालं वा त्रिकालं नित्यमेव वा ।
ये युञ्जते महायोगं विज्ञेयास्ते महेश्वराः ।।

गोशब्देनोदिता जिह्वा तत्प्रवेशो हि तालुनि ।।
गोमांसभक्षणं तत्तु महापातकनाशनम् ।।47।।

जिह्वाप्रवेशसम्भूतवह्निनोत्पादितः खलु ।।
चन्द्रात्स्रवति यः सारः स स्यादमरवारुणी ।।48।।

चुम्बन्ती यदि लम्बिकाग्रमनिशं जिह्वारसस्पन्दिनी
सक्षारा कटुकाम्लदग्धसदृशी मध्वाज्यतुल्या तथा ।।
व्याधीनां हरणं जरान्तकरणं शस्त्रागमोदीरणं
तस्य स्यादमरत्वमष्टगुणितं सिद्धाङ्गनाकर्षणम् ।।49।।

मूर्ध्नः षोडशपत्रपद्मगलितं प्राणादवाप्तं हठादूर्ध्वास्यो रसनां नियम्य विवरे शक्तिं परां चिन्तयन् ।। उत्कल्लोलकलाजलं च विमलं धारामयं यः पिबेन्निर्व्याधिः स मृणालकोमलवपुर्योगी चिरं जीवति ।।50।।

यत्प्रालेयं प्रहितसुषिरं मेरुमूर्धांतरस्थं
तस्मिंस्तत्त्वं प्रवदति सुधीस्तन्मुखं निम्नगानाम् ।।
चन्द्रात्सारः स्रवति वपुषस्तेन मृत्युर्नराणां
तद्बध्नीयात्सुकरणमथो नान्यथा कार्यसिद्धिः ।। 51।।

सुषिरं ज्ञानजनकं पञ्चस्रोतःसमन्वितम् ।।
तिष्ठते खेचरी मुद्रा तस्मिन् शून्ये निरञ्जने ।।52।।

एकं सृष्टिमयं बीजमेका मुद्रा च खेचरी ।।
एको देवो निरालम्ब एकाधस्था मनोन्मनी ।।53।।

अथोड्डीयानबन्धः ।।

बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः ।
तस्मादुड्डीयनाख्योऽयं योगिभिः समुदाहृतः ।।54।।

उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः ॥
उड्डीयानं तदेव स्यात्तत्र बन्धोऽभिधीयते ॥55॥

उदरे पश्चिमं तानं नाभेरूर्ध्वं च कारयेत् ॥
उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेसरी ॥56॥

उड्डियानं तु सहजं गुरुणा कथितं सदा ॥
अभ्यसेत्सततं यस्तु वृद्धोऽपि तरुणायते ॥57॥

नाभेरूर्ध्वमधश्चापि तानं कुर्यात्प्रयत्नतः ॥
षण्मासमभ्यसेन्मृत्युं जयत्येव न संशयः ॥58॥

सर्वेषामेव बन्धानामुत्तमो ह्युड्डियानकः ॥
उड्डियाने दृढे बन्धे मुक्तिः स्वाभाविकी भवेत् ॥59।

अथ मूलबन्धः ॥

पार्ष्णि भागेन सम्पीडय योनिमाकुञ्चयेद्गुदम् ॥
अपानमूर्ध्वमाकृष्य मूलबन्धोऽभिधीयते ॥60॥

अधोगतिमपानं वा ऊर्ध्वगं कुरुते बलात्
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिनः ॥61॥

गुदं पार्ष्ण्या तु सम्पीड्य वायुमाकुञ्चयेद् बलात् ॥
वारंबारं यथा चोर्ध्वं समायाति समीरणः ॥62॥

प्राणापानौ नादबिन्दू मूलबन्धेन चैकताम् ॥
गत्वा योगस्य संसिद्धिं गच्छतो नात्र संशयः ॥63॥

अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः ॥
युवा भवति वृद्धोऽपि सततं मूलबन्धनात् ॥64॥

अपाने ऊर्ध्वगे जाते प्रयाते वह्निमण्डलम् ॥
तदाऽनलशिखा दीर्घा जायते वायुनाऽऽहता ॥65॥

देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम् ।
त्रिकोणं तु मनुष्याणां चतुरस्रं चतुष्पदाम् ॥
मण्डलं तु पतङ्गानां सत्यमेतद्ब्रवीमि ते ।
तन्मध्ये तु शिखा तन्वी सदा तिष्ठति पावके ॥

याज्ञवल्क्ये—

ततो यातो वह्न्यपानौ प्राणमुष्णस्वरूपकम् ।
तेनात्यन्तप्रदीप्तस्तु ज्वलनो देहजस्तथा ॥66॥

तेन कुण्डलिनी सुप्ता सन्तप्ता सम्प्रबुध्यते ।
दण्डाहता भुजङ्गीव निश्वस्य ऋजुतां व्रजेत् ॥67॥

विलं प्रविष्टेव ततो ब्रह्मनाड्यन्तरं व्रजेत् ।
तस्मान्नित्यं मूलबन्धः कर्त्तव्यो योगिभिः सदा ॥68॥

अथ जालन्धरबन्धः ॥

कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढम् ।
बन्धो जालन्धराख्योऽयं जरामृत्युविनाशकः ॥69॥

बध्नाति हि शिराजालमधोगामि नभोजलम् ।
ततो जालन्धरो बन्धः कण्ठदुःखौधनाशनः ॥70॥

जालन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे ।
न पीयूषं पतत्यग्नौ न च वायुः प्रकुप्यति ॥71॥

कण्ठसङ्कोचनेनैव द्वे नाड्यौ स्तम्भयेद्दृढम् ।
मध्यचक्रमिदं ज्ञेयं षोडशाधारबन्धनम् ॥72॥

अङ्गुष्ठगुल्फजानूरुसीवनीकण्ठलिङ्गनाभयः ।
हृद्ग्रीवा कण्ठदेशश्च लम्बिका नासिका तथा ॥
भ्रूमध्यं च ललाटं च मूर्धा च ब्रह्मरन्ध्रकम् ।
एते हि षोडशाधाराः कथिता योगिपुङ्गवैः ॥

मूलस्थानं समाकुञ्च्य उड्डीयानं तु कारयेत् ॥
इडां च पिङ्गलां बध्वा वाहयेत्पश्चिमे पथि ॥73॥

अनेनेन विधानेन प्रयाति पवनो लयम् ।
ततो न जायते मृत्युर्जरारोगादिकं तथा ॥74॥

बन्धत्रयमिदं श्रेष्ठं महासिद्धैश्च सेवितम् ।
सर्वेषां हठतन्त्राणां साधनं योगिनो विदुः ॥75॥

यत्किञ्चित्स्रवते चन्द्रादमृतं दिव्यरूपिणः ।
तत्सर्वं ग्रसते सूर्यस्तेन पिण्डो जरायुतः ॥76॥

तत्रास्ति करणं दिव्यं सूर्यस्य मुखवञ्चनम् ।
गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः ॥77॥

अथ विपरीतकरणी ॥

ऊर्ध्वं नाभेरधस्तालोरूर्ध्वं भानुरधः शशी ।
करणी विपरीताख्या गुरुवाक्येन लभ्यते ॥78॥

नित्यमभ्यासयुक्तस्य जठराग्निविवर्धिनी ।
आहारो बहुलस्तस्य सम्पाद्यः साधकस्य च ॥
अल्पाहारो यदि भवेदग्निर्दहति तत्क्षणात् ॥79॥

अधःशिराश्चोर्ध्वपादः क्षणं स्यात्प्रथमे दिने ॥
क्षणाच्च किञ्चिदधिकमभ्यसेच्च दिने दिने ॥80॥

वलितं पलितं चैव षण्मासोर्ध्वं न दृश्यते ॥
याममात्रं तु यो नित्यमभ्यसेत्स तु कालजित् ॥ 81॥

अथ वज्रोली ॥

स्वेच्छया वर्तमानोऽपि योगोक्तैर्नियमैर्विना ।
वज्रोलीं यो विजानाति स योगी सिद्धिभाजनम् ॥82॥

तत्र वस्तुद्वयं वक्ष्ये दुर्लभं यस्य कस्यचित् ।
क्षीरं चैकं द्वितीयं तु नारी च वशवर्तिनी ॥83॥

मेहनेन शनैः सम्यगूर्ध्वाकुञ्चनमभ्यसेत् ॥
पुरुषोऽप्यथवा नारी वज्रोलीसिद्धिमाप्नुयात् ॥84॥

यत्नतः शस्तनालेन फूत्कारं वज्रकन्दरे ।
शनैः शनैः प्रकुर्वीत यायुसञ्चारकारणात् ॥85॥

नारीभगे पतद्बिन्दुमभ्यासेनोर्ध्वमाहरेत् ।
चलितं च निजं बिन्दुमूर्ध्वमाकृष्य रक्षयेत् ॥86॥

एवं संरक्षयेद् बिन्दुं मृत्युं जयति योगवित् ।
मरणं बिन्दुपातेन जीवनं बिन्दुधारणात् ॥87॥

सुगन्धो योगिनो देहे जायते बिन्दुधारणात् ।
यावद् विन्दुः स्थिरो देहे तावत्कालभयं कुतः ॥88॥

चित्तायत्तं नृणां शुक्रं शुक्रायत्तं च जीवितम् ।
तस्माच्छुक्रं मनश्चैव रक्षणीयं प्रयत्नतः ॥89॥

अथ सहजोलिः ॥

सहजोलिश्चामरोलिर्वज्रोल्या भेद एकतः ।
जलेषु भस्म निक्षिप्य दग्धगोमयसम्भवम् ॥90॥

वज्रोलीमैथुनादूर्ध्वं स्त्रीपुंसोः स्वाङ्गलेपनम् ।।
आसीनयोः सुखेनैव मुक्तव्यापकयोः क्षणात् ।।91।।

सहजोलिरियं प्रोक्ता श्रद्धेया योगिभिः सदा ।।
अयं शुभकरो योगो भोगयुक्तोऽपि मुक्तिदः ।।92।।

अयं योगः पुण्यवतां धीराणां तत्त्वदर्शिनाम् ।।
निर्मत्सराणां सिध्येत न तु मत्सरशालिनाम् ।।93।।

अथामरोली ।।

पित्तोल्वणत्वात्प्रथमाम्बुधारां विहाग निसारतयान्त्यधारा ।
निषेव्यते शीतलमध्यधारा कापालिके खण्डमतेऽमरोली ।।94।।

अमरीं यः पिबेन्नित्यं नस्यं कुर्वन् दिने दिने ।।
वज्रोलीमभ्यसेत्सम्यगमरोलीति कथ्यते ।।95।।

अभ्यासान्निःसृतां चान्द्रीं विभूत्या सह मिश्रयेत् ।।
धारयेदुत्तमाङ्गेषु दिव्यदृष्टिः प्रजायते ।।96।।

अथ शक्तिचालनम् ।।

कुटिलाङ्गी कुण्डलिनी भुजङ्गी शक्तिरीश्वरी ।।
कुंण्डल्यरुन्धती चैते शब्दाः पर्यायवाचकाः ।।97।।

उद्घाटयेत्कपाटं तु यथा कुञ्चिकया हठात् ।।
कुण्डलिन्या तथा योगी मोक्षद्वारं विभेदयेत् ।।98।।

येन मार्गेण गन्तव्यं ब्रह्मस्थानं निरामयम् ।।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ।।99।।

कन्दोर्ध्वं कुण्डली शक्तिः सुप्ता मोक्षाय योगिनाम् ।।
बन्धनाय च मूढानां यस्तां वेत्ति स योगवित् ।।100।।

कुण्डली कुटिलाकारा सर्पवत्परिकीर्तिता ।।
सा शक्तिश्चालिता येन स मुक्तो नात्र संशयः ।।101।।

गङ्गायमुनयोर्मध्ये बालरण्डा तपस्विनी ।।
बलात्कारेण गृह्णीयात्तद्विष्णोः परमं पदम् ।।102।।

इडा भगवती गङ्गा पिङ्गला यमुना नदी ।।
इडापिङ्गलयोर्मध्ये बालरण्डा च कुण्डली ।।103।।

पुच्छे प्रगृह्य भुजगीं सुप्तामुद्बोधयेच्च ताम् ।।
निद्रां विहाय सा शक्तिरूर्ध्वमुत्तिष्ठते हठात् ।।104।।

अवस्थिता चैव फणावती सा प्रातश्च सायं प्रहरार्धमात्रम् ।।
प्रपूर्य सूर्यात्परिधानयुक्त्या प्रगृह्य नित्यं परिचालनीया ।।105।।

ऊर्ध्वं वितस्तिमात्रं तु विस्तारं चतुरङ्गुलम् ।।
मृदुलं धवलं प्रोक्तं वेष्टिताम्बरलक्षणम् ।।106।।

सति वज्रासने पादौ कराभ्यां धारयेद् दृढम् ।।
गुल्फदेशसमीपे च कन्दं तत्र प्रपीडयेत् ।।107।।

वज्रासने स्थितो योगी चालयित्वा च कुण्डलीम् ।।
कुर्यादनन्तरं भस्त्रां कुण्डलीमाशु बोधयेत् ।।108।।

भानोराकुञ्चनं कुर्यात्कुण्डलीं चालयेत्ततः ।।
मृत्युवक्त्रगतस्यापि तस्य मृत्युभयं कुतः ।।109।।

मुहूर्तद्वयपर्यन्तं निर्भयं चालनादसौ ।।
ऊर्ध्वमाकृष्यते किञ्चित्सुषुम्नायां समुद्गता ।।110।।

तेन कुण्डलिनी तस्याः सुषुम्नायां मुखं ध्रुवम् ।।
जहाति तस्मात्प्राणोऽयं सुषुम्नां व्रजति स्वतः ।।111।।

तस्मात्सञ्चालयेन्नित्यं सुखसुप्तामरुन्धतीम् ।।
तस्माः सञ्चालनेनैव योगी रोगैः प्रमुच्यते ।।112।।

येन सञ्चालिता शक्तिः स योगी सिद्धिभाजनम् ।।
किमत्र बहुनोक्तेन कालं जयति लीलया ।।113।।

ब्रह्मचर्यरतस्यैव नित्यं हितमिताशिनः ।।
मण्डलाद्दृश्यते सिद्धिः कुण्डल्याभ्यासयोगिनः ।।114।।

कुण्डलीं चालयित्वा तु भस्त्रां कुर्याद्विशेषतः ।।
एवमभ्यसतो नित्यं यमिनो यमभीः कुतः ।।115।।

द्वासप्ततिसहस्राणां नाडीनां मलशोधने ।
कुतः प्रक्षालनोपायः कुण्डल्यभ्यसनादृते ।।116।।

इयं तु मध्यमा नाडी दृढाभ्यासेन योगिनाम् ।
आसनप्राणसंयाममुद्राभिः सरला भवेत् ।।117।।

अभ्यासे तु विनिद्राणां मनो धृत्वा समाधिना ।
रुद्राणी वा यदा मुद्राभद्रां सिद्धिं प्रयच्छति ।।118।।

राजयोगं विना पृथ्वी राजयोगं विना निशा ।
राजयोगं विना मुद्रा विचित्रापि न शोभते ॥119॥

मारुतस्य विधिं सर्वं मनोयुक्तं समभ्यसेत् ।
इतरत्र न कर्तव्या मनोवृत्तिर्मनीषिणा ॥120॥

इति मुद्रा दश प्रोक्ता आदिनाथेन शम्भुना ।
एकैका तासु यमिनां महासिद्धिप्रदायिनी ॥121॥

उपदेशं हि मुद्राणां यो दत्ते साम्प्रदायिकम् ।
स एव श्रीगुरुः स्वामी साक्षादीश्वर एव सः ॥122॥

तस्य वाक्यपरो भूत्वा मुद्राभ्यासे समाहितः ।
अणिमादिगुणैः सार्धं लभते कालवञ्चनम् ॥123॥

इति हठप्रदीपिकायां तृतीयोपदेशः ॥3॥

चतुर्थोपदेशः ।

नमः शिवाय गुरवे नादबिन्दुकलात्मने ।
निरञ्जनपदं याति नित्यं यत्र परायणः ।।1।।

अथेदानीं प्रवक्ष्यामि समाधिक्रममुत्तमम् ।।
मृत्युघ्नं च सुखोपायं ब्रह्मानन्दकरं परम् ।।2।।

राजयोगसमाधिश्च उन्मनी च मनोन्मनी ।
अमरत्वं लयस्तत्त्वं शून्याशून्यं परं पदम् ।।3।।

अमनस्कं तथा द्वैतं निरालम्बं निरञ्जनम् ।
जीवन्मुक्तिश्च सहजा तुर्या चेत्येकवाचकाः ।।4।।

सलिले सैन्धवं यद्वत्साम्यं भजति योगतः ।
तथात्ममनसोरैक्यं समाधिरभिधीयते ।।5।।

यदा संक्षीयते प्राणो मानसं च प्रलीयते ।
तदा समरसत्वं च समाधिरभिधीयते ।।6।।

तत्समं च द्वयोरैक्यं जीवात्मपरमात्मनोः ।
प्रनष्टसर्वसङ्कल्पः समाधिः सोऽभिधीयते ।।7।।

राजयोगस्य माहात्म्यं को वा जानाति तत्त्वतः ।
ज्ञानं मुक्तिः स्थितिः सिद्धिर्गुरुवाक्येन लभ्यते ।।8।।

दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम् ।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ।।9।।

विविधैरासनैः कुम्भैर्विचित्रैः करणैरपि ।
प्रबुद्धायां महाशक्तौ प्राणः शून्ये प्रलीयते ।।10।।

उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः ।
योगिनः सहजावस्था स्वयमेव प्रजायते ।।11।।

सुषुम्नावाहिनि प्राणे शून्ये विशति मानसे ।
तदा सर्वाणि कर्माणि निर्मूलयति योगवित् ॥12॥

अमराय नमस्तुभ्यं सोऽपि कालस्त्वया जितः ।
पतितं वदने यस्य जगदेतच्चराचरम् ॥13॥

चित्ते समत्वमापन्ने वायौ व्रजति मध्यमे ।
तदामरोली वज्रोली सहजोली प्रजायते ॥14॥

ज्ञानं कुतो मनसि सम्भवतीह तावत्
प्राणोऽपि जीवति मनो म्रियते न यावत् ।
प्राणो मनो द्वयमिदं विलयं नयेद्यो
मोक्षं स गच्छति नरो न कथञ्चिदन्यः ॥15॥

ज्ञात्वा सुषुम्नासद्भेदं कृत्वा वायुं च मध्यगम् ॥
स्थित्वा सदैव सुस्थाने ब्रह्मरन्ध्रे निरोधयेत् ॥16॥

सूर्याचन्द्रमसौ धत्तः कालं रात्रिन्दिवात्मकम् ॥
भोक्त्री सुषुम्ना कालस्य गुह्यमेतदुदाहृतम् ॥17॥

द्वासप्ततिसहस्राणि नाडीद्वाराणि पञ्जरे ॥
सुषुम्ना शाम्भवी शक्तिः शेषास्त्वेव निरर्थका ॥18॥

वायुः परिचितो यस्मादग्निना सह कुण्डलीम् ॥
बोधयित्वा सुषुम्नायां प्रविशेदनिरोधतः ॥19॥

सुषुम्ना वाहिनि प्राणे सिद्ध्यत्येव मनोन्मनी ॥
अन्यथा त्वितराभ्यासाः प्रयासायैव योगिनाम् ॥20॥

पवनो बध्यते येन मनस्तेनैव बध्यते ॥
मनश्च बध्यते येन पवनस्तेन बध्यते ॥21॥

हेतुद्वयं तु चित्तस्य वासना च समीरणः ॥
तयोर्विनष्ट एकस्मिन्नृतौ द्वावपि नश्यतः ॥22॥

मनो यत्र विलीयेत पवनस्तत्र लीयते ॥
पवनो लीयते यत्र मनस्तत्र विलीयते ॥23॥

दुग्धाम्बुवत्सम्मिलितावुभौ तौ तुल्यक्रियौ मानसमारुतौ हि ॥
यतो मरुत्तत्र मनः प्रवृत्तिर्यतो मनस्तत्र मरुत्प्रवृत्तिः ॥24॥

तत्रैकनाशादपरस्य नाश एकप्रवृत्तेरपरप्रवृत्तिः ॥
अध्वस्तयोश्चेन्द्रियवर्गवृत्तिः प्रध्वस्तयोर्मोक्षपदस्य सिद्धिः ॥25॥

रसस्य मनसश्चैव चञ्चलत्वं स्वभावतः ।।
रसो बद्धो मनो बद्धं किन्न सिद्ध्यति भूतले ।।26।।

मूर्च्छितो हरते व्याधीन्मृतो जीवयति स्वयम् ।।
बद्धः खेचरतां धत्ते रसो वायुश्च पार्वति ।।27।।

मनः स्थैर्ये स्थिरो वायुस्ततो बिन्दुः स्थिरो भवेत् ।।
बिन्दुस्थैर्यात्सदा सत्त्वं पिण्डस्थैर्यं प्रजायते ।।28।।

इन्द्रियाणां मनो नाथो मनोनाथस्तु मारुतः ।।
मारुतस्य लयो नाथः स लयो नादमाश्रितः ।। 29 ।।

सोऽयमेवास्तु मोक्षाख्यो मास्तु वापि मतान्तरे ।।
मनः प्राणलये कश्चिदानन्दः सम्प्रवर्तते ।। 30 ।।

प्रनष्टश्वासनिश्वासः प्रध्वस्तविषयग्रहः ।।
निश्चेष्टो निर्विकारश्च लयो जयति योगिनाम् ।। 31 ।।

उच्छिन्नसर्वसङ्कल्पो निःशेषाशेषचेष्टितः ।।
स्वावगम्यो लयः कोऽपि जायते वागगोचरः ।। 32 ।।

लयो लय इति प्राहुः कीदृशं लयलक्षणम् ।।
अपुनर्वासनोत्थानाल्लयो विषयविस्मृतिः ।। 33 ।।

अथ शाम्भवी मुद्रा

वेदशास्त्रपुराणानि सामान्यगणिका इव ।।
एकैव शाम्भवी मुद्रा गुप्ता कुलवधूरिव ।। 34 ।।

अन्तर्लक्ष्यं वहिर्दृष्टिर्निमेषोन्मेषवर्जिता ।।
एषा सा शाम्भवी मुद्रा वेदशास्त्रेषु गोपिता ।। 35 ।।

अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन्नपश्यन्नपि ।।
मुद्रेयं खलु शाम्भवी भवति सा लब्धा प्रसादाद् गुरोः
शून्याशून्यविलक्षणं स्फुरति तत्तत्वं परं शाम्भवम् ।। 36 ।।

श्रीशाम्भव्याश्च खेचर्या अवस्थाधामभेदतः ।।
भवेच्चित्तलयानन्दः शून्ये चित्सुखरूपिणि ।। 37 ।।

अथोन्मनी ॥

तारे ज्योतिषि संयोज्य किञ्चिदुन्नमयेद् भ्रुवौ ॥
पूर्वयोगं मनो युञ्जन्नुन्मनीकारकः क्षणात् ॥ 38 ॥

केचिदागमजालेन केचिन्निगमसङ्कुलैः ॥
केचित्तर्केण मुह्यन्ति नैव जानन्ति तारकम् ॥ 39 ॥

अर्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षणः
चन्द्रार्कावपि लीनतामुपनयन्निस्पन्दभावेन यः ॥
ज्योतीरूपमशेषबीजमखिलं देदीप्यमानं परं
तत्त्वं तत्पदमेति वस्तु परमं वाच्यं किमत्राधिकम् ॥ 40 ॥

दिवा न पूजयेल्लिङ्गं रात्रौ चैव न पूजयेत् ॥
सर्वदा पूजयेल्लिङ्गं दिवारात्रिनिरोधतः ॥ 41 ॥

अथ खेचरी ॥

सव्यदक्षिणनाडिस्थो मध्ये चरति मारुतः ॥
तिष्ठते खेचरी मुद्रा तस्मिन् स्थाने न संशयः ॥ 42 ॥

इडापिङ्गलयोर्मध्ये शून्यं चैवानिलं ग्रसेत् ॥
तिष्ठते खेचरी मुद्रा तत्र सत्यं पुनः पुनः ॥ 43 ॥

सूर्याचन्द्रमसोर्मध्ये निरालवान्तरं पुनः ॥
संस्थिता व्योमचक्रे या सा मुद्रा नाम खेचरी ॥ 44 ॥

सोमाद्यत्रोदिता धारा साक्षात्सा शिववल्लभा ॥
पूरयेदतुलां दिव्यां सुषुम्नां पश्चिमे मुखे ॥ 45 ॥

पुरस्ताच्चैव पूर्येत निश्चिता खेचरी भवेत् ।
अभ्यस्ता खेचरी मुद्राप्युन्मनी सम्प्रजायते ॥ 46 ॥

भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते ।
ज्ञातव्यं तत्पदं तुर्यं तत्र कालो न विद्यते । 47 ॥

अभ्यसेत्खेचरीं तावद्यावत्स्याद्योगनिद्रितः ।
सम्प्राप्तयोगनिद्रस्य कालो नास्ति कदाचन ॥ 48 ॥

निरालम्बं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ।
स बाह्याभ्यन्तरे व्योम्नि घटवत्तिष्ठति ध्रुवम् ।। 49

बाह्यवायुर्यथा लीनस्तथा मध्ये न संशयः ।
स्वस्थाने स्थिरतामेति पवनो मनसा सह ।। 50

एवमभ्यसमानस्य वायुमार्गे दिवानिशम् ।
अभ्यासाज्जीर्यते वायुर्मनस्तत्रैव लीयते ।। 51 ।।

अमृतैः प्लावयेद्देहमापादतलमस्तकम् ।
सिध्यत्येव महाकायो महाबलपराक्रमः ।। 52 ।।

इति खेचरी ।।

शक्तिमध्ये मनः कृत्वा शक्तिं मानसमध्यगाम् ।
मनसा मन आलोक्य धारयेत्परमं पदम् ।। 53 ।।

खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ।
सर्वं च खमयं कृत्वा न किञ्चिदपि चिन्तयेत् ।। 54 ।।

अन्तः शून्यो बहिः शून्यः शून्यः कुम्भ इवाम्बरे ।।
अन्तः पूर्णो बहिः पूर्णः पूर्णः कुम्भ इवार्णवे ।। 55 ।।

बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तनम् ।
सर्वचिन्तां परित्यज्य न किञ्चिदपि चिन्तयेत् ।। 56 ।।

सङ्कल्पमात्रकलनैव जगत्समग्रं
सङ्कल्पमात्रकलनैव मनोविलासः ।
सङ्कल्पमात्रमतिमुत्सृज निर्विकल्प-
माश्रित्य निश्चयमवाप्नुहि राम शान्तिम् ।।57।।

कर्पूरमनले यद्वत्सैन्धवं सलिले तथा ।
तथा सन्धीयमानं च मनस्तत्त्वे विलीयते ।। 58 ।।

ज्ञेयं सर्वं प्रतीतं च ज्ञानं च मन उच्यते ।
ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः ।। 59 ।।

मनोदृश्यमिदं सर्वं यत्किञ्चित्सचराचरम् ।
मनसो ह्युन्मनीभावाद्द्वैतं नैवोपलभ्यते ।। 60 ।।

ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम् ।
मनसो विलये जाते कैवल्यमवशिष्यते ।। 61 ।।

एवं नानाविधोपायाः सम्यक् स्वानुभवान्विताः ।
समाधिमार्गाः कथिताः पूर्वाचार्यैर्महात्मभिः ।। 62 ।।

सुषुम्नायै कुण्डलिन्यै सुधायै चन्द्रजन्मने ।
मनोन्मन्यै नमस्तुभ्यं महाशक्त्यै चिदात्मने ।। 63 ।।

अशक्यतत्त्वबोधानां मूढानामपि सम्मतम् ।
प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते ।। 64 ।।

श्रीआदिनाथेन सपादकोटिलयप्रकाराः कथिता जयन्ति ।
नादानुसन्धानकमेकमेव मन्यामहे मुख्यतमं लयानाम् ।। 65 ।।

मुक्तासने स्थितो योगी मुद्रां सन्ध्याय शाम्भवीम् ।
श्रृणुयाद्दक्षिणे कर्णे नादमन्तस्थमेकधीः ।। 66 ।।

श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं कार्यम् ।।
शुद्धासुषुम्नासरणौ स्फुटममलः श्रूयते नादः ।। 67 ।।

आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्वयोगेषु स्यादवस्थाचतुष्टयम् ।। 68 ।।

अथारम्भावस्था ।।

ब्रह्मग्रन्थेर्भवेद्भेदोत्थानन्दः शून्यसम्भवः ।
विचित्रः क्वणको देहेऽनाहतः श्रूयते ध्वनिः ।। 69 ।।

दिव्यदेहश्च तेजस्वी दिव्यगन्धस्त्वरोगवान् ।
सम्पूर्णहृदयः शून्य आरम्भो योगवान् भवेत् ।। 70

अथ घटावस्था ।।

द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ।।71।।

विष्णुग्रन्थेस्ततो भेदात्परमानन्दसूचकः ।
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत् ।। 72 ।।

अथ परिचयावस्था ॥

तृतीयायां तु विज्ञेयो विहायोमर्दलध्वनिः ।
महाशून्यं तदा याति सर्वसिद्धिसमाश्रयम् ॥ 73 ॥

चित्तानन्दं तदा जित्वा सहजानन्दसम्भवः ।
दोषदुःखजराव्याधिक्षुधानिद्राविवर्जितः ॥ 74 ॥

रुद्रग्रन्थिं यदा भित्वा शर्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥ 75 ॥

एकीभूतं तदा चित्तं राजयोगाभिधानकम् ।
सृष्टिसंहारकर्तासौ योगीश्वरसमो भवेत् ॥ 76 ॥

अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम् ।
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते ॥ 77 ॥

राजयोगमजानन्तः केवलं हठकर्मिणः ।
एतानभ्यासिनो मन्ये प्रयासफलवर्जितान् ॥ 78 ॥

उन्मन्यवाप्तये शीघ्रं भ्रूध्यानं मम सम्मतम् ।
राजयोगपदं प्राप्तं सुखोपायोऽल्पचेतसाम् ॥
सद्यः प्रत्ययसन्धायी जायते नादजो लयः ॥ 79 ॥

नादानुसन्धानसमाधिभाजां योगीश्वराणां हृदि वर्धमानम् ।
आनन्दमेकं वचसामगम्यं जानाति तं श्रीगुरुनाथ एकः ॥ 80 ॥

कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः ।
तत्र चित्तं स्थिरीकुर्याद्यावत्स्थिरपदं व्रजेत् ॥ 81 ॥

अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम् ॥
पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत् ॥ 82 ॥

श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ।
ततोऽभ्यासे वर्धमाने श्रूयते बहुसूक्ष्मकः ॥ 83 ॥

आदौ जलधिजीमूतभेरीझर्झरसम्भवाः ।
मध्ये मर्दलशङ्खोत्था घण्टाकाहलजास्तथा ।। 84 ।।

अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनाः ।
इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः 85 ।।

महति श्रूयमाणेऽपि मेघभेर्यादिके ध्वनौ ।
तत्र सूक्ष्मात्सूक्ष्मतरं नादमेव परामृशेत् ।। 86 ।।

घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने ।
रममाणमपि क्षिप्तं मनो नान्यत्र चालयेत् ।। 87 ।।

यत्रकुत्रापि वा नादे लगति प्रथमं मनः ।।
तत्रैव सुस्थिरीभूय तेन सार्धं विलीयते ।। 88 ।।

मकरन्दं पिबन् भृङ्गो गन्धं नापेक्षते यथा ।।
नादासक्तं तथा चित्तं विषयान्नहि काङ्क्षते ।। 89 ।।

मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः ।।
नियमने समर्थोऽयं निनादनिशिताङ्कुशः ।। 90 ।।

बद्धं तु नादबन्धेन मनः सन्त्यक्तचापलम् ।।
प्रयाति सुतरां स्थैर्यं छिन्नपक्षः खगो यथा ।। 91 ।।

सर्वचिन्तां परित्यज्य सावधानेन चेतसा ।।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता ।। 92 ।।

नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते ।।
अन्तरङ्गकुरङ्गस्य वधे व्याधायतेऽपि च ।। 93 ।।

अन्तरङ्गस्य यमिनो वाजिनः परिघायते ।।
नादोपास्तिरतो नित्यमवधार्या हि योगिना ।। 94 ।।

बद्धं विमुक्तचाञ्चल्यं नादगन्धकजारणात् ।।
मनः पारदमाप्नोति निरालम्बाख्यखेटनम् ।। 95 ।।

नादश्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः ।।
विस्मृत्य सर्वमेकाग्रः कुत्रचिन्नहि धावति ।। 96 ।।

काष्ठे प्रवर्तितो वह्निः काष्ठेन सह शाम्यति ।।
नादे प्रवर्तितं चित्तं नादेन सह लीयते ।। 97 ।।

घण्टादिनादसक्तस्तब्धान्तःकरणहरिणस्य ।।
प्रहरणमपि सुकरं शरसन्धानप्रवीणश्चेत् ।।98।।

अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते ।।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः ।।
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ।। 99 ।।

तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्तते ।।
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते ।। 100 ।।

यत्किञ्चिन्नादरूपेण श्रूयते शक्तिरेव सा ।।
यस्तत्त्वान्तो निराकारः स एव परमेश्वरः ।। 101 ।।

सर्वे हठलयोपाया राजयोगस्य सिद्धये ।।
राजयोगसमारूढः पुरुषः कालवञ्चकः ।। 102 ।।

तत्त्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः ।।
उन्मनी कल्पलतिका सद्य एव प्रवर्तते ।। 103 ।।

सदा नादानुसन्धानात् क्षीयन्ते पापसञ्चयाः ।।
निरञ्जने विलीयेते निश्चितं चित्तमारुतौ ।। 104 ।।

शङ्खदुन्दुभिनादं च न शृणोति कदाचन ।।
काष्ठवज्जायते देह उन्मन्यवस्थया ध्रुवम् ।। 105 ।।

सर्वावस्थाविनिर्मुक्तः सर्वचिन्ताविवर्जितः ।।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः ।। 106 ।।

खाद्यते न च कालेन बाध्यते न च कर्मणा ।।
साध्यते न स केनापि योगी युक्तः समाधिना ।। 107 ।।

न गन्धं न रसं रूपं न च स्पर्शं न निःस्वनम् ।।
नात्मानं न परं वेत्ति योगी युक्तः समाधिना ।। 108 ।।

चित्तं न सुप्तं नोजाग्रत्स्मृतिविस्मृतिवर्जितम् ।।
न चास्तमेति नोदेति यस्यासौ मुक्त एव सः ।। 109 ।।

न विजानाति शीतोष्णं न दुःखं न सुखं तथा ।।
न मानं नापमानं च योगी युक्तः समाधिना ।। 110 ।।

स्वस्थो जाग्रदवस्थायां सुप्तवद्योऽवतिष्ठते ।।
निःश्वासोच्छ्वासहीनश्च निश्चितं मुक्त एव सः ।। 111 ।।

अवध्यः सर्वशस्त्राणामशक्यः सर्वदेहिनाम् ।।
अग्राह्यो मन्त्रयन्त्राणां योगी युक्तः समाधिना ।। 112 ।।

यावन्नैव प्रविशति चरन्मारुतो मध्यमार्गे
यावद्विन्दुर्न भवति दृढप्राणवानप्रबन्धात् ।
यावद्ध्याने सहजसदृशं जायते नैव तत्त्वं
तावज्ज्ञानं वदति तदिदं दम्भमिथ्याप्रलापः ।। 113 ।।

इति हठप्रदीपिकायां समाधिलक्षणं नाम चतुर्थोपदेशः ।। 4 ।।

नोट—मुख्य सन्दर्भ ग्रन्थ सूची के क्रम

क्रम संख्या 9 में 6 के स्थान पर 7
,, ,, 31 में 20 के स्थान पर 21
,, ,, 34 में 20 के स्थान पर 21
,, ,, 64 में 45 के स्थान पर 46
,, ,, 65 में 48 के स्थान पर 49 पाठ पढ़ा जाये ।

श्लोकानुक्रमणी

(न)

(प)

(ब)

(भ)

(म)

(य)

(र)

(ल)

(व)

(श)

(श्र)

(ष)

(स)

(ह)

अनुक्रमणी

सांख्य-दर्शन का इतिहास

अनु०—डॉ० शिव कुमार

प्रस्तुत पुस्तिका ए० बी० कीथ की **The Sāṁkhya System** नामक पुस्तक का अनुवाद है। कीथ की यह पुस्तक प्राचीनता, सारगर्भितता, विशदता एवं सर्वाङ्गीण विवेचन के उपरान्त भी आङ्गल भाषा में होने के कारण सांख्य दर्शन के अध्येताओं का यथोचित ध्यान आकर्षित नहीं कर सकी। अतः इसका हिन्दी अनुवाद आवश्यक समझा गया।

विषय की विविधता के आधार पर पुस्तक को आठ अध्यायों में विभक्त किया गया है। **प्रथम अध्याय** में उपनिषदों में उपलब्ध सांख्य का वर्णन है। **दूसरे अध्याय** में सांख्य और बौद्ध दर्शन का ऐतिहासिक और तुलनात्मक अध्ययन है। **तीसरे अध्याय** में विकसनशील महाकाव्यों में सांख्य के स्वरूप का विवेचन है। **चतुर्थ अध्याय** में सांख्य और योग का काल-क्रम की दृष्टि से तुलनात्मक अध्ययन है। **पांचवें अध्याय** में सांख्य के एक प्राचीन परन्तु अनुपलब्ध ग्रन्थ षष्टितन्त्र का विवेचन है। **छठे अध्याय** में ग्रीक और सांख्य दर्शन का तुलनात्मक अध्ययन है। **सातवें अध्याय** में सांख्य-कारिका और **अन्तिम आठवें अध्याय** में उत्तरवर्ती सांख्य-दार्शनिकों के योगदान का विवेचन है। आशा है प्रस्तुत अनुवाद कीथ के विचारों को हिन्दी माध्यम से सांख्य दर्शन के अध्येताओं तक सुगमता से प्रेषित कर सकेगा।

मूल्य : रु० ५०.००